LIBRARY

सज्जनेन्द्रनरेन्द्रेण निर्मितं पुस्तकालयं
प्राकरं सार्थग्रन्थानामिदं वाणीविलासकं

श्लोकः

कोशं शब्दार्थ चिन्तामणि मथ रहितं पूर्णभावेन पूर्ण
कृत्वा श्रीसज्जनेश स्त्रिदिवपथ गत स्तत्प्रचाराय लोके ॥
तत्सूनु स्तातभक्तो नरपति फतह : सिंह भूपैकवीर :
विद्वत्कंठैकशोभा भरण विधिरुचिः प्रेषयत्येक कोशम् ॥ १ ॥

श्रीम त्फ़तह सिंहस्य नृपते : परमा ज्ञया ॥
कविराजः श्यामलाख्यः कोशं प्रेषयति ध्रुवम् ॥ २ ॥

By order of H. H. Maha Rana Fateh Sin
Presented to the Library of the Asiatic Socie
Bengal Calcutt

Oodeypore
July 2/86

(sd) Kavi Raj Shy
M

VOL. I

NOTICE.

THE SHABDARTH CHINTAMANI.

A NEW SANSKRIT LEXICON.

This new and valuable work, in the compilation of which Brahmâvadhûta Shri Sukhânand Natha of Delhi, spent more than thirty years of his life, "contains (as its name implies) the meanings of all words in general and colloquial use.

The following is a resumè of the plan on which this most useful work has been arranged

1st. The word-forms have been tested by the process suggested in the Grammatical Sutras of Panini.

2nd. The meanings of the words are derived from their roots, by which means not only correctness, but clearness of conception are secured. The Primary meaning is given first, and others are described according to their logical order.

The utmost care has been taken to express the meanings of the words in the best and simplest language — a feature in the construction of this work, which cannot fail to recommend it above all others for practical use.

3rd. Another point is well worthy of notice in the work, viz; that words which have special reference to Aryan Literature whether the Smritis, Purâns or Vedas, are clearly and briefly explained.

4th. Special attention has been paid to the full definition of Scientific and Technical terms, whether these occur in the Vedas Vedangas, Shastras, Chemistry, Mechanics or Music.

5th. The descriptions of weapons of warfare, metals, precious stones; and the directions for preparing the different kinds of soil for planting garden — and forest-trees are fully given.

6th. The officinal and non-officinal properties of drugs and the immediate causes of those diseases for which they may be given, have been fully described according to the best Medical Treatises on the subject.

7th. The author has specially adapted his work for Educational purposes in explaining the various Figures of Rhetoric employed in Poetry; also those feelings Poetry is calc[illegible] to excite, and by describing the different Metres.

8th. In the arrangement of the words the Alphabetical order is strictly preserved.

From these points it will be clearly seen that this excellent work will be an unerring guide to those who seek information on Political as well as Practical matters.

Fully convinced of the usefulness of such a Lexicon, Adi Gaur, Pt. Ghâsi-Ram (late Gumasta of Govt. Comurt Agra) resolved to undertake the publication of the first 2 Vols. as far as the letter [ग] but on account of the want of pecuniary assistance, he could not finish the remaining portion of the Dictionary.

About 16 years ago, the first two volumes were published, and are now in the libraries of many of the Chiefs, Nobles and Pandits of India, who deeply regret that the remaining 2 Vols. are not in their possession

However, no one seemed willing to undertake this arduous and important task until H. H. the late Mahá Raná Sajjan Singh G. C. S. I of Meywár, who during his life time was the Patron of Art and Literature, on hearing through Kavi Raja Shyámal Das of this unfinished Dictionary, issued orders that the remaining 2 vols (3rd & 4th) should be printed in the Ráj Press with all possible rapidity. So minute were H. H. the late Maha Rana's directions that he expressed the desire that the same kind of paper be used and type of equal clearness and legibility employed as in the first two volumes.

In fulfilment of His Highness' wishes, the work has been completed.

It is therefore requested that those who are desirous of obtaining the Lexicon send their names and full address to the undersigned.

Oodeypore, June 188[illegible]

Pundit Bansi Dhar Vajpai
Manager, Raj Press
Meywar.

शब्दार्थचिन्तामणिः

अर्थात्

गीर्वाणभाषासागरशेषशास्त्रानेककोशादिभ्यः सङ्गृहीतानामकारादिवर्ण
क्रमेण विन्यस्तानां शब्दानां तत्तल्लिङ्गनानार्थैकार्थपर्यायप्रयोगोल्लेखेन
पाणिन्युक्तनिष्पत्तिरूपैस्तत्तदर्थस्फुटीकरणेन तत्तच्छब्दप्रस्तावागतवे-
दाङ्गस्मृतिपुराणागमेतिहासादिप्रयोगैः सूर्यसिद्धान्तसङ्गीतादिशास्त्रीय
विषयाणां वर्णनैः शस्त्रास्त्रधातुरत्नादिपरीक्षाभिः ग्राम्यारण्यपशुप
क्ष्यादिवर्णनैर्दकार्गलेन सजलनिर्जलभूमिपरिज्ञानेनोद्यानवृक्षा
युर्वेदेन द्रव्यगुणरोगनिदानादिभिरलङ्कारच्छन्दःप्रभृतिनाम
लक्षणोदाहरणैश्च संयुक्तोऽखिलशास्त्रमताभिद्योतकः
सहृदयहृदयाह्लाददो ग्रन्थः ॥

तस्यायमवर्गकवर्गात्मकः प्रथमोभागः

शाक्तावधूतश्रीसुखानन्दनाथेन विनिर्मितः

एकविंशत्यधिकोनविंशतितमे १९२१ वैक्रमेऽब्दे आगरेति साधारणत
याविख्याते सुग्रपुरे आदिगौडश्रीघासीरामकनिष्ठयालालयोर्वे
तनयोर्निजे संस्कृतयन्त्रालये श्रीरामप्रसादद्वारामुद्राङ्किता
ऽभिव्यक्तः

S
491·23
S113P
v.1

ॐ

तत् सत्

शब्दार्थचिन्तामणे र्मुखबन्धः तत्राद्य

श्रीजगदानन्दनाथः

नमो गुरवे ॥ श्रीमद्गौडकुले नितान्तविपुले ऽडीचप्रथात्येऽतुले जातः पुष्करराज इत्यभिधया ख्यातो धरामण्डले । यत् सौजन्यसुधासरित्प्रवितरङ्गान्दोलनानन्दिता विद्यौदार्य्यदयादिशेवधिपराःसर्व्वे बभूवुर्ज्जनाः ॥ १ ॥ श्रीनन्दलालः सुकृते विशाल स्तुलादिरामस्सुमनोऽभिरामः । तदात्मजा वप्रतिमप्रभावौ श्रीरामरामानुजनैजभावौ ॥ २ ॥ श्रीनन्दलालपत्नी सुषुवे सुनुत्रयं सुता मेकाम् । प्रथमस्तु शम्भुनाथो ऽन्तरजो रामप्रसादाह्वः ॥ ३ ॥ मोतीरामो ऽवरजः सर्व्वे सकलार्थतत्त्वज्ञाः । देवी सुलक्षणासीद् याहि सती शीलसम्पन्ना ॥ ४ ॥ विद्वत्तुलारामसुतो भवानीशङ्करो ऽभवत् । ज्येष्ठःश्रेष्ठमति र्नाति संसारासक्तमानसः ॥ ५ ॥ द्वितीयः सम्भूतो धनपतिपुरो राज इव यं कुलीना नाम्नै नं जगति कृतवन्तो मुमुदिरे । प्रकृत्या ऽऽजन्मा ऽसौ विरलतरकर्म्मातिरसिको ह्यगा दप्रत्यक्षं निजजनत एकः शिवपुरीम् ॥ ६ ॥ त्रिचन्द्राब्दायुष्मान् परमपरतत्त्वं विविदिषुः पठित्वा शास्त्राणि प्रतिहरिहरानन्दपदतः ॥ प्रतीतं नाथाख्यं निखिलनिगमार्थैकसुधियं गतो ऽयं योगीद्रं कुशलमवधूतं कुलगुरुम् ॥ ७ ॥ प्रीत्या नमस्या सन्तुष्टः सद्गुरुः करुणानिधिः । त्वं सुखानन्दनाथो ऽसी त्याचष्ट हि यथो चितम् ॥ ८ ॥ श्रात्मावधूतपदवीं प्राप्य देशाननेकशः ॥ गाहं गाहं बहुविधान् दर्शं दर्शं जमत्रजान् ॥ ९ ॥ ज्वालामुखीं महादेवीं जालन्धरनिवासिनीम् ॥ जग्मिवान् सुपमं पश्यं स्तत्र स्थिति मुपाश्रयत् ॥ १० ॥ यात्राप्रसङ्गतो ऽस्मिन् भज्जीदेशाधिप स्तदा गतवान् ॥ राणादिरुद्रपालो ऽमृतपालसुतो महोदारः ॥ ११ ॥ पर्वतराज स्वतु… स्वतुषु यत्नेषु दीक्षितो विद्वान् ॥ श्रीरुद्रमणेः शिष्यो ऽमुं विचरन्तं यदा ऽद्राक्षीत् ॥ १२ ॥ आहूय श्रुतवाणीजनितश्रद्धो निनीषुरनुकूलः ॥ शुश्रूषया स्वदेशं तं प्रार्थ्यानी

नवद् यथायोग्यम् ॥ १३ ॥ सोऽयं प्रसन्नहृदयो महाशयात्कौतुकीभक्त्या ॥
अध्यैतरणाभद्राख्यं तत्पुरं पाठयन् न्यवसत् ॥ १४ ॥ निश्चिन्तो विरले समन्तत
उपेतेष्टार्थसिद्धि स्तत श्चिन्तां तत्र संमासदद् द्विजकुले दृष्ट्वा कले राघवा ॥ मौ
ख्यं तस्य तु शान्तये निखिलशास्त्रार्थोर्ज्जिहीर्षु र्मुदा व्याख्यत् कोशकलाधरं
कविवरं शब्दार्थचिन्तामणिम् ॥ १५ ॥ गङ्गातीरे रुद्रपाले शिवेन शिवतां
गते ॥ त्यक्त्वा नैमित्तिकाभावं निमित्ताभावसङ्गतौ ॥ १६ ॥ इन्द्रप्रस्थं पुनःप्र
त्यागत्य मनसि चिन्तयन् ॥ कथ मेतस्य कोशस्य स्यात् प्रवृत्ति र्निरन्तरा
॥ १७ ॥ प्रस्तुतश्रीनन्दलालदौहित्रौ श्रेयआश्रयौ ॥ कोविदौ व्यवहाराणां
प्रायःशुभनिवासिनौ ॥ १८ ॥ चुन्नीलालाग्रजो घासीरामनामा प्रतापवान् ॥
धनिमान्यो राजमान्यः स्वभुजार्जितसद्यशाः ॥ १९ ॥ बालप्रवासिनं दैवनोदि
तो दूरदर्शिनम् ॥ स मातुल मनुप्राप्य कृत्वालापं मनोगतम् ॥ २० ॥ कोशम
र्शसां प्रस्तावे श्रुत्वा तस्योत्सुकं मनः ॥ तन्मुद्रीकरणायाशु यदात्यर्थं मवो
भवीत् ॥ २१ ॥ परेश्वरकराङ्कैकमिते १९२१ विक्रमहायने ॥ तदैव मुद्रितो भा
गः प्रथमः साङ्ग इत्यभूत् ॥ २२ ॥ उत्तमश्लोकशिष्येण श्रीपादाम्बुजसेविना ॥
धर्मीसारस्वतेनैभिरिन्द्रप्रस्थनिवासिना ॥ २३ ॥ जगदानन्दनाथेन पारम्प
र्यानुवर्त्तिना ॥ जगदीशोपनाम्नैषा श्लोकै रुद्घाटिता कृतिः ॥ २४ ॥ * ॥ * ॥

अथ शब्दार्थचिन्तामणेः संकेताक्षराणां विवरणम् ॥

अ० ...... अर्द्धर्चाः पुंसि च ॥ अश्वादिभ्यःफञ् ॥

अघ० .... अघादिभ्यश्चेति यक् ॥

अङ्गु० .... अङ्गुल्यादि भ्यष्ठक् ॥

अजा० .... अजादित्वात् टाप् ॥

अध्या० .. अध्यात्मादित्वात् ठञ् ॥

अनु० उ० .. अनुशतिकादित्वादुभयपदवृद्धिः ॥

अन्य० .... अन्यत्रापीति डः ॥

अन्ये० .... अन्येषामपीति दीर्घः ॥ अन्येभ्योपीति डः ॥ अन्येभ्यो पिदृश्यतेइति वः । वलः ॥

अन्येभ्योपि दृश्यते क्विप्॥ अन्येभ्योपि दृश्यते इति यप्॥ अन्येभ्योपि दृश्यन्ते॥ मनिन्क्वनिप्वनिप् विच एते॥

अन्येष्व० ‥ अन्येष्वपि दृश्यते इति डः॥

अब्० ‥‥ अब्वादयश्चेति साधुः॥

अर्० ‥‥ अर्शआदिभ्योऽच्॥

अली० ‥‥ अलीकादय श्चेति कीकन्॥

अश्रु० ‥‥ अश्वादयश्चेति साधुः॥

अश्व० ‥‥ अश्वपत्यादिभ्यश्चेत्यण्॥

आ० ‥‥ आकर्षादिभ्यः कन्॥

आद्या० ‥‥ आद्यादिभ्य उपसङ्ख्यानमिति तसिः॥

इ० ‥‥ इति॥

इ०वि०ति० ‥ इतिविष्णुपुराणतिलके

इ०रा० ‥‥ इतराभ्योपि दृश्यन्ते तसिलादयः॥

इष्० ‥‥ इष्टादिभ्यश्चेति इनिः॥

उ० ‥‥ उक्थादित्वात् ठक्॥

उत्० ‥‥ उत्सादित्वादञ्॥

उद्० ‥‥ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्॥

उदा० ‥‥ उदाहरणम्॥

उर्० ‥‥ उरःप्रभृतिभ्यः कप्॥

उल्० ‥‥ उल्वादयश्चेति वत्वन्तः साधुः॥

उल० ‥‥ [illegible]

ऋ० ‥‥ ऋत्व्यादिभ्यः क्तिन्निष्ठावद्वाच्यः॥

ए०वि० ‥‥ एतद्विवरणम्॥

कं० ‥‥ कण्ड्वादिभ्यो यक्॥

क० ‥‥ कर्ममीमांसीयम्॥

क8० ‥‥ कश्चित्॥

कच्० ‥‥ कच्छादिभ्यश्चेत्यण्॥

कत्० ‥‥ कत्र्यादिभ्यो ढकञ्॥

कपि० ‥‥ कपिलकादित्वाल्लत्वम्॥

कम० ‥‥ कमलादिभ्यः खण्डः॥

कल्या० ‥ कल्याण्यादित्वाट्ठक्। इनङादेशश्च॥

का० ‥‥ काश्यपः। काश्यादित्वात् ञिठः॥

का०पु० ‥‥ कालीपुराणम्॥

कालि० ‥‥ कालिदासः॥

का० ‥‥ कादिभ्यः किदिति डः॥

काशी० ‥ काशीखण्डम्॥

का०सू० ‥ कापिलसूत्रम्॥

कि० ‥‥ किसरादिभ्यः ष्ठन्॥

किशो० ‥ किशोरादयश्चेत्यो[illegible]

कु० ‥‥ कुर्वादिभ्यो ण्यः॥

कु० ‥‥ कुटादिः॥

कुला० ‥‥ कुलालादिभ्यो वुञ्॥ कुला[illegible]॥

कू० ‥‥ कूर्मपुराणम्॥

के० ‥ [illegible]म्॥

क्रुद० .... क्रुदरादयश्चेतिसाधुः ॥

क्रतू० .... क्रतूथकादिस्त्वान्नाट्ठक् ॥

क्रमा० .... क्रमादिभ्योवुन् ॥

खं० .... खण्डिकादिस्त्वादञ् ॥

ख० .... खर्जादिस्त्वात् ऊरः ॥

खर्० .... खर्जपिञ्जादिभ्य ऊरोलचौ ॥

खला० .... खलादिभ्यइनिर्वक्तव्यः ॥

ग० .... गर्गादिभ्योयञ् ॥

गम्० .... गम्भीरादयश्चेति ईरन् ॥

गहा० .... गहादिभ्यश्चेतिछः ॥

गु० .... गुपादिभ्यःकिदितिइलच् ।

गुडा० .... गुडादिभ्यष्ठञ् ॥

गौ० .... गौरादिः ॥

गौ० भा० गौडभाषा ॥

गृष्० .... गृष्ट्यादिभ्यश्चेतिढञ् ॥

ग्रहि० .... नन्दिग्रहिपचादिभ्योल्युणिन्यचइतिणिनिः ॥

चतु० .... चतुर्वर्णादीनांस्वार्थे उपसंख्यानम् । ष्यञ् ॥

चु० .... चुरादिः ॥

छ० .... छत्रादिस्त्वाणः ॥

छाम्० ....सः ॥

छा० भा० .... छान्दोग्यभाष्यम् ॥

... .ादिभ्यो नित्यमिति-

जु० .... जुहोत्यादिः ॥

ज्व० .... ज्वलादिस्त्वाणः ॥

ज्यो० .... ज्योत्स्नादिस्त्वादण् ॥

त० .... तथाच ॥

त० छ० प० .... तदुक्तं छन्दोगपरिशिष्टे ॥

तडा० .... तडागादयश्चेतिनिपातः ॥

त० प० .. तत् पञ्चविधम् ॥

तर० .... तरन्यादिभ्यश्चेष्यञ्च

ता० .... तारकादिस्त्वादितच् ॥

ति० .... तिकादिभ्यःफिञ्

तुन्० .... तुन्दादिभ्यइलच्चेतिइनिश्च

तु० .... तुदादिः

तुषा० .. तुषारादयश्चेत्यारन् ॥

दं० .... दण्डादिस्त्वात् यत् ॥

दाम० .... दामन्यादित्रिगर्त्तषष्ठाच्छः ॥

दि० .... दिगादिभ्योयदिति यत् । दिवादिः ॥

दी० .... दीपिका ॥

दृ० .... दृढादिः । वर्णदृढादिभ्यः ष्यञ्च । इमनिच्च ॥

नं० .... नन्द्यादिस्त्वात्ल्युः । नन्दिग्रहिपचादिभ्योल्युणिन्यचः ॥

नडा० .... नडादिस्त्वात् फक् । नडादीनांकुक्चेतिछः ॥

नद्या० .... नद्यादिभ्योढगिति ढक् ॥

न्यङ्कु० .... न्यङ्क्वादिस्त्वात् कुत्वम् ॥

... ॥

३५९१

ना० …… नारद: ॥

नि० …… निपात: ॥

नि० …… निदानम् ॥

नै० …… नैषध: ॥

प० …… पचाद्यच् । पचाद्याद्यच्॥

प० …… नन्दिग्रहिपचादिभ्यो ल्युणिन्यच: ॥

प०प० …… पराशरपद्धति: ॥

पर्फ० …… पर्फरीकादयश्चेती कन् ॥

प०भा० …… पर्वतभाषा ॥

पर्० …… पर्पादिभ्य:ष्ठन् ॥

पर्श्वा० …… पर्श्वादियौधेयादिभ्यो ऽणञौ ॥

प०सं० …… पराशरसंहिता ॥

पा० …… पामादित्वात् न: ॥

पा०पा० …… पाद्मे पातालखण्ड: ॥

पाचा० …… पाचाद्यन्तस्यनेति दीर्घत्वं न ॥

पारस्० …… पारस्करादित्वात् सुट् ॥

पाश० …… पाशादिभ्यो य: ॥

पि० …… पिच्छादित्वात् इलच् ॥

पिञ्ज० …… खर्जपिञ्जादिभ्य ऊरोलचावित्यूलच् ॥

पिना० …… पिनाकादयश्चेत्याक: ॥

पु० …… पुष्करादिभ्योदेशइति इनि: । पुराणम् ॥

पुरो० …… पत्यन्तपुरोहितादिभ्योयक्

पृ० …… पृषोदरादीनि यथोपदिष्टम् ॥

पृथ० …… पृथ्वादिभ्य इमनिज्वा ॥

प्र० …… प्रज्ञादिभ्यश्चेति स्वार्थे ऽण् प्रत्यय: ॥

प्रति० …… प्रतिजनादिभ्य: खञ् ॥

प्रा०वि० …… प्रायश्चित्तविवेक: ॥

फ० …… फलम् ॥

ब० …… बलादिभ्योमतुप् ॥ वसिष्ठ: । वहुलमन्यत्रापीति युच् ॥

वङ्क्र० …… वङ्क्र्यादयश्चेति क्रिन् ॥

बला० …… बलाकादयश्चेत्याक: ॥

वसं० …… वसन्तादिभ्यष्ठक् ॥

बह्वा० …… बह्वादिभ्यश्चेति ङीष् ॥

व०वृ० …… वर्णवृत्तप्रभेद: ॥

वा० …… वाहुलकात् । वाह्वादित्वादिञ् ॥

वा०पु० …… वायुपुराणम् ॥

वाहि० …… वाहिताग्न्यादिषु ॥

वि० …… विश्व: । विल्वाद्यण् ॥

विडा० …… विडादिभ्य:किदित्यक्रच् ॥

विदा० …… अनृष्यानन्तर्ये विदादिभ्यो ऽञ् ॥

वि०ध० …… विष्णुधर्मोत्तरम् ॥

विन० …… विनयादिभ्यष्ठक् इति स्वार्थे ठक् ॥

वि०पु० …… विष्णुपुराणम् ॥

वी० …… वीरमित्रोदय: ॥

वे०भा० …… वेदभाष्यम् ॥

वेत० …… वेतनादिभ्यो जीवतीति-
ठञ् ॥
वै० …… वैदिकप्रयोगः ॥
वै०प० … वैद्यकपरिभाषा ॥
वै०म० …. वैद्यकमतम् ॥
वृ० …… वृक्षे ॥
वृक्षा० …. वृक्षादिभ्यःखण्डः ॥
वृषा० …. वृषादिभ्यश्चिदिति कलः ॥
वृह० …. वृहद्धर्मपुराणम् ॥
व्यु० …… व्युत्पत्त्या ॥
भा० …… भावप्रकाशः ॥
ब्र० …… ब्रह्मवैवर्त्तपुराणम् ॥
ब्र०पु० …. ब्रह्मपुराणम् ॥
ब्र०वै०ब्र० .. ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥
ब्रा० …… गुणवचनब्राह्मणादिभ्यःक
र्मणिचेतिष्यञ् ॥
ब्री० …… ब्रीह्यादिभ्यश्चेतिइनिः ॥
व्या०व० .. व्यासवचनम् ॥
भा० …… भागवतम् ॥
भा०प० …. भाषापरिच्छेद ॥
भा०प्र० .. भावप्रकाशः ॥
भार० …. भारतः ॥
भि० …… भिद्भिदादिभ्योऽङ् ॥
भिक्षा० …. भिक्षादिभ्योऽण् ॥
भी० …… भीमादयोऽपादाने ॥
भू० …… भूम्नि ॥
भ्वा० …… भ्वादिः ॥
म० मत्वर्थीयः ॥

मधु० …. मध्वादयश्चेति उरच् ॥
मनो० …. हृन्मनो ज्ञादिभ्यश्चेति
म०भा० .. महाभारतम् ॥
मयू० …… मयूरव्यंसकादित्वात् ॥
मावृ० …. माघवृत्तम् ॥
वुञ् ॥
महा० …. महाभारते महाभार
तम् ॥
मा०तं० .. मायातन्त्रम् ॥
मि० …… मिथिलादयश्चेति इलच् ॥
मित० …. मितद्र्वादित्वात् डुः ॥
मुं०तं० .. मुण्डमालातन्त्रम् ॥
मू० …… कप्रकरणे मूलविभुजादि
भ्यउपसंख्यानमितिकः ॥
मूले० …. मूलेरादयश्चेत्येरक् ॥
मृ० …… मृगय्वादयश्चेतिकः ॥
मो० …. मोक्षधर्मः ॥
य० …… यजादित्वात् । यथा ॥
या० …… यावत् । यावादिभ्यःकन् ॥
याज्ञ० …. याज्ञवल्क्यः ॥
यु० …… हायनान्तयुवादिभ्योऽण् ॥
यौ० …. पर्श्वादियौधेयादिभ्योऽणञौ ॥
र० …… रसादिभ्यश्चेति मतुप् ॥
रा० …… रामायणम् ॥
राज० …. राजदन्तादिषु परम् ॥
रानि० …. राजनिर्घण्टः ॥
रेव० …… रेवत्यादिभ्यष्ठक् ॥

ल० ...... लक्षणम् ॥

ली० .... लीलावती ॥

लो० .... लोमादित्वात् श:

ल्वा० .... ल्वादिभ्यश्चेतिनत्वम् ॥

श० ...... शकन्ध्वादि: ॥

शका० .... शकादिभ्योटन् ॥

शम्० .... शमादिभ्योऽयच् ॥

शर्० .... शर्करादिभ्योण् ॥

शा० .... शाकपार्थिवादि: । शाखादिभ्योय: ॥

शार्० .. शार्ङ्गरवाद्यञो ङीन् ॥

शि० .... शिवादिभ्योऽण् ॥

शु० .... शुभ्रादिभ्यश्चेतिढक् ॥

शुण्० .. शुण्डिकादिभ्योऽण् ॥

श्री० .... श्रीभागवतम् ॥

स० .... समास: ॥

स०कं० .. सरस्वतीकण्ठाभरणम् ॥

सं० .... सम्पदादित्वात् क्विप् ॥

सङ्० .... सङ्काशादिभ्योण्य: ॥

संज्ञा० .. संज्ञापूर्वकत्वाद्वृद्ध्यभाव: ॥

सम्० .. सम्प्रसारणम् ॥

सर्० .... सर्वधातुभ्यो मनिन् ॥

सर्व० .... सर्वधातुभ्य इन् । सर्वधातुभ्य: ष्ट्रन् । सर्वधातुभ्योऽसुन्

सा० .. साहित्यदर्पण: ॥

सि० .. सिध्मादिभ्यश्चेतिलच् ॥

सिन्० .. सिन्ध्वादित्वादण् ॥

सिमु० .... सिद्धान्तमुक्तावली ॥

सिशि० .. सिद्धान्तशिरोमणि: ॥

स्त्रि० .... स्त्रियाङ् क्तिन् ॥

सु० .... सुषामादिषु चेतिषत्वम् ॥

सुवा० .... सुवास्त्वादिभ्योऽण् ॥

स्थूला० .. स्थूलादिभ्य: प्रकारवचने कन् ॥

स्म० .. स्मरणम् । स्मृति: ॥

स्वा० .... स्वार्थे ॥

ह० .... हरिवंश: ॥

हरि० .... हरितादिभ्योऽञ् ॥

हरी० ... हरीतक्यादिभ्यश्चेतिफलप्रत्ययस्य लुप् ॥

हे० .... हेमचन्द्र: ॥

इक्० .... इक्कृष्यादिभ्य: ॥

इञ्० .... इञ्वपादिभ्य: ॥

इण्० .... इणजादिभ्य: ॥

ण्वुल्० .... धात्वर्थनिर्देशे ण्वुल्वक्तव्य: । संज्ञायाम् ॥

क:० .... अज्ञाते । कुत्सिते । अल्पे । ह्रस्वे ॥

कन्० .... संज्ञायाम् । अनुकम्पायाम् । अवक्षेपे कन् । इवेप्रतिकृतौ । संज्ञायां च ॥

क्षुभ्० .... क्षुभ्नादिषु चेति णत्वाभाव: ॥

तत् सत्

श्रीगणेशाय नमः

अथ शब्दार्थचिन्तामणौ मंगलम्

तत्रादौ मङ्गलाचरण मभिधेयादिकञ्च

नमः श्रीसद्गुरवे ॥ ॥ श्रीमद्हरिहरानन्दनाथाभिधं स्वदेशिकम्। नारायणमहं वन्दे सच्छास्त्रज्ञान भास्करम् ॥ १ ॥ लम्बोदरं महाकाय मेकदन्तं गजाननम्। गौरीप्रियं मुदा वन्दे सर्वविघ्नविनाशनम् ॥ २ ॥ नमो देवि महाविद्ये भजामि चरणौ तव। देहि ज्ञानप्रकाशं मे निखिलार्थ प्रसिद्धये ॥ ३ ॥ श्रीशारदां शारद चन्द्रकान्तिं हृदम्बुजे ऽभीतिवरं दधानाम्। पुस्तं विपञ्चीं सुकरैः प्रसन्नां ध्याये ऽनिशं जाड्यहरां त्रिनेत्राम् ॥ ४ ॥ वेद्यं ब्रह्मादिभि र्ध्येयं योगीन्द्रै र्यन्महत्पदम्। तत् तत्त्वं तत्त्व मस्यादिवाक्यै रिष्टं भवाम्यहम् ॥ ५ ॥ यद ज्ञानादिदं जातं यज्ज्ञाने विलयं व्रजेत्। तन्निर्गुणं निर्विशेषं ब्रह्मात्मानं समाश्रये ॥ ६ ॥ कोशाननेकानवलोक्य यत्नाच्छास्त्राणि भूयः प्रविचार्य्य तेभ्यः। बालावबोधाय लिखामि शब्दान् सार्थान् सुसङ्गृह्य मुदे बुधानाम् ॥ ७ ॥

अल्पायुषो ऽल्पबुद्धीँश्च द्विजान् दृष्ट्वा कला वय । सुखानन्दो लिखेदेतत् कोषं सुखसुबोधदम् ॥ ८ ॥ सलिङ्गालिङ्गशब्दानां स्थानायतु पुर: पुर: । तत्तदा-ख्यार्णलेखेऽपि समासार्थो विधीयते ॥ ९ ॥ जिज्ञासा यत्र कुत्रापि शास्त्रीये श-ब्द उद्भवेत् । तदैवैतत् पश्यता ऽनुभूयते कृतकृत्यता ॥ १० ॥ तावद् भ्रमति शब्दार्थचिन्ताव्याकुलमानस: । सुश्रद्धधान: स्थिरधीर्यावदेनं न पश्यति ॥ ११ ॥ चतुर्दशसुविद्यासु प्राय: शब्दो न तादृश: । मातृकानुक्रमे ना ऽत्र सपर्यायो निवेशित: ॥ १२ ॥ निदर्शनेषु शब्दानां तत्तच्छास्त्रसमुद्भृता । गद्यपद्यमयी वाणी वर्णितास्मिन् क्वचित् क्वचित् ॥ १३ ॥ केषाञ्चि द्देशभाषापि गुप्तबोधा-य दर्शिता । अत: परोपकृतये कोऽन्यो भवितु मर्हति ॥ १४ ॥ शब्दार्थचिन्ता मणि नामकृतं कोशेषु सर्वेषु च रत्नभूतम् । श्रीमत्सुखानन्दबुधेन कृतं द्वि-जोपकारार्थ मिदं प्रभूतम् ॥ १५ ॥ पण्डितै राजधनिनां कृता ग्रन्था ह्यनेकश: । धनाढ्ये तुस्या देतत् सर्वान्तर्यामितुष्टये ॥ १६ ॥ १९२० ॥ खनेत्रग्रहभूयुक्ते वैक्रमे वत्सरे शुभे । मार्गस्यासितपञ्चम्या मारब्धो मुद्रितुं ह्यसौ ॥ १७ ॥

अथ शब्दार्थचिन्तामणि:

अ:

अ । । अभावे ॥ स्वल्पार्थे ॥ प्रति-षेधे ॥ अनुकम्पायाम् ॥ सम्बोधने ॥ अधिक्षेपे ॥ स्वराणामादिमवर्णे ॥ अ: । पुं । वासुदेवे ॥ महेश्वरे नभो-

अंश:

यमकार: ॥ यद्वा ॥ अततिसर्वंव्याप्नो ति । अततेर्ड: ॥ न । परब्रह्मणि ॥ अंश: । पुं । वण्टके । भागे ॥ स्कन्धे ॥ वस्तुन एक देशे ॥ नवांशे ॥ अंसयते ।

अंशविभाजने । अदन्तः । कर्मणि घञ् ॥

अंशकः । पुं । दायादे ॥ अंशंहारीअवश्यमंशंहर्त्तेत्यर्थः । अंशंहारीतिकन् ॥ अल्पांशे ॥ अल्पार्थेकन् ॥ न । वासरे । दिने ॥

अंशी । त्रि । भागाधिकारिणि । भागिनि ॥ अंशोऽस्यास्ति । इनिः ॥

अंशुः । पुं । प्रभायाम् ॥ सूत्रादिसूक्ष्मांशे ॥ किरणे ॥ सूर्ये ॥ अंशयति । अंशविभाजने । चुरादिः । मृगय्वादित्वात्कुः ॥ लेशे ॥ वेशे ॥

अंशुकम् । न । सूक्ष्मवस्त्रे ॥ वस्त्रमात्रे ॥ उत्तरीये ॥ परिधानीये । अधोवस्त्रे ॥ अंशून् कायति । कैशब्दे । आत इतिकः ॥ यद्वा । अंशुभिः काशते । काशृदीप्तौ । अन्येष्वपीतिडः ॥ तेजपाताख्यापत्रे ॥ त्रि । अल्पांशौ ॥ अल्पे इतिकन् ॥

अंशुजालम् । न । प्रभापटले ॥ अंशूनां जालमिव ॥

अंशुधरः । पुं । सूर्ये ॥ धरति । धृञ० । अच् । अंशूनांधरः ॥ त्रि । प्रभाविशिष्टे ॥

अंशुपट्टः । पुं । पट्टशाटके ॥

अंशुमान् । पुं । सूर्य्ये ॥ विश्वव्यापिप्रकाशे परमात्मनि ॥ सूर्यवंशीयनृपान्तरे ॥ त्रि । अंशुविशिष्टे ॥ अंशवो विद्यन्तेऽस्य । तदस्यास्तीतिमतुप् ॥

अंशुमती । स्त्री । परदेवतायाम् ॥ अंशवः सन्त्यस्याः । मतुप्ङीपौ ॥ शालपर्ण्याम् ॥ अंशुमत्याः फलं मूलञ्चांशुमती । अनुदात्तादेश्चेत्यञः फलपाकमूलेष्वितिलुपि युक्तवद्भावः ॥

अंशुमत्फला । स्त्री । कदल्याम् ॥ अंशुमन्ति सूक्ष्मावयववन्ति फलान्यस्याः । अंशुमानिव वा फलान्यस्याः । अजादित्वाट्टाप् ॥

अंशुमाली । पुं । राजभेदे ॥ भास्करे ॥ अंशूनां माला । साऽस्ति अस्य । व्रीह्यादित्वा दिनिः ॥

अंशुलः । पुं । चाणक्यमुनौ । द्रौमिणे ॥ इति त्रिकाण्डशेषः ॥

अंशुहस्तः । पुं । सूर्य्ये ॥

अंशूदकम् । न । हंसोदके ॥ यथा । दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः । ज्ञेयमंशूदकं नामस्निग्धं दोषत्रयापहम् ॥ अंशूनामुदकम् ॥

अंसः । पुं । न । भुजशिरसि । स्कन्धे ॥ अंस्यते समाहन्यते । अंससमाघाते । घञ् ॥ यद्वा । अमति अम्यते वा

भारादिना । अमगतौ । अमेः सन् ॥ पुं । विभागे ॥

अंसकूटः । पुं । ककुदि । वृषाङ्गे । कूडो ढाठ इति भाषाप्रसिद्धे ॥ अंसेकूटः ॥

अंसलः । त्रि । मांसले । पुष्टे । बलवति॥ अंसोस्यास्ति । वत्सांसाभ्यां कामबले इति लच् ॥

अंहतिः । स्त्री । त्यागे । दाने ॥ हन्ति दुरितमनया । हन्तेरंहचेत्यतिः ॥ रोगे ॥

अंहती । स्त्री । अंहतौ ॥ वह्वादित्वात् पक्षेङीष् ॥

अंहः । न । दुःखे ॥ स्वधर्मत्यागे । दुरिते ॥ अमति गच्छति प्रायश्चित्तादिना । अमगत्यादिषु । अमेर्हुक्चेत्यसुन् हुगागमश्च ॥ अमन्ति गच्छन्त्यधोनेनवा ॥ अहेरसुना सिद्धे अघेरसुनि अङ्घ इतिमा भूदिति अमेर्हुक्चेतिसूत्रम् । तथा च । स्यान्मध्योपमचतुर्थंस्त्व मंहसोरंहसस्तथेति द्विरूपकोशः । एवञ्च । दत्तार्याः सिद्ध सङ्घैर्विदधतुघृणयः शीघ्रमङ्घो विघात मितिपाठोऽनुप्रास रसिकानां प्रामादिक इति वदन्ति ॥

अकम् । न । पापे ॥ दुःखे ॥ नकम् ॥ कं सुखं तद्विरुद्धंवा ॥ नलोपोनञः ॥

अकचः । पुं । केतुग्रहे ॥ त्रि । केशहीने ॥

अकनिष्ठगः । पुं । बुद्धमुनौ ॥

अकम्पनः । पुं । राक्षसान्तरे ॥

अकम्पितः । पुं । बौद्धगणाधिपविशेषे ॥ त्रि । कम्पशून्ये ॥

अकरणिः । स्त्री । शापे । आक्रोशने ॥ यथा । अकरणि रिह भूयादप्रशस्तस्यधातु रिति ॥ अकरणम् । आक्रोशेनञ्यनिः ॥

अकरा । स्त्री । आमलक्याम् ॥ त्रि । करशून्ये ॥ अकरः । अकरम् ॥

अकरुणः । त्रि । निर्दये ॥ नकरुणः ॥

अकर्कशः । त्रि । कोमले ॥

अकर्णः । त्रि । वधिरे ॥

अकर्त्ता । त्रि । अक्रिये । अव्यापारे । कर्तृत्व रहिते ॥ नकर्त्ता । नलोपो नञः ॥

अकर्मण्यः । त्रि । क्रियासुमन्दे । निकम्मा इति भाषा ॥

अकर्म । न । तूष्णीम्भावे ॥ मोक्षे ॥ न विद्यते कर्म यस्मिन् तत् ॥ त्रि । कार्याक्षमे ॥

अकर्मी । त्रि । ब्रह्मविदि ॥ अकर्मअस्ति अस्य । व्रीह्यादित्वादिनिः । नकर्मी वा ॥ कर्मानुष्ठानरहिते अवधूते ॥

यथा ॥ अनुतिष्ठन्तु कर्माणि परलोकयियासव: । सर्वलोकात्मक: कस्मां दनुतिष्ठामिकिं कथमिति ॥

अकल्कन: । त्रि ।) वीतदम्भे ॥
अकल्मष: । त्रि ।)

अकस्मात् । अ । सहसार्थे । अतर्कित निमित्तके ॥ यथा । अकस्माद्युवती वृद्धं केशेष्वाकृष्य चुम्बति । पतिंनिर्दयमा लिङ्ग्य हेतुरत्रभविष्यतीति ॥

अकाम: । त्रि । बाह्यविषयकामनाशून्ये ॥ नविद्यतेकामोऽस्य ॥ यथा॥ दृष्टानुश्रविकाबाह्या: कामायस्यन सन्त्यसौ । अकामस्तादृशस्त्वन्तु निष्कामत्त्वेनसिध्यतीति ॥

अकामकार: । पुं । यथेष्टानाचरणे ॥ नकामकार: ॥

अकामहत: । त्रि । आब्रह्मलोकानन्दादर्वाचीनेष्वानन्देषु वितृष्णे ॥ कामेनहत: कामहत: । नकामहत: ॥

अकाय: । त्रि । अशरीरे ॥ लिङ्गशरीरवर्जिते ॥ नविद्यते कायोयस्यस: ॥

अकार: । पुं । अ अक्षरे । वर्णानां मध्ये भगवद्विभूतौ ॥ अ वर्णनिर्देशे ॥ वर्णात्कार: ॥

अकाल: । पुं । कालाशुद्धौ ॥ यथा ।

अनुराधर्क्षमारभ्य षोडशर्क्षेषु भास्कर: । यावच्चरतिवैतावद्कालं मुनयोविदुरिति ॥ असमये ॥ त्रि । तद्विशिष्टे ॥

अकालवृष्टि: । स्त्री । सहस्यादिषु वर्षणे ॥ यथा । पौषादिचतुरोमासान् प्रोक्ता वृष्टिरकालजा । व्रतं याचादिकं तत्रवर्जयेत्सप्तवासरानिति ॥

अकिञ्चन: । त्रि । दीने ॥ नास्ति किञ्चन यस्य । मयूरव्यंसका दित्वात्समास: ॥ निष्कामे ॥

अकिञ्चनिमा । पुं । आकिञ्चन्ये ॥ अकिञ्चनस्य भाव: इमनिच् ॥

अकीर्त्तिकरम् । त्रि । कीर्त्त्यभावकरे । अपकीर्त्तिकरे ॥ नकीर्त्तिकरम् ॥

अकुप्यम् । न । स्वर्णरजतात्मकेधने ॥ कुप्यादन्यत् ॥

अकुलसंज्ञ: । त्रि । तिथि वारर्क्ष विशेषे ॥ यथा । स्वात्त्यन्तकाहिवसु पौष्णकरानुराधा दित्त्यध्रुवाणि विषमास्तिथयोऽकुला:स्यु: । सूर्येन्दुमन्दगुरवश्चेति ॥

अकुशलम् । त्रि । अशोभने ॥ नकुशलम् ॥

अकूपार: । पुं । कूर्मराजे ॥ महोदधौ ॥ कुंपृथ्वीं पिपर्त्ति । पृपालनपूरणयो: । कर्मण्यण् । अन्येषा

मपीति दीर्घः। नञ्समासः॥ उपलादौ॥ कमठे॥

अकूर्चः। पुं। बुद्धे॥ त्रि। कैतवहीने॥

अकूवारः। पुं। समुद्रे॥

अकृतम्। त्रि। निश्चये॥ मोक्षे॥ अविहिते॥ कारणे॥ प्रमाणाविषये॥ स्वयमजनिते॥ नकृतम्॥ अनिष्पादिते॥ यथा। कालातीतन्तु यत्कुर्यादकृतन्तद्विनिर्दिशेदितिस्मृतिः॥ स्त्री। प्रकृतिविशेषे॥ यथा ऽपांनिस्रदेशगमनादिलक्षणा प्रकृतिः सानकेन चितकृता॥

अकृतकः। त्रि॥ स्वाभाविके॥ नकृतकः

अकृतज्ञः। त्रि। उपकारामानिनि। कृतघ्ने॥

अकृतबुद्धिः। त्रि। शास्त्राचार्योपदेशन्यायै रनुपजनितविवेकबुद्धौ॥ अकृताबुद्धिर्यस्य येनवा॥

अकृतात्मा। त्रि। यन्त्रादिभिरशोधितान्तः करणे॥ शास्त्रेणासंस्कृतान्तः करणे॥

अकृताभ्यागमः। पुं। दोषविशेषे। अकृतयोः पुण्यपापयोरकस्मात्फलदातृत्वे॥

अकृत्रिमः। त्रि। अकरणजे। अजन्ये। सिद्धे॥

अकृत्रिमानन्दः। पुं। स्वरूपभूतान

न्दाभिव्यञ्जके निदिध्यासने॥ अकृत्रिमश्चासा वानन्दश्च॥ त्रि। कृत्रिमानन्दविरहिणि॥ अविद्यमानः कृत्रिमानन्दो ऽस्य॥

अकृतस्त्ववित्। त्रि। अनात्माभिमानिनि॥ अकृतस्त्वं वेत्ति। विद्ज्ञाने। क्विप्॥

अकृष्णकर्मा। त्रि। शिश्विदाने। अपापकर्मणि॥ अकृष्णं निष्पापत्वात् शुद्धंकर्मास्य॥

अकोटः। पुं। गुवाकवृक्षे। छटाफले॥

अकौशलम्। न। अकौशले॥

अक्का। स्त्री। मातरि। अनन्याम्। अम्बायाम्॥

अक्तः। त्रि। व्याप्ते॥ युक्ते॥ परिच्छिन्ने॥ अञ्जेर्गतौक्तः। अल्पपरिमाणस्य वाचका इति भाष्यस्यकैयटेन तथा व्याख्यातत्वात्॥ अनक्ति अज्यते-वा। अंजूव्यक्त्यादौ। अंजिघृषिभ्यः क्तः॥

अक्रतुः। त्रि। अकामे। दृष्टादृष्टवाह्यविषयोपरतबुद्धौ॥

अक्रान्ता। स्त्री। वृहत्याम्॥ त्रि। अनाक्रान्ते॥

अक्रियः। त्रि। श्रौतस्मार्तक्रियात्यागिनि॥ अव्यापारे। अकर्त्तरि॥ कुकर्मविशिष्टे॥

अक्रूर: । पुं । श्वफल्कतनये । गान्दिनीसुते । त्रि । अकठिने । अनिष्टुरे । नक्रूर: । क्रौर्यवान् क्रूर: सनेत्यक्रूर: । यद्वाक्रूरे इतिभावप्रधानो निर्देश: । नविद्यते क्रौर्यमस्येत्यक्रूर: ॥

अक्रोध: । पुं । परैराक्रोशे ताडनेवा कृते सति प्राप्तो य:क्रोधस्तस्य तत्कालोपशमने । त्रि । क्रोधरहिते ।

अक्रोधन: । त्रि । क्रोधरहिते ॥

अक्लम: । त्रि । सततव्यापारेप्यश्रान्ते ॥ अविद्यमान: क्लमोयस्यस: ॥

अक्ष: । पुं । रथावयवे । चक्रे । चक्रधारणदारुभेदे । नभ्ये । ज्ञातार्थे । व्यवहारे । आयव्ययचिन्तायाम् । पाशके । येन द्यूतविद्यायामेजति । रुद्राक्षे । इंद्राक्षे । विभीतकतरौ । ज्ञाने । आत्मनि । रावणौ । सर्पे । शकटे । षोडशमाषेषु । कर्षे । जात्यन्धे । गरुडे । पलभायाम् । यथा । चंद्राग्निनिशापलभाङ्किताक्षलक्षावधि: स्यादिह दक्षिणोक्ष इति । न । सौवर्चले लवणे । तुत्थे । हृषीके । अक्ष्णोति अक्षतिवा अक्ष्यतेवा ऽनेनाक्षवा अक्षू-व्याप्तौ । पचाद्यच् घञ्वा । अश्नुते ऽक्ष्यर्थम् । अशूव्याप्तौ । अशेर्देवने इति सोवा ॥

अक्षक: । पुं । तिनिशे । इतिरत्नमाला ॥

अक्षगण: । पुं । श्रोत्रादीन्द्रियसङ्घाते । अक्षाणांगण: ॥

अक्षचरण: । पुं । अक्षपादे ॥

अक्षतम् । न । षण्डे । पुं ० भू ० लाजेषु । क्षणनम् । क्षणुहिंसायाम् । नपुंसकेभावेक्त: । अनुदात्तोपदेशेत्यादिनाणलोप: । ।नक्षतं येषांते । मुकुटस्त्वमरव्याख्यावसरे लाजा: पुंभूम्नित ऽक्षतमितिपठित्वा कर्मणिक्त: । क्षतंखण्डितम् । नक्षतमक्षतमितिविगृह्य नित्यपुल्लिंगानित्यबहुवचनान्ताश्च लाजा अक्षतमितिव्याचख्यौ । केचित्तु अखण्डतण्डुला अक्षतमित्याहु: । पुं । यवे । त्रि । अहिंसिते । अव्रणे । अखण्डिते ॥

अक्षता । स्त्री । कर्कटशृङ्ग्याम् । पुरुषसंसर्गरहितायां स्त्रियाम् । नक्षता ॥

अक्षदर्शक: । पुं । प्राड्विवाके । धर्माध्यक्षे । अक्षवाधके । पश्यति । दृशिर्प्रेक्षणे । ण्वुल् । अक्षाणां व्यवहाराणांदर्शक: ॥

अक्षदृक् । पुं । व्यवहारस्यज्ञातरि । अक्षदर्शके ॥

अक्षदेवी । त्रि । द्यूतकृति । धूर्त्ते ॥ अक्षैर्दीव्यति । दिवुक्रीडादौ । सुपीतिणिनिः ॥

अक्षद्यूः । पुं । अक्षदेविनि ॥ अक्षैर्दीव्यति । दिवु० क्विप् । च्छ्वोरि त्यूठ् ॥

अक्षधूर्त्तः । पुं । द्यूतकारे । कितवे ॥ अक्षेषुधूर्त्तः । सप्तमीशौण्डैरिति समासः ॥

अक्षधूर्त्तिलः । पुं । वृषे ॥ इति हारावली ॥

अक्षपादः । पुं । गौतमे । नैयायिके ॥

अक्षपीडा । स्त्री । यवतिक्ताख्यलतायाम् ॥

अक्षमः । त्रि । क्षमताशून्ये ॥ क्षमारहिते ॥

अक्षमा । स्त्री । ईर्ष्यायाम् । अक्षान्तौ ॥

अक्षमाला । स्त्री । अक्षसूत्रे । अकारादिक्षकारान्त वर्णमालायाम् ॥ अरुन्धत्याम् ॥ अक्षमाला वशिष्ठेन संयुक्ताधमयोनिजेतिवचनात् ॥ रुद्राक्षमालायाम् ॥

अक्षयः । पुं । अनन्ते । अक्षयकालाभिमानिनि ॥ त्रि । क्षयाभावे । क्षयरहिते ॥ अव्यये ॥ ब्रह्मनिष्ठे ॥ अः वासुदेवः तस्मिन् क्षयोनिवासोऽस्य ॥

अक्षयकालः । पुं । अक्षयकालाभिमानिनि परमेश्वराख्यकाले ॥ अक्षयश्चासौकालश्च ॥

अक्षयतृतीया । स्त्री । वैशाखशुक्लतृतीयायाम् ॥ यथा । वैशाखे मासि राजेन्द्र शुक्लपक्षे तृतीयिका । अक्षयासातिथिः प्रोक्ता कृत्तिकारोहिणीयुता ॥ तस्यांदानादिकं पुण्यमक्षयं समुदाहृतमिति ॥ इयं सत्ययुगाद्या ॥

अक्षया । स्त्री । रव्यादिवारैः सप्तम्यादितिथिषु ॥ यथा आमावै सोमवारेण रविवारेण सप्तमी । चतुर्थी भौमवारेण अक्षयादपिचाक्षया इतिभविष्यपुराणम् ॥ क्षयरहितायाम् ॥ नास्तिक्षयोयस्याः सा ॥

अक्षरम् । न । नक्षरतीतिव्युत्पत्त्या अविनाशिनि निर्विशेषे प्रणवाख्ये ब्रह्मणि कूटस्थेनित्ये आत्मनि ॥ यथा । क्षरादि रुद्दधर्मत्वादक्षरं ब्रह्मभण्यते । कार्य्यकारणरूपन्तु नश्वरंक्षरमुच्यते ॥ यत्किञ्चिद्वस्तुलोकेस्मिन् वाचोगोचरतांगतम् । प्रमाणस्यचतत्सर्वमक्षरे प्रतिषिध्यते ॥ यदप्रबोधात्कार्पण्यंब्राह्मण्यंयत्प्रबोधतः । तद-

क्षरं प्रवोढव्यं यथोक्तेश्वरवर्त्मनेति ॥ ईश्वरवर्त्मनेतिंशासितृत्वादि तटस्थलक्षणद्वारेत्यर्थः ॥ अकारादिक्षकारान्तवर्णे ॥ यथा । षाण्मासिके तु समये प्राप्ते भ्रान्तिः संजायते यतः । धात्राक्षराणि सृष्टानि पत्रारूढान्यतः पुरेति ॥ तत् पञ्चविधं लिपिशब्दे द्रष्टव्यम् ॥ अपामार्गे ॥ गगने ॥ मोक्षे । अपवर्गे ॥ धर्मे ॥ तपसि ॥ अध्वरे ॥ अव्याकृताख्ये मूलकारणे ॥ पुं । शङ्करे ॥ अजे । विष्णौ ॥ जीवे ॥ न क्षरति । क्षर सञ्चलने । पचाद्यच् ॥ यद्वा । अश्नुते । यशूध्यामौ । अशेः सरः ॥ त्रि । अक्षरणीये । अच्युते ॥

अक्षरचणः । पुं । लेखकोत्तमे ॥ अक्षरैर्वित्तः । तेनवित्तश्चुञ्चुप्चणपाविति चणप् ॥

अक्षरचुञ्चुः । पुं । लेखकोत्तमे ॥ अक्षरैर्वित्तः । तेनवित्तइति चुञ्चुप् ॥

अक्षरजननी । स्त्री । लेखन्याम् ॥ प्रकृतौ ॥ अक्षराणा मक्षरस्य वा जननी ॥

अक्षरजीवकः । पुं । लेखके ॥ लेखकेऽक्षरपूर्वाः स्युस्त्रणजीवकचुञ्चव इति हेमचन्द्रः ॥

अक्षरजीविकः । पुं । कायस्थजातौ ॥ अक्षरैर्जीविकायस्यसः ॥ लेखकः स्याल्लिपिकरः कायस्थोऽक्षरजीविक इति हलायुधः । त्रि । अक्षरजीविनि ॥

अक्षरतूलिका । स्त्री । लेखन्याम् ॥ अक्षराणां तूलिका ॥ इति जटाधरः ॥

अक्षरधीः । स्त्री । अक्षरं ब्रह्मणि धीर्याभ्यः इति व्युत्पत्त्या श्रुतिषु ॥ त्रि । ब्रह्मनिष्ठे ॥

अक्षरपङ्क्तिः । स्त्री । छन्दोभेदे ॥ यथा । चेद्भगणान्तगद्वययोगः । इन्तिरिह्रोक्तासाऽक्षरपङ्क्तिरिति ॥

अक्षरमुखः । त्रि । कालाक्षरिके । शिक्षिताक्षरे ॥ इति त्रिकाण्डशेषः ॥

अक्षरविन्यासः । पुं । लिपौ ॥ अक्षराणांविन्यासः ॥

अक्षरसमुद्भवः । पुं । अपौरुषेयत्वेन निरस्तसमस्ताशङ्के वेदे ॥ अक्षरात्परमात्मनः समुद्भवः आविर्भावोयस्यसः ॥

अक्षवती । स्त्री । द्यूतक्रीडाविशेषे । चौपड इति भाषा ॥ अक्षाः पाशकाः सन्त्यस्याम् । मतुप् । लोकात्स्त्रीत्वम् ॥

अक्षवाटः । पुं । मल्लभूमौ । नियुद्धभुवि । अखाडा इति भाषा ॥

अक्षवित् । त्रि । व्यवहारज्ञे ॥ द्यूतज्ञे ॥

अक्षविवर्त्तः । पुं । द्यूतप्रभेदे ॥

अक्षसूत्रम् । न । जपमालायाम् ॥

अक्षाग्रकीलकः । पुं । अणौ । रथचक्राग्रस्थितकीले । अणी इति भाषा ॥ अक्षस्यनाभिक्षेप्यकाष्ठस्यान्ते बन्धार्थंकीलकः ॥

अक्षान्तिः । स्त्री । परोत्कर्षासहने । ईर्ष्यायाम् ॥ नक्षमणम् । क्षमूसहने । दिवादिः । अस्याषित्त्वात् क्तिन् । अनुनासिकस्येति दीर्घे नञ् समासः ॥

अक्षारलवणम् । न । अकृत्रिमे सैन्धवादौ ॥ यथा । गोक्षीरं गोघृतंचैव धान्यंमुद्गास्तिलायवाः । सामुद्रं सैन्धवंचैव अक्षारलवणंस्मृतमिति स्मृतिर्क्षारलतायाम् ॥

अक्षि । न । चक्षुषि ॥ अश्नुतेऽनेनवा ॥ अशूव्याप्तौ संघातेच । अशेर्निदितिक्सिः ॥ यद्वा । अक्षति । अक्षूव्याप्तौ । इन् ॥

अक्षिकूटः । पुं । ईषिकायाम् । गजाक्षिपुटके ॥

अक्षिगतः । त्रि । द्वेष्ये ॥ इत्यमरः ॥ अक्षिगतएवखेदकृत् ॥

अक्षिभेषजम् । न । लोध्रे ॥

अक्षिविकूणितम् । न । अपाङ्गदृष्टौ । कटाक्षे ॥

अक्षीणः । त्रि । पूर्णे ॥ अदीने ॥ नक्षीणः । यथा । अलब्ध्वानिषीदेत काले काले ऽश्नन्भक्षितं । लब्ध्वान हृष्येद्धृतिमानुभयं दैवतन्त्रितम् ॥ इतिमत्वानदीनोयोवधूतोऽक्षीणउच्यतइति ॥

अक्षीवम् । न । वशिरे । सामुद्रलवणे ॥ पुं । शिग्रौ ॥ त्रि । अमत्ते ॥ नक्षीवति अनेनवा अक्षीवयतिवा । क्षीवृमदे । पचाद्यच् ॥ अक्षणः ईः । अक्षीवातिवायति वा । वागतिगन्धनयोः ओवैशोषणेवा । आतोनुपेतिकः ॥

अक्षेशः । पुं । मनसि ॥ अक्षाणामीशः ॥

अक्षोटः । पुं । शैलोत्थपीलौ । कर्पराले । आखरोटइतिख्याते ॥ अक्षणोति । अक्षूव्याप्तौ संघातेच । बाहुलकादोटः ॥ अक्षस्येवउटाः पर्णान्यस्येतिवा ॥

अक्षोटकः । पुं । कर्परालवृक्षे । पर्वतपीलौ ॥ यथा । अक्षोटकोऽपि तद्वत्स्यादसदृशः कफपित्तकृदिति ॥ अक्षोटात्स्वार्थेकः ॥

अक्षोपकरणम् । न । द्यूतसाधने ॥

अक्षोभः । पुं । आलाने । शङ्कौ । हस्तिबन्धनस्तम्भे ॥ त्रि । क्षोभरहिते ॥

अक्षोभ्यः । पुं । शिवे ॥ रागद्वेषादि

अभिः शब्दादिविषयैरसुरैश्च नक्षो-
भ्यते क्षोभं विक्षेपं व्यथां न प्राप्यते।
क्षुभेर्हेतुमण्ण्यन्ता दक्षोयदिति य
तप्रत्ययः। त्रि। अप्रधृष्ये।
अक्षौहिणी। स्त्री। सेनाविशेषे।
दशानीकिन्याम्। सा यथा॥ इभाः
२१८७०। रथाः २१८७०। अश्वाः
६५६१०। पदातयः १०९३५०। उ
क्तञ्च। अक्षौहिण्यामित्यधिकैः सप्त
त्या ह्यष्टभिः शतैः। संयुक्तानि सहस्रा
णि गजानामेकविंशतिः॥ एवमेव र
थानान्तु संख्यानं कीर्त्तितं बुधैः। प
ञ्चषष्टिसहस्राणि षट्शतानि दशैव
तु। संख्यातास्तुरगास्तज्ज्ञैर्विना
रथतुरङ्गमैः। तथा शतसहस्रन्तु स
हस्राणि नवैव तु। शतानि त्रीणि
चान्यानि पञ्चाशच्च पदातयः इति॥
समस्तसंख्यया तु। खद्वयस्वरवस्विं
दुनेत्रैरक्षौहिणीमतेति। २१
८७००॥ ऊहः समूहोऽस्त्यस्याः इनि
। अक्षाणामूहिनी। पूर्वपदादिति
णत्वम्। अक्षादूहिन्यामिति वृ
द्धिः।

अक्ष्णम्। त्रि। अखण्डे॥ अश्नुते
अशूव्याप्तौ संघाते च। कृत्यशूभ्यां
क्स्नः॥ न। काले॥

अखट्टः। पुं। प्रियालवृक्षे॥ इति राज-
निर्घण्टः॥

अखट्टिः। पुं। असद्व्यवहारे॥ इति
त्रिकाण्डशेषः॥

अखण्डम्। त्रि। पूर्णे। खण्डशून्ये॥
अनन्ते॥ नखण्ड्यते। खडि भेदने।
घञ्॥ नास्ति खण्डोऽस्य वा॥॥

अखण्डनः। पुं। काले॥ इति शब्द
चन्द्रिका॥

अखण्डपरशुः। पुं। परशुरामे॥ न
खण्डः अखण्डः केनाप्यखण्डितः प
रशुः कुठारोऽस्य॥

अखातम्। पुं। न। देवखाते। अकृ
त्रिमजलाशये॥ खाताद्भिन्नम्॥

अखिलम्। त्रि। विश्वस्मिन्। कृत्स्ने
॥ नखिलमस्य॥

अखिलाधारम्। त्रि। ब्रह्मणि॥
अखिलस्याकाशादिप्रपञ्चस्याधारमा
श्रयस्तदिति विग्रहः। आश्रयशब्दः
सृष्टिप्रलययोरप्युपलक्षणार्थः॥

अगः। पुं। पर्वते॥ वृक्षे॥ सरीसृपे॥
भानौ॥ नगच्छति। गम्लृ गतौ।
अन्येभ्योऽपीति अन्येष्वपीति वा डः॥
नगोऽप्राणिष्विति पाक्षिकोऽप्रकृति
भावः॥

अगजः। त्रि। गिरिसम्भवे॥ न। शि-
लाजतुनि॥

अगतिः। पुं। अनववोधे। अपरिज्ञा-

ने ॥

अगदः । पुं । औषधे ॥ त्रि । नीरुजि ॥ गदविरुद्धः । नगदो ऽस्मादितिवा ॥

अगदङ्कारः । त्रि । चिकित्सके ॥ अगदमरोगंजन्तुंकरोति । कर्मण्यण् । कारेसत्यागदस्येतिमुम् ॥

अगदतन्त्रम् । न । वैद्यविद्याङ्गविशेषे ॥ यथा । अगदतन्त्रंनामसर्पकीटलूतावृश्चिकमूषिकादिदष्टविषव्यञ्जनार्थं विविधविषसंयोगविषोपहतोपशमनार्थमितिसुश्रुत: ॥

अगम: । पुं । वृक्षे ॥ नगच्छति । गम्लृगतौ । पचाद्यच् ॥

अगम्य: । त्रि । अज्ञेये ॥ गमनायोग्ये ॥ नगम्य: ॥

अगस्ति: । पुं । मुनिविशेषे ॥ विन्ध्याख्यम् अगमस्यतीत्यगस्ति: । अस्यते: क्तिच्क्तौचेतिक्तिच् । बाहुलकात्तिर्वा । शकन्ध्वादि: ॥ वकद्रौ ॥ अगस्ति: पित्तकफजिच्चतुर्थकहरोहिम: । रूक्षोवातकरस्तिक्त: प्रतिश्यायनिवारणः ॥

अगस्तिद्रुः । पुं । वकपुष्पवृक्षे । मुनिद्रुमे ॥ इतित्रिकाण्डशेष: ॥

अगस्त्य: । पुं । वकद्रौ ॥ मुनिभेदे । पुलस्त्यतनये ॥ अगंविन्ध्यंस्त्यायतिस्तभ्नाति । स्त्यसङ्घाते । आतोनुपसर्गेक: ॥

अगस्त्याश्रम: । पुं । अगस्त्यकुण्डइतिनाम्नाकाश्यांप्रसिद्धेस्थाने ॥ मलयाचलेवर्त्तमाने मुनिवासस्थाने ॥

अगस्तिकुसुमम् । न । मुनिद्रुमपुष्पे ॥ अगस्तिपुष्पशाके ॥ अस्यगुणायथा । अगस्तिकुसुमं शीतंचतुर्थकनिवारणम् । नक्तान्ध्यनाशनंतिक्तंकषायंकटुपाकिच ॥ पीनसश्लेष्मपित्तघ्नंवातघ्नंमुनिभिर्मतम् ॥ आगस्त्यंकुसुमं तथा मृदुफलंकेना हृतंजन्तुनाधन्यंचाद्यदिनं यदद्यमिलितंकस्यास्यमालोकितम् । स्विन्नंतक्रयुतंसहिंगुलवणं तप्तेघृतेपाचितंभोक्ता संततभाषितं प्रियतमेनाद्यापिसमप्रापितमिति ॥

अगाधम् । त्रि । अतलस्पर्शे । अतिगगम्भीरे ॥ दुर्वोधाशये ॥ न । श्वभ्रे ॥ नास्तिगाध: स्थितिरत्र । नञोऽस्त्यर्थानामिति वहुव्रीहि: ॥

अगाधजल: । पुं । ह्रदे ॥ त्रि । अतलस्पर्श जलविशिष्टे ॥ अगाधंजलंयत्र ॥

अगारम् । न । गृहे ॥ अगान्ऋच्छति । ऋगतौ । कर्मण्यण् ॥

अगारदाही । त्रि । गृहदाहके ॥

अगु: । पुं । राहुग्रहे ॥ त्रि । किरणरहिते ॥

अगुरु: । न । जोङ्गके । सुगन्धिकाष्ठ

भेदे । अगर इति भाषा ॥ अगुरु
णांकटुत्वच्यंतिक्तं तीक्ष्णंचपित्तल
म् । लघुकर्णाक्षिरोगघ्नं शीत
वातकफमणुत् ॥ अगुरुर्वापुंसीति
वोपालितः । शिंशपायाम् ॥ का
लागुरुणि ॥ त्रि । लघुनि ॥ नगुरुर
स्मात् ॥

अगूढगन्धम् । न । हिङ्गुनि ॥ इतिरा
जनिर्घण्टः ॥

अगोचरम् । त्रि । इन्द्रियजन्यप्रत्य
क्षाविषये ॥

अगौकाः । पुं । शरभे ॥ खगे ॥ सिंहे
॥ त्रि । अद्रिवासिनि । अद्रिगे ॥ अ
गः ओकोयस्यसः ॥

अग्नायी । स्त्री । वन्हिपत्न्याम् ॥
अग्नेः स्त्रीत्यस्मिन्नर्थे वृषाक
प्यग्निकुसितेत्यादिसूत्रेणाग्निशब्द
स्यैकारादेशोङीप्च ॥ त्रेतायुगे ॥

अग्निः । पुं । अङ्गयन्ति अग्यंजन्मप्रा
पयन्तीतिव्युत्पत्त्या हविःप्रक्षेपाधि
करणेषु गार्हपत्याहवनीयदक्षिणा
ग्निसभ्यावसथ्यौपासनाख्येषु षड
ग्निषु ॥ पावके । वैश्वानरे ॥ अस्य
गुणा यथा । रूपंनेत्रेन्द्रियंपाकःस
न्तापस्तीक्ष्णतास्मृता । वर्णोभ्राजि
ष्णुतामर्षः शौर्यमग्नेर्गुणाअमीति ॥
षट्सुधूमाग्न्यादिषु ॥ यथा । अर्क

निष्कासनार्थायकमाज्ञेया: षडग्न
यः । धूमाग्निश्चैवदीपाग्निर्मन्दाग्नि
र्मध्यम स्तथा ॥ खराग्निश्च भडाग्नि
श्च तेषांवक्ष्यामि लक्षणम् ॥ वि
ज्वालोयोधूमशिखो धूमाग्निःसउदा
हृतः ॥ ससारमतिशुष्कं यन्मुष्टिम
ध्येसमेष्यति । तत्काष्ठं काष्ठमित्या
हुः खदिरादिसमुद्भवम् ॥ द्वाभ्यां
तस्यचतुर्थाभ्यां योग्निर्दीपाग्निरुच्य
ते । चतुरंशेन तेनैवमन्दाग्निः
परिकीर्त्तितः ॥ अर्द्धीकृताभ्यांद्वा
भ्यांतुमध्यमाग्निरुदाहृतः । अर्द्धै
स्तैः पञ्चभिः प्रोक्तःखराग्निःसर्वक
र्मसु ॥ मस्तकावधिपात्रस्य चतुर्दि
क्षुक्रमेणच । प्रसरंतियदाज्वालाः
सभडाग्निरुदीरितः ॥ सार्द्धयामञ्च
यामञ्चयाममेकंमुहूर्त्तकम् । मुहूर्त्त
मात्रमित्येवमर्कार्थंवन्हयःस्मृताः इ
ति ॥ चित्रकाख्यौषधौ ॥ तृतीये ॥
चतुष्कलेऽ ॥ आदिगुरोः संज्ञायाम् ॥
कृत्तिकानक्षत्रे ॥ अङ्गति ऊर्द्धंगच्छ
ति । अगिगतौ । अङ्गेर्नलोपश्चे
तिनिर्नलोपश्च ॥ रक्तचित्रके ॥ भल्ला
तके ॥ निम्बूके ॥ पित्ते ॥ स्वर्णे ॥

अग्निकः । पुं । इन्द्रगोपकीटे ॥ इति
हेमचन्द्रः ॥

अग्निकणः । पुं । स्फुलिङ्गे ॥ अग्नेः

कणः ॥ इत्यमरः ॥

अग्निकारिका । स्त्री । अग्निकार्य्ये ॥ इति हेमचन्द्रः ॥

अग्निकार्य्यम् । न । होमादौ हविर्दानादिपूर्व्वकाग्निज्वालने । अग्नीन्धने ॥ अग्नौ सायंप्रातःसमिद्धोमानुष्ठाने ॥ अग्नावग्नेर्वा कार्य्यम् ॥

अग्निकाष्ठम् । न । अगुरुणि ॥ इति राजनिर्घण्टः ॥

अग्निकुक्कुटः । पुं । ज्वलदग्नितृणोल्कायाम् ॥ इतित्रिकाण्डशेषः ॥ अग्नेःकुक्कुटः ॥

अग्निक्रीडा । स्त्री । रवधूपादित्यागे । हवाइ इतिभाषाप्रसिद्धे ॥

अग्निगर्भः । पुं । औषधविशेषे । अग्निनिर्यासे । अग्निजारे ॥ सूर्य्यकान्तमणौ ॥

अग्निगर्भा । स्त्री । महाज्योतिष्मत्याम् ॥ इतिराजनिर्घण्टः ॥

अग्निचित् । पुं । साग्निके । अग्निचेतरि ॥ इत्यमरः । अग्निमचैषीत् । चिञ्चयने । अग्नौचेरिति क्विप् तुक् ॥

अग्निचित्या । स्त्री । अग्न्याधाने ॥ चित्याग्निचित्ययोरितिभावेयप्रत्ययस्तुक्चनिपात्यते ॥

अग्निचूडा । स्त्री । अग्निशिखायाम् ॥

अग्निजः । पुं । भल्लातके । भिलावा ख्ये ॥ अग्निजारवृक्षे ॥ त्रि । अग्नेर्जातमात्रे ॥

अग्निजातः । पुं ।
अग्निजारः । पुं ।
अग्निजालः । पुं ।
} औषधविशेषे । वडवाग्निमले । सिन्धुफले इति राजनिर्घण्टः ॥

अग्निजिह्वा । स्त्री । अग्नेर्ज्वालायाम् ॥ लाङ्गलीवृक्षे ॥ योगविशेषे ॥ यथा । सप्तषष्ठ्यादितिथयः सोमवारादिभिर्युताः । अग्निजिह्वाः सप्तयोगामङ्गलेष्वतिगर्हिताः इति ॥ काल्यादिसप्तसु ॥ यथा । कालीकपालीचंमनोजवाचसुलोहितायाचसुधूम्रवर्णा । स्फुलिङ्गिनीविश्वरुचीच देवीलेलायमाना इतिसप्तजिह्वा इतिप्रथममुण्डकश्रुतिः ॥

अग्निज्वलिततेजनः । पुं । अग्निना दीप्तफलके । आयुधविशेषे ॥

अग्निज्वाला । स्त्री । वह्निशिखायाम् ॥ धातृपुष्पिकायाम् ॥ लाङ्गलिक्यौषधौ ॥ अग्नेरिवज्वालाऽस्याः । अग्नेर्ज्वालेवबा । रक्तपुष्पत्वात् ॥

अग्निदमनी । स्त्री । क्षुपविशेषे । बहुकण्टकायाम् । गुच्छफलायाम्

अग्निदीप्ता । स्त्री । महाज्योतिष्मतीवृक्षे ॥ इति राजनिर्घण्टः ॥

अग्निदेवा । स्त्री । कृत्तिकानक्षत्रे ॥ इ

ति हेमचन्द्रः ॥

अग्निध्वजः । पुं । मरुदाहे । धूमे । धूवाँ इति भाषा प्रसिद्धे ॥

अग्निनिर्यासः । पुं । अग्निजारवृक्षे ॥

अग्निपर्णी । स्त्री । अग्निवर्ती अगिया इतिलोकप्रसिद्धौषधौ ॥

अग्निपुराणम् । न । आग्नेये ॥ तत्र श्लोकसंख्या यथा । षोडशैवसहस्राणिपुराणंचाग्निसंज्ञितमिति ॥

अग्निभम् । न । स्वर्णे ॥ कृत्तिकानक्षत्रे ॥

अग्निभूः । पुं । कार्त्तिकेये ॥ पुराकिल तारकोपद्रुतदेवरक्षार्थंशिवेनाग्निरूपंस्ववीजंवन्हिमुखेक्षिप्तंतेनाग्निनाकृत्तिकासुक्षिप्तंतास्तदैवागतगर्भसन्तापाः शरवणं प्रविश्यप्रसूताः तेनाग्निभूरितिसर्वानन्दः ॥ न । जले ॥ त्रि । अग्निजाते ॥ अग्नेर्भवति । भू । क्विप् ॥

अग्निभूतिः । पुं । बौद्धभेदे ॥ इतिहेमचन्द्रः ॥

अग्निमणिः । पुं । सूर्यकान्ते ॥ इति जटाधरः ॥

अग्निमन्थः । पुं । श्रीपर्णे । गणिकारिकायाम् । अरणीतिख्याते ॥ अग्निमन्थः श्वयथुहृद्वीर्योष्णः कफवातहृत् । पाण्डुनुत् कटुकस्तिक्तस्तुवरोमधुरोग्निदः ॥ अग्निमन्थकुसुमशाकस्तु । अग्निमन्थभवदलसुनीता सतगाचमुद्गकेसुसाधिता । तक्रतप्तघृतयुक्तपाचितार्द्रहिंगुनाजनितवासवासिता ॥ अग्निमन्थोथहृद्यश्चत्रिदोषशमनः सरः । आध्मानच्छर्दिहाशोथचक्षूरोगविषापहः ॥ अग्निंमथ्नाति । मन्थविलोडने । कर्मण्यण् ॥ जयपर्णे ॥

अग्निमुखः । पुं । देवे ॥ विप्रे ॥ चित्रके ॥ अग्निर्मुखंयस्य ॥ न । वन्हेर्वक्त्रेषुपथ्वसु ॥

अग्निमुखी । स्त्री । भल्लातके । भिलावाइतिख्याते ॥ लाङ्गलिकायाम् ॥ अग्निरिवमुखमस्याः । गौरादिः ॥

अग्नियन्त्रम् । न । अगन्यस्त्रविशेषे । तोप बन्दुक अगन गन इत्यादिभाषा प्रसिद्धे ॥

अग्निरक्षणम् । न । अगन्याधाने ॥ अग्निपालने ॥ अग्नेः रक्षणम् ॥

अग्निरजाः । पुं । इन्द्रगोपाभिधेकीटे ॥

अग्निरुहा । स्त्री । मांसरोहिण्याम् ॥

अग्निवल्लभः । पुं । शाले ॥ सालवृक्षे ॥

अग्निवाहः । पुं । छागे ॥ अग्नेर्वाहः ॥ धूमे ॥

अग्निवित् । पुं । अग्निचिति । अग्निहोत्रिणि ॥

अग्निबीजम् । न । } स्वर्णे ॥
अग्निवीर्यम् । न । }

अग्निव्रतम् । न । भूभुजोव्रतविशेषे ॥ यथा । प्रतापयुक्तस्तेजस्वीनित्यं-स्यात्पापकर्मसु । दुष्टसामन्तहिंस्रश्चतदाग्नेयंव्रतंस्मृतमिति ॥

अग्निशरणम् । न । दक्षिणाग्निगार्हपत्याहवनीयसभ्यावसथ्यशालायाम् ॥ अग्नीनांशरणम् ॥

अग्निशाला । स्त्री । अग्निशरणे ॥ अग्नीनांशाला ॥

अग्निशिखम् । न । कुसुम्भपुष्पे ॥ कुङ्कुमे ॥ अग्नेरिवशिखाकेसरोऽस्य ॥ स्वर्णे ॥ पुं । कुसुम्भवृक्षे ॥ दीपे ॥ वाणे ॥ इतिशब्दरत्नावली ॥

अग्निशिखा । स्त्री । लाङ्गलिक्याख्यौषधौ ॥ अग्नेरिवशिखायस्याः ॥ विशल्यायाम् । शाकभेदे ॥ अग्नेरिवशिखासन्तापोयस्याः ॥ ज्वालायाम् ॥

अग्निशेखरम् । न । कुङ्कुमे ॥

अग्निष्टुत् । पुं । अग्निष्टोमस्यविकृतिरूपे क्रतुविशेषे । अग्निःस्तूयतेऽस्मिन् क्रतुविशेषे । ष्टुञ्स्तुतौ । सम्पदादित्वादधिकरणे क्विप् । अग्नेःस्तुतस्तोमसोमा इति षः ॥

अग्निष्टोमः । पुं । यज्ञविशेषे ॥ अग्नीनांस्तोमः । अग्नेःस्तुतस्तोमसोमाइतिषः ॥ अग्निष्टोमार्थग्रन्थे ॥

अग्निष्ठः । पुं । लोहमयेतण्डुलादिभर्जनपात्रे ॥

अग्निष्वात्तः । पुं । दिव्यपितृभेदे ॥ यथा । अग्निष्वात्ताश्चदेवानांमारीच्यालोकविश्रुताः इति ॥ अपिच । अग्निष्वात्तादयोलोके पितरश्चिरवासिनःइति । चिरलोकपितरइत्यर्थः ॥ अग्निनास्वदु यथास्यादेवमात्ताः भक्षिताः श्रौतस्मार्त्ताग्नि दग्धाइत्यर्थः । एवञ्चात्रमूर्धन्यादेशोनयुक्तः । मन्वादिस्मृतिषु मूर्धन्यषकारवानेवपाठः ॥ निन्त्यवहुवचनान्तोय मितिकेचित् ॥

अग्निहोत्रम् । न । यज्ञभेदे । अग्न्याधाने ॥ सायंप्रातःकालयोर्नियमेनानुष्ठेयेकर्मविशेषे ॥ अग्नयेहोत्रमत्रेतिबहुव्रीहिः ॥ पुं । अग्नौ ॥ हविषि ॥ इतिमेदिनिकरः ॥

अग्निहोत्रहवणी । स्त्री । यज्ञाङ्गभूते निर्वापसाधने काष्ठपात्रविशेषे ॥

अग्निहोत्री । पुं । अग्निहोत्रयुक्ते । अग्निचिति ॥ अग्निहोत्रमस्यास्ति । अतइनिठनावितीनिः । येनार्चिषिजुहोत्यग्नौव्यङ्गारिणिश्रमानवः । मन्दाग्निरामयावीचदरिद्रश्चसजायते ॥

अग्नीत् । पुं । ऋत्विग्भेदे ॥ अग्नि मिन्धे । ञिइन्धीदीप्तौ । क्विप् । न लोपः ॥ यज्ञमण्डपभेदे ॥

अग्नीध्रः । पुं । धनदारावरणीये ऋत्विग्विशेषे ॥ तस्यकर्मा ग्निरक्षणम् ॥ अग्निविशेषे ॥

अग्नीध्रा । स्त्री । अग्निकार्य्ये । हविर्दानादिपूर्वकाग्निज्वालने ॥

अग्नीध्रीयः । पुं । दक्षिणाग्नौ ॥

अग्नीन्धनम् । न । अग्निकार्य्ये ॥ अग्नौ इन्धनम् ॥

अग्नीषोमीयम् । न । अग्नीषोम्येह विषि ॥ अग्नीषोमौदेवतेअस्य । द्यावापृथिवीशुनासीरेत्यादिनाछः ॥

अग्नीषोम्यम् । न । हविर्विशेषे ॥ अग्नीषोमौदेवते अस्य । द्यावापृथिवीत्यचस्यचकारात्यत् ॥

अग्न्याधानम् । न । श्रौताग्निसंस्कृतौ । अग्निहोत्रे । अग्निरक्षणे ॥ अग्नेः आधानम् । अग्निहोत्रमित्यर्थः ॥

अग्न्याधेयम् । न । आहवनीयादग्न्युत्पादकेकर्मणि ॥

अग्न्यालयः । पुं । अग्न्याधारकुण्डे ॥ अग्नेःआलयः ॥

अग्न्युत्पातः । पुं । उल्कापातादिदिव्यवैकृते आकाशादिष्वग्निविकारे । उपाहिते ॥ अग्नेरुत्पातनमुत्पातो वैकृतम् ॥ अग्निनिष्ठोत्पाते ॥ मन्त्रादिनाग्नेर्दाह शक्तिनिवारणे इत्यर्थः ॥

अग्रम् । न । पुरस्तात् ॥ उपरि ॥ पलपरिमाणे ॥ आलम्बने ॥ समूहे ॥ वृक्षादिशिरसि । प्रान्ते ॥ भिक्षाविशेषे । ग्रासचतुष्टये ॥ ग्रासप्रमाणा भिक्षास्यादग्रं ग्रासचतुष्टयमिति स्मृतेः । त्रि । अधिके ॥ प्रथमे ॥ प्रधाने ॥ अग्यते अगतिवा । अगकुटिलायांगतौ । ऋज्रेन्द्रेतिसाधु ॥

अग्रकाण्डः । पुं । स्तोमवल्ल्याम् । काण्डीरे ॥

अग्रगः । त्रि । सेवके । अग्रेसरे ॥ अग्रेगच्छति । गम्लृगतौ । अन्यत्रापीतिडः ॥

अग्रगण्यः । त्रि । अग्रेगणनीये ॥ यथा । गमनाभ्वनयाने यद्भवानग्रगण्य इतिमहानाटकम् ॥

अग्रगामी । त्रि । अग्रगे । अग्रेसरे ॥

अग्रजः । पुं । ज्येष्ठ भ्रातरि ॥ ब्राह्मणे ॥ त्रि । पूर्वजाते ॥ अग्रेजातः सप्तम्यां जनेर्डः ॥

अग्रजङ्घा ॥ स्त्री । जङ्घाग्रभागे । प्रतिजङ्घायाम् ॥

अग्रजन्मा । पुं । द्विजे ॥ ज्येष्ठ भ्रातरि ॥

ग्रह्यणि ॥ अग्रेआदौजन्मास्य ॥

अग्रजातः । पुं । विप्रे ॥ चि । पूर्वजाते ॥ अग्रेजातः ॥

अग्रजातिः । पुं । ब्राह्मणे ॥ अग्रेजातिर्जन्मास्य ॥

अग्रणीः । चि । अग्रिमे । उत्तमे ॥ अग्रंनयति । णीञ्प्रापणे । सत्सूद्विषेतिक्विप् । अग्रग्रामाभ्यामितिणत्वम् ॥ विष्णौ ॥ सर्वेषामग्रणीर्विष्णुःसेव्यःपूज्यश्चनित्यश इतिमोक्षधर्मः ॥ अग्रमुत्कृष्टंनिरस्तसकलदुःखानुषङ्गंपरमानन्दस्वरूपं पदंस्थानंनयतिमुमुक्षूनितितथा ॥

अग्रतः । । । प्रथमे ॥ पुरोऽर्थे ॥ यथा । अग्रतश्चतुरोवेदाइति । अग्रेइति । आद्यादित्वात्तसिः ॥ अग्रे ॥

अग्रतःसरः । चि । अग्रगामिनि । पुरोगे ॥ अग्रतःसरति । सृगतौ । पुरोग्रतोग्रेषुसर्त्तेरितिटः ॥

अग्रदानी । पुं । आग्रहारिके । प्रेतसंप्रदानकषडङ्गतिलादि द्रव्यग्राहिणिपतितब्राह्मणे ॥ यथा । लोभीविप्रश्चशूद्राणामग्रेदानं गृहीतवान् । ग्रहणेमृतदानानामग्रदानी बभूवस इतिब्रह्मवैवर्त्तपुराणम् ॥

अग्रपर्णी । स्त्री । गौडभाषायामाल्कुशीतिप्रसिद्धौषधौ । अजलोमाख्यवृक्षे ॥

अग्रमांसम् । न । हृदयान्तर्गतमांसभेदे । युक्कायाम् ॥ अग्रं मुख्यंमांसम् ॥ उदरमध्यवर्त्तिमांसवर्धनरूपरोगविशेषे ॥

अग्रयाणम् । न । प्रथमे ॥ नासीरे । सेनाविशेषे ॥

अग्रयायी । चि । अग्रेसरे ॥

अग्रलोहिता । स्त्री । चिल्लीशाके ॥ इति राजनिर्घण्टः ॥

अग्रसन्धानी । स्त्री । यमपञ्जिकायाम् । जीवानांशुभाशुभकर्मलिखितयमस्यपुस्तके ॥

अग्रसरः । चि । अग्रगामिनि ॥ अग्रेसरति । बाहुलकाट्टः ॥ पुरोगाग्रतोग्रेषुसर्त्तेरितिटोवा ॥

अग्रहः । पुं । वानप्रस्थे ॥

अग्रहायणः । पुं । मार्गमासे । मार्गशीर्षे ॥

अग्रायणीयम् । न । वादस्यभेदे ॥

अग्राह्यः । चि । परमेश्वरे ॥ इन्द्रियाऽविषये ॥ नग्राह्यः ॥ ग्रहउपादाने ण्यत् ॥ यथा । अग्राह्यं शिवनैवेद्यंपत्रंपुष्पंफलंजलम् । सालग्रामशिलास्पर्शात्सर्वंयातिपवित्रतामिति ॥

अग्रिमः । चि । ज्येष्ठे ॥ उत्तमे ॥ अग्रेजातः । तत्रभवोवा । अग्रादिपश्चाड्डिमच् ॥

अग्रिमा । स्त्री । लवनीफले । लोना इतिगौडप्रसिद्धेफलवृक्षे ॥

अग्रियः । पुं । ज्येष्ठसोदरे ॥ त्रि । प्रधाने ॥ इत्यमरः ॥ अग्रेभवः । घः ॥

अग्रीयः । त्रि । अग्रियार्थे ॥ अग्रेभवः । छप्रत्ययः ॥

अग्रे । ा । प्रधाने ॥ विभक्तिप्रतिरूपकोनिपातः ॥

अग्रेगूः । पुं । अग्रगे ॥ अग्रेगच्छति । गमॢगतौ । क्विप् । ऊङ्चगमादीनामित्यूङ् । अनुनासिकलोपश्च । अग्रेग्वौ अग्रेग्वः इत्यादिबोध्यम् ॥

अग्रेदिधिषूः । पुं । पुनर्भूभर्त्तरि । प्रधानपुनर्भूभार्ये ॥ अग्रेप्रधानंदिधिषूर्यस्य । अग्रेइतिविभक्तिप्रतिरूपकोनिपातः । समासान्तविधेरनित्यत्वान्नकप् ॥

अग्रेदिधिषूः । स्त्री । ज्येष्ठायांसोदरभगिन्यामनूढायां याकनिष्ठा विवाह्येन दीयतेतस्याम् ॥ उक्तञ्चलौगाक्षिणा । ज्येष्ठायांयद्यनूढायां कन्यायामुह्यतेऽनुजा । साचाग्रेदिधिषूर्ज्ञेयापूर्वा तुदिधिषुःस्मृतेति ॥

अग्रेवणम् । न । वनस्याग्रभागे ॥ वनस्याग्रे । राजदन्तादिषु निपातनात्सप्तम्याअलुक् । वनंपुरगेतिणत्वम् ॥

अग्रेसरः । त्रि । अग्रगे । पुरोगमे ॥ अग्रमग्रेणाग्रेवासरति । सृगतौ । पुरोग्रतोऽग्रेषुसर्त्तेरितिटः अग्रेइति एदन्तत्वंनिपातनात् ॥

अग्रेसरिकः । त्रि । अग्रगामिनि ॥

अग्र्यः । त्रि । अग्रिमे । प्रधाने ॥ पुं । ज्येष्ठभ्रातरि ॥ प्रतिष्ठिते ॥ अग्रेभवः । अग्राद्यत् ॥ अग्रेसाधुर्वा । तत्रसाधुरितियत् ॥ अग्रइत्यवा । शाखादिभ्योयः ॥

अघम् । न । व्यसने ॥ दुःखे ॥ दुरिते । पापे ॥ अपराधे ॥ त्रि । तद्वति ॥ पापाचरणे ॥ अंघतेगच्छतिदानादिना । अघिगतौ । पचाद्यच् । आगमशास्त्रस्याऽनित्यत्वान्ननुम् ॥ अङ्घ्यतेऽनेनवा ॥ अघंविद्यतेऽस्यअर्शआद्यच् ॥

अघमर्षणम् । त्रि । पापनाशिमन्त्रविशेषे । सर्वेनसामपध्वंसिनिजप्ये । अघंमर्षति । मृषुसहने । सहनमभिभवः । यद्वा । मृष्यति । ल्युट् । स्त्रियांटित्वान्ङीप् ॥

अघमारः । पुं । यमे ॥ अघेनपापविशेषेणअत्युग्रेण अकाले मारयतिइतिअघमारः अजन्तः ॥

अघायुः । त्रि । पापजीवने ॥

अघोरः । पुं । गिरिशे ॥ त्रि । अभयानके ॥

अघोरा । स्त्री । भाद्रकृष्णचतुर्दश्याम् ॥

यथा । भाद्रमास्यसितपक्षेऽघोराख्याचतुर्दशी । तस्यामाराधितः स्थाणुर्नयेच्छिवपुरंध्रुवमितिस्मृतिः ॥

अघोः । त । सम्बोधने ॥

अघन्यः । पुं । प्रजापतौ ॥ अघन्यादित्वात्हन्तेर्यक्अडागमउपधालोपश्च ॥ हन्तुमशक्यो ऽघन्यःपर्वतइतिवेदभाष्यम् ॥

अघन्या । स्त्री । सौरभेय्याम् ॥ नहन्यतेनहन्ति वादातारम् । अघन्यादयश्चेतिसाधुः ॥

अङ्कः । पुं । रूपकभेदे ॥ चिन्हे ॥ आजौ ॥ भूषणे ॥ कुक्षभूषायाम ॥ रूपके ॥ अंशे ॥ अन्तिके ॥ उत्सङ्गे ॥ स्थाने ॥ प्रकरणे ॥ अगे ॥ कटिप्रदेशे ॥ नाटकादिपरिच्छेदे ॥ एकादिरेखायाम् ॥ अपराधे ॥ नवसु ॥ नवमाङ्के ॥ अङ्क्यतेऽनेन । अकिलक्षणे । हलश्चेतिघञ् ॥

अङ्कतिः । पुं । अग्निहोत्रिणि ॥ वन्हौ ॥ वेधसि ॥ वायौ ॥ अञ्चति । अञ्चुगतौ । अञ्चे.कोचिच्चयतिःकश्चान्तादेशः॥

अङ्कनम् । न । संख्यासंस्थाने ॥ चिन्हयुक्तीकरणे । आंकनाइतिख्याते ॥

अङ्कपालिका । स्त्री । आश्लेषे । आलिङ्गने ॥

अङ्कपाली । स्त्री । परीरम्भे ॥ धात्र्याम् ॥ वेदिकायाम् ॥ इतिमेदिनी ॥ कोटयामितिहेमचन्द्रः ॥

अङ्कलोड्यः । पुं । विस्फोटके । चेचकोइतिगौडभाषाप्रसिद्धे ॥

अङ्कः । न । चिन्हे ॥ शरीरे ॥ अञ्चति । अञ्चुगतिपूजनयोः । अञ्च्यञ्जियुजिभृजिभ्यःकुश्चेत्यसुन् कवर्गश्चान्तादेशः । अङ्कसी । अङ्कांसि ॥

अङ्कितः । चि । चिन्हिते । लाञ्छिते ॥ इतिव्याडिः ॥

अङ्किनी । स्त्री । अङ्कानांसमूहे ॥ खलादित्वादिनिः ॥

अङ्की । स्त्री । मृदङ्गभेदे । अङ्क्ये ॥

अङ्कुरः । पुं । रुधिरे ॥ लोम्नि ॥ सलिले ॥ अभिनवोद्भिदि ॥ अङ्क्यते । अकिलक्षणे । मन्दिवाशिमथीत्युरच् ॥

अङ्कुरितः । चि । उदयति ॥

अङ्कुशः । पुं । न । सृण्याम् ॥ बाधायाम् । अङ्क्यतेऽनेन । अकि । सानसिवर्णसिपर्णसितण्डुलाङ्कुश इति निपातनादुशच् ॥

अङ्कुशदुर्द्धरः । पुं । गम्भीरवेदिनि ॥

अङ्कुशी । स्त्री । फलाद्याहृतिसाधने ॥ बौद्धमातरि । जिनानांचतुर्विंशतिशासनदेव्यन्तर्गतदेवी विशेषे ॥ इतिहेमचन्द्रः ॥

अङ्कूरः । पुं । अङ्कुरे । अभिनवोद्भिदि ॥ अंक्यते । अकिलक्षणे । खर्जूरादिंत्वादूरः ॥

अङ्कोटः । पुं । निकोचके । अङ्कोले । टेराइतिख्यातवृक्षे ॥ अङ्कोटकःकटुस्तीक्ष्णःस्निग्धोष्णस्तुवरोलघुः । रेचनःकृमिशूलामशोथग्रहविषापहः ॥ विसर्पं कफपित्तास्रमूषकस्यविषापहः । तत्फलंशीतलंस्वादुश्लेष्मघ्नंबृंहणंगुरु ॥ बल्यंविरेचनंवातपित्तदाहक्षयास्रजित् ॥ अङ्क्यते । अकिलक्षणे । बाहुलकादोटः ॥

अङ्कोठः । पुं । अङ्कोटे । टेराइतिख्यातवृक्षे । आकोडइतिगौडभाषाप्रसिद्धे ॥ अङ्क्यतेबाहुलकादोठः ॥

अङ्कोलः । पुं । अङ्कोटवृक्षे ॥

अङ्कोलिका । स्त्री । आलिङ्गने ॥ इति शब्दमाला ॥

अङ्कोल्लसारः । पुं । । स्थावरविषप्रभेदे द्रुमान्तरे ॥ इतिहेमचन्द्रः ॥

अङ्क्यः । पुं । मृदङ्गभेदे ॥ यथा । सार्द्धतालत्रयायाम श्चतुर्दशाङ्गुलाननः । हरीतक्याकृतिर्यःस्यादङ्क्योङ्कसहितोवाद्यतेइतिभरतः ॥ अपिच । हरीतक्याकृतिस्त्वंक्योयवमध्यस्तथोर्द्धकः । आलिङ्ग्यश्चैव गोपुच्छोमध्यदक्षिणवामगाः ॥

अङ्ग । । सम्बोधने ॥ अङ्गति । अगिगतौ । पचाद्यच् । हर्षे ॥ सङ्गमे ॥ असूयायाम् ॥ पुनरर्थे ॥ अङ्गमम् । घञ् । मूर्खोपिनावमन्तव्यःकिमङ्गविद्वान् ॥

अङ्गम् । न । काये । गात्रे ॥ अवयवे । प्रतीके ॥ उपाये ॥ श्रुतेःशिक्षादिषट्सु ॥ यथा । शिक्षाकल्पोव्याकरणंनिरुक्तंछंदएवच । ज्योतिषञ्चषडङ्गानिकथितानिमनीषिभिः ॥ मनसि ॥ यथा । हिरण्यगर्भाङ्गभुवंमुनिंहरिरितिमाघः ॥ क्लीबैकत्वेतुअप्रधाने ॥ तल्लक्षणंयथा । तदीयप्रधानफलजनकव्यापारजनकत्वेसतितदीयप्रधानफलाजनकत्वमङ्गत्वम् ॥ पुंभूम्नि । नीवृति ॥ यथा । वैद्यनाथंसमारभ्यभुवनेशान्तगंशिवे । तावदङ्गाभिधोदेशोयात्रायांनहिदुष्यतीति ॥ अङ्गाःक्षत्रियविशेषाःतेषांनिवासोजनपदःअङ्गाः । तस्यनिवासइत्यणोजनपदेलुपलुपियुक्तवद्व्यक्तिवचने । त्रि । अङ्गवति ॥ अन्तिके ॥ अङ्ग्यते ज्ञायतेऽनेन । अगिगतौ । घञ् ॥ अङ्गति । अज्वा ॥ सम्पादके ॥ षट्सु ॥ लग्ने ॥

अङ्गग्रहः । पुं । गात्रवेदनायाम् ॥ इति वैद्यकम् ॥

अङ्गजः । पुं । अनङ्गे ॥ केशे ॥ पुत्रे ॥ गदे ॥ न । रुधिरे ॥ मले ॥ अङ्गात

अङ्गेभ्योवा जातः। जनी। डः॥ कन्यायामङ्गजामता॥ त्रि। कायजे॥

अङ्गणम्। न। अङ्गने॥ पृषोदरादित्वात्साधुत्वम्॥ अङ्गत्यत्र। अगि। ल्युट्। अनादेशस्य बाहुलकात्साधुत्वमित्येके॥

अङ्गतिः। पुं। अग्निहोत्रिणि॥ वह्नौ वेधसि॥ विष्णौ॥ इतिशब्दरत्नावली॥

अङ्गदः। पुं। वालिवानरपुत्रे॥ न। केयूरे॥ त्रि। अङ्गदातरि॥ अङ्गं दयते द्यायति द्यतिवा। दैङ्रक्षणे दैप् शोधने दो अवखण्डने वा। आतोनुपेतिकः॥

अङ्गदा। स्त्री। याम्यदिग्दन्तिहस्तिन्याम्॥

अङ्गनम्। न। प्राङ्गणे॥ याने॥ अङ्ग्यत्र। अगिगतौ। करणेऽप्यधिकरणे ल्युट्॥

अङ्गना। स्त्री। कामिन्याम्॥ प्रशस्तान्यङ्गान्यस्याः। अङ्गात्कल्याणइतिनः॥ सार्वभौमस्योत्तरदिग्गजस्ययोषिति॥ अङ्गति। अगिगतौ। युच्॥

अङ्गनाप्रियः। पुं। अशोकपादपे॥

अङ्गपः। पुं। लग्नेशे॥

अङ्गपालिः। पुं। आलिङ्गने॥ इतित्रिकाण्डशेषः॥

अङ्गभूः। पुं। पुत्रे॥ स्मरे॥

अङ्गमर्द्दः। पुं। अङ्गसंवाहके। नापितादौ॥

अङ्गमर्द्दकः। पुं। अङ्गमर्द्दे। अङ्गमर्द्दिनि॥

अङ्गमेजयत्वम्। न। अङ्गकम्पने॥ आसनस्थैर्य्यविघाते॥ सर्वाङ्गाणांवेपथौ। आसनमनसोःस्थैर्यस्यबाधके॥

अङ्गरक्तः। पुं। गुण्डारोचन्याम्। पिकाचेष्टने॥ त्रि। रञ्जिते॥

अङ्गरक्षणी। स्त्री। आयस्याम्। जालिकायाम्। लोहेकासंजावाइतिभाषाप्रसिद्धायाम्॥

अङ्गरागः। पुं। चन्दनाद्यैरङ्गलेपे। विलेपने॥ अङ्गेषुरागः॥

अङ्गराट्। पुं। अङ्गदेशाधिपे। कर्णे॥

अङ्गलक्ष्मीः। स्त्री। देहकान्तौ॥

अङ्गलोड्यः। पुं। चिञ्चोटतृणे॥

अङ्गवः। पुं। शुष्कफले। वाने॥

अङ्गविकृतिः। पुं। अपस्माररोगे॥ अङ्गविकारे॥

अङ्गविक्षेपः। पुं। अङ्गुल्याद्यङ्गचालनरूपेनृत्ये। अङ्गविक्षेपणे। अङ्गहारे॥ अङ्गानांविक्षेपोयत्र॥

अङ्गवैकृतम्। न। अङ्गविकारे। इङ्गिते॥

अङ्गः। न। पत्रिणि॥ अज्यते। अञ्जू व्यक्त्यादौ। अञ्च्यञ्जियुजिभृजिभ्यः

कुषेच्चस्यसुन्। कवर्गस्यान्तादेशः। अङ्गसी अङ्गांसि॥

अङ्गसंस्कारः। पुं। परिकर्म्मणि। शरीरशोभाजनककर्मणिस्नानादौ॥ अङ्गं संस्क्रियतेऽनेन। सम्पूर्वात्करोतेर्घञ्॥

अङ्गहारः। पुं। अङ्गविक्षेपे। अङ्गुल्यादिविन्यासभेदे। अङ्गानांस्थानात् स्थानान्तरेनयने। अङ्गस्यहरणम्। हृञ् हरणे। घञ्॥

अङ्गहारिः। पुं। अङ्गहारे। इतिभरतधृतोहट्टचन्द्रः॥

अङ्गहीनः। त्रि। व्यङ्गे। काणादौ॥ अङ्गेन अङ्गाभ्यां अङ्गैर्वा हीनः॥

अङ्गारः। पुं। महीसुते। हिंतावल्याम्॥ पुं। न। अलाते। निर्धूमाग्निपिण्डे॥ अङ्गति। अगिगतौ। अङ्गिमदिमन्दिभ्यआरन्॥ अङ्गमिवर्त्तिवा। अङ्गतौ। कर्मण्यण्॥

अङ्गारकः। पुं। कुजे। भौमे॥ अङ्गारनिर्वर्त्तिपीनत्वात्। अङ्गतौ॥ कर्मण्यण्। संज्ञायांकन्॥ यद्वा। अङ्गारइवरक्तवर्णत्वात्। इवेप्रतिकृताविति कन्॥ उल्मुकांशे॥ कुरुण्टके॥ भृङ्गराजे॥

अङ्गारकतैलम्। न। स्वनामख्यातपक्वतैलविशेषे॥ तस्यपाकप्रकारो यथा। मूर्वालाक्षाहरिद्रेद्वे मञ्जिष्ठासेन्द्रवारुणी। वृहतीसैन्धवंकुष्ठं रास्नामांसीशतावरी॥ आरनालाढकेनैवतैलप्रस्थंविपाचयेत्। तैलमङ्गारकंनाम सर्वज्वरविमोक्षणमितिसुखबोधः॥

अङ्गारकमणिः। पुं। प्रवाले॥ इति राजनिर्घण्टः॥

अङ्गारकर्कटी। स्त्री। अंगाकडी बाटी लिट्टी इत्यादि प्रसिद्धिंगतायाम्॥ यथा। शुष्कगोधूमचूर्णन्तुसाम्बुगाढं विमर्दयेत्। विधायवटकाकारंनिर्धूमेमन्दवह्नौ शनैःपचेत्॥ अङ्गारकर्कटीह्येषा बृंहणीशुक्रलालघुः। दीपनीकफकृद्बल्यापीनसश्वासकासजित्॥

अङ्गारकुष्ठकः। पुं। हिंतावल्याम्। कुष्ठघ्ने॥

अङ्गारधानिका। स्त्री। हसन्त्याम्। स्वार्थेकन्॥

अङ्गारधानी। स्त्री। अङ्गारधारिण्याम्। हसन्त्याम्॥ अङ्गाराधीयन्तेऽस्याम्। डुधाञ्धारणपोषणयोः। ल्युट्। ङीप्॥

अङ्गारधारिणी। स्त्री। अङ्गारधान्याम्। अङ्गाराणांधारिणी॥

अङ्गारपरिपाचितम्। न। शूलाकृतपक्वमांसे॥ अङ्गारेषुपरितःपाचितम्॥ त्रि। अङ्गारपक्वे॥

अङ्गारपर्णः । पुं । चित्ररथाख्येगंधर्वे ॥ इतिमहाभारतम् ॥

अङ्गारपुष्पः । पुं । जीवपुत्रद्रुमे । इति रत्नमाला ।

अङ्गारमञ्जरी । स्त्री ।
अङ्गारमञ्जी । स्त्री । } करञ्जभेदे ॥

अङ्गारवल्लरी । स्त्री । करञ्जभेदे ॥ अङ्गारवर्णपर्णावल्लरी ॥ भार्ग्याम् ॥ गुञ्जायाम् ॥

अङ्गारवल्ली । स्त्री । महाकरञ्जे ॥ भार्ग्याम् । अङ्गारवतवल्लीअस्याः । समासान्तविधेरनित्यत्वात् । नकप् ॥

अङ्गारशकटी । स्त्री । हसन्त्याम् । अङ्गाराणांशकटी ॥

अङ्गारिः । स्त्री । हसन्त्याम् ॥ इतिजटाधरः ॥

अङ्गारिका । स्त्री । इक्षुकाण्डे । किंशुककोरके । इतिमेदिनी ॥

अङ्गारिणी । स्त्री । हसन्त्याम् । भास्करत्यक्तदिशि ॥

अङ्गारितम् । त्रि । दग्धे ॥ अङ्गाराणि सञ्जातान्यस्य । तारकादित्वादितच् । न । पलाशकलिकोद्गमे ॥

अङ्गारिता । स्त्री । हसन्त्याम् ॥ लतामात्रे । नदीभेदे ॥

अङ्गार्य्या । स्त्री । अङ्गाराणांसमूहे । पाशादिभ्योयः ॥

अङ्गावबद्धम् । न । अङ्गाश्रितोपासने । अङ्गे अङ्गेषुवाअवबद्धम् ॥ त्रि । अङ्गबद्धे ॥

अङ्गिका । स्त्री । कञ्चुके । आंगी इति भाषाप्रसिद्धे ।

अङ्गी । त्रि । प्रधाने । मुख्ये । अवयविनि ॥

अङ्गिराः । पुं । मुनिभेदे । वृहस्पतौ ॥ अङ्गिरआङ्गिरसयोरभेदोपचारात् ॥ प्रभवादिषुषष्ठवर्षे । यथा । निरातङ्कंजगत्सर्वंधनधान्यनगर्वितम् । अङ्गिरसिप्रजाःसर्वानित्योत्साहावराननेइति ॥ अङ्गति । अगिगतौ । अङ्गिराइतिअङ्गतेरसिरिडागमश्चनिपातितः ॥

अङ्गीकारः । पुं । अभ्युपगमे ॥ अङ्गीकरणम् । अङ्गीतिच्व्यन्तम् । तत्पूर्वात्कृञोभावेघञ् ॥

अङ्गीकृतम् । त्रि । स्वीकृते । ऊरीकृते ॥ यथा । आयातयातेनभवाम्बुराशौजातोमहानेवममप्रयासः । मोचायनाथस्य पदप्रसादादङ्गीकृतः सम्प्रतिकौलमार्गइति ॥ अनङ्गमङ्गमकारि ॥

अङ्गुः । पुं । अङ्गे ॥

अङ्गुरिः । स्त्री । अङ्गुल्याम् ॥

अङ्गुरी । स्त्री । अङ्गुल्याम् । पाणिपादाङ्गुल्याम् ॥

अङ्गुरीयः । पुं । न । } अङ्गुलिभूषणे॥
अङ्गुरीयकः । पुं । न । }

अङ्गुलः । पुं । अङ्गुष्ठे ॥ अवमाने ॥ वात्स्यायनमुनौ ॥ न । अष्टसंख्ययवोदरमाने ॥ अष्टभिस्तैर्भवेज्ज्येष्ठमध्यमं सप्तभिर्यवैः । कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तम ॥ मानं तु पार्श्वेन । षड्यवाः पार्श्वसम्मिता इति कात्यायनदर्शनात् ॥ अङ्गति । अगि गतौ । बाहुलकादुलः ॥

अङ्गुलिः । स्त्री । करशाखायाम् ॥ गजस्य कर्णिकायाम् । हस्तिशुण्डाग्रभागे ॥ अङ्गति । अगि गतौ । ऋतन्यञ्जीत्य ङ्गुलिः ॥ यद्वा । अङ्गुपाणिपादम्भव मवयवं लाति । बाहुलकात्डिः ॥

अङ्गुलितोरणम् । न । अर्द्धचन्द्रे । गलेहस्ताधाने ॥ चन्दनादिद्वारा ललाटे कृतेऽर्द्धचन्द्रे ॥ इति हारावली ॥

अङ्गुलिषः । पुं । अङ्गुलिकवचे ॥ अङ्गुलीस्त्रायते । त्रैङ् पालने । कप्रत्ययः ॥

अङ्गुलिमुद्रा । स्त्री । साक्षराङ्गुलिभूषणे ॥ अङ्गुल्यामुद्रङ्गाति । आतइतिकः ॥ मोदते वा । मुद हर्षे । स्फायितञ्चीतिरक्वा । अङ्गुल्याः मुद्रा ॥

अङ्गुलिमुद्रिका । स्त्री । साक्षराङ्गुलिभूषायाम् ॥ अङ्गुलिमुद्रेव । स्वार्थे कन् ॥

अङ्गुलिमोटनम् । न । अङ्गुलिध्वनौ । स्वच्छध्याम् ॥ इति हारावली ॥

अङ्गुलिसन्देशः । पुं । अङ्गुलिशब्दे । अङ्गुलिमोटने ॥ इति हारावली ॥

अङ्गुली । स्त्री । करशाखायाम् ॥ सा च मेदात्पञ्चधा । यथा । अङ्गुष्ठस्तर्जनी मध्यानामिका च कनिष्ठिकेति ॥ गजकर्णिकायाम् । हस्तिशुण्डाग्रे ॥ वह्वादिपु इतः प्राग्यङ्गादिति पक्षे ङीष् ॥

अङ्गुलीकण्टकः । पुं । नखे ॥

अङ्गुलीमुद्रिका । स्त्री । साक्षराङ्गुलिभूषायाम् ॥

अङ्गुलीयम् । न । पुं । ऊर्मिकायाम् ॥ अङ्गुलौ भवम् । जिह्वामूलाङ्गुलेश्छः ॥

अङ्गुलीयकम् । न । पुं । अङ्गुलीभूषणे । ऊर्मिकायाम् ॥ यथा । अयं मैथिल्यभिज्ञानं काकुत्स्थस्याङ्गुलीयक इति भट्टिः ॥ स्वार्थे कन् ॥

अङ्गुलीसम्भूतः । पुं । करस्हे । नखे ॥

अङ्गुष्ठः । पुं । अङ्गुलिभेदे । वृद्धाङ्गुलौ ॥ अङ्गौ पाणौ तिष्ठति । ष्ठा । सुपि तिकः । अम्बाम्बेति षत्वम् ॥

अङ्गुष्ठमात्रः । त्रि । अङ्गुष्ठपरिमाणे ॥ अङ्गुष्ठपरिमाणं हृदयपुण्डरीकं तच्छिद्रवर्त्यन्तःकरणोपाधिरङ्गुष्ठमात्रः । अङ्गुष्ठमात्रवंशपर्वमध्यवर्त्यम्बरवत् ॥

अङ्गूषः। पुं। नकुले॥ वाणे॥ इत्युणादिकोशः॥

अङ्घः। पुं। पातके। दुरिते॥ अङ्घ्यतेऽनेन। अघिगत्याक्षेपे। घञ्॥

अङ्घ्रिः। पुं। पादे॥ द्रुमूले॥ अंहति। अनेनवा। अहिगतौ। वंक्यादयश्चेतिसाधुः॥

अङ्घ्रिनामकः। पुं। वृक्षमूले॥ इत्यमरः॥

अङ्घ्रिनाम। न। वृक्षमूले॥ अङ्घ्रेर्नामनामयस्य॥ इतिहेमचन्द्रः॥

अङ्घ्रिपः। पुं। द्रुमे॥ अघ्रिभिःपिबति। पापाने। सुपीतियोगविभागात्कः॥

अङ्घ्रिपर्णिका। स्त्री। पृश्निपर्ण्याम्। पिठवनीतिख्यातायाम्॥ अङ्घ्रेरारभ्यपर्णान्यस्याः। ङीष्। स्वार्थेकन्॥

अङ्घ्रिपर्णी। स्त्री। पृश्निपर्ण्याम्॥

अङ्घ्रिवल्लिः। स्त्री। पृश्निपर्ण्याम्॥ अङ्घ्रेरारभ्यवल्लिरस्याः॥

अङ्घ्रिवल्लिका। स्त्री। पृश्निपर्ण्याम्। चाकुलिया इति गौडभाषाप्रसिद्धायाम्॥

अङ्घ्रिवल्ली। स्त्री। पृश्निपर्ण्याम्॥

अङ्घ्रिस्कन्धः। पुं। गुल्फे॥

अचक्षुः। त्रि। मन्दचक्षुषि॥ नेत्रहीने। अन्धे॥ नचक्षुर्यस्य॥

अचण्डी। स्त्री। सुकरायाम्॥ अकोपनस्त्रियाम्॥ नचण्डी॥

अचरः। पुं। स्थावरे॥ चरति। चरते रच्। नचरः॥ त्रि। स्थिरे॥

अचरमम्। त्रि। प्रधाने। श्रेष्ठे॥

अचलः। पुं। शैले॥ कीले॥ शिवे॥ त्रि। अकम्पे। स्थिरे॥ अविकारिणि। कूटस्थे॥ नस्वरूपान्नसामर्थ्यान्नच ज्ञानादिकाद्गुणात्। चलनंविद्यते यस्येत्यचलः कीर्त्तितोच्युतः॥ सुषुप्तिमूर्च्छास्तब्धीभावादिरूपलयलक्षणचलनरहिते॥ दीर्घकालादरनैरन्तर्यसत्कारसेवनैर्विजातीयप्रत्ययादूषिते आत्मतत्वे। अवक्रिये॥ चलति। चलकम्पने। पचाद्यच्॥ नचलः॥

अचलकीला। स्त्री। भूमौ॥ इतिशब्दरत्नावली॥

अचलत्विट्। पुं। कोकिले॥ इतिशब्दचन्द्रिका॥

अचलप्रतिष्ठः। त्रि। अनतिक्रान्तमर्यादे॥ पुं। समुद्रे॥ अचलानांमैनाकादीनांप्रतिष्ठायस्मिन्॥

अचलभ्राता। पुं। बौद्धगणाधिपविशेषे॥ सतुशेष जैनाचार्यस्यैकादशशिष्यान्तर्गत इतिहेमचन्द्रः॥

अचला। स्त्री। भुवि॥ नचलति। चलकम्पने। पचाद्यच्॥ यद्वा। अचला भूधराः सन्त्यस्याम्। अर्शआदिभ्योजि

स्यच ॥

अचलाधिपः । पुं । हिमवति ॥ अचल नामधिपः ॥

अचापलम् । न । चापलाभावे ॥ नचापलम् ॥

अचिन्त्यः । त्रि । अयमीदृशइतिप्रपञ्चलक्षणत्वेनचिन्तयितुमशक्ये। मनसोऽविषये परब्रह्मणि ॥ चिन्त्योनुमेयस्तद्भिन्नलक्षणे । शब्दवृत्तेरिवमनोवृत्तेरप्यविषये । इयत्तयापरिच्छेत्तुमयोग्ये। प्रमाणादिसाचित्त्वेनसर्वप्रमाणागोचरे ॥ नचिन्त्यः ॥ अचिन्त्याःखलुयेभावानतांस्तर्केणयोजयेत्। प्रकृतिभ्यःपरंयच्चतदचिन्त्यस्यलक्षणम् ॥

अचिन्त्यात्मा । पुं । सर्वभूतप्रणेतरि । परमेश्वरे ॥

अचिरद्युतिः । स्त्री । विद्युति ॥ अचिरं द्युतिर्यस्याःसा ॥

अचिरप्रभा । स्त्री । विद्युति ॥ अचिरंप्रभायस्याःसा ॥

अचिररोचिः । स्त्री । विद्युति ॥ अचिरं रोचिर्यस्याःसा ॥

अचिरा । स्त्री । अर्हतांमातृविशेषे ॥

अचिरांशुः । स्त्री । तडिति ॥ अचिरंअंशवोयस्याःसा ॥

अचिराङ्गलता । स्त्री । विद्युति ॥ अचिरमङ्गलतायस्याःसा ॥

अचिरात् । า । अविलम्बे । शीघ्रे ॥

अचिराभा । स्त्री । सौदामिन्याम् ॥ अचिरमाभायस्याःसा ॥

अचेतनम् । त्रि । व्यक्ते ॥ प्रधाने ॥ जडे ॥ सर्वएवप्रधानबुद्ध्यादयोऽचेतनाः नतुवैशेषिकवच्चैतन्यंबुद्धेः । नचेतनम् ॥ सेन्द्रियंचेतनंद्रव्यंनिरिन्द्रियमचेतनमितिचरकः ॥

अचेताः । त्रि । विवेकशून्ये॥ दुष्टचित्ते॥ नास्तिचेतोयस्य ॥

अचैतन्यम् । न । चेतनाभावे । अज्ञाने ॥ यथा । अचैतन्यमिदंविश्वंचैतन्यंदेवमेवतत् । नज्ञानन्यपिशास्त्राभ्रमन्ये वह्विकेवलमिति ॥ त्रि । तद्वति ॥

अच्छः । पुं । भल्लूके ॥ स्फटिके ॥ त्रि । निर्मले ॥ छोछेदने । नछ्यतिदृष्टिम । सुपीतियोगविभागात्कः । नछ्यतेवा । अन्येष्वपीतिडः ॥

अच्छटाभा । स्त्री । विद्युति ॥

अच्छभल्लः । पुं । भल्लूके ॥ अच्छमाभिमुख्येनभल्लते हिनस्ति । भल्लपरिभाषणहिंसादानेषु । पचाद्यच् ॥

अच्छम् । า । आभिमुख्ये ॥

अच्छावाकः । पुं । ऋत्विग्विशेषे ॥

अच्छावाकीयम् । न । अच्छावाकस्यकर्मभाग्नयोः ॥ होत्राभ्यश्छः ॥ स्तुतवि

शेषे । अच्छावाक्शब्दोऽस्मिन्नस्ति ।
मतौछ:छन्दसाम्नोरितिछ: ॥

अच्युत: । पुं । विष्णौ । अप्रच्युतसच्चिदानन्दस्वभावे । देशकालवस्तुषुच्युतिरहिते । सर्वदानिर्विकारे ॥ कृष्णे । वासुदेवे ॥ स्वरूपभूतसामर्थ्यात् नच्युतोमच्यवते नच्यविष्यतेय:सोऽच्युत: ॥ यस्मात्त्वच्युतपूर्वोऽहमच्युतस्तेनकर्मणेतिभगवतोवचनम् ॥ नास्तिच्युतंस्खलनंस्वपदाद्यस्य ॥ यद्वा । नच्योतिष्ट । च्युङ्गतौ । भौवादिक: । गत्यर्थेतिक्त: ॥ द्वादशेसर्गे ॥ चि । स्थिरे ॥

अच्युतभाव: । पुं । विष्णुभक्तौ ॥ अच्युतेभाव: ॥

अच्युतमूर्त्ति: । पुं । विष्णौ ॥

अच्युताग्रज: । पुं । बलदेवे ॥ शक्रे ॥ अच्युतस्यअग्रज: । षष्ठीतत्पुरुष: ॥

अच्युतावास: । पुं । अश्वत्थवृक्षे ॥

अज: । पुं । हरे ॥ विष्णौ ॥ अजतिगच्छतिभक्तहृदयम् अजतिक्षिपतिशत्रूनसुरान्प्रति । अजगतिक्षेपणयो:। अच् ॥ नहिजातोनजायेहं नजनिष्येकदाचन । क्षेत्रज्ञ:सर्वभूतानां तस्मादहमज:स्मृत इतिभारते ॥ वेधसि ॥ स्मरे ॥ आद्विष्णोरजायत । जनीप्रादुर्भावे । पञ्चम्यामजाताविति

ड: ॥ छागे ॥ अजति । अजगतौ । पचाद्यच् । अजाविभ्यामिति निर्देशात्नवीभाव:॥ मेषे ॥ मेषराशौ ॥ रघुराजपुत्रे ॥ जन्मादिविक्रियारहिते आत्मनि ॥ माचिकधातौ ॥ विधौ । सोमे ॥ चि । जन्मशून्ये । नजायते इतिव्युत्पत्त्याआद्यविकारशून्ये ॥ अवयवावयविविभागरहिते ॥ नजायते । जनीप्रादुर्भावे । अन्येष्वपीतिड: ॥ आत्विष्णोर्जायतेवा ॥

अजएकपात् । पुं । एतन्नामके देवविशेषे ॥

अजकर्ण: । पुं । छागकर्णे ॥ सालतरो: प्रभेदे । मरिचपत्रे ॥ अजकर्ण:कटुस्तिक्त:कषायोष्णोव्यपोहति । कफपाण्डुश्रुतिगदान्मेहकुष्ठविषव्रणान् ॥

अजकर्णक: । पुं । सालवृक्षे ॥

अजकवम् । न । पुं । शिवधनुषि ॥ अजकौविष्णुब्रह्माणौ वाति । वागतिगन्धनयो:। सुपीति आतोनुपसर्गइति वाक: ॥

अजकाव: । पुं । न । पिनाके ॥ अजोविष्णु:कोब्रह्माताववतीत्यजकाव: ॥

अजग: । पुं । विष्णौ ॥

अजगन्धा । स्त्री । ववरायाम् ॥ अजमोदायाम् ॥ अजस्येवगन्धोयस्या: । अजशब्द:स्वगन्धेसाक्षणिक: ॥

अजगन्धिका । स्त्री । वर्व्वरायाम् । वावुइ इतिख्याते शाकान्तरे । अजस्येव गन्धोऽस्याः । अजशब्दः स्वगन्धेलाच णिकः । उग्रगन्धायाम् ॥

अजगन्धिनी । स्त्री । अजशृङ्ग्याम् ॥

अजगरः । पुं । अहिभेदे । वाहसे ॥ गिरतीतिगरः । गनिगरणे । पचाद्यच् । अजस्यगरः । अजोनित्यो गरोविषंयस्येतिवा ॥

अजगवम् । न । पिनाके । शिवचापे । अजेनब्रह्मणा गम्यते प्राप्यते । गम्लृ गतौ । अन्येष्वपिदृश्यतेइतिडः । अजंछागंगच्छतियज्ञत्वेनप्रविशतीतिवा । अजगोविष्णुरस्तिशरत्वेनास्मिन् । गापद्मजगात्कंत्रायामितिवः ॥

अजगावम् । न । ईशचापे । पिनाके । इतिशब्दमाला ॥

अजजीवकः । पुं । अजाजीविनि । जावाले ॥ अजैर्जीविकायस्य ॥

अजटा । स्त्री । भूम्यामलक्याम् ॥

अजडा । स्त्री । भूम्यामलक्याम् । कपिकच्छ्वां ॥

अजथ्या । स्त्री । स्वर्णयूथिकायाम् । अजाय अजायैवा हिता । अजाविभ्यां थ्यन् । तसिलादिष्वितिपुंवद्भावः ॥

अजदण्डी । स्त्री । ब्रह्मदण्डीवृक्षे ॥

अजननिः । पुं । अनुत्पत्तौ ॥ आक्रोशे । अजननम् । आक्रोशेनञ्यनिः । यथा । तस्याजननिरेवास्तु ।

अजनयोनिः । पुं । ब्रह्मणि । चतुरानने ॥

अजनाभः । पुं । अस्मिन्वर्षे । भरताधिकारात्भारतइतिव्यपदेशः पूर्वंतु अजनाभइति ॥

अजन्यम् । न । उत्पाते ॥ त्रि । नित्ये । अजनेसाधु । तत्रसाधुरितियत् । नजन्यतेवा । जनेर्यक् । तकिशसिचतियतिजनिभ्योयद्वाच्य इतियद्वा ॥

अजपः । त्रि । असदध्येतरि । जपाभाववति । पुं । छागपालके ॥ यथा । ओषधीर्नामरूपाभ्यांजानन्तेह्यजपावने इतिचरकः । अजम् अजान्वापाति । पात्रक्षणे । आतोनुपसर्गेइतिकः ॥

अजपा । स्त्री । सन्ध्यावन्दनहीनायाम् । देवताभेदे ॥ गायत्रीविशेषे । यथा । अजपानामगायत्रीजीवोजपतिनित्यशः । अजपांजपतोनित्यंपुनर्जन्मनविद्यते इति । अस्याविधानंदक्षिणामूर्त्तिसंहितायांस्पष्टम् ॥

अजपात् । पुं । पूर्वभाद्रपदनक्षत्रे ॥

अजपादः । पुं । विष्णुपदे

अजभक्षः । पुं । वर्व्वुरवृक्षे । इतिराजनिर्घण्टः ॥

अजमीढः । पुं । युधिष्ठिरे । इतित्रिकाण्डशेषः ॥

अजमोदा । स्त्री । उग्रगन्धायाम् । यवान्याम् ॥ अजंमोदयति । मुदहर्षे । णयन्तः । कर्मण्यण् । अजादित्वाट्टाप् ॥ यद्वा । अजेममोदते मोदतेवा । पचाद्यच् घञ्वा ॥ अजमोदाकटुस्तीक्ष्णादीपनीकफवातनुत् । उष्णाविदाहिनी हृद्यावृष्यावलकारी लघुः । नेत्रामयकृमिच्छर्द्दिहिक्काबस्तिरुजोहरेत् ॥

अजम्भः । पुं । भेके ॥ नसन्तिजम्भाःदन्ताः अस्य ॥ इतिशब्दरत्नावली ॥

अजयः । पुं । पराजये ॥ राढदेशप्रसिद्धनदविशेषे ॥

अजया । स्त्री । भङ्गायाम् । विजयायाम् ॥

अजय्यम् । त्रि । जेतुमशक्ये ॥ नजय्यम् ॥

अजरः । त्रि । जरारहिते ॥ पुं । आत्मनि ॥ देवे ॥ नजीर्यते नविपरिणमते इत्यजर आत्मेत्यर्थः ॥

अजरा । स्त्री । जीर्णदारुणि ॥ गृहकन्यायाम् । घृतकुमारीतिप्रसिद्धायाम् ॥

अजर्य्यम् । न । सङ्गते । सौहृद्ये ॥ न जीर्य्यति । जृषवयोहानौ । नञ्पूर्वात् जीर्यतेः सङ्गतेविशेष्ये अजर्य्यंसङ्गतमितिकर्त्तरियत्निपात्यते ॥ तेन सङ्गतमार्यणरामाजर्यं कुरुद्रुतम् ॥ सङ्गतं युक्तम् ॥

अजलम्बनम् । न । स्रोतोञ्जने ॥

अजलोमा । पुं । शुयाशिम्बीतिगौडभाषाप्रसिद्धवृक्षे । महाहस्वायाम् ॥ । न । अजलोम्नि ॥

अजवल्ली । स्त्री । मेषशृङ्ग्याम् । विषाण्याम् ॥

अजवीथी । स्त्री । दक्षिणमार्गे नक्षत्रविशेषाणांसंज्ञाविशेषे ॥ यथा । मूलाषाढोत्तराषाढा अजवीथ्यभिशब्दितेति ॥

अजशृङ्गी । स्त्री । विषाण्याम् । शृङ्ग्याम् । मेढासींगीतिख्यातायाम् ॥ अजःशृङ्गमस्याः । अजशब्दोऽजशृङ्गसदृशेलाक्षणिकः । गौरादित्वान्ङीष् ॥

अजस्रम् । न । निरन्तरे । सन्तते । कालत्रयावस्थायिनि ॥ नजस्यति । जसुमोक्षणे । नमिकम्पिसम्यजसकमहिंसदीपोर इतिरः । क्रियाविशेषणत्वेस्यक्लीवत्त्वम् । द्रव्यविशेषणत्वेतुवाच्यलिङ्गत्त्वम् ॥

अजस्रम् । ा । नित्ये । सातत्ये ॥

अजहत्स्वार्था । स्त्री । उपादानलक्षणायाम् । अजहल्लक्षणायाम् । स्वीयार्थापरित्यागिन्यां लक्षणायाम् ॥ यथा । कुन्ताःप्रविशन्तिइत्यत्र कुन्तधारिणि पुरुषेलक्षणा ॥

अजहल्लक्षणा । स्त्री । अजहत्स्वार्थायाम् ॥ वाच्यार्थापरित्यागेनतत्सम्बन्धिनिवृत्तिरजहल्लक्षणेति । यथा । शोणोधावतीत्यत्रलक्ष्यशोणगुणगमनलक्षणस्य वाक्यार्थस्यासम्भवत्वात्तद्रूपरित्यागेनतदाश्रयाश्वादिलक्षणयातद्विरोधपरिहार सम्भवादजहल्लक्षणा । शोणपदेस्ववाच्यशोणगुणापरित्यागेन तदाधारलक्षणेत्यर्थः ॥

अजहल्लिङ्गः । पुं । स्वलिङ्गात्यागिनि ॥ विशेषणभूतोपि स्वलिङ्गात्यागीशब्दोऽजहल्लिङ्गइत्युच्यते ॥

अजहा । स्त्री । शूकशिम्ब्याम् । कपिकच्छ्वाम् ॥

अजा । स्त्री । मायायाम् ॥ छागस्याम् ॥ अजति । अजगतौ । पचाद्यच् । अजाविभ्यामितिनिर्देशान्नवी । अजाद्यतष्टाप् ॥ नजायते इतिवा ॥

अजागरः । पुं । भृङ्गराजे ॥ त्रि । जागरणरहिते ॥

अजाजी । स्त्री । काकोदुम्बरिकायाम् ॥ कृष्णजीरके ॥ श्वेतजीरके ॥ इतिराजनिर्घण्टः ॥ अजमजति । अजगतिक्षेपणयोः । कर्मण्यण् । ङीप् । बहुलंतणीतिवीन ॥

अजाजीवः । पुं । छागोपजीविनि । जाबाले ॥ अजाआजीवो जीविकाऽस्य ॥

अजातशत्रुः । पुं । युधिष्ठिराख्यपाण्डवे ॥ स्वयमविद्वेषणशीलत्वान्नजातशत्रुर्यस्य ॥

अजातिः । स्त्री । अनुत्पत्तौ ॥ हेतुफलयोः कार्यकारणभावानुपपत्तौ ॥ पूर्वापरापरिज्ञानमजातेःपरिदीपकम् । नियतेपौर्वापर्येनिर्द्धारितेजातिःसिद्ध्यतितदभावेतदसिद्धिरित्यर्थः ॥ त्रि । जन्मरहिते ॥ जातिर्जन्मतद्रहितः ॥ अविद्यमानाजातिरस्यवा ॥

अजादनी । स्त्री । क्षुद्रदुरालभायाम् ॥

अजादुग्धम् । न । छागीदुग्धे ॥

अजानेयः । पुं । अश्वभेदे । उत्तमाश्वे ॥ त्रि । निर्भये ॥

अजान्त्री । स्त्री । नीलवुह्नायाम् । नौलावोनाइतिभाषा ॥ वृद्धदारके ॥

अजापालः । पुं । अजाजीवे ॥ अजां पालयति । पालरक्षणे । कर्मण्यण् ॥

अजाप्रिया । स्त्री । बदर्याम् ॥

अजिः । पुं । तेजसि ॥ अजति वीयते वा । अजगतिक्षेपणयोः । खनिकष्यजी त्यादिनाइप्रत्ययः ॥

अजीतः । पुं । विष्णौ ॥ तीर्थकृज्जैनभेदे ॥ भाविबुद्धे ॥ त्रि । अनिर्जिते ॥ नजीयतेस्म । जिअभिभवे । क्तः । नञ्जितः ॥

अजितसम्भवः । पुं । मनोजे ॥ बुद्धभेदे ॥

अजितात्मबोधस्य । त्रि । आभ्यामन्यस्मिन् ॥

अजिनम् । न । चर्म्मणि । त्रि । अबुद्धके । अजति बीयतेवा । अजगतौ । अजेरजचेति इनच् ॥

अजिनपत्रा । स्त्री । चर्म्मचटकाम् । जतुकायाम् । अजिनमिवपत्रमस्याः ।

अजिनपत्री । स्त्री । जतुकायाम् ॥

अजिनयोनिः । पुं । हरिणे । अजिनस्ययोनिः । कदलीकन्दलीचीनश्चमूरुप्रियकावपि । समूरुश्चेतिहरिणा अमीअजिनयोनयः ।

अजिरम् । न । प्राकाराद्बहिःक्रीडास्थाने । प्राङ्गणे । वाते । विषये । कूपादौ ॥ दर्दुरे । तनौ । अजन्त्यत्रानेनवा । अजगतौ । अजिरशिशिरेतिसाधु । नजीर्यति । जृषवयोहानौ । अजिरशिशिरेतिकिरच् ऋवर्णलोपश्चनिपात्यतइत्युक्तं दशपादीवृत्तौ ।

अजिरा । स्त्री । चण्ड्याम् ।

अजिह्मः । त्रि । सरले । ऋजौ । भिन्नोजिह्मात् ।

अजिह्मगः । पुं । शरे । जिह्मस्याभावः । अजिह्ममृजुगच्छति । गमल्ट गतौ । अन्येष्वपीतिडः । त्रि । अवक्रगे ।

अजिह्मः । पुं । भेके । भिक्षौ । यथा । इदमिष्टमिदंनेति योऽश्नन्नपिनसज्जते । हितंसत्यंमितंवक्तितमजिह्मं प्रचक्षते ॥ त्रि । जिह्वाशून्ये । नविद्यतेजिह्वायस्य ।

अजीकवः । पुं । ऋजगवे । पिनाके ।

अजीगर्त्तः । पुं । शुनःशेफस्यपितरि । ऋषिविशेषे ।

अजीर्णम् । न । अपाके । पक्वाशये । रोगभेदे । नजीर्णम् ॥ अनात्मवन्तः पशुवद्भुञ्जतेये ऽप्रमाणतः । रोगानीकस्यतेमूलमजीर्णं प्राप्नुवन्तिहि । अनात्मवन्तःअबुद्धिमन्तः । त्रि । जीर्णाभावविशिष्टे ।

अजीर्यम् । त्रि । वयोहानिमप्राप्नुवति ।

अजीवः । त्रि । मृते । अवसन्ने । अनेकान्तवादिनां द्वितीयेपदार्थे । सचपुद्गलाकाशधर्माधर्मास्तिकायैश्चतुर्विधः ।

अजीवनिः । स्त्री । शापोक्त्यजीवनाभावे । जीवनाभावे ॥ शापे । अजीवनिस्तवभूयात् ।

अजैकपात् । पुं । रुद्रविशेषे । पूर्वाभाद्रपदानांदैवते ।

अजैकपादः । पुं । रुद्रविशेषे ।

अज्जुका । स्त्री । नाट्योक्त्यागणिकायाम् ॥ अर्जति । अर्जअर्जने । समि

कसइतिवाहुलकादुकनरस्यजः ॥

अज्झटा । स्त्री । भूम्यामलक्याम् । वितुन्नके ॥ अद्व्ययमाश्चर्यं । अतआश्चर्यकारी झटः संघातोऽस्याः ॥ अस्ति क्विप् । झटति । झटसंघाते । अच् । टाप् । अस्तासौ झटाचवा ॥

अज्झलः । पुं । अङ्गारे । कोकिले । अंगारइतिभाषायाम् इति त्रिकाण्डशेषः ॥ न । फलके । चर्मणि । ढाल इति भाषायाम् ॥ इतिहेमचन्द्रः ॥

अज्ञः । त्रि । जडे । श्रुतितात्पर्यानभिज्ञे ॥ अनधीतशास्त्रत्वेनात्मज्ञानशून्ये अविवेकिनि ॥ मूर्खे ॥ नजानाति । ज्ञाअवबोधने । इगुपधज्ञाप्रीकिरःकः ॥

अज्ञातः । त्रि । अज्ञानेनावृते । अविदिते । नज्ञातः । यथा । अज्ञातकुलशीलस्यवासोदेयोनकर्हिचित् । मार्जारस्यहिदोषेणहतोगृध्रोजरद्गवइति हितोपदेशः ॥

अज्ञानम् । न । अविद्यायाम् ॥ ज्ञानविरुद्धमज्ञानम् । ज्ञाननिवर्त्यत्वात् ॥ यथा । एकःशत्रुर्नद्वितीयोऽस्तिशत्रुरज्ञानतुल्यःपुरुषस्यराजन् । येनावृष्टःकुरुतेकार्यतेचघोराणिकर्माणिसुदारुणानीति ॥ विपरीतदर्शने ॥ यत्प्रसादादविद्यादिसिध्यती वदिवानिशम् । तमप्यपन्हुतेऽविद्यानामज्ञानस्यास्तिदुष्करम् ॥ प्रपञ्चोपादाने । अविवेके । आवरणविक्षेपशक्तिमति । अनात्मनिवाच्ये । अनृते । अनर्थव्रातमूले । आत्माश्रयविषये ॥ यथा । यस्याज्ञानंभ्रमस्तस्याभ्रान्तःसम्यक्चवेत्तिसः । जडंनविद्यादेवत्वान्नातोऽज्ञानंजडाश्रयमिति ॥ अविद्यामायादिशब्दवाच्येतमसि ॥ अमानित्वादिविपरीतं यन्मानित्वादिविंशतिसंख्याकं तस्मिन् ॥ कर्त्तव्याकर्त्तव्यादिविषयविवेकाभावे ॥ लक्षणन्तु । सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि अहमज्ञोमाहित इत्यनुभवात् भावत्वेनव्यपदेशरूपं यत्किञ्चिदितिवदन्ति ॥ तच्च । मूलकारणत्वात् सत्त्वरजस्तमोगुणानां साम्यावस्थारूपत्वाच्च मूलप्रकृतिः प्रलयावस्था अव्यक्तम् अव्याकृतम् महासुषुप्तिः कूटवन्निर्विकारेणतिष्ठतीति कूटस्थम् ज्ञानं विनानक्षरतीत्यक्षरमितिव्यपदिश्यते ॥ अविज्ञातं चाज्ञानमिति न्यायसूत्रम् । ५ । । ६० । भावेक्तः । चकारश्चपरिषदाविज्ञातस्येच्छाद्रनुकर्षणार्थः । तथा च । परिषदाविज्ञातस्य वादिनाभिरभिहितस्याप्यविज्ञानमित्यर्थः । इदञ्च. किम्वदसि बुध्यतरवनेत्यादि ।

विष्करणेनज्ञातुंशक्यते इत्यर्थः॥ त
मआदिपञ्चसु॥ तमः१। मोहः२।
महामोहः ३। तामिस्रम्४। अ
न्धतामिस्रम्५। इति सृष्टिकाले
ब्रह्मा प्रथमम् पञ्चप्रकारमज्ञानं स
सर्ज इतिश्रीभागवतम्॥

अज्ञानकार्य्यम्। न। स्थूलसूक्ष्मप्रपञ्च
द्वये॥ अज्ञानस्यकार्य्यम्॥

अज्ञानजम्। त्रि। अज्ञानोपदाने।
अज्ञानादावरणशक्तिरूपादुद्भूते॥ अ
ज्ञानाज्जातम्। जनी०। डः॥

अज्ञानप्रभवः। पुं। अज्ञानात् स्वस्व
रूपास्फुरणात् प्रभवतीति व्युत्पत्त्या
समस्तप्रपञ्चे॥ त्रि। अज्ञानादुत्पन्ने॥

अज्ञानशक्तिः। स्त्री। आवरणशक्तिविक्षे
पशक्त्योः॥ अज्ञानस्यशक्तिः॥

अज्ञानसम्भूतः। त्रि। अविवेकादुत्पन्ने॥
अज्ञानात्सम्भूतः॥

अज्ञानसम्मोहः। पुं। अज्ञाननिमित्त
विपर्यये॥ अज्ञानेनसम्मोहः॥

अज्ञानी। त्रि। अविदुषि। अज्ञान
विशिष्टे॥ आतत्त्वबोधमज्ञानीवध्य-
तेनन्तजन्मभिः॥

अज्ञेयः। त्रि। ज्ञानाविषये॥

अञ्चतिः। पुं। मारुते॥ अञ्चति।
अञ्चु। अञ्चेः कोवेत्यतिः॥

अञ्चलः। पुं। वस्त्रान्ते। आंचर इति

आचल इति च भाषा प्रसिद्धे॥

अञ्चितम्। त्रि। पूजिते॥ शोभने॥
अञ्च्यतेस्म। अञ्चुपूजायाम्। क्तः।
अञ्चेः पूजायामितीट्। नाञ्चेःपूजा
यामितिनलोपाभावः॥

अञ्जनम्। न। कज्जले॥ अक्तौ॥
सौवीरे॥ रसाञ्जने॥ मसौ॥ पुं।
दिङ्मतङ्गजे। अञ्जनवर्णे प्रतीचि
दिग्गजे॥ उपाधौ॥ ज्योषध्याम्॥ अ
ज्ञाने। आवरणे॥ अज्यतेनयनम-
नेन। अञ्जूव्यक्त्यादौ। करणेल्युट्॥
दिवानतुप्रयोक्तव्यं नेत्रयोस्तीक्ष्णम-
ञ्जनम्। विरेकदुर्बलाद्दृष्टिरादित्यं
प्राप्यसीदति॥

अञ्जनकेशी। स्त्री। हट्टविलासिनीना
मगन्धद्रव्ये॥ अञ्जनमिवकेशाअस्याः॥

अञ्जना। स्त्री। वायुपत्न्याम्। हनु
मन्मातरि॥

अञ्जनाधिका। स्त्री। अञ्जनिकायाम्॥

अञ्जनावती। स्त्री। सुप्रतीकाख्यदिग्ग
जभार्य्यायाम्॥ अञ्जनवर्णत्वात् अञ्ज
नमस्त्यस्याः। मतौबहुचइतिदीर्घः॥

अञ्जनिका। स्त्री। ज्येष्ठीविशेषे। अ
ञ्जनहारी इतिभाषाप्रसिद्धे। हा-
लिन्याम्॥ क्षुद्रमूषिकायाम्॥

अञ्जनी। स्त्री। लेप्यनार्य्याम् चन्द-
नादिलेपनयोग्यायाम्॥ कटुकायां-

र्द्दे। कालाञ्जनीहक्षे॥

अञ्जलिः। पुं। हस्तसम्पुटे। मिलितप्रहस्तयोः॥ कुडवपरिमाणे॥ अज्यतेऽनेन। अञ्जू व्यक्त्यादौ। अतन्यञ्जीत्यञ्जेरलिच्॥

अञ्जलिकारिका। स्त्री। लज्जालुके। सङ्गायाम्॥ पुत्तलिकायाम्॥ त्रि। साञ्जलौ॥ अञ्जलेःकारका॥

अञ्जलिनी। स्त्री। लज्जालुके॥

अञ्जसः। त्रि। प्राञ्जले। अवक्रे॥

अञ्जसा। ।। साम्प्रत॥ तत्त्वे। शीघ्रे॥ आर्जवे॥ अनायासे॥ अञ्जनम्। अञ्जू व्यक्त्यादौ। कृत्यल्युटोबहुलमिति भावेपचाद्यच्। अञ्जंस्यति सायतिवा। षो अन्तकर्मणि षैक्षयेवा। पचाद्यच् क्विब्वा॥

अञ्जसाकृतम्। त्रि। आर्जवेनकृते॥ अञ्जसउपसङ्ख्यानादऽलुक्॥

अञ्जिः। पुं। प्रेषणिके। प्रेरके॥

अञ्जिष्टः। पुं। भास्करे॥ अनक्ति। अंजूव्यक्तिम्रक्षणकान्तिगतिषु। अतन्यञ्जीष्यादिनाअंजेरिष्टच्।

अञ्जीरम्। न। ख्यातेवृक्षभेदे। अस्यगुणाः। शीतलत्वम्। स्वादुत्वम्। गुरुत्वम्। वायुपित्तरक्तक्रिमिशूलहृत्पीडाकफमुखवैरस्यनाशित्वम्। अग्निकारित्वञ्चेतिराजनिर्घण्टराजवल्लभौ॥ लघ्वीरमस्मादल्पगुणम्॥

अट्। ।। आश्चर्ये॥

अटनम्। न। भ्रमणे। अटगतौ। भावेल्युट्॥

अटनिः। स्त्री। चापाग्रभागे॥ अटति गुणोत्र। अटगतौ। वाहुलकादनिः॥

अटनी। स्त्री। चापाग्रभागे। धनुष्कोव्याम्॥ कृदिकारादितिवाङीष्॥

अटरूषः। पुं। वासके॥ अटान्गच्छतो रुषति। रुषहिंसायाम्। मूलविभुजादित्वात्कः॥

अटरूषः। पुं। वासके॥ अटैःरूष्यति। रूषभ्रिश्रणे। इगुपधेतिकः॥

अटविः। स्त्री। वने॥ अटन्त्यत्र। अटगतौ। पद्यटिभ्यामविः॥

अटवी। स्त्री। अरण्ये॥ अटन्त्यत्र। अटगतौ। पद्यटिभ्यामविः। कृदिकारादितिवाङीष्॥

अटा। स्त्री। भ्रमणे। पर्यटने॥ इतिरत्नकोषोनीलकण्ठश्च॥ अटनम्। अट०। भिदादिपाठादङ्॥

अटाट्या। स्त्री। भ्रमणे। पर्यटने॥ अटनम्। अट०। परिचर्यापरिसर्यामृगयाऽटाट्यानामुपसंख्यानमित्यटतेः भ्रयकिश्चशब्दस्यद्वित्वम् पूर्वभागेयकारनिवृत्तिर्दीर्घश्चनिपात्यते॥

अट्टः। पुं०। हर्म्यपृष्ठे परिनिकेते। क्षौ

मे ॥ अत्यर्थे ॥ हट्टे ॥ गृहान्तरे ॥ चतुष्के ॥ प्राकाराग्रस्थितरणगृहे ॥ न । ओदने ॥ अद्यते । अट्ट अतिक्रमणे । कर्मणिघञ् । अट्टयतिवा । अच् ॥ शुष्के ॥

अट्टट्ट । । उच्चैरर्थे ॥ अत्युच्चे ॥

अट्टनम् । न । चक्रफलास्त्रे ॥ इतित्रिकाण्डशेषः ॥

अट्टहासः । पुं । महाहासे । अत्यर्थहासे ॥ हसिते ॥ अट्टश्चासौहासश्च ॥ शिवे ॥ शिवस्थानविशेषे ॥ अट्टहासेमहानन्दादेवीवर्त्तते । अट्टहासेमहानन्दोमहानन्दामहेश्वरीत्यागमः ॥

अट्टहासकः । पुं । कुन्दपुष्पवृक्षे ॥

अट्टहासी । पुं । शिवे ॥ अट्टहासोऽस्यास्ति । इनिः ॥

अट्टालः । पुं । सौधोच्चगृहे । प्राकारादुपरितने उन्नतस्थाने ॥ यथा । भज्यमानपुरोद्यानप्राकाराट्टालगोपुरमिति श्रीभागवतम् ॥

अट्टालकः । पुं । सौधोच्चगृहे । उपरितनगृहे । चौमे । अट्टे । अट्टाइतिभाषायाम् ॥

अट्टालिका । स्त्री । सौधोच्चगृहे । अटारी इतिभाषाप्रसिद्धे ॥ नृपागारे ॥ इतिजटाधरः ॥

अट्टालिकाकारः । पुं । शूद्रागर्भेचित्रकारौरसजातजातिविशेषे । राजइतिभाषा ॥ यथा । कुलटायाञ्चशूद्रायांचित्रकारस्यवीर्यतः । बभूवाट्टालिकाकारः पतितोजारदोषत इतिब्रह्मवैवर्त्तपुराणम् ॥

अट्टिका । स्त्री । शाकादिबद्धमुष्टौ । अट्टी इतिभाषा ॥

अट्या । स्त्री । भ्रमणे । पर्यटने ॥ तीर्थचिकीर्षयाट्याचकामजोदशकोणगण इतिमनुः ॥

अड्डुः । पुं । लकुचद्रुमे ॥

अणकः । त्रि । कुत्सिते । गर्ह्ये ॥ अणति । अणशब्दे । पचाद्यच् । कुत्सायांकन् ॥

अणव्यम् । न । व्रीहिभित्क्षेत्रे । काणवीने ॥ अणूनांभवनंक्षेत्रम् । विभाषातिलमाषोमाभङ्गाणुभ्य इतियत् ॥

अणिः । स्त्री । पुं । अक्षाग्रकीलके । रथचक्राग्रस्थितकीले ॥ अश्रौ । खड्गाद्यग्रे ॥ सीम्नि ॥ अणति । अणशब्दे । सर्वधातुभ्यइन् ॥

अणिमा । पुं । ऐश्वर्यविशेषे ॥ सचअष्टविभूतिष्वेका । यतःअणुर्भवतिशिलामपिप्रविशति । यत्प्रभावात्देवाःसिद्धाश्चसूक्ष्मीभूयालक्षिताः सर्वत्रविचरन्ति ॥ अणोर्भावः । इमनिच् । टेरिति टिलोपः । इष्ठेमेयस्सु ॥

अणिष्ठः । त्रि । अणुतमे ॥

अणीयान्। त्रि।अतिसूक्ष्मे। अत्यल्पे। सूक्ष्मतरे। कनीयसि॥ अयमनयोरतिशयेनाणुः। अजादीगुणवचनादेवेतीयसुन्॥

अणुः। पुं। चीणाइतिख्याते व्रीहिविशेषे॥ लेशे॥ परमाणौ॥ पुरुषे। आत्मनि॥ सौक्ष्म्यातिशयशालित्वादणुः। पृथिव्याद्याकाशान्तानांभूतानांपूर्वपूर्वमपेक्ष्योत्तरोत्तरस्य सौक्ष्म्यातिशयात्मूलकारणस्य सर्वातिशायिसौक्ष्म्यवत्तयाअणुरिवाणुरितिसौक्ष्म्यगुणयोगाद्गौणंनामात्मनोऽणुरिति॥ त्रि।सूक्ष्मे॥ अणति अण्यतेवा। अणशब्दे। कृगृभ्यःत्युः॥ धान्येनदित्युर्वा॥

अणुकः। त्रि। निपुणे॥ अल्पे॥ सूक्ष्मे॥ अणुप्रकारः। स्थूलादिभ्यः प्रकारवचनेकन्॥ यावादिषुअणुनिपुणइतिस्वार्थेकनवा॥

अणुभा। स्त्री। विद्युति॥

अणुमात्रिकः। पुं। पुर्य्यष्टकयुक्तजीवे॥ अणवीमात्राः पुर्य्यष्टकरूपायस्यसोऽणुमात्रिकः॥

अणुरेवती। स्त्री। दन्तीवृक्षे॥

अण्डम्। न। मुष्के॥ पेशीकोशे। पक्ष्यादिप्रादुर्भावककोशे। अण्डाइतिभाषाप्रसिद्धे॥ नातिस्निग्धानिहृष्याणिस्वादुपाकरसानिच।वातघ्नान्यति

शुक्राणि गुरूण्यण्डानिपक्षिणाम्॥ वीर्य्ये॥ अमत्यस्मातममगत्यादिषु। अमन्ताड्डः॥ अमन्तिसंप्रयोगंयान्त्यनेनेतिवा॥

अण्डकः। पुं। मुष्के। अण्डकोशे॥ इति हेमचन्द्रः॥

अण्डकोटरपुष्पी। स्त्री। नीलरास्नायाम्। नीलवुन्हेतिख्यातायाम्॥

अण्डकोषः। पुं। वृषणे। मुष्के॥ अण्डयोःकोषः कुट्मलः॥

अण्डजः। पुं। सरटे॥ अहौ॥ खगे॥ झषे॥ अण्डजाःपक्षिणःसर्पानक्रामत्स्याश्चकच्छपाः। यानिचैवंप्रकाराणिस्थलजान्यौदकानिच तिमनुः॥ अण्डआदौसम्भवतिततोजायतेस्म। जनीप्रादुर्भावे। पञ्चम्यामजातावितिडः। त्रि। अण्डजातमात्रे॥ अण्डेजातःसप्तम्यांजनेर्डः॥

अण्डजा। स्त्री। मृगनाभौ॥ इतिविश्वमेदिनीहेमचन्द्राः॥

अण्डालुः। पुं। मत्स्ये॥ इतिशब्दचन्द्रिका॥

अण्डीरः। पुं। पुरुषे॥ शक्ते॥

अतटः। पुं। प्रपाते। शैलोच्चदेशे॥ नतटमत्र॥

अतद्गुणः। पुं। अलङ्कारविशेषे॥यथा। तद्रूपाननुकारश्चेदस्यतत्स्यादतद्गुण

॥

गुणः। यदितुतदीयंवर्णसङ्क्रान्त्यामपियोग्यतायामिदंन्यूनगुणं नगृह्णीयात् तदाभवेदतद्गुणोनाम। उदाहरणम्। धवलोऽसि जइवि सुन्दर त इवितुए मज्झ रंजिअं हिअअम्। राअभरिएवि हिअए सुहअ णिहित्तो णरत्तोसि॥ ※॥ अस्यसंस्कृतन्तु। धवलोसि यद्यपिसुन्दर तथापित्वया ममरञ्जितं हृदयम्। रागभरितेपि हृदये सुभगनिहितोनरक्तोसीति॥ धवलोनिर्मलः श्वेतश्च रागोलौहित्यमनुरागश्च। धवलपदस्य वृषभपरत्वमपिकेचिदाहुः। अत्रोत्तरार्द्धे अप्रस्तुतेननायकेननिवेदनीयहस्तान्तयाप्रकृतस्यहृदयस्यगुणाननुहरणादतद्गुणोऽलङ्कारः॥ ※॥ अत्रातिरक्ते नापिमनसासंयुक्तो नरक्ततामुपगत इत्यतद्गुणः॥ किञ्च। तदित्यप्रकृतमस्येतिच प्रकृतमत्र निर्दिश्यते तेनयद् प्रकृतस्यरूपं प्रकृतेन कुतोपि निमित्तान्नानुविधीयते सोऽतद्गुणइत्यपिप्रतिपत्तव्यम्। यथा। गाङ्गमम्बुसितमम्बुयामुनं कज्जलाभमुभयत्रमज्जतः। राजहंसतवसैवशुभ्रता चीयतेनचनचापचीयते॥

अतद्व्यावृत्तिः। स्त्री। प्रपञ्चनिरसने॥ तच्छब्देनब्रह्मोच्यते। अतच्छब्देनतदतिरिक्तमज्ञानादि। नतत् अतत्। तस्यातदः प्रपञ्चस्य व्यावृत्तिः निरसनमित्यर्थात्॥

अतन्द्रितः। त्रि। अनलसे॥ नतन्द्रितः॥

अतर्कितः। त्रि। अविचारिते॥

अतर्क्यः। पुं। स्वबुद्ध्यभ्यूहेनकेवलेनतर्केणतर्कितुमशक्येपरमात्मनि॥ स्वबुद्ध्यभ्यूहेनकेवलेनतर्केणतर्क्यमाणेऽणुपरिमाणेकेनचित्स्थापितेआत्मनि। ततोऽणुतरमन्योऽभ्यूहति। ततोप्यन्योऽणुतममिति। नहितर्कस्यनिष्ठाक्वचिद्विद्यते॥ त्रि। तर्कितुमशक्ये॥

अतलम्। न। पातालभेदे॥ त्रि। उपरि॥

अतलस्पर्शम्। त्रि। अतिगम्भीरे। अगाधे इत्यमरः॥ ॥ तलस्याधोभागस्य स्पर्शः। नास्तितलस्यस्पर्शोऽत्र॥

अतलस्पृक्। त्रि। अगाधे॥ इतिहेमचन्द्रः॥

अतलादिः। पुं। अधोऽधोविद्यमानेष्वतलवितलसुतलरसातलतलातलमहातलपातालनामकेषुसप्तसु॥ अतलमादिर्यस्य वितलादिसमूहस्य सोयमतलादिः॥

अतः। ।। हेतौ। कारणे॥ अपदेशे॥ निर्देशे॥ एतस्मात्। तसिल्।

एतदोन् ॥

अतस: । पुं । वायै ॥ क्षैामे ॥ प्रहरणे ॥ आत्मनि ॥ अतति । अतसातत्यगमने । अत्यविचमितमिनमीत्यादिना ऽसच् ॥

अतसी । स्त्री । क्षुमायाम् । प्रसिद्धधान्ये ॥ यथा । अतसीमधुरातिक्ता स्निग्धापाकेकटुर्गुरु: । उष्णाद्दक्शुक्रवातघ्नीकफपित्तविनाशिनीति भावप्रकाश: ॥ । गैारादि: ॥

अतसीतैलम् । न । अतसीस्नेहे ॥ स्नेहतैलञ्च । अतसीतैलमाग्नेयं स्निग्धोष्णंकफपित्तकृत् । कटुपाकमंचक्षुष्यंबल्यंवातहरंगुरु ॥ मलकृद्रसत: स्वादुग्राहित्वग्दोषहृद्घनम् । वस्तौ पाने तथाभ्यंगेनस्येकर्णस्यपूरणे ॥ अनुपानविधैावापि प्रयोज्यंवातशान्तये ॥

अतस्क: । त्रि । असंयतेंद्रिये ॥

अति । । । प्रशंसायाम् ॥ प्रकर्षे ॥ लङ्घने ॥ अंतिशये । नितान्ते ॥ असम्प्रतिक्षेपे ॥ स्तुतैा ॥ पूजायाम् ॥ अतति । अतसातत्यगमने । इन्प्रत्यय: ॥

अतिकटु: । त्रि । निम्बादैा ॥ अतिशयेनकटु: ॥

अतिकथ: । त्रि । अश्रद्धेये ॥ नष्टधर्मे ॥ नष्टे ॥ अतिक्रान्ता कथायस्य ॥

अतिकथा । स्त्री । अपार्थभाषणे ॥

अतिकन्द: । पुं । हस्तिकन्दवृक्षे ॥

अतिकृति: । स्त्री । पञ्चविंशत्यक्षरायांवृत्तौ ॥

अतिकृच्छ्रम् । न । व्रतविशेषे ॥ यथा । एकैकंग्रासमश्नीयात्त्र्यहाणित्रीणिपूर्ववत् । त्र्यहंचोपवसेदन्त्यमतिकृच्छ्रंचरन् द्विज: ॥ इतिस्मृति: प्रायश्चित्तविवेके ॥

अतिक्रम: । पुं । अतिपाते । क्रमोल्लङ्घने ॥ अतिक्रमणम् । क्रमुपादविक्षेपे । इञ् । नोदात्तोपदेशेतिन वृद्धि: ॥ अभिक्रमे ॥ अहितान् प्रत्यभीतस्यरणेयानमतिक्रमइत्यमर: ॥

अतिक्रमणम् । पुं । उचितादधिकस्यानुष्ठाने ॥ निष्पन्नेपिवस्तुनिक्रियामप्रवृत्तौ ॥ यथा । अतिक्रान्तमेव भवता । अत्रातिरतिक्रमणेचेतिकर्मप्रवचनीयसंज्ञया षत्वाभाव: ॥

अतिक्रमणीय: । त्रि । अतिक्रमणार्हे ॥ यथा । महात्मानातिक्रमणीयोविजानतेति ॥

अतिक्रान्त: । त्रि । अतीते ॥ कृतातिक्रमे ॥

अतिगण्ड: । पुं । षष्ठयोगे ॥ अत्रजातस्य फलंयथा । कलिप्रियोवेदविनिन्दकश्च धूर्त्त:कृतघ्नोगलरोगयुक्त: । सरोमदे

हः पुरुषोतिदीर्घः प्रकाण्डगण्डस्त्वति गण्डजन्मेति ॥ त्रि । बृहद्गण्डे ॥

अतिगन्धः । पुं । भूतृणे ॥ चम्पके ॥ मुद्गरवृक्षे ॥ गन्धके ॥ इतिराजनिर्घण्टः ॥

अतिगन्धालुः । पुं । पुत्रदात्रीलताया मितिराजनिर्घण्टः ॥

अतिगम्भीरः । त्रि । दुष्प्रवेशे ॥ महासमुद्रवत्प्रवेष्टुमशक्ये ॥

अतिगर्वितः । त्रि । अहंकारातिशयशालिनि । समुद्धते ॥ अतिशयेनगर्वितः ॥

अतिगुहा । स्त्री । पृश्निपर्ण्याम् ॥ त्रि । गुहातिक्रामके ॥

अतिगुह्याष्टकम । न । श्रीशैलादिषु ॥ यथा । श्रीशैलजल्पकेदारभैरवाम्रातकेश्वराः । हरिश्चन्द्रमहाकालमध्याः सातिपदारुचाविति मृगेन्द्रसंहिता ॥

अतिचरः । त्रि । शीघ्रगे ॥

अतिचरा । स्त्री । स्थलपद्मिन्याम् । चारव्याम् । पद्मचारिण्यापर्धा ॥ अतिचरति । चरगतिभक्षणयोः । पचाद्यच् ॥

अतिचारः । पुं । शीघ्रगमने ॥ अतिक्रम्य गमनम् । कुजादिपञ्चग्रहाणांराशिभोगकालासमाप्तौ राश्यन्तरगमनम् । तत्रपूर्वराशिगमनेवक्रातिचारः । परराशिगमनेअतिचारः । एतौगुरोश्चेदकालोभवति । गुरुस्तुयदिपुनः पूर्वराशिंनायातितदामहातिचारः । तेनलुप्तसंवत्सरोभवतिग्रहाणांस्वभोज्यमानराशा वपिवक्रातिचारौभवतः । तत्रनाकालः । इतिस्मृतिज्योतिषे उक्तम् ॥

अतिच्छत्रः । पुं । छत्रायाम् । स्थूलतृणविशेषे ॥ रक्तवर्णकोकिलाचके तालमखानाइतिभाषाप्रसिद्धे ॥ पाखम्रे । जलजतृणभेदे ॥ अतिक्रान्तश्छत्रम् ॥

अतिच्छत्रकः । पुं । भूतृणे ॥

अतिच्छत्रा । स्त्री । शतपुष्पायाम् । शलुफा इति मौरीइतिच गौडभाषाप्रसिद्ध शताह्वायाम् । सौंफ इति भाषा ॥ छत्रमतिक्रान्ता अत्यादय इतिसमासः ॥

अतिजगती । स्त्री । त्रयोदशाक्षरायां वृत्तौ ॥

अतिजवः । त्रि । अतिवेगाढ्ये । जङ्घाले ॥ अतिशयितोजवोवेगोयस्य ॥

अतिजागरः । पुं । नीलक्रौञ्चे । नीलवके ॥

अतिडीनम् । न । पक्षिणःप्रचण्डगमने दीर्घपतनेवा ॥

अतितितीर्षत् । त्रि । अतितर्तुमिच्छति ॥

अतितीक्ष्णः । त्रि । मरीचादौ । पुं । शोभाञ्जने ॥

अतितीव्रा । स्त्री । गण्डदूर्वायाम् ।

अतिथिः । पुं । कुशपुत्रे ॥ त्रि । आगन्तुके । अदृष्टपूर्व्वगृहमागते ॥ कोपे ॥ तिथिभिन्ने । अतति । अतसातत्यगमने । ऋतन्यञ्जीत्यतेरिथिन् । न विद्यते द्वितीया तिथिरस्येति वा ॥ यथा । एकरात्रन्तु निवसन्नतिथिर्ब्राह्मणः स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ नैकग्रामीणमतिथिं विप्रं साङ्गतिकं तथा । उपस्थितं गृहे विद्यात् भार्य्या यत्राग्नयोऽपि वा ॥ इति मनुः ॥ अध्वनीनोऽतिथिर्ज्ञेय इति च स्मृतिः । सर्व्वास्ववस्थास्वतिथिर्नोपेक्ष्यो हि गृहस्थितैः ॥ अतिथी । स्त्री ॥

अतिथिपूजनम् । न । नृयज्ञे । इति हेमचन्द्रः ॥

अतिथिसपर्य्या । स्त्री । अतिथिसेवायाम् । पञ्चमहायज्ञेषु नृयज्ञे । अतिथीनामदृष्टपूर्व्वाणां गृहमागतानां सपर्य्यणम् । सपरपूजायाम् । कण्ड्वादिभ्यो यक् । अप्रत्ययात् । सपर्य्या पूजा ॥

अतिदिष्टः । त्रि । अतिदेशविशिष्टे । यथा । न समानगोत्रां भार्य्यां विन्देत इत्यनेन शूद्रस्यापि सगोत्राकथनं निषिध्यते इति चेत् अत्रोपदिष्टातिदिष्टगोत्रस्यैव निषेधो न त्वतिदिष्टातिदिष्टशूद्रगोत्रादेरित्युद्वाहतत्त्वम् ।

अतिदीप्यः । पुं । रक्तचित्रकवृक्षे ॥ इति राजनिर्घण्टः ॥

अतिदेशः । पुं । अन्यत्रश्रुतस्य अन्यत्रान्वये । यथा । अन्यत्रैव प्रणीतायाः कृत्स्नाया धर्म्मसन्ततेः । अन्यत्र कार्य्यतः प्राप्तिरतिदेशोऽभिधीयते इति ॥ प्रकृतात् कर्म्मणो यस्मात्तत्समानेषु कर्म्मसु । धर्म्मप्रवेशो येन स्यात् सोऽतिदेश इति स्मृतः ॥ इति च दर्शितोऽतिदेशः पूर्व्वाचार्य्यैः ॥

अतिधन्वा । पुं । ऋष्यन्तरे । शौनके ।

अतिधृतिः । स्त्री । ऊनविंशत्यक्षरायां वृत्तौ ॥

अतिनु । त्रि । अतीतनौके ॥ नावमतिक्रान्तः अत्यादय इति तत्पुरुषः । ह्रस्वो नपुंसक इति ह्रस्वः । अतिनौः पुमान् स्त्री वा ।

अतिपतनम् । न । अत्यये । अतिक्रमणे ।

अतिपत्तिः । स्त्री । अतिपाते ॥

अतिपत्रः । पुं । हस्तिकन्दवृक्षे । शाकवृक्षे ॥ इति राजनिर्घण्टः ॥

अतिपन्थाः । पुं । सत्पथे ॥ अतिः पूजायाम् । कुगतीति समासः । न पूजनात् ॥

अतिपातः । पुं । अतिक्रमे । पर्य्यये ॥ अतिक्रम्य पतनम् । पत्लृ गतौ ।

घञ् ॥

अतिपातकम् । न । नवविधपापमध्ये गुरुतरपातके ॥ तच्त्रिविधम् । पुंसो मातृदुहितृस्नुषागमनजन्यम् । स्त्रियास्तु पुत्रपितृश्वशुरगमनजन्यमिति प्रायश्चित्तविवेकः ॥

अतिपातकी । पुं । स्त्री । पापि विशेषे ॥ यथा । मातरं भगिनीं वापि तथा दुहितरं शिवे । गन्तारो ज्ञानतो ये च महागुरुनिघातकाः ॥ कुलधर्मं समाश्रित्य पुनस्त्यक्तकुलक्रियाः । विश्वासघातिनो लोका अतिपातकिनः स्मृताः ॥ इति श्रीमहानिर्वाणतन्त्रम् ॥

अतिपातितः । त्रि । अतिक्रान्ते ॥

अतिपेलवता । स्त्री । सुकुमारतरतायाम् ॥

अतिप्रसक्तिः । स्त्री । अत्यन्तसेवने ॥

अतिप्रसङ्गः । पुं । अतिप्रसक्तौ ॥ अन्यस्योद्देशेन अन्यदीयस्यापि तद्धानुष्ठाने ॥

अतिबला । स्त्री । कङ्कतिकायाम् । पीतवाट्यालके ॥ विद्याविशेषे ॥ पथ्यबलाम् ॥ त्रि । बलिनि ॥ अतिशयितं बलं यस्यासावस्मिन् वा ॥

अतिभरः । पुं । अतिविस्तारे ॥

अतिभीः । पुं । वज्रज्वालायाम् ॥ त्रि । अतिभयान्विते ॥

अतिभूमिः । स्त्री । अतिशये । आधिक्ये ॥ अमर्यादायाम् ॥ अतिक्रान्ता भूमिः । विपद्दिनदूषितातिभूमिरिति माघः ॥

अतिमङ्गल्यः । पुं । बिल्वे ॥ त्रि । मङ्गल्ये । अतिशयमङ्गलजनके ॥

अतिमर्यादम् । न । अतिशये । निर्भये ॥ त्रि । तद्युक्ते ॥ अतिशयिते ॥

अतिमात्रम् । न । अतिमर्यादे । अतिशये ॥ मात्रालोकं तामतिक्रान्तम् । गोस्त्रियोरिति ह्रस्वः । अस्य क्रियाविशेषणत्वे क्लीवता । द्रव्यवाचित्वे त्रिलिङ्गता ॥

अतिमानिता । स्त्री । आत्मनि पूज्यत्वातिशयभावनायाम् ॥

अतिमुक्तः । त्रि । निःसङ्गे । निष्फले ॥ अतिशयेन मुक्तः ॥ पुं । वासन्त्याम् ॥ अतिक्रान्तो मुक्तां शौक्ल्यात् । गोस्त्रियोरिति ह्रस्वः ॥ यद्वा । मुक्तान् विरक्तान् ॥ तिनिशे ॥ अतिशयितो मुक्तो विस्तारोऽस्य ॥

अतिमुक्तकः । पुं । अतिमुक्तार्थे ॥ तिनिशे ॥ तिन्दुकवृक्षे ॥ पुष्पवृक्षविशेषे । भ्रमरानन्दायाम् ॥ अतिशयितो मुक्तो विस्तारोऽस्य ॥

अतिमैत्रः । पुं । नवमतारायाम् ॥ त्रि । परममित्रे ॥

अतिमोदा । स्त्री । नवमल्लिकायाम् ॥

अतियातः । त्रि । अतिक्रम्यगते ॥

अतिरथः । पुं । योद्धृविशेषे । यथा । अमितान्योधयेद्यस्तु सम्प्रोक्तोतिरथस्तु स इति ॥

अतिरसा । स्त्री । मूर्वालतायाम् ॥ रास्नायाम् । क्लीतनके ॥

अतिरात्रः । पुं । यागविशेषे । अतिक्रान्तोरात्रम् । अहःसर्वैकदेशेप्यच् ॥

अतिरिक्तः । त्रि । अतिशयिते । श्रेष्ठे ॥ भिन्ने । अधिके । अतिरिच्यतेस्म । रिचिर्विरेचने । क्तः ॥

अतिरुट् न । क्रोधाधिक्ये ।

अतिरूक्षः । त्रि स्नेहशून्ये । पुं । कङ्गुकोद्रवादौ । अतिक्रान्तोरूक्षम् । अत्यादय इतिसमासः ।

अतिरेकः । पुं । पृथग्भावे । अतिशये ।

अतिरोगः । पुं । क्षयव्याधौ ।

अतिरोमशः । पुं । वनच्छागे । त्रि । रोमातिशयाढ्ये ।

अतिरोमशा । स्त्री । नीलवुन्हायाम् ।

अतिवक्ता । त्रि । वावदूके । वाचोयुक्तिपटौ । अतिवक्ति । साधुकारिणितृन् तृच्वा ॥

अतिवर्णाश्रमी । पुं । पञ्चमाश्रमिणि । सचसूतसंहितायां मुक्तिखण्डेपञ्चमाध्याये परमेश्वरेणवर्णितः । यथा । ब्रह्मचारीगृहस्थश्च वानप्रस्थोथभिक्षुकः । अतिवर्णाश्रमीतेपिक्रमाच्छ्रेष्ठाविचक्षणाः । अतिवर्णाश्रमीप्रोक्तो गुरुः सर्वाधिकारिणाम् । नकस्यापि भवेच्छिष्योयथाहं पुरुषोत्तम । अतिवर्णाश्रमीसाक्षाद्गुरूणांगुरुरुच्यते । ततस्समोनाधिकश्चास्मिन् लोकेस्त्येवनसंशयः । यःशरीरेन्द्रियादिभ्योविभिन्नंसर्वसाक्षिणम् । पारमार्थिकविज्ञानसुखात्मानंस्वयंप्रभुम् ॥ परंतत्त्वविजानातिसोतिवर्णाश्रमी भवेत् ॥ योवेदान्तमहावाक्यश्रवणेनैवकेशव । आत्मानमीश्वरंवेद सोतिवर्णाश्रमी भवेत् ॥ योवस्थात्रयनिर्मुक्तमवस्थासाक्षिणंसदा । महादेवं विजानाति सोति० ॥ वर्णाश्रमादयोदेहेमाययापरिकल्पिताः । नात्मनोबोधरूपस्यममतेसन्तिसर्वदा । इतियोवेदवेदान्तैः सोति ० । आदित्यसन्निधौ लोकश्चेष्टतेस्वयमेवतु । तथामेसन्निधावेवसमस्तंचेष्टतेजगत् । इतियोवेद० ॥ सुवर्णेहारकेयूरकटकस्वस्तिकादयः । कल्पितामाययातद्वज्जगन्मय्येवसर्वदा । इतियोवेद० ॥ शुक्तिकायां यथातारंकल्पितंमाययातथा । महदादिजगन्मायामयंमय्येवकल्पितम् । इतियो० । चाण्डालदेहेपश्वादिश

रीरेब्रह्मविग्रहे । अन्येषुतारतम्येन स्थितेषुपुरुषोत्तम । व्योमवत्सर्वदा व्याप्तः सर्वसम्बन्धवर्ज्जितः । एकरूपो महादेवः स्थितःसोहंपरामृतः इति यो० । विनष्टदिग्भ्रमस्यापियथापूर्वा विभातिदिक् । तथाविज्ञानविध्वस्तं जगन्मेभातितन्नहि । इतियो० । यथास्वप्नप्रपञ्चोयंमयिमायाविजृम्भितः । तथा जाग्रत्प्रपञ्चोपिमयिमायाविजृम्भितः । इतियो० । यस्यवर्णाश्रमाचारोगलितःस्वात्मदर्शनात् । सवर्णानाश्रमान्सर्वानतीत्यस्वात्मनिस्थितः । यस्त्यक्त्वा स्वाश्रमान्सर्वान् स्वात्मन्येवस्थितः पुमान् । सोतिवर्णाश्रमी प्रोक्तःसर्ववेदार्थवेदिभिः । नदेहोनेन्द्रियं प्राणोमनने बुद्ध्यहंकृती । नचित्तंनैवसामायानचव्योमादिकंजगत् ॥ नकर्त्तानचभोक्ताचनचभोजयिता तथा । केवलंचित्सदानन्दब्रह्मैवात्मायथार्थतः । जलस्यचलनादेव चञ्चलत्वंयथारवेः । तथाहंकारसंसारादेवसंसारआत्मनः । तस्मादन्यगतावर्णाआश्रमाअपिकेशव । आत्मन्यारोपिताएवभ्रान्त्याते ऽनात्मवेदिना । नविधिर्ननिषेधश्चनवर्ज्यावर्ज्यकल्पना । आत्मविज्ञानिनांनास्ति तथाचान्यज्जनार्द्दन । आत्मविज्ञानिनांमिष्ठामीदृशीमम्बुजेक्षण । मायामोहितामर्त्या नैवजानन्तिसर्वदा । नमांसचक्षुषानिष्ठाब्रह्मविज्ञानिनामियम् । द्रष्टुंशक्यास्वतःसिद्धाविदुषां सैवकेशव । यत्रसुप्ताजनानित्यंप्रबुद्धस्तत्रसंयमी । प्रबुद्धायत्रतेविद्वान् सुषुप्तस्तत्रकेशव । एवमात्मानमद्वन्द्वंनिराकारंनिरञ्जनम् । नित्यशुद्धं निराभासंसच्चिन्मात्रंपरामृतम् । योविजानातिवेदान्तैःस्वानुभूत्याचनिश्चितम् । सोतिवर्णाश्रमीप्रोक्तः सएवगुरुरुत्तमः इति ।

अतिवर्त्तुलः । पुं । वाँटुलाकलाइ इति गौडभाषाप्रसिद्धकलायविशेषे ।

अतिवादः । पुं । पारुष्यवादे । अप्रियवचसि । अतिक्रम्यउक्तिरतिवादः । घञ् ।

अतिवादी । त्रि । सर्वानतीत्यवदितुं शीले ॥

अतिवाहितः । त्रि । गमिते ।

अतिविकटः । पुं । दुष्टहस्तिनि । त्रि । अतिकराले । अतिशयेनविकटः ।

अतिविदाही । त्रि । सन्तापकेराजिकादौ । अतिशयेनविदाही ।

अतिविषा । स्त्री । अतीसाख्ये । पर्यायास्तु । अतिविषाशुक्लकन्दाश्येयाविश्वाचभङ्गुरा । श्यामकन्दाप्रतिविषाशृ

शृङ्गी चोपविषाभिधेति । अपिच । वि
षास्वतिविषा विश्वा शृङ्गी प्रतिविषारु
णा । शुक्लकन्दा चोपविषा भङ्गुरा घुण
वल्लभा । विषा सोष्णा कटुस्तिक्ता पाच
नी दीपनी हरेत् । कफपित्तातिसारा
मविषकासवमिकृमीनिति भावप्रका
शः ॥ त्रिविधातिविषा ज्ञेया शुक्ला कृष्णा
तथारुणा । रसवीर्यविपाकेषु निर्विशेष
गुणाधिकेति राजनिर्घण्टः ॥ त्रि । वि
षातिक्रामके । विषमतिक्रान्ता ॥

अतिवेलम् । न । अतिशये । त्रि ।
अतिशयिते । अतिक्रान्तं वेलां मर्यादा
म् । अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः । अस्य क्रियाविशेषणत्वे
क्लीबत्वम् । द्रव्यविशेषणत्वे तु त्रिलि
ङ्गत्वम् ॥

अतिव्यथा । स्त्री । पीडायाम् । अति
शययातनायाम् ॥

अतिव्याप्तिः । स्त्री । अतिशयव्यापने ॥
अलक्ष्ये लक्षणगमने । यथा । साध्याभा
ववद्वृत्तित्वमिति व्याप्तिलक्षणे धूम
वान् वह्नेरित्यत्र धूमाभावाधिकरणह्र
दवृत्तित्वाभावमादाय अतिव्याप्तिरि
ति तार्किकाः ॥ स्वाश्रयवह्नितप्राक्त्व
पावच्छेदेन रविभुज्यमानराशीय
रविसंयोगविशिष्टस्वात्मिमक्षणकत्वं
मलमासत्वम् । भानुलङ्घितेऽति

व्याप्तिवारणाय चैत्रात्यातिकभिन्नत्वे
न विशेषणीयम् ॥ मुख्यफलजनक
व्यापारजनकत्वे सति मुख्यफलाजन
कत्वमङ्गत्वम् घटादावतिव्याप्तिवार
णाय सत्यन्तम् इति तिथ्यादितत्त्व
टीका ॥

अतिशक्तिता । स्त्री । विक्रमे । वीरसा
मर्थ्ये ॥ अतिशयिता शक्तिर्यस्य । त
स्य भावः । तल् ॥

अतिशक्तिभाक् । त्रि । अतिशयशक्ति
विशिष्टे ॥

अतिशयः । पुं । उत्कर्षे । अभ्यर्थे ॥ अ
तिशेते । अतिपूर्वात् शीङः पचाद्यच्
॥ यद्वा । अतिशयनम् । भावे एरच् ।
अस्य द्रव्यवचनत्वेपि पुंलिङ्गतैव । घ
ञजबन्ताः पुंसीति वचनात् ॥ सततं
क्रियान्तरेणाव्यवधानम् । अतिशय
स्तु पौनःपुन्यमिति भेदः ॥

अतिशयितः । त्रि । अतिक्रान्ते ॥

अतिशयोक्तिः । स्त्री । अर्थालङ्कारभेदे ॥
अस्य लक्षणादयो यथा । निगीर्याध्य
वसानन्तु प्रकृतस्य परेण यत् । प्रस्तुत
स्य यदन्यत्वं यद्यर्थोक्तौ च कल्पनम् । का
र्यकारणयोर्यश्च पौर्वापर्यविपर्ययः ।
विज्ञेयातिशयोक्तिः सेति । उपमाने
नान्तर्निगीर्णस्योपमेयस्य यदध्यवसा
नं सैका । यथा । कमलमनम्भसि क

मले च कुवलये तानिकनकलतिकायाम् । साचसुकुमारसुभगेत्युचात परंपराकेयम् ॥ अचमुखादिकमलादिरूपतयाध्यवसितम् ॥ यत्रतदेवान्यत्त्वेनाध्यवसीयतेसापरा । यथा । असांलउहत्तणाअं अणाविअकाइ व सणच्छाआ । सामासामसापआवइणो रेहधिअ णहोइ ॥ "अस्यसंस्कृतं यथा । लउहशब्दःसौकुमार्ये । अन्यत् सौकुमार्यमन्याकापिचवर्त्तनच्छाया । श्यामासामान्यप्रजापते रेखैवनभवतीति ॥ वर्त्ततेजीवतीति वर्त्तनंशरीरंतस्यच्छायाकान्तिः श्यामाषोडशवार्षिकीस्त्री सामान्यतः सर्वसाधारणः रेखैवेतिनिर्माणपरिपाटीरेखामात्रमपिनास्तीतिभावः । इयमन्यत्त्ववर्णनरूपातिशयोक्तिः ॥ यद्यर्थस्ययदिशब्देनचेच्छब्देनवोक्तौयत्कल्पनमर्थादसम्भाविनोर्थस्यसातृतीया । यथा । राकायामकलङ्कंचेदमृतांशोर्भवेद्वपुः । तस्यामुखंतदासाम्यपराभवमवाप्नुयात् ॥ कारणस्यशीघ्रकारितां वक्तुंकार्यस्यपूर्वमुक्तौचतुर्थी । यथा । हृदयमधिष्ठितमादौमालत्याःकुसुमचापवाणेन । चरमंरमणीवल्लभलोचनविषयंत्त्वयाभजतेति ॥

अतिशर्करी । स्त्री । पञ्चदशाक्षरा

यांवृत्तौ ॥

अतिशायनम् । न । आधिक्ये । प्रकर्षे ॥ अतिपूर्वाच्छेतेर्ल्युट् । अतिशयनमेव । अतिशायनेतमबिष्ठनाविति निर्द्देशाद्दीर्घः ॥

अतिशीतम् । । । अतीतानिशीतानि- इतिविग्रहे अव्ययंविभक्तीत्यादिनाअत्ययेऽव्ययीभावः ॥ त्रि । शीतातिशयविशिष्टे ॥

अतिशेषः । त्रि । अतिशिष्टे । अवशिष्टे ॥

अतिशोभनः । त्रि । अतिशयशोभायुक्ते ॥ श्रेष्ठे ॥ अतिशयेनशोभनः ॥

अतिसर्गः । पुं । कामचारानुज्ञायाम् ॥ दाने ॥

अतिसर्जनम् । न । विलम्भे । दाने ॥ वधे ॥ सृजविसर्गे । ल्युट् ॥

अतिसहः । त्रि । अतिसहिष्णौ ॥ अत्यन्तंसहते । षहमर्षणे । पचाद्यच् ॥

अतिसारः । पुं । उदरामये । बहुद्रवमलनिःसरणरोगे ॥

अतिसारकी । त्रि । अतिसारान्विते । सातिसारे ॥ अतिसारोऽस्यास्ति । वातातीसाराभ्यांकुक्चेतीनिः ॥

अतिसृष्टः । त्रि । दत्ते ॥ नियुक्ते ॥

अतिसौरभः । पुं । सहकारे ॥ अतिशयितंसौरभमस्य ॥

अतिस्थूलः । त्रि । अत्यन्तपीने ॥ अस्य

लक्षणम् । मेदोमांसातिवृद्धत्वा-
च्चलस्फिगुदरस्तनः । अयथोपचयो
त्साहोनरोऽतिस्थूलउच्यते । अयथो
पचयोत्साहः । नयथाउचितः उपच
योमांसोपचयः उत्साहावलम्बयस्य
सः ॥

अतिस्फिरः । त्रि । स्फीते । अतिशयित
स्फूर्त्तिशालिनि ॥

अतिहसितम् । न । अतिशयहास्ये ॥

अतिहासः । पुं । हास्यभेदे । सशब्दहा
से ॥ अतिहसनम् । हसेर्हसने । भा
वेघञ् ॥

अतिहिमम् । ा । हिमस्यात्यये ॥

अतीतः । त्रि । वर्त्तमानध्वंसप्रतियोगि
नि । अतिक्रम्यगते । भूतकाले ॥ गते
। भूते ॥ यथा । ननस्यंन्यूनसप्ताब्दे
मातीताशीतिवत्सरे । इतिवैद्यकप
रिभाषा ॥ मानप्रभेदे ॥ इतिसङ्गी
तशास्त्रम् ॥ अतिपूर्वादिणोगत्यर्थो
कर्मकेतिकर्त्तरिक्तः ॥

अतीतकालः । पुं । हेत्वाभासविशेषे ।
वाधिते ॥ यथा । कालात्ययापदिष्टः
कालातीतः । इतिन्यायसूत्रम् १ ।
४९ ॥ अतीतकालस्यसमानार्थकत्वा
त् कालातीतशब्देनोक्तम् । कालस्य
साधनकालस्य अत्ययेअभावे अपदि
ष्टः प्रयुक्तोहेतुः । एतेनसाध्याभाव
प्रमालक्षणार्थ इतिसूचितम् । सा
ध्याभावनिर्णये साधनासम्भवादयमे
ववाधितसाध्यक इतिगीयते । यथा ।
वह्निरनुष्णः कृतकत्वादित्यादौ ॥

अतीतद्वैतम् । न । प्रत्यगात्मतत्त्वे ॥
त्रि । द्वैताभाववति ॥ अतीतं द्वैतं
यस्मादिति ॥

अतीतद्वैतभानम् । न । प्रत्यगात्मनः
साक्षात्कारे ॥ अतीतद्वैतस्यात्मनो
भानंसाक्षात्कारः ॥

अतीन्द्रः । पुं । विष्णौ ॥ ज्ञानैश्वर्यादि
भिःस्वभावसिद्धैरिन्द्रमतीत्यस्थितः ॥
इन्द्रमतीतः अत्यादयः क्रान्ताद्यर्थे द्वि
तीययेतिसमासः ॥

अतीन्द्रियम् । त्रि । इन्द्रियाग्राह्यवस्तुनि
। अप्रत्यक्षे ॥ इन्द्रियमतिक्रान्तम् ॥
मनसि ॥ इन्द्रियमतीत्यवर्त्तमान
त्वात् ॥

अतीन्द्रियग्राह्यः । त्रि । मनोग्राह्ये । प
रमात्मनि ॥ यथा । नैवासौचक्षुषा
ग्राह्योनचशिष्टैरपीन्द्रियैः । मनसा
तुप्रसन्नेनगृह्यते सूक्ष्मदर्शिभिरिति
व्यासः ॥

अतीर्य्यम् । त्रि । दुस्तरे ॥

अतीव । ा । अतिशये ॥ अतिच इवच ॥

अतीसारः । पुं । उदरामये ॥ अतिसर
ति । सृगतौ । व्याधिमत्स्यवलेषु चेति

वार्त्तिकाद् घञ्। अन्नभोजिनस्यर्थो वा सरतिः। रुधिरादिकमतिशयेन सारयतीत्यर्थः। उपसर्गस्य घञीति दीर्घः॥

अतीसारकी। त्रि। अतीसाररोगयुक्ते॥ अतीसारोऽस्त्यस्य। वातातीसाराभ्यां कुक् चेतीनिः॥

अतीसारभेषजम्। न। लोध्रे॥ अतीसारस्य भेषजम्॥

अतुलः। पुं। तिलवृक्षे॥ इति शब्दचन्द्रिका॥ त्रि। तुलोज्झिते। निरुपमे॥ अपरिमिते॥ तुला उपमानमस्य न विद्यते। शेषाद्विभाषेति विकल्पान्न कप्। उपसर्जनह्रस्वः॥

अत्कः। त्रि। पथिके॥ इत्युणादिकोषः॥ अतति। अत सातत्यगमने। इण्भीकापाशल्यतिमर्चिभ्यः कन्॥

अत्ता। स्त्री। ज्येष्ठभगिन्याम्॥ मातरि॥ प्राकृतभाषया श्वश्र्वाम्॥

अत्तिः। स्त्री। नाट्योक्त्या ज्येष्ठभगिन्याम्॥ मातरि॥

अत्तिका। स्त्री। नाट्योक्त्या ज्येष्ठभगिन्याम्॥ मातरि॥ अत्ता माता। सैव। संज्ञायां कन्॥

अत्नुः। पुं। भानौ। सूर्य्ये॥

अत्यः। पुं। तुरङ्गे। अश्वे॥ वैदिकोऽयं शब्दः॥

अत्यध्यक्षः। त्रि। इन्द्रियाऽगोचरे। अतीन्द्रिये॥ अक्षेषु अध्यक्षम्। विभक्त्यर्थेऽव्ययीभावः। अतिक्रान्तोऽध्यक्षम्॥

अत्यन्तम्। न। अतिशये॥ यथा। अत्यन्तं कठिनौ तथापि हृदया नन्दाय वक्षोरुहावितिनरहरिकविः॥ त्रि। सयुक्ते। सर्वान् अन्तान् परिच्छेदानतिक्रान्ते। निरतिशये। नितान्ते॥ अवसानमतिक्रान्ते॥

अत्यन्तकठिनम्। न। उलूखलमुसलवत् घुस्रचन्दनादिसर्वद्रव्ये॥ त्रि। अतिशयकाठिन्यविशिष्टे॥

अत्यन्तकोपनः। त्रि। चण्डे॥ अत्यन्तं कुप्यति। कुप क्रोधे। क्रुधमण्डार्थेभ्यश्चेति युच्॥

अत्यन्तगामी। त्रि। अत्यन्तिके। अतिशयगमनशीले॥ इति हेमचन्द्रः॥

अत्यन्तसंयोगः। पुं। साकल्येन सम्बन्धे। निरन्तरसन्निकर्षे॥ अन्तमवसानमतिक्रान्तोऽत्यन्तः। स चासौ संयोगश्च॥

अत्यन्तसुकुमारः। पुं। कङ्गुनीवृक्षे॥ इति राजनिर्घण्टः॥ त्रि। अतिकोमले॥

अत्यन्ताभावः। पुं। त्रैकालिक संसर्गावच्छिन्नप्रतियोगिताको अभावविशेषे

यथाभूतलेघटोनास्तीति ।

अत्यन्ताभावसम्पत्तिः । स्त्री । स्वरूपेणाप्यप्रतीतौ ।

अत्यन्तिकः । पुं । अत्यन्तगामिनि । अतिशयभ्रमणकारिणि ॥ इतिहेमचन्द्रः ॥

अत्यन्तीनः । त्रि । अतिशयितगतिशीले । अत्यन्तगामिनि । अन्तस्याऽत्ययः । अत्ययेऽव्ययीभावः । अत्यन्तं गामी । अवारपारात्यन्तानुकामंगामीतिखः ।

अत्यम्लम् । न । वृक्षाम्ले । तंतडीकइति भाषाप्रसिद्धे स्वल्पफलविशेषे ।

अत्यम्लपर्णी । स्त्री । वल्लिकरणे । अत्यम्लानिपर्णानियस्याः । पाककर्णत्यादिनाङीष् ।

अत्यम्ला । स्त्री । अत्यम्लपर्ण्याम् । वनबीजपूरे । मधुटाबा इतिगौड भाषाप्रसिद्धे ।

अत्ययः । पुं । अतिक्रमे । दण्डे । अभावे । विनाशे । दोषे । कृच्छ्रे । अतिगमने । कार्य्यस्यावश्यम्भावे । अत्ययनम् । अनेनवा । इणगतौ इगतौवा । एरच् ।

अत्यर्थम् । न । अतिशये । त्रि । अतिशययुक्ते ॥ अर्थोनिवृत्तिविषयोवा तमतिक्रान्तमत्यर्थम् । अत्यक्रियावि

शेषणत्वे क्लीबत्वम् । द्रव्यवाच्यत्वे वाच्यलिङ्गत्वम् ॥ इत्यमरः ।

अत्यल्पम् । त्रि । अल्पीयसि । इत्यमरः अतिशयेनाल्पम् । ।

अत्यष्टिः । स्त्री । सप्तदशाक्षरायांवृत्तौ ॥ सप्तदशसंख्यायाम् ।

अत्याकारः । पुं । न्यक्कारे । तिरस्कारे ॥ त्रि । महादेहे ।

अत्यागी । पुं । कर्मफलत्यागित्वेपिकर्मानुष्ठायिनि । अत्रे । गौणसन्न्यासिनि ।

अत्याधानम् । न । अतिक्रमे । उपक्षेपे । उपरिस्थापने ।

अत्यायम् । न । अतिगमने ॥

अत्यालः । पुं । रक्तचित्रकवृक्षे ॥

अत्याशा । स्त्री । असम्भावनीयवाञ्छायाम् । अत्यन्तस्पृहायाम् । यथा । अत्याशाभिरुपागताध्वगगणान्धन्यावनीतापिताम् नेयन्तर्पयितुंक्षमोस्मि ममतद्दुःखैर्मनोदूयते ॥ इत्युद्भटः ॥

अत्याश्रमः । पुं । परमहंसे । ब्रह्मचर्य्यादीन्हंससन्न्यासान्तानाश्रमधर्म्मवत-आश्रमानतिक्रम्यवर्त्तमानोयःसम-त्याश्रमशब्देनोच्यते ॥

अत्याश्रमी । पुं । उत्तमाश्रमिणि । पूर्वाश्रमत्रयमतीत्यसर्वकर्म्माण्यत्याक्षितेपरमहंसपरिव्राजके ॥

अत्यासः । पुं । व्यतिक्रमे ॥

अत्याहितम् । न । महाभीतौ । जीवा नपेक्षिकर्मणि ॥ अतीवाधीयतेस्म मनसि । डुधाञ्‌:क्तः । दधातेर्हिः ॥ अतीवासमन्ताद्धितंवा ।

अत्युक्तिः । स्त्री । असम्भवोक्तौ । आरोपितस्यकथने । अलङ्कारविशेषे । यथा । अत्युक्तिरद्भुतातथ्यशौर्य्यौदार्यादिवर्णनम् । त्वयिदातरिराजेन्द्रयाचकाः कल्पशाखिनइतिचन्द्रालोकः ॥

अत्युकथा । स्त्री । स्त्रीछन्दसि । गौस्त्री । गोपस्त्रीभिः । कृष्णोरेमे ॥

अत्युच्छ्रितः । त्रि । अतिप्रवृद्धे । अत्युच्छ्रितस्यदमनमुचितञ्च श्रुतौ श्रुतम् ।

अत्यूहः । पुं । दात्यूहे । कालकण्ठके । अतिशयवितर्के । त्रि । बहुतर्कवति ॥

अत्यूहा । स्त्री । नीलिकायाम् । नीलसिन्धुवारे । इतिमेदिनी ।

अत्र । T । अधिकरणे । अस्मिन् । एतस्मिन् । सप्तम्यास्त्रल् । एतदोऽन् ॥

अत्रभवान् । त्रि । श्लाघ्ये । पूज्ये । इति हेमचन्द्रः । इतराभ्योऽपिदृश्यन्त इति प्रथमार्थेप्राक्दीव्यतीयस्त्रल् । सुप् सुपेतिसमासः

अत्रिः । पुं । मुनिविशेषे । अनुसूयापतौ । । अत्तिभक्षतेवा । अदभक्षणे । अदेस्त्रिनिश्चेतित्रकारोत्रिप् । अत्रिः । अत्री । अत्रयः ।

अत्रिजातः । पुं । विधौ । चन्द्रे । द्विजे ।

अत्रिदृग्जः । पुं । चन्द्रे । इतिहेमचन्द्रः ।

अत्री । पुं । मुन्यन्तरे । अत्ति । अद० । अदेस्त्रिनिश्चेतित्रिनिः । अत्री । अत्रिणौ । अत्रिणः ।

अत्रिनेत्रजः । पुं । चन्द्रमसि । इतिजटाधरः ।

अत्रिनेत्रप्रसूतः । पुं । शशिनि ॥ इति हलायुधः ॥

अत्रिनेत्रभूः । पुं । सोमे । शशधरे । इतित्रिकाण्डशेषः ।

अथ । T । संशये । अधिकारे । अथ स्नानविधिः । मङ्गले । अथपरस्मैपदानि । विकल्पे ॥ अनन्तरे । स्नातोऽथभुङ्क्ते ॥ अन्वादेशे ॥ प्रतिज्ञायाम् । गोदोभवानथेतिब्रूमः । प्रश्ने । अथ शक्तोसिभोक्तुम् । कार्त्स्न्ये ॥ आरम्भे । अथशब्दानुशासनम् । समुच्चये । भीमोऽथार्जुनः । अर्थयते । अर्थयाञ्चायाम् । अन्येभ्योऽपीतिडः । पृषोदरादित्वाद्रलोपः ।

अथकिम् । T । स्वीकारे ।

अथर्वणः । पुं । शिवे । इतित्रिकाण्डशेषः ।

अथर्वणिः । पुं । अथर्ववेदब्राह्मणे ॥ पु

रोधसि । इतिमेदिनी । ईश्वरे ।

अथर्वा । पुं । ब्राह्मणे ॥ अथर्वणा प्रोक्ते ग्रन्थे धर्मे आम्नाये वा अथर्वा । अथर्वणोवेतिवार्त्तिकादणोवालुक् । पक्षेआथर्वणः ॥ न । वेदे ॥

अथर्ववित् । पुं । अथर्ववेदाभिज्ञवसिष्ठादौ ॥

अथर्ववेदः । पुं । मारणाभिचारार्थऋग्वेदांशे । छान्दोग्याद्युपनिषत्प्रसिद्धेच तुर्यवेदे पञ्चाशच्छाखात्मके ॥

अथर्वाधिपतिः । पुं । वुधे । शशिजे ।

अथवा । ा । पक्षान्तरे ।

अथो । ा । अथार्थेषु । अधिकारभेदे । अप्यर्थे । अर्थयते । अर्थयाञ्चायाम् । वाहुलकादडोः । पृषोदरादित्वाद्रलोपः ।

अद् । ा । आश्चर्य्ये । अत्ति । अदभक्षणे । क्विप ।

अदन्त । त्रि । दन्तरहिते । भक्षयितरि । इतिछान्दोग्योपनिषत ॥

अदत्ता । स्त्री । अपरिणीतायाम् ॥ इतिस्मृतिः ॥

अदत्तादायी । त्रि । चौरे ।

अदनम् । न । भक्षणे ॥ इतिहेमचन्द्रः ॥

अदनीयः । त्रि । भक्ष्ये ।

अदभ्रम् । त्रि । वहुले । अनल्पे । दभ्रादन्यत् । नञ्समासः ।

अदभ्रचक्षुः । न । ज्ञानचक्षुषि । त्रि । तद्वति ।

अदर्शनम् । त्रि । अतीन्द्रिये । न । विनाशे । लोपे । दर्शनस्याभावः ।

अदलः । पुं । हिज्जले ॥ त्रि । दलवर्जिते । दलरहिते ।

अदला । स्त्री । घृतकुमार्याम् ।

असौ । त्रि । परस्मिन् । परत्र । पुरोवर्त्तिनोनिर्द्देशे । असौपुमान् । असौ स्त्री । अदः कुलम् ।

अदाता । त्रि । कृपणे । दानशक्तिरहिते । यथा । अदातापुरुषस्त्यागीस्वधर्मं त्यक्त्वागच्छतीति ।

अदान्तः । त्रि । तपःक्लेशासहिष्णौ । अकृतवाह्येन्द्रियनिग्रहे ।

अदाह्यः । पुं । परमात्मनि । त्रि । दहनानर्ह वस्तुनि ।

अदितिः । स्त्री । भुवि ॥ देवमातरि । पार्वत्याम ॥ पुनर्वसुनक्षत्रे ॥ त्रि । अखण्डे । दितिभिन्ना अदितिः । न ओदाओदितिरिति शाकटायनोक्तेर्डितिप्रत्ययान्तोवा । अदमाददितिर्वा ।

अदितिनन्दनः । पुं । देवे ॥ अदितेर्नन्दनइतिविग्रह कृद्योगाच्चषष्ठीसमस्यतइतिसमासः ।

अदिती । स्त्री । अदित्याम् । कृत्तिका

रादित्तिन्प्रत्ययदितिशब्दान्ङीप् ।

अदीनः । त्रि । उदारे । नदीनः ॥

अदीनात्मा । त्रि । अतिव्यसनपरम्परायामप्यक्षुभितान्तःकरणे । अदीनआत्मायस्य ॥

अदृढः । त्रि । अस्थिरे ।

अदृक् । त्रि । अन्धे । अज्ञे ॥ नदृग्यस्य ।

अदृश्यम् । न । दृष्टरूपे । अधिष्ठानविरूपे । त्रि । इन्द्रियागम्ये ॥ यथा । कन्याद्रेरतिकोमला त्रिभुवनव्यापाप्यदृश्याजनैरिति । नदृश्यः ।

अदृष्टम् । न । भाग्ये । प्राग्जन्मकर्मणि । महीभुजां वह्नितोयादिजेभये । आदिना हुताशनोजलंव्याधिर्दुर्भिक्षं मरणंतथा । अतिवृष्टिरनावृष्टिर्मूषकाःशलभादयोगृह्यन्ते । भयहेतुत्वादयम् अदृष्टहेतुकत्वाददृष्टम् । त्रि । अवीक्षिते ॥ यथा । अदृष्टदर्शनोत्कण्ठादृष्टेविच्छेदभीरुतेति ॥

अदृष्टपूर्वः । त्रि । पूर्वमदृष्टे । पूर्वंदृष्टोदृष्टपूर्वः । सहसुपेतिसमासः । ततो नञ्समासः ॥

अदृष्टभेदः । पुं । गुणपरिणामे ॥

अदृष्टिः । स्त्री । सरोषवक्रदृष्टौ । क्रूरदृष्टौ । विरुद्धादृष्टिरदृष्टिः ॥

अदृष्टिका । स्त्री । सरोषवक्रदृष्टौ ।

अदेवमातृकः । पुं । नदीमातृकदेशे ॥

अद्गः । पुं । पुरोडाशे ॥ अत्ति अद्यतेवा । अद्भक्षणे । गन्गम्यद्योरितिगन् ।

अद्धा । अ । तत्त्वे ॥ सत्यात् । स्फुटे । अवधारणे । अतिशये । अतंसन्ततगममंधयति दधातिवा । क्विप् ।

अद्भुतम् । न । उत्पातभेदे । विस्मये । चेतसोविस्मयाख्यविकारे । पुं । शृङ्गारादिनवरसान्तर्गतरसभेदे । अत्यात्कस्मिन्कार्येऽव्ययम् । तस्यभवनम् । अदिभुवोडुतच् ।

अद्भुतस्वनः । पुं । महादेवे । इतित्रिकाण्डशेषः ।

अद्मनिः । पुं । पावके । अग्नौ ॥ अत्ति । अद० । अदेर्मुट्चेत्यनिः ।

अद्मरः । त्रि । बहुभोक्तरि । भक्षके । अत्ति । अदभक्षणे । सृघस्यदः क्मरच् ।

अद्य । अ । इदानीम् । वर्त्तमानदिने । अस्मिन्नहनि । सद्यः परुत्परार्य्यैषम इतिइदमोऽशभावोद्यश्चनिपात्यते ।

अद्यतनः । पुं । कालप्रभेदे । अतीतायाराचेरन्त्ययामेन आगामिन्यारात्रेराद्ययामेनचसहितेदिवसे । अतीतरात्रेरन्त्ययामद्वयेन आगामिरात्रेराद्ययामद्वयेनचसहितेदिवसे ॥ त्रि । अद्यभवे । सायञ्चिरमित्यादिनाट्युट्युलौतुट्च ।

अद्यत्वे । । । इदानीमित्यर्थे ॥

अद्यश्वीना । स्त्री । आसन्नप्रसवायाम् ॥ अद्यश्वोवाविजायते । अद्यश्वीनावष्टब्ध इतिखप्रत्ययान्तः साधुः ॥ अवष्टब्ध मात्रेवानिपातनम् ॥ । त्रि । आसन्न मृत्युके ॥

अद्रिः । पुं । पर्वते ॥ शाखिनि ॥ सूर्ये ॥ मानभेदे ॥ अत्ति भक्षयतेवा । अद भक्षणे । अदिशदोतिक्रिन् ॥ स-सांके ॥

अद्रिकर्णी । स्त्री । अपराजितायाम् ॥

अद्रिकीला । स्त्री । भूमौ ॥ अद्रयः कीलायस्याम् ॥

अद्रिकूटः । पुं । देव्याःस्थानविशेषे ॥ यथा । अद्रिकूटेमहायोगी रुद्राणी परमेश्वरीति ॥

अद्रिजम् । न । शैलजे । शिलाजतुनि ॥ त्रि । अद्रिसम्भवे ॥ अद्रौजातम् । जनौ । सप्तम्यांजनेर्डः ॥ अद्रेर्वा जातम् । पञ्चम्यामितिडोवा ॥

अद्रिजतु । न । शिलाजतुनि । शैलनिर्यासे ॥ अद्रेर्जत्विव । षष्ठीतत्पुरुषः ॥

अद्रिजा । स्त्री । पार्वत्याम् ॥ अद्रेर्जाता । जनौ । पञ्चम्यामजाताविति डः ॥ सैंहलीवृक्षे ॥

अद्रिजित् । पुं । वासवे ॥ अद्रीन्जयति । जि० । सत्सूद्विषेतिक्विप् । तुक् ॥

अद्रितनया । स्त्री । पार्वत्याम् ॥ अद्रेः तनया ॥

अद्रिभिद् । पुं । मघवति । इन्द्रे ॥ अद्रीन् गोत्रान्भिनत्ति । भिदेःक्विप् तुक् ॥

अद्रिभूः । पुं । आखुकर्णीलतायाम् ॥

अद्रिराजः । पुं । हिमाद्रौ ॥ अद्रीणांराजा । टच् ॥

अद्रिसारः । पुं । लोहे ॥ अद्रेः सारः ॥

अद्रीशः । पुं । हिमाद्रौ ॥ शिवे ॥ अद्रीणामीशः ॥

अद्रोहः । पुं । द्रोहाभावे ॥ नद्रोहः ॥ त्रि । तद्वति ॥ अद्रोहोऽस्यास्ति । अर्शआद्यच् ॥

अद्वयम् । त्रि । स्वगतभेदशून्ये । अद्वितीये ॥ पुं । बुद्धे ॥

अद्वयकारणम् । न । जगतोऽभिन्ननिमित्तोपादानेब्रह्मणि ॥

अद्वयवादी । पुं । बुद्धे ॥ वेदान्तिके ॥ अद्वयमद्वैतंवदत्यवश्यम् । आवश्यके णिनिः ॥ त्रि । अद्वयवक्तरि ॥

अद्वितीयः । त्रि । केवले । एकस्मिन् ॥ न । विजातीयभेदरहिते आत्मतत्त्वे ॥ नविद्यतेद्वितीयोऽस्य ॥

अद्वेष्टा । त्रि । द्वेषाभावविशिष्टे ॥ सर्वाणिभूतान्यात्मत्वेनपश्यन्नात्मनोदुःखहेतावपिप्रतिकूलबुद्ध्यभावाद्योनद्वेष्टितस्मिन् ॥

अद्वैतः । त्रि । सजातीयविजातीयद्वितीयशून्ये पूर्णपरमात्मनि ॥ भेदविकल्परहिते ॥ यथा । द्वैतामतीतेनाऽनर्थः किन्त्वानन्दो महानिति । अत्र लौकिकदृष्टान्तःस्त्रीवाक्येनेरितःश्रुतौ ॥ स्त्रियावियुक्तस्तद्वद्वं पश्यन्कामेनपीड्यते । आलिङ्गितस्तयैकत्वंमाप्यानन्देनतृप्यति ॥ चित्तानुरागसिद्ध्यर्थंप्रिययेतिविशेषणम् । दुष्टायांसत्यपिस्त्रीत्वेचेतो नैवानुरज्यति ॥ क्षेत्रारामादिकंवाह्यं गृहकृत्यंतथान्तरम् । आलिङ्गितःसुखाविष्टोनवेत्तिद्वयमप्यसौ ॥ अवेदने नतद्धानिरुद्बुद्धोस्विन्त्तांपरित्यजन् ॥ अप्राप्यचित्तविक्षेपंमज्जत्यानन्दसागरे ॥ एवंसुप्तौसुषुप्तौवालिङ्गितःपरमात्मना । मवहिर्जागरंनान्तः स्वप्नंचद्वैतमीक्षते ॥ आनुकूल्यप्रातिकूल्येद्वैतादर्शनतोनहि । ततःकामभयाभावादात्मानन्देनिमज्जतीति ॥

अद्वैतवादी । पुं । बुद्धे ॥ त्रि । विवेकिनि ॥ ब्रह्मात्मैक्यवादिनि ॥ अस्यमतं यथा । ब्रह्मैवसत्यम्प्रत्यक्षादिप्रमाणैःसिद्धम् । विश्वन्तुब्रह्मण्यारोपितम् । यथारज्जुःरज्जुस्वरूपाज्ञानात्सर्पवत् प्रतिभाति तथाब्रह्मस्वरूपाज्ञानात् विश्वंवस्तुवत् प्रतिभाति । प्रकृतिर्जीवश्चापिपर्यवसाने ब्रह्मैव ब्रह्मा

न्यतसद्वस्तुनास्तीति ॥

अधःक्रिया । स्त्री । अपमाने ॥ अधःकरणम् । कृञःशच ॥

अधःस्थितम् । त्रि । न्यस्थिते । अधस्थ्यतवस्तुनि ॥

अधःपुष्पी । स्त्री । अवाक्पुष्पिकायाम् हेठाहुली इतिगौडभाषा ॥ गोजिह्वायाम् ॥ अधःपुष्पाण्यस्याः । गौरादित्वान्ङीष् ॥

अधनः । त्रि । भार्यादिषु ॥ यथा । त्रय एवाऽधनाराजन्भार्यादासस्तथासुतः । यत्तेसमधिगच्छन्तियस्यतेतस्यतद्धनमितिमात्स्ये ३१ अध्यायः ॥

अधमः । त्रि । कुत्सिते ॥ न्यूने ॥ पुं । उपपतिभेदे ॥ अवत्यस्मादात्मानम् । अवरक्षणादौ । अवद्यावमाधमार्वरेफाःकुत्सितेइत्यमप्रत्ययेनिपातः । तत्रैववकारस्यपक्षेधकारः॥यद्वा । नधम्यते धमतिवा । धमध्मानेसौत्रः । घञपचाद्यच्वा ॥ यद्वा । अधोभवः । अवोधसोर्लोपश्चेतिस्वामी ॥

अधमर्णः । त्रि । ऋणिनि । ऋणकारिणि ॥ अधमंदुःखप्रदमृणंयस्य ॥ अधमऋणेइतिऋणमाधमर्ण्यइतिनिपातनात्सप्तम्यन्तोत्तरपदेनवासमासः ॥

अधमर्णिकः । त्रि । अधमर्णे ॥

अधमा । स्त्री । नायिकाभेदे ॥

अधमाङ्गम् । न । चरणे । पादे ॥

अधरः । पुं । ओष्ठे । उत्तराधरोष्ठभावे ॥ अधरलक्षणं यथा । पाटलोवर्त्तुलःस्निग्धोरेखाभूषितमध्यभूः । सीमन्तिनीनामधरोराज्ञाम्बेवप्रियाभवेत् ॥ श्यामःस्थूलोधरोष्ठःस्याद्वैधव्यकलहप्रदः । मसृणोमांसलःकामिन्याश्चोत्तरोष्ठःसुभोगदः ॥ इतिसामुद्रकम् ॥ पुं । न । स्मरागारे । रतिमन्दिरे ॥ चि । हीने ॥ तले । अनूर्द्ध्वे ॥ नधरति । धृञ् धारणे । पचाद्यच् ॥ यद्वा । धरात्दुत्थात्कठिनाद्वाऽन्यः ॥ न म्रियते । धृङ् अनवस्थाने । पुंसीति-घोवा । नञ्समासः ॥ धरासम्बन्धरहिते ॥ हीनवादिनि ॥

अधरतः । । । अधोभागे ॥ अधरस्मात् । तसिल् ॥

अधरमधु । न । अधरामृते । वक्त्रासवे ॥

अधरस्तात् । । । अधोभागे । अधरतः ॥

अधरा । स्त्री । अधोदिशि ॥ नीचायायाम् ॥

अधरात् । । । अधोभागे ॥ उत्तराधरदक्षिणादातिरितिस्वार्थे आतिः । वसत्यागतोरमणीयंवा ॥

अधरीकृतः । चि । तिरस्कृते ॥

अधरीणः । चि । धिक्कृते । तिरस्कृते ॥

अधरेण । । । अधोदिशिदेशे कालेच ॥ एनबन्यतरस्यामदूरेऽपंचम्या इतिस्वार्थे एनप् । वसति रमणीयंवा ॥

अधरेद्युः । । । परस्मिन्नहनि ॥ अधरस्मिन्नहनि । सद्यः परुदित्यादिनाऽधरशब्दात् एद्युसप्रत्ययोनिपात्यते ॥

अधर्मः । पुं । ब्रह्मवधादिनिषिद्धकर्मजन्ये पापे ॥ वेदेनिषिद्धे । नानाविधदुःखसाधने । धर्मविरोधिनि ॥ धर्मविरुद्धोऽधर्मः ॥ न । परब्रह्मणि ॥ धर्मरहितत्वात् ॥ चि । ब्रह्मविदि ॥

अधर्मज्ञः । चि । धर्मविचारनिष्ठारहिते । तथासारस्वप्रत्ययवति ॥

अधर्म्मामित्रः । पुं । कलियुगे ॥ अधर्मोमित्रंयस्य ॥ चि । अधर्मप्रिये । मिथ्यावादिनि ॥

अधर्म्मास्तिकायः । पुं । धर्म्मप्रतिबन्धकृति ॥

अधश्चरः । पुं । चौरे ॥ चि । अधोगामिनि ॥

अधश्शय्या । स्त्री । अखट्वाशयने ॥

अधश्शल्यः । पुं । अपामार्गे । ऊंगाइति ख्याते ॥

अधश्शाखः । पुं । संसाराश्वत्थवृक्षे ॥ अधइति अर्वाचीनाः कार्योपाधयोहिरण्यगर्भादयश्शाखास्ते नानादिक्प्रसृतत्वात् शाखाइवशाखाअस्येतिव्युत्पत्त्यामायामयः संसाराश्वत्थवृक्षोऽध

शाखशब्देनोच्यते ॥

अधः । I । पाताले ॥ नीचैरर्थे । तले । अधोभागे ॥ स्मरालये ॥ अधरस्मिन् अधरस्याम् अधरस्मात् अधरस्याः अधरः अधरा वा । वसत्यागतोरमणीयं वा । पूर्वाधरावराणामित्यसिरधादेशश्च ॥

अधस्तात् । I । कामगेहे । योनौ ॥ अनुह्वार्थे । अधोभागे ॥ अधरस्मिन् अधरस्याम् अधरस्मात् अधरस्याः अधरः अधरा वा दिक् । दिक्शब्देभ्यःसप्तमीपञ्चमीत्यादिनाअस्तातिप्रत्ययस्तद्योगेनास्तातिचेत्यधरस्याधादेशः ॥

अधस्ताद्गमनम् । न । अधर्मेणसुतलादिषुगमने ॥ अधोगमने ॥

अधार्म्मिकः । त्रि । पापिनि । अधर्मेण व्यवहर्त्तरि । शास्त्रप्रतिषिद्धागम्यागमनाद्यनुष्ठातरि मानुषे ॥ नाधार्म्मिके वसेद्ग्रामे न शूद्रबहुले भृशमिति मनुः ॥

अधार्ष्टम् । न । असामर्थ्ये ॥

अधि । I । अधिकारे ॥ ईश्वरे ॥ अधिकृत्यार्थे ॥ आधिक्ये ॥ उपरि ॥ अधिकार्थे ॥ यथा अधिमासः । अधिको मास इत्यर्थः ॥

अधिकम् । न । अर्थालङ्कारभेदे ॥ यथा । महतोर्यन्महीयांसावाश्रिताश्रययोः क्रमात् । आश्रिताश्रयिणौ स्यातां तनुत्वेऽप्यधिकन्तु तत् ॥ आश्रितमाधेयम् । आश्रयस्तदाधारः । तयोर्महतोरपि विषये तदपेक्षया तनू अप्याश्रयाश्रयिणौ प्रस्तुतवस्तुप्रकर्षविवक्षया यथाक्रमं यदधिकतरतां व्रजतस्तदिदं द्विविधमधिकं नाम । क्रमेणोदाहरणम् । अहो विशालं भूपाल भुवनत्रितयोदरम् । माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥ युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत । तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः इति ॥ फले ॥ अध्यारूढम् । अधिकमिति अध्यारूढशब्दात्कन् उत्तरपदलोपश्च ॥ * ॥ हेतूदाहरणाधिकमधिकम् ॥ न्या ५ । ५६ । हेतूदाहरणेत्युपलक्षणम् दूषणाद्यधिकमपि बोध्यम् । तथाच । कृतकर्त्तव्यापुनरुक्ताभिधानमिति फलितम् । अनुवादस्तु न कृतकर्त्तव्यः साभिप्रायत्वात् । प्रतिज्ञाधिक्यञ्च पुनरुक्तम् धूमादालोकात् महानसवच्चत्वरवदित्यादिकन्तु विनासमयबन्धंदार्ष्ट्यादिभ्रमादुक्तमधिकम् । यथा । महानसंमहानसवदितितु नाधिकङ्किन्तु पुनरुक्तम् ॥

षि। उत्कृष्टे। अतिरिक्ते। समधिके।

अधिकरणम्। न। आधारकारके। यत्रभवतितस्मिन्। कर्तृकर्मद्वाराक्रियाश्रयइत्यर्थः॥ एक न्यायोपपादने। मीमांसाग्रन्थे॥ अधिक्रियते वेदविचारोऽस्मिन्ननेनवेत्यधिकरणंवेदविचारग्रन्थात्मिकामीमांसेत्यर्थः॥ यथाहुः। विषयोविशयश्चैवपूर्वपक्षस्तथोत्तरम्। निर्णयश्चेतिपञ्चाङ्गंशास्त्रेऽधिकरणंस्मृतमिति॥ एवंक्रमेणविवेचनमत्राधिक्रियतइत्यधिकरणम्। अधिपूर्वात्कृञोल्युट्॥

अधिकरणविचालः। पुं। द्रव्यस्यसंख्यान्तरापादने॥ यथा। एकंराशिंपञ्चधाकुरु। अनेकंराशिमेकधाकुरु। सएवाधिकरणविचालोयदेकमनेकंक्रियते यदप्यनेकमेकंक्रियते सोप्यधिकरणविचालइतिभाष्यम्॥

अधिकरणसिद्धान्तः। पुं। सिद्धान्तविशेषे॥ यथा। यत्सिद्धावन्यप्रकरणसिद्धिः सोधिकरणसिद्धान्तः। १। ३० यस्यार्थस्यसिद्धौजायमानायामेव अन्यस्य प्रकरणस्य सिद्धिर्भवति सोधिकरणसिद्धान्तइत्यर्थः॥

अधिकर्त्तव्यम्। न। अधिकरणेयद्भवतितस्मिन्॥

अधिकर्द्धिः। त्रि। मद्धासम्प्रयुक्ते। समृद्धे॥ इत्यमरः। अधिकाऋद्धिरस्य॥

अधिकर्म्मिकः। पुं। हट्टाध्यक्षे। हाटका चौधरी इतिभाषाप्रसिद्धे॥

अधिकाङ्गम्। न। कञ्चुकादिनिबन्धने। सारसने। कञ्चुकादिदार्ढ्यार्थंशूरैर्मध्यकायेनिबद्धपट्टिकादौ॥ त्रि। एकविंशत्यङ्गुलादौ॥ अधिकमङ्गात्॥

अधिकारः। पुं। विधिपुरुषसम्बन्धे॥ प्रक्रियायाम्। राज्यांश्चधारणादिव्यापारे॥ अधिआधिक्यस्यकरणम्। कृञोभावेघञ्॥ अधिकृतदेशादौ॥ यथा। निजाधिकारोयम्। अयञ्चपराधिकारः॥ प्रकरणे॥ यथा। नैमित्तिकोयंप्रायश्चित्ताधिकारः॥ क्रियाजन्यफलभागित्त्वरूपे प्रतिकर्मणिभिन्ने। स्वामित्त्वे॥ यथा। सर्वेस्युरधिकारिण इतिस्मृतिः॥ प्रभुयोजने॥ व्याकरणमतेपूर्वसूत्रस्थितपदस्यपरसूत्रेषूपस्थितौ। अनुवृत्तौ॥ सचविधोयथा। सिंहावलोकिताख्यश्चमण्डूकप्लुतिरेवच। गङ्गास्रोतइतिख्यातस्त्रधिकारास्त्रयोमता इति॥

अधिकारविधिः। पुं। कर्मजन्यफलस्वाम्यबोधकेविधौ॥ कर्मजन्यफलस्वाम्यञ्चकर्मजन्यफलभोक्तृत्त्वम्। सचयजेतस्वर्गकाम इत्यादिरूपः। स्वर्गमुद्दिश्ययागंविदधताऽनेनस्वर्गकामस्यया

यज्ञजन्यफलभोक्तृत्वंप्रतिपाद्यते । यस्याहिताग्नेरग्निर्गृहान्दहेत् सोऽग्नये क्षामवतेऽष्टाकपालंनिर्वपेदित्यादिनाऽग्निदाहादौनिमित्ते कर्मविदधतोनिमित्तवतःकर्मजन्यपापक्षयरूपफलस्वाम्यंप्रतिपाद्यते । एवमहरहः सन्ध्यामुपासीतेत्यादिनाशुचिविहितकालजीविनःसन्ध्योपासनजन्यप्रत्यवायपरिहाररूपफलस्वाम्यंबोध्यते । तद्वफलस्वाम्यंतस्यैवयोऽधिकारविशिष्टः । अधिकारश्चसएव यद्विधिवाक्ये पुरुषविशेषणत्वेनश्रूयते । यथाकाम्येकर्मणिफलकामना । नैमित्तिके निमित्तनिश्चयः । नित्येसन्ध्योपासनादौ शुचिविहितकालजीवित्वम् । अतएवराजाराजसूयेनस्वाराज्यकामो यजेतेत्यनेनविधिवाक्येनस्वाराज्यमुद्दिश्यराजसूयंविदधतापि नस्वाराज्यकाममात्रस्य तत्फलभोक्तृत्वं प्रतिपाद्यते । किन्तुराज्ञःसतःस्वाराज्यकामस्यैव राज्यस्याप्यधिकारिविशेषणत्वेनश्रवणात् । विशेषःशास्त्रे ॥

अधिकारी । पुं । प्रमातरि ॥ यथा । विधिवदधीतवेदवेदाङ्गत्वेनापाततोऽधिगताखिलवेदार्थोऽस्मिन्जन्मनिजन्मान्तरेवा काम्यनिषिद्धवर्जनपुरःसरंनित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेननिर्गताखिलकल्मषतयानितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमातावेदान्ताधिकारीतिलक्षणलक्षिते पुरुषे । त्रि । अधिकारविशिष्टे । प्रभौ ॥ अधिकारोऽस्तिअस्य । अतइनिठनावितीनिः ॥

अधिकार्थवचनम् । न । स्तुतिनिन्दाफलकेऽध्यारोपितार्थवचने ॥

अधिकृतः । त्रि । अध्यक्षे । आयव्ययाऽवेक्षके ॥ व्यापारिते । कृताधिकारद्रव्ये ॥ अधिअधिकउपरिभावाक्रियतेस्म क्तः ॥

अधिक्रमः । पुं । आक्रमणे ॥ अधिक्रमणम् । क्रमुपादविक्षेपे । घञ् ॥ अधिक्रम्यते वा कर्मणिघञ् । नोदात्तेति वृद्ध्यभावः ॥

अधिक्षिप्तः । त्रि । स्थापिते । प्रणिहिते ॥ कुत्सिते ॥ भर्त्सिते । प्रतिक्षिप्ते । कृताक्षेपे ॥ अधिक्षिप्यतेस्म । क्षिप प्रेरणे क्तः ॥

अधिक्षेपः । पुं । तिरस्कारे ॥

अधिगतः । त्रि । प्राप्ते ॥ यथा । अधिगतपरमार्थाः पण्डिताइति । अधिगम्यतेस्म । गमॢ० । क्तः ॥

अधिगमः । पुं । साक्षात्कारे । प्राप्तौ । स्वीकरणे ॥ अधिगमनम् । गमॢ । घञ् ॥

अधित्यका । स्त्री । शैलस्योर्द्ध्वभूमौ ॥ अद्रेरध्यारूढाभूमिः । उपाधिभ्यान्त्य कन्नासन्नारूढयोरिति त्यकन् । त्यकनश्चनिषेधइतिनेत्वम् ॥

अधिदैवतम् । न । पुरुषे । पुरुषोहिरण्यगर्भः दैवतान्यादित्यादीन्यधिकृत्य चक्षुरादिकरणान्यनुगृह्णातीति तथोच्यते । देवताविषयदर्शने । देवताया अधियत्तदधिदैवतम् ॥

अधिनाथः । पुं । गन्धे ॥

अधिपः । त्रि । प्रभौ । राज्ञि । अधिपाति । पारक्षणे । आतश्चोपसर्गइतिकः ॥

अधिपतिः । पुं । प्रभौ । राज्ञि । अधिष्ठायपालयितरि ॥ अधि पाति । पारक्षणे । पातेर्डतिः ॥

अधिभूः । पुं । प्रभौ । अधिभवति । भूसत्तायाम् । भुवः संज्ञान्तरयोरिति क्विप् ॥

अधिभूतम् । न । क्षरभावे । क्षरतीति क्षरोविनाशी । भावोयत्किञ्चिज्जनिमद्वस्तुभूतं प्राणिजातमधिकृत्यभवतीतितथोच्यतइतिस्वामी ॥

अधिमांसकः । पुं । दन्तरोगविशेषे ॥ यथा । हानव्येपश्चिमेदन्ते महानशोथोमहारुजः । लालास्रावीकफकृतो विज्ञेयः सोधिमांसकः ॥ ११ ॥

अधिमासः । पुं । असङ्क्रान्तिमासे । रविसङ्क्रान्तिरहितचान्द्रमासे । मलमासे ॥ यथा । असंक्रान्तमासोऽधिमासः स्फुटःस्यादिति । अपिच । द्वात्रिंशद्भिर्गतैर्मासैर्दिनैःषोडशभिस्तथा । घटिकानांचतुष्के णपततिह्यधिमासक इति । एतच्चसम्भवार्थंनतुनियमार्थम् ॥ अधिअधिकोमासः ॥

अधियज्ञः । पुं । विष्णौ । अधियज्ञोहमेवात्रदेहेइतिवचनात् सर्वयज्ञाधिष्ठाता सर्वयज्ञफलदायकः सर्वयज्ञाभिमानिनीविष्णवाख्यादेवता । यज्ञोवैविष्णुः सचअधियज्ञः । अहं वासुदेवएव न मद्भिन्नः कश्चित् । अतएव परब्रह्मणःसकाशात्अत्यन्ताभेदेनैवात्मामतिपत्तव्यइति । सचात्र मनुष्यदेहे यज्ञरूपेण वर्त्तते । बुध्यादिव्यतिरिक्तो विष्णुरूपत्वात् मनुष्यदेहे च यज्ञावस्थानम् यज्ञस्यमनुष्यदेहनिर्वर्त्यत्वादित्यर्थः ॥

अधियोगः । पुं । यात्रायोगान्तरे ॥ यथा । बुधगीष्पतिभार्गवानांमध्ये द्वौ ग्रहौचेतकेन्द्रे अथवापञ्चमनवमेस्थाने स्थानभेदेन स्थानैक्येन वा स्थितौ स्यातां तदाऽधियोगोभवति तदा यातुर्जयोभवेत् ॥

अधिरथः । पुं । कर्णस्यपितरि ॥

अधिराट्। पुं। सम्राजि॥ अधिअधिकं राजते। राज्। क्विप्॥

अधिराज्यभाक्। पुं। अधिराजि॥

अधिरूढम्। न। अङ्कुरे॥ तालवीजाङ्कुरास्थिमज्जादौ॥ त्रि। आक्रान्ते॥

अधिरूढिः। स्त्री। आरोहणे॥

अधिरोहिणी। स्त्री। वंशकाष्ठादिरचितेसोपाने। निःश्रेण्याम्॥ अधिरुह्यतेऽनया। रुहप्रादुर्भावे। करणे ल्युट्॥

अधिवचनम्। न। नामनि। संज्ञायाम्॥ इतित्रिकाण्डशेषः॥

अधिवासः। पुं। गन्धमाल्याद्यैः संस्कारे॥ निवासे॥ अधिवसनम्। वस। घञ्॥

अधिवासनम्। न। पूजार्थेगन्धमाल्यादिभिः संस्कारे। गन्धमाल्यादिभिरङ्गसंस्कारे॥ अधिकंवास्यते। वासउपसेवायाम्। चुरादिः। ल्युट्॥

अधिवासितः। त्रि। सञ्जातगन्धे॥ कृताधिवासे॥

अधिविन्ना। स्त्री। अनेकभार्यस्यमागूढायांस्त्रियाम्। कृतसापत्निकायाम्। अध्यूढायाम्॥ अधिउपरिविन्नंलाभोस्याः॥ यद्वा। अधिकाविन्नालब्धायस्याः॥

अधिश्रयणम्। न। चुल्ल्याद्युपरिस्थापने॥

अधिश्रयणी। स्त्री। चुल्ल्याम्। अग्न्यन्ते॥ इत्यमरः॥ अधिश्रीयतेऽत्र। श्रीञ्पाके। अधिकरणेल्युट्। ङीप्॥

अधिष्ठाता। त्रि। अध्यक्षे। प्रवृत्तिनिवृत्तिकारणे॥ योयस्यप्रवर्त्तकोनिवर्त्तकश्चसतस्याधिष्ठातेतिव्यवहारः॥

अधिष्ठानम्। न। पुरे॥ चक्रे॥ प्रभावे॥ अध्यासने॥ स्थाने। कल्पनाधारभूते। इच्छाद्वेषसुखदुःखचेतनाद्यभिव्यक्तेराश्रये। कूटस्थचैतन्ये। अज्ञातेब्रह्मणि॥ अधितिष्ठन्ति भूतान्युपादानकारणत्वेनेतिव्याख्यानात्॥ शरीरे॥ जीवरूपेणप्रविश्यसदैवाधितिष्ठत्यस्मिन्नितिव्याख्यानात्। अध्यस्तस्यस्वरूपे॥ अधिष्ठीयतेऽनेनास्मिन्वा। ष्ठा। भावकरणादौल्युट्॥ अधिष्ठानावशेषोहिनाशः कल्पितवस्तुनइतिन्यायः॥

अधिष्ठितः। त्रि। आहिते॥ आश्रिते॥

अधीतः। त्रि। पठिते। कृताध्ययने॥ अधिगते। प्राप्ते॥ अधिपूर्वादिणोगधर्थाकर्मकेतिक्तः॥

अधीतिः। स्त्री। अध्ययने। पठने॥

अधीती। त्रि। अध्ययनविशिष्टे। अधीतवति॥ अधीतमनेन। इष्टादिभ्यश्चेतिकर्त्तरीनिः॥

अधीनः । त्रि । आयत्ते ॥ इनमधिगतः । अत्यादयइतिसमासः । अधिउपरि इनोऽस्येतिवा ॥

अधीयानः । त्रि । पठमाने ॥ वेदाध्ययनवति ॥ यथा । अधीयानः पण्डितम्मन्यमानोयोविद्ययाहन्तियशः परेषाम् । तस्यान्तवन्तस्तुभवन्तिलोका नचास्यतद्ब्रह्मफलंददातीति महाभारतम् ॥

अधीरः । त्रि । कातरे ॥ चञ्चले ॥ न धीरोधैर्य्यंयस्य ॥

अधीरा । स्त्री । विद्युति ॥ मानिनीभेदे ॥ यथा । प्रातेऽन्यासङ्गिनिपतौ खण्डितेर्ष्याकषायिता । अधीराश्रुविमुञ्चन्तीविश्वयाचाषनायिकेतिदशरूपके ॥

अधीशः । त्रि । प्रभौ । ईश्वरे ॥ यथा । अधीशेनावितंविश्वंनाशंयान्तिनिनंक्षवः । ततपातृन्पातिविश्वेशस्तस्माल्लोकहितोभवेदिति ॥ निनंक्षवो नाशयितुमिच्छवः । नश्यतिरन्तर्भावितण्यर्थः ॥ कामे ॥

अधीश्वरः । पुं । बुद्धे ॥ पुं । स्त्री । प्रणताखिलसामन्तावनिपाले । सर्वसन्निहितनृपवशकारिणि ॥ अधिकईश्वरः । राजातुप्रणताशेषसामन्तःस्यादधीश्वरः ॥ स्त्रियामधीश्वरी ॥

अधीष्टः । पुं । सत्कारपूर्वकेव्यापारे ॥ त्रि । सत्कृत्यव्यापारिते ॥

अधुना । त्र । संप्रतीत्यर्थे ॥ अस्मिन्काले । अधुनेतिनिपातितः-इदमोऽश्भावोधुनाचप्रत्ययः ॥

अधुनातनम् । त्रि । इदानींतने । वर्त्तमानकालवृत्तौ ॥ अधुनाभवः । सायंचिरमितिट्युप्रत्ययः । स्त्रियांङीपि । अधुनातनी

अधृष्टः । त्रि । लज्जावति । शालीने ॥ नधृष्टः ॥

अधृष्यः । त्रि । प्रगल्भे । अधर्षणीये । अनभिभवनीये ॥ नधृष्यः ॥

अधृष्या । स्त्री । नदीप्रभेदे ॥ नधृष्या ॥

अधोंशुकम् । न । परिधेयवस्त्रे । अन्तरीये ॥ अधः अधोभागस्यअंशुकम् ॥

अधोक्षः । त्रि । जितेन्द्रिये ॥

अधोक्षजः । पुं । विष्णौ ॥ अधः अक्षजं ज्ञानं यस्मादितिव्युत्पत्तेः ॥ अधः कृतमक्षजमैन्द्रियकंज्ञानंयेन ॥ अधोक्षाणांजितेन्द्रियाणांजायते प्रत्यक्षो भवतिवा ॥ अक्षमिन्द्रिये अधइन्द्रियं पादौ ताभ्यांजातः । अन्येभ्योपिदृश्यतइतिडः ॥ अधोनक्षीयते जातुयस्मात्तस्मादधोक्षजइत्युद्योगपर्वोक्तिः । यद्वा ॥ अधःशब्देनपृथिवीवाचिनाअण्डस्याधरकपालमुच्यते बुवाचके

माथ्यशब्देनचोपरितनकपालमुच्यते । ताभ्यांशब्दाभ्यांतन्मध्यंलक्ष्यते । तथाचाधोक्षयोरण्डस्याधरकपालोत्तरकपालयोर्मध्येवैराजरूपेणजायतेइत्यधोक्षजः । सप्तम्यांजनेर्डइतिड प्रत्ययइत्यभिप्रेत्यनिर्वचनान्तरमाहभाष्यकारः । द्यौरन्तरीक्षंपृथिवीचाधस्तयोर्यस्मादजायतमध्येवैराजरूपेणेतिवा अधोक्षजः ॥

अधोगतिः । स्त्री । नरके ॥

अधोघण्टा । स्त्री । अपामार्गे ॥ इति रत्नमाला ॥

अधोजिह्विका । स्त्री । तालुमूलस्थक्षुद्रजिह्वायाम् ॥

अधोदृष्टिः । त्रि । निजविनयख्यापनाय सततमधएवनिरीक्षणकर्त्तरि । विनीते । अधो दृष्टिर्यस्यसः ॥

अधोभुवनम् । न । पाताले । बलिसद्मनि ॥ इत्यमरः ॥ अधस्तनभुवनञ्च ॥

अधोमर्म । न । गुदे । गुह्यद्वारे ॥ इतिहेमचन्द्रः ॥

अधोमुखं । त्रि । अवाङ्मुखे ॥ नक्षत्रविशेषेषु ॥ यथा । मूलाश्लेषाकृत्तिकाश्चविशाखाभरणी तथा । मघापूर्वात्रयंचैव अधोमुखगणाःस्मृत इति ॥

अधोमुखा । स्त्री । गोजिह्वायाम् ॥

अधोलोकः । पुं । पाताले । अधस्थांसौ लोकश्च ॥

अधोवायुः । पुं । अपानवायौ । पर्द्दे ॥

अध्यक्षः । पुं । क्षीरिकावृक्षे । त्रि । अधिकृते । राज्ञोहस्त्यश्वरथपदात्यर्थादिस्थानेषुकर्मावेक्षितरिपुरुषे । आयव्ययादिभिरीक्षके । अधिगतोक्षं-व्यवहारम् । प्रादयइतिसमासः । इन्द्रियजन्यज्ञाने । प्रत्यक्षे । नियन्तरि । अधिगतो ऽक्षम् । अधिगतोऽक्षेण वा । अक्षेषु व्यवहारेषु आयव्ययचिन्तासु योगक्षेमप्रापणरूपव्यवहारेषुवा अधिकृतोऽध्यक्षः । अधिकृतान्यक्षाणियस्यवा । अध्यक्ष्णोतिवा । अक्षूव्याप्तौ । पचाद्यच् । अध्यक्षतिवा । अध्यक्षयति प्रत्यक्षयतीति अध्यक्षशब्दात् तत्करोतितदाचष्टइतिणिजन्तात् पचाद्यज्वा ।

अध्यग्नि । न । अध्यग्निधने ॥ । । अग्निमध्ये ॥

अध्यग्निधनम् । न । विवाहकालेऽग्निसन्निधौपित्रादिभिर्दत्तधने । यथा । विवाहकालेयत् स्त्रीभ्योदीयतेह्यग्निसन्निधौ । तदध्यग्निकृतंसद्भिः स्त्रीधनंपरिकीर्त्तितमिति ॥

अध्यण्डा । स्त्री । शूकशिंव्याम् । भूम्यामलक्याम् । अधिकमण्डंबीजम-

स्याः ॥

अध्यधीनः । त्रि । अत्यन्तपरतन्त्रे । गर्भदासे ॥

अध्ययनम् । न । पठने । विधिवद्गुरुमुखादध्यात्मादिविद्यानाक्षरस्वरूपग्रहणे । गुरूच्चारणानूच्चारणे ॥ अधीयते । इङ् अध्ययने नित्यमधिपूर्वः । बहुलवचनात्कर्मणि ल्युट् ॥ प्राङ्मुखत्वादिनियमसहितस्य पुरुषस्य ऋगादेरभ्यासे ॥ अध्ययनलक्षणाप्रमासिद्धिस्तारमुच्यते । यस्य शिष्याचार्यसम्बन्धेन सांख्यशास्त्रं ग्रन्थतोऽर्थतश्चाधीत्य ज्ञानमुत्पद्यते तस्य सा अध्ययनहेतुका सिद्धिः अध्ययनम् ॥ किंच याध्ययनेनाष्टढबन्धकरेणच । पठितश्चंतदेवायुमोचयेद्भवबन्धनात् ॥ इत्युपदेशोमुमुक्षुषु ॥

अध्यर्द्धम् । त्रि । सार्द्धं ॥ अधिकमर्द्धं यस्य । अध्यारूढमर्द्धं यस्मिन्वा । प्रादिभ्योधातुजस्येतिसाधु ॥

अध्यवसायः । पुं । निश्चये । इदमित्थमेवेतिविषयपरिच्छेदे ॥ उत्साहे ॥ अध्यवसानम् । षोन्तकर्मणि घञ् । आतोयुक् ॥ अध्यवसायस्तु बुद्धिव्यापारोज्ञानम् । उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेः रजस्तमोभिभवे सति यः सत्त्वसमुद्रेकः सोऽध्यवसाय इति वृत्तिरितिचाख्यायते ॥ बुद्धौ । क्रियाक्रियावतोरभेदविवक्षया सर्वो व्यवहर्ता आलोच्य मत्वा अहमत्राधिकृत इत्यभिमत्य कर्त्तव्यमेतन्मयेत्यध्यवस्यति ततश्च प्रवर्त्तते इति लोकसिद्धम् । तत्र कर्त्तव्यमिति योऽयं निश्चयश्चितिसन्निधानापन्नचैतन्याया बुद्धेः सोऽध्यवसायो बुद्धेरसाधारणव्यापारः ॥

अध्यशनम् । न । अजीर्णोपरिभोजने ॥ यथा । अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते इति । अधिकमशनमध्यशनम् ॥

अध्यस्तः । त्रि । कृताध्यासे ॥

अध्यात्मम् । । । आत्मतत्त्वे ॥ स्वभावोऽध्यात्ममुच्यते । अस्यार्थः । स्वोभावः स्वरूपं प्रत्यक्चैतन्यम् । आत्मानं कार्यकारणसंघातं देहमधिकृत्य भोक्तृतया वर्त्तमानमध्यात्ममुच्यते इति मधुसूदनः ॥ परस्य ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वभाव इति स्वोभावः स्वभावोऽध्यात्ममुच्यते आत्मानं देहमधिकृत्य प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तु स्वभावोऽध्यात्ममुच्यते अध्यात्मशब्देनाभिधीयते इति भाष्यकाराः ॥ स्वस्यैव ब्रह्मण एवांशतया जीवरूपेणाभवनं स्वभावः स एवात्मानं देहमधि

कृत्यभोक्तृत्वेनवर्त्तमानोऽध्यात्मशब्दे नोच्यतइत्यर्थइतिश्रीधरस्वामिनः ॥ आत्मविषयदर्शने । करणग्रामे । आत्मनिइतिविभक्त्यर्थेऽव्ययीभावः । अनश्चेतिटच् । नस्तद्धितइतिटेर्लोपः ॥ आत्मनोऽधि आत्मविषयमध्यात्मम् ॥

अध्यात्मज्ञानम् । न । आत्मानमधिकृत्य प्रवृत्ते आत्मानात्मविवेकज्ञाने ॥

अध्यात्मनित्यः । त्रि । परमात्मस्वरूपालोचनतत्परे ॥ अध्यात्मे आत्मज्ञानेनित्यः परिनिष्ठितः ॥

अध्यात्मयोगः । पुं । विषयेभ्यः प्रतिसंहृत्यचेतस आत्मनि समाधाने ॥

अध्यात्मविद्या । स्त्री । आत्मतत्त्वविद्यायाम् ॥

अध्यापकः । त्रि । अध्यापयितरि । उपाध्याये ॥ अध्यापयति । इङ् अध्ययने ण्वुल् ॥

अध्यापनम् । न । विप्रस्यासाधारणकर्मविशेषे । ब्रह्मयज्ञे । पाठने । विद्याप्रदाने ॥ अध्यापनञ्चब्राह्मणस्यवृत्तिर्नचाशब्दज्ञंतमुपशिष्यन्तिशिष्याइतिकैयटः । अतोब्राह्मणेनावश्यंशब्दाज्ञेयाः । नचान्तरेणव्याकरणंलघुनोपायेन शब्दाःशक्याविज्ञातुमितिभाष्यम् ॥

अध्यापयिता । त्रि । पाठगुरौ । अध्यापनकर्त्तरि । उपाध्याये ॥

अध्यापितः । त्रि । पाठिते ॥

अध्यायः । पुं । अध्ययने ॥ प्रकरणे । पुराणपरिच्छेदे ॥ यथा । सर्गोवर्गः परिच्छेदोद्घाताध्यायाङ्कसङ्ग्रहाः । उच्छ्वासः परिवर्त्तश्चपटलः काण्डमेवच ॥ स्थानंप्रकरणञ्चैवपर्वाह्निकानिच ॥ पुराणादौपरिच्छेदा अनेकेपरिकीर्त्तिताइति ॥ त्रि । ध्यानशून्ये ॥ अधीयतेऽसौ । इङ० । नित्यमधिपूर्वः । इङश्चेतिघञ् ॥ यद्वा । अधीयतेऽस्मिन् । अध्यायन्यायेति घञन्तोनिपात्यते ॥

अध्यारूढम् । त्रि । समारूढे । कृतारोहणे ॥ अभ्यधिके ॥ अध्याङ्पूर्वाद्रुहेर्गत्यर्थाकर्मकेत्यादिनाकर्त्तरि-कर्मणिवाक्तः । ढत्वधत्वष्टुत्वढलोपदीर्घाः ॥

अध्यारोपः । पुं । असर्पभूतायांरज्जौ सर्पारोपवत् वस्तुन्यवस्त्वारोपे । सच्चिदानन्दानन्ताद्वयब्रह्मण्यज्ञानादि-सकलजडसमूहस्यारोपणे ॥

अध्यावाहनिकम् । न । पितृगृहात्भर्तृगृहंनीयमानयास्त्रियालब्धधने ॥ यथा । यत्पुनर्लभतेनारीनीयमानाहिपैतृकात् । अध्यावाहनिकंनामतत्स्त्रीधनमुदाहृतमितिकात्यायनः ॥ पैतृकादित्येकशेषात्पितृमातृकुला

न्यल्लभतेधनमितितदर्थः ।

अध्याशनम् । न । भुक्तस्योपरिभूयोभोजने ॥ यथा । राजन्नध्याशनं त्याज्यंत्याज्यंतुविषमाशनम् । त्यजेद्विरुद्धमाहारं तत्सर्वंदोषकारकमिति ॥

अध्यासः । पुं । स्मृतिरूपेपरत्रपूर्वदृष्टावभासे । यत्रयदध्यासस्तद्विवेकाग्रहणनिबन्धने भ्रमे । यत्रयदध्यासस्तस्यैवविपरीतधर्मत्वकल्पनायाम् । अन्यत्रान्यधर्मावभासे । वस्तुन्यन्यवुद्धौ । अविद्यायाम् ॥ आसनम् । आसउपवेशने । घञ् । अधिउपरिआसः ॥

अध्यासितः । त्रि । निषेविते ॥ अधिष्ठिते ॥

अध्याहरणम् । न । ऊहने । तर्कणे ॥ अध्याङ्पूर्वाद्धरतेर्ल्युट् ॥

अध्याहारः । पुं । तर्के । ऊहे । आकांक्षासमापकपदानुसन्धाने ॥ अध्याहरणम् । अध्याङ्पूर्वाद्धृञोभावेघञ् ॥ अपूर्वोत्प्रेक्षणे ॥

अध्युषितः । त्रि । उषिते । वसाइति भाषा ॥

अध्युष्टः । त्रि । सार्द्धत्रिसंख्यायाम् ॥

अध्युष्ट्रः । पुं । उष्ट्रयुक्तरथे ॥ उष्ट्रवाह्यप्रेङ्खायाम् ॥ इतिहारावली ॥

अध्यूढः । पुं । ईश्वरे ॥ त्रि । अधिकवृध्याढ्ये । समृद्धे ॥ उपरिभावेनस्थिते ॥ यथा । ऋच्यध्यूढंसामेति ॥

अध्यूढा । स्त्री । कृतसापत्निकायाम् । कृताऽनेकविवाहस्यप्रागूढयोषिति ॥ अधिउपरिऊढमुद्वहनमस्याः ॥

अध्येषणम् । न । गुर्वादेराराध्यस्यप्रवर्त्तनायाम् । प्रार्थनायाम् ॥ समानस्याधिकस्यवाऋत्विगाचार्यादेः प्रवर्त्तनायाम् ॥

अध्येषणा । स्त्री । याचने ॥ निकृष्टस्योत्कृष्टंप्रतिप्रवर्त्तनायाम् । गुर्वादेःप्रार्थनयाकश्चिदर्थेनियोजनेइतिस्वामी । सत्कारपूर्वकव्यापारणे ॥ गुर्वाद्याराधने ॥ अध्येषणम् । इषेरनिच्छार्थस्येतियुच् ॥

अध्येष्यमाणः । त्रि । अध्ययनंकरिष्यमाणे ॥

अध्रुवः । त्रि । अनित्ये ॥ अस्थिरे । फलजनकतानियमशून्ये ॥ नध्रुवः ॥

अध्वगः । पुं । पथिके ॥ सूर्य्ये ॥ उष्ट्रे ॥ खेसरे । खच्चरइतिभाषा प्रसिद्धे ॥ अध्वानंगच्छतीतिविग्रहे अन्तात्यन्ताध्वदूरेत्यादिनागमेर्डः प्रत्ययः ॥

अध्वगभोग्यः । पुं । आम्रातकवृक्षे ॥

अध्वगा । स्त्री । गङ्गायाम् ॥ टाप् ॥ इति त्रिकाण्डशेषः ॥

अध्वजा । स्त्री । स्वर्णुलीवृक्षे । हेमंपुष्प्याम् ॥

अध्वा । पुं । मार्गे । गन्तव्यत्वेनलोकप्रसिद्धेक्रोशयोजनादौनियतपरिमा

यो ॥ संस्थाने । अवस्कन्दे । काले ॥ अस्तिवलम्। अदभ्रचक्षो। अदेर्द्धुचेति क्वनिप् धस्थाम्तादेशः ॥

अध्वनीनः। त्रि । पथिके ॥ अध्वानम लंगच्छति । अध्वनोयत्खाविति खः। आत्माध्वानौखे इतिटिलोपेन ॥

अध्वन्यः । त्रि । पथिके ॥ अध्वानमलं गच्छति । अध्वनोयत्खाविति यत्। येचाभावकर्मणोरितिटिलोपेन ॥

अध्वरः । पुं । क्रतौ ॥ सावधाने ॥ वसुभेदे ॥ नध्वरति । ध्वृकौटिल्ये । अच् ॥ अध्वानंरातिवा । आतोनुपतिकः ॥

अध्वरथः । पुं । परिघातिके । अध्वगमनोपयुक्तरथे ॥ इतिहेमचन्द्रः ॥ दूते ॥ अध्वनेरथः । अध्वारथोऽस्यवा ॥

अध्वर्युः । पुं । यजुर्वेदर्त्विजि ॥ अध्वरमिच्छति । सुपइतिक्यच् । कव्यध्वरपृतनस्यर्चिलोपः । क्याच्छन्दसीत्युः ॥ नध्वरति । ध्वृकौटिल्ये । विच्।अध्वरंयाति। यौतिवा मितद्रवादित्वाडडुर्वा ॥

अध्वर्युः । स्त्री । अध्वर्युशाखाध्येत्र्याम्॥ अध्वर्युशाखाध्येतृवंशोद्भवायाम् ॥ योपधत्वाद् ङीन ॥

अध्वशल्यः । पुं । अपामार्गे ॥

अध्वान्तशात्रवः । पुं । स्योनाकद्रौ ॥

अनः । पुं । प्राणे ॥ अनिति । अनप्राणने । अच् ॥

अनंशुमत्फला। स्त्री । कदल्याम् ॥ इति जटाधरः ॥

अनक्षम् । त्रि । अक्षशून्ये ॥ अन्धे । अक्षिविहीने ॥

अनक्षरम् । न । दुर्वचने । गुणाक्षेपकदोषोत्थवाक्ये । अवाच्ये । निन्द्यावचने । दुर्वचसि । गाली इतिभाषायाम् ॥ नप्रशस्तान्यक्षराणियस्मिन् । अक्षराणामप्राशस्त्यंचार्थद्वारकम् ॥

अनक्षि । न । मन्दाक्षिण ॥ त्रि । तद्वति ॥

अनगारः ।पुं ।ऋषौ । मुनौ ॥ त्रि ।अगारशून्ये ॥

अनग्निः । पुं । श्रौतस्मार्त्तकर्महीने ॥ यथा । अनग्निब्राह्मणाःकलाविति । अग्निसंस्काररहितेपरिब्राजके ॥ अचशौनकः। सर्वसङ्गनिवृत्तस्यध्यानयोगरतस्यच। नतस्यदहनंकार्यंनैवपिण्डोदकक्रिया ॥ निदध्यात्प्रणवेनैवबिलेभिक्षोः कलेवरम् । प्रोक्षणंखननञ्चैवसर्वंतेनैवकारयेदिति ॥

अनग्निका । स्त्री ।दृष्टरजस्कायांकन्यायाम् ॥

अनघः । त्रि । निर्मले ॥ अपापे ॥ मनोज्ञे । हृद्ये ॥ अदुःखे ॥ अव्यसने ॥ अघंनविद्यतेयस्य ॥

अनङ्गम् । न । आकाशे ॥ मनसि ॥ पुं । मदने ॥ नास्ति अङ्गमस्य । नाङ्गं ना मनस्मादितिवा ॥ दशास्यावस्था भवन्ति । तद्यथा । दृङ्मनस्सङ्गसंकल्पाजागरःकृशतारतिः । ह्रीत्यागोन्मादमूर्च्छा श्चेत्यनङ्गदशादशेति ॥ त्रि । अङ्गरहिते ॥

अनङ्गकम् । न । मनसि ॥

अनङ्गशेखरः । पुं । दण्डकछन्दोभेदे ॥ यथा । प्रतापतापतापितप्रतीपभूपते शरच्छशानिशाकरप्रभालसद्यशोधन स्वदानवारिधारयादरिद्रतानलज्वलद्द्विजालितापहारकस्वभावशोभन । भुजङ्गमङ्गलोदितः प्रसङ्गसङ्गतेःसभान्तरेनिवेदितोविधायकःकविश्रियः क्रमाल्लघौगुरौयथेच्छयानिवेशिते भवेदनङ्गशेखरः सुधांशुशेखरप्रियइति ॥

अनङ्गासुहृत् । पुं । शिवे ॥ इतिहेमचन्द्रः ॥

अनच्छः । त्रिं । कलुषे ॥ भिन्नोऽच्छात् । नञ्तत्पुरुषः । नलोपोनञः । तस्मान्नुडचि ॥

अनञ्जनम् । न । व्योम्नि ॥ तत्त्वे ॥ पुं । नारायणे ॥ त्रि । अञ्जनशून्ये ॥ नास्तिअञ्जनमस्मिन् ॥

अनडुज्जिह्वा । स्त्री । गोजिह्वाख्ये ॥

अनड्वान् । पुं । षण्डे । वृषभे ॥ अनः शकटंवहति । वहप्रापणे । अनसिवहेःक्विप् अनसोडश्चेतिक्विप् अनसोडान्तादेशश्च । यजादित्वात् सम्प्रसारणम् ॥

अनडुही । स्त्री । सौरभेय्याम् ॥ गौरादित्वान्ङीष् ॥

अनड्वाही । स्त्री । सौरभेय्याम् ॥ आमनडुहः स्त्रियांवावक्तव्यइतिअनडुह आमिगौरादित्वान्ङीष् ॥

अनतिरेकः । पुं । अभेदे ॥

अनघः । पुं । गौरसर्षपे ॥ इतिराजनिर्घण्टः ॥

अनध्यक्षः । त्रि । अध्यक्षभिन्ने ॥ अप्रत्यक्षे ॥

अनध्यायः । पुं । अनध्ययने ॥ सचद्विविधोनित्योनैमित्तिकश्चेति । तथाहि । चातुर्मास्यद्वितीयासुमन्वादिषुयुगादिषु । अष्टकासुचसङ्क्रान्तौशयनेबोधनेहरेः । अनध्यायंप्रकुर्वीततथासोपपदासुच ॥ नैमित्तिकास्तु । निर्घातभूकम्पोल्कादिपतनादिसर्वाङ्गतेषु । अग्न्युत्पाते । अकालवृष्टौ । सन्ध्यागर्जने । चौरैरुपद्रुतेग्रामे । सङ्ग्रामे । सोमसूर्यग्रहे । दिग्दाहे । विद्युत्सन्निपाते । इत्यादिषुनैमित्तिकानध्यायः । छिद्राण्येतानिविप्राणांयेऽनध्यायाःप्रकीर्त्तिताः । छिद्रेभ्यःसृवतिब्रह्म

ब्राह्मणेन यदर्जितम् । तत्कालेतस्य रक्षांसिश्रियं ब्रह्मयशोवलम् । सर्वमादायगच्छन्ति वर्जयन्तीप्सितंफलमिति ॥

अननुगतम् । न । आत्मतत्त्वे ॥ त्रि । अनुगतभिन्ने ॥

अननुभाषणम् । न । विज्ञातस्यपरिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् । पश्य ०५।५९ ॥

अनन्तः । पुं । केशवे ॥ यथा । गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तंगुणानांगच्छन्तितेनाऽनन्तोयमव्ययइतिविष्णुपुराणम् ॥ अन्तःसीमाइयत्तानविद्यतेयस्य ॥ शेषे । नागजातिराजे ॥ वलदेवे ॥ सिन्दुवारवृक्षे ॥ अनन्तजिति ॥ त्रि । अनवधौ ॥ अपरिच्छिन्ने । अविनाशिनि । व्यापित्वान्नित्यत्वात्सर्वात्मत्वात् देशकालवस्तुपरिच्छेदशून्ये परमेश्वरे ॥ अविद्यमानोऽन्तः कार्यायस्य ॥ अखण्डे ॥ न । सुरवर्त्मनि ॥ अभ्रके ॥ नास्त्यन्तोयस्य ॥

अनन्तकरः । त्रि । असमाप्तिकरे ॥ अनन्तंकरोति । दिवाविभेतिटः ॥

अनन्तजित् । पुं । वुद्धगणभेदे । जिनानांचतुर्विंशत्यन्तर्गतचतुर्दशजिने ॥ अनन्ते ॥ अनन्तंजयतिजेष्यतिवा । जिजये । क्विप् । तुक् ॥ विष्णौ ॥ अनन्तान्यसंख्यातानिभूतानि युद्धक्रीडादिषुसर्वथाचिन्त्यशक्तितयाजयतीति ॥

अनन्ततीर्थकृत् । पुं । अनन्तजिति । वुद्धगणप्रभेदे ॥ इतिहेमचन्द्रः ॥

अनन्तमात्रः । त्रि । एतावत्त्वमस्येतिपरिच्छेत्तुमशक्ये ॥ मात्रापरिच्छित्तिःसा अनन्तायस्य ॥

अनन्तमूर्त्तिः । पुं । सर्वात्मनि । परमात्मनि । अखण्डैकरसे ॥ अनन्तादेशतः कालतोवस्तुतःस्वरूपतस्तावत् परिच्छेदरहितामूर्त्तिः स्वभावोयस्य ॥

अनन्तमूलः । पुं । करालाख्यौषधौ ॥ सुगन्धायाम् । स्थूलग्रन्थौ । वचाप्रभेदे ॥

अनन्तरम् । न । पराचीनकाले । पश्चादर्थे ॥ त्रि । चिदेकरसेपरमात्मनि ॥ नयस्यअन्तरंभिन्नजातीयंकिञ्चिद्विद्यतेसः ॥ छिद्रशून्ये ॥ सन्निहिते । अव्यवहिते । संसक्ते ॥ अन्तरंछिद्रंतच्छून्यम् ॥

अनन्तरितम् । त्रि । अव्यवहिते ॥

अनन्तरूपः । पुं । भगवति । विश्वरूपे ॥ त्रि । अनन्तरूपविशिष्टे ॥ अनन्तानि रूपाणियस्य ॥

अनन्तलोकः । पुं । स्वर्गलोके । अनन्तश्चासौलोकश्च ॥

अनन्तविजयः । पुं । युधिष्ठिरस्यशंखे । अनन्तोविजयोयस्मिन् ।

अनन्तवीर्यः । पुं । अर्हद्भेदे । भाविकल्पेजिनानांचतुर्विंशत्यन्तर्गतेत्रयोविंशेतीर्थंकरजिने । त्रि । दृढवीर्ये । अनन्तप्रभावे । अनन्तानिवीर्याणियस्मिन् । अनन्तंवीर्यंयस्यवा ।

अनन्तव्रतम् । न । भाद्रशुक्लचतुर्दशीकर्तव्येऽनन्तदेवस्यव्रते ।

अनन्तशीर्षा । स्त्री । वासुकेः पत्न्याम् ।

अनन्ता । स्त्री । विशल्यायाम् । शाकभेदे । शारिबायाम् । दुरालभायाम् । दूर्वयोः । कणायाम् । पथ्यायाम् । पार्वत्याम् । आमलक्याम् । विश्वंभरायाम् । गुडूच्याम् । अग्निमन्थवृक्षे । यवासे । षड्ग्रन्थ्यन्तरे । तारायाम् । नास्त्यन्तोऽस्याः । अनन्तः शेषोऽस्ति धारकोऽस्याः अर्शआद्यच् ।

अनन्तात्मा । पुं । नारायणे । देशतः कालतोवस्तुतश्चापरिच्छिन्नस्वरूपत्वात् अनन्तः आत्माअस्य ।

अनन्तिका । स्त्री । माघोर्जमाधवेषाणां पूर्णमासीषु ।

अनन्तेशः । पुं । हरे ।

अनन्दः । त्रि । अमानन्दे । असुखे । औपनिषदोयम् ।

अनन्यः । त्रि । सर्वभोगनिस्पृहे । सर्वोडेतद्दर्शिनि । अहमेवभगवान् वासुदेवः सर्वात्मा न मद्व्यतिरिक्तंकिञ्चिदस्तीतिज्ञानवतिअद्वैतात्मैक्यनिष्ठे । अपृथक्त्वदर्शिनि । नविद्यतेऽन्योविषयोयस्य यस्मिन्वा । अन्योभेददृष्टिविषयोनविद्यतेयस्यवा । नविद्यते स्वेष्टंविनाऽन्यदालम्बनंयस्येतिवा । अद्वितीये । एकाकिनि ।

अनन्यगतिकः । त्रि । एकाश्रये । गत्यन्तररहिते । यथा । अनन्यगतिकेजनेविगतपातकेचातकेयथाकृपितथा कुरुप्रियतथापिनान्यंभजे इत्युद्भटः ।

अनन्यचेताः । त्रि । तदेकचित्ते । नअन्यचेताः ।

अनन्यजः । पुं । कामे । नास्त्यन्यस्मात् अनन्योविष्णुः । ततोजातः । मनसोऽन्यस्मान्नजायते इतिवा । त्रि । अनन्यभवे ।

अनन्यभवः । त्रि । अन्यस्यासाध्ये । अन्यस्यनभवतीति तथा । पचाद्यजन्तोत्तरपदेननञ् समासः ।

अनन्यभावः । त्रि । एकान्तभक्ते । नविद्यतेअन्यस्मिन् भावो यस्य ।

अनन्यवृत्तिः । त्रि । एकाग्रे । एकताने । इत्यमरः । नअन्यावृत्तिरस्य ।

अनन्वक् । त्रि । अननुगते । अनुअञ्चतीत्यन्वक् । नअन्वक् अनन्वक् ।

अनन्वय: । पुं । अर्थालङ्कारविशेषे । यथा । उपमानोपमेयत्वे एकस्यैवैक वाक्यगे । अनन्वय: ॥ उपमानान्तर सम्बन्धाभावोऽनन्वय: । यथा । नकेवलंभातिनितान्तकान्तिर्नितम्बिनी सैवनितम्बिनीव । यावद्विलासायुध लास्यवासास्ते तद्विलासाइवतद्विलासा: ॥ अत्रएवकारोभिन्नक्रम: । सानितम्बिन्येवकेवलंनितम्बिनीवनितान्त कान्तिर्भातीति न यावत्अपिस्वित्त्य र्था:।ते अनुभवैकगोचरास्तस्याविलासास्तद्विलासाइवभान्तीति वचनविपरिणामेनान्वय: । कीदृशा: । विलासायुधस्यकामस्यलासोन्नर्त्यंतस्यवासानिवासभूता: । नितम्बिनीसैवनितम्बिनीवतन्मात्रनितम्बिनीसदृशीति वार्थ: । तेनस्फुटतयाग्वस्यैक्यलाभ: । एवञ्चतन्नैवतदुपमा नाऽन्वेतीत्यनन्वयोऽलङ्कार: । तत्फलञ्च निरुपमत्व बोध: । इतिकाव्यप्रकाशोदाहरणस्यार्थ: ॥

अनपदेश: । पुं । असाधके ॥

अनपरम् । त्रि । पश्चाद्भाविकार्यसम्बन्धविधुरे प्रत्यगभिन्नेब्रह्मणि । अपरंकार्यंनविद्यतेयस्यतत्अकार्य्यमिति यावत् ॥ इतरशून्ये ।

अनपवर्गवीर्य: । त्रि । अक्षीणप्रभावे ।

अनपायी । त्रि । अपायविधुरे । अनश्वरे । निश्चले ।

अनपेक्ष: । त्रि । निरपेक्षे । सर्वेषुभोगोपकरणेषुयदृच्छोपनीतेष्वपिनि:स्पृहे । अपेक्षावर्जिते । द्वेषे ।

अनभिज्ञ: । त्रि । अविदुषि । मूर्खे । न अभिज्ञ: ॥ यथा । धिक्त्वांचूततरोपरापरपरिज्ञानाऽनभिज्ञोभवानिति ।

अनभियुक्त: । त्रि । अनादृते ॥ असम्मते ॥

अनभिलाष: । पुं । अरुचौ । अनिच्छायाम् ॥

अनभिव्यक्ति: । स्त्री । अनुद्भूतरूपवत्त्वे । अव्याकृते ।

अनभिष्वङ्ग: । त्रि । पुत्रादौप्रीतिहीने । अन्यस्मिन्सुखिनिदु:खिनिवाऽहमेवसुखीदु:खीचेतिअनन्यभावनया प्रीत्यतिशयोऽभिष्वङ्गस्तद्रहिते ।

अनभ्युदितम् । त्रि ।अनभिप्रकाशिते ।

अनम: । पुं । द्विजे । ब्राह्मणे । इतित्रिकाण्डशेष: ।

अनमितम्पच: । त्रि । कृपणे । नमितम्पचोऽमितम्पच: । तद्भिन्नोऽनमितम्पच: ॥

अनम्बर: । पुं । बौद्धविशेषे ॥ इतिसिद्धान्तशिरोमणौगोलाध्याय: ।

अनय: । पुं । अशुभदैवे । विपदि ॥ अ

सने । अनीतौ । द्यूतविदांप्रसव्यग
तौ । तेषामप्रदक्षिणगमने । ननय
नम् अनेनवा । णीञ् प्रापणे । एरच्
। विरोधेनञ् । अयातशुभावहवि-
धेरन्य: ।

अनर्गलम् । त्रि । प्रतिबन्धकरहिते । नि
राबाधे ॥ नविद्यते अर्गलंयस्मिन् ॥

अनर्घ्य: । त्रि । अमूल्ये ।

अनर्थ: । पुं । हरौ ॥ नविद्यतेअर्थ: प्रयो
जनमस्य आप्तकामत्वात् । त्रि । अ
र्थिन:प्रतिकूले । यथा । अर्थमनर्थं
भावयनित्यंनास्तिततःसुखलेशः स
त्यम् । पुत्रादपिधनभाजांभीति:
सर्वत्रैषाविहितारीतिरितिमोहमु-
द्गर: । नअर्थ: । अर्थरहिते ।

अनर्थकम् । न । प्रलापे । समुदायार्थ
रहितसार्थवाक्ये । अबद्धवाक्ये । त्रि ।
व्यर्थे ॥ नअर्थोयस्य । अर्थान्नञस्त्युर:
प्रभृतिषुपाठान्नित्यंकप् समासान्त: ।

अनर्थमूलम् । न । आत्माज्ञाने ॥ यथा ।
आत्माज्ञानमनर्थानांमूलंलोकेपिने-
तरत् । स्वपराक्रममज्ञात्वायुध्यन्म्रि
यतएवहीति ।

अनर्थान्तरम् । न । अभेदे । एकार्थे ।

अनर्थी । त्रि । निस्पृहे ।

अनल: । पुं । वह्नौ ॥ नविद्यते अलं प-
र्याप्तिर्यस्येत्यनल: ॥ वसुभेदे ॥ मला

भावे ॥ कृत्तिकानक्षत्रे ॥ त्रिषु ॥ चि
त्रके ॥ रक्तचित्रके ॥ भल्लातके । पित्ते
। अनिष्ठ्यनेन । अनप्राणने । हृषा-
दित्वात्कलच् । ५० वत्सरे ॥ यथा ।
दुर्भिक्षंजायतेघोरंधान्यौषधिप्रपीड
नम् । अनलेचसमाख्यातंनात्रकार्या
विचारणेति । भगवतिवासुदेवे ॥ अल
नम् अल: । अलेर्भूषणाद्यर्थाद्भावेघ
ञ् । संज्ञापूर्वकत्वान्नवृद्धि: । घञर्थेको
वा । अल: पर्याप्ति: शक्तिसम्पदांपरि
च्छित्तिरियत्तासानविद्यतेऽस्य-
नल: ।

अनलद: । पुं । जले । अनलं सन्तापंद्य-
तिखण्डयति इतिविग्रह: ।

अनलनामा । पुं । चित्रके ।

अनलप्रभा । स्त्री । ज्योतिष्मतीलता-
याम् ।

अनलप्रिया । स्त्री । अग्नाय्याम् । अन-
लस्यप्रिया: ।

अनलि: । पुं । मुनिद्रुमे । बकवृक्षे ।
इति त्रिकाण्डशेष: ।

अनल्प: । त्रि । बहुषु ।

अनव: । त्रि । प्राचीने । ननव: ।

अनवधानम् । न । अमनोयोगे । प्रमा
दे । त्रि । तद्विशिष्टे । नअवधान
मस्य ।

अनवधानता । स्त्री । प्रमादे । अविमृष्ट

कृत्वे। नञ्अवधानमस्य। तस्यभावः। तल्। यथा। कर्त्तव्याकरणं यत्नसमर्थस्य कथिन्नभवेत्। उच्यतेद्वितयंतत्नप्रमादोऽनवधानतेतिशब्दरत्नावली॥

अनवनः। त्रि। अरक्षणे। हन्तरि॥ अवतेः कर्त्तरिल्युट्। न अवनंरक्षणंयस्मात्॥

अनवमः। त्रि। समाने। सदृशे॥ नञ्अवमः॥ नवमादन्यस्मिन्॥ ननवमः॥

अनवरः। त्रि। प्रधाने। श्रेष्ठे। अकनिष्ठे॥ नञ्अवरः॥

अनवरतम्। न। अविरते। निरन्तरे॥ उत्कृष्टे॥ नास्ति अवरतंयत्र। क्रियाविशेषणत्वेऽस्यक्लीवत्वम्। द्रव्यविशेषणेतुत्रिलिङ्गत्वम्॥

अनवरार्द्ध्यः। त्रि। मुख्ये॥ अवरस्मिन्नर्द्धेभवः। अर्द्धाद्यत्। परावराधमोत्तमपूर्वाच्च। नञ्अवरार्द्ध्यः। नञितिसमासः॥

अनवलोभनम्। न। सीमन्तोन्नयनानन्तरं चतुर्थमासिकर्त्तव्यसंस्कारविशेषे। चतुर्थेऽनवलोभनमित्याश्वलायनः॥

अनवसरः। त्रि। निरवकाशे॥ पुं। अवसरस्याभावे॥

अनवस्करम्। त्रि। निश्शोध्ये। निर्णिक्ते। अपनीतमले॥ नावस्करोऽत्र॥

अनवस्थः। त्रि। अवस्थितिरहिते॥ न अवस्थाप्रतिष्ठायस्यसः॥

अनवस्था। स्त्री। तर्कविशेषे॥ तस्यलक्षणं यथा। उपपाद्योपपादकयोरविश्रान्तिरितिमीमांसकाः॥ अव्यवस्थितपरम्परारोपाधीनानिष्टप्रसङ्गे॥ यथा। यदिघटत्वंघटजन्यत्वव्याप्यंस्यात् कपालसमवेतत्वव्याप्यंनस्यात्॥ स्थित्यभावे॥

अनवस्थानम्। न। अव्यवस्थाने॥ पुं। वायौ। पवने॥ त्रि। चञ्चले॥ नञ्अवस्थानंयस्य॥

अनवस्थितः। त्रि। अव्यवस्थिते॥

अनवस्थितत्वम्। न। सन्ध्यायामपिसमाधिभूमौमयत्नशैथिल्याच्चित्तस्यतत्राप्रतिष्ठितत्वे॥

अनवस्थितिः। स्त्री। चापले॥ मात्सर्यद्वेषरागादेश्चापल्यन्त्वनवस्थितिः॥ नञ्अवस्थितिः॥

अनशनम्। न। उपवासे॥ कामानशने॥ त्रि। तद्वति॥ नञ्अशनं भक्षणं यस्मिन् यस्यवातत्॥

अनश्नन्। त्रि। अभुञ्जाने॥

अनश्वरः। त्रि। शाश्वते॥ ननश्वरः॥

अनः। न। शकटे॥ मातरि॥ ओदने॥ प्राणिजन्मनि॥ अनितिचीत्करोति। अनप्राणने। असुन्॥

अनसूया । स्त्री । अत्रेःपत्न्याम् । कर्द्दमसुनेःकन्यायाम् । त्रि । असूयाशून्ये । अस्यालक्षणंयथा । नगुणान्गुणिनोहन्तित्सैौतिमन्दगुणानपि । नान्यदोषेषुरमतेसानसूयाप्रकीर्त्तितेति वृहस्पतिः ।

अनसूयुः । त्रि । अनिन्दके । सन्तःप्रणयिवाक्यानिगृह्णन्तिह्यनसूयवइतिभट्टपादाः ।

अनहंवादी । त्रि । गर्वोक्तिरहिते । यः कर्त्ताहमितिवदनशीलो न भवति- सः ।

अनहङ्कारः । त्रि । अहङ्कारविधुरे ।

अनहङ्कृतिः । स्त्री । गर्वाभावे । अशोचे । इतित्रिकाण्डशेषः ।

अनाकारः । त्रि । निराकृतौ । निराकारे ।

अनाकुलम् । त्रि । अव्यग्रमनसि । एकाग्रमनसि । स्थिरे । एकाग्रे । असङ्कीर्णे । नञ्आकुलम् ।

अनाक्रान्तः । त्रि । अपराजिते । नञ्आक्रान्तः ।

अनाक्रान्ता । स्त्री । कण्टकार्य्याम् । न आक्रान्ता ।

अनागतः । त्रि । वर्त्तमानप्रागभावप्रतियोगिनिकाले । भविष्यति । अनायाते । अनुपस्थिते । अज्ञाते । यथा

। अनागतादिलिङ्गेननस्यादनुमितिस्तदेतिकारिकावली । न आगतः ।

अनागतार्त्तवा । स्त्री । अरजस्कस्त्रियाम् । नग्निकायाम् । अनागतमार्त्तवंरजोऽस्याः ।

अनाचारः । पुं । कदाचारे । श्रुतिस्मृतिविरुद्धकर्मकरणे । सर्वदेशेष्वनाचारः प्रथितास्मूलवर्वणाम् । त्रि । तद्विशिष्टे ।

अनातपः । पुं । छायायाम् । रौद्राभावे ।

अनात्मा । पुं । शरीरादौ । यथा । अप्राप्तःप्राप्यतेयोयमप्यत्यक्तस्त्यज्यतेतया । आनीयात्तमनात्मानंबुद्ध्यन्तंवपुरादिकमिति ।

अनात्म्यः । त्रि । रागादिदोषरहिते । आत्मनिमनसिभवम् रागादि । तद्रहितः ।

अनाथः । त्रि । स्वतंत्रे । प्रभुहीने । न विद्यतेनाथोयस्य ।

अनादरः । पुं । परिभवे । तिरस्कृतौ । नञ्आदरः ।

अनादिः । पुं । परमेश्वरे । चतुर्वक्त्रेब्रह्मणि । त्रि । आदिरहिते । नविद्यते आदिःकारणंयस्यसः । यथा । जीवईशोविशुद्धाचित्तत्तेषांभेदःपरस्परम् । अविद्यातच्चितोर्योगः षडस्माकमना

दय: ॥ इतिवेदान्तरहस्यम् ॥

अनादित्वम् । न । उत्पत्तिमत्त्वेसति सहेतुत्वेसतिकेनाप्यविदितमूलकारणत्वे ॥ भावेत्व: ॥

अनादिनिधन: । त्रि । आद्यन्तशून्ये षड्भावविकारवर्जिते परमेश्वरे ॥ आदिर्जन्मनिधनंविनाश: । आदिश्चनिधनञ्च आदिनिधने जन्मविनाशौत द्वयंनविद्यतेयस्यस: ॥

अनादृतम् । त्रि । अवज्ञाते । कृततिरस्कारे ॥ नआदृतम् ॥

अनापन्न: । त्रि । अप्राप्ते ॥ नआपन्न: ॥

अनामकम् । न । अर्शोरोगे ॥ पुं । मलमासे ॥ अप्रशस्तंनामाऽस्य ॥

अनामयम् । ा । न । आरोग्ये ॥ अविद्यातत्कार्यात्मकरोगरहिते मोक्षाख्ये पुरुषार्थे ॥ आत्मरूपे ॥ अस्तिजायते वर्द्धतेइत्यादिषड्भावविकारशून्यमात्मरूपम् तेषांविकाराणां देहोपाधिनिष्ठत्वात् आत्मनश्चदेहाभावात्तद्विकाररहितमनामयमात्मैवेत्यर्थ: ॥ आमयस्याऽभाव: । अर्थाभावे ऽव्ययीभाव: ॥ त्रि । तद्विशिष्टे ॥ अनामयमस्त्यस्य । अच् ॥

अनामयावी । त्रि । व्याधिविवर्जिते । दीप्ताग्नौ ॥ न आमयावी ॥

अनामा । स्त्री । उपकनिष्ठाङ्गुलौ ॥ नं नामग्रहणायोग्यमस्या: । ब्रह्मणोऽनयाशिरश्छेदनात् । अतएवास्यांपवित्रीक्रियते । डाप् ॥

अनामिका । स्त्री । अनामायाम् ॥ अनामैव । स्वार्थेक: । प्रत्ययस्थादितीत्वम् ॥

अनायत्त: । त्रि । अनधीने । अवशीभूते ॥ यथा । एतावज्जन्मसाफल्यं यदनायत्तवृत्तितेति ॥

अनायस्त: । त्रि । आयासहीने ॥

अनायास: । पुं । अक्लेशे । यत्नाभावे ॥ अस्यलक्षणन्तु । शरीरंपीड्यते येन सुशुभेनापि कर्मणा । अत्यन्तंतन्न कुर्वीतअनायास: सउच्यतइत्येकादशीतत्त्वम् ॥ यथा । अनायासेनमरणंविनादैन्येनजीवनम् । अनाराधितगोविन्दचरणस्यकथंभवेदिति ॥

अनायासकृतम् । त्रि । विनायत्नकृते ॥ न । फाण्टे ॥ अनायासेनकृतम् ॥

अनारतम् । न । सन्तते ॥ त्रि । तद्युक्ते ॥ आङ्पूर्वारमिर्विरामे । अविश्रामनमारतंयस्मिन् ॥ क्रियाविशेषणत्वे क्लीवत्वम् । द्रव्यविशेषणेतु त्रिलिङ्गत्वम् ॥

अनारम्बणम् । त्रि । निरालम्बे ॥

अनारम्भ: । पुं । अननुष्ठाने ॥ नआरम्भ: ॥

अनार्जवः । पुं । रोगे ॥ ऋजुत्वाभावे । त्रि । तद्वति ॥

अनार्त्तवम् । न । पौषादिमासचतुष्टये वर्षाभवेजले । यथा । अनार्त्तवंप्रमुंचन्तिवारिवारिधरास्तुयत् । तन्निदोषायसर्वेषां देहिनांपरिकीर्त्तितमिति ॥ ऋतौभवम् आर्त्तवम् । न-आर्त्तवम् ॥

अनार्य्यः । त्रि । दुर्ज्जने । दुःशीले ॥ न-आर्य्यः ॥

अनार्य्यकम् । न । अगुरुकाष्ठे ॥ इतिराजनिर्घण्टः ॥

अनार्य्यजम् । न । लोहके ॥ इतिहेमचन्द्रः ॥ त्रि । नीचजाते ॥

अनार्य्यजुष्टम् । त्रि । मुमुक्षुभिरसेविते ॥ अनार्यजुष्टम् ॥

अनार्य्यतिक्तः । पुं । भूनिम्बे । चिरातिक्ते ॥ अनार्यप्रियश्चासौतिक्तश्च शाकपार्थिवादिः ॥

अनाविद्धः । त्रि । अनभिभूते ॥ नञाविद्धः ॥

अनाविलः । त्रि । निर्म्मले ॥ नञाविलः ॥

अनावृतः । त्रि । प्रथमे ॥ आवरणवर्जिते ॥

अनावृष्टिः । स्त्री । वर्षणाभावे । ईतिविशेषे ॥

अनाशकम् । न । कामानशने । नतु-भोजननिवृत्तिरनाशकम् भोजननिवृत्तौम्रियतएवेति तपसानाशकेनेत्यत्रत्यभाष्यम् ॥

अनाशकायनम् । न । उपवासपरायणत्वे ॥

अनाशी । पुं । अपरिच्छिन्ने । आत्मनि ॥

अनाश्रितः । त्रि । अनपेक्षमाणे । फलाभिसन्धिरहिते ॥ नञाश्रितः ॥ आश्रयप्राप्तिरहिते ॥

अनाश्वान् । त्रि । अशनमकुर्वाणे । उपेयिवाननाश्वाननूचानश्चेतिनञ्पूर्वादश्नातेःक्वसुरिटोभावश्चनिपात्यते । धृतजपधृतेरनाशुषस्तिभारविः ॥

अनासिकः । त्रि । नासिकारहिते । विख्ये ॥

अनास्था । स्त्री । अनादरे ॥ आस्थाभावे ॥

अनाहतम् । न । षट्चक्रान्तर्गतहृदयस्थेद्वादशदले चतुर्थचक्रे ॥ यथा । शब्दब्रह्ममयंशब्दानाहतंतत्रदृश्यते । अनाहताख्यंतत्पद्मंमुनिभिःपरिकीर्त्तितम् । आनन्दसदनंतत्तुपुरुषाधिष्ठितंपरमितिदेवीभागवतम् ॥ अनाहतो-नामताडनंविनाजायमानःशब्दः ।

मीमांसक:शब्दोयस्मिंस्तच्छब्दानाह तम्। या हिताग्न्यादिस्वात्साधु॥ पुरुषाधिष्ठितम् रुद्राधिष्ठितम्। अनाहतशब्देमध्यमावाणीरूपोयेय:॥ चि। छेदोभोग:क्षालनञ्चहननम् तद्रहितेवस्त्रे। नूतनवस्त्रे॥ आघातरहिते॥ अगुणिताङ्के॥ आहन्यतेस्म क्त:॥ न आहतंवा॥

अनिकेत:। चि। नियतनिवासरहिते॥ नास्तिनिकेतोऽस्य॥

अनिक्षु:। पुं। इक्षुतुल्यायाम्। खाक्-डेति आनाखुइतिच गौडख्याते। न-इक्षु:। सादृश्येन्नञ्॥

अनिगीर्ण:। त्रि। अनुक्ते॥ विषस्यानिगीर्णस्येतिसाहित्यदर्पणम्॥

अनिङ्गनम्। त्रि। अचले। निर्वातप्रदीपकल्पे॥

अनित्य:। चि। अध्रुवे। विनाशिनि। बाधयोग्ये॥ व्यक्ते। कालाद्यवच्छिन्ने। नस्थास्यतीतिलोकागमयोर्व्यवहारयोग्ये॥ ननित्य:॥ यथा। धर्म्मोनित्य:सुखदु:खेत्वनित्येजीवोनित्योहेतुरस्यात्वनित्य:॥ इतिभारतेभारतसाविची॥

अनिद्र:। पुं। स्वयावस्थया स्पर्शशून्ये परमात्मनि॥ चि। निद्राशून्ये॥

अनिभृत:। चि। चपले। अविनीते॥ ननिभृत:॥

अनिमिष:। पुं। स्त्री। सुरे॥ मत्स्ये॥ पुं। विष्णौ॥ अलुप्तदृष्टित्वात्॥ काले॥ ननिमिषति। मिषस्नेषणे। इगुपधेतिक:। नञ्समास:॥

अनिमिषक्षेत्रम्। न। नैमिषारण्ये॥

अनिमिषाचार्य:। पुं। गुरौ। वृहस्पतौ॥ अनिमिषाणांदेवानामाचार्य्य:॥

अनिमेष:। पुं। देवे॥ अविद्यमानोनिमेषोऽस्य॥ मत्स्ये॥

अनियत:। चि। अनैकान्तिके। अनित्ये। अस्थायिनि॥ ननियत:॥

अनियन्त्रित:। त्रि। उच्छृङ्खले। उद्दामे॥

अनिरुक्त:। चि। वाचामगोचरे॥

अनिरुद्ध:। पुं। कामपुत्रे। मनसोऽधिष्ठातरि। उषापतौ॥ न। सन्धाने। पश्वादिबन्धनरज्जौ॥ त्रि। अप्रतिरुद्धे॥ चरे॥ ननिरुद्धोऽनिरुद्ध:। युद्धेकेनापिननिरुद्ध:॥

अनिरुद्धपथम्। न। व्योम्नि॥ त्रि। अवारितपथे॥ अनिरुद्ध: रोधशून्य: पन्थायस्मिन् यस्यवा॥

अनिरुद्धभामिनी। स्त्री। स्वैरिण्याम्। वाणकन्यायाम्। उषायाम्॥ अनिरुद्धस्यभामिनी। अनिरुद्धस्यभामिनीवा॥

अनिरोधः । पुं । अप्रतिबन्धे ।

अनिर्देश्यः । त्रि । निर्देष्टुमशक्ये ॥ वचनागोचरे परमेश्वरे ॥ स्वसंवेद्यत्वात् परस्मै इदं तदिति निर्देष्टुमशक्यत्वात् ॥ न निर्देश्यः ॥ निर्विशेषत्वात् सुखमात्रस्वरूपत्वाच्च वस्तुनि धर्म्माणामभावादिदं तदित्यादिसाधारणशब्दैः द्रव्यं गुणः पाचकइत्यादिविशेषणशब्दैश्च निर्देष्टुमशक्यत इत्यनिर्देश्यः परमेश्वरः । श्रुत्यापि जातिगुणक्रियासंज्ञाभिर्निर्देष्टुमशक्य इत्यर्थः ।

अनिर्माल्या । स्त्री । लक्ष्मापिकायाम् ॥ त्रि । निर्माल्यशून्ये ।

अनिर्वचनीयः । त्रि । निर्वचनायोग्ये । वाक्यागम्ये ।

अनिर्विण्णः । त्रि । विषादरहिते । नञ् निर्विण्णः । न विद्यते निर्वेदोऽस्य वा । अविरक्ते ।

अनिर्विण्णचेताः । त्रि । अविरक्तचित्ते । इहजन्मनि जन्मान्तरे वा अस्मिन् वर्षे वर्षान्तरे वा अद्य श्वो वा सेत्स्यति किं त्वरयेति धैर्य्ययुक्ते । अनिर्विण्णं चेतो यस्य ।

अनिलः । पुं । वाते । अनन्त्यनेन । अनप्राणने । सलिकल्यनिर्महिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच् ॥ गणदेवताभेदे । वाताः पञ्चाशदूनकाः । इलति प्रेरणां करोति इति इलः । तद्भिन्नः । वसुभेदे । स्वातिनक्षत्रे । त्रि । इलाशून्ये ।

अनिलघ्नकः । पुं । विभीतकवृक्षे । इति राजनिर्घण्टः ।

अनिलबन्धुः । पुं । कृत्तिकायाम् ॥ वन्हौ ।

अनिलयनः । त्रि । अनाधारे ।

अनिलसखः । पुं । वन्हौ । अनिलस्य सखा । राजाहः सखिभ्यष्टच् ।

अनिलान्तकः । पुं । इङ्गुदीवृक्षे ।

अनिलामयः । पुं । वातरोगे ।

अनिशम् । न । सदा । सना । अविरते । निशा व्यापारराहित्यमुपचारात् । नास्ति निशाऽस्मिन् । क्रियाविशेषणत्वेऽस्य क्लीबत्वम् द्रव्यविशेषणे तु त्रिलिङ्गत्वम् ॥ रात्रिवर्जिते ।

अनिशम् । ? । सातत्ये ।

अनिष्टम् । न । प्रतिकूलवेदनीये नारकतिर्यगादिलक्षणे पापफले ॥ अपकारे । नइष्टमिति विग्रहः । त्रि । अनभिलषिते ॥ यथा । इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेदिति साहित्यदर्पणः ।

अनिष्टा । स्त्री । नागबलायाम् ॥

अनिसृष्टः । त्रि । अनियुक्ते ।

अनीकः । पुं । न । रणे । सैन्ये । सेनामात्रे । अनित्यनेन । अनप्राणने ।

अनिहृषिभ्यांकिच्चेतिईकन् । अनन म् । अनगतौ प्राणनेवा । अनीकाद यश्चेतिसाधुः । अनयनंवा । णीञ् प्रापणे । बाहुलकात्कक् । नञ्स मासः ।

अनीकस्थः । पुं । रणगते । हस्तिशि क्षाविचक्षणे । रक्षिवर्गे । राजरक्षि णि । चिह्ने । वीरमर्द्दलवाद्ये । जय ढक्केतिप्रसिद्धवाद्ये ॥ त्रि । सैन्यस्थे । अनीकेतिष्ठति । ष्ठा । सुपीतिकः ।

अनीकाधिकृतः । त्रि । सेनापतौ ॥

अनीकिनी ।स्त्री। सेनायाम् । तिष्ठषुच मूषु । इभाः २१८७ । रथाः २१८७ । अश्वाः ६५६१ । पदातयः १०९३५ । एतत्परिमाणविशिष्टसेनाभेदे । स मस्तसंख्यया २१८७० सप्तत्यधिकाष्ट शताधिकसहस्राधिकायुतद्वये । अ क्षौहिणीदशमांशेयं संख्या । अनी- कोरणोस्तिप्रयोजनत्वेनयस्याः । इ- निः । ङीप् । त्रि । अनीकिनि ॥

अनीषिदर्शी । पुं । बुद्धभेदे ॥

अनीशः । पुं । विष्णौ । नविद्यते ईशो नियन्ता स्वामीवास्य । ईश्वरभिन्ने । प्रदृष्टिमिदृष्टयोरस्वतन्त्रे । यथा । अ ज्ञोजन्तुरनीशोयमात्मनः सुखःदुःख योः । ईश्वरप्रेरितोगच्छेत्स्वर्गंवाश्व भ्रमेववेतिस्मृतिः ।

अनीशा । स्त्री । दीनभावे ।

अनीश्वरः । त्रि । नास्तिशुभाशुभयोः कर्मणोःफलदातेश्वरइतिवादिनि ।

अनीहः । त्रि । फलाशारहिते । निश्चे ष्टे । नास्तिईहायस्यसः ।

अनु । ा । हीने । सहार्थे । पश्चादर्थे । सादृश्ये ॥ लक्षणे । इत्थंभूताख्या ने । भागे । वीप्सायाम् ॥ अनुक्रमे। आयामे । समीपे । अनिति । अन प्राणने । बाहुलकादुः ।

अनुकः । त्रि । कामिनि । कामयितरि- ॥ अनुकामयते । अनुकाभिकेति- साधुः ।

अनुकम् । ा । वितर्के ।

अनुकम्पा । स्त्री । दयायाम् ॥ आन्दृशं स्ये । अनुकम्पनम् । कपिकिम्बिश्वल ने । गुरोश्चेष्य: ।

अनुकम्प्यः । त्रि । कृपायोग्ये । अनुक म्पितुंयोग्यः । ण्यत् ।

अनुकरणम् । न । अनुकृतौ । सदृशी करणे ॥ तद्विविधम् । शब्दानुकरण म् अर्थानुकरणञ्च । यथार्थरहितस्य केवलशब्दस्यसदृशकरणम् तच्छब्दा नुकरणम् । यथार्थविशिष्टस्यसदृशक रणम् तदर्थानुकरणम् । इतिवैया- करणाः ।

अनुकर्षः । पुं । रथाधःस्थदारुणि । र

थस्याधस्तनभागे यद्दारुधारणकाष्ठं तिष्ठति यतोधस्तनमुपरिपट्टकर्म यत्र यत्र तदनुकर्षशब्दवाच्यमित्यर्थः इतिभरतः । अवकर्षणे । अनुकृष्यते । कृषविलेखने । घञ् ।

अनुकर्षणम् । न । आकर्षणे । अवकर्षणे ।

अनुकल्पः । पुं । मुख्यकल्पादधमे गौणकल्पे । प्रतिनिधौ । गौणविधौ । अनुहीनःकल्पः । प्रादिसमासः । यथा ब्रीहिभिर्यजेतेतिमुख्योविधिः । ब्रीह्यभावेनीवारैर्यजेतेतिगौणोविधिः । स शक्तेन नानुष्ठातव्यः । यथा । प्रभुःप्रथमकल्पस्ययोनुकल्पेनवर्त्तते । नसाम्परायिकंतस्यदुर्म्मतेर्विद्यतेफलम् । इतिमनुः ।

अनुकामीनः । त्रि । कामङ्गामिनि । यथेष्टगमनशीले । कामस्यसदृशम् । यथार्थेव्ययीभावः । अनुकामंगामीत्यर्थे । अश्वारपाराव्यन्तानुकामंगामीतिखः ।

अनुकारः । पुं । सुसदृशक्रियायाम् । अनुहारे । अनुकरणम् । सदृशरूपवेशभाषाद्याविष्करणम् । अनुकृ० । घञ् । उपमायाम् । अनुकूलकरणे ।

अनुकूलः । पुं । पतिप्रभेदे । अस्यलक्षणं यथा । सर्वदापराङ्गनापराङ्मु-

खत्वे सतिसर्वदास्वभार्यानुकूलत्वमिति । त्रि । तत्तदिच्छाचरणशीले । अनुरक्ते । सहाये । सहकारिणि । अनुकूलादितिविग्रहः ।

अनुकूलता । स्त्री । दाक्षिण्ये । भावे तल् ।

अनुकूला । स्त्री । स्यादनुकूलाभसनगगाश्चेदितिलक्षणलक्षितायांवृत्तौ । यथा । वल्लववेशामुररिपुमूर्त्तिर्गोपमृगाक्षीकृतरतिपूर्त्तिः । वाञ्छतिसिद्धौ प्रणतिपरस्य स्यादनुकूलाजगतिनकस्येति ॥ छन्दोवृत्ते ।

अनुकृतिः । स्त्री । अनुकरणे । अनुकरणम् । कृञ्० । क्तिन् ।

अनुक्रमः । पुं । यथाक्रमे । परिपाट्याम् । अनुक्रमणम् । क्रमुपादविक्षेपे । घञ् । नोदात्तोपदेशेतिनवृद्धिः । अनुक्रमणिकायाम् ।

अनुक्रमणिका । स्त्री । भूमिकायाम् । ग्रन्थादेर्मुखबन्धे । पुराणादेरुक्तविवरणस्यसंक्षेपेणपुनःकथने ।

अनुक्रमणी । स्त्री । ग्रन्थादेर्मुखबन्धे । भूमिकायाम् ॥

अनुक्रान्तः । त्रि । अनुक्रमेणोक्ते ।

अनुक्रियमाणः । त्रि । विडम्ब्यमाने ।

अनुक्रोशः । पुं । दयायाम् । यथा । गुणाधिकान्मुदंलिप्सेदनुक्रोशंगुणाध-

मान् । मैत्रीसमानादन्विच्छेवतापैःपरिभूयते इति ॥ अनुक्रोधमत्स्यनेन । क्रुधमाह्वानेरोदनेच । इत्यस्य तिघञ् ॥

अनुगः । त्रि । अनुगते । अन्वचे ॥ अनुगच्छति । गम्लृगतौ । अन्येभ्योपीतिडः ॥

अनुगतः । त्रि । सेवके । अनुगे । पश्चाद्यासे ॥ मियते ॥ अनुगम्यतेस्म । गम्लृ० । क्तः ॥

अनुगमः । पुं । उपसर्पणे ॥ यथा । कृतेतुदीयतेगत्वात्रेतायामाहुतायवै । द्वापरेयाचमानायकलौत्वनुगमान्विते ॥ इतिस्मृतिः ॥ पश्चाद्गमने ॥ न्यायमते येनरूपेण तावत्पदार्थग्रहः तद्रूपंतावत्पदार्थानुगमकम् तस्यक्रियायाम् ॥

अनुगमनम् । न । पश्चाद्गमने ॥ सहगमने ॥

अनुगवीनः । पुं । गोपाले ॥ गोःपश्चात् इतिअनुगु । पश्चादर्थेऽव्ययीभावः । गोः पश्चात् पर्याप्तंगच्छतीत्यर्थे अनुग्वलंगामीतिखः ॥

अनुगामी । त्रि । कामगामिनि ॥ पश्चाद्गामिनि ॥ स्त्री । अनुगामिनी ॥

अनुगिरम् । । । गिरेःसमीपम् । सामीप्येऽव्ययीभावः । गिरेश्चसेनकस्येति

समासान्तष्टच् ॥

अनुग्रहः । पुं । प्रसन्नतायाम् । फलदाने ॥ इष्टसम्पादनेच्छायाम् । अभ्युपपत्तौ । अनिष्टनिवारणपूर्वकेष्टसाधने ॥ यथा । विरूपोऽस्मतनिःस्वानामक्लान्तापूर्वकंव्ययत् । पूरणादानमानाभ्यामनुग्रहउदाहृतइति ॥ तारकासु ॥ अनुग्रहणम् । ग्रहउपादाने । ग्रहवृद्रिश्च्यप् ॥

अनुग्राहकः । त्रि । समर्थके ॥ अनुगृह्णातीतिग्रहेर्ण्वुल् ॥

अनुचरः । त्रि । सहाये ॥ दासे । सेवके ॥ अनुचरति । चरगतौ । चरेष्टः ॥

अनुचिन्तनम् । न । अनुध्याने ॥

अनुच्छिष्टम् । त्रि । पवित्रे ॥ नउच्छिष्टम् ॥

अनुजः । पुं । कनीयसि । कनिष्ठसोदरे ॥ अनुपश्चाज्जातः । उपसर्गेचसंज्ञायामितिडः ॥ त्रि । पश्चाज्जाते ॥ । न । प्रपौण्डरीकनाम्निसुगन्धिद्रव्ये ॥

अनुजन्मा । पुं । कनीयसि ॥ अनुपश्चाज्जन्मयस्यसः ॥

अनुजा । स्त्री । त्रायमाणायाम् ॥ कनिष्ठायांभगिन्याम् ॥

अनुजाता । स्त्री । कनिष्ठायांभगिन्याम् ॥

अनुजिघृक्षा । स्त्री । अनुग्रहीतुमिच्छा

याम् । ग्रहेःसवनन्तादप्प्रत्ययेटाप् ॥
अनुजीवी । त्रि । सेवके । अनुजीवितुंशीलः सुपीतिणिनिः ।
अनुज्ञा । स्त्री । अनुमती ॥ यथा । नान्योर्नवा ब्रज्ययोर्नगुरुमिध्ययोरन्तराध्यपेयात् अनुज्ञयात्वपेयात् इतितिथ्यादितत्त्वम् ॥ समस्य सम्प्रत्युत्कर्षनिकर्षौदासीन्येन प्रवर्त्तमायाम् । अनुज्ञायते इति अनुपूर्वा ज्ञानातेरातश्चोपसर्ग इत्यङ् ।
अनुज्ञातः । त्रि । अनुमते ।
अनुज्येष्ठम् । ा । ज्येष्ठानुक्रमेणेत्यर्थे । ज्येष्ठस्य आनुपूर्व्येण । अव्ययंविभक्तीत्यव्ययीभावः ।
अनुतर्षः । पुं । सुरापानपात्रे । तृष्णायाम् । अभिलाषे । शीधुपाने । सरके । अनुतर्षणम् । ञितृषापिपासायाम् । घञ् । मद्ये । अनुतृष्यत्य नेन इति ।
अनुतर्षणम् । न । अनुतर्षे । अनुतर्षणम् अनेनवा । ञितृषा० । भावेकरणेवा ल्युट् ।
अनुतापः । पुं । पश्चात्तापे । अनुतपनम् । तपसन्तापे । घञ् ।
अनुत्तमः । त्रि । वरे । मुख्ये । ईश्वरे । नउत्तमोऽस्मात् । अधमे । नउत्तमः ।
अनुत्तमाम्भः । न । सांख्यानांतुष्टिविशेषे । शब्दादिभोगाभ्यासात् प्रवर्द्धन्ते कामाः तेषविषयाप्राप्तौ कामिनं दुःखन्तीति भोगदोषंभावयतोविषयेषापरमेयातुष्टिः साचतुर्थीअनुत्तमाम्भउच्यते ॥
अनुत्तरः । त्रि । श्रेष्ठे । निरुत्तरे । प्रतिजल्पविवर्जिते । वृथे । दक्षिणस्यांदिशि । अधमे । स्थिरे । अनतिशये । उत्तरस्याभावः उत्तरविरुद्धो वा । नउत्तरोयस्माद्वा ।
अनुदर्शनम् । न । पुनः पुनरालोचने । अनुवारं वारं दर्शनम् ॥
अनुदात्तः । पुं । स्वरभेदे । नीचैरनुदात्तः इतितत्स्वरूपम् ॥ नउदात्तः ॥
अनुदितः । पुं । उदयात् पूर्वमरुणकिरणवतिप्रविरलतारके कालविशेषे । त्रि । अनुक्ते ॥ अनुत्थिते । नउदितः ॥
अनुद्घातः । त्रि । प्रतिबन्धनिवृत्तौ । प्रतिघातरहिते ॥
अनुद्दिष्टः । त्रि । उद्देशहीने ।
अनुद्रुतः । त्रि । अनुगामिनि । अनुगते ॥ न । तालविशेषे ॥ सतद्रुतार्द्धो मात्राचतुर्थभागोवा । यथा । अर्द्धमात्राद्रुतंप्रोक्तंद्रुतार्द्धञ्चाप्यनुद्रुतमिति शब्दरत्नावली ।

अनुद्विग्नमनाः । त्रि । स्वस्थचित्ते । नउद्विग्नंमनोयस्यसः ।

अनुद्वेगकरः । त्रि । कस्यचिदप्यदुःखकरे । यथा । अनुद्वेगकरोराजेति ।

अनुधावनम् । न । पश्चाद्धावने । अनुसन्धाने । यथा । तस्मिन् कुरङ्गशावाश्चिमुहुश्चित्तंनिवारय । नतन्मनस्तवाधीनं ह्यथातच्चानुधावनम् । इत्युद्भटः ।

अनुध्या । स्त्री । अनुध्याने ॥

अनुध्यानम् । न । अनुचिन्तने । अनुग्रहे ॥ आसक्तौ ।

अनुध्येयः । त्रि । अनुग्राह्ये ।

अनुनयः । पुं । विनये । प्रणिपाते । सान्त्वने । प्रार्थने । अनुनयनम् । णीञ् ० । एरच् ॥

अनुनासिकः । पुं । मुखसहितनासिकयोच्चार्य्यमाणे वर्णविशेषे । त्रि । नासिकामनुगते ।

अनुनेयः । त्रि । अनुनयार्हे ।

अनुन्नः । त्रि । अविद्धे ॥ ननुन्नः ।

अनुपकारी । त्री । प्रत्युपकाराजनके ॥ नउपकारी ।

अनुपथः । त्रि । अनुवर्त्तिनि ॥ भृत्ये ॥ अनुपश्चात्पन्थायस्य । ऋक्पूरब्धूःपथामानक्षेइत्यः ॥

अनुपदम् । । न । अनुगे । पश्चाद्गमने । पदस्यपश्चात् । पश्चादर्थेऽव्ययीभावः ।

अनुपदी । त्रि । अन्वेष्टरि ॥ अनुपदमन्वेष्टा । अनुपदन्वेष्टेतिसाधुः । अनुपदीगवाम् । गोःपदात् पश्चादन्वेषणञ्चगवामेव । तेनहिरण्यादावन्वेष्येनभवतीति हरदत्तः । हलायुधस्तुसामान्ये नान्वेषणकर्त्तरीत्याह । खोजी इतिभाषायाम् ।

अनुपदीना । स्त्री । पदध्याम् । पादायामवत्त्यांपादुकायाम् । पदस्यानुयस्यचायामइत्यव्ययीभावः । अनुपदंपादायामप्रमाणा वद्धा । अनुपदसर्वेतिखः ।

अनुपपत्तिः । स्त्री । अभावे । नउपपत्तिः ॥ असङ्गतौ ।

अनुपमः । त्रि । उत्तमे ॥ नास्तिउपमायस्य ॥

अनुपमा । स्त्री । कुमुदाख्यदिग्गजकरिण्यामित्यमरः । सुमतीकाख्यदिग्गजकरिण्यामितिमेदिनिः । श्रेष्ठत्वान्नास्त्युपमाऽस्य: ।

अनुपरतः । त्रि । अविरते । सन्तते । नउपरतः ।

अनुपलब्धिः । स्त्री । प्राप्त्यभावे । ज्ञानाभावे । तत्कारणं यथा । अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽन

वस्थानात् । सौक्ष्म्याद्व्यवधानादभि भवात्समानाभिहाराच्च । ७ । उदाहरणानि यथा । उत्पतन् वियति पतत्री अतिदूरतया सन्नपिनप्रत्यक्षेणोपलभ्यते । लोचनस्थमञ्जनमतिसामीप्यान्नदृश्यते । वाह्येन्द्रियघातोऽन्धत्वबधिरत्वादिस्तस्मात् रूपादयोनोपलभ्यन्ते अङ्गिकामाद्युपहतमनाः स्फीतालोकमध्यवर्त्तिनमिन्द्रियसन्निकृष्टमप्यर्थं मनोनवस्थानान्नपश्यति । इन्द्रियसन्निकृष्टं परमाण्वादिप्रणिहितमना अपिसौक्ष्म्यान्नपश्यति । कुड्यादिव्यवहितं राजदारादिव्यवधानान्नपश्यति । अहनिसौरीभिर्भाभिरभिभूतंग्रहनक्षत्रमण्डलंनपश्यति । तोयदमुक्तजलविंदून्जलाशये समानाभिहारान्नपश्यति । चकारोऽनुक्तसमुच्चयार्थः । तेनानुद्भवोपिसङ्गृहीतः । तद्यथा । क्षीराद्यवस्थायां दध्याद्यनुद्भवान्नदृश्यते ।

अनुपशयः । त्रि । असात्म्ये ।

अनुपसंहारी । पुं । हेत्वाभासविशेषे । सच अन्वयव्यतिरेकदृष्टान्तरहितोनुपसंहारी । यथा । सर्वमनित्यं प्रमेयत्वादिति । अत्रसर्वस्यापिपक्षत्वात् दृष्टान्तोनास्ति । नउपसंहारी ।

अनुपस्कृतम् । त्रि । अविकृते । अविगर्हिते ।

अनुपस्थितः । त्रि । समक्षव्याख्यानतदुपस्थितेश्वरयोराश्रये स्वमस्थितप्रतिष्ठिते अस्वरशब्दवाच्ये चिन्मात्रे ।

अनुपाकृतः । पुं । मन्त्रैः पशोः स्पर्शनमुपाकरणं तद्रहितेपशौ ।

अनुपातः । पुं । त्रैराशिकगणिते । पश्चात्पतने । पूर्वाङ्कपातानुसारेणापराङ्कपाते ।

अनुपातकम् । न । पञ्चत्रिंशत्प्रकारभिन्नमहापातकसदृशपापविशेषे ।

अनुपात्ययः । पुं । क्रमप्राप्तस्यानतिपाते । पर्याये ।

अनुपानम् । न । भेषजाङ्गपेयविशेषे । भेषजेनसह तत्पश्चाद्वा यत्पीयते तस्मिन् । यथा । अनुपानविशेषेणकरोतिविविधान्गुणानिति वैद्यकम् । समीपस्थोदके । अनुगतंपानम् ।

अनुपुष्पः । पुं । शरे । इतिशब्दचन्द्रिका ।

अनुपूर्वशः । I । क्रमेणेत्यर्थे ।

अनुपेतः । त्रि । मामुपनयस्वेत्युपनयनार्थमनुपसन्ने । अननुगते । एकाकिनि ।

अनुप्रविष्टः । त्रि । विषयविकारविशान्तैः प्रच्छन्ने ।

अनुप्रभूतः । त्रि । अनुव्याप्ते ।

अनुप्रासः । पुं । शब्दालङ्कारभेदे । स यथा । वर्णसाम्यमनुप्रासः। स्वरवैसादृश्येपि व्यञ्जनसदृशत्वं वर्णसाम्यम् । रसाद्यनुगतः प्रकृष्टोन्यासोऽनुप्रासः ॥ उदाहरणं यथा । आदायवकुलगन्धानन्धीकुर्वन् पदेपदे भ्रमरान् । अयमेतिमन्दमन्दं कावेरीवारिपावनःपवनइति । छेकवृत्तिगतोद्विधा । छेकाःविदग्धाः। वृत्तिर्नियतवर्णगतोरसविषयोव्यापारः । गतइतिछेकानुप्रासोवृत्त्यनुप्रासश्चेतितद्भेदौ ॥

अनुप्लवः । त्रि । सहाये ॥ अनुगे ॥ अनुपश्चात् प्लवते । प्लुङ्गतौ । पचाद्यच् ॥

अनुबन्धः । पुं । बन्धे ॥ दोषोत्पादे । इच्छातोऽपराधकरणे ॥ यथा । अनुबन्धमवस्थांचदृष्ट्वादण्डं निपातयेदिति ॥ वातादिदोषाणाम प्राधान्ये ॥ उच्चरितप्रध्वंसिनि । विनश्वरे ॥ प्रकृतिप्रत्ययागमादेशानांयः कार्यार्थमासज्यते नचप्रयोगसमवायी सोप्यनुबन्धउच्यते॥ मुख्यानुयायिनिशिशौ। मुख्यंपित्रादिकमनुयातियः शिशुस्तस्मिन् ॥ प्रकृतस्यानुवर्त्तने । प्रकृतस्यप्रारब्धस्यअनुवर्त्तने। सम्बन्धे॥ पश्चाद्भाव्यशुभपरिणामे ॥ अधिकारिविषयसम्बन्धप्रयोजनेषु ॥ लेशे ॥ फलसाधने॥ अनुबध्यते । बन्धबन्धने । घञ् ॥

अनुबन्धी । त्रि । सहचारिणि॥ अविच्छेदेनव्यापके ॥ अनुबध्नातीति ॥

अनुबन्धी । स्त्री । हिक्कायाम्॥ तृष्णायाम् ॥

अनुबोधः । पुं । प्रबोधने । गतगन्धस्य पुनःप्रयत्नेनोद्बोधने ॥ यथा । कस्तूरिकादिनामद्रव्यादेः ॥ पश्चाद्बोधे ॥

अनुबोधनम् । बुधअवगमने । भावे-घञ् ॥

अनुब्राह्मणी । त्रि । अनुब्राह्मणाध्ययनकर्त्तरि ॥ ब्राह्मणसदृशोग्रन्थोऽनुब्राह्मणम् । तदधीते । अनुब्राह्मणादिनिः ।

अनुभवः । पुं । स्मृतिभिन्नज्ञाने ॥ सद्विविधः यथार्थोऽयथार्थश्चेति । तद्वति तत्प्रकारकानुभवो यथार्थानुभवः । सैवप्रमेत्युच्यते । तदभाववति तत्प्रकारकस्त्वयथार्थानुभवः॥ उपलम्भे। उपलब्धौ । साक्षात्कारे । साक्षात्स्वरूपबोधे ॥ अस्यमाहात्म्यन्तु । यस्यानुभवपर्यन्ता दृष्टिस्तत्त्वे प्रवर्त्तते । तद्दृष्टिगोचराःसर्वेमुच्यन्तेसर्वकिल्बिषैरिति ॥ प्रत्ययादौ ॥ अनुभवनम् । भू० । ऋदोरप् ॥

अनुभविता । त्रि । चेतने ॥

अनुभावः । पुं । कोषदण्डजतेजसि । प्रभावे । निश्चये ॥ सतांमतिनिश्चये । सतामभिप्रायस्यनिश्चये । भावबोधके रोमाञ्चादौ । कटाक्ष भुजाक्षेप प्रभृतिषु । यथा । भावंमनोगतंसाक्षात्स्वहेतुंव्यञ्जयन्तिये । तेऽनुभावा इतिख्याताभ्रूविक्षेपस्मितादय इतिरसार्णवसुधाकरः ॥ भवनंभावः । श्रिणीभुवइतिघञ् । अनुगतोभावोऽनुभावः। प्रादयोगताद्यर्थइतिसमासः। सामर्थ्ये । अनुभावयति । भुवःपचाद्यच् ॥

अनुभाव्यः । त्रि । अनुभवविषये ॥

अनुभूतः । त्रि । परिचिते ॥ यथा । जयतिश्रीगुरुर्देवोयत्प्रसादादिदंजगत् । अनुभूतंमयासम्यग्दृष्टंनसारमण्वपीति ॥

अनुभूतिः। स्त्री । ज्ञानभेदे । अनुभवे। यथा।अनुभूतिंविनामूढोवृथाब्रह्मणि मोदते ।प्रतिबिम्बितशाखाग्रफलास्वादनमोदवदिति ॥ प्रत्यक्षानुमित्युपमितिशब्दभेदात्साचतुर्विधाभवति ॥

अनुमतः। त्रि। कृतोत्साहे । अनुज्ञाते॥

अनुमतकर्म्मकारी । त्रि । आज्ञयाकार्यकर्त्तरि । लिखितपत्राद्यनुसारेणकर्मकर्त्तरि ॥

अनुमतिः। स्त्री । कलोननेन्दुपूर्णिमायाम् । अङ्गायास्तनयायाम् । उदयकालेमतिपद्योगात्कलाहीनेचन्द्रेसत्यनुमतिशब्दवाच्यापूर्णिमाभवति । अनुज्ञायाम्। राजादेःसम्मतौ । तांविनायागादिक्रियायाअनिष्पत्तेः । सम्मतिपूर्वकाज्ञायाम् ॥ अनुमन्यते-क्तिन् ॥

अनुमन्ता । त्रि । यदनुमतिंविनाकर्त्तुंनशक्यतेतस्मिन् । अनुमतिदातरि ॥ कार्यकारणप्रवृत्तिषुस्वयमप्रवृत्तोपिपरमात्मा प्रवृत्तइवसन्निधिसत्तामात्रेणतदनुकूलत्वात्स्वव्यापारेषुप्रवृत्तान्देहेन्द्रियादीननिवारयति-कदाचिदपि ततसाक्षिभूतःपुरुषः साक्षीअनुमन्ता ॥

अनुमरणम् । न । अनुसंस्थायाम् । पश्चान्मरणे । भर्त्तरिमृतेतत्पादुकादिकमुरसिनिधायज्वलच्चितारोहणपूर्वकं ब्राह्मणीभिन्नस्त्रियाः मरणे ॥ यथा । देशान्तरमृतेपत्यौसाध्वीतत्पादुकाद्वयम् । निधायोरसिसंशुद्धाप्रविशेज्जातवेदसमितिब्रह्मपुराणम् ॥ पृथक्चितिंसमारुह्यनविप्रागन्तुमर्हतीतिस्मृतिः ॥ तवस्वरूपारमणीजगत्याच्छन्नविग्रहा । मोहाद्भर्त्तुश्चितारोहाद्भवेन्नरकगामिनी:

तिसहमरणानुमरणयोःसामान्यतो निषेधक्रमागमवचनम् ॥ सहमरणे॥

अनुमा । स्त्री । अनुमितौ । अनुमाने॥

अनुमानम् । न । कल्पने ॥ सांख्यस्मृतिपरिकल्पिते प्रधाने ॥ स्मृतौ ॥ अनुमीयतेऽश्रुतिर्ययेतिव्युत्पत्त्या स्मृतेरपिप्रामाण्यम् प्रतिसापेक्षत्वात् ॥ अनुमितिकरणे ॥ लिङ्गलिङ्गिपूर्वके । पूर्ववत् शेषवत् सामान्यतो दृष्टंचेति त्रिविधे अनुमितिसाधने ॥ अत्रोक्तं-भाष्यकारैः ।सत्सुचवेदान्तवाक्येषुजगतो जन्मादिकारणवादिषु तदर्थग्रहदार्ढ्यायाऽनुमानमपिवेदान्तवाक्याविरोधिभवन् न निवार्यतइति ॥

अनुमानोक्तिः । स्त्री । तर्के ॥ अनुमानस्य उक्तिः ॥

अनुमितिः । स्त्री । अनुभवविशेषे । परामर्शजन्यज्ञाने । व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञाने ॥ यथा । धूमदर्शनाद्वह्निमान्पर्वतइत्याकारज्ञानमनुमितिः । अस्याव्यापारकारणंपरामर्शः । अस्याःकरणंव्याप्तिज्ञानम् ॥ अनुमानम् । डुमिञ्प्रक्षेपणे । क्तिन् ॥

अनुमेयः । त्रि । अनुमातुंयोग्ये ॥

अनुमोदः । पुं । एवमस्त्वित्याकारे अनुमोदने ॥

अनुमोदनम् । न । अनुमोदे ॥

अनुमोदितः । त्रि । अनुज्ञाते । कृतानुमोदने । अनुमते ॥ यथा । भवता यद्व्यवसितंतन्मेसाध्वनुमोदितमिति श्रीभागवतम् ॥

अनुयाजः पुं । यज्ञाङ्गे ॥ पञ्चानुयाजाः । यजेर्घञि प्रयाजानुयाजौयज्ञाङ्गइति कुत्वाभावोनिपातसिद्धः ॥

अनुयायी । त्रि । सदृशे ॥ पश्चाद्गामिनि ॥

अनुयुक्तः । पुं । भृतकाध्येतरि ॥ इति-महाभारतम् ॥

अनुयोक्ता । पुं । भृतकाध्यापके ॥ इति महाभारतम् ॥

अनुयोगः । पुं । प्रश्ने ॥ अनुयोजनम् । युजेर्घञ् ॥

अनुयोगकृत् । पुं । आचार्ये ॥ इतिहेमचन्द्रः ॥

अनुयोजनम् । न । प्रश्ने ॥ इतिहेमचन्द्रः ॥

अनुरक्तः । त्रि । अनुरागवति ॥ यथा । अनुरक्तोगुणान्ब्रूतेविरक्तोदूषणानिचेति ॥ अनुकूले ॥

अनुरञ्जनम् । न । अनुरागे । हर्षजनने ॥

अनुरतः । त्रि । अनुरागविशिष्टे । प्रीते । अनुरक्ते ॥ अनुपूर्वात् रमेः क-

र्त्तरि क्तः ।

अनुरतिः । स्त्री । अनुरागे ।

अनुरहसम् । न । एकान्ते । रहोऽनु । अनुगतं रहः । अनुगतं रहोऽभिख्या । अन्ववतप्ताद्रहसः इत्यच् ।

अनुरागः । पुं । अन्योन्यप्रीतौ । स्नेहे । अनुगतो रागः ।

अनुरागी । त्रि । अनुरक्ते । अनुरागोऽस्यास्तीत्यस्मिन् वा । मत्वर्थे इनिः ।

अनुराधा । स्त्री । सप्तदशनक्षत्रे । अत्र जातस्य फलं यथा । सत्कीर्त्तिकान्तिश्च सदोत्सवः स्याज्जेता रिपूणाञ्च कलाप्रवीणः । स्यात् सम्भवे यस्य किलानुराधा सम्पत्प्रमोदौ विविधौ भवेतामिति कोष्ठीप्रदीपः । राधामनुगता ।

अनुरुद्धः । त्रि । निवद्धे ॥

अनुरूपम् । त्रि । सदृशे । योग्ये ।

अनुरूपम् । अ । सदृशे । प्रतिरूपे । रूपस्य योग्यम् । यथार्थे योग्यतायामव्ययं विभक्तीत्यव्ययीभावः । अव्ययीभावश्चेत्यव्ययत्वम् ।

अनुरोधः । पुं । अनुवृत्तौ । अनुवर्त्तने । आराध्यादेरिष्टसम्पादने । अनुरोधनम् । रुधिर् आवरणे । घञ् ।

अनुलब्धः । त्रि । अनुवित्ते ।

अनुलापः । पुं । मुहुर्भाषणे । वारंवारं भाषणे । अनुलपनम् लप व्यक्तायां वा

चि । भावे घञ् ।

अनुलिप्तः । त्रि । रञ्जिते ॥ कृतानुलेपने ।

अनुलेपः । पुं । चन्दनादौ । अनुलेपनम् । लिपेर्घञ् ।

अनुलेपनम् । न । चन्दनादौ ॥ गात्रेषु गन्धद्रव्यादिलेपने । अनुलिप्यते । लिप उपदेहे । कर्मणि ल्युट् ॥

अनुलोमः । पुं । यथाक्रमे । अच्प्रत्यन्ववेत्यच् ।

अनुलोमजः । त्रि । अनुलोमजाते । अप्रतिलोमजे ॥ यथा । ब्राह्मणात् क्षत्रियागर्भजातः । क्षत्रियात् वैश्यायां जात इत्यादि ज्ञेयम् ।

अनुवत्सरः । पुं । सम्वत्सरे ।

अनुवर्त्तनम् । न । अनुरोधे । आराध्यादीष्टसम्पादने ॥ अनुगम्य वर्त्तनम् आराधनम् । अनुवृत्तौ ।

अनुवर्त्तितः । त्रि । सेविते ।

अनुवर्त्ती । त्रि । अनुकूले ॥

अनुवाकः । पुं । ग्रन्थे । क्रमगीतऋग्जाते । ऋग्यजुःसमूहे । अनूच्यते । वच परिभाषणे । घञ् । चजोरिति कुत्वम् ।

अनुवाक्या । स्त्री । प्रैषात्परपाठ्यायां देवताह्वान्यामृचि । अनूच्यते । वचेर्ऋहलोर्ण्यत् । चजोरिति कुत्वम् ।

। शब्दसंज्ञत्वात् वचोशब्दसंज्ञायामितिनप्रतिषेधः ॥

अनुवातः । पुं । वायुविशेषे । यःशिष्यदेशाद्गुरुदेशमागच्छतिवायुः सोनुवातइत्युच्यते ॥

अनुवादः । पुं । प्राप्तस्यपुनः कथने । ज्ञातार्थस्यप्रतिपादने । सिद्धस्योपन्यासे ॥ प्रमाणान्तरावगतस्यार्थस्यशब्देनोक्तिरनुवादः ॥ ज्ञातस्यकथने ॥ यथा । अग्निर्हिमस्यभेषजमित्यादिः । हिमविरोधित्वस्याग्नौप्रत्यक्षावगतत्वात् । अनुवदनम् । वदअभिवादनस्तुत्योः । घञ् । कुत्सितेर्थे ॥ विधिविहितस्यानुवचनमनुवादः । न्या० २ । ६५ ॥

अनुवासः । पुं । सौरभ्ये ॥

अनुवासनम् । न । स्नेहने ॥ धूपने ॥ वैद्यकोक्तस्नेहवस्तौ ॥ यथा । द्विधावस्तिः परिज्ञेयानिरूहश्चानुवासनम् । कषायाद्यैर्निरूहः स्यात्स्नेहाद्यैरनुवासनमिति ॥ वासच्छेदेचु ० । अनुपूर्वात् भावेल्युट् ॥

अनुवित्तः । त्रि । अनुलब्धे ॥

अनुविद्धः । त्रि । खचिते ॥

अनुविपसाम् । त्रि । अनुगते ॥

अनुविहितः । त्रि । अनुवर्त्तिनि ॥ कर्त्तरिक्तः ॥

अनुवृत्तः । त्रि । प्रविष्टे । व्याप्ते ॥ पालिते ॥ अनुवृत्तिविशिष्टे ॥

अनुवृत्तिः । स्त्री । प्रवाहरूपेणानुगतौ॥ अनुरोधे ॥ आनुकूल्ये । सेवायाम् ॥ अन्वये ॥ अनुवर्त्ततेव्याप्नोति । वृतुवर्त्तने । क्तिन् ॥ अनुवर्त्तनंवाक्तिन् ॥

अनुवेश्यः । त्रि । तदन्तर्गृहवासिनि ॥

अनुव्रजनम् । न । अनुव्रज्यायाम् । गृहागतानांशिष्टानांगमनसमये कियद्दूरपर्यन्तंपश्चाद्गमनरूपे शिष्टाचारे ॥ यथा । आयान्तमग्रतोगच्छेत् गच्छन्तंतमनुव्रजेदितिनिगमकल्पद्रुमतन्त्रम् ॥

अनुव्रज्या । स्त्री । गच्छतोनुगमने । अनुव्रजने ॥ अनुव्रजनम् । अनुव्रज्या- । क्यप् ॥

अनुशयः । पुं । द्वेषे ॥ पश्चात्तापे ॥ अनुबन्धे ॥ दीर्घद्वेषे ॥ शास्त्रोक्तकर्मणि ॥ अनुशयनम् अनेनवा । शीङ्स्वप्ने । एरच् पुंसीतिघोवा ॥

अनुशयी । त्रि । चन्द्रस्थलस्खलितेऽवरोहतिव्रीह्यादिदेहसंश्लिष्टे वेदविहितकर्मानुष्ठातरि कर्मिणि ॥ जीवे ॥ अनुदण्डवत्प्रणामैश्चरणमूलेशेते इति तथा ॥

अनुशयी । स्त्री । क्षुद्ररोगान्तर्गतपादरोगविशेषे ॥ तल्लक्षणादिर्यथा ॥

गम्भीरामल्पशोकांचसवर्णामनुपरिस्थिताम्। पादस्यानुशयींतान्तुविद्याद्वस्तः प्रपाकिनीम्॥ हरेदनुशयींवैद्यःक्रिययाश्लेष्मविद्रधेरितिभावप्रकाशः॥

अनुशरः। पुं। राक्षसे॥ अनुशृणाति। शहिंसायाम्। अनुपूर्वः। ऋदोरप्॥

अनुशायी। पुं। जीवे॥

अनुशासनम्। न। अनुशिष्टौ। आज्ञायाम्॥ उपदेशे॥ नियोगवचने॥ अनुशिष्यते व्याख्यायते वचनादिर्येन। शासु अनुशिष्टौ अनुपूर्वः। ल्युट्॥ व्युत्पादने॥ यथा। शब्दानामनुशासनम्। अनुशिष्यन्तेऽसाधुशब्देभ्यः प्रविभज्य बोध्यन्ते येनेति करणे ल्युट्॥

अनुशासितः। त्रि। अनुशिष्टे। अनुशिक्षिते॥

अनुशासिता। त्रि। नियन्तरि॥ प्रशासितरि॥

अनुशिष्टः। त्रि। ज्ञापिते। शिक्षिते॥ आज्ञप्ते॥

अनुशिष्टिः। स्त्री। कर्त्तव्याकर्त्तव्ययोर्विविच्यज्ञापने। अनुशासने॥ अनुशासनम्। शासु०। स्त्रियांक्तिन्। नाशादिभ्यः। शास इदङ्हलोः॥

अनुशीलनम्। न। आलोचने॥ मुहुः सेवने॥ पुनःपुनरभ्यासे॥

अनुशोचनम्। न। शोके॥ शुचशोके अनुपूर्वः। ल्युट्॥

अनुश्रवः। पुं। वेदे॥ गुरुमुखादनुश्रूयतएव न केनचित्क्रियते अनुपूर्वाच्छ्रोते ऋदोरवित्यप्॥

अनुषक्। ा। अनुमाने॥

अनुषक्तः। त्रि। अनुविषक्ते। अनुगते॥ अनुसज्यतेस्म। षञ्ज०। क्तः॥

अनुषङ्गः। पुं। करुणायाम्॥ इतिहलायुधः। एकत्रान्वितार्थानामपरत्रान्वये॥ आसक्तौ॥ न्याये। उपनयस्याऽयम्पदस्यनिगमने॥ यथा। वह्निव्याप्यधूमवांश्चायमतस्माद्वह्निमानिति॥ अनुषज्यतेऽत्र। षञ्जसङ्गे। हलश्चेतिघञ्॥ अन्योद्देशप्रवृत्तावन्यस्यापिसिद्धौ॥

अनुषङ्गि। त्रि। व्यापके॥

अनुष्टुप्। स्त्री। सरस्वत्याम्॥ अष्टाक्षरायांवृत्तौ॥ यथा। पञ्चमोलघुः षष्ठःसप्तमस्तुसमेलगुः। पादेष्विषमेगश्चेत्श्लोकोऽनुष्टुप्चकीर्त्तितः॥ क्वचित्पादेतुविषमेपञ्चमाद्यास्त्रयोपिलाः। तेक्वापिसर्वेगाःश्लोकेक्वचित् केवलपञ्चमइति॥ अनुस्तुभ्नाति। स्तुभ०। क्विप्॥

अनुष्ठानम्। न। क्रियारम्भे॥ करणे॥ अनुष्ठीयतेयत्। ष्ठा०। ल्युट्॥

अनुष्ठितः। त्रि। कृते॥

अनुष्णः । त्रि । अलसे । मन्दे । शीतले ॥ उष्णोदन्यः उष्णादन्यः । न । उत्पले ॥

अनुष्णवल्लिका । स्त्री । नीलदूर्वायाम् ॥

अनुसंस्था । स्त्री । अनुमरणे ॥

अनुसञ्चरन् । त्रि । गमनागमने कुर्वति ॥

अनुसन्ततम् । त्रि । अनुस्यूते । अनुगते ॥

अनुसन्धानम् । न । अन्वेषणे ॥ अनुसन्धीयते । डुधाञ् ० । ल्युट् ॥

अनुसमुद्रम् । । । समुद्रस्यसमीपे ॥ समुद्रंसमया । अनुर्यत्समयेत्यव्ययीभावः ॥

अनुसरणम् । न । अनुवृत्तौ ॥ अनुपूर्वात् सर्त्तेर्ल्युट् ॥

अनुसर्गः । पुं । प्रतिसर्गे ॥ ब्रह्मादीनाम नन्तरोत्पत्तिरूपे ॥

अनुसवम् । न । त्रिकाले ॥

अनुसवनम् । । । सर्वदार्थे ॥

अनुसारः । पुं । पूर्वानुरूपे ॥ अनुसरणे ॥ अनुक्रमे ॥ अनुसर्त्ते र्घञ् ॥

अनुसारी । त्रि । अनुसृत्यवर्त्तमाने ॥

अनुसृतः । त्रि । उपासिते ॥

अनुस्मृतिः । स्त्री । ध्याने ॥ अनुस्मरणम् । स्मृ० । क्तिन् ॥

अनुस्यूतम् । त्रि । अनुसन्तते ॥ अनुसीव्यतेस्म । षिवु० । क्तः । च्छ्वोरित्यूठ् ॥

अनुस्वारः । पुं । अं इति अचः परेबिन्दौ ॥ स्वरति । स्वृशब्दोपतापयोः । अण् । ततः मत्वाद्यण् । स्वरणम् भावे घञ्वा ॥ अनुगतःस्वारः ॥ स्वरमनुभवतिवा ॥

अनुहारः । पुं । अनुकारे । सदृशकरणे । सदृशरूपवेशभाषाद्याविष्करणे ॥ अनुहरणम् । हृञ् हरणे । घञ् ॥ उपमायाम् ॥

अनूकः । पुं । गतजन्मनि ॥ न । कुले ॥ शीले ॥ अनूच्यति । उचसमवाये । इगुपधेतिकः । न्यंक्वादिः ॥ त्रिपुरुषानूकमित्यत्रतु त्रीन्पुरुषाननुकायति । कैशब्दे । आतश्चेतिकः । अन्येषामपीतिदीर्घः ॥

अनूचानः । पुं । साङ्गवेदविचक्षणे ॥ अनुवचनसमर्थे ॥ यथा । अनूचानः पण्डितम्मन्यमानोयोविद्ययाहन्तियशः परेषाम् । तस्यान्तवन्तस्तुभवन्ति लोकानचास्यतद्ब्रह्मफलंददातीति- महाभारतम् ॥ त्रि । सविनये । विनीते ॥ अन्ववोचत् । वेदस्यानुवचनं कृतवान्वा । उपेयिवानित्तिसाधुः ॥

अनूचानमानी । त्रि । अनूचानंमन्य ॥ अनूचानमात्मानं मन्यते इत्यर्थं शीलः । आत्ममानेखश्चेतिपक्षेणिनिः ॥

अनूच्चः । त्रि । वामने ॥ नीचे ॥

अनूढः । त्रि । अविवाहिते ॥ नञ्ऊढः । नञ्समासः । नलोपोनञः । सास्मा

सुदर्षि ।

अनूचम् । चि । अवक्तव्येगुर्वादिनामनि । यथा । आत्मनाम गुरोर्नाम नामातिकृपणस्यच । श्रेयस्कामोनगृह्णीयाज्ज्येष्ठापत्यकलत्रयोरिति । वद: सुपिक्यप्चेति वदेर्भावेक्यप् ।

अनून: । त्रि । पूर्णे । नऊन: । अनिश्चिते । नास्तिनूनंयस्य :

अनूनक: । त्रि । पूर्णे । ऊनयति । ऊन परिहाणे । अच् । स्वार्थेकन् । नऊनक: ।

अनूप: । पुं । सैरिभे । महिषे । त्रि । जलप्राये । अम्बुप्रायदेशे । अस्यलक्षणंयथा । पद्भम्बु वहुवृक्षश्च वातश्लेष्मामयान्वित: । देशोऽनूपं इतिख्यात: शास्त्रेषुचमनीषिभिरिति । अपि च । नदीपल्वलशैलाढ्य फुल्लोत्पलकुलैर्युत: । हंससारसकारण्डचक्रवाकादिसेवित: । सरोवराहमहिषरुरुरोहितकुलाकुल: । प्रभूतद्रुमगुल्माढ्यो नानाशस्यफलान्वित: । अनेकशालिकेदारकदलीक्षुविभूषित: । अनूपदेशोवातश्लेष्ममयाश्चिमानितिभावप्रकाश: । अनुगता आपोऽत्र । प्रादिभ्योधातुजस्यवाच्योवाचोत्तरपदलोपश्चेतिवहुव्रीहि: । ऋक्पूरित्य: । ऊदनोर्देशे ।

अनूपजम् । न । आर्द्रके । इतिराजनिर्घण्ट: । त्रि । अनूपोत्पन्नमात्रे ।

अनूबन्ध: । पुं । अनुबन्धे । अनुवध्यते । बन्धबन्धने । घञ् । उपसर्गस्यघञीतिदीर्घ: ।

अनूरु: । पुं । अरुणे । सूर्यसारथौ । अविद्यामानावूरूयस्य ।

अनूरुसारथि: । पुं । सूर्ये । अनूरु: सारथिर्यस्य ।

अनृच: । पुं । माणवके । अविद्यमाना ऋचोऽस्य । ऋक्पूरित्यप्रत्यय: ।

अनृजु: । त्रि । शठे । वक्राशये । नऋजु: ।

अनृणी । त्रि । ऋणमुक्ते । यथा । एकमप्यक्षरंयस्तुगुरु:शिष्येनिवेदयेत् । पृथिव्यांनास्तितद्द्रव्यंयद्दत्वासोऽनृणीभवेदिति तिथ्यादितत्त्वम् ।

अनृतम् । न । कृषौ । असत्ये । अयथादृष्टकथने । अयथार्थभाषणे । तत्कथनेदोष: । समूलोवाएषपरिशुष्यति योऽनृतमभिवदतीतिश्रुते: । अवध्यहिंसानुवन्धियथार्थभाषणे । नऋतम् । अनृतम् । विवाहादिपञ्चकेष्वनृतभाषणेपापाभावो यथा । विवाहकाले रतिसंप्रयोगेप्राणात्ययेसर्वधनापहारे । विप्रस्यचार्थेह्यनृतंवदेत पञ्चानृतान्याहुरपातकानी-

तिकर्णपर्वणि जिष्णुंप्रति श्रीकृष्णोक्तिः ॥

अनेकः । त्रि । एकभिन्ने । बहुषु ॥ न । व्यक्ते ॥ प्रतिपुरुषं बुध्यादीनां भेदात् ॥ पृथिव्यादिकमपि शरीरघटादि भेदेनाऽनेकमेव । नएकः ।

अनेकजः । पुं । पक्षिणि ॥ विष्णौ ॥ धर्मगुप्तयेऽसकृज्जायमानत्वात् । त्रि । बहुजाते ।

अनेकता । स्त्री । परस्परंभिन्नतायाम् । न एकता ।

अनेकधा । १ । अनेकप्रकारे ।

अनेकपः । पुं । स्त्री । हस्तिनि । अनेकेन करेण मुखेनच पिबति । पापाने । सुपीतिकः ।

अनेकरूपम् । त्रि । विविधे । अनेकानि रूपाणियस्मिन् ॥

अनेकसंयुक्तम् । न । लिङ्गशरीरे । अनेकैर्देवमनुष्यादिनानास्थूलशरीरैःसंयुक्तम् । अनेकाभिः श्रोत्रादिबुध्यन्तसप्तदशकलाभिः संयुक्तंवा ॥ त्रि । बहुभिः सम्बद्धे ।

अनेकान्तः । त्रि । अनियते । अनतिशये ।

अनेकान्तवादी । त्रि । आर्हते । सप्तपदार्थवादिनि नास्तिकभेदे । यथा । इहसप्तपदार्थाःस्युर्जीवाजीवास्रवाः । संवरोनिर्जरश्चैवबन्धमोक्षावुभावपि । स्याद्वादलाञ्छितास्वेतेसर्वेनैकान्तिकत्वतइति ।

अनेकाश्रितगुणः । पुं । बहुनिष्ठगुणे ॥ सयथा । संयोगः विभागः द्विपृथक्त्वादिःएकत्वान्यसङ्ख्येतिसिद्धान्तमुक्तावली ।

अनेजत् । त्रि । चलनरहिते । सदैकरूपे । एजतीत्येजत् । एजृकम्पने । चलनं स्थिरत्वप्रच्युतिः । नञ्समासः ।

अनेडमूकः । त्रि । शठे । मूकबधिरे । वाक्श्रुतिवर्ज्जिते । नास्त्येडमूकोऽस्मात् । एडमूकसदृशोऽनेडमूकइतिवा । सादृश्यस्यनञर्थत्वात् । अन्धे ।

अनेनाः । त्रि । निर्दोषे ।

अनेहा । पुं । काले । समये । नहन्यते । नञिहनएहचेत्यसिरेहादेशश्च । ऋदुशनसित्यनङ् ।

अनैकान्तिकः । पुं । हेत्वाभासविशेषसव्यभिचारे । साधारणासाधारणानुपसंहारिभेदादनैकान्तिकस्त्रिविधः । एकान्तिकोऽव्यभिचारी । नएकान्तिकः । त्रि । ऐकान्तिकादितरस्मिन् ।

अनैक्यम् । त्रि । एकताशून्ये । अनेकतायाम् । एकस्यभावऐक्यम् । नऐक्यम् ।

अनैपुण्यम् । न । अनिपुणतायाम् ॥

अनैश्वर्यम् । न । अनीश्वरतायाम् । असामर्थ्ये ॥

अनोकहः । पुं । कुठे । वृक्षे ॥ अनसः शकटस्याकं गतिं हन्ति । अन्येष्वपीति हन्तेर्डः ॥

अनौचिती । स्त्री । लोकमर्यादातिक्रमे ॥ न औचिती ॥

अनौपम्यम् । त्रि । आत्मरूपे ॥ यदि तत्सदृशो द्वितीयः पदार्थो जगत्यां स्यात् तदा तदुपमानेन स आत्मोपमेयः स्यात् न तु तदस्ति तस्मादनौपम्यमात्मरूपम् ॥

अन्तम् । न । स्वरूपे ॥ यथा । वनान्तभूः ॥ पुं । नाशे ॥ पुं । न । अवसाने । चरमे ॥ त्रि । अन्तिके ॥ प्रदेशे ॥ यथा । रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गीतादिकं किं वा प्राणसमासमागमसुखं नैवाधिकप्रीतये । किन्तु भ्रान्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुरच्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः इति ॥ परिग्रहापेक्षया समाप्तौ ॥ अतिमनोहरे । रुचिरे ॥ अवयवे ॥ निर्णये ॥ इयत्तायाम् । सीमायाम् ॥ यथा । लवणजलान्ता नद्यः स्त्रीभेदान्तञ्च मैथुनम् । पैशुन्यं जनवार्त्तान्तं वित्तं दुःखत्रयान्तकम् ॥ राजश्रीर्ब्र-अथापान्तावशान्तं ब्रह्मवर्चसम् । आचारो घोषवासान्तः कुलस्यान्तं स्त्रियः स्मृताः ॥ सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः । संयोगा विप्रयोगान्ता मरणान्तञ्च जीवितमिति गारुडे ११५ अध्यायः ॥ अमति । अमगत्यादौ । हसिमृग्रिणिति तन् ॥ अन्तति बन्धने । पचाद्यच् । अन्तनम् । घञ् वा ॥

अन्तःकरणम् । न । मनोबुद्ध्यहङ्कारचेतःसु ॥ यथा । मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् । संशयो निश्चयो गर्वः स्मरणं विषया अमी इति ॥ अस्योत्पत्तिर्यथा । मिलितैस्तु तैः । अन्तःकरणमेकं स्यादिति । तैः पञ्चभूतस्य सत्त्वांशैर्मिलितैरन्तःकरणं भवतीत्यर्थः । आभ्यन्तरवृत्तित्वादन्तःकरणम् । अन्तः अभ्यन्तरे करणम् ॥

अन्तःकरणदेवता । स्त्री । चन्द्राच्युतचतुर्मुखशङ्करेषु । यथासंख्यं चतुर्णां चतुर्षु ॥

अन्तःकरणविषयः । पुं । सङ्कल्पविकल्पनिश्चयाहङ्काराख्यचैतन्याख्येषु ॥ यथासंख्यं चतुर्णां चत्वारो विषया ज्ञेयाः । अन्तःकरणवृत्तित्वेनाप्येषां व्यवहारः ॥

अन्तःकरणवृत्तिः । स्त्री । मनोवृत्तौ ॥ सा चानेकविधा । यथाहुः । शान्ताघो

राजसामूढतामसस्तोवृत्तयस्त्रिधा ।
वैराग्यंक्षान्तिरौदार्यमित्याद्याः शा
न्तवृत्तयः ॥ तृष्णास्नेहोरागलोभा-
दित्याद्याघोरवृत्तयः । सम्मोहोभय
मित्याद्याःकथितामूढवृत्तयइति ॥ वृ
त्तिभेदादन्तःकरणं चतुर्विधंभवति
॥ वृत्तिभेदोयथा । यदातुसङ्कल्प
विकल्पकृत्यंतदाभवेत्तन्मनइत्यभि
ख्यम् । स्याद्बुद्धिसंज्ञञ्चयदाप्रवेत्तिसु
निश्चितंसंशयहीनरूपम् ॥ अनुसन्धा
नरूपंतच्चित्तञ्च परिकीर्त्तितम् । अ
हङ्कृत्यात्महत्त्यातुतदहङ्कारतांगत-
मिति । सङ्कल्पविकल्पकृत्यंयदान्तः
करणंकरोतितदातदन्तःकरणंमनः
संज्ञंभवति । एवमग्रेप्यूह्यम् ॥

अन्तःकुटिलः । पुं । शङ्खे ॥ त्रि । वक्रान्तः
करणे ॥

अन्तःपदवी । स्त्री । सुषुम्णायाम् ॥

अन्तःपुरम् । न । भूभुजांस्त्र्यगारे । शु
द्धान्ते ॥ अन्तरभ्यन्तरेपुरंगृहम् । ता
त्स्थ्याद्राजदारेषु ॥

अन्तःपुराध्यक्षः । पुं । शुद्धान्ताधिकृते ॥
तल्लक्षणमाहयुक्तिकल्पतरुः । यथा ।
वृद्धः कुलोद्गतः शक्तः पितृपैतामहः
शुचिः । राज्ञामन्तःपुराध्यक्षोविनी
तश्चतथेष्यत इति ॥

अन्तःप्रज्ञः । पुं । तैजसे ॥ इन्द्रियापेक्ष

यामनसोन्तःस्थत्वात् तद्वासनारूपा
प्रज्ञायस्यसः ॥

अन्तःसत्त्वा । स्त्री । गर्भिण्याम् ॥ अन्तः
अभ्यन्तरे सत्त्वंयस्याःसा । भल्लातक्या
म् ॥

अन्तःसुखः । त्रि । बाह्यविषयजनितसु-
खशून्ये । स्वरूपसुखे । अन्तः अभ्यन्त
रे सुखंयस्यसः ॥

अन्तःस्वेदः । पुं । स्त्री । गजे ॥ अन्तः अ
भ्यन्तरे स्वेदोयस्य सः ॥

अन्तकः । पुं । नाशकारिणि । यमे ॥
अन्तंकरोति अन्तयति । तत्करोती
तिण्यन्तात् ण्वुल् ॥ भरण्याम् ॥

अन्तकरः । त्रि । नाशकरे ॥ अन्तंकरो
ति । दिवाविभेतिटः ॥

अन्तकर्म । न । नाशने ॥ राघवस्य शरै
र्घोरैर्घोरंरावणमाहवे । अद्यराघवे-
तिसम्पुष्ट्यजम् ॥ स्येतिषोन्तकर्म
णीत्यस्यलोण्मध्यमैकवचनम् ॥

अन्तकालः । पुं । मरणसमये । समस्त-
करणग्रामवैयर्थ्यवति ॥ अन्तश्चासौ-
कालश्च ॥

अन्तगः । त्रि । अन्तगामिनि । पारगे ॥
अन्तंगच्छतीतिविग्रहे अन्तात्यन्ते-
त्यादिनागमे डं प्रत्ययः ॥

अन्तगतः । त्रि । अवसानंप्राप्ते ॥ अन्ते-
गतः ॥

अन्ततः । अ । सम्भावनायाम् । अवयवे । पञ्चम्यर्थे । शासने । इति हेमचन्द्रः । अन्तं इत्यर्थे आद्यादित्वात्तसिः ।

अन्तपालः । पुं । बाह्यरक्षके ।

अन्तः । अ । मध्ये । प्रान्ते । अभ्युपगमे । चित्ते । असति । असमग्रत्वादिषु । अमेस्तुट्चेष्यरन् । तस्यतुडागमः । रेफादकारउच्चारणार्थः ।

अन्तरम् । न । अवकाशे । यथा अन्तरं देहि । अवधौ । यथा मासान्तरे देयम् । परिधानांशुके । यथा अन्तरे शाटकाःपरिधानीया इत्यर्थः । अन्तर्द्धौ । यथा पर्वतान्तरं गताः स्त्रियः । भेदे । परस्परवैलक्षण्ये । विशेषे । यथा । अन्तरज्ञो भव सदा धनस्य च जनस्य च । विशेषज्ञ इत्यर्थः । तादर्थ्ये । ओदनान्तरस्तण्डुलः । ओदनार्थइत्यर्थः । छिद्रे । यथा । अन्तरं लब्ध्वाऽरैःप्रहृतम् । आत्मीये । अयमोऽभ्यन्तरोमम । विनार्थे । यथा । अन्तरेण पुरुषकारंनकिञ्चित्सिध्यति । बहिरर्थे । यथा । अन्तरे चाण्डालगृहः । बाह्यइत्यर्थः । अवसरे । यथा । अन्तरज्ञोहि सेवकः । मध्ये । यथा । आवयोरन्तरे जाताःपर्वताःसरितोद्रुमाः । आत्मनि । यथा । प्रमान्तरंवेद । अन्तरात्मानं जानातीत्यर्थः । सदृशे । यथा । हकारः स्वकारोन्तरतमः । अन्तरंददाति । रादाने । आतोनुपेतिकः ।

अन्तरङ्गः । त्रि । आत्मीये । अन्तःअङ्गानियस्य ।

अन्तरज्ञः । त्रि । नीचानीचादिविशेषाभिज्ञे ।

अन्तरप्रभवः । त्रि । सङ्कीर्णजातौ । अनुलोम प्रतिलोमजाते ।

अन्तरा । अ । निकटार्थे । मध्यार्थे । विनार्थे । अन्तरेति । इण्गतौ । डाप्रत्ययः ।

अन्तरात्मा । पुं । अन्तःकरणे । अन्तःअभ्यन्तरे आत्मा । सर्वान्तरे परमात्मनि ब्रह्मलोकमव्याप्य । यथा । न कर्मणाकनीयस्मा हृद्धिर्वानान्तरात्मनः । इतिवाकुमिवोद्धृत्य वेदान्तेषुघोषणाकृतेति ।

अन्तरापत्या । स्त्री । गर्भिण्याम् । अन्तरे अपत्यंयस्याः ।

अन्तरायः । पुं । विघ्ने । अन्तरायश्चदर्शितोयोगसूत्रेणयोगे । व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्त्वाऽनवस्थितत्त्वानीति- । चित्तविक्षेपे । अन्तर्मध्ये अन्तरस्य व्यवधानस्यवा अयनम अयगतौ । इगतौवा । घञऽच्वा । यागे ।

अन्तरारामः । त्रि । त्यक्तसर्वपरिग्रहत्वे

नवांशसुखसाधनशून्ये। अन्तःआरा मोयस्य ॥

अन्तरालम्। न। मध्ये। अभ्यन्तरे। अन्तरंलाति। आतोनुपेतिकः। अ न्येषामपीतिदीर्घः ॥। आङ्प्रश्लेषो वा। मूलविभुजादित्वात्कः ॥

अन्तरालकम्। न। अभ्यन्तरे ॥

अन्तरिक्षम्। न। अम्बरे ॥ पतत्रिमेघ संचार प्रदेशे ॥ भूलोकसूर्य्यमध्यव र्त्तिनि ॥ द्यावापृथिव्योरन्तरीक्ष्यते। ईक्षदर्शने। कर्मणिघञ्। वेदेछांद- संहस्वत्वम् ॥ अन्तर्ऋक्षाणिनक्षत्रा ण्यस्य पृषोदरादित्वादित्वंवा ॥

अन्तरिक्षचित्। पुं। वायौ। अन्तरिक्षे चयतिवसति। क्षि०। क्विप्। तुक्॥

अन्तरितम्। त्रि। तिरस्कृते। अपवर्जिते। व्यवकलिताङ्के। ग्रस्यवाकीइतिभाषा ॥

अन्तरिन्द्रियम्। न। अन्तःकरणे ॥ अन्तः अभ्यन्तरे इन्द्रियम् ॥

अन्तरीक्षम्। न। नभसि। पतत्रिमेघ संचारप्रदेशे ॥ द्यावापृथिव्योरन्तरी- क्ष्यते। ईक्षदर्शनांकनयोः। कर्मणि घञ्। अन्तरीक्ष्यतेजगदस्मिन्निति- अधिकरणव्युत्पत्तिस्तुनेचिता। ल्युटा घञोबाधप्रसङ्गात् ॥ अभ्रकधातौ ॥

अन्तरीक्षजलम्। न। आकाशजले। दिव्योदके ॥

अन्तरीपः। पुं। न। द्वीपे ॥ अन्तर्गता- आपोऽत्र। ऋक्पूरित्यः समासान्तः। द्व्यन्तरुपसर्गेभ्य इत्यपईदादेशः ॥

अन्तरीयम्। न। अधोंशुके। परिधान वस्त्रे ॥ अन्तरेभवम्। गहादित्वाच्छः ॥ नाभौधृतञ्चयद्वस्त्रमाच्छादयतिजा नुनी। अन्तरीयंप्रशस्तंतदच्छिन्नमुभ योस्तयोः ॥

अन्तरे। ा। मध्ये ॥ अन्तरेति। इणगतौ। विच् ॥

अन्तरेण। ा। विनार्थे ॥ मध्यार्थे ॥ अ- न्तरेति। इणोणः ॥

अन्तर्गडुः। त्रि। निरर्थके। रद्दीशब्द इति भाषायाम् ॥

अन्तर्गतम्। त्रि। मध्यप्राप्ते ॥ विस्मृ- ते ॥ अन्तर्गम्यतेस्म अन्तर्गच्छतिस्म वा। गम्लृगतौक्तः ॥

अन्तर्गृहम्। न। गृहमध्ये ॥

अन्तर्घनः। पुं। वाहीकग्रामविशेषे। ह न०। अन्तर्घनोदेशइतिहन्तेर्घनादे- शोऽप्प्रत्ययश्चनिपातनात् ॥

अन्तर्जठरम्। न। कोष्ठे। कुक्षिमध्ये ॥

अन्तर्जलम्। न। अन्तर्जलसाध्येऽघमर्ष णजपादौ ॥

अन्तर्ज्योतिः। न। अन्तरात्मनि ॥

अन्तर्द्धनम्। न। मद्यबीजे। किण्व ॥

इतिशब्दचन्द्रिका ॥

अन्तर्दाहः । पुं । कोष्ठसन्तापे । शरीराभ्यन्तरज्वालायाम् ॥

अन्तर्द्धा । स्त्री । अन्तर्द्धाने । व्यवधायाम् । अन्तर्द्धानम् । डुधाञ् । अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वाद्दात-श्चोपसर्गइत्यङ् ॥

अन्तर्द्धानम् । न । अन्तर्द्धा । तिरोधाने । शरीरत्यागे ॥

अन्तर्द्धिः । पुं । पिधाने । व्यवधाने ॥ अन्तर्द्धानम् । अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वादुपसर्गेघोः किरितिकिप्रत्ययः ॥

अन्तर्द्वारम् । न । गृहाभ्यन्तर्गूढद्वारे । प्रच्छन्ने ॥ अन्तःस्थितंद्वारम् । शाकपार्थिवादिः ॥ खिड्कीतिख्याते ॥ यथा । प्रच्छन्नमन्तर्द्वारंस्यात्पक्षद्वारंतदुच्यत इतिशबरस्वामी ॥

अन्तर्भूतः । त्रि । मध्यस्थिते । अन्तर्गते ॥

अन्तर्मनाः । त्रि । व्याकुलचेतसि । दुःखितमनसि । दुर्मनसि । विमनसि ॥ अन्तर्मनोऽस्य ॥

अन्तर्यामी । पुं । वायौ ॥ यथा । अन्तःप्रविश्यभूतानियोबिभर्त्यात्मकेतुभिः । अन्तर्यामीश्वरः साक्षात्पातुनोयद्वशेस्फुटमिति ॥ केतुभिः प्राणादिवृत्तिभिः ॥ ईश्वरे । प्रत्यक्तमे । अन्तरनुप्रविश्यसर्वेषांभूतानांनियन्तरि ॥ सूत्रादप्यान्तरंतत्त्वमन्तर्याम्याख्यमुच्यते ॥ त्रि । अन्तर्गे । मनोगते ॥

अन्तर्वंशिकः । पुं । अन्तःपुराधिकृते । कुब्जवामनादिजने ॥ अन्तरभ्यन्तरोवंशोगृहम् । अन्तर्वंशेनियुक्तः । तत्रनियुक्तइतिठक् । संज्ञापूर्वकत्वान्नवृद्धिः ॥ यद्वा अन्तर्वंशोऽस्यास्ति अतइतिठनावितिठन् ॥

अन्तर्वत्नी । स्त्री । गर्भिण्याम् । अन्तरस्त्यस्यांगर्भइतिविग्रहे अन्तःशब्दस्याधिकरणप्रधानत्वेन प्रथमासमर्थत्वाभावा दस्तिनासामानाधिकरण्याऽसम्भवाद्प्राप्तोमतुप् अन्तर्वत्पतिवतोर्नुगित्यनेननिपात्यते नुगागमश्चविधीयते ततश्चऋन्नेभ्य इतिङीप् ॥

अन्तर्वमिः । पुं । अजीर्णे । अपाके ॥ इतित्रिकाण्डशेषः ॥

अन्तर्वाणि । त्रि । शास्त्रज्ञे ॥ अन्तर्वाणस्य । समासान्तविधेरनित्यत्वान्नऋतश्चेतिनकप् । गोस्त्रियोरितिह्रस्वः ॥ यद्वा । अन्तर्वाणयति । वणशब्दे । स्वार्थेणिजन्तादचइः ॥

अन्तर्विगाहः । पुं । प्रवेशे ॥

अन्तर्विगाहनम् । न । प्रवेशने ॥

अन्तर्वेदी । स्त्री । नीवृदन्तरे । शशस्थल्याम् । हरिद्वाराद्दारभ्य प्रयागपर्य

न्तरेऽस्ते । इतिविकासङ्भेषः ॥

अन्तर्हासः । पुं । उपहासे । गूढहास्ये ॥ हि । तद्वति ॥

अन्तर्हितम् । त्रि । संवीते । तिरोभूते ॥ अन्तर्धीयते स्म । डुधाञ्० । क्तः । दधातेर्हिः ॥

अन्तवत् । त्रि । विनाशिनि ॥ अन्तोऽस्तिअस्य । मतुप् ॥

अन्तर्वह्निः । पुं । कालानले ॥

अन्तेवासी । पुं । शिष्ये ॥ अन्ते समीपे वस्तुं शीलमस्य । सुपीतिणिनिः ॥

अन्तशय्या । स्त्री । मृतौ ॥ भूमिशय्यायाम् ॥ पितृकानने ॥ अन्ते शय्या ॥

अन्तसद् । पुं । अन्तेवासिनि ॥ अन्ते अन्तिके सीदति । षद्लृ० । सत्सूद्विषेति क्विप् ॥

अन्तस्था । स्त्री । पुं । यरलवेषु ॥ अन्तःस्पर्शोष्मणोर्मध्ये तिष्ठति । ष्ठा० । सुपिस्थ इतिकः । टाप् । खर्परेशरिवेतिविसर्गलोपः ॥

अन्तस्थीयः । त्रि । अन्तस्थेषुभवे । गहादिभ्यश्छः ॥

अन्तावसायी । पुं । श्वपचे ॥ मुनिभेदे ॥ नापिते ॥ मध्याना मन्तमवसातुं शीलमस्य । षोन्तकर्मणि वेषयेवा । सुपीतिणिनिः । आतोयुक् ॥

अन्ति । । समीपे ॥ यथा । मुग्धममीतद्दुपेयतुरन्तिमात्रोरितिभागवतम् ॥

अन्तिः । स्त्री । नाट्योक्त्या ज्येष्ठभगिन्याम् ॥

अन्तिकम् । त्रि । निकटे ॥ अन्तोऽस्यास्ति । अतइनिठनाविति ठन् ॥ अन्तयतेर्वा । अतिवन्धने । ण्वुल् । वा ॥ न । सामीप्ये इतिधरणिः ॥

अन्तिकतमः । त्रि । अत्यासन्ने । नेदिष्ठे ॥ अतिशयेनान्तिकम् । अतिशायने तमबिष्ठनाविति तमप् ॥

अन्तिका । स्त्री । शातलाौषधौ ॥ चुल्ल्याम् ॥ नाट्योक्त्याज्येष्ठभगिन्याम् ॥ अन्तोऽस्यास्ति । ठन् । अन्तयतेर्वा । अतिवन्धने । ण्वुल् ॥ प्रत्ययस्थादितीत्वम् ॥ समीपवर्त्तिन्याम् ॥

अन्तिकाश्रयः । पुं । समीपस्थावलम्बने । उपघ्ने ॥ अन्तिकेआश्रीयते आश्रयणं वा । एरच् ॥

अन्तिमः । त्रि । चरमे । अन्तभवे । परस्मिन् । अन्तभवः । अन्तादितिडिमच् ॥

अन्तेवासी । पुं । शिष्ये ॥ अन्तेसमीपे वस्तुं शीलमस्य । सुपीतिणिनिः । अयवासेष्वलुक् ॥ चण्डाले ॥ ग्रामादेरन्तेवसति ॥ प्रान्तगे ॥

अन्त्यः । पुं । चण्डाले ॥ मुस्तायाम् ॥ त्रि । अधमे ॥ अन्तभवे । चरमस्थे ॥

न । रेवतीनक्षत्रे । मीनराशौ ॥ दशजलधिसंख्यायाम् । सहस्रलक्षकोटौ १००००००००००००००० । अन्ते भवः । दिगादित्वाद्यत् ॥ द्वादशस्वपि ।

अन्त्यज: । पुं । स्त्री । शूद्रे । नीचजातौ । यथा । रजकश्चर्मकारश्च नटो वरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृता इति यमः ।

अन्त्यजन्मा । पुं । स्त्री । शूद्रे ।

अन्त्यजाति: । पुं । चण्डालादिसप्तसु । यथापस्तम्ब: । अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि । सम्यग्ज्ञात्वा तु कालेन कुर्यात्तत्र विशोधनम् । चान्द्रायणं पराको वा द्विजातीनां विशोधनम् । प्राजापत्यञ्च शूद्राणां तथा संसर्गदूषणे ॥ यैस्तत्र भुक्तं पक्वान्नं कृच्छ्रं तेषां विनिर्द्दिशेत् । तेषामपि च यैर्भुक्तं तेषामर्द्धं विधीयते । तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयत इति प्रायश्चित्ततत्त्वम् ।

अन्त्यभम् । न । मीनराशौ । रेवतीनक्षत्रे ॥

अन्त्यवर्ण: । पुं । स्त्री । शूद्रे । अन्त्यश्चासौ वर्णश्च । पुं । अन्तिमाक्षरे ॥

अन्त्यावसायी । पुं । स्त्री । चण्डालेन निषाद्यां जनिते । यथा । निषादस्त्री

तु चण्डालात्पुत्रमन्त्यावसायिनम् । श्मशानगोचरं सूते बाह्यानामपि गर्हितम् । इति मनु: ॥ चण्डालादिसप्तजातिषु । यथा । चण्डाल: श्वपच: क्षत्ता सूतो वैदेहकस्तथा । मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिन: । इत्यङ्गिरा: ।

अन्त्येष्टि: । स्त्री । शवदाहादिक्रियारूपे चरमसंस्कारे । अन्त्या चासाविष्टिश्च ।

अन्त्रम् । न । पुरीतति । अमति अनेन वा । अम गतौ । सर्वधातुभ्य: ष्ट्रन् । यद्वा । अमिचिमिदिशसिभ्य: क्त: । संज्ञापूर्वकत्वाद्दीर्घानुनासिकलोपौ ॥ अन्त्रति वा । अत्रि बन्धने । ष्ट्रन् । उक्ता: सार्द्धास्त्रयो व्यामा: पुंसामन्त्राणि सूरिभि: । अर्द्धव्यामेन हीनानि योषितोऽन्त्राणि निर्द्दिशेदिति वैद्या: ।

अन्त्रवृद्धि: । स्त्री । पुं । रोगविशेषे ।

अन्त्रमांसम् । न । आम्लिके । यथा । आम्लिकं छिन्नमार्गेषु धौतं निर्मलवारिणा । तस्य खण्डान् संविधाय वेसवारयुतान् पचेत् । नि:सारं विरसोद्गारमन्त्रमांसमुदाहृतमिति ।

अन्दुक: । पुं । हस्तिनिगडे । पादकटके । अन्द्यतेऽनेन । अदि बन्धने । अन्दूदृम्भूजम्बूति कू: । स्वार्थे क: । स्वा

यिका: प्रकृतितोऽविकृतवचनान्यपि-
वर्त्तन्तेऽपीति पुंस्त्वम् । यद्वा निनयादि
त्वाट्टक् । इसुसुक्तान्तात्कः । केऽणेति
ह्रस्वः । इकोह्रस्वोऽङ्योगालवस्येतिवा
। यद्वा । अन्धशब्दात् संज्ञायांकन् ।
केणइतिह्रस्वः ।

अन्दूः । स्त्री । निगडे । स्त्रीपादभूषणे ।
अनद्यतेऽनेन । अदिबन्धने । अन्दृह
म्भितिकूः ।

अन्धः । पुं । न । तिमिरे । अदर्शनात्म
काज्ञाने । त्रि । अदृशि । चक्षुर्हीने ।
पुं । भिक्षौ । यथा । तिष्ठतो व्रजतो
वापियस्यचक्षुर्नदूरगम् । चतुर्युगांभु
वंमुक्त्वापरिव्राट्सोऽन्धउच्यतेइति ॥
राशिविशेषे । यथा । मेषोवृषोमृगे
न्द्रश्चदिवान्धाःपरिकीर्त्तिताः । नृयु
क्कर्कटकन्याश्चरात्रावन्धाःप्रकीर्त्तिताः
इति । अन्धयति । अन्धदृष्ट्युपघा-
ते । पचाद्यच् ।

अन्धकः । पुं । दैत्यविशेषे । देशभेदे ॥
नृपान्तरे । मुनिविशेषे । यादवप्र
भेदेषु । हिरण्याक्षसुते ।

अन्धकरिपुः । पुं । शिवे ॥ अन्धक
स्य दैत्यस्यरिपुः ॥ श्लेषकाव्याद्यावन्ध
कारनाशकत्वात् । सूर्ये । चन्द्रमसि ।
अग्नौच ।

अन्धकवर्त्तः । पुं । पर्वतान्तरे ॥

अन्धकान्तकः । पुं । शिवे ॥ अन्धकस्य
अन्तकः ।

अन्धकारः । पुं । न । तेजस्सामान्याभा
वे । ध्वान्ते ॥ महाप्रभाश्चावच्छिन्ना
भावो ऽन्धकारइतिसामान्यलक्षणा
यांजगदीशः । भयहष्टितेजोऽवरोध
कारित्वं नित्यत्वं सर्वत्राधिकरणत्वञ्च
त्यस्यगुणाइतिराजवल्लभः । मिथ्या
प्रत्ययलक्षणे स्वविषयावरणे तदुपा
दानाज्ञाने । अन्धदृष्ट्युपघाते । चु
रादिः । अन्धनम् । घञ् । अन्धंकरो
ति कर्मण्यण् ॥

अन्धकारिः । पुं । हरे । शिवे । अन्धक
स्यअरिः ।

अन्धकासुहृत् । पुं । ईश्वरे । शिवे । अ
न्धकासुरम् हरति । क्विप् ।

अन्धकूपः । पुं । कर्कराम्बुके । सान्धका
रकूपे । मोहे । नरकविशेषे । अंध
स्यासौ कूपश्च ॥

अन्धतमसम् । न । गाढान्धकारे । अ
न्धयति । अन्धदृष्ट्युपघाते चुरादिः
। अच् । अंधश्चतत्तमश्च । अवसमन्धेभ्य
स्तमसइत्यच् ॥

अन्धतामिस्रः । पुं । अभिनिवेशे । स
चाष्टादशविधः । तथाहि । देवाः
खल्वणिमादिकमष्टविधमैश्वर्यमासा
द्यदशशब्दादीन् भुञ्जानाःशब्दादये।

मोत्वात्तदुपायाभ्यासाभिमादयोऽस्मा कमसुरादिर्मोपघातिषतेतिबिभ्यति तदिदंभयमभिनिवेशोऽन्धतामिस्रो- छादशविषयत्वादष्टादशधेतिसा- ख्याः। न। निबिडान्धकारमये नरक विशेषे ॥ पञ्चप्रकाराज्ञानान्तर्गता ज्ञानविशेषे। सचविशेषोयथा। देह नाशे अहमेवमृतोऽस्मीतिबुद्धिः॥

अन्धमूषिका। स्त्री। देवताडे।

अन्धवर्त्मा। पुं। वायोःसप्तमेस्कन्धे। यथा। महर्द्दिन्द्रःसरभसःसामश्योमा नुषीतिपाः। देवीविशोऽन्धवर्त्माचस्क न्धःसप्तमआभुवादिति ७।

अन्धः। न। ओदने। अद्यते। अदभ क्षणे। अदेर्नुम् धौचेत्यसुन्। अन्ध यतिवा अन्धदृष्ट्युपघाते। असुन्।

अन्धातमसम्। न। अत्यन्धे। महा न्धकारे। अन्धञ्च तत्तमश्च। अव समन्धेभ्यस्तमस इत्यच्। अन्येषाम पीतिदीर्घः।

अन्धाहिः। पुं। कुंचियाइतिगौडप्रसि द्धे मीनभेदे। इतित्रिकाण्डशेषः॥

अन्धिका। स्त्री। द्यूतभेदे। रजन्या म्। सर्षप्याम्। सिद्धार्थौषधौ। स्त्रीविशेषे। चक्षुषोरोगविशेषे॥

अन्धुः। पुं। कूपे। अम्यते। अमग त्यादौ। अर्जिदृशिकम्यमीति कु

धुंक्च। यद्वा। अन्धयति। अन्धदृ- ष्ट्युपघाते। मृगय्वादित्वात्कुः।

अन्धुलः। पुं। शिरीषद्रौ।

अन्ध्रः। पुं। वैदेहेन कारावस्त्रियामुत्पादिते अन्त्यजविशेषे। देशविशे षे॥ यथा। जगन्नाथादूर्द्ध्वभागमर्वाक् श्रीभ्रमरात्मिकात्। तावदन्ध्राभि धोदेशः प्रोक्तःश्रीशक्तिसङ्गमे।

अन्नम्। न। भक्ते। ओदने। स्विन्नतण्डु ले। यथा। सस्यंक्षेत्रगतंप्राहुःसतुषं धान्यमुच्यते। आमंवितुषमित्युक्तं स्विन्नमन्नमुदाहृतमिति वसिष्ठः। व्रीहियवादौ॥ भक्ष्यभोज्यलेह्यचो ष्यभेदाच्चतुर्विधमन्नंभवति॥ पृथि- व्याम्। उपकरणे। औपचारिकम र्थंगृहीत्वा दृष्टश्चोपकरणेऽन्नशब्दः। यथा स्त्रियोऽन्नम् पशवोऽन्नम् विशो ऽन्नं राज्ञामित्यादौ। त्रि। भुक्ते। अनिति। अन्यन्तेनेनवा। अनप्राणने। कॄगॄजसिद्रुपन्यनिस्वपिभ्योनिदितिन न्॥ यद्वा। अद्यतेस्म। अदभक्षणे। क्तः। अन्नाद्य इतिनिपातनात्बहु लंतणीतिवा न जग्धिः। यद्वा। अत ति। अत०। धापवस्यज्यतिभ्योनइ तिनः।

अन्नकोष्ठकः। पुं। तण्डुलादिरक्षण स्थाने॥ गोलाइतिकाभ्यांयस्यप्रसि

र्थिका: प्रकृतितो लिङ्गवचनान्यति-वर्त्तन्तेऽपीति पुंस्त्वम् । यद्वा निमयादिभ्याट्टक् । इसुसुक्तान्तात्कः । केऽणेति ह्रस्वः । इकोह्रस्वोऽङ्योगालवस्येतिवा । यद्वा । अन्धूशब्दात् संज्ञायांकन् । केऽणइतिह्रस्वः ।

अन्धूः । स्त्री । निगडे । स्त्रीपादभूषणे । अन्ध्यतेऽनेन । अदिबन्धने । अन्धूदृन्भ्वितिकूः ।

अन्धः । पुं । न । तिमिरे । अदर्शनात्मकाज्ञाने । त्रि । अदृशि । चक्षुर्हीने । पुं । भिक्षौ । यथा । तिष्ठतो व्रजतो वापियस्यचक्षुर्नदूरगम् । चतुर्युगांभुवंभिक्षापरिव्राट्सोऽन्धउच्यतेइति ॥ राशिविशेषे । यथा । मेषोवृषोमृगेन्द्रश्चदिवान्धाःपरिकीर्त्तिताः । मिथुनकर्कटकन्याश्चरात्रावन्धाःप्रकीर्त्तिताः इति । अन्धयति । अन्धदृष्ट्युपघाते । पचाद्यच् ।

अन्धकः । पुं । दैत्यविशेषे । देशभेदे ॥ नृपान्तरे । मुनिविशेषे । यादवप्रभेदेषु । हिरण्याक्षसुते ।

अन्धकरिपुः । पुं । शिवे ॥ अन्धकस्य दैत्यस्यरिपुः ॥ श्लेषकाव्यादावन्धकारनाशकत्वात् । सूर्ये । चन्द्रमसि । अग्नौच ।

अन्धकवर्त्तः । पुं । पर्वतान्तरे ॥

अन्धकान्तकः । पुं । शिवे ॥ अन्धकस्यान्तकः ।

अन्धकारः । पुं । न । तेजसामभावे । ध्वान्ते ॥ महाप्रभाभावावच्छिन्नाभावो ऽन्धकारइतिसामान्यलक्षणायांजगदीशः । भयदृष्टितेजोऽवरोधकारित्वं तिक्तत्वं सर्वव्याधिकरत्वञ्चेत्यस्यगुणाइतिराजवल्लभः । मिथ्याप्रत्ययलक्षणे स्वविषयावरणे तदुपादानाज्ञाने । अन्धदृष्ट्युपघाते । चुरादिः । अन्धनम् । घञ् । अन्धंकरोति कर्मण्यण् ।

अन्धकारिः । पुं । हरे । शिवे । अन्धकस्यारिः ।

अन्धकासुहृत् । पुं । ईश्वरे । शिवे । अन्धकासून् हरति । क्विप् ।

अन्धकूपः । पुं । कर्कराम्बुके । सान्धकारकूपे । मोहे । नरकविशेषे । अंधस्यासौ कूपश्च ॥

अन्धतमसम् । न । गाढान्धकारे । अन्धयति । अन्धदृष्ट्युपघाते चुरादिः । अच् । अंधश्चतत्तमश्च । अवसमन्धेभ्यस्तमसइत्यच् ॥

अन्धतामिस्रः । पुं । अभिनिवेशे । स चाष्टादशविधः । तथाहि । देवाःखल्वणिमादिकमष्टविधमैश्वर्यमासाऽद्यशब्दादीन् भुञ्जानाःशब्दादयो

मोग्वात्तदुपायाभ्वाभिमाहोऽस्मा
कमसुरादिर्मोपघातिषतेतिविभ्यति
तदिदंभयमभिनिवेशोऽन्धतामिस्रो-
ऽहादशविषयत्वादष्टादशधेतिसां-
ख्याः॥ न। निबिडान्धकारमये नरक
विशेषे ॥ पञ्चप्रकाराणामान्तर्गता
ज्ञानविशेषे। सचविशेषोयथा। देह
नाशे अहमेवमृतोऽस्मीतिबुद्धिः॥

अन्धमूषिका। स्त्री। देवताडे।

अन्धवर्मा। पुं। वायोःसप्तमेस्कन्धे।
यथा। मरुदिन्द्रःसरभसःसामक्षोमा
नुषीतिपाः। देवीविशोऽन्धवर्मा चस्क
न्धः सप्तमआभुवादिति ७॥

अन्धः। न। ओदने। अद्यते। अदभ
क्षणे। अदेर्नुम् धौचेत्यसुन्॥ अन्ध
यतिवा अन्धदृष्ट्युपघाते। असुन्॥

अन्धातमसम्। न। अत्यन्धे। महा
न्धकारे। अन्धञ्च तत्तमश्च। अव
समन्धेभ्यस्तमस इत्यच्। अन्येषाम
पीतिदीर्घः।

अन्धाहिः। पुं। कुंचियाइतिगौडप्रसि
द्धे मीनभेदे। इतित्रिकाण्डशेषः॥

अन्धिका। स्त्री। द्यूतभेदे। रजन्या
म्। सर्षप्याम्। सिद्धार्थौषधौ।
स्त्रीविशेषे। चक्षुषोरोग विशेषे॥

अन्धुः। पुं। कूपे। अम्यते। अमग
त्यादौ। अर्जिदृशिकम्यमीति कु

धुंकच। यद्वा। अन्धयति। अन्धदृ-
ष्ट्युपघाते। मृगय्वादित्वात्कुः॥

अन्धुलः। पुं। शिरीषद्रौ।

अन्ध्रः। पुं। वैदेहेन कारावस्यस्त्रिया
मुत्पादिते अन्त्यजविशेषे। देशविशे
षे॥ यथा। जगन्नाथादूर्द्ध्वभागमर्वाक्
श्रीभ्रमरात्मिकात्। तावदन्ध्राभि
धोदेशः प्रोक्तःश्रीशक्तिसङ्गमे।

अन्नम्। न। भक्ते। ओदने। स्विन्नतण्डु
ले। यथा। सस्यंक्षेत्रगतंप्राहुःसतुषं
धान्यमुच्यते। आमंवितुषमित्युक्तं
स्विन्नमन्नमुदाहृतमिति वसिष्ठः।
ब्रीहियवादौ॥ भक्ष्यभोज्यलेह्यचो
ष्यभेदाच्चतुर्विधमन्नंभवति॥ पृथि-
व्याम्। उपकरणे॥ औपचारिकम
र्थंगृहीत्वा दृष्टश्चोपकरणेऽन्नशब्दः
। यथा स्त्रियोऽन्नम् पशवोऽन्नम् विशो
ऽन्नं राज्ञामित्यादौ॥ त्रि। भुक्ते।
अनिति। अन्यन्तेनेनवा। अन प्राणने।
कृवृजृसिद्रुपन्यनिस्वपिभ्योनित्इतिन
न्॥ यद्वा। अद्यतेस्म। अदभक्षणे।
क्तः। अन्नाण्ण इतिनिपातनात्बहु
लंतणीतिवा न जग्धिः॥ यद्वा। अत
ति। अत०। धापवस्यज्यतिभ्योनइ
तिनः।

अन्नकोष्ठकः। पुं। तण्डुलादिरक्षण
स्थाने॥ गोलाइतिकाश्यांयस्यप्रसि

द्धिः । इति हेमचन्द्रः ।

अन्नगन्धिः । पुं । अतिसारे । उदराम यरोगे । इति त्रिकाण्डशेषः । अन्न स्य गन्ध इव गन्धोऽस्य । उपमानाच्चे तीत्वम् ।

अन्नदः । त्रि । अन्नदातरि ॥

अन्नदा । स्त्री । अन्नपूर्णायांदेव्याम् ।

अन्नदाता । पुं । प्रभौ । अन्नस्यदातरि ।

अन्नपूर्णा । स्त्री । स्वनामाऽतिप्रसिद्धा यांदेव्याम् ।

अन्नपूर्णास्थानम् । न । काश्यामतिसिद्धे सिद्धिस्थाने ।

अन्नप्राशनम् । न । अन्नाशने । यथावि धिवालकस्य प्रथमान्नभोजने । षष्ठे अष्टमे वा मासि बालकस्य पञ्चमे स प्तमे वामासि बालिकायाः प्रथमान्न भक्षणरूपसंस्कार इतिस्मार्त्ताः । अन्न स्यप्राशनम् यस्मिन्तत ।

अन्नमयः । पुं । स्थूलशरीरे । प्रथमकोशे । यथा । पितृभुक्तान्नजादीर्याज्जातो ऽन्नेनैववर्द्धते । देहःसोऽन्नमयोनात्मा प्राक्कोर्द्ध्वं तदभावतइति ॥ अन्नस्यवि कारःमयट । यद्वा । प्रकृतमन्नम् । अन्नं प्रकृतमुच्यतेऽस्मिन वा । तत्प्रकृतव चनेमयट ॥ स्थूलसमष्ट्याम् । पञ्ची कृतपञ्चमहाभूततत्कार्यात्मके विरा डमूर्त्तौ ।

अन्नविकारः । पुं । रेतसि । शुक्रे । इति राजनिर्घण्टः ।

अन्नाद्यः । त्रि । अन्नस्यभोक्तरि ॥ अन्न मत्तीतिविग्रहेकर्मण्यण् । दीप्ता ग्नौ । आमयाविस्वरहिते । पुं । विष्णौ ।

अन्नाशनम् । न । अन्नप्राशने ॥

अन्यः । त्रि । असदृशे । इतरस्मिन् । भिन्ने । अत्यन्तविलक्षणे । सदृशे । अनिति । अनप्राणने । अघ्न्यादि त्वाद्यः ॥

अन्यत । । अन्यार्थे ।

अन्यतमः । त्रि । भिन्नतमे । बहूनां मध्येनिर्द्धारिते कस्मिन् । न्यायमते अनेकभेदावच्छिन्नप्रतियोगिताक-भेदे । अव्युत्पन्नोयम ।

अन्यतरः । त्रि । निर्द्धार्ये । द्वयोर्मध्ये निर्द्धारितेकस्मिन् । निर्द्धारणेडतर च ॥ न्यायमते द्वयावच्छिन्नप्रतियो गिताकभेदे । भिन्नार्थके । अन्यएव । अल्पाचतरमितिबलवार्थेतरप् । अ न्यतरान्यतमशब्दावव्युत्पन्नौ स्वभा वाद्विबहुविषयेनिर्द्धारणे वर्त्तेते इ-तिकैयटः । किंयत्तदभ्योऽन्यत्र डत राभावादिति विवरणम् ।

अन्यतरेद्युः । । अन्यतरदिवसे । अ न्यतरस्मिन्नहनि । सद्यः परुदित्या

हिंसान्यतरवाच्यादेशसप्रत्ययेनानि-पातितः ॥

अन्यतः । ।। अन्यत्रार्थे ॥ अन्यस्मात् । तसिल् ॥

अन्यतरस्यआयी । त्रि । सपत्नआयशीले ॥

अन्यत्र । ।। व्यतिरेके ॥ अन्यस्मिन् । त्रल् ॥ विनार्थे ॥ यथा । अन्यत्रनिध मातपस्तुः पत्नीकेश्याप्रवापयेत् इति ॥ स्थानान्तरे ॥

अन्यथा । ।। वितथे ॥ अपरार्थे ॥ दुष्टे ॥ अन्येनप्रकारेण । प्रकारवचनेथाल् ॥

अन्यथासिद्धिः । स्त्री । कार्य्याव्यवहित पूर्ववर्त्तित्वेसतिकार्यानुत्पादकत्वे ॥ सापञ्चविधा । यथा यत्कार्य्यम्प्रति कारणस्यपूर्ववर्त्तिता येनरूपेण गृह्यते तत्कार्यम्प्रति तद्रूप अन्यथा सिद्धम् । यथा घटं प्रति दण्डत्वम् ॥ १ ॥ यस्यस्वातन्त्र्येण अन्वयव्यतिरेकौ नस्तः किंतु कारणमादायान्वय व्यतिरेकौ तदन्यथासिद्धम् । यथा घटं प्रतिदण्डरूपम् ॥ २ ॥ अन्यम्प्रतिपूर्ववर्त्तितां गृहीत्वैवयस्य यत्कार्य्यंप्रति पूर्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यंप्रति अन्यथासिद्धत्वम् । यथा-घटादिकं प्रतिआकाशस्य ॥ ३ ॥ यत्कार्य्यजनकं प्रति पूर्ववर्त्तित्वंगृहीत्वैव यस्य यत् कार्य्यं प्रति पूर्ववर्त्तित्वं गृह्यते तस्य तत्कार्य्यंप्रति अन्यथा सिद्धत्वम् । यथा कुलालपितुर्घटम्प्रति ॥ ४ ॥ अवश्यक्लृप्तनियतपूर्ववर्त्तिनएव कार्य्यसम्भवे तद्भिन्नमन्यथा सिद्धम् । यथा घटम्प्रति रासभादिरितिसिद्धान्तमुक्तावली ॥ ५ ॥ यस्य कारणत्वकल्पनांविनाप्यन्यप्रकारेण-कार्यसिद्धिर्भवेत् सोऽन्यथा सिद्धः तद्धर्मोन्यथासिद्धिः ॥

अन्यदा । ।। कालान्तरे ॥ अन्यस्मिन्काले ॥ सर्वैकान्यकिंयत्तदः कालेदा ॥

अन्यपूर्वा । स्त्री । पौनर्भवायां कन्यायाम् । एकस्मैवाग्दानादत्तायांपुनरन्येनविवाहितायां कुमार्याम् ॥ सा-सप्तधा । यथा । सप्तपौनर्भवाःकन्यावर्ज्जनीयाः कुलाधमाः । वाचादत्ता मनोदत्ता कृतकौतुकमङ्गला ॥ उदकस्पर्शिता याच याचपाणिगृहीतिका । अग्निंपरिगतायातुपुनर्भूप्रसवाचया ॥ इत्येताः कश्यपेनोक्ता दहन्तिकुलमग्निवत् । इत्युद्वाहतत्वम् ॥

अन्यभृत् । पुं । काके ॥ इतिहेमचन्द्रः ॥ त्रि । परेषांपोषके ॥ अन्यंबिभर्त्ति । डुभृञ् । क्विप् ॥

अन्यभृतः । पुं । कोकिले ॥ अन्येनभृतः ॥ इतिहलायुध ॥

अन्यवर्द्धितः । त्रि । अन्येन प्रति पालिते ॥

। अन्यपुष्टे । पुं । कोकिले । अन्येन वर्द्धितः ।

अन्यवादी । त्रि । अन्यथावादिनि । अस्थिरवादिनि । व्यवहारे पञ्चविधहीनमध्यमान्तर्गतहीनविशेषोयम् । यथा । अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः । आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः इति नारदः ।

अन्यशाखकः । पुं । शाखारण्डे । स्वशाखामुत्सृज्यान्यशाखोक्तकर्मकारिणि । अन्या शाखा यस्य सः । कप् ।

अन्यादृक् । त्रि । अन्योपमे । अन्यप्रकारे । अन्य इव दृश्यते । दृशिर् प्रेक्षणे । त्यदादिषु दृश इति क्विन् । आ सर्वनाम्नः ।

अन्यादृशः । त्रि । अन्योपमे । अन्यप्रकारे । अन्य इव पश्यति दृश्यते वा । दृशिर्० । त्यदादिष्विति कञ् । आत्वम् ।

अन्यायः । पुं । अविचारे । परस्वहरणादौ । न्यायभिन्ने । अनौचित्ये । यथा । अन्यायेनापि यद्भुक्तं पित्रा पूर्वतरैस्त्रिभिः । न तच्छक्यमपाकर्त्तुं क्रमात् त्रिपुरुषागतमिति नारदः । न न्यायः ।

अन्याय्यम् । त्रि । अयोग्ये । यथा । दृष्टार्थसत्त्वे अदृष्टकल्पनाया अन्याय्यत्वमिति । न न्याय्यम् ।

अन्येद्युः । ऽ । दिवसान्तरे । अन्यस्मिन्नहनि । सद्यः परुदित्यन्यशब्दादेद्युस् प्रत्ययो निपातितः ।

अन्येद्युष्कः । पुं । विषमज्वरविशेषे । यथा । अन्येद्युष्कस्त्वहोरात्रादेककालं प्रवर्त्तत इति । एककालं दोषावेशया एककालमपि द्वितीयं प्रथमकाले इव दोषस्थितेः ।

अन्योदर्य्यः । पुं । स्त्री । वैमात्रेये ।

अन्योन्यम् । त्रि । परस्परार्थे । अर्थालङ्कारविशेषे । यथा । क्रियया तु परस्परं वस्तुनोर्जनने ऽन्योन्यम् । अर्थयोरेकक्रियामुखेन परस्परं कारणत्वे सत्यन्योन्यं नामालङ्कारः । उदाहरणम् । हंसाणं सरेहिं सिरी सारिज्जइ अह सराणं हंसेहिम् । अण्णोण्णं विअ एए अप्पाणं णवरगरुअन्ति । अस्य संस्कृतं यथा । हंसानां सरोभिः श्रीः सारीक्रियते अथ सरसां हंसैः । अन्योन्यमेव एते आत्मानं केवलं गुरुकुर्वन्तीति ॥ श्रीः शोभा सारीकरणं श्रेष्ठता सम्पादनम् । अत्र सरोहंसयोः परस्परं शोभासारीकरणरूपोपकारजनकत्वादन्योन्यं नामालङ्कारः ॥ अत्रोभयेषामपि परस्परजनकता मिथः श्रीसारतासम्पादनद्वारेण । कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति द्वित्वम् ।

असमासवद्भावेपूर्वपदस्थस्य सुपःसुर्वक्तव्यः ।

अन्योन्यहृदय:। त्रि। इतरेतराभिप्राये।

अन्योन्याध्यास:। पुं। अन्योन्यस्मिन्नन्यात्मकतान्योन्यधर्माणांच तद्धर्मिणि निरूपितेतादात्म्याध्यासे। यथा। जलघोन्माघटाकाशोवथासर्वस्मिरोपितः। तथाजीवेनकूटस्थः सोन्योन्याध्यासउच्यत इति।

अन्योन्याभाव:। पुं। तादात्म्यावच्छिन्न प्रतियोगिताके। यथाघटः पटोन भवतीति।

अन्योन्याश्रय:। त्रि। अन्योन्यापेक्षे। स्वग्रहसापेक्षग्रहसापेक्षग्राहके इतितार्किकाः। तर्कविशेषे॥ सचात्माश्रयवत्त्रेधा। तस्यलक्षणम्। स्वापेक्षापेक्षित्वनिबन्धनोऽनिष्टप्रसंगोन्योन्याश्रयः। अपेक्षाच मतौ उत्पत्तौ स्थितौचग्राह्या। तत्राद्या यथा। घटोयं यद्येतद्घटज्ञानजन्यज्ञानविषयःस्यात् तर्हैतद्घटभिन्नः स्यात्॥ द्वितीया यथा। घटोयं यद्येतद् घटजन्यजन्यः स्यात् तर्हैतद्घटजन्यभिन्नःस्यात्। तृतीया यथा। घटोयं यद्येतद्घटवृत्तिवृत्तिःस्यात् तथात्वेमोपलभ्येत इतिजगदीशः॥ परस्परज्ञानसापेक्षज्ञानाश्रयोऽन्योन्याश्रयइतिनैयायिकाः।

। अन्योन्यस्यचाश्रयः।

अन्वक्षम्। त्रि। अनुगामिनि। अनुपदे। अनुगतमक्षमिन्द्रियम्। प्रत्यक्षे॥

अन्वक्षम्। । अक्ष्णोः समीपे। अनुर्यत्समयेत्यव्ययीभावः। प्रतिपरसमनुभ्योऽक्ष्णइति समासान्तष्टच्।

अन्वक्। त्रि। अनुगे। अन्वक्ते। अन्वञ्चति। अनुगतौ। क्विन्।

अन्वय:। पुं। सन्ततौ। कुले॥ पदानांपरस्परेण सम्बन्धे। यथा। विशेषणांपुरस्कृत्य विशेष्यं तदनन्तरम्। कर्तृकर्मक्रियायुक्तमेतदन्वयलक्षणमिति। अनुगमे। अनुवृत्तौ। कार्यकारणानुवृत्तौ। तत्सत्तानियतसत्ताकत्वे। द्रव्यस्वामिनां सम्बन्धे॥ अन्वियते। इगतौ। इणगतौवा। एरच्।

अन्वयव्यतिरेकि। त्रि। अन्वयेन व्यतिरेकेणचव्याप्तिमतिहेतौ। यथा वह्नौ साध्येधूमवत्त्वम् यत्रधूमस्तत्राग्निरित्यन्वयव्याप्तिः। यत्राग्निर्नास्ति तत्रधूमोनास्तीतिव्यतिरेकव्याप्तिः। यथा महानसह्रदादौ। अन्वयव्यतिरेकोऽस्त्यस्मिन्। इनिः।

अन्वयव्याप्ति:। स्त्री। यत्रधूमस्तत्राग्निरित्येवंरूपायांव्याप्तौ। व...

से । अन्वयेनव्याप्तिः ।

अन्ववसर्गः । पुं । कामचारानुज्ञायाम् । अन्ववसर्जनम् । सृजेर्घञ् ।

अन्ववायः । पुं । वंशे ॥ कुले । अन्ववाय्यते । अयगतौ । घञ् ॥

अन्वष्टका । स्त्री । साग्नीनामावश्यकेश्राद्धकालविशेषे । अष्टकापश्चात्तिथौ । सातुगौणचान्द्रपौषमाघफाल्गुनाश्विनमासानां कृष्णनवमी । तस्यां साग्नीनांमातृकश्राद्धमिति श्राद्धविवेकः ।

अन्वक् । अ । प्रत्यक्षमित्यर्थे ।

अन्वाजे । अ । दुर्बलस्य सामर्थ्याधाने । सप्तमीप्रतिरूपकोऽयंनिपातः ।

अन्वाजेकृत्य । अ । दुर्बलस्यबलमाधा-

अन्वाजेकृत्वा । अ । येत्यर्थे । उपाजेऽन्वाजे इतिगतिसंज्ञा । कुगतीतिसमासः ।

अन्वाचयः । पुं । चार्थविशेषे । मुख्यसिद्धावप्रधाननिष्पत्तौ । यथा भिक्षामट गाञ्चानयेति । एकस्यप्राधान्यादनुरोधेनेतरदन्वाचीयते । चीञ् । कर्मण्यच् ।

अन्वादेशः । पुं । किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुंपुनरुपादानमन्वादेश इति वर्णिते कथितानुकथनमात्रे । यथा । अनेनव्याकरणमधीतम् एनंछन्दोऽध्यापयेति । अनयोः पवित्रंकुलम् एनयोः प्रभूतं स्वमिति ।

अन्वाधिः । पुं । एकस्मिन् यदर्पितंवस्तु तेन पुरुषान्तरे अमुष्मिन् स्वामिनि त्वं दास्यसीति यन्निक्षिप्तं तस्मिन् [illegible]र्पयेतु । कार्येषु यान्योन्या [illegible]न् पुरुषेत्वंदया इतिप अन्योऽन्य [illegible] समर्पितं तस्मिन् ॥ यथा । स्वकर्मार्थकार्येषु अन्यस्मिन् अधमर्णकाधमम् । दत्तास्त्वमितियोदत्तःसदत्तान्वाधिरुच्यते । इतिकात्यायनः । पुनर्बन्धके । पश्चान्मानसीव्यथायाम् ।

अन्वाधेयम् । न । स्त्रीधनविशेषे । यथा । विवाहात्परतोयत्तु लब्धंभर्तृकुलात्स्त्रिया । अन्वाधेयंतदुक्तंतु लब्धंबन्धुकुलात्तथेति कात्यायनः । अन्यच्च । ऊर्ध्वंलब्धंतुयत्किञ्चित्संस्कारात्प्रीतितःस्त्रिया । भर्तुःपित्रोःसकाशाद्वा अन्वाधेयंतुतद्भृगुरिति । बन्धुपक्षेन मातापित्रोरुपादानम् ।

अन्वायत्तः । त्रि । अनुगते ।

अन्वारूढः । त्रि । अधिष्ठिते । अन्वारूह पूर्वात् रुहेर्गत्यर्थेतिक्तः । ढत्वधत्वष्टुत्वढलोपदीर्घाः ।

अन्वासनम् । न । शुश्रूषणे । उपासने । सेवायाम् ॥ अनुमोचने । स्निग्धादि

गृह्णे । अनु अस्० । ल्युट् ॥

अन्वाहार्य्यम् । न । मासिके । दर्शश्रा
द्धे । पितृयज्ञपिण्डानामनुपश्चात् आ
ह्रियते । ह्रञ् हरणे । ऋहलोर्ण्यत् ।
यथा । पितृयज्ञन्तुनिर्वर्त्य विप्रश्चन्द्र
क्षयेऽग्निमान् । पिण्डान्वाहार्य्यकंश्रा
द्धंकुर्यान्मासानुमासिकम् । पितॄणां
मासिकंश्राद्धमन्वाहार्य्यंविदुर्बुधाः । त
च्चामिषेणकर्त्तव्यंप्रशस्तेनप्रयत्नतः ।
इतिमनुः । दृष्टेर्द्दक्षिणायाम् ॥ अ-
न्वाहरणीये ॥

अन्वाहार्य्यपचनः । पुं । दक्षिणाग्नौ ॥

अन्वाहितम्० । त्रि । यदेकस्यहस्तेनिहि
तंद्रव्यं तेनापिपश्चादन्यस्यहस्तेस्वामि
नेदेहीति निहितम् तस्मिन् द्रव्ये ।

अन्विच्छा । स्त्री । अन्वेषणे ।

अन्वितम् । त्रि । मिलिते । युक्ते । अनु
गते । कृतान्वयेपदादौ ॥

अन्विष्टम् । त्रि । अन्वेषिते ॥ अन्विष्यते
स्म । इषइच्छायाम् । क्तः ।

अन्विष्यन् । त्रि । विचिन्वति ।

अन्वीक्षितम् । त्रि । विचारिते ।

अन्वीतम् । त्रि । अन्वित ॥ अनुगते ।
अनुपूर्वादिण्गतावितिधातोः कर्म्मणि
क्तः । पृषोदरादिः । इङ् गताविच्च्य
स्मादात्क्तः ।

अन्वेषणम् । न । अनुसन्धाने । गवेषि
ते । इषेरभिच्छार्थस्येतियुच् ।

अन्वेषणा । स्त्री । अनुमार्गणे । गवेष
णायाम् । तर्कादिनायथावोधितध
र्म्मान्वेषणे । टाप् ॥

अन्वेषितम् । त्रि । गवेषिते । अन्वेष्य
तेस्म । एषृगतौ । इषिर्वान्तोवा । क्तः ।

अन्वेष्टव्यः । त्रि । ज्ञातव्ये । एषितव्ये ।

अन्वेष्टा । त्रि । अनुपदिनि । अन्वेषण
कर्त्तरि । पैरखगावनेवाला इति
भाषा ।

आपः । स्त्री । भू० । जले ॥ शब्दस्पर्श-
रूपतन्मात्रसहितात्‌रसतन्मात्रादुत्प-
न्नाः शीतस्पर्शवत्योह्याप: । आप्नुव
न्ति । आप्लृव्याप्तौ । आप्नोतेर्ह्रस्व
श्चेतिक्विप् ह्रस्वत्वंच ।

अप । । । अपकृष्टार्थे ॥ वर्ज्जनार्थे । वि-
योगे । विपर्यये । विकृतौ । चौर्य्ये
। निर्द्देशे । हर्षे । अपोवियोगेविकृ-
तौ विपरीते निदर्शने । आनन्दे वर्ज्ज
ने चौर्य्ये वारणेसम्यगीरितः ॥ वियो
गे । अपयाति । विकृतौ । अपाकृत
वान् । विपरीते । अपशब्दः । निद
र्शने । अपदिशति । आनन्दे । अप
हसति । वर्ज्जने । अपत्रिगर्त्तेभ्योवृष्टो
देवः । चौर्य्ये । अपहरति ।

अपकर्म्म । न । दुष्क्रियायाम् । अपोप
सर्गेण कर्म्मशब्दस्य कर्म्मधारयः ।

अपकर्षः । पुं । विद्यमानधर्मापचये । अपकृष्यते । कृषविलेखने । घञ् ।

अपकारः । पुं । द्वेषे । अनिष्टे । अपकरणम् । कृञ् । घञ् ।

अपकारकः । त्रि । अनिष्टकारिणि ॥ अपकरोति । कृ० । ण्वुल् ।

अपकारगीः । स्त्री । भर्त्सने । अपकारार्थागीर्वाक् ।

अपकारी । त्रि । धूर्ते । शठे । अपकारके । यथा । अपकारिणिचेत् क्रोधः क्रोधः क्रोधेकथंनते । धर्मार्थकाममोक्षाणां चतुर्णांपरिपन्थिनीति ।

अपकुशः । पुं । दन्तरोगविशेषे । यथा । शेषेषुदाहःपाकस्तताभ्यां दन्ताश्चलन्तिच । अभ्याहताः प्रस्रवन्तिशोणितंदन्तवेदना । आध्मायन्तेस्रुतेरक्तेमुखंपूतिचजायते । यस्मिन्सापकुशोनामपित्तरक्तकृतोगदइति ॥७॥

अपकृतः । त्रि । अपकारिणि । न । अपकारे । मित्रस्यचैत्रापकृतेद्विविधाविग्रहःस्मृतस्त्वयत्र मित्रस्यापकारे इत्यर्थदर्शनात् ।

अपकृष्टः । त्रि । अधमे । हीने । अपकृष्यतेस्म । कृषविलेखने । क्तः ।

अपक्रमः । पुं । पलायने ॥ अपक्रमणम् । क्रमुपादविक्षेपे । घञ् । अक्रमे ।

अपक्रिया । स्त्री । द्रोहे ॥ अपकरणम् । कृञः शचेतिशः ।

अपक्रोशः । पुं । निन्दने । जुगुप्सने । अपक्रोशनम् । क्रुश० । घञ् ।

अपक्वम् । त्रि । अपरिणते । आमे । न पक्वम् ।

अपक्षेपणम् । न । अधोदेशसंयोगहेतौ कर्मविशेषे ॥ अपपूर्वात् क्षिपेर्ल्युट् ॥

अपगतः । त्रि । मृते । पलायिते । दूरीभूते । गते । अपगच्छतिस्म । गम्लृ० । गत्यर्थेतिक्तः ।

अपगमः । पुं । अपगमने । गमेरप् ।

अपगा । स्त्री । नद्याम् । त्रि । अपगामिनि । अपगच्छति । गमल्लृगतौ । अन्येभ्योपीतिडः । टाप् ।

अपघनः । त्रि । घनशून्ये ॥ पुं । हस्तपादाद्यङ्गेषु । अवयवे । अपहन्यते । अपघनोऽङ्गमिति करणेऽपघनादेशश्च ॥

अपघातः । पुं । अपहनने ॥ अपहननम् । हन्तेर्घञ् । हस्यघः । नस्यतः ।

अपचयः । पुं । व्यये । हानौ । अपहारे । अपचयनम् । चिञ्चयने । एरच् ।

अपचायितम् । त्रि । अर्चिते । अपचाय्यतेस्म । चायृपूजानिशामनयोः । क्तः ।

अपचारः । पुं । अहिताचरणे । यथा । येनिप्रदोषाश्चभवन्तिशिश्ने पञ्चोप

दृश्याविविधापचारैरिति। सर्वधर्मव्यतिक्रमे। दोषे। अविनये।

अपचारिणी। स्त्री। व्यभिचारिण्याम्॥ अपचारोऽस्त्यस्याः। इनिः।

अपचारी। त्रि। अपचारवति॥

अपचितम्। त्रि। अर्चिते। क्षीणे। व्ययिते। अपचाय्यतेस्म। चायृपूजानिशामनयोः क्तः। चायतेश्चिरितिचिभावः॥

अपचितिः। स्त्री। पूजायाम्। व्यये। निष्कृतौ। हानौ। अपचीयते अपचाय्यतेऽसावा अपचायनंवा। चायृ-पूजादौ। क्तिन्। चायतेःक्तिनिचिभावोवाच्यः।

अपची। स्त्री। गण्डमालायां अवस्थाविशेषे। यथा। तेग्रंथयः केचिदवाप्तपाकाः स्रवन्तिनश्यन्तिभवन्तिचान्ये। कालानुबन्धं चिरमादधातिसैवापचीतिप्रवदन्तिकेचिदिति। ते ग्रन्थयः गण्डमालायाएवगण्डाः॥

अपजयः। पुं। भङ्गे। पराजये॥ अपजयनम्। जिजये। एरच्।

अपटान्तरम्। त्रि। आसक्ते। अव्यवहिते। संसक्ते॥ पटेनतिरस्करिण्या अन्तरम्। नपटान्तरमत्र।

अपटी। स्त्री। काण्डपटे। वस्त्रमावरणे। कनात इतिभाषा। इतिहेमचन्द्रः॥

त्रि। पटशून्ये॥

अपटुः। त्रि। अचतुरे। कार्य्याक्षमे। पटोरन्यः। रोगिणि। आमयाविनि॥

अपतर्पणम्। न। रोगादौभोजनाभावे। लङ्घने। इतिहेमचन्द्रः। अपपूर्वात् तृपेर्ल्युट्।

अपतानकम्। न। वायुरोगविशेषे। प्रताने। यथा। दृष्टिंसंस्तभ्यसंज्ञांचहत्वाकण्ठेनकूजति। हृदिमुक्तेनरःस्वास्थ्यंयाति मोहंवृतेपुनः। वायुनादारुणं प्राहुरेके तदपतानकमिति।

अपत्यम्। न। सन्ताने। दुहितरि। पुत्रे। नपतन्तिपितरोऽनेन। पत्लृगतौ। बाहुलकायत्। अघ्न्यादिर्वा। यस्मिन्जातेतस्यापतनंतत्तस्यापत्यमितिफलितोर्थः। तथाचपौत्रादिरपि पितामहादीनामपतनहेतुरिति तेषामपत्यंभवति।

अपत्यदा। स्त्री। क्षुपविशेषे। गर्भदात्र्याम्।

अपत्यपथः। पुं। भगे। योनौ।

अपत्यशत्रुः। पुं। कुलीरे। कर्कटे।

अपत्रः। पुं। करीरे। नविद्यन्ते पत्राण्यस्य। त्रि। पत्रहीने।

अपत्रपः। त्रि। निर्लज्जे। अपगता त्रपायस्यसः॥

अपत्रपा। स्त्री। परतोभियाम्। पित्रा

देः पुरतोजातलज्जायाम् ॥ स्त्री भावे । इतिरत्नकोषः ।

अपत्रपिष्णुः । त्रि । लज्जाशीले । लज्जाशीले । स्वभावतः सत्रपे । अपत्रपते । अलंकृञि तीष्णुच् ॥

अपथम् । न । । । अमार्गे । पथोऽभावः । नञितितत्पुरुषः । पथोविभाषेतिपाक्षिकोऽप्रत्ययः । अपथानिगाहते मूढः । अपथंनपुंसकम् । तत्पुरुषएव । अपथोदेशः । अपथानदी । अपथे पदमर्पयन्तिहि श्रुतवन्तोपिरजोनिमीलिताः । योनौ ।

अपन्थाः । पुं । अपथे । मार्गाभावे । पथोऽभावः नञितितत्पुरुषः । अपथंनपुंसकमिति कृतसमासान्तस्यनिर्देशात्क्लीबत्वम् ।

अपथ्यम् । त्रि । रोग्यभोज्ये । अहिते । नपथ्यम् ।

अपदस्थः । त्रि । स्वकर्मच्युते ॥

अपदानम् । न । वृत्तकर्मणि । अवदाने ॥ दण्डिः मवर्त्तनं साप्रशस्ता विद्यते यत्र तत्र । यत्र कर्मणि दण्डिः सर्वैः प्रशस्यते तस्मिन्नित्यर्थः । दैप शोधने । भावे ल्युट् । निन्द्यदाने । अपकृष्टदानम् ।

अपदान्तरम् । त्रि । अनन्तरे । अव्यवहिते । अपदान्तरमत्र ।

अपदिशम् । न । । । दिक्कोणे । दिशोर्मध्ये । विदिशि । दिशोर्मध्यम् । अव्ययमिति योगविभागात्समासः । दिश्शब्दस्यशरदादिषु पाठात्टच् । अव्ययीभावश्चेतिह्रस्वाभ्यांक्लीबत्वाव्ययत्वयोर्विधानम् । तेननाव्ययीभावादतोमत्वपंचम्या इत्यादिप्रवृत्तिः ॥ अपेतिपञ्चम्यवाची भावकेन समासेतु टज्समापेक्षितः ।

अपदिष्टः । त्रि । प्रयुक्ते । यथाकाशात्ययापदिष्टः । अपदिश्यते । दिश अतिसर्जने । क्तः ॥

अपदेशः । पुं । शरव्ये । लक्ष्ये । निमित्ते ॥ व्याजे ॥ स्थाने । अपदेशनम् अपदिश्यते वा । दिश अतिसर्जने । घञ् ।

अपध्वंसजः । पुं । वर्णसङ्करे । यथा । शूद्राणांतु सधर्माणः सर्वेऽपध्वंसजाः स्मृता इतिमनुः ।

अपध्वस्तः । त्रि । परित्यक्ते । निन्दिते । अवचूर्णिते । अपध्वंसतेस्म । ध्वंसु अधःस्रंसने गतौच । क्तः ॥

अपनयनम् । न । अधःप्रापणे । दूरीकरणे । खण्डने ॥

अपनीतः । त्रि । विनीते । हृते ।

अपनुतिः । स्त्री । अपनोदे । खण्डने ।

अपनेयः । त्रि । अपनोद्ये । निरस्ये ॥

अपनोदः। पुं। अपनोदने।

अपनोदनम्। न। दूरीकरणे॥

अपपात्रितः। त्रि। उत्कटदोषैर्ज्ञातिभिर्भिन्नोदकीकृते। यथा। अपपात्रितस्य रिक्थपिण्डोदकानि निवर्त्तन्ते इति शूलपाणिः।

अपभ्रंशः। पुं। अपशब्दे। अशास्त्रशब्दे। असंस्कृतशब्दे। ग्राम्यभाषायाम्। यथा दण्डी। आभीरादिगिरः काव्येष्वपभ्रंश इति स्मृताः। शास्त्रेषु संस्कृतादन्यदपभ्रंशतयोदितमिति। संस्कृतादपभ्रश्यति। भ्रंशु अधःपतने। पचाद्यच्। पतने। यथा। अन्याकृतिर्भवति महतामप्यपभ्रंशनिष्ठैरभिमानग्राक्रान्तता।

अपमः। पुं। क्रान्तौ। सूर्यगमनमार्गे तिर्यग्गोलरेखायाम्।

अपमानम्। न। अनादरे। अस्य पर्याया यथा। स्यादवज्ञापरीहारः परिहारः पराभवः। अपमानं परिभवस्तिरस्कारस्तिरस्क्रिया। अवहेलावहेला स्यादवहेलनहेलने। क्षेपो निकारश्चिक्कारौ पर्यायाः स्युरनादर इति शब्दरत्नावली। यथा। वेदस्वनाध्ययानाच्च अपमानादधोगतिरिति।

अपमित्यकम्। न। ऋणे॥

अपमृत्युः। पुं। विनारोगेण मरणे। पश्चिमवयसि अगदैः सुदृढ़ वृक्षपतनाग्निविषवन्धनजलप्रवेशाद्युपधातादिजन्यमरणे इति केचित्। अपकृष्टो मृत्युः।

अपस्पष्टितम्। न। अविस्पष्टवाक्ये।

अपयानम्। न। पलायने। यामापणे अपपूर्वः। ल्युट्।

अपरम्। न। गजपश्चार्द्धे॥ त्रि। इतरस्मिन्। अर्वाचीने। निकृष्टे। द्रव्यादिसामान्ये। कार्ये। सन्निकृष्टे। परं नभवतीत्यपरम्। पुं। पादः पश्चिमे। अपरः पश्चिमः पादः इति गजप्रकरणे वैजयन्ती।

अपरक्तः। त्रि। अननुकूले॥ विरक्ते।

अपरतालः। पुं। गिरिविशेषे॥

अपरतिः। स्त्री। निवृत्तौ॥ अपरमेर्भावे क्तिन्।

अपरत्र। । पश्चादर्थे॥

अपरत्वम्। न। अपरव्यवहारकारणे॥ तद्द्विविधम्। दिक्कृतं कालकृतञ्चेति। समीपस्थे दिक्कृतम् कनिष्ठे कालकृतमिति। अपरस्य भावः।

अपरपक्षः। पुं। कृष्णपक्षे।

अपरराषः। पुं। रात्रिशेषे। उत्तरार्द्धे। अपरं रात्रेः। पूर्वापराधरेति समासे अच्। सर्वैकदेशेत्यच्।

अपरवक्त्रम्। न। वैतालीयसंज्ञके छन्दे॥

अपरवैराग्यम् । न । वैराग्यविशेषे । यतमानसंज्ञाव्यतिरेकसंज्ञैकेन्द्रियसंज्ञावशीकारसंज्ञाभेदाच्चतुर्विधे सम्प्रज्ञातस्यान्तरङ्गे । असम्प्रज्ञातस्य बहिरङ्गे ॥

अपरस्परः । त्रि । क्रियायाः क्रियावतां च सातत्ये । अपरश्चपरश्चेति द्वन्द्वः । अपरस्पराः क्रियासातत्ये इति सुट् निपात्यते क्रियासातत्ये । अपरस्परं गच्छन्ति । सततमविच्छेदेन गच्छन्तीत्यर्थः । निर्दिष्टं कर्मसातत्ये सुधीभिरपरस्परम् । क्रियावतां सातत्ये तु लिङ्गत्रयम् । अपरस्पराः सार्थाः स्त्रियश्च गच्छन्ति अपरस्पराणि कुलानि ॥

अपरा । स्त्री । जरायौ । पश्चिमदिशि ॥

अपरागः । पुं । अप्रीतौ । द्वेषे ॥

अपराङ्गम् । न । गुणीभूतव्यङ्ग्यभेदे ॥ इति काव्यप्रकाशः ॥

अपराजितः । पुं । ईशे । विष्णौ । ऋषिभेदे ॥ नपराजितः । गन्धधूपे । त्रि । अजिते ॥

अपराजिता । स्त्री । उमायाम् ॥ जयायाम् । आह्वोतिप्रसिद्धायाम् । जयन्त्याम् । अशनपर्ण्याम् । शेफालिकायाम् । शमीभेदे । शंखिन्याम् ॥ क्षुपविशेषे । स्वल्पफलायाम् । गिरिकर्ण्याम् । विष्णुक्रान्तायाम् ॥ श्वेतनीलपुष्पभेदाद्द्विविधे अपराजिते । अपराजिते कटूमेध्ये शीतकण्ठ्ये सुदृष्टिदे । कुष्ठमूत्रत्रिदोषाम शोथव्रणविषापहे ॥ कषाये कटुपाके च तिक्ते च स्मृतिबुद्धिदे ॥ ऐशान्यां दिशि । नपराजिता ॥ ब्रह्मलोके हिरण्यगर्भपुर्य्याम् ॥ ब्रह्मचर्यसाधनवद्भ्योऽन्यैर्न जीयते इति । जी० । क्तः ॥

अपराद्धः । त्रि । अपराधिनि । अपराध्यति । राध० । क्तः ॥

अपराद्धपृषत्कः । त्रि । लक्ष्याप्राप्तशरे । अपराद्धः पृषत्को वाणोऽस्य । अपराद्धपृषत्कोऽसौ लक्ष्याच्च्युतसायकः ॥

अपराधः । पुं । आगसि । दण्डयोग्यकर्म्मणि । अपराधनम् । राधसंसिद्धौ घञ् ॥ त्रि । राधाभाववति ॥

अपराधी । त्रि । कृतापराधे । भेददर्शिनि । अप्रोक्तं विद्यारण्यगुरुभिः । विप्रश्च वत्सश्च लोकदेवभूतादिकं जगत् । स्वस्माद्भेदेन पश्यन्तं क्रोशयेदपराधिनम् । यदस्ति तन्न जानाति यन्नेहास्ति तदीक्षते । इत्येवमपराधोऽस्य विद्यते भेददर्शिन इति । योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणेति ॥

अपरान्तः । त्रि । पाश्चात्त्ये ॥ अपरान्तास्तु पाश्चात्त्या इति यादवः । समुद्रमध्य

देशवर्त्तिजने । यथा । अवकाशंकिलोदन्वान् रामायाभ्यर्थितो ददौ । अपरान्तमहीपालव्याजेन रघवे करमिति ।

अपराप्रकृतिः । स्त्री । भूमिरापोनलो वायुः खंमनोबुद्धिरेवच । अहंकार इतीयंमेभिन्नाप्रकृतिरष्टधा । अपरेयमितिभगवद्गीता ॥ ८ इतलक्षणायाम् । अपरायांशक्तौ । अपराचासौप्रकृतिश्च ।

अपराभुक्तिः । स्त्री । पातालादिकलान्ताध्ववर्त्तिविचित्रैश्वर्यसम्पन्नतत्तद्भुवनवासित्वमाचे ।

अपरामुक्तिः । स्त्री । मंत्रमंत्रेश्वरत्वे । अपराचासौमुक्तिश्च ।

अपराविद्या । स्त्री । ऋग्वेदादिविद्यायाम् । ऋग्यजुःसामाथर्वाख्यावेदा अङ्गानिषड्द्विज । शिक्षाकल्पोव्याकरणंनिरुक्तंज्योतिषांगतिः । छन्दोभिधानंमीमांसाधर्मशास्त्रंपुराणकम् । न्यायोवैद्यकगान्धर्वंधनुर्वेदोर्थशास्त्रकम् ॥ अपरेयं पराविद्यायया ब्रह्मावगम्यते । अपराचासौविद्याच ॥

अपराशक्तिः । स्त्री । अपराप्रकृतौ । अपराचासौशक्तिश्च ।

अपराह्णः । पुं । दिनान्तांशे । तस्यभेदाः । द्विधाविभक्तस्यदिनस्यशेषभागः

। त्रिधाविभक्तस्यदिनस्यतृतीयभागः । सतुविंशद्दण्डदिनमानेविंशतिदण्डात्परंदशदण्डंयावत् । पञ्चधाविभक्तस्यदिनस्यचतुर्थभागः । सचाष्टादशदण्डात्परंषट्दण्डंयावदितिश्रुतिस्मृतिप्रसिद्धाः ॥ अह्नअपरमपराह्णः । पूर्वापरेत्येकदेशिसमासः । टच् । अह्नोह्नएतेभ्यइत्यह्नादेशः । अह्नोदन्तादितिणत्वम् ।

अपराह्णतनः । त्रि । अपराह्णे भवेवस्तुनि । आपराह्णिके । अपराह्णः सोढोऽस्य । विभाषापूर्वाह्णापराह्णाभ्यामितिट्युट्युलौतुट्च ।

अपराह्णेतनः । त्रि । अपराह्णेभवेवस्तुनि । आपराह्णिके । अपराह्णेभवः । ट्युट्युलौतुट्च । घकालतनेष्विति सप्तम्याअलुक् ।

अपरिकलितः । त्रि । अज्ञाते । अदृष्टे । नपरिकल्पितः ।

अपरिग्रहः । पुं । असङ्ग्रहे । अस्वीकारे । नपरिग्रहः । परिव्राजि । नविद्यतेकन्थाकौपीनाच्छादनवस्त्रादिव्यतिरिक्तःपरिग्रहोयस्य । त्रि । परिग्रहहीने ।

अपरिच्छदः । त्रि । दरिद्रे । नविद्यतेपरिच्छदोयस्यसः ।

अपरिच्छिन्नम् । त्रि । परिच्छेदरहिते । असीमनि ।

अपरिज्ञानम् । न । तत्त्वाविवेके । मू ढतायाम् ॥

अपरिम्लानः । पुं । रक्ताम्लानवृक्षे । त्रि । म्लानिरहिते ।

अपरिसङ्ख्यानम् । न । आनन्त्ये । अप रिसंख्यानम् ॥

अपरिहार्य्यः । त्रि । परिहर्त्तुमशक्ये । अत्याज्ये ।

अपरेद्युः । अ । अपरदिने । अपरे अह नि । सद्यः परुदित्यपरस्मादेद्युस् ।

अपरोक्षम् । त्रि । प्रत्यक्षे । असम्भाव नादिनिरासेतु विचारविपाकात्तेनैव प्रमाणेन जनितं ज्ञानं प्रतिबन्धाभा वात् फलं जनयदपरोक्षमित्युच्यते । अक्षाणामिंद्रियाणां परोऽतीतोऽभव तीत्यपरोक्षम् । नपरोक्षम् ।

अपर्णा । स्त्री । पार्वत्याम् । नपर्णान्य स्याः । तपसि पर्णानामप्यनशनात् । त्रि । पर्णशून्ये ।

अपर्य्यनीकः । त्रि । निस्तेजसि ।

अपर्य्याप्तम् । त्रि । असमर्थे । पर्याप्ति शून्ये ।

अपर्वदण्डः । पुं । रामशरवृक्षे । इति राजनिर्घण्टः ॥

अपलम् । न । कीलके । त्रि । मांस हीने ॥

अपलापः । पुं । प्रेमणि । अपह्नवे । स त्योपलापेनकथने । भार्यमाणेऽन न धारयामीत्याद्युक्तौ । अपलपनम् । घञ् ।

अपलाषिका । स्त्री । तृष्णायाम् ॥ इ ति हेमचन्द्रः ।

अपवरकः । पुं । वातायनसि । गर्भगृहे । अपव्रियते वृणोतिवा । इत्य० । कृञादिभ्यः संज्ञायांवुन् । फन्नूसशा लटैन इति प्रसिद्धे । आवरके । य था । दीपोऽपवरकस्यान्तर्वर्त्तते त त्प्रभावहिरितिध्यानदीपे विचार- प्रत्ययुक्तः ।

अपवर्गः । पुं । त्यागे । मोक्षे । क्रियाव सानसाफल्ये । फलप्राप्तिपूर्विकायां क्रियापरिसमाप्तौ । कर्मफले । तद त्यन्तविमोक्षोऽपवर्गः । न्या० १ । २२ । तस्यदुःखस्य अत्यन्तविमोक्षः स्वस मानाधिकरणदुःखासमानकालीनो ध्वंसः । तस्य च जन्मापायादेव सम्भ व इत्याशयेनदुःखेन अत्यन्तं विमुक्तिरपवर्गइति भाष्यम् । दुःखे- नदुःखानुषङ्गेणेत्यर्थः ॥ अपवर्जनमप वर्गः । वृजीवर्जने । भावेघञ् । दुः खाभावे । नाशे । पूर्णतायामितिध रणिः ।

अपवर्गगुरुः । पुं । सदाशिवे । यतो मोक्षमार्गप्रदर्शके ।

अपवर्ज्जनम् । न । दाने । निर्वाणे । मोक्षे । परित्यागे ॥ वृजीवर्ज्जने अपपूर्वः । भावे ल्युट् ।

अपवर्जितः । त्रि । परिहृते । त्यक्ते ।

अपवर्त्तनम् । न । परिवर्त्ते । अन्यीभावे ॥

अपवर्त्तितः । त्रि । सम्वलिते ।

अपवादः । पुं । निन्दायाम् । आज्ञायाम् ॥ विश्रम्भे । प्रणये । बाधके । अपवादो नाम रज्जुविवर्त्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्त्तस्यावस्तुनो ऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वमिति । कार्य्यस्य कारणमात्रसत्तावशेषकम् कारणस्वरूपस्थितिरेकेण कार्य्यस्यासत्त्वावधारणं वाऽपवाद इत्यर्थः । अपवदनम् । वदअभिवादन स्तुत्योः । भावे घञ् । अपोद्यते । वदव्यक्तायांवाचि । घञ्वा ।

अपवारणम् । न । अन्तर्द्धौ । इञ् आच्छादने । चुरादिण्यन्तादस्माद्भावेल्युट् ।

अपवारितम् । त्रि । अन्तर्हिते । आवृते ॥

अपवित्रः । त्रि । अशुद्धे । नपवित्रः ।

अपविद्धम् । त्रि । प्रतिक्षिप्ते । प्रत्याख्याते ॥ ध्वस्ते । त्यक्ते । पुं । पुत्रविशेषे यथा । मातापितृभ्यामुत्सृष्टं तयोरन्यतरेणवा । यंपुत्रंपरिगृह्णीयादपविद्धःसउच्यतेइतिमनुः ॥

अपविषा । स्त्री । निर्व्विषीतृणे । इति राजनिर्घण्टः ।

अपवृत्तिः । स्त्री । अपवारणे ।

अपवृत्तः । त्रि । पराङ्मुखीभूते ।

अपशब्दः । पुं । असंस्कृतशब्दे । अपभ्रंशे । अपभ्रष्टः शब्दोपशब्दः । शास्त्रेणापशब्दो भवत्यः । यथाह भगवान्भाष्यकारः । तेऽसुरा हेलयोहेलय इति कुर्वन्तःपराबभूवुः तस्माद्ब्राह्मणेन नम्लेच्छितवैनापभाषितवैम्लेच्छोहवाएषयदपशब्दः म्लेच्छामाभूमेत्यध्येयं व्याकरणमिति । म्लेच्छितवा इत्यस्य पर्य्यायोनापभाषितवा इति कृत्यार्थइतितवै प्रत्ययइतिकैयटः । यथैवहिशब्दज्ञानेधर्मः एवमपशब्दज्ञानेप्यधर्मः । इतिमहाभाष्यम् । एतच्च अपशब्दज्ञानमधर्मसाधनम् धर्म्महेतुशब्दज्ञानविरोधित्वात् यद्यद्विरोधि तत्तद्विरोधिफलकम् यथा श्लैष्मिकद्रव्यसेवा श्लेष्मवतः इत्यनुमानम् । श्लैष्मिकद्रव्यसेवया श्लैष्मिकव्याधिसम्भवस्तद्विपरीतसेवयाच्चारोग्यमित्यर्थः ।

अपशुक् । पुं । आत्मनि । अपगतोशुक् यस्मात् ॥

अपशोकः । पुं । अशोकपादपे ।

अपष्टम् । न । अङ्कुशाग्रे । इतिहेमचन्द्रः ।

अपष्ठु । अ । निरवद्ये । शोभनार्थे । विपरीते ।

अपष्ठुः । पुं । काले । त्रि । वामे । प्रतिकूले । विरुद्धार्थे । अपतिष्ठति । ष्ठा गतिनिवृत्तौ । अपदुःसुषुभ्यःस्थ इति कुः सुषामादिः ।

अपष्ठुलम् । त्रि । निन्दिते । विपरीते ।

अपस् । न । यज्ञकार्ये । अपसशब्दार्थे ॥ आप्नोति । आप्लृ॰ । आपःकर्माख्यायांह्रस्वोनुट्चवेत्यसुन् पाक्षिकोनुडभावः ।

अपसदः । पुं । अधमे । नीचे । अपकृष्ट मपकृष्टेवासीदतिति । षद्लृविशरणादौ । पचाद्यच् ।

अपसरः । पुं । अपसरणे । सर्त्तेरप् ।

अपसरणम् । न । स्थानात्स्थानान्तरगमने ।

अपसर्जनम् । न । परिवर्जने । दाने ॥ आम्नाते । अपसृज्यते । सृज॰ ल्युट् ॥ मोक्षे । मारणे ।

अपसर्पः । त्रि । चरे । अपसर्पति । सृप्लृ गतौ । पचाद्यच् ॥ पुं । अहिभेदे । अपक्रमे ।

अपसर्पणम् । न । पृष्ठतोगमने ।

अपसलवि । अ । पितृतीर्थे । प्रदेशिन्यङ्गुष्ठयोर्मध्ये । यथा । प्रदेशिन्यङ्गुष्ठयोरन्तरा अपसलवि अपसव्यंवा तेनपितृभ्योनिदधाति इतिश्राद्धतत्त्वे भट्टभाष्यधृतगृह्यम् ।

अपसव्यम् । त्रि । शरीरदक्षिणे । शरीरस्यदक्षिणभागे । प्रतिकूले । विरुद्धार्थे । न । पितृतीर्थे । अपसलवि । अपगतम् अपक्रान्तंवा सव्यात् ।

अपसारणम् । न । अपनयने ।

अपसारितः । त्रि । उत्सारिते ॥

अपसिद्धान्तः । पुं । स्वीकृतसिद्धान्तात् प्रच्यवे । तल्लक्षणमाह । सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोऽपसिद्धान्तः । ५ । ६६ सिद्धान्तं स्वशास्त्रकाराभ्युपगतमर्थं स्वीकृत्याऽनियमात्तन्नियमप्रच्यवात् कथाप्रसङ्ग इति । तथाच कथायां स्वीकृतसिद्धान्तप्रच्यवोऽपसिद्धान्तः । तथाच सांख्यमतेनाहं वदिष्यामीत्यभ्युपेत्यारब्धायांकथायाम् आविर्भावस्याविर्भावाभ्युपगमेऽनवस्थेति दूषणोद्धारायाविर्भावस्यासत उत्पत्तिं यदभ्युपैति तद् ऽपसिद्धान्तः । यस्त्वेकदेशिमतेनकथामारभते तस्यशास्त्रकाराभ्युपगमविरोधेनापसिद्धान्तइतिविबोधयितुमभ्युपेत्येत्युक्तम् ॥ सौगतास्त्वपसिद्धान्तंदूषणं नमन्यन्ते इत्यन्यदेतत् ॥ अपकृष्टः सिद्धान्तः ॥

अपसोपानः । पुं । हस्तिमल्ले ।

अपस्करः । पुं । रथाङ्गे । चक्रभिन्नेरथा
ङ्गके । अपकीर्य्यतेऽस्य स्वल्पकाले
क्षिप्यते । कृविक्षेपे । स्कृदेशात् अप
स्करोऽभ्यासमिति साधुः ॥

अपस्नातः । त्रि । कृतस्नाते । मृतमु
द्दिश्यस्नातेजने । अपकृष्टंस्नातः ।
प्रादयोगताद्यर्थैरितिसमासः । संस्का
रार्थंस्नापितेमृते । इतिस्वामी ॥

अपस्नानम् । न । मरणनिमित्तस्नाने ।
मृतस्नाने । अपकृष्टंस्नानम् ॥

अपस्मारः । पुं । रोगभेदे । भूतविक्रिया
याम् । मिरगीतिख्याते । तस्यसामा
न्यरूपम् । मनःप्रवेशःसंक्षोभोदोषो
द्रेकहतस्मृतिः । अपस्मार इतिज्ञेयो
गदोघोरतरोऽखिलः ॥ अस्यौषधंयथा
। ब्रःस्वादेत्क्षीरभक्ताशीमाक्षिकेण
वचारजः । अपस्मारंमहाघोरं चिरो
त्थंशमयेद्ध्रुवमिति ॥ यथाघुरवच ।
अपिच । द्वौकीटमेषौविधिवद्दानी
वर्णविवस्तरे । काष्ठभुजेवासमार्य्य
जयेद्गुणामपस्मृतिमिति । अयंकीटो
नदीतीरेसिकतामध्येतिष्ठति । इति
भावप्रकाशः ।

अपस्मारी । त्रि । अपस्माररोगविशि ॥
तल्लक्षणम् । कुद्दैर्धातुभिराहतेऽस्य
मनसिमाक्षीमनःसञ्चयमन्तुमानखा
दक्षिकेनमुद्गिरतिदोःपादौक्षिपन्मू

हृषोः । अन्यत्कुमारसम् ...
पततिस्पर्धः करोतिविकृतिं ...
सस्वय ...
घम् । इति ।

अपहृतः । त्रि । अपनीते ॥ नष्टे ॥ अ
पकृष्टेभयः । हृञ्० । क्तः ॥

अपहतपाप्मा । पुं । वेदान्तवेद्यात्म-
नि । अपहतःपाप्माधर्माऽधर्मोयेन-
सः ॥

अपहतिः । स्त्री । विनाशे । उच्छेदे ।

अपहन्ता । त्रि । विनाशयितरि ॥

अपहर्त्ता । त्रि । अपहारिणि । यथा ।
आपदामपहर्त्तारं दातारं सर्वसम्प-
दाम् । लोकाभिरामं श्रीरामंभूयो
भूयोनमाम्यहमिति ।

अपहसितः । त्रि । निरस्ते ।

अपहारः । पुं । अपचये । हानौ । अ
पहरणे । चौर्य्ये ॥ सङ्गोपने । अनस्था
यनुपयोगिव्यये । इतिदायभागः ।
अपहरणम् । हृञ् हरणे । घञ् ॥

अपहारकः । त्रि । अपहारिणि । अप
हरणकर्त्तरि ॥ अपहरति । हृञो
ण्वुल् ।

अपहारी । त्रि । अपहरणशीले । अप
हर्त्तरि ।

अपहासः । पुं । अकारणहासे ।

अपहृतः । त्रि । अपनीते ।

अपङ्कर्षः । पुं । उत्कर्षे । अपकर्षे । इति मेदिनीहेमचन्द्रौ । अपकर्षणम् । क्षु-न्नु अपनयने । इत्यादौ ।

अपह्नुतिः । स्त्री । अपलापे । अर्थालंकारे ॥ प्रकृतं यन्निषिध्यान्यत् साध्यते साऽपह्नुतिः । उपमेयमसत्यं कृत्वोपमानं सत्यतया यत् स्थाप्यते साऽपह्नुतिः । उदाहरणम् । अवाप्तः प्रागल्भ्यं परिणतरुचः शैलतनये कलङ्को नैवायं विलसति शशाङ्कस्य वपुषि । अमुष्येयं मन्ये विगलदमृतस्यन्दशिशिरे रतिश्रान्ता शेते रजनिरमणी गाढमुरसि ॥ इत्थं वा । बत सखि कियदेतत् पश्य वैरं स्मरस्य प्रियविरहकृशेऽस्मिन् रागिलोके तथाहि । उपवनसहकारोद्भासिभृङ्गच्छलेन प्रतिविशिखमनेनोट्टङ्कितं कालकूटम् । अत्र हि न सभृङ्गाणि सहकाराणि अपि तु सकालकूटाः शरा इति प्रतीतिः ॥ एवं वा । अमुष्मिंल्लावण्यामृतसरसि नूनं मृगदृशः स्मरः शर्वप्लुष्टः पृथुजघनभागे निपतितः । यदङ्गाङ्गारााणां प्रशमपिशुना नाभिकुहरे शिखा धूमस्येयं परिणमति रोमावलिवपुः । अत्र रोमावलिर्धूमशिखेयमिति प्रतिपत्तिः ॥ एवमियं भङ्ग्यन्तरैरप्यूह्या । अपङ्कवनम् । क्रुक् ।

तिन् । [illegible]

अपांनाथः । पुं । समुद्रे । अकूपारे । इति राजनिर्घण्टः ॥

अपाकः । पुं । अजीर्णताजाम् । त्रि । पाकाभावविशिष्टे ।

अपाकरणम् । न । निराकरणे । अपाकपूर्वात् कृञोल्युट् ।

अपाकशाकम् । न । आर्द्रके । इति राजनिर्घण्टः ।

अपाकृतम् । त्रि । अपोढिते । त्यक्ते । अपाकारि । डुकृञ० । क्तः ।

अपाकृतिः । स्त्री । विकारे । अपाकरणे ।

अपाचम् । त्रि । प्रत्यक्षे । इति त्रिकाण्डशेषः ॥

अपाङ्क्तेयः । त्रि । पङ्क्तिभोजनानर्हे । सद्भिः सहैकपंक्त्यां भोजनायोग्ये । तेच । येस्तेनपतितक्लीबा ये च नास्तिकवृत्तयः इत्यादिवचनैर्मनुनोक्ता बोध्याः ।

अपाङ्गः । पुं । नेत्रान्ते । तिलके । त्रि । अङ्गहीने । अपगतोऽङ्गात् । निरादयइतिसमासः ॥ अपकृष्टाङ्गाद्वा । अपकृष्टान्यङ्गान्यस्माद्वा । अपाङ्गति । अगिगतौ । पचाद्यच् वा ।

अपाङ्गकः । पुं । अपामार्गे । नेत्रान्ते । त्रि । अंगहीने ।

अपाङ्गदर्शनम् । न । कटाक्षे । अपांगेन नेत्रान्तेन दर्शनम् । इति हेमचन्द्रः ।

अपाक् । त्रि । दक्षिणदिग्भवे वस्तुनि । अपाचीने ।

अपाची । स्त्री । दक्षिणदिशि ॥ अङ्को मध्ये अञ्चति सूर्य्यम् । अपेत्यव्ययं ध्यार्थे अपकृष्यमितिवत् । अञ्चु गतिपूजनयोः । ऋत्विगादिना क्विन् । उगितश्चेति ङीप् ।

अपाचीनम् । त्रि । विपर्य्यस्ते । अपागर्थे । दक्षिणदिग्भववस्तुनि । अपागेव । विभाषाञ्चेरदिक् स्त्रियामिति खः । तस्य ईनादेशः ॥

अपाच्यम् । त्रि । दक्षिणदिग्भवे । पाकानर्हे । सुप्रागपागित्यादिनाशेषिकोयत् । न पाच्यम् ।

अपाटवम् । न । रोगे । अपटुत्वे ॥ न विद्यते पाटवं यस्मिन् ।

अपात्रम् । न । योग्यताहीने । निन्दिते । विद्यातपोहीने । नटविटादौ । कुपात्रे । न पात्रम् । अपात्रे पातयेद्दत्तं सुवर्णं नरकार्णवे । इतिमत्स्यसूक्तम् ॥

अपात्रीकरणम् । न । नवविधपापमध्ये पापविशेषे । तच्चतुर्विधं भवति यथा । निन्दितधनादानम् १ । वाणिज्यम् २ । शूद्रसेवनम् ३ । असत्यभाषणम् ४ । इति । यथाह मनुः । निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम् ।

अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणमिति ।

अपादानम् । न । विश्लेषेऽवधिभूते । पञ्चमीकारके । यस्माद्वस्तुनोऽवस्त्वन्तरस्य चलनं भवति तस्मिन् । विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रय इत्यर्थः । तच्च कारणार्थे पञ्चमी स्यात् । यथा । यतोऽपायः । यथा वृक्षात्पर्णं पतति १ । यतो भीः । यथा व्याघ्राद्बिभेति २ । यतो जुगुप्सा । यथा पापात् जुगुप्सते धीरः ३ । यतः पराजयः । यथा सिंहात् पराजयते हस्ती ४ ॥ यतः प्रमादः । यथा धर्म्मात् प्रमाद्यति नीचः ५ । यत आदानम् । यथा भूपात् धनमादत्ते विप्रः ६ । यतो भूः । यथा पितुः पुत्रो जायते ७ । यतस्त्राणम् । यथा व्याघ्रात् गां रक्षति गोपः ८ । यतो विरामः । यथा पापाद्विरमति विप्रः ९ । यतोऽन्तर्द्धिः । यथा गुरोरन्तर्द्धत्ते शिष्यः १० । यतो वारणम् । यथा यवेभ्यो गां वारयति ११ । इति मुग्धबोधटीका ।

अपानः । पुं । गुदस्थवायौ । नाभेरधस्तादागमनवति मलापनयनव्यापारे पाय्वादिस्थानवर्त्तिनि वायौ ॥ यथा । अधोनयत्यपानस्तु आहारञ्च क्रमादधः । मूत्रशुक्रवहो वायुरपान

ऽनेनवोत्सृतः । कृकाटिकाद्युपाग्र्व पायूपस्यष्टति वायुः ॥ न । गुदे । अपसरत्येनानिलमनेन । इत्यधिकरणे घञ् ।

अपान्तरतमाः । पुं । वेदाचार्यपुरातनर्षिविशेषे । यःकश्चिद्द्वापरे वोः स एव विष्णुनियोगात् कृष्णद्वैपायनः सम्भूयेतिस्मृतौ प्रसिद्धम् ॥

अपांनपात् । पुं । एतन्नामधेयेदेवे ।

अपापः । त्रि । पापशून्ये । निष्पापे ॥

अपापविद्धः । त्रि । धर्माधर्मवर्जिते ॥ न पापविद्धः ॥

अपामार्गः । पुं । प्रत्यक्पर्ण्याम् । अपमार्जनेनेन अपमृज्यते ऽनेनमव्याध्यादिरितिवा । मृजूष॰ । करणे घञ् । निष्ठायामनिट्त्वात्कुत्वम् । उपसर्गस्य घञीतिदीर्घः । अपकृष्टआसमन्तान्मार्गोऽस्येतिवा । अपामार्गः सरस्तीक्ष्णोदीपनस्तिक्तकः कटुः । पाचनोनावमच्छर्दिकफमेदोनिलापहः । निहन्तिहृद्रुसिध्मार्शःकंडूशूलोदरापचीः । अपामार्गोऽरुणोवातविष्टंभीकफकृद्धिमः । रूक्षः पूर्वगुणैर्न्यूनः कथितोगुणवेदिभिः । अपामार्गफलंस्वादुरसे पाकेचदुर्जरम् । विष्टंभिवातलंरूक्षंरक्तपित्तप्रसादनमितिभावप्रकाशः ।

अपाम्पतिः । पुं । समुद्रे । वरुणे । अपांपतिः । तत्पुरुषे कृतिबहुलमित्यलुक् ।

अपाम्पित्तम् । न । अग्नौ । अपांपित्तमिवदाहकत्वात् । अलुक् ।

अपायः । पुं । विश्लेषे । अपाये । नाशे । अपगमे ॥

अपारः । त्रि । उत्तरावधिवर्जिते ॥ अपारः संसारार्कूपारः । अनन्तमहिमनि । नविद्यते पार उत्तरावधिर्यस्य । न । अपारे । नद्यादेरर्वाक्पारे ।

अपार्थः । त्रि । अर्थशून्ये ।

अपार्थकम् । न । इत्यंलक्षयतिगोतमः । पौर्वापर्यायोगादप्रतिसम्बद्धार्थमपार्थकम् ॥ ५ । ५३ । पौर्वापर्यंकार्यकारणभावस्तस्यायोगादसम्भवात्शाब्दबोधजनकाकांक्षाज्ञानाद्यभावादिति फलितार्थः । अप्रतिसंबद्धोऽसम्बद्धोर्थः प्रयोजनंशाब्दबोधरूपं यत्र । यद्यपि दशदाडिमानि षडपूपाः कुण्डमजाजिनमित्यादावबाधकत्वाद्यर्थबोधसत्त्वादव्याप्तिरितिव्याप्तिश्चनिरर्थके । तथाप्यभिमतवाक्यार्थबोधानुकूलाकांक्षादिशून्यबोधजनकत्वं तत्। अविज्ञातार्थं तुवस्य वाश्रोभवत्येवेति नातिव्याप्तिः । एव

रणवस्तु । अयोग्यानामसामानाकांच काव्यम् । ५३ । अनर्थके । व्यर्थे ॥

अपावृतः । त्रि । पिहिते । अप्रतिबद्धे । स्वतन्त्रे । उद्घाटिते । अपगतमावृतमावरणमस्य ॥

अपावृत्तम् । त्रि । लुठिते । परावृत्ते ॥

अपाश्रयः । पुं । चन्द्रातपे । प्रांगनावरणे । त्रि । आश्रयशून्ये । अधीने ॥

अपासनम् । न । मारणे । अनुचये । भावेल्युट् ॥

अपास्तः । त्रि । निरस्ते । अवधीरिते ॥

अपि । ऽ । सम्भावनायाम् । प्रश्ने । शङ्कायाम् । गर्हायाम् । समुच्चये । युक्तपदार्थे । क्रियाकारं क्रियायाम् । कामकारक्रियासु । अन्वायाम् । अवधारणे । पुनरर्थे । अपिवति । पिगतौ । क्विप् । आगमशास्त्रस्यानित्यत्वात्तुक् ॥

अपिगीर्णम् । त्रि । ईरिते । स्तुते । वर्णिते । गीर्णे । अपिगीर्यतेस्म । गनिगरणे । क्तः । निष्ठातस्यनः ॥

अपितु । ऽ । किन्त्वर्थे । यद्यर्थे । यद्यपि ॥

अपिधानम् । न । आच्छादने । अपिपूर्वकाड्डुधाञोल्युट् ॥ त्रि । पिधानरहिते ॥

अपिनद्धः । त्रि । परिहिते वस्त्रादौ । पिनद्धे । अपिनह्यतेस्म । णहबन्धने । क्तः ॥

अपिहितः । त्रि । छादिते । अपिधीयतेस्म । डुधाञ्० । क्तः । दधातेर्हिः ॥

अपीच्यम् । त्रि । अतिसुन्दरे ।

अपीतिः । स्त्री । प्रलये । अप्यये । एकीभावे ॥

अपीनसम् । न । पीनसरोगे । इतिरभसः । त्रि । तद्रहिते ॥

अपुच्छा । स्त्री । शिंशपावृक्षे । त्रि । पुच्छहीने ॥

अपुनरावृत्तिः । स्त्री । मुक्तौ । कैवल्ये ॥

अपुनर्भवः । पुं । मुक्तौ । त्रि । मुक्ते । पुनर्जन्माभावे । यथाश्चरकः । हेतौवितृष्णे प्रशमनेरोगाणामपुनर्भवे । ज्ञानंचतुर्विधंयस्यसराजार्होभिषक्तमइति । अपुनर्भवोयस्यसः ॥

अपुष्पफलदः । पुं । पनसोदुम्बरादिवनस्पतौ ॥

अपूपः । पुं । पिष्टके । गोधूमे । नपूयते । पूयीविशरणे । बाहुलकात्पः । वलिलोपः । यद्वा । पवनं पूः । पूञ् पवने । संपदादित्वात्क्विप् । अपुर्यंपाति पिबतिवा । पा० । आतोनुपेतिकः ॥

अपूपीयम् । त्रि । अपूपार्थकपिष्टादौ । अपूपेभ्योहितम् । विभाषाहविरपूपादिभ्यइतिछः ॥

अपूप्यम् । त्रि । अपूपीये । गोधूमचूर्णे ॥

अपूपेभ्यो हितम् । यत् ॥

अपूरणी । स्त्री । शाल्मलितरौ ।

अपूर्वः । त्रि । अदृष्टपूर्वे । अविदिते । आश्चर्ये । यथा । अपूर्वं यद्धरेर्मोया त्रिगुणा रज्जुरूपिणी । यया मुक्तोऽनवरतिबद्धो धावति धावति । पुं । पूर्वभाविकारणसंस्पर्शशून्ये अकार्ये परमात्मनि । न विद्यते पूर्वं कारणं यस्य सः । न । यागाद्यन्तरव्यापारे ॥ धात्वर्थातिरिक्तकालान्तरभाविकस्य फलस्य साधने । अत्र पक्षद्वयं मीमांसकानाम् । तदानीमेव स्वस्वरूपत्वेनोत्पन्नं फलमेवाऽपूर्वम् । कालान्तरफलोत्पादिका कर्मशक्तिर्वेति । तदुक्तम् । यागादेव फलं तद्धि शक्तिद्वारेण सिध्यति । सूक्ष्मशक्त्यात्मकं वापि फलमेवोपजायते ॥ इति ॥

अपूर्वता । स्त्री । अपूर्वत्वे । भावे तल् ।

अपूर्वत्वम् । न । अपूर्वतायाम् । षड्विधलिंगेषु तृतीये लिङ्गे । प्रकरणप्रतिपाद्यस्य प्रमाणान्तरेणाविषयत्वमपूर्वत्वम् । यथा छान्दोग्ये षष्ठप्रपाठके अद्वितीयवस्तुनो मानान्तरेणाविषयीकरणम् ॥ भावे त्वः ॥

अपूर्वप्रवेशः । पुं । प्रथमप्रवेशे । नवं गृहं निर्माय तत्र प्रथमप्रवेशे ।

अपूर्वविधिः । पुं । प्रमाणान्तरेणाऽप्राप्तस्य प्रापके विधौ । यथा यजेत स्वर्गकाम इत्यादिः । स्वर्गार्थं यागस्य प्रमाणान्तरेणाप्राप्तस्यानेन विधानात् ॥ अपूर्वश्चासौ विधिश्च ।

अपेक्षणीयः । त्रि । अपेक्षायोग्ये । अपेक्षितव्ये ॥

अपेक्षा । स्त्री । आकांक्षायाम् । कार्यनिमित्तयोरन्योन्याभिसम्बन्धे । अपेक्षणम् । ईक्ष० । गुरोश्च हलः इत्यः । टाप् ॥

अपेक्षाबुद्धिः । स्त्री । अनेकैकत्वविषयकबुद्धौ । नानैकत्वावगाहिबुद्धौ । अयमेकः अयमेक इत्याकारबुद्धौ । इति कारिकावली ।

अपेक्षितः । त्रि । ईप्सिते ।

अपेतः । त्रि । रहिते । अपहृते । अपगतः ॥

अपेतकृत्यः । त्रि । कृत्यशून्ये । कृतकृत्ये ।

अपेतराक्षसी । स्त्री । तुलस्याम् । वृन्दाख्ये । इति राजनिर्घण्टः ।

अपेताखिलचापलः । त्रि । नियतेन्द्रिये ॥

अपोगण्डः । त्रि । बालिशे । अतिभीरौ । विकलाङ्गे । शिशौ ॥ पवते पुनाति वा । पूङः पूञो वा क्विप् । पोगण्ड एकदेशोऽस्य । न पोगण्डः ।

अपोढः । त्रि । निरस्ते ॥ बाधिते । यथा । मातुर्वेषः परोक्षात्मापिवा

कल्पितः स्मृतः । अपोढेविषयात्मिन् रज्ज्वांसर्पत्वाद्यः । इत्युपदेश साहस्र्यां १४ प्रकरणे १७ पद्यम् ॥

अपोढकर्म्मा । त्रि । त्यक्तव्यापारे ।

अपोदका । स्त्री । उपोदकायाम् । शाकान्तरे । अपगतमुदकमस्याः ।

अपोनपात् । पुं । एतन्नामधेयेदेवताविशेषे ।

अपोहः । पुं । तर्कनिराकरणे । वितर्काभावे । शुश्रूषाद्यष्टधाधीगुणान्तर्गतषष्ठगुणे । त्यागे । अतद्व्यावृत्तौ । अपगतऊहः । अपोहनम् । ऊह० । घञ् ।

अपोहनम् । न । कामक्रोधशोकादिव्याकुलचेतसां स्मृतिज्ञानयोरपाये । अपोह्हे ।

अपोह्हितम् । त्रि । अनाकृते ।

अप्तुर् । न । यज्ञकार्ये ।

अप्तुः । पुं । शरीरे । अभिलषितार्थे । अंगे । आप्नोति । आप्ल्व्याप्तौ । आप्नोतेर्ह्रस्वश्चेतितुः ।

अप्नस् । न । अम्बुनि । आप्नोति । आप्ल० । आपःकर्माख्यायांह्रस्वोनुट् चवेत्यसुन् । वैदिकोयमितिकश्चित् ।

अप्पतिः । पुं । वरुणे । अम्बुधौ । अपां पतिः ।

अप्पित्तम् । न । अग्नौ । चित्रकौषधौ ॥ अपांपित्तमिवदाहकत्वात् ।

अप्ययः । पुं परब्रह्मणि । अपियन्ति लीयन्तेजगन्त्यस्मिन् । अपपूर्वादिणो ऽधिकरणे ऽच्प्रत्ययः । अपाये । अपीतौ । लये । अप्येत्यस्मिन् । इण् इगतौवा । एरच् ।

अप्रकाण्डः । पुं । झिण्टिकादौ । स्तम्बे । गुल्मे । नप्रकाण्डोऽस्य ।

अप्रकाशः । पुं । सत्यप्युपदेशादौबोधकारणेसर्वथाबोधायोग्ये । प्रकाशाभावे । जनान्तिके । गोपने ॥ ३ प्रकाशाभाववति । नप्रकाशः ।

अप्रखरः । त्रि । मतीक्ष्णे । प्राखर्यरहिते ।

अप्रगुणम् । त्रि । व्याकुले । अप्रकृष्टगुणे । भिन्नःप्रगुणात् ॥

अप्रणयः । पुं । अप्रीतौ । प्रणयनम् प्रणयः । नप्रणयः ॥

अप्रतर्क्यः । त्रि । मनोऽगोचरे । अनुमानाविषयेश्रुत्यैकसमधिगम्ये परमेश्वरे ।

अप्रतिकरः । त्रि । विश्वस्ते । विश्वासपात्रे । इतिजटाधरः ।

अप्रतिघः । त्रि । अप्रतिबद्धे । नप्रतिघः ।

अप्रतिपक्षः । त्रि । अप्रतियोगिनि । विपक्षशून्ये । नास्तिप्रतिपक्षोयस्यसः ।

अप्रतिपत्तिः । स्त्री । मकृतज्ञाने ॥

अप्रतिबद्धः । त्रि । उद्दामे । नप्रतिबद्धः ।

अप्रतिभः । त्रि । अधृष्टे । लज्जिते । अप्रत्युत्पन्नमतौ । अप्रगल्भे । नास्ति प्रतिभा नवनवोन्मेषशालिनीप्रज्ञा यस्य सः ।

अप्रतिभा । स्त्री । निग्रहस्थानविशेषे । यथा । उत्तरस्याप्रतिपत्तिरप्रतिभेतिगोतमः । ५ । ६१ । उत्तरार्हे परोक्तं बुद्ध्वापि यदोत्तरसमये उत्तरं न प्रतिपद्यते तदाऽप्रतिभानिग्रहस्थानम् ।

अप्रतिमः । त्रि । असदृशे । नविद्यते प्रतिमा उपमा यस्य सः ।

अप्रतिरथम् । न । यात्रायाम् । मङ्गले । सामवेदे । इतित्रिकाण्डशेषो भूरिप्रयोगश्चेति शब्दकल्पद्रुमेराधाकान्तः । पुं । भटे । हरौ । नविद्यते प्रतिरथः प्रतिपक्षोऽस्य । तुल्ययोद्धृरहिते इतिपुराणम् ।

अप्रतिरूपकथा । स्त्री । अप्रतिवचनायांवाचि । सङ्गविकायाम् । इतित्रिकाण्डशेषः ।

अप्रतिष्ठः । त्रि । अप्रतिष्ठिते । प्रतिष्ठारहिते ॥ नास्तिप्रतिष्ठायस्यसः ।

अप्रतिष्ठानम् । न । अस्थैर्ये ।

अप्रतिष्ठितः । त्रि । अप्रतिष्ठे । प्रतिष्ठारहिते । नप्रतिष्ठितः ।

अप्रतिसम्बद्धः । त्रि । असम्बद्धे ।

अप्रतिहतः । त्रि । विघ्नैरनभिभूते ।

अप्रत्यक्षम् । न । प्रत्यक्षभिन्ने । प्रत्यक्षाभावे । त्रि । प्रत्यक्षशून्ये । अतीन्द्रिये । भिन्नंप्रत्यक्षात् ।

अप्रत्ययः । पुं । अविधीयमाने । अविश्वासे । प्रतीयते विधीयते इतिप्रत्ययः । न प्रत्ययः । नास्तिप्रत्ययो यस्यवा ।

अप्रधानम् । न । अप्राधान्ये । अंगभूते । गौणे । प्रधानादन्यत् ॥ वाच्यलिङ्गोप्ययम् ।

अप्रधृष्यः । त्रि । अचाल्ये । नप्रधृष्यः ।

अप्रमत्तः । त्रि । प्रमादवर्जिते । सावधाने । नप्रमत्तः । नप्रमाद्यति वा । मदी० । क्तः ।

अप्रमेयः । त्रि । अचिंत्यप्रभावे । इदमित्थमितिपरिच्छेत्तुमशक्ये । स्वप्रकाशचैतन्यरूपे । फलाव्याप्ये । अनवगम्यमानप्रमेये । तथाहि । परमेश्वरो हि शब्दादिरहितत्वा अप्रत्यक्षः । नाप्यनुमानविषयो व्याप्तिलिंगाद्यभावात् । नाप्युपमानसिद्धो निर्विभागत्वेनसादृश्याभावात् । नाप्यर्थापत्तिग्राह्यः तद्विनानुपपद्यमानस्या सम्भवात् । नाप्यभावगोचरो भावरूपत्वा- दभावसाक्षिकत्वाच्च । नापिशास्त्रप्र-

अप्रस्तु

मानमेय: प्रमाणजन्यातिशयाभा-
वात् । यद्येवं सामान्ये निष्कलंकत्व मुच्य
ते । प्रमाणाद्विसाधितत्वेन प्रकाशस्व
रूपस्य प्रमाणाविषयत्वे ब्रह्मत्वात
द्रूपनिवर्त्तकत्वेन शास्त्रप्रमाणकत्वम
इत्यप्रमेयोभगवानीश्वर: । प्रमातुर्यो
ग्य: प्रमेय: । न प्रमेय:अप्रमेय: ।
अप्रलम्बम् । न । अविलम्बे । शीघ्रे ।
त्रि । तद्वति ।
अप्रशस्तम् । त्रि । अश्रेष्ठे । अविहिते ।
यथा । अप्रशस्तं विनिशिलामं राह्मोर
न्यपदृश्य नादितिपराशर: ।
अप्रसङ्ग: । पुं । अव्यतिकरे ।
अप्रसन्नम् । त्रि । अनच्छे । अतुष्टे ।
अप्रस्तुत: । त्रि । अनुपस्थिते । प्रकरणा
प्राप्ते । नप्रस्तुत: ।
अप्रस्तुतप्रशंसा । स्त्री । अर्थालंकारवि
शेषे । अप्राकरणिकस्यार्थस्याभिधा
नेन प्राकरणिकस्याक्षेपे । यथा । अ
प्रस्तुतप्रशंसा सा याचैव प्रस्तुताश्र-
या । साच । कार्येनिमित्ते सामान्ये
विशेषे प्रस्तुतेसति । तदन्यस्यवचस्तु
ल्ये तुल्यस्येति चपञ्चधा ॥ तदन्यस्यका
रणादे: । क्रमेणोदाहरणम् । याता:
किन्नमिलन्ति सुंदरिपुन श्चिन्तात्व
या मत्कृते नोकार्यानितरां कृशा
सि कथयत्येवं सबाष्पेमयि । लज्जाम

अप्रस्तु

न्थरतारकेण निपतन्पीताश्रुणा च
क्षुषा दृष्ट्वामां हसितेनभाविमरणो-
त्साहस्तयासूचित: । अत्रप्रस्थानात्
किमिति निवृत्तोसीति कार्ये पृष्टेकार
णमभिहितम् ॥ १ ॥ राजन् राज
सुता नपाठयति मां देवोपि तूष्णीं
स्थिता: । कुब्जे भोजयमां कुमारस
चिवैर्नाद्यापि किंभुज्यते । इत्थंनाथ
शुकस्तवारिभवने मुक्तो ध्वगै:पञ्जरा
च्चित्रस्थानवलोक्य शून्यवलभावे कै
कमाभाषते ॥ अत्रप्रस्थानोद्यतंभ
वन्तं ज्ञात्वा सद्यएवत्वदरय: पलाय्य
गताइति कारणे प्रस्तुते कार्यमुक्तम् ।
२ ॥ एतत्तस्य मुखात् कियत्कमलि
नीपत्रेकणं वारिणो यन्मुक्तामणि रि
त्यमंस्तसजड:शृणु यदन्यस्मादपि ।
अङ्गुल्यग्रलघुक्रिया प्रविलयि न्यादी-
यमानेशनै: कुत्रोड्डीय गतो ममे-
त्यनुदिनं निद्राति नान्त:शुचा । अ
नास्थाने जडानांममत्व संभावना-
भवतीति सामान्ये प्रस्तुते विशेष:क
थित: । ३ । सुहृद्वधूवाष्प जलप्रमा-
र्जनं करोति वैरप्रतियातनेनय: । स
एवपूज्य:सपुमान् सनीतिमान् सु
जीवनं तस्य स भाजनं श्रिय: ॥ अत्र
कृष्णं निहत्य नरकासुरवधूनां यदि
दु:खंप्रशमयसि तत्त्वमेवश्लाघ्यइति-

विशेषे प्रकृते सामान्यमुदितम् । ४ । तुल्ये प्रस्तुते तुल्याभिधाने त्रयः प्रकाराः । श्लेषः समासोक्तिः सादृश्यमात्रं वा । तुल्यात्तुल्यस्य ह्याक्षेपे हेतुः । क्रमेणोदाहरणम् । पुंस्त्वादपि प्रविचलेद्यदि यद्यधोपि यायाद्यदि प्रणयनेन महानपि स्यात् । अभ्युद्धरेत्तदपि विश्वमितीदृशीयं केनापि दिक्प्रकटिता पुरुषोत्तमेन । येनास्यभ्युदितेन चन्द्र गमितः क्लान्तिं रवौ तत्र ते युज्येत प्रतिकर्तुमेवमपुनस्तस्यैव पादग्रहः । क्षीणे नैतदनुष्ठितं यदि ततः किं लज्जसे नो मनागस्त्वेवं जडधामतात्तु भवतो यद्व्योम्नि विस्फूर्जसे ॥ आदाय वारि परितः सरितां मुखेभ्यः किन्तावदर्जितमनेन दुरर्णवेन । क्षारीकृतं च वडवादहने हुतं च पातालकुक्षिकुहरे विनिवेशितं च ॥ इयं च क्वचिद्वाच्ये प्रतीयमानार्थानध्यारोपेणैव भवति । यथा । अब्धेरम्भः स्थगितभुवनाभोगपातालकुक्षेः पोतोपाया इह हि बहवो लंघनेपि क्षमन्ते । आहो रिक्तः कथमपि भवेदेष दैवात्तदानीं को नाम स्यादवटकुहरालोकनेऽप्यस्य कल्पः ॥ क्वचिदध्यारोपेणैव यथा । कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकं

वैराग्यादिव वक्षि साधु विदितं कस्मादिदं कथ्यते । वामेनात्र वटस्तमध्वगजनः सर्वात्मना सेवते न च्छायापि परोपकारकरणी मार्गस्थितस्यापि मे । क्वचिदंशेनाध्यारोपेण । यथा । सोपूर्वो रसनाविपर्ययविधिस्तत्कर्णयोश्चापलं दृष्टिः सा मदविस्मृतस्वपरदिक् किं भूयसोक्तेन वा । सर्वं विस्मृतवानसि भ्रमर हे यद्वारणोऽद्याप्यसावन्तःशून्यकरो निषेव्यत इति भ्रातः क एष ग्रहः । अत्र रसनाविपर्यासः शून्यकरत्वं च भ्रमरस्यासेवने न हेतुः कर्णचापलं तु हेतुः । मदः प्रच्युतसेवने निमित्तम् । इति काव्यप्रकाशः ॥

अप्रहतम् । त्रि । अनाहते । इलायाम् अकृष्टभूमौ । खिले । नप्रहन्यते वा । हनहिंसागत्योः । कर्मणिक्तः ॥

अप्राकृतः । त्रि । अलौके । सामान्ये ॥

अप्राग्र्यम् । त्रि । अप्रधाने । प्राग्र्यादिन्नम् ॥

अप्राचीनम् । त्रि । नव्ये ॥ प्राचीनतरदिग्भवे ॥ नप्राचीनम् ।

अप्राप्तः । त्रि । अलब्धे । नप्राप्तः ।

अप्राप्तकालम् । न । सभाक्षोभव्यामोहादिनाव्यस्तस्याऽभिधाने । यथाह गौतमः । अवयवविपर्यासवचनमप्राप्तकालमिति । ५ । ५४ । अवय

यस्य कथैकदेशस्य विपर्यासोवैपरी
त्यम् । तथाच समयबन्धविषयीभूत
कथाक्रमविपरीतक्रमेणाभिधानं प
र्य्यवसन्नम् । तथायंक्रमः । वादिना
साधनमुक्ता सामान्यतो हेत्वाभासा
उद्भावनीया इत्येकः पादः । प्रतिवा
दिनश्च तथोपालम्भो द्वितीयः पादः
। प्रतिवादिनः स्वपक्षसाधनं तत्र हे
त्वाभासोद्भावनमितितृतीयः पादः ।
जयपराजयव्यवस्था चतुर्थः पादः । ए
वंप्रतिज्ञाहेत्वादीनांक्रमः । तत्रस
भाक्षोभभयमोहादिनाव्यस्तस्याभि
धानमप्राप्तकालमिति । त्रि । अल
ब्धसमये । अप्राप्तःकालोयस्य ।

अप्राप्तव्यवहारः । त्रि । व्यवहारानभि
ज्ञे । अप्राप्तवयस्के । यथा । अप्राप्त
व्यवहाराणां धनं व्ययविवर्जितम् ।
न्यसेयुर्बन्धुमित्रेषु प्रोषितानांतथैव-
च ॥ इतिदायतत्त्वे कात्यायनः । कि
ञ्च । गर्भस्थैःसदृशोज्ञेयअष्टमात् व
त्सराच्छिशुः । बालआषोडशाद्वर्षा
त्पौगण्डोपिनिगद्यते । परतो व्य
वहारज्ञः स्वतन्त्रःपितरावृते । इति
व्यवहारतत्त्वेनारदः ।

अप्राप्तिः । स्त्री । अलाभे । द्वादशभ
वने ।

अप्रामाणिकः । त्रि । प्रमाणानभिज्ञे ॥
प्रमाणासिद्धे ।

अप्रामाण्यम् । न । प्रमाणाभावे ॥

अप्रियम् । त्रि । अहिते । अनिष्टवस्तु
नि । नप्रियम् ।

अप्रिया । स्त्री । मद्गुरसमेमत्स्ये । शृङ्गी
मत्स्ये ।

अप्रीतिः । स्त्री । दुःखे ॥

अप्रीत्यात्मकः । पुं । रजोगुणे ।

अप्सराः । स्त्री । उर्वश्यादिस्वर्वेश्या
याम् । अद्भ्यः सरति । सरतेरपपूर्वा
त् अप्सरा इत्यसिः । स्त्रियांबहुष्व
प्सरसःस्यादेकत्वेऽप्सराअपीति श-
ब्दार्णवः । एकाप्सरःप्रार्थितयोर्विवा
द इतिरघुः ॥

अप्सरसः । स्त्री । भूम्नि । उर्वश्यादि
स्वर्वेश्यायाम् । यथा । उर्वशीमेन-
कारम्भाघृताची पुञ्जिकस्थली । सु
केशीमञ्जुघोषाचमहारङ्गवतीति-
ताइति ॥ अद्भ्यःसरन्ति । सृगतौ । सर
तेरपपूर्वादप्सरा इत्यसिः । भूम्नीति
प्रायोवादः । अनवद्येतिह्येके अप्स
रा इतिभाष्यप्रयोगात् ॥ वह्निपुरा
णेगणभेदनामाध्यायेद्वादशाप्सरसः
प्रोक्ताःयथा । उर्वशीमेनकारम्भामि
श्रकेशीह्यलम्बुषा । विश्वाचीघृता
चीचपञ्चचूडातिलोत्तमा । भानुम
त्यथवलावर्चाद्वादशाप्सरसः शुभा-

इति ।

अफलः । पुं । झावुके । इतिशब्दचन्द्रिका । त्रि । अवकेशिनि । निष्फले । नफलान्यस्य ।

अफलप्रेप्सुः । त्रि । फलाभिलाषरहिते ।

अफला । स्त्री । घृतकुमार्याम् । भूम्यामलक्याम् । इतिशब्दचन्द्रिका ।

अफेनम् । न । अहिफेने । सप्तविधम् । एकं श्वेतवर्णम् अजीर्णताकारकत्वान्नाम आरम्भम् । द्वितीयं कृष्णवर्णम् मृत्युकारकत्वान्नाममारणम् । तृतीयम् पीतवर्णम् वयःस्तम्भनकारकत्वान्नामधारणम् । चतुर्थं कर्बुरवर्णम् मलसारकत्वान्नाम सारणम् ॥ इतिराजनिर्घण्टः ॥

अबद्धम् । त्रि । समुदायार्थशून्यवाक्ये । यथा । जरद्गवः कम्बलपादुकाभ्यां द्वारिस्थितोगायतिमंगलानि । तं ब्राह्मणीपृच्छतिपुत्रकामाराजन् रुमायांलशुनस्यकोऽर्घः इत्याद्यस्यविषयः । अबन्धने । नबध्यतेस्म । बन्ध बन्धने । क्तः ।

अबद्धमुखः । त्रि । अप्रियवादिनि । मुखरे । न बद्धंनियंत्रितं मुखमस्य ।

अबद्धम् । त्रि । असधार्थे । अनर्थकवचसि । इतिमेदिनीहेमचन्द्रौ ।

अबन्ध्यः । त्रि । फलेग्रहौ । सफले । बन्ध्येसाधुः । तत्रसाधुरितियत् । नबन्ध्यः ।

अबलः । पुं । वरुणवृक्षे । त्रि । बलशून्ये । दुर्बले । नास्तिबलं यस्य ॥

अबला । स्त्री । वनितायाम् । यथा । हृदये वहसि गिरीन्द्रौ त्रिभुवनजयिनीकटाक्षेण । अबलास्त्वंयदि कस्तेकिवलवन्तोवयंजानीमइति । अल्पंबलमस्याः । अल्पार्थेनञ् । पराशरौ । नविद्यते बलंयस्याःसकाशात्तस्मात् ।

अबलिमा । पुं । अबलभावे । हेमन्तरोगादिनिमित्ते जरादिनिमित्तेवाकृशीभावे ॥

अबाधः । त्रि । निरर्गले । अनिवारिते ॥ नबाधा अस्य ॥

अबाध्यः । त्रि । सत्ये । प्रमाणान्तरेणबाधायोग्ये ॥

अबिन्धनः । पुं । वाडवाग्नौ । विद्युति ॥ आपइन्धनंदाह्यमस्य ॥

अबोधः । पुं । अज्ञाने । त्रि । बोधहीने ।

अबोधविक्लवः । त्रि । अज्ञानोपहते । अबोधेनविक्लवः ।

अब्जः । पुं । न । शङ्खे । पुं । निचुले । धन्वंतरौ । हिमकिरणे । न । पद्मे । संख्यान्तरे । दशार्बुदे । शतकोटिसंख्यायाम् । १०००००००० । नरकान्तरे । अप्सुजातः । पञ्चम्यामजा

त्वमितिडः । अनुजायते । अनीमा दुर्भावे । सप्तम्यामितिडोवा ।

अब्जकर्णिका । स्त्री । संवर्त्तिकायाम् ।

अब्जजः । पुं । ब्रह्मणि ॥ योगान्तरे । यथा । स्वराग्नौस्वांशगे सौम्ये खग स्वेवाभृगोःसुते । जीवेवाऽब्जजयो गोयं यातुःमनुविनाशकृदिति ।

अब्जभोगः । पुं । वराटके । पद्मकन्दे ॥

अब्जयोनिः । पुं । धातरि । ब्रह्मणि । अब्जंयोनिरुत्पत्तिस्थानमस्य । विष्णो र्नाभिकमलजत्वात् ।

अब्जवाहनः । पुं । शिवे । इतित्रिका ण्डशेषः । स्त्री । लक्ष्म्याम् ।

अब्जस् । न । रूपे । आप्नोति । आप्ऌ० । रूपेजुट्चेत्यसुन् ह्रस्वश्चधातोः प्र त्ययस्यजुट्च । अब्जसी अब्जांसि ।

अब्जहस्तः । पुं । दिवाकरे ।

अब्जिनी । स्त्री । नलिन्याम् । पद्मसमू हे ॥ पद्मलतायाम् । अब्जानिसन्त्य स्याम् । पुंष्करादिभ्योदेशइतीनिः ।

अब्जिनीपतिः । पुं । सूर्ये ।

अब्दः । पुं । संवत्सरे ॥ सचसावनःसौरश्चा न्द्रोनाक्षत्रोवार्हस्पत्यश्चेतिपञ्चविधः । वारिवाहे । मुस्तके ॥ शैलभेदे । आप्यते । आप्ऌव्याप्तौ । अब्दादयश्चे तिदन् ह्रस्वत्वञ्च । अपतिवा । अप० । पूर्ववत्साधुः ॥ अपोददाति । तुद्दा

न० । आतोनुपेतिकोवा ।

अब्दपर्य्ययः । पुं । समासे वर्षे वितीय वर्षस्यप्रवृत्तौ ।

अब्दसारः । पुं । कर्पूरप्रभेदे ।

अब्दुर्गम् । न । जलदुर्गे । अगाधोद केनसर्वतः परिवृतेराज्ञोवासपुरे ।

अब्धिः । पुं । समुद्रे । आपोधीयन्ते ऽ त्र । कर्मण्यधिकरणे चेति धाञः किः । चतुर्थाङ्के । सरसि ।

अब्धिकफः । पुं । सिन्धुफेने । डिण्डी रे । इत्यमरः । अब्धेः कफइव ।

अब्धिजः । पुं । विधौ । अब्धेर्जातः । ज नी० । डः ।

अब्धिद्वीपा । स्त्री । पृथिव्याम् । इतित्रि काण्डशेषः ।

अब्धिनगरी । स्त्री । कृष्णपुरि । द्वारा वत्याम् । अब्धौ नगरी ।

अब्धिनवनीतम् । न । शशिनि । अब्धे र्नवनीतमिव ।

अब्धिफेनः । पुं । समुद्रफेने ।

अब्धिमण्डूकी । स्त्री । शुक्तौ । मुक्ता स्फोटे । सीपी इतिभाषा ॥ इतिहे मचन्द्रः ।

अब्धिशयनः । पुं । नारायणे । अब्धिः शयन मस्य ।

अब्ध्यग्निः । पुं । वाडवानले । इतिहेम चन्द्रः ।

अभ्युत्थम् । त्रि । समुद्रभवे ।

अभ्रचः । पुं । सर्पे । इतित्रिकाण्डशेषः ॥ त्रि । जलाहारिणि ।

अभ्रमातङ्गः । पुं । ऐरावते । अभ्रमातङ्गे ।

अभ्रिः । स्त्री । तीक्ष्णाग्रलोहदण्डे । अभ्रिं कार्ष्णायसीं दद्यात् सर्पं हत्वा द्विजोत्तम इतिमनुः । अभ्रति । अभ्रगत्याम् । इन् ।

अब्रह्मचर्य्यकम् । न । मैथुने । इतित्रिकाण्डशेषः ।

अब्रह्मण्यम् । न । नाट्योक्त्या अवध्योक्तौ । वधं नार्हतीति वचसि । ब्रह्मणि साधुः । तत्र साधुरिति यत् । ततो नञ्समासः । ब्रह्मण्याभावे । त्रि । तद्वति ।

अब्राह्मणः । पुं । अब्राह्मणपदवाच्येषु षट्सु । ते चोक्ताः शातातपेन यथा । अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववेदिना । आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी । तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः । पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च । अनादित्यां तु यः पूर्वां सादित्यां चैव पश्चिमाम् । नोपासीत द्विजः संध्यां स षष्ठोऽब्राह्मणः स्मृतः इति ।

अभक्ष्यः । त्रि । भक्षणायोग्ये ग्राम्यकुक्कुटादौ । यथा । अभक्ष्यो ग्राम्यकुक्कुटः अभक्ष्यो ग्राम्य सूकर इतिमहाभाष्यम् । एवञ्च ग्राम्यकुक्कुटादौ विशेषनिषेधस्येतराभ्यनुज्ञाफलकतया आरण्यकादिभक्षणे दोषाभाव इति विवरणम् ।

अभद्रः । त्रि । दुःखरूपे ।

अभयम् । न । वीरणाङ्घ्रौ । उशीरे ॥ गर्भवासादि दुःखाभावे । मोक्षे ॥ अशेषभयनिवृत्तिसाधने आत्मदर्शने । त्रि । भयशून्ये । सर्वपरिग्रहशून्ये एकाकिनि । शास्त्रोपदिष्टेऽर्थे सन्देहं विनाऽनुष्ठाननिष्ठे । पुं । याज्ञायोगान्तरे । यथा । उत्तमूलत्रिकोणेषु वर्त्ते तेगुरुभार्गवौ । अभयाभिधयोगोऽयं भयंकर विनाशन इति । अन्यच्च । यत्रैकादशगश्चन्द्रो भानुर्वा प्रबलः शुभः । अभयो नाम योगोऽयमरिभूतविनाशकृदिति । नभयमस्मात् । आत्मनि ॥ आत्मातिरिक्तस्य कस्यचिदभावात् ।

अभयडिण्डिमः । पुं । युद्धवाद्यविशेषे । रणतूर्य्ये । सङ्ग्रामपटहे ।

अभया । स्त्री । हरीतक्याम् । पञ्चरेखाभया प्रोक्तेति लक्षणलक्षितायाम् ॥ नेत्ररोगे प्रशस्तेयम् । नभयमस्याः ॥

अभवः । पुं । मोक्षे ।

अभव्यः । त्रि । अविनीते । निर्भाग्ये ।

गमश्च:।

अभाव:। पुं। मरणे। असत्त्वे। द्रव्यादिषट्कभिन्ने। स चतुर्विधोयथा। प्रागभाव: प्रध्वंसाभाव: अन्यन्ताभाव: अन्योन्याभावश्चेतितर्कसङ्ग्रह:। संसर्गाभावोऽन्योन्या भावश्चेतिद्विविधोऽभाव इतिभाषापरिच्छेद:॥ नाशे। त्रि। प्रेमशून्ये। भ वहीने॥ भाव: स्थायिभावादिरित्यालङ्कारिका:।

अभावसम्पत्ति:। स्त्री। प्रमाणप्रमेययोर्मिथ्यात्वबुद्धौ।

अभाषणम्। न। मौने॥ नभाषणम्। भाषव्यक्तायांवाचि। भावेल्युट्॥

अभि। । इत्थंभूतकथने। आभिमुख्ये। अभिलाषे। वीप्सायाम्। लक्षणे॥

अभिक:। त्रि। कामुके। अभिकामयते। अनुकाभिकेति साधु:।

अभिक्रम:। पुं। अभीतयोधादे र्युद्धेशत्रुसम्मुखगमने। आरोहणे। इति हेमचन्द्र:। अभिक्रमणम्। क्रमु०। घञ्। नोदात्तेतिवृद्ध्यभाव:। अभिक्रम्यतेकर्मणाप्रारभ्यतेइतिव्युत्पत्त्या .कर्मारब्धफले। प्रारंभे।

अभिक्लृप्त:। त्रि। अभिसमर्थिते। अभिप्रकाशिते।

अभिख्या। स्त्री। अभिधाने। शोभायाम्। यशसि। अभिख्यानम्। ख्याप्र कथने चक्षिङकादेशोवा। आतश्चोपसर्ग इत्यङ्।

अभिगत:। त्रि। सेविते।

अभिगन्तव्य:। त्रि। अभित:समासाद्ये। यथाश्रमंप्रतिवसिष्ठ:। सन्त:सदाभिगन्तव्यायद्यप्युपदिशन्तिन। याहिस्वैरकथास्तेषाम् पदेशाभवन्तिता: इति।

अभिगीतम्। न। शोभनगीते।

अभिगृहीतपाणि:। त्रि। संयोजितहस्ते।

अभिग्रह:। पुं। अभिग्रहणे। अभियोगे। आभिमुख्येनोद्यमे। गौरवे। अभिग्रहणम्। ग्रहउपादाने। ग्रहवृद्धित्यप्।

अभिग्रहणम्। न। चौर्ये। अभिचारे। आभिमुख्येनग्रहणे। अभिग्रहेर्ल्युट्।

अभिघात:। पुं। प्रहारे। अभिहननम्। हन०। घञ्। हनस्तोचिण्णलो:। हो हन्तेरितिकुत्वम्। क्रियाविशिष्टद्रव्यस्य द्रव्यान्तरेण संयोगविशेषो भिघात:। यथोद्यमितनिपतितमुसलस्योलूखलेन संयोग इतिव्याख्यातार:॥ सम्बन्धे।

अभिघाति:। पुं। शत्रौ। अभिघाते: क्तिच् बाहुलकात्क्तिर्वा।

अभिघाती। पुं। रिपौ॥ अभिहन्तुंशी

ष्ठः । सुपीतिखिनिः ।

अभिघारः । पुं । अभितः सेचने । घृते ॥ इतिराजनिर्घण्टः ।

अभिचरः । पुं । दासे । इतिहेमचन्द्रः ।

अभिचारः । पुं । हिंसाकर्मणि । अथर्ववेदोक्तमन्त्रयन्त्रादिनिष्पादितेमारणोच्चाटनादिहिंसात्मकेकर्मणि इतिभरतः । मारणादिफलकेतान्त्रिकप्रयोगविशेषे। सषड्विधः । मारणमोहनस्तंभनविद्वेषणोच्चाटनवशीकरणभेदादितितन्त्रशास्त्रम् । उपपातकविशेषोयम् । नाशोऽभिचारतोनास्ति धर्म्मिष्ठानां नसंशयः । अतश्च । ब्राह्मणंधार्मिकंभूपंवनितामास्तिकंनरम् । यदान्यंसदयंनित्यमभिचारे न योजयेत् । अभिचरणम् । चरेर्घञ् ।

अभिजनः । पुं । कुले । ख्यातौ । जन्मभूम्याम् । कुलध्वजे । अभिजायतेऽस्मिन् । जनीप्रादुर्भावे । हलश्चेति घञ् । जनिवध्योश्चेति वृद्धिर्न । णिलोपस्यस्थानिवत्त्वाद्वा । अभिजन्यते । कर्मणिघञ् वा । अभितोऽभिमुखो वाजनोजन्माच ॥ अभिजनोनाम यत्र पूर्वैरुषितमिति भाष्यम् ।

अभिजनवान् । त्रि । कुलीने । अभिजनोऽस्यास्ति । मतुप् । वत्वम् ।

अभिजातः । त्रि । कुलीने । न्याय्ये ।

पण्डिते । यथा । नच्छिन्द्यात्नखरोमाणि ... दौ स्त्रीषुनाप्रकृतंवदेत् । सङ्कीर्णं नाभिजातेषुनाप्रबुद्धेषुसंस्कृतमिति । अभिजायतेस्म । जनीप्रादुर्भावे । गत्यर्थेतिक्तः ।

अभिजातकोविदः । पुं । जातककर्मकोविदे । जातकज्ञे ।

अभिजित् । न । नक्षत्रविशेषे । उत्तराषाढायाश्चतुर्थांशस्य श्रवणादिमचतुर्दण्डस्यचसंज्ञा ऽभिजिदिति । अत्र जातस्यफलं यथा । अतिसुललितकान्तिः सम्मतःसज्जनानामनुभवतिविनीतश्चारुकीर्त्तिःसुवेशः । द्विजवरसुरभक्तो व्यक्तवाङ्मानवःस्यादभिजितियदिसूतिर्भूपतिः स्वस्ववंशे । इतिकोष्ठीप्रदीपः । यामामुहूर्त्तान्तरे । यथा । मध्यंव्योमप्रयातेस्फुरदमलनिभेकेशरे चार्कबिम्बे छायासम्भावकान्ता प्रचलतिपुरुषे यत्रतत्पादलग्ना । तावन्नोरेनंदृष्टिःकुजकृतमशुभं नैवकूटंनयोगः सम्मानारोग्यसम्पत् क्षितिमथयुवतीं तत्क्षणन्तालभेत । अभिमुखीभूयजयतिप्रतिपक्षाननेन । जि० । क्विप् । कुतपकालइतिप्रसिद्धे दिवसस्याष्टमेमुहूर्त्ते । यथा । अपराह्नेतु सम्प्राप्तेऽभिजिद्रौहिणोदये । यदत्रदीयतेजन्तो

स्तदर्थयमुदाहृतमितिमत्स्यपुराण-
म् ॥

अभिज्ञः । त्रि । निपुणे । अभिजानाति । ज्ञा० । आतश्चोपसर्ग इतिकः ॥

अभिज्ञा । स्त्री । आवेज्ञाने । स्मृतौ ॥ अभिज्ञायते । ज्ञा० । आतश्चोपसर्ग इत्यङ् ॥ टाप् ॥

अभिज्ञानम् । न । चिह्ने । ज्ञानभेदे ॥ अभिज्ञायतेऽनेनेतितथा । ज्ञा० । ल्युट् ॥

अभिज्ञापकः । त्रि । बोधके ॥

अभिडीनम् । न । पक्षिणां आभिमुख्येनपुनःपुनःपतने ॥

अभितप्तः । त्रि । पीडिते ॥ अभितस्तप्तः ॥

अभितः । अ । शीघ्रे । साकल्ये । सम्मुखे । उभयतः । अन्तिके । सर्वतः ॥ पर्य्यभिभ्यां चेत्यभिशब्दात्तसिल् ॥

अभिद्रवणम् । न । वेगेनगमने ॥

अभिद्रोहः । पुं । आक्रोशे ॥

अभिधर्षणम् । न । रक्षःपिशाचभूतादेरभिसङ्गे । सर्वतोभावेनधर्षणे ॥

अभिधा । स्त्री । भट्टमतभावनायाम् ॥ आह्वये । वाचके । न्यायमतेनशब्दशक्तौ । मीमांसकमतेन विधिसमवेतविधिव्यापारीभूतपदार्थे । अभिधानम् । डुधाञ्० । आतश्चेत्यङ् ॥

अभिधानम् । न । संज्ञायाम् । कथने ॥ अभिधीयते अनेनवा । डुधाञ् धारणपोषणयोः । कर्मणि करणे वा ल्युट् । शब्दकोषे ॥ यथा । कृत्तद्धितसमासानामभिधानंनियामकम् । इति वोपदेवः ॥

अभिधायकः । त्रि । वाचके ॥

अभिधेयम् । न । संज्ञायाम् । त्रि । वाच्ये । शब्दप्रतिपाद्ये । अभिधातुंशक्यम् । डुधाञ्० । अचोयत् । ईद्यति । गुणः ॥

अभिध्या । स्त्री । अन्यगेच्छायाम् । परस्वविषये स्पृहायाम् । परस्वविषये चौर्यादिनालिप्सायामितिमुकुटः ॥ परस्वविषयविषयिण्यायामिच्छायामितिरामाश्रमः । विषयप्रार्थनाऽभिध्येतिस्वामी । जिघृक्षामात्रमभिध्येतिकश्चित् ॥ स्वस्यबहुत्वसंकल्पे ॥ अभिध्यानम् । ध्यैञ्ध्याने । आतश्चोपसर्गइत्यङ् । टाप् ॥

अभिनद्धः । त्रि । बद्धे । बंधा इति भाषा ॥ अभितोनद्धः ॥

अभिनन्दः । पुं । सुखलवे । अभ्यर्थितसुखहेतुर्यः स्वकलत्रादिः सम्मुखोविषयः तद्गुणकथनादिप्रवर्तिकाधीवृत्तिर्भ्रान्तिरूपाअभिनंदःसचतामसः ॥ अभितोनन्दः आनंदः ॥

अभिनन्दनः । पुं । बुद्धभेदे । चतुर्थस्तीर्थंकरजिनोयम् ॥ न । स्तवने ॥ त्रि । सर्वतो भावेनानन्दजनके । अभितो नन्दनः ॥

अभिनयः । पुं । विनोदितार्थप्रतिपत्त्यर्थं मसाधारणशारीरव्यापारे । व्यञ्जके । अन्तर्गतभावस्यव्यञ्जके ऽङ्गचेष्टाविशेषे ॥ अभिनयश्चतुर्द्धा । वाचिकाङ्गिका ऽऽहार्यसात्त्विकभेदात् । विशेषो दशरूपकादिष्वनुसंधेयः । अभिनयत्यर्थम् । पचाद्यच् ॥

अभिनवः । पुं । स्तोषे । त्रि । नूतने । अभिनूयते । णु स्तुतौ । ऋदोरप् ॥

अभिनवतामरसम् । न । तामरसाख्ये जगतीछन्दोभेदे । अभिनवतामरसं नजजाय इति लक्षणलक्षिते ॥

अभिनवोद्भिद् । पुं । अङ्कुरे । उद्भिनत्तिभुवम् । भिदिर् विदारणे । सत्सूद्विषेतिक्विप् । अभिनवश्चासावुद्भिच्च ॥

अभिनहनम् । न । बन्धने । मुसक इति भाषा ॥

अभिनिर्मुक्तः । पुं । सूर्यास्तकाले निद्राङ्गते ब्राह्मणादौ ॥ अभिसर्वतःसायंतनेनकर्मणा निश्चयेनमुक्तः । अभिसर्वंसायन्तनंकर्मनिश्चयेनमुक्तंयेनवा ॥

अभिनिर्याणम् । न । विजिगीषोः प्रस्थितौ । गमने । अभिनिर्पूर्वात् या

तेर्ल्युट् ॥

अभिनिविष्टः । त्रि । अभिनिवेशविशिष्टे । दुराग्रहग्रस्ते ।

अभिनिवेशः । पुं । अन्धतामिस्रे । पञ्चमक्लेशे । सत्यायुरभावेप्यतैः शरीरेन्द्रियादिभि रनित्यै रपिवियोगोमाभूदित्याविद्वदङ्गनाबालस्वाभाविकः सर्वप्राणिसाधारणोमरणत्रासरूपो-विपर्ययविशेषः । मनोयोगे । आग्रहे । अभितोनिवेशः ।

अभिनिष्टानः । पुं । अक्षरमात्रे । विसर्जनीये । विसर्गे ॥ अभिनिस्तननम् । स्तन० । भावे घञ् । अभिनिसःस्तनःशब्दसंज्ञायामितिमूर्द्धन्यः ॥

अभिनिष्पत्तिः । स्त्री । सिद्धौ । उत्पत्तौ ॥

अभिनिस्तानः । पुं । अभिनिष्टाने ॥ पक्षेमूर्द्धन्याभावः ॥

अभिनीतः । त्रि । न्याय्ये ॥ क्रोधने । अमर्षिणि । संस्कृते । अभिनीयतेस्म । णीञ् प्रापणे । क्तः ॥

अभिनीतिः । स्त्री । अभिनये ।

अभिनेता । त्रि । नाटकप्रसिद्धे अभिनयकर्त्तरि । स्वांगी स्वांगवाला इति भाषा प्रसिद्ध ॥

अभिपन्नः । त्रि । अपराद्धे । अभिग्रस्ते ॥ आपद्गते ॥ स्वीकृते । आभिमुख्येन प्राप्ते ॥ अभिद्रुते । अभिपद्यतेस्म

पद्गतौ । गत्यर्थेतिक्तः । कर्मणि वा ॥

अभिमतारी । पुं । वेदप्रसिद्धे ऋषिविशेषे । कात्यसेनौ ।

अभिमाय: । पुं । आशये । मानससम्मतौ ॥ अभिप्रयणम् । प्रीञ्तर्पणे । घञ् ॥

अभिमेत: । त्रि । सम्मते ॥ अभिप्रायविषयीभूते । अभीष्टे ॥ अभित: प्रेतिसम्मतिम् । इण्० । क्त: ॥

अभिभव: । पुं । अनादरे । जये । गर्वनाशे ॥ भावे इञ् ॥

अभिभूत: । त्रि । गर्विते । पराभूते । आत्तगर्वे ॥ इतिकर्त्तव्यतामूढे । सामरहिते । व्याकुले ॥ अभिभूयतेस्म । अकर्मकत्वात्कर्त्तरिक्तः ॥

अभिभूति: । स्त्री । निकारे । अवमायाम् ॥

अभिमत: । त्रि । सम्मते । आदृते ॥ अभीष्टे ॥

अभिमन्त्रणम् । न । निमन्त्रणे ॥ आह्वाने । आकारणे ॥ आङ् मन्त्रि० ल्युट् ॥

अभिमन्थ: । पुं । अक्षिरोगे । अधिमन्थे । सचतुर्विधः । यथा । हन्यादृष्टिंश्लैष्मिकः सप्तरात्रादधिमन्थोरक्तजः पञ्चरात्रात् । षड्रात्राद्वैवातिक: संनिपाताल्पिषाच्चैत्तिक: सद्य एवेतिमाधव: ॥

अभिमन्यु: । पुं । अर्जुनात्सुभद्रायाम् सुते ॥

अभिमन्युसुत: । पुं । परीक्षिते । कौरव्ये ॥

अभिमर: । पुं । युद्धे ॥ वधे ॥ स्वबलसाधने ॥ इतिमेदिनीकार: ॥ संकेतस्थलनिर्गमे । स्वबलसाध्वसे ॥ इतिहेमचन्द्र: ॥ प्राणानिरपेक्षोयोद्रव्यहेतोर्यौऽङ्कलितंवा वेधयति सोऽभिमरइत्येके ॥

अभिमर्द: । पुं । मद्ये ॥ युद्धे ॥ मद्ययुद्धयोरिति हेमचन्द्र: ॥ पीडने ॥ अभिमर्द्दनम् । मृदक्षोदे । घञ् ॥

अभिमर्श: । पुं । घाते ॥

अभिमर्शित: । त्रि । स्पृष्टे ॥

अभिमान: । पुं । अहङ्कारहत्तौ । धनस्वजनादिनिमित्ते मद्दवधारणहेतौ गर्वविशेषे ॥ आत्मन्यसत्स्वन्तपूज्यत्वातिशयाध्यारोपे । अर्थादिदर्पे ॥ आदिना कुलपशुगुणादिग्रह: ॥ ज्ञाने ॥ प्रणये ॥ हिंसायाम् ॥ अभिमन्यते मान: ॥ अभिमननम् । मनज्ञाने । घञ् ॥ मीञ्हिंसायांवा । मीनातीत्यात्वम् ॥

अभिमानितम् । न । सुरते ॥ त्रि । अभि

मानयुक्ते । अभिमानः सञ्जातोऽस्य । तारकादित्वादितच् ।

अभिमानी । त्रि । मानिनि । सर्वतो मानास्पदे । अभिमानोऽस्यास्ति । इनिः । अभितोमानीवा ।

अभिमुखः । त्रि । सम्मुखे । अभिमतो मुखम् । अत्यादयः क्रान्ताद्यर्थे द्वितीययेतिसमासः ।

अभिहृष्टः । त्रि । संहृष्टे ॥

अभियातः । त्रि । स्वयंप्राप्ते ।

अभियुक्तः । त्रि । परैरुद्धे । तत्परे । प्रा निनि । अभियोगविषयीभूते । आ सामीतिख्याते । प्रतिवादिनि । यथा । अभियुक्तोऽभियोगस्ययदिकुर्या दपह्नवम् । मिथ्यातत्तुविजानीया दुत्तरंव्यवहारत इतिनारदः । अभितोयुक्तः ॥

अभियोक्ता । पुं । अर्थिनि । विवादस्य कर्त्तरि । फरियादीति इतरजनेषु- ख्याते । यथा । अभियोक्ताऽप्रगल्भ त्वात्वक्तुंनोत्सहतेयदि । तदाकालः प्रदातव्यः कार्यशक्त्यनुरूपतः । इति नारदः ॥

अभियोगः । पुं । अन्यकृतस्यस्वधर्षणस्य राज्ञेवेदने । अन्येनविरोधे स्वार्थसम्बन्धितयाराजसमीपे कथने । नालिश इतिइतरजनेषुख्याते । सचद्विविधः । यथाहनारदः । अभियोगस्तुविज्ञेयः शङ्कातत्त्वाभियोगतः । शङ्काऽसतांतु संसर्गात् तत्त्वंह्रोढाभिदर्शनादिति । अभिग्रहे । आग्रहे । अभिगम्याक्रमणे । शपथे । आह्वे । अभियोजनम् । युजिर्योगे । घञ् । उद्योगे ॥

अभिरक्षा । स्त्री । सर्वतस्त्राणे ।

अभिरतः । त्रि । रते ।

अभिराद्धः । त्रि । आराधिते ।

अभिरामः । त्रि । सुन्दरे । मनोज्ञे । प्रिये । अभिरमन्तेऽस्मिन् । रम० । अधिकरणे घञ् ॥

अभिरामकथा । स्त्री । श्लाघ्यवाचि ।

अभिरूपः । पुं । हरे । विष्णौ । इन्दौ । कामे ॥ त्रि । बुधे । पण्डिते ॥ मञ्जुले । सुन्दरे । मनोहरे ॥ अभिलक्ष्यं रूपमस्य ॥ सदृशे ॥ ममाहमेवाभिरूप इतिलक्ष्यम् ॥

अभिलषितः । त्रि । अभीप्सिते ।

अभिलापः । पुं । सङ्कल्पाङ्गवाक्ये ॥ यथा । काम्याभिलापसहितः कुशतिलजलत्यागरूपः सङ्कल्पःशास्त्रार्थइतिप्रक्रमाधिकरणम् । अभिलप्यतेऽनेनेतिव्युत्पत्त्यावाक्करणेअभिपूर्वाल्लपेघञ् ॥ शब्दे । इतित्रिकाण्डशेषः ।

अभिलाव: । पुं । छेदने । लवने ॥ अभिलवनम् । लूञ् छेदने । निरभ्योः पूल्वोरिति घञ् ।

अभिलाष: । पुं । लोभे । मनोरथे ॥ अभिलषनम् । लष कान्तौ । घञ् । भोग्यवस्तुनि । अभिलष्यते । कर्मणि घञ् ॥ सङ्गमेच्छायाम् ।

अभिलाषी । त्रि । इच्छावति । अभिलाषयुक्ते ।

अभिलाषुक: । त्रि । लुब्धे । अभिलष्यति । लष कान्तौ । लषपतपदेत्युकञ् ।

अभिलास: । पुं । अभिलाषार्थे । अभिलसनम् । लसश्लेषणक्रीडनयो: । घञ् ॥

अभिवाद: । पुं । प्रणामे ॥ अभिवदनम् । वदेर्घञ् ।

अभिवादक: । त्रि । प्रणामयुते । वन्दारौ । वन्दनशीले । अभिवादयति । वदिअभिवादनस्तुत्यो: । ण्वुल् ।

अभिवादनम् । न । पादग्रहणे । नामोच्चारणपूर्वकसंस्कृतप्रयोगेण नमस्कृतौ । वाचानतौ ॥ अभिमुखीकरणार्थं वादनं वदनम् । वदवाक्संदेशयो: चुरादि: । ल्युट् । अभिमुखेन वाद्यते आशी:कार्यतेऽनेनवा । णिजन्ताद्वदे: करणे ल्युट् । अभिवादनविधिमाह मनु: । अभिवादात् परं विप्रोज्यायांसमभिवादयन् । असौनामाहमस्मीति स्वंनामपरिकीर्त्तयेत् । नामधेयस्ययेकेचिदभिवादंनजानते । तान् प्राज्ञोऽहमितिब्रूयात्स्त्रिय:सर्वास्तथैवच । भो:शब्दंकीर्त्तयेदन्ते स्वस्यनाम्नोभिवादने । नाम्नां स्वरूपभावोहिभोभावऋषिभि: स्मृत इति । तथाच अभिवादये शुभशर्माहमस्मिभो: इत्यभिवादनवाक्यम् । तन्निषेधोयथा । समित्पाण्युदकुम्भपुष्पान्नहस्तोनाभिवादयेत्तथाप्येवंयुक्तमिति बौधायन: ॥ जपयज्ञजलस्थञ्चसमित्पुष्पकुशानलान् । दन्तकाष्ठञ्चभक्ष्यञ्चवहन्तंनाभिवादयेदिति लघुहारीत: ॥ अन्यत्रापि । समित् पुष्पकुशाग्न्यम्बुमृदन्नाक्षतपाणिक: । जपंहोमञ्चकुर्वाणोनाभिवाद्यो द्विजोभवेदिति ।

अभिवाद्य: । त्रि । अभिवादनार्हे ।

अभिविधि: । पुं । तेनसहेत्यर्थे । व्याप्तौ ॥

अभिविनीत: । त्रि । सर्वत:शिक्षिते ॥

अभिविमानम् । न । आभिमुख्येनविश्वं मिमीते जानातीतियोगाद्वैश्वानरात्मनि ।

अभिव्यक्त: । त्रि । सर्वत:प्रत्यक्षे ।

अभिव्यक्ति: । स्त्री । प्रत्यक्षे । उद्भूते । अभितोव्यक्ति: ॥

अभिव्याप्तिः । स्त्री । साकल्येन योगे । सम्मूर्छने । सर्वतोव्याप्तौ ॥ अभिव्यापनम् । आप्लृव्याप्तौ । क्तिन्नावादिभ्य इति क्तिन् ।

अभिशंसनम् । न । अभिकथने ।

अभिशपनम् । न । अभिशापे ।

अभिशप्तः । त्रि । शापग्रस्ते । प्राप्ताभिशापे ।

अभिशस्तः । पुं । स्तेने । अभितःशस्तः प्रशस्तः । त्रि । मृषापवादग्रस्ते । परस्त्रियां परपुरुषेण वा मैथुनं प्रतिमिथ्या दूषिते । शापग्रस्ते । आचारिते । अनिर्णीतेपितस्मिन्महापातकादौ जाताभिशापे । अभिशस्यते स्म । शसु हिंसायाम् । क्तः । यस्य विभाषेति नेट् । धृषिशसीइतिवा ।

अभिशस्तिः । स्त्री । लोकापवादे । प्रार्थनायाम् । याच्ञायाम् ॥ अभिशंसनम् । शंसु स्तुतौ याचने च । स्त्रियां क्तिन् ।

अभिशापः । पुं । मिथ्याभिशंसने । स्वर्णस्तेयं त्वया कृतमित्यादिमिथ्यादूषणाभिधायकेवाक्ये । ब्राह्मणगुरुवृद्धसिद्धानामनिष्टाभिशंसने ॥ अभिशपनम् । शप आक्रोशे । घञ् ।

अभिषङ्गः । पुं । पराभवे । आक्रोशे । शपथे । सर्वतोभावेनसङ्गे । भूतावेशे । अभिषञ्जनम् । षञ्जसङ्गे । घञ् । उपसर्गादितिषः ।

अभिषवः । पुं । अवभृथस्नाने ॥ यज्ञे । स्नपने । पीडने । मद्यसन्धाने । सुराकरणे । सुरोत्पादनप्रकारे । सवने । सुत्यायाम् । अभिषूयते अभिषवणं वा । षुञ् अभिषवे । ऋदोरप् । उपसर्गादितिषः । न । काञ्जिके ॥ इतिहलायुधः ॥

अभिषवणम् । न । स्नाने । षुञ्० । ल्युट् ।

अभिषह्य । अ । प्रसह्यार्थे । अभिषोढ्वा । षह मर्षणे । क्त्वा । ल्यप् ।

अभिषिक्तः । त्रि । अभिषेचिते ।

अभिषिषेणयिषुः । त्रि । सेनयाऽभियातुमिच्छति । सत्यापपाशेत्यादिना सेनाशब्दाण्णिचि सनि सनाशंसेष्युः । स्थादिष्वितिधात्वभ्याससकारयोः षत्वम् ।

अभिषुतम् । न । काञ्जिके । अभिषूयते स्म । षुञ् अभिषवे । क्तः । उपसर्गादितिषत्वम् ।

अभिषेकः । पुं । शान्तिस्नाने । स्नाने । रुद्राभिषेकादौ । पूर्णाभिषेकशाक्ताभिषेकराजाभिषेकादिपदवाच्ये अधिकारप्राप्त्यर्थस्नाने ॥ मार्जने । अभिषेचनम् । षिच्० । घञ् । जले । अभिषिच्यतेऽनेन घञ् ।

अभिषेचनम् । न । अभिषेके । षिच० । ल्युट् ।

अभिषेणनम् । न । शत्रोऽरिसम्मुखगतौ । कुतुधावायाम् । यत्सेनयाभिगमनमरौ तदभिषेणनम् । सेन याऽभियानम् । सत्यापेतिसेनायब्दाशिच् । ल्युट् । उपसर्गात्सुनोतीतिषत्वम् ।

अभिष्टुतम् । त्रि । स्तुते । वर्णिते । ईडिते । अभिष्टूयतेस्म । ष्टुञ् स्तुतौ । क्तः ।

अभिष्यन्दः । पुं । अतिवृद्धौ । आस्रावे । अक्षिगदविशेषे । अभिष्यंदनम् । स्यंदू० घञ् ।

अभिष्यन्दिरमणम् । न । शाखानगरे । प्रधाननगरसन्निहितनगरे । इतिजटाधरः ।

अभिष्वङ्गः । पुं । उत्कटरागे । अन्यस्मिन्नहंबुद्धौ । अभिष्वञ्जनम् । ष्वञ्ज० । घञ् ।

अभिसंरब्धः । त्रि । कुपिते ।

अभिसंवृत्तिः । स्त्री । व्यवहारे ।

अभिसन्तापः । पुं । युद्धे । अभिशापे । अभितः सन्तापोऽत्र ।

अभिसन्धः । पुं । सत्यत्वाभिमाने ।

अभिसन्धानम् । न । वञ्चने । प्रतारणे ।

अभिसन्धिः । पुं । अभिसन्धाने । उद्देशे ।

अभिसम्पातः । पुं । युद्धे । अभिसम्पतनम् । पतॢ गतौ । घञ् ॥

अभिसरः । त्रि । अनुचरे । सहाये । अभितः । सरति । सृ गतौ । पचाद्यच् ।

अभिसर्जनम् । न । दाने । वधे ॥ अभिपूर्वात् सृजेर्भावे ल्युट् ॥

अभिसारः । पुं । बले । युद्धे । सहाये । साधने । स्त्रीपुंसयोरन्यतरस्याऽन्यतरार्थं सङ्केतस्थानगमने ॥ अभिसरणम् । सृ० । घञ् ।

अभिसारिका । स्त्री । नायिकाविशेषे । सङ्केत स्थलेस्वयङ्गमनकर्त्र्याम् । एवं प्रियगमनकारयित्र्याम् । कान्तार्थिनीतुयायातिसङ्केतंसाभिसारिके त्यमरः । भरतस्तु । हित्वालज्जाभये श्लिष्टामदनेमदनेनच । अभिसारयतेकान्तंसाभवेदभिसारिकेति ॥ अभिसरति । सृगतौ । ण्वुल् ।

अभिसारिणी । स्त्री । अभिसारिकायाम् ॥

अभिसृष्टः । त्रि । दत्ते ॥

अभिहतः । त्रि । विद्धे । ताडिते ।

अभिहारः । पुं । अभियोगे । अभिगम्याक्रमणे । अभिग्रहणे । आभिमुख्येन ग्रहणे । चौर्ये । कवचग्रहणे । सन्नहने ॥ मद्यपे । अभिहरणम् । हृञ् हरणे । घञ् ।

अभिहितम् । त्रि । कथिते । प्रोक्ते ॥ अ

भिधोयतेस्म। डुधाञ् धारणपोषण योः। क्तः। दधातेर्हिः॥

अभीकः। त्रि। कामुके। क्रूरे। निर्भये। पुं। कवौ। अभिकामयते। अनुकाभिके तिसाधुः। स्वामिनि।

अभीक्ष्णम्। ।। नित्ये। अस्वदर्थे। भृशे। पौनःपुन्ये। अभिक्ष्णोति। क्ष्णु तेजने। बाहुलकादमुः। अन्येषामपीतिदीर्घः॥ यद्वा। अभिक्ष्णवनम्। क्ष्णु तेजने। डम्। पृषोदरादित्वाद भेर्दीर्घः॥ शीघ्रे। प्रकर्षे।

अभीच्णम्। न। भृशे। पौनः पुन्ये। नित्ये। सर्वदार्थे। त्रि। भृशयुक्तक्रियायाम्। नित्ययुक्तक्रियायाम्॥

अभीतः। त्रि। अभिव्याप्ते अभिपूर्वात् इणः क्तः। अभितइतोवा॥ निर्भये। नभीतः॥

अभीप्सितम्। त्रि। वाञ्छिते। अभीष्टे॥ अभ्याप्तुमिष्यतेस्म। आप्लृव्याप्तौ सनन्तः। आप्ज्ञप्यृधामीत्। क्तः।

अभीरः। पुं। आभीरे। गोपे। अभिईरयति। ईरगतौकम्पनेच। पचाद्यच्॥

अभीरुः। त्रि। निर्भये। स्त्री। शतमूल्याम्। नभीरुः। स्थिरपत्रत्वात्।

अभीरुपत्री। स्त्री। शतमूल्याम्। अभीरूणि पत्राण्यस्याः। पाककर्णेति

ङीष्॥

अभीशुः। पुं। प्रग्रहे। किरणे। रश्मौ।

अभीषङ्गः। पुं। आक्रोशने। शापे। पञ्जसङ्गे। घञ्। उपसर्गस्यघञीति दीर्घः॥

अभीषुः। पुं। किरणे। अश्वादिरज्जौ। प्रग्रहे। कामे। अनुरागे। त्रि। इच्छति। ईषतेहिनस्ति ईष्यतेवा। ईषगतिहिंसादर्शनेषु। ईषेः किच्च्युः। आदेरिकारादेशश्च। अभिगतईषुः। प्रादयोगतेति समासः॥

अभीष्टः। त्रि। ईप्सिते। प्रिये। अभिलष्यतेस्म। इषुइच्छायाम्। क्तः॥

अभीष्टा। स्त्री। रेणुकाभिधगन्धवस्तुनि।

अभुक्तः। त्रि। उपवासिनि। यथा अभुक्तस्यदिवानिद्रापापाणमपिजीर्यतीति। अकृतभोजनेवस्तुनि।

अभुक्तमूलः। पुं। न। ज्येष्ठान्त्यघटीचतुष्टयसहितमूलाद्यघटीचतुष्टये॥ ज्येष्ठान्त्यैकघटीसहित मूलाद्यघटिकाद्वये॥ ज्येष्ठान्त्यघटिकार्द्धसहित मूलादिघटिकार्द्धे॥ ज्येष्ठान्त्यपञ्चघटिकासहितमूलाद्यष्टनाडिकासु।

अभूतः। त्रि। अविद्यमाने॥

अभूताभिनिवेशः। पुं। असतिअस्तित्व निश्चये॥

अभेदः । पुं । ऐक्ये । अविवेके । नभेदः । यथा । रलयोर्डलयोस्तद्वज्जयोर्बवयोरपि । शसयोर्णनयोश्चान्ते सविसर्गाविसर्गयोः । सबिन्दुकाबिन्दुकयोःस्यादभेदेन कल्पनमिति । यथा वा । गुणगुणिनोः क्रियाक्रियावतोश्चाभेदः ।

अभेद्यम् । न । हीरके । त्रि । अभेदनीये ।

अभोगः । त्रि । भोगशून्ये । भोगाभावे । नास्तिभोगोयस्य ॥

अभोजनम् । न । भोजनाभावे । उपवासे । यथा । अजीर्णे भोजनंयेषां जीर्णेयेषामभोजनम् । राज्ञामभोजनंयेषांतेषांनभ्यस्तिधातवः इतिवैद्यकम् । अपिच । वेदोदितानां नित्यानां कर्मणां समतिक्रमे । स्नातकव्रतलोपेच प्रायश्चित्तं अभोजनमितिमनुसंहितावचनम् ।

अभ्यक्तः । त्रि । कृततैलाभ्यंगे । अभितोक्तः ।

अभ्यग्रम् । त्रि । आसन्ने । समीपे । अभिमुखमग्रमस्य ।

अभ्यङ्गः । पुं । तैलमर्दने । स्नेहने । यथा । तैलमभ्यंगयद्गात्रेषुन नस्यात्तद्गुतर्पणम् । सान्नाष्टिः पृथगभ्यंगोमस्तकादौ प्रकीर्त्तितः । अभ्यङ्गमाचरेन्नित्यं सजराश्रमवातहा । शिरःश्रवणपादेषु तं विशेषेण शीलयेदित्यायुर्वेदः । पादगते वेशिरे चक्षुषि सम्बद्धेस्तः अतश्चक्षुर्हितार्थिना-पादाभ्यङ्गः करणीयः । कफग्रस्तकृतभेदवमनाजीर्णिभिर्नाभ्यङ्गःकरणीयः । अपिच । मूर्द्धिदत्तं यदातैलं भवेत्सर्वाङ्गसङ्गतम् । स्रोतोभिस्तर्पयेद्वाहू अभ्यङ्गस्तवदेरित इति । तैलादिना शिरःसहितदेहमर्दने ॥

अभ्यञ्जनम् । न । तैले । अभ्यङ्गे । मलापहस्नाने ॥ अभितःअञ्जनम् ।

अभ्यधिकः । त्रि । सर्वोत्कृष्टे ।

अभ्यनुज्ञा । स्त्री । अनुमतौ । अभितः अनुज्ञा ।

अभ्यनुज्ञातः । त्रि । आभिमुख्येनज्ञाते ।

अभ्यनूक्तम् । त्रि । प्रकाशिते ।

अभ्यन्तरम् । न । अन्तराले । मध्यमागे । अभिगतमन्तरम् ।

अभ्यमितः । त्रि । रोगिणि । अभ्यम्यतेस्म । अमरोगे । क्तः । चुरादीनां णिचोवैकल्पिकत्वात् णिअभावे इट्म । अभ्यमतिस्मवा । अमगत्यादौ । गत्यर्थेतिक्तः । रुष्यमत्वरेतिवेट् ॥

अभ्यमित्रीणः । त्रि । अभ्यमित्र्ये । अभ्यमित्रमलंगामी । अभ्यमित्र्येच्छचेतिखः ।

अभ्यमित्रीयः । त्रि । अभ्यमित्र्ये । अभ्यमित्रमलंगामी । अभ्यमित्राच्छ त्वेतिछः । अमित्राभिमुखंसुष्ठुगच्छतीत्यर्थः ॥

अभ्यमित्र्यः । त्रि । स्वशक्तितःशत्रोरभिमुखंगच्छद्वीरे । अभ्यमित्रीये । अमित्रस्याभिमुखम् । लक्षणेनाभिप्रती इत्यव्ययीभावः । अभ्यमित्रमलं गामी । अभ्यमित्राच्छचेतियत् ॥

अभ्यर्णम् । त्रि । समीपे ॥ अभ्यर्द्यतेस्म अभ्यर्द्यतिस्मेतिवा । अर्द्दगतौ । कर्मणिकर्त्तरिवाक्तः । अभेश्चाविदूर्येइतीडभावः । रदाभ्यामितिनस्तस्यचणत्वम् ॥

अभ्यर्हितः । त्रि । पीडिते । अभिपूर्व्वाद्दर्हेः क्तः । इट् ।

अभ्यर्हणीयः । त्रि । पूज्ये ।

अभ्यर्हितः । त्रि । उचिते ॥ श्रेष्ठे ।

अभ्यवकर्षणम् । न । शल्यादेः समुत्पाटने । निर्हारे । शल्यादेर्युक्त्यानिःसारणे । अभ्यवकृषेर्ल्युट् ।

अभ्यवस्कन्दः । पुं । रिपोराक्रमणे । निःशक्तीकरणाय शत्रुभिर्दीयमानेप्रहारे । अभ्यासादने । प्रपाते ॥

अभ्यवस्कन्दनम् । न । रिपोराक्रमणे । अभ्यासादने । प्रहारादिना शत्रोर्निःशक्तीकरणे । बलादाक्रमणे इतिस्वामी । शत्रोः सम्मुखगमने । स्कन्दिर् गतिशोषणयोः । ल्युट् ।

अभ्यवहारः । पुं । भक्षणे । सचभक्ष्यभोज्यलेह्यपेयचोष्यभेदेन पञ्चविधः ।

अभ्यवहृतम् । त्रि । भुक्ते ॥ अभ्यवह्रियतेस्म । क्तः ।

अभ्यसनम् । न । अभ्यासे । पौनः पुन्येनचिन्तने करणे च ॥

अभ्यसूयकः । त्रि । गुर्वादीनां वैदिकमार्गस्थानां कारुण्यादिगुणेषु प्रतारणादिदोषारोपके । अभितोऽसूयकः ।

अभ्यसूया । स्त्री । गुणेषुदोषारोपे ॥ अभ्यसूयनम् । असूञ् असूयायाम् । कण्ड्वादित्वाद्यकिअप्रत्ययादित्त्यः ।

अभ्याकाङ्क्षितम् । न । अलीकाभियोगे । मिथ्यादावा इतिख्याते । अभ्याख्याने । त्रि । ईप्सिते । अभितः आकाङ्क्षितम् ।

अभ्याख्यानम् । न । मिथ्याभियोगे । शतंमे धारयसीत्यादिमिथ्योद्भावने । मिथ्यावादे । अभ्याङ्पूर्वाच्चक्षिङोभावेल्युट् ।

अभ्यागतः । पुं । अतिथौ । दृष्टपूर्वेगृहागते । त्रि । सम्मुखागते ॥ अभितआगतः । आभिमुख्येन आगतोवा ॥

अभ्यागमः । पुं । विरोधे । समरे । अन्तिके । अभिघाते । अभ्युद्गमने । भोगे । स्वीकारे । फलसम्बन्धे । अभ्यागमनम् । गम्लृ गतौ । ऋवृदित्यप् ॥

अभ्यागारिकः । त्रि । कुटुम्बव्यापृते । पुत्रदारादिपोषणव्यग्रे । अभ्यागारेनियुक्तः । अगारान्ताट्ठन् । अभिअधिक आगारिकोभाषा ।

अभ्याघातः । पुं । चौर्याद्यमर्थोपदेशे ।

अभ्यात्तः । त्रि । अभिव्याप्ते । व्याप्त्यर्थस्यातते: कर्त्तरि कर्मणिवा निष्ठा ।

अभ्यादानम् । न । आरम्भे । आभिमुख्येनादानम् ।

अभ्यान्तः । त्रि । रोगिणि । अभ्यम्यते स्म । अमरोगे । क्तः । चुरादीनांणिचोवैकल्पिकत्वात् णिच्पक्षे ॥ अमतिस्मवा । अमगत्यादौ । गत्यर्थेतिक्तः । रुष्यमत्वरेतिवेट् । इडभावे अनुनासिकस्येतिदीर्घः ।

अभ्यामर्दः । पुं । रणे । समरे । अभ्यामर्दनम् । मृदक्षोदे । घञ् ।

अभ्याशः । पुं । अवश्यमेव । अन्तिके । अभ्यश्यते । अशूव्याप्तौ । घञ् ।

अभ्यासः । पुं । अभ्यसने । आवृत्तौ । आकर्णनं विचारोजपः शिष्येभ्योदानमावृत्तिश्चेति पञ्चविधोऽभ्यासो भवति ॥ खुरल्याम् । शराभ्यासे । पुन:प्रयोगे । संस्कारबाहुल्ये । दृढतरसंस्कारे । षड्विधलिङ्गेषु द्वितीये लिङ्गे । यथाहुः । प्रकरणप्रतिपाद्यस्य तन्मध्ये पौनःपुन्येनप्रतिपादनमभ्यासः । यथाछान्दोग्येषष्ठप्रपाठके अद्वितीयस्यवस्तुनोमध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनमिति । विजातीयप्रत्ययानन्तरिते सजातीयप्रत्ययवाहे । अतिपरिचये । त्रि । अन्तिके । अभ्यासीदति । अन्येभ्योपीतिडः ॥

अभ्यासयोगः । पुं । एकस्मिन् प्रतिमाद्यालम्बने सर्वतः समाहृत्य चेतसः पुन:पुनः स्थापनमभ्यासस्तत्पूर्वकेसमाधौ ।

अभ्यासादनम् । न । रिपोरभ्याशेनिःशक्तीकरणे । अभ्यवस्कन्दने । शत्रो:सम्मुखगमने । षद्लृविशरणादौ । चुरादिः । ल्युट् ॥

अभ्याहारः । पुं । अभिग्रहणे । चौर्ये ॥ आभिमुख्येनाहरणम् । हृञ् हरणे । घञ् ॥

अभ्याहितः । त्रि । उपचिते । इन्धनैरुपचितेग्नौ पुं ।

अभ्युक्तः । त्रि । प्रकाशिते

अभ्युत्थानम् । न । गौरवोद्यमप्रत्युद्गमने । गौरवंदृष्ट्वाआसनादेरुत्थाने ।

उद्यमे । उद्भवे ॥ आभिमुख्येनउत्थानम् ॥

अभ्युत्पतनम् । न । आभिमुख्येनोत्पतने ।

अभ्युदय: । पुं । पराक्रमे ॥ वृद्धिश्राद्धे ॥ अभीष्टानांकार्याणामाभिमुख्येनोदय: प्रादुर्भावोयेनेतिविग्रह: । सर्वतोभावेनधनजनादीनांवृद्धौ । यथा । राजन्नभ्युदयोऽस्तु वल्लनकवे र्हस्तेकिमास्तेतव श्लोक: कस्यकवेरमुष्य कृतिनस्तत्पश्यतांपश्यते । किन्त्वासामरविन्दसुन्दरदृशां द्राक्चामरान्दोलनादुद्वेल्लद्भुजवल्लिकङ्कणभणत्कार: क्षणं वार्यताम् ॥ अस्यपूर्वार्द्धंवल्लनकविकर्णाटराजयोर्वाक्यं शेषार्द्धंकालिदासस्य ।

अभ्युदित: । त्रि । सूर्योदयकालेनिद्राणे । सुप्तेयस्मिन्सूर्यउदितस्तस्मिन् ॥ अभिसर्वत: उदतिशयेन इतं गतं प्रातस्सर्नकर्मास्मात् । उदिते । प्रकाशिते ।

अभ्युद्यतम् । त्रि । अयाचितोपनीते ऽन्नादौ । आभिमुख्येन स्थापिते ।

अभ्युपगत: । त्रि । स्वीकृते । अभ्युपगम्यतेस्म । गम्लृ गतौ । क्त: । अभ्युदिते ।

अभ्युपगम: । पुं । स्वीकारे । अङ्गीकारे । समीपागमने । अन्तिकसमागमे । अभ्युपेत्युपसर्गद्वयपूर्वाद्गमे र्ग्रहवृद-निश्चिगमश्चेत्यप् ।

अभ्युपगमसिद्धान्त: । पुं । न्यायाश्रयसिद्धान्तविशेषे ॥ यथा । अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्त: । १५ । ३१ । अपरीक्षितस्य साक्षादसूचितस्य विशेषपरीक्षणं विशेषधर्मकथनम् । अभ्युपगमादिति ज्ञापकत्वे पञ्चमी अभ्युपगमज्ञापकमित्यर्थ: । विशेषपरीक्षणाज्ज्ञायते सूत्रकृतोऽभ्युपगतमिदमिति । तथाच साक्षादसूचिताभ्युपगमोऽभ्युपगमसिद्धान्त: । यथा मनसइन्द्रियत्वमिति ।

अभ्युपपत्ति: । स्त्री । अनुग्रहे । विपत्सम्पादनाहितनिवारणप्रवृत्तौ ॥ अभ्युपपदनम् । पदगतौ । क्तिन् ।

अभ्युपाय: । पुं । स्वीकारे । इतिहेमचन्द्र: ॥ उपाये । यथा । तत्स्वीकृतस्यतिकरे कद्रत्नाभ्युपायइलिकाश्मप्रकाश: ।

अभ्युपायनम् । न । उपढौकनद्रव्ये । उपायने ॥ यथा । ता वानय समं गोपैर्नन्दाद्यै: साभ्युपायनै रितिविष्णुभागवतम् ।

अभ्युपेत: । पुं । उपगते । स्वीकृते ॥ ।

अभ्युष: । पुं । ईषत्पक्वे । भर्जिते च

हरित्तयथादौ । पैालै । अभ्योषति
। उषदाहे । इगुपधेतिकः । अभ्यू
ष्यतेवा । घञ् ॥

अभ्यूषः । पुं । आपक्के । अभ्युषे । अभ्यू
षति अभ्यूष्यतेवा । उषरुजायाम् ।
इगुपधेतिकोघञ्वा ॥

अभ्यूहितः । त्रि । ज्ञाते । अभितः ऊ
हितः ॥

अभ्योषः । पुं । अभ्यूषे । पैालै ॥ अभ्यो
षति । उषदाहे । पचाद्यच् । गुणः ।

अभ्रम् । न । मेघे ॥ आपोविभर्त्ति । डु
भृञ् ० । मूलविभुजादित्वात्कः ॥ य
द्वा । नभ्रंश्यन्त्यापोऽस्मात् । भ्रंशुअधः
पतने । अन्येभ्योपीतिडः । अभ्रकधा
तौ । काञ्चने । गगने । नविभर्त्ति
किञ्चित् । मूलविभुजादित्वात्कः ।
यद्वा । आपोभ्रंश्यन्त्यस्मात् । अन्येभ्यो
पीतिडः । यद्वा । अभ्रतिस्थैर्यंगच्छ
ति । अभ्रवभ्रमभ्रचरगत्यर्थाः । अ
च् । यद्वा नभ्राजते । भ्राजृदीप्तौ । अ
न्येभ्योपीतिडः ॥

अभ्रंलिहः । पुं । वायौ । त्रि । मेघस्प
र्शिनि । उच्चतरे । अभ्रंलेढि । लि
हआस्वादने । वहाभ्रेलिह इत्यभ्रो
पपदाल्लिहेः कर्त्तरिखश् प्रत्ययः ।
अरुर्द्विषदितिमुमागमः ॥

अभ्रकम् । न । धातुभेदे । अभ्रे । गिरि

आमले । अस्योत्पत्त्यादिकं यथा ।
पुरावधायवृत्रस्य वज्रिणा वज्रमुद्धृत
म् । विस्फुलिङ्गास्ततस्तस्य गगने परि
सर्पिताः । तेनिपेतुर्घनध्वाना च्छि
खरेषु महीभृताम् । तेभ्य एव सम
ुत्पन्नं तत्तद्गिरिषु चाऽभ्रकम् । तद्वज्रं
वज्रजातत्वादभ्रमभ्ररवोद्भवात् । ग
गनात् स्खलितंयस्माद्गगनंचततोम
तम् । विप्रक्षत्रियविट्शूद्रभेदात्तत्स्या
च्चतुर्विधम् । क्रमेणैवसितंरक्तंपीतंकृ
ष्णंचवर्णतः । प्रशस्यतेसितंतारेरक्तं
तत्तुरसायने । पीतंहेमनिकृष्णन्तु
गदेषुद्रुतयेपिच । पिनाकंदर्दुरंनागं
वज्रंचेतिचतुर्विधम् । मुंचत्यग्नौवि
निःक्षिप्तं पिनाकं दलसञ्चयम् । अ
ज्ञानाद्भक्षणात्तस्य महाकुष्ठप्रदायक
म् । दर्दुरं त्वग्निनिः क्षिप्तंकुरुते द
र्दुरध्वनिम् । गोलकान्बहुशःकृ
त्वासस्यान्मृत्युप्रदायकः । नागन्तु
नागवद्वह्नौफूत्कारंपरिमुंचति ।
तद्भक्षितमवश्यन्तु विदधातिभगन्द
रम् । वज्रन्तुवज्रवत्तिष्ठे त्तन्नाग्नौ
विकृतिं व्रजेत् । सर्वाभ्रेषुवरंवज्रं
व्याधिवार्द्धक्यमृत्युहृत् । अभ्रकन्तु
रमेलोत्थं बहुसत्त्वंगुणाधिकम् । द
क्षिणाद्रिभवंस्वल्पसत्त्वमल्पगुणप्रदम्
। अथमारिताभ्रस्यगुणाः । अभ्रंक

पाकेमधुरं सुशीतमायुष्करं धातुविवर्द्धनञ्च । हन्यात्त्रिदोषं व्रणमेहकुष्ठप्लीहोदरग्रन्थिविषकृमींश्च ॥ रोगान् हन्ति द्रढयति वपुर्वीर्य्यवृद्धिं विधत्ते तारुण्याढ्यं रमयति शतं योषितां नित्यमेव । दीर्घायुष्कान् जनयति सुतान् विक्रमैः सिंहतुल्यान् मृत्योर्भीतिं हरति सततं सेव्यमानं मृताभ्रमिति ॥ अथाशोधिताभ्रस्य दोषाः । पीडां विधत्ते विविधां नराणां कुष्ठं क्षयं पाण्डुगदं च शोथम् । हृत्पार्श्वे पीडाञ्च करोत्यसत्यामशुद्धमभ्रं गुरुवह्निहृत्स्यात् ॥ अस्य शोधनविधिर्यथा । कृष्णाभ्रकं धमेद्वह्नौ ततः क्षीरे विनिःक्षिपेत् । भिन्नपत्रं तु तत् कृत्वा तण्डुलीयाम्लयोर्द्रवैः । भावयेदष्टयामं तदेवमभ्रं विशुध्यति ॥ मारणन्तु । कृत्वा धान्याभ्रकं तत्तु शोधयित्वाथ मर्द्दयेत् । अर्कक्षीरैर्दिनं खल्वे चक्राकारं च कारयेत् । वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत् । पुनर्मर्द्यं पुनः पाच्यं सप्तवारान् पुनः पुनः ॥ ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयम् । म्रियते नात्र सन्देहः प्रयोज्यं सर्वकर्मसु । तुल्यं घृतं मृताभ्रेण लौहपात्रे विपाचयेत् । घृते जीर्णे तदभ्रन्तु सर्वयोगेषु योजयेदिति भावप्रकाशः ॥

अभ्रति अभ्रयते वा । अभ्र० । कुन् ।

अभ्रमु । अभ्रस्याकृतिर्वा । इवे प्रतिकृताविति कन् ।

अभ्रङ्कषः । पुं । समीरणे । अभ्रं कषति हिनस्तीति विग्रहे सर्वकूलाभ्रकरीषेषु कष इति खच्प्रत्ययः । मुमागमः ।

अभ्रपिशाचः । पुं । राहौ । इति त्रिकाण्डशेषः ।

अभ्रपुष्पम् । न । जले । अभ्रस्य पुष्पमिव । पुं । वेतसे । अभ्रमिव अभ्रसमं येवा पुष्पमस्य ।

अभ्रमांसी । स्त्री । आकाशमांसीनामलतायाम् ॥ इति राजनिर्घण्टः ।

अभ्रमातङ्गः । पुं । ऐरावते । अभ्रं मेघस्तदात्मको मातङ्गः । शाकपार्थिवादिः । अभ्रे आकाशे मेघे वा विचरमाणो मातङ्ग इति वा ।

अभ्रमुः । स्त्री । ऐरावतपत्न्याम् । अभ्रे खे माति मन्थरगामिनीत्वात् । बाहुलकादुः । अभ्रे आकाशएव माति । मामाने । मितद्र्वादित्वाड्डुर्वा । न भ्राम्यति । भृमृचरीत्युः । मन्थरगामिनीत्यर्थः इति वा ।

अभ्रमुप्रियः । पुं । अभ्रमातङ्गे । अभ्रमोः प्रियः ।

अभ्रमुवल्लभः । पुं । ऐरावते । अभ्रमोर्वल्लभः ।

अभ्ररोहम् । न । वैदूर्य्यमणौ । इति

राजनिर्घण्टः ।

अभ्रलिप्ती । स्त्री । अल्पैरभ्रैर्लिप्तायां दिवि । अल्पैरभ्रैर्लिप्ता सा इत्याख्यायामिति ङीष् ।

अभ्रवाटिकः । पुं । आम्रातके ॥ इति राजनिर्घण्टः ॥

अभ्रावकाशिकः । पुं । तापसान्तरे । यो वातातपवर्षेषु केवलमाकाशे असंवृतप्रदेशे तपश्चरति सोऽभ्रावकाशिकः ।

अभ्रिः । स्त्री । काष्ठकुद्दाले । नौमलोत्सारके । पोतादेर्मलापनयनार्थं काष्ठघटितकुद्दाले । अभ्रति । अभ्र गतौ । सर्वधातुभ्य इन्निति इन् ।

अभ्रियम् । त्रि । मेघसंभवे । अभ्रेभवम् । समुद्राभ्राद्घः । छान्दसत्वं प्रायिकम् ॥ स्त्रियामभ्रिया ।

अभ्री । स्त्री । काष्ठकुद्दाले ॥ अभ्रति । अभ्र गतौ । सर्वधातुभ्य इतीन् । कृदिकारादिति ङीष् ।

अभ्रेषः । पुं । न्याय्ये । उचिते । भ्रेषणम् भ्रेषः । भ्रेषृ चलने । घञ् । भ्रेषादन्यः ॥

अभ्रोत्थम् । न । कुलिशे । त्रि । अभ्रभवे ।

अम । । । अल्पे । शीघ्रतायाम् । इति व्याडिः ।

अमः । पुं । रोगे ॥ त्रि । अपक्वफलादौ ।

अमङ्गलः । पुं । एरण्डवृक्षे ॥ त्रि । मङ्गलहीने । अशुभसूचके ।

अमण्डः । त्रि । मण्डहीने ।

अमतः । पुं । मृत्यौ । काले । रोगे । त्रि । असंमते । अविज्ञाते । अतर्किते । अमति । अम गत्यादिषु । भृमृदृशियजिपर्व्यादिनाऽतच् ।

अमतिः । पुं । काले । दण्डे । चन्द्रे । त्रि । दुष्टे । अमति । अम गत्यादिषु । अमेरतिः ।

अमत्रम् । न । भाजने । भाण्डे । अमति अन्नमत्र । अम गत्यादिषु । अमिनक्षियजिवधिपतिभ्योऽत्रन् ।

अमदनः । पुं । शिवे ।

अमनाः । त्रि । स्नेहशून्ये ।

अमनस्कः । त्रि । अप्रगृहीतमनस्के । पुं । योगग्रन्थविशेषे ।

अमनिः । स्त्री । वर्त्मनि । गतौ ॥ अमति । अम गत्यादिषु । अर्त्तिसृधृ इत्यादिनाऽनिः ।

अमन्दः । त्रि । धृष्टे ॥ मन्दभिन्ने ॥

अममः । पुं । भाविजिनविशेषे ॥ त्रि । ममताहीने ॥

अमरः । पुं । सुरे ॥ अष्टशाब्दिकान्तर्गतवैयाकरणविशेषे । येन नामलिङ्गानुशासनं कृतम् ॥ विक्रमादित्यसभास्थनवरत्नान्तर्गतरत्ने ॥ अयं बौद्ध इति कश्चित् ॥ स्नुहीवृक्षे । पारदे ।

अस्थिसंहारे। त्रि। मरणवर्जिते। नम्रियते इति अमरः। मृङ्प्राणत्यागे तुदादिः। पचाद्यच्।

अमरजः। पुं। खदिरवृक्षभेदे। कालस्कन्धे। पत्रतरौ।

अमरदारुः। पुं। देवदारुवृक्षे।

अमरद्विजः। पुं। देवले। देवाजीवे। पुजारीति प्रसिद्धे। अमराणांद्विजः॥

अमरपुष्पकः। पुं। काशे। इक्षुगन्धायाम्। इतिरत्नमाला।

अमरपुष्पी। स्त्री। अवाक्पुष्प्याम्। अधःपुष्प्याम्।

अमरप्रभुः। पुं। विष्णौ। अमराणां प्रभुः।

अमररत्नम्। पुं। स्फटिके॥ इतिराजनिर्घण्टः।

अमरवल्लरी। स्त्री। आकाशवल्ल्याम्॥

अमरा। स्त्री। गुडूच्याम्। अमरावत्याम्॥ दूर्वायाम्। स्थूणायाम्॥ जरायौ॥ इन्द्रवारुण्याम्॥ वटीवृक्षे॥ महानील्याम्। घृतकुमार्याम्॥ नाभिनालायाम्। नम्रियते। मृङ्प्राणत्यागे। पचाद्यच्। टाप्।

अमराद्रिः। पुं। सुमेरौ। अमराणामद्रिः।

अमरालयः। पुं। स्वर्गे। अमराणामालयः।

अमरावती। स्त्री। इन्द्रपुर्य्याम्। यथा। नानारत्नप्रभाजालमण्डलाखण्डलाकरैः। सिद्धसाध्यमरुद्दृष्टादयमभूरमरावतीति। अमराः सन्त्यस्याम्। मतुप्। मतौबह्वचोमजिरादीनामितिदीर्घः।

अमरेशः। पुं। अमरकण्टकतीर्थस्थदेवे। अमरेशोऽमरकण्टकइत्यागमोक्तः। अपिच। अमरेशमहापीठे ओङ्कारसंज्ञकः। तत्रदुर्गाद्वयंनाम चण्डिकाचमहेश्वरीति।

अमर्त्यः। पुं। त्रिदशे। नम्रियते। अमर्त्यः। नमर्त्यःइतिनञ्समासोवा।

अमर्त्यनदी। स्त्री। गङ्गायाम्। अमर्त्यानांनदी॥

अमर्त्यभुवनम्। न। स्वर्गे। अमर्त्यानां भुवनम्।

अमर्षः। पुं। कोपे। क्रुधि॥ परोत्कर्षासहनरूपेचित्तवृत्तिविशेषे। कृतापराधेऽसमर्थस्यद्वेषे। मर्षणम्। मृषतितिक्षायाम्। भावेघञ्। नञ्समासः।

अमर्षणः। त्रि। क्रोधने। नमर्षणशीलः। युच्। असहने।

अमलम्। न। अभ्रके। त्रि। निर्मले। रजस्तमोमलरहिते। अमति। अमगतौ। वृषादिभ्यश्चित्कलच्। अम

अमस्येतिवा ।

अमसा । स्त्री । सदस्याम् ॥ भूम्यामल- क्याम् । सातलावृक्षे । नाभिमाला याम् । टाप् ।

अमसात्मा । पुं । निवृत्तरागादिमले ।

अमसः । पुं । काले । निर्बोधे । रोगे ।

अमहात्मा । पुं । क्षुद्रहृदये । नमहा त्मा ।

अमा । अ । सहार्थे । निकटे ॥ नमाति मा माने । क्विप् ।

अमा । स्त्री । दर्शे । अमावास्यायाम् ॥ नामैकदेशेनामग्रहणात् ॥ चंद्रलोक स्वहृर्यदीधितौ ॥

अमांसः । त्रि । दुर्बले ॥ अल्पमांसयुक्ते । मांसरहिते ॥ नमांसमस्य । अल्पार्थे नञ् ।

अमांसाशी । त्रि । निरामिषाशिनि । यथा । नभक्षयेत् वृथामांसममांसाशी भवत्यपीतिशान्तौ मोक्षधर्मे भीष्मः ।

अमात्यः । पुं । मन्त्रिणि । यथा । शान्तो विनीतःकुशलः सत्कुलीनःशुभान्वितः । शास्त्रार्थतत्त्वगोऽमात्योभवेद्भूमिभुजामिहेतियुक्तिकल्पतरुः । त्रि । सहभवे । अमासह समीपेवाभवः । अव्ययात्त्यप् ।

अमान्तः । त्रि । कार्यकारणभावशून्येतु- रीयेपरमात्मनि । मायापरिच्छि- न्नः सामविषतेयस्यसः । निर्धने ।

अमानगम् । न । अनादरे ॥ नमाननम् ।

अमानस्यम् । न । पीडायाम् । त्रि । पीडायुक्ते । मानसाय हितम् मानसे- साधुवा । उगवादित्वात् यत्साध्विति वायत् । नमानस्यममानस्यम् ।

अमामसी । स्त्री । दर्शे । कृष्णपक्षान्ततिथौ ।

अमामासी । स्त्री । अमावास्याम् ।

अमावसी । स्त्री । अमामस्याम् ॥

अमावस्या । स्त्री । अमायाम् । अमासहवसतोऽस्याम् चन्द्रार्कावित्यमोपपदाद्वसे रमावस्यदन्यतरस्यामित्यधिकरणे ण्यत् पाक्षिकोह्रस्वश्चनिपातसिद्धः ॥ सूर्याचन्द्रमसोर्यः परःसन्निकर्षः सामावस्येतिगोभिलः । परःसन्निकर्षस्तत्पर्यंधोभावा पञ्चसमसूत्रन्यायेनैकराश्यवच्छेदेन सहावस्थानरूपोवोध्यः ।

अमावासी । स्त्री । दर्शे । इतिशब्दरत्नावली ।

अमावास्या । स्त्री । दर्शे ॥ अमासहवसतोऽस्यांचन्द्रार्कौ । अमावस्यदन्यतरस्यामितिण्यत् । णित्वाद्वृद्धिः ।

अमितः । त्रि । अपरिच्छिन्ने ॥ अपरि

छेद्ये ।

अमितौजाः । त्रि । अतिवीर्य्यशालिनि । अमितमपरिच्छेद्यमोजः सामर्थ्यं यस्य ।

अमित्रः । पुं । रिपौ ॥ अमति गच्छति । अमगतौ रोगेवा । अमेर्द्विषतिचिदिति इत्रः ॥

अमी । त्रि । रोगिणि । अमोरोगस्तद्वान् । इनिः ।

अमीवम् । न । क्रौर्य्ये ॥ पापे ॥ दुःखे ॥ अमीवहन्निति लक्ष्यम् ।

अमुक्तम् । न । छुरिकाविशेषे । हायकुरोति यस्यभाषा ॥ त्रि । मुक्तिरहिते । अत्यक्ते ।

अमुतः । । अमुष्मादित्यर्थे । तसिल् ।

अमुत्र । । भवान्तरे । परलोके । अमुष्मिन् । अदसः सप्तम्यास्त्रल् ।

अमुर्हि । । अमुष्मिन्काले ।

अमुष्यपुत्रः । पुं । स्त्री । प्रख्यातवंशजे । कुलीने ।

अमूढः । त्रि । वेदान्तप्रमाणसञ्जातसम्यक्ज्ञाननिवारितात्माज्ञाने ।

अमूदृशः । त्रि । एवं प्रकारे । एतद्रूपे ॥

अमूर्त्तः । त्रि । निरवयवे । वाङ्मनसोर्ज्ञेयो । यथा । सन्निवेशेनेन दृश्यो यस्तन्मूर्त्तमुच्यते । विपरीतन्तममूर्त्तं त्वितरद्द्वयमिति वे

दविदः । न्यायमतेनाकाशकालदिगात्मसु । एषांसामान्यगुणाः । सङ्ख्यापरिमितिपृथक्त्वसंयोगविभागाः । तत्राकाशस्यविशेषगुणः शब्दः । कालदिशोर्विशेषगुणोनास्ति । आत्मनोविशेषगुणास्तु । बुद्धिसुखदुःखेच्छाद्वेषयत्नभावनाख्यसंस्काराधर्माधर्मौचेति ।

अमूर्त्तविद् । त्रि । शून्यवादिनि ॥ अमूर्त्तःसर्वाकारशून्यो निस्स्वभावः परमार्थः इति शून्यवादिनां कल्पनैव । यतः परमार्थो निस्स्वभावश्चेति व्याघातः ।

अमूलः । त्रि । मूलहीने ॥

अमूलकम् । त्रि । मूलरहिते ॥ प्रमाणशून्ये । नास्तिमूलंयस्य । कप् ॥

अमूला । स्त्री । अग्निशिखा वृक्षे । ओषधिविशेषजातौ मूलाभावादिति-टाप् ।

अमृणालम् । न । लामज्जके । वीरणमूले ॥ मृणालमिव । सादृश्येऽत्रनञ् ।

अमृतम् । न । यज्ञशेषे । हैमभावशिष्टाज्यपुरोडाशादौ । अमृतमिव-अमृतसाधनत्वात् । पीयूषे । सलिले । घृते । अयाचितागतवस्तुनि । अमृतंस्यादयाचितमितिमनुः । मोक्षे । अविद्यमानं मृतंमरणमत्र । अन्ने । अम्रियंतेऽनेन । तनिमृङ्भ्यां

किञ्चेतितम् । राजनिर्घण्टे त्वमृत शब्देनविषसामान्यं वत्सनाभः पार ददयोक्तः ॥ काञ्चने ॥ स्वादुनि । आ नन्दे । रसायने ॥ स्वस्मिन् । दुग्धे । गोरसे ॥ देवानां सर्वप्राणिनाञ्च जीवने । पदेपदे स्वादुनि । सुराणाम् । आभूतसम्प्लवस्थाने । योगविशेषे । सयथा । बुधमन्दगतः नन्दाकुजेभद्रा जयागुरौ । भृगौरिक्तामृतंप्रोक्तं पूर्णा चरविचंद्रयोरिति । पञ्चमाश्विकस्य द्वितीयपर्याये । पुं । धन्वन्तरौ । देवे ॥ मरणादिदेहेन्द्रियमनोधर्मवर्जिते आत्मनि । वाराहीकन्दे । वनमुद्गे । त्रि । अविनाशिनि । अमरणधर्मिणि । देवतात्मभावे ।

अमृतगतिः । स्त्री । छन्दोविशेषे । यथा । यदिहनमंगुरुविरचितं विरतिवमितं सुकविच्छितम् । अमृतगतिः फणिकथिता दलयतिकान्तपविदितेति ।

अमृतजटा । स्त्री । जटामांस्याम् ।

अमृततरङ्गिणी । स्त्री । ज्योत्स्नायाम् ।

अमृततिलका । स्त्री । वर्णवृत्ते । यथा । नगणपयोधररुचिरा कुसुमविराजितसुकरा । वसुलघुदीर्घयुगलका भवतिसहेऽमृततिलकेति । स्वरितगतिश्चनजनकैः ।

अमृतत्वम् । न । अमरणभावे । स्वात्मन्यवस्थाने । मोक्षे ।

अमृतदीधितिः । पुं । चन्द्रे ॥

अमृतमालिका । स्त्री । कर्पूरमालिकप्रभेदेपद्मावविशेषे ।

अमृतफलम् । न । नासपातीति यवनेषुप्रसिद्धे वृक्षफले । यथा । अमृतफलंलघुहृद्यंसुस्वादुपीनहरेहोषान् । देशेषुमुसल्मानां बहुलंतल्लभ्यतेलोकैरिति । पारेवतद्रौ । पटोले ।

अमृतफला । स्त्री । द्राक्षायाम् । आमलक्याम् ॥

अमृतयोगः । पुं । पञ्चामृते योगविशेषे ॥ अपिच । हस्तमूलोत्तरापुष्यारोहिणीरेवतीरवौ । सोमेभद्राश्विनीहस्ताफल्गुनीविधिविष्णुयुक् । कुजेहिद्रपुष्याग्निसार्पपौष्णसमीरणाः । बुधेश्रतभिषामैत्रकृत्तिकारोहिणी तथा ॥ गुरौपुष्यानुराधाच स्वातीचैवपुनर्वसुः । भृगौभगाजयुक् मित्रतुरङ्गश्रवणानिच । शनौस्वातीरोहिणीचामृतयोगंवदुर्बुधाइति । पुनश्च । आदित्यभौमयोर्नन्दाभद्राशुक्रशशाङ्कयोः । जयाबेस्याद्गुरौरिक्तापूर्णार्कैचामृताशुभाइति । अपरञ्च । रवौमूला । सोमेश्रवणा । भौमेउत्तराभाद्रपदा । बुधेकृत्तिका । गुरौपुनर्वसू । शुक्रेपूर्वफाल्गुनी ।

अनेनास्वातिनक्षत्रेसहाऽमृतयोगो भवतीति ।

अमृतरसा । स्त्री । अंदरसाइतिभाषाप्रसिद्धे पक्वान्नभेदे । यथा । तृतीयभागखण्डेनमिश्रितंषष्टिपिष्टकम् । शुभ्रगोदधियुतंमर्द्दयेद्दृढपाणिना । एवंसमुदितंकृत्वास्थापयेद्रजनीमितम् । ततोऽन्यस्मिन्नहनितस्मिंश्चितंमिश्रयेत्तिलैः ॥ विधायपूपकांस्तेन तप्तिकायांघृतेपचेत् । ततोऽमृतरसाजातावातहृद्बलवर्द्धिनी । अरोचकहराहृद्यासुशीतापित्तशुद्धिमेति ॥ कपिलद्राक्षायाम् ॥

अमृतवल्ली । स्त्री । गुडूच्याम् ।

अमृतसंयावः । पुं । पक्वान्नविशेषे । स यथा । समितांमधुदुग्धेनमर्द्दयित्वासुशोभनम् । पचेद्घृतोत्तमेतस्मिन्न्यसेत्पाकंनवेघटे । ततोमरिचचूर्णेनखण्डचूर्णावचूर्णितम् । कुर्यात्कर्पूरसंयुक्तंसंयावममृतोपमम् ॥ संयावममृतंस्वादुपित्तघ्नंमधुरंस्मृतम् । वृष्यंवातहरंहृद्यंविपाकेगुरुभाषितमिति ।

अमृतसम्भवा । स्त्री । गुडूच्याम् ॥

अमृतसारजः । पुं । गुडे । तवराजे । खण्डे ।

अमृतसिद्धियोगः । पुं । योगविशेषे । यथा । हस्तामृगशिराश्वाजीमैत्र-

। पुष्येचरेवती । रोहिण्यर्कादिषुच याऽमृतसिद्धिर्यथाक्रममिति ।

अमृतसूः । पुं । विधौ ॥ स्त्री । अदितौ ॥ अमृतानांदेवानांसूः प्रसूतिः ॥

अमृतसोदरः । पुं । घोटके । इतिराजनिर्घण्टः ।

अमृतस्रवा । स्त्री । रुदन्त्याम् । उपवल्लिकायाम् । घनवल्ल्याम् ।

अमृता । स्त्री । मागध्याम् । पथ्यायाम् । कथितामांसवाऽमृतेतिवचनम् । विरेचनेप्रशस्तेयम् । गुडूच्याम् । अमृतमस्याः । आमलक्याम् । नम्रियतेऽनया । तन्निमृङ्भ्यांकिच्चेति तन् । मदिरायाम् । इन्द्रवारुण्याम् । ज्योतिष्मत्याम् । गोरक्षदुग्धायाम् । अतिविषायाम् । रक्तत्रिवृति । दूर्वायाम् । तुलस्याम् ।

अमृतान्धाः । पुं । देवे । अमृतमन्धोऽन्नंयस्यसः ॥

अमृताफलः । पुं । पटोले । इतिद्रव्याभिधानम् ।

अमृतायमानः । त्रि । अमृतरसभरिते । आनन्दसुधारसपुष्टे ।

अमृताशः । पुं । विष्णौ । आत्मामृतरसमश्नाति इति तथा । अमृतवदमृतंस्वरूपानन्दरसमश्नात्यनुभवति । अश० । कर्मण्यण्वा ।

अमृताशनः । पुं । देवे ॥ अमृतमशनमस्य ॥

अमृतासङ्गम् । न । कर्परिकातुत्थे ॥

अमृताहरणः । पुं । गरुडे ॥ अमृतमाहरणं यस्य सः ॥

अमृताह्वम् । न । लघुबिल्वफलाकृति खुरासानदेशजफलविशेषे । अमृतफले । नाशपातीतिजनभाषाप्रसिद्धे ॥

अमृतोत्पन्नम् । न । खर्परीतुत्थे ।

अमृतोत्पन्ना । स्त्री । मक्षिकायाम् । इति राजनिर्घण्टः ।

अमृतोद्भवम् । न । खर्परीतुत्थे । तुत्थे ।

अमृतोपमः । त्रि । प्रीत्यतिशयास्पदे । अमृतमुपमायस्य ।

अमृष्यमाणः । त्रि । असहमाने ।

अमेधाः । त्रि । मूढे ।

अमेध्यम् । न । पुरीषे । अयज्ञार्हे । अशुचिमांसादौ । त्रि । अपवित्रे । नमेध्यमितिविग्रहः ।

अमेयः । त्रि । अपरिच्छेद्ये । इयानितिमातुमशक्ये । नमेयः ।

अमोघः । पुं । नदविशेषे ॥ त्रि । सफले । अव्यर्थे । परमेश्वरे । सच्चिपूजितःस्तुतःसंस्मृतःसर्वफलं ददाति नवृथाकरोतीत्यमोघः । नमोघः ।

अमोघदृक् । त्रि । यथार्थवीर्ये ।

अमोघा । स्त्री । हरीतक्याम् । विडङ्गे । पाटलावृक्षे ॥

अम्नर् । । ।
अम्नस् । । । } शीघ्रे । साम्प्रतिके ।

अम्बकम् । न । लोचने । ताम्रे ॥ अम्बकःपितेतित्र्यम्बकेरामाश्रमः ।

अम्बरम् । न । पतत्रिमेघसञ्चारप्रदेशादुपरिसिद्धविद्याधरसञ्चारप्रदेशे । आकाशे । स्वनामख्यातसुगन्धिद्रव्ये । वस्त्रे । कार्पासे । अभ्रधातौ ॥ लग्नाद्दशमे । अम्बते शब्दायते । अविशब्दे । भावेघञ् । अम्बः शब्दः । तंराति । रातेःकः । अम्बरम् ॥ अम्बते अम्ब्यतेवा । अविशब्दे । बाहुलकादरोवा ।

अम्बरलेखि । न । अभ्रङ्कषे ॥

अम्बरीषः । पुं । मान्धातृतनये । सूर्यवंशीयनाभागात्मजेपरमभागवते ॥ नरकभेदे । किशोरे । भास्करे । विष्णौ । खण्डपरशौ ॥ आम्रातके । अनुतापे । न । रणे । भ्राष्ट्रे । भर्जने ॥ पचन्तितस्मिन्नम्बरीषम् । निपातनात्साधु । अम्ब्यतेऽत्रवा । अविशब्दे । अम्बरीषइतिसाधुः । मिण्डकपाकभाजने ।

अम्बष्ठः । पुं । देशभेदे । विप्राद्विवाहितवैश्यासुते । ब्राह्मणाद्वैश्यकन्या

यामम्बष्ठोनामजायते । अयंचिकित्सावृत्तिर्वैद्यइतिख्यातः ॥ हस्तिपके । कायस्थजातिविशेषे । अम्बेतिष्ठति । ष्ठागतिनिवृत्तौ । सुपीतिकः । अम्बाम्बेतिषत्वम् ॥

अम्बष्ठकी । स्त्री । पाठायाम् । पटी छू इतिहिमगिरि प्रसिद्धलतायाम् ।

अम्बष्ठा । स्त्री । अम्बलोण्याम् । चाङ्गेर्याम् । शठाम्बायाम् । पाठायाम् । यूथिकायाम् । जूहीतिख्यातपुष्पे । ब्राह्मणाद्वैश्यायामुत्पन्नायाम् । अम्बेव मातेवतिष्ठति । सुपिस्थइतिकः । अम्बाम्बेतिषत्वम् । ङ्यापोरितिह्रस्वः ।

अम्बष्ठिका । स्त्री । अम्बष्ठायाम् । पाठायाम् । ब्राह्मण्याम् । वामनेटी इतिभाषा प्रसिद्धायाम् ।

अम्बष्ठी । स्त्री । अम्बष्ठायाम् ।

अम्बा । स्त्री । मातरि ॥ दुर्गायाम् । नाट्योक्त्यापिमातरि । पाण्डुराज्ञोमातुः स्वसायाम् । अम्बष्ठायाम् । शठाम्बायाम् ।

अम्ब्यते शब्द्यते । अविशब्दे । गुरोश्चहलइत्यः ।

अम्बामखः । पुं । नवरात्रोत्सवे ।

अम्बालिका । स्त्री । अम्बार्थे । काशिराजस्यसुतायाम् । पाण्डुराज्ञो मातरि ।

अम्बासुतः । पुं । गणेशे ।

अम्बिका । स्त्री । पार्वत्याम् । अम्बैवाम्बिका । जगन्मातृत्वात् । मातरि । धृतराष्ट्रजनन्याम् । काशिराजतनयायाम् । जैनदेव्यन्तरे । कटुक्याम् ॥ अम्बष्ठायाम् ।

अम्बु । न । जले । चतुर्थभवने । ह्रीवेरे । अम्बते । अविशब्दे । बाहुलकादुः ।

अम्बुकण्टकः । पुं । कुम्भीरे । शृङ्गाटके ।

अम्बुकिरातः । पुं । कुम्भीरे । इतित्रिकाण्डशेषः ।

अम्बुकीशः । पुं । हूसइतिप्रसिद्धे जलजन्तुविशेषे । शिशुमारे । इतिहेमचन्द्रः ।

अम्बुकूर्मः पुं । शिशुमारे । इतिहेमचन्द्रः

अम्बुकेशरः । पुं । छोलङ्गवृक्षे । इतिरत्नमाला ।

अम्बुचामरम् । न । शैवले । इतिजटाधरः ।

अम्बुजः । पुं । हिज्जले । निचुले । न । कमले । वज्रे । शंखे । अम्बुनिजातः । जनीप्रादुर्भावे । सप्तम्यां जनेर्डः ।

अम्बुजन्म । न । पद्मे । इतिराजनिर्घण्टः । त्रि । जलोद्भवे ।

अम्बुतालः । पुं । शैवाले ॥ इतित्रिकाण्डशेषः ।

अम्बुदः । पुं । मेघे ॥ मुस्तायाम् ॥ अम्बुददाति । डुदाञ्० । कः ।

अम्बुधरः । पुं । मुस्तके । मेघे ।

अम्बुधिः । पुं । पारावारे ॥ अम्बूनिधीयन्तेऽत्र । डुधाञ्० । कर्मण्यधिकरणे चेतिकिः ॥

अम्बुधिस्रवा । स्त्री । गृहकन्यायाम् ।

अम्बुपः । पुं । चक्रमर्द्दे ॥ वरुणे ॥ शतभिषाख्येनक्षत्रे ॥

अम्बुपतिः । पुं । वरुणे ॥

अम्बुपत्रा । स्त्री । उच्चटायाम् ॥

अम्बुपर्णी । स्त्री । पृश्न्याम् ॥

अम्बुप्रसादः । पुं । कतकवृक्षे ॥

अम्बुप्रसादनम् । न । कतके । निर्मलीइतिख्याते फले ॥

अम्बुप्रायम् । न । अनूपे ॥ अम्बुप्रायंयत्र ॥

अम्बुभृत् । पुं । समुद्रे ॥ मेघे ॥ मुस्तके ॥ अम्बुबिभर्त्ति । डुभृञ् धारणपोषणयोः । क्विप्तुकौ ॥

अम्बुमान् । पुं । कच्छे ॥

अम्बुमात्रजः । पुं । शम्बूके । अम्बुमात्रे जायते जनी० । डः ॥

अम्बुरः । पुं । द्वाराधःकाष्ठे । गोबराट् इतिगौडभाषा प्रसिद्धे ॥ इतिहेमचन्द्रः ।

अम्बुरुहम् । न । कमले ॥ अम्बुनि रोहति । रुहेःकः ॥

अम्बुरुहा । स्त्री । स्थलपद्मिन्याम् ॥

अम्बुरोहिणी । स्त्री । नलिन्याम् ॥

अम्बुवाची । स्त्री । रजस्वलायांभूमौ ॥ यथा । यद्वारे यत्काले मिथुनसङ्क्रमणं भूतं तद्वाराभ्यन्तरे तावत्कालावधिर्विंशत्यादि दण्डाधिकदिनत्रयमम्बुवाची । साचार्द्रानक्षत्रस्यपादावच्छेदेनतिष्ठति । तस्यदिनस्यनिषिद्धमुक्तं ज्योतिःशास्त्रे । यथा । मृगशिरसिनिवृत्ते रौद्रपादेऽम्बुवाचीऋतुमतीखलुपृथ्वीवर्ज्जयेत् बीजवापानि । यदिवपतिकृषाणः सेचमासाद्बीजं न भवतिफलभागी शस्यचाण्डालपाकः ॥ नस्वाध्यायोवषट्कारोनदेवपितृपूजनम् । नापिपाठोबीजवापोनवाभूखननादिकमित्यादि । विशेषः परिशिष्टे ॥ तत्रसर्पभयोपशमनाय दुग्धंपेयम् । यथोक्तं ज्योतिषे । रजोयुक्ताम्बुवाचीचरौद्राद्यपादेगेरवौ । नास्यांपाठोबीजवापोनाहिभीर्दुग्धपानतइति ॥ रजोयुक्ता ऋतुमतीपृथ्वीत्यर्थः ॥

अम्बुवासिनी । स्त्री । पाटलौ ॥

अम्बुवासी । स्त्री । पाटलाइत्ये ॥

अम्बुवाहः । पुं । अम्बुदे ॥ अम्बुवहति । वह० । कर्मण्यण् ॥ मुस्तके ॥

अम्बुवेतसः । पुं । जलवेतसे ॥ अम्बुनिजातो वेतसः । शाकपार्थिवादिः ।

अम्बुशिरीषिका । स्त्री । शिरीषिकायाम् । जलशिरीषे ॥

अम्बुसंरोधः । पुं । जलधौ ॥ अम्बुसंरुध्यतेऽनेन ॥

अम्बुसर्पिणी । स्त्री । जलौकायाम् ॥

अम्बूकृतम् । त्रि । सनिष्ठीवे । श्लेष्मकणानिर्गमसहितवचसि ॥ अम्बुशब्द उपचारात्तद्वति । अनम्बु अम्बुभ्रकारि । च्विः । च्वौचेतिदीर्घः । क्तः ॥

अम्लः । पुं । अम्लरसे ॥ इत्युणादिकोषः । अम्बते । अविशब्दे । मृशक्यम्बिभ्यः क्लः ॥

अम्भः । न । जले ॥ आप्नोति आप्यते वा । आप्लृव्याप्तौ । उदकेनुम्भौचेतिह्रस्वोभान्तादेशो नुमागमश्च ॥ अम्भतेवा । अभिशब्दे । असुन् ॥ देवे ॥ मनुष्ये ॥ पितरि ॥ असुरे ॥ तानि ह वा एतानि चत्वार्यम्भांसि देवा मनुष्याः पितरोऽसुरा इतिश्रुतेः ॥ बाले ॥ ह्रीवेरे ॥ लग्नाच्चतुर्थराशौ ॥ नवविधतुष्टिषु प्रकृत्याख्यातुष्टिः राध्यात्मिका अम्भ उच्यते । यथा कस्यचिदुपदेशः विवेकसाक्षात्कारोहि प्रकृतिपरिणामभेदः तच्चप्रकृतिरेवकरोति इतिकृतं तेध्यानाभ्यासेन तस्मादेवमेवास्तु वत्से तियेयमुपदिष्टस्य शिष्यस्य प्रकृतौ तुष्टिः साप्रकृत्याख्या अम्भ उच्यते ॥

अम्भःसारम् । न । } मुक्तायाम् ॥ इतिराजनिर्घण्टः ॥
अम्भस्सारम् । न । }

अम्भःसूः । पुं । } धूमे ॥ इतिहेमचन्द्रः ॥
अम्भस्सूः । पुं । }

अम्भोजम् । न । अम्बुजे ॥ पुं । चन्द्रमसि ॥ त्रि । जलोद्भवे ॥ अम्भसिजातः । जनी० । सप्तम्यांजनेर्डः ॥

अम्भोजखण्डम् । न । अम्भोजानां समूहे ॥ कमलादिभ्यःखण्डः ॥

अम्भोजन्म । न । कमले ॥

अम्भोजयोनिः । पुं । वेधसि ॥ अम्भोजं योनिः प्रादुर्भावस्थानमस्य । नारायणनाभिकमलजत्वात् ॥

अम्भोजिनी । स्त्री । पद्मसमूहे । नलिन्याम् ॥ पद्मवतिदेशे ॥ अम्भोजानि सन्त्यत्र । पुष्करादिभ्योदेशे इनिः ॥

अम्भोदः । पुं । जलदे ॥ मुस्तके ॥ अम्भो ददाति । दा० । कः ॥

अम्भोधरः । पुं । अम्बुधौ । मेघे ॥ मुस्तके ॥ धरति ॥ धृञ्धारणे । अच् । अ

...स्तोधरः ।

अम्भोधिः । पुं । सिन्धौ । समुद्रे ॥ अम्भांसि धीयन्तेऽत्र । धाञः कर्मण्यधिकरणे चेति किः । जलाशये ॥

अम्भोधिवल्लभः । पुं । प्रवाले । इति राजनिर्घण्टः ।

अम्भोनिधिः । पुं । अब्धौ । समुद्रे । अम्भांसि निधीयन्तेऽस्मिन् । कर्मण्यधिकरणे चेति धाञः किः ॥ अम्भसां निधिर्वा ॥ हरौ ॥ अम्भांसि देवादयो निधीयन्ते ऽस्मिन्निति । देवमनुष्य पितृसुरादेवादयः ।

अम्भोरुहम् । न । अम्बुजे । अम्भसि रोहति । रुहप्रादुर्भावे । इगुपधेति कः ।

अम्मयम् । त्रि । अम्बुमये । आप्ये । जलविकारे फेनादौ । अपां विकारः । एकाचो नित्यमिति मयट् । स्त्रियाम् अम्मयी ।

अम्रः । पुं । आम्रवृक्षे । न । आम्रफले ॥ इति शब्दरत्नावली ।

अम्रातः । पुं । आम्रातके ॥

अम्रातकः । पुं । आम्रातके । अम्बाडा इति ख्याते । अम्लमतति । अतसातत्यगमने । कृञादिभ्यो वुन् । रलयोरैक्यम् ॥

अम्लः । पुं । रसान्तरे । खट्टा इति भाषा । तोयाग्निगुणबाहुल्यादम्ल इति सुश्रुतः । अस्य गुणा यथा । अम्लो [illegible] वह्निः शीतो वाह्यः पित्तकफास्रदः । विबन्धानाहदृष्टिघ्नो दन्ताक्षिभ्रूनिकोचन इति ॥ अम्लवेतसे । इति राजनिर्घण्टः । न । तक्रे ॥ अम्यते शब्दयते भोक्तृभिः । अमगत्यादिषु । सूक्ष्मशुल्भ्यः क्त इति बाहुलकादमेः क्तः ॥ त्रि । अम्लरसवति । अर्श आद्यच् ॥

अम्लकः । पुं । लकुचवृक्षे । इति शब्दरत्नावली ॥

अम्लकाण्डम् । न । लवणतृणे ॥

अम्लकेशरः । पुं । मातुलुङ्गे । अम्लाः केशरा अस्य ।

अम्लचूडः । पुं । अम्लद्रव्यविशेषे । आकाम्ले । चिञ्चासारे । इति राजनिर्घण्टः ॥

अम्लजम्बीरः । पुं । अम्लनिम्बूके ।

अम्लद्रवः । पुं । बीजपूरादिरसे ।

अम्लनायकः । पुं । अम्लवेतसे ।

अम्लनिशा । स्त्री । शट्याम् ।

अम्लपञ्चफलम् । न । अम्लरसयुक्तपञ्चप्रकारफले । तद्यथा । कोलम् १ । दाडिमम् २ । वृक्षाम्लम् ३ । चुक्रिका ४ । अम्लवेतसमिति ५ । मतान्तरे तु । जम्बीरम् १ नारङ्गम् २ अम्लवेतसम् ३ तिन्तिडीकम् ४ बीजपूरमिति ५ राजनिर्घण्टः

अम्लपत्रः । पुं । अश्मन्तकवृक्षे ।

अम्लपत्री । स्त्री । क्षुद्राम्लिकायाम् । पलाशीलतायाम् ।

अम्लपनसः । पुं । लिकुचे । अम्लश्चासौ पनसश्च ॥

अम्लपूरम् । न । वृक्षाम्ले ।

अम्लफलम् । न । अम्लो इ° म° वृक्षाम्ले । पुं । आम्रवृक्षे ॥

अम्लभेदनः । पुं । अम्लवेतसे ।

अम्लरुहा । स्त्री । मालवदेशजनागवल्ली प्रभेदे ॥

अम्ललोनिका । स्त्री । चाङ्गेर्य्याम् ॥

अम्लवती । स्त्री । क्षुद्राम्लिकायाम् । चाङ्गेर्य्याम् ।

अम्लवर्गः । पुं । आम्रादिगणे ॥ यथा । आम्र आम्रातकोधात्री लकुचं चकपित्थकम् । नारङ्गं द्विविधाजम्बूः करमर्दं पियारकम् । दाडिमं पार्वतीद्राक्षा द्विधावदरतूदकम् । वीजपूरं च जम्बीरं निम्बुमम्लीकाम्लवेतसम् । वृक्षाम्लं हरिमन्थं च चाङ्गेरी ह्यम्लवर्गकः ॥ निम्बूकं दाडिमं धात्रीफलमम्लं प्रकाश्यते । प्रदद्यादम्लसात्म्याय काञ्जिकं वा पुरातनमिति ॥ ज्वराधिकारस्थोयं श्लोकः ॥

अम्लवल्ली । स्त्री । त्रिपर्णिकानामकन्दविशेषे ।

अम्लवाटिका । स्त्री । नागवल्लीभेदे ॥

अम्लवातकः । पुं । आम्रातके ।

अम्लवास्तूकम् । न । चुक्रे । चूका इति प्रसिद्धशाके ।

अम्लवीजम् । न । वृक्षाम्ले ।

अम्लवृक्षम् । न । वृक्षाम्ले । इम्लीति प्रसिद्धवृक्षे ।

अम्लवेतसः । पुं । स्वनामख्यातवृक्षे । सहस्रवेधिनि । चुक्रे । गुणा यथा । अम्लवेतसमत्यम्लं भेदनं लघुदीपनम् । हृद्रोगशूलगुल्मघ्नं पित्तलोहितदूषणम् । रूक्षं विण्मूत्रदोषघ्नं प्लीहोदावर्त्तनाशनम् । हिक्कानाहारुचिश्वासकासाजीर्णवमिप्रणुत् । कफवातामयध्वंसि च्छागमांसद्रवत्वकृत् । चणकाम्लगुणं श्रेष्ठं लोहसूचीद्रवत्वकृदिति ॥ अम्लश्चासौ वेतसश्च नम्रत्वात् ॥

अम्लशाकः । पुं । अम्लचूडे । न । चुक्रे ॥ वृक्षाम्ले ।

अम्लसारः । पुं । अम्लवेतसे । निम्बूके ॥ हिन्ताले । न । काञ्जिके ॥

अम्लहरिद्रा । स्त्री । शट्याम् । इति राजनिर्घण्टः ।

अम्ला । स्त्री । चिञ्चायाम् ।

अम्लाङ्कुशः । पुं । अम्लवेतसे ।

अम्लातकः । पुं । अम्लादने ।

अम्लादनः। पुं। कुरण्टके। अम्लाने।
पीयाबांसा इतिप्रसिद्धे। बाणपुष्प
इतिगौडेषु विख्याते। गुणा यथा।
अम्लादनः कषायोष्णः स्निग्धः स्वा
दुस्तिक्तकइति।

अम्लानः। पुं। महासहायाम्। कठस
रय्याइतिख्याते॥ त्रि। निर्मले॥ न
म्लायतिस्म। म्लै० गत्यर्थाकर्म-
केतिक्तः। संयोगादेरातोधातोर्य
ण्वत इतिनिष्ठानत्वम्॥

अम्लानिनी। स्त्री। पद्मिन्याम्। पद्मस
मूहे।

अम्लिका। स्त्री। चिञ्चायाम्। अस्या
गुणास्तु। अम्लिकामा गुर्व्वातहरी
पित्तकफास्रकृत्। पक्वातु दीपनी
रूक्षासरोष्णाकफवातनुत्। अम्लि
कायाः फलंपक्वं मर्द्दितं वारिणाद्दृढ
म्। शर्करामरिचोन्मिश्रंलवङ्गेन्दुसु-
वासितम्॥ अम्लिकाफलसम्भूतंपान
कंवातनाशनम्। पित्तश्लेष्मकरंकिं
चित्सुरुच्यंवह्निबोधकमिति॥ अम्लो
द्गारे। चाङ्गेरिकायाम्॥ पलाशील
तायाम्॥ श्वेताम्लिकायाम्। अ
म्लोरसोऽस्याअस्ति। अतइनिठना
विति ठन्।

अम्लिकावटकः। पुं। काँजीबराइति
लोके। विधिर्यथा। अम्लिकांस्वेद
यित्वातुजलेनसहमर्द्दयेत्। तन्नीरे
कृतसंस्कारे वटकान्मज्जयेज्जनः। अ
म्लिकावटकास्ते तु रुच्यावह्निप्रदीप
नाः। वटकस्यगुणैः पूर्व्वैरेतेपिचसम
न्विताः इतिभावप्रकाशः।

अम्ली। स्त्री। चाङ्गेर्य्याम्।

अम्लीका। स्त्री। तिन्तिड्याम्॥

अम्लोटकः। पुं। अम्लकुचाइ इति
गौडदेशभाषाप्रसिद्धे अश्मन्तकवृक्षे
। इतिरत्नमाला।

अयः। पुं। शुभावहविधौ। प्राक्तन
शुभकर्मणि। कल्याणप्रापकेदैवे।
एत्यनेनसुखम्। इण्गतौ। पुंसि
संज्ञायामितिघः॥ पाशकस्यगमने।
कस्मिंश्चिद्भागे। द्यूतकृतां प्रदक्षिण
गमने। अयतेः कर्त्तरि पचाद्यच्॥

अयः पानम्। न। नरकविशेषे।

अयः प्रतिमा। स्त्री। स्थूर्म्याम्। अय
सः प्रतिमा।

अयः शूलम्। न। तीक्ष्णउपाये।

अयज्ञः। पुं। देवादियज्ञभिन्ने। त्रि।
यज्ञरहिते।

अयज्ञियः। त्रि। यज्ञानर्हे। पुं। माषे।

अयत्नः। त्रि। चेष्टाशून्ये।

अयथा। अ। उचितस्यान्यथात्वे। मि
थ्यार्थे।

अयथार्थानुभवः। पुं। तदभाववति

त्प्रकारकानुभवे । सचसंशयविपर्ययतर्कभेदात्त्रिविधः । अयथार्थश्चासावनुभवश्च । नयथार्थानुभवोवा ।

अयथार्थस्मृतिः । स्त्री । अप्रमाजन्यायांस्मृतौ । अयथार्था चासौस्मृतिश्च ।

अयनम् । न । पथि । अयन्ते ईयन्तेवाऽनेन । करणेति ल्युट् युजवा ॥ भानोरुदग्दक्षिणतोगतौ । यथा । मृगकर्कटसङ्क्रान्तौ । द्वे उदग्दक्षिणायनेइति ॥ अपिच । युमणिसङ्क्रमतो मृगकर्किणोरयनके भवतइति । अयतेऽर्कोऽनेन । अयगतौ । ल्युट् । ऋतुत्रये । यथा । सौरर्त्तुत्रितयं प्रदिष्टमयनमिति । अयते याच्यनेन ऋतुत्रयेणसूर्योदक्षिणाशामुत्तराशांचेति । समरसमारंभकाले योधानां यथा प्रधानं युद्धभूमौपूर्वा परादिदिग्विभागेनावस्थिति स्थानानि यानि नियम्यन्ते तेषु । मोरचाइतीतरभाषाप्रसिद्धेषु ॥ व्यूहप्रवेशमार्गे । गतौ । आश्रये ॥ स्थाने । गेहे । शास्त्रे ॥ यथा । ज्योतिषामयनंनेत्रमिति ।

अयनांशः । पुं । सूर्यगतिविशेषस्य भागे । यथाहकालिदासः । शाकःशराम्भोधियुगोनितोहृतोमानंखतर्कैरयनांशकाः स्मृताइति ।

अयन्त्रितः । त्रि । अनर्गले ॥ नयन्त्रितः ॥

अयवान् । त्रि । भाग्यवति । मतुप् ।

अयशः । न । अधर्मनिमित्तायाः लोकनिन्दायाः प्रसिद्धौ । अकीर्त्तौ ।
नयशः ।

अयः । न । लोहे ॥ एति अयतिवा । इणगतौ । असुन् ।

अयस्कान्तः । पुं । चुम्बकाश्मनि । अयःकान्तोऽस्य । कान्तीसार इतिख्याते-कान्तलोहे । सचतुर्विधः । भ्रामकचुम्बकरोमकस्वेदकभेदात् । एते रसायने उत्तरोत्तरंगुणिनः । क्रमेण दार्ढ्याङ्गकान्तिकात्स्वनोरोगदायिनइतिराजनिघण्टः ॥

अयस्कारः । पुं । लौहकारे ॥ अयःकरोति । डुकृञ् करणे । कर्मण्यण् ।

अयाचितम् । न । अमृतवृत्तौ । यथा । ऋतमुञ्छशिलंप्रोक्तममृतस्यादयाचितमितिमनुः । त्रि । याच्ञांविनालब्धेवस्तुनि । अनर्थिते । पुं । मुनिभेदे । उपवर्षे । व्रतविशेषे । नयाचितम् ।

अयाज्यः । त्रि । व्रात्ये ॥ नयाज्यः ।

अयानम् । न । स्वभावे । इतिहारावली ॥ अगमने ॥

अयामयम् । न । धृतिनांस्वरविशेषे ॥ तेषांगतिविशेषे ॥ अयतद्धिऽनतं-

नयः ॥

अयानयीनः । पुं । शारे । अक्षोपकरणे । अयानयं स्वस्वविशेषं नेतव्यः । अनुपदसर्वान्नायानयमित्यादिनाख्ः । अत्रेयंद्यूतशास्त्रस्यमर्यादा । चतस्रो वीथयः प्रत्येकंद्वादशकोष्ठोपेताः । शारास्तु त्रिंशत् । तेच एकैकेनकितवेन पंचदशस्ववामपार्श्वस्थ प्रथमकोष्ठपर्यंतंप्रदक्षिण प्रसव्यगतिभ्यांनेयाः । सर्वेप्यायानयीनाः । ससहायस्यशारस्यपरैर्नाक्रम्यते पदम् । असहायस्तु शारेण परकीयेणबाध्यते इत्यादि तच्छास्त्राद्बोध्यम् ।

अयाऽ। पुं । वह्नौ ॥ एति । इण्° । आसिः ।

अयि । ा । प्रश्ने । अनुनये । सम्बोधने । अनुरागे । ईयते अय्यतेवा । इः इन्वा ।

अयुक्छदः । पुं । सप्तपर्णवृक्षे ।

अयुक्तः । त्रि । अजितचित्ते । सर्वदाविषयापहृतचित्तत्वेन कर्त्तव्येष्वनवहिते । अनुचिते ॥ अमिश्रिते ॥ नयुक्तः ॥

अयुक्तम् । ा । अनर्थे ।

अयुग्मः । पुं । विषमे ।

अयुग्मच्छदः । पुं । सप्तपर्णवृक्षे । अयुग्माः छदायस्य ।

अयुतः । त्रि । असंयुक्ते । अयुक्ते । न । दशसहस्रे १०००० । नयुतम् ।

अयुतसिद्धौ । पुं । ययोर्द्वयोर्मध्ये एकमपराश्रितमेवतिष्ठते तावयुतसिद्धौ । यथा । अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्येचेति ।

अये । ा । क्रोधे । विषादे । सम्भ्रमे । स्मरणे । सम्बुद्धौ ।

अयेयः । त्रि । अयातव्ये । यान विनैव साध्ये । यातुंयोग्यः । या° । अत्रोयत् । ईयति । गुणः । नयेयः ।

अयोगः । पुं । विधुरे । कूटे । विश्लेषे । कठिनोद्यमे । वमनविरेचनादीनां प्रतिलोमप्रवृत्तौ अल्पप्रवृत्तौच । तदुक्तं वैद्यके । योगःसम्यक्प्रवृत्तिःस्या दतियोगोतिवर्त्तनम् । अयोगः प्रातिलोम्येनवाल्पंवाप्रवर्त्तनमिति । नयोगः ।

अयोगवः । पुं । आयोगवे । शूद्राद्वैश्यकन्यायामुत्पन्ने । इतिजटाधरः ।

अयोगुडः । पुं । लौहगुलिकायाम् । गोली इतिभाषा प्रसिद्धायाम् ।

अयोग्रम् । न । मुसले । अयोऽग्रेऽस्य ।

अयोग्रकम् । न । मुसले ॥

अयोघनः । पुं । लौहपुञ्जे । हथौडा इत्यादिभाषाप्रसिद्धलौहमुद्गरे । अ

योऽहन्यतेऽनेन । हन० । करणेऽयोविद्द्रुष्वित्यप् घनादेशश्च ॥

अयोध्या । स्त्री । सरयूतीरे द्वादशयोजनायतायां साकेतपुर्य्याम् । उत्तरकोशलायाम् ॥ त्रि । युद्धानर्हे ॥

अयोनिजः । पुं । हरौ ॥ योनौ योनिपद्लक्षितायां जनन्यां न जायते । जनोप्रादुर्भावे । सप्तम्यां जनेर्डः ॥ स्त्री । सीतायाम् । जानक्याम् ॥

अयोमलम् । न । मण्डूरे । लौहकिट्टे ॥

अयोमुखः । पुं । असुरविशेषे ॥

अरम् । न । शीघ्रे ॥ चक्राङ्गे । चक्रस्य नाभिनेम्योरन्तरालस्थकाष्ठे ॥ ऋच्छति इयर्त्ति वा । ऋच्छगत्यादौ । ऋ गतौ वा । पचाद्यच् ॥ शीघ्रार्थे क्रियाविशेषणत्वादसत्त्वे वर्त्तमानोऽयं क्लीबः द्रव्यगामी तु त्रिलिङ्गः ॥ ब्रह्मलोकस्थे समुद्रोपमे सरसि ॥ जिनानां कालचक्रस्य द्वादशांशे ॥ स तु अवसर्पिण्याः षष्ठो भागः ॥ जिनानामष्टादशतीर्थकरे ॥ त्रि । शीघ्रगे ॥

अरकः । पुं । शैवले ॥ पर्पटे ॥

अरग्वधः । पुं । राजवृक्षे ॥ इत्यमरटीकायां भरतः ॥

अरघट्टः । पुं । महाकूपे ॥

अरघट्टकः । पुं । घटीयन्त्रे । पादावर्त्ते । महाकूपे ॥

अरजम् । त्रि । निर्मले ॥ न विद्यते रजो रेणुर्यस्मिन् ॥ रजोगुणरहिते ॥

अरजाः । स्त्री । नग्निकायाम् । अनागतार्त्तवायाम् । कुमार्य्याम् ॥ त्रि । रजोगुणरहिते ॥

अरणम् । न । शरणे ॥

अरणिः । पुं । वह्निमन्थे । गणिकारिकावृक्षे ॥ सूर्य्ये ॥ इति काशीखण्डम् ॥ पुं । स्त्री । निर्मन्थ्यदारुणि ॥ ऋच्छति । ऋगति प्रापणयोः । अर्त्तिसृधृधमीत्यनिः ॥

अरणिकः । पुं । श्रीपर्णौ । अग्निमन्थे ॥

अरणी । स्त्री । अरण्याम् ॥

अरणीकेतुः । पुं । अग्निमन्थवृक्षे ॥

अरणीसुतः । पुं । अग्नौ ॥

अरण्यम् । न । वने ॥ स्त्रीजनासङ्कीर्णाश्रमे ॥ दण्डकारण्यादिनवसु ॥ यथा । दण्डकं सैन्धवारण्यं जम्बूमार्गञ्च पुष्करम् । उत्पलावर्त्तकारण्यं नैमिषं कुरुजाङ्गलम् । हिमवानर्वुदश्चैव नवारण्यं विमुक्तिदमिति वराहपुराणम् ॥ अर्य्यते मृगैः । ऋगतौ । अर्त्तेर्निच्चेत्यन्यः ॥ पुं । कट्फलवृक्षे इति शब्दचन्द्रिका ॥

अरण्यकदली । स्त्री । गिरिकदल्याम् ॥

अरण्यकार्पासी । स्त्री । वनकार्पास्याम् । भारद्वाज्याम् ॥ इयंहिमाहृवा

वृष्यश्चक्षुष्यजठराग्निमीति राजनिर्घ-
ण्टः ॥

अरण्यकुलत्थिका । स्त्री । कुलत्थायाम् । वनकुलथी इतिभाषा ॥

अरण्यकुसुम्भः । पुं । वनकुसुम्भे । अग्निसम्भवे । कौसुम्भे ॥ पाके कटुः श्लेष्मनाशी जठराग्निविवृद्धिकृदित्यस्य गुणाः ॥

अरण्यघोली । स्त्री । शाकविशेषे । वनघोल्याम् ॥

अरण्यचटकः । पुं । धूसरे । वनचटके ॥

अरण्यजार्द्रका । स्त्री । वनार्द्रकायाम् । ऐन्द्रे । वन आद्रक इतिभाषा ॥

अरण्यजीरः । पुं । वनजीरे ॥

अरण्यधान्यम् । न । नीवारे ॥

अरण्यमक्षिका । स्त्री । दंशे । अरण्यस्य मक्षिका ॥

अरण्यमुद्गः । पुं । मकुष्ठे ॥

अरण्यवायसः । पुं । द्रोणकाके ॥

अरण्यवासिनी । स्त्री । अत्यम्लपर्णीलतायाम् ॥

अरण्यवास्तूकः । पुं । कुणञ्जरे ॥

अरण्यशालिः । पुं । नीवारे । वनधान्ये ॥

अरण्यशूरणः । पुं । वनशूरणे ॥

अरण्यश्वा । पुं । वृके ॥

अरण्यषष्ठी । स्त्री । ज्येष्ठशुक्लषष्ठ्याम् । यथा । ज्येष्ठमासि सिते पक्षे षष्ठी चारण्यसंज्ञिता । व्यजनैककरास्तस्यामटन्ति विपिने स्त्रियः ॥ तांश्चिन्ध्यवासिनीं स्कन्दषष्ठीमाराधयन्ति च । कन्दमूलफलाहारा लभन्ते सन्ततिं शुभाम् । कन्दं शूरणादि । तद्भिन्नं मूलम् । इति राजमार्त्तण्डः ॥

अरण्यानी । स्त्री । महावने । महदरण्यमित्यस्मिन्नर्थे इन्द्रवरुणेतिसूत्रस्थेन हिमारण्ययोर्महत्त्व इतिवार्त्तिकेनाऽरण्यशब्दस्यानुगागमस्ततो ङीष् ॥

अरण्यायनम् । न । अरण्यवासे ॥

अरतत्रपः । पुं । शुनि । वक्रपुच्छे ॥

अरतिः । पुं । क्रुधि ॥ स्त्री । अनवस्थितचित्तत्वे । क्रोधाभावे । रतिविरहे । उद्वेगे । इष्टवियोगान्मनस्याकुलीभावे । यथा । स्वाभीष्टवस्त्वलाभेन चेतसो याऽनवस्थितिः । अरतिः सेति । त्रि । रतिहीने । अरच्छति । अच्छ° । वह्निवस्यर्त्तिभ्यश्चिदित्यतिः । अर्त्तेश्चेत्यतिर्वा ॥

अरत्निः । पुं । सप्रकोष्ठततांगुलिकरे । विस्तृतकनिष्ठबद्धमुष्टिहस्तपरिमाणे । कफोणौ । रत्निभिन्नः । नञ्समासः । यद्वा । ऋतन्यञ्जीत्यर्त्तेः कत्निच् । बद्धमुष्टिकरोऽरत्निः सोऽरत्निः प्रसृताङ्गुलिः । सकनिष्ठ इत्यर्थः ॥

अरन्धनम् । न । वसौड । इति प्रसिद्धे पाकाभावे । यथा । कर्काङ्गमयात

सिंहाह्वे सिंहास्यं सिंहकन्ययोरित्याचारमार्त्तण्ड: ॥

अरन्ध्र: । त्रि । निविडे ॥

अरपा: । त्रि । अपापे ॥ नविद्यते रप: पापंयस्य ॥

अरम् । ा । असमर्थे । अलमित्यव्ययस्य वालमूलेत्यादिना पक्षेरेफ: । अल्पे ॥

अररम् । त्रि । छदे ॥ कपाटे ॥ इयर्त्ति । अर्त्तिकमीत्यरन् । अपिधाने ॥

अररि: । पुं । न । कपाटे । ऋच्छति । विच् । अरमृच्छति । सर्वधातुभ्यइतीनि: ॥

अररी । स्त्री । कपाट्याम् । इयर्त्ति । ऋगतौ । अर्त्तिकमीत्यरन् । गौरादिङीष् ।

अररु: । पुं । अलङ्कारे । शत्रौ । ऋच्छति अर्यतेवा । ऋगतिप्रापणयो: । अर्त्तेररु: ॥

अररे । ा । आशुसंबुद्धौ । त्वरान्वितसम्बोधने । इतिशब्दरत्नावली ।

अरलु: । पुं । श्योनाकवृक्षे । इयर्त्ति । ऋगतौ । अर्त्तेररु: । कपिलकादि: ॥

अरविन्दम् । न । पद्मे । अराकाराणि दलानितत्साद्दश्यादरा: तान्विन्दति लभतइत्यर्थे गवादिषुविन्दे: संज्ञायामिति कर्मण्युपपदे बाधक:श: । शेमुचादीनामितिनुम् । अरंशीघ्रंलिप्सां विन्दतिवा । सारसपक्षिणि । नीलोत्पले । रक्तकमले । ताम्रे ॥ इतिराजनिर्घण्ट: ।

अरविन्दिनी । स्त्री । नलिन्याम् ॥ पद्मखण्डे । तडागे । अरविन्दानि सन्त्यत्र । पुष्करादिस्त्वादिनि: । ङीप् ॥

अरसिक: । त्रि । अरसज्ञे । अविदग्धे । यथा । अरसिकेषु रसस्यनिवेदनं शिरसि मालिख मालिख मालिखेत्युद्भट: ।

अराजक: । त्रि । राजशून्यदेशादौ ॥ यथा । चौरप्रायं जनपदं हीनसत्त्वमराजकमितिश्रीभागवतम् । अराजकेहिलोकेस्मिन् सर्वतोविद्रुतेभयात् । रक्षार्थमस्यसर्वस्यराजानमसृजत् प्रभुरितिमनु: । !

अराति: । पुं । अरौ । नरातिसुखम् । रादाने । क्तिच् तिर्मा ।

अराल: । पुं । सर्ज्जरसे । समदहस्तिनि । त्रि । कुटिले । ऋच्छति । ऋगतौ । विच् अर् । अरमालाति । मूलविभुजादित्वातक: । अरा: आलातिवा । नरातिदु:खम् । वाहुलकात्क्वा ॥

अराला । स्त्री । वेश्यायाम् ।

अरि: । पुं । शत्रौ । स्वकृतापकारमन-

पेक्ष स्वभावात् क्रौर्य्यपापकर्त्तरि । अरेर्मुखा यथा । मातंकुलीनंशूर मदर्थंदातारमेवच । कृतघ्नंधृतिमन्तंचकष्टमाहुररिंबुधा इति । षष्ठग्रहे । षट्सु । रथाङ्गे । चक्रे । खदिरप्रभेदे । खदिरपत्रिकायाम् । ऋयर्त्ति विरोधम् । ऋगतौ । अच इः ।

अरित्रम् । न । कर्णे । निपातके ॥ ऋच्छत्यनेन । ऋगतौ । अर्त्तिलूधूइतित्रः ।

अरिन्दमः । पुं । पराभिभावके । अरिंदाम्यतीति विग्रहे संज्ञायां भृतृवृजिधारिसहितपिदमः इत्यनेनदाम्यतेः खचि पूर्वपदस्याजन्तत्वयोर्मुमागमः । अरीन्कामादीन् दमयतीति वा ।

अरिमर्द्दः । पुं । कासमर्द्दे ॥

अरिमेदः । पुं । इरिमेदे । विट्खदिरे । अरिरिवमेदः स्नेहोऽस्य । अयंकषायउष्णस्तिक्तोभूतविनाशनः शोधातिसारकासविषवैसर्पनाशीचेतिराजनिर्घण्टे नरसिंहकोशः ॥

अरिखा । स्त्री । मात्राछन्दभेदे । यथा । छन्दसिषोडशकलेविलासिनि प्रतिपदमन्त्यमकविलासिनि । अरिखानामपयोधरधारिणि शेषेनियतलघुद्वयधारिणि ॥ यथा । किंकीना

अपाशधरगर्जसिमामुपगम्यइहासभरमर्जसि । हरिचरणांशरणं नहिप श्यसियन्नामस्मरणादपिनश्यतीति ।

अरिषः । पुं । अपानमांसजेरोगे । धाराप्रवर्षे ।

अरिषड्वर्गकम् । न । विवाहाद्युपयोगिनि गणनाविशेषे ॥ यथा । मकरःकरिकुलरिपुणा कन्यामेषेणसह भषस्तुलया । कर्किघटौ वृषधनुषी वृश्चिकमिथुनौषड्वर्गविधाविति ।

अरिषड्वर्गः । पुं । कामक्रोधलोभमोहमदमात्सर्येषु ॥ षडरिवर्गः षड्वर्गः । अरीणामन्तःशत्रूणांषड्वर्गः ॥ यथा । हयात्रावसरंकिंचित्कामादीनामनागपि । आसुमेराम्रतेःकालंनयेदाद्यचिन्तयेत्युपदेशः ॥

अरिष्टः । पुं । लशुने । निम्बे । खल्लानिकटवर्त्तिनि पर्वतविशेषे ॥ काके । नरिष्टमस्य ॥ कङ्के । फेनिलद्रो । रीठाइतिख्याते । असुरभ्यानु । अरिष्टकश्चिदोषघ्नोग्रहजिद्गर्भपातन इति । वृषभासुरे । न । अशुभे । तक्रे । सूतिकागारे ॥ उत्पाते ॥ आसवे ॥ यथा । पक्वौषधाम्बुसिद्धंयन्मद्यंतत्स्यादरिष्टकम् । अरिष्टं मरणमिति लोके । यथा । द्राक्षारिष्टम् दशमूलारिष्टम् । बब्बूलारिष्टमिति । अ

रिष्टं लघुपाकेन सर्वतस्वगुणाधिकम् । अरिष्टस्य गुणा ज्ञेया बीजद्रव्यगुणैः समाः ॥ मद्ये पुंलिङ्गोऽपीति सुश्रुतटीका । शुभे । नास्ति रिष्टमत्र न रिष्यते स्म हिंस्यैरिति वा । रिष हिंसायाम् । क्तः । न रिष्टमशुभमस्माद्वा । अनेकमिति समासः । मरणचिह्ने । यथा । रोगिणो मरणं यस्मा द्वश्यंभावि लक्ष्यते । तल्लक्षणमरिष्टं स्याद्रिष्टमप्यभिधीयत इति । न रिष्टम् । त्रि । अविनाशिनि ।

अरिष्टकः । पुं । निम्बे । फेनिले । रीठा इति ख्याते ।

अरिष्टतातिः । त्रि । क्षेमङ्करे । शुभङ्करे ।

अरिष्टदुष्टधीः । त्रि । विवशे । आसन्नमरणाद्दूषितक्षणेन दूषितबुद्धौ । अरिष्टेन दुष्टा धीरस्य ॥

अरिष्टनेमिः । पुं । मुद्गरणान्तरे । मुनिविशेषे । जिनानां चतुर्विंशत्यन्तर्गत द्वाविंशतितीर्थङ्करे ।

अरिष्टसूदनः । पुं । विष्णौ । अरिष्टसूदने । अरिष्टसंज्ञकमसुरं सूदितवान् सूदयति वा । सूद० । नन्द्यादित्वा ल्युः ॥

अरिष्टा । स्त्री । कटुकायाम् ।

अरिष्टिः । स्त्री । अरेषणे । सकलाधिव्याध्यभावे ।

अरिष्टुः । त्रि । नाशने । अरिरिव तिष्ठति । ष्ठा० । कः ।

अरुचिः । पुं । अन्नानभिलाषरूपे रोगप्रभेदे । अरोचके । अत्र सत्यभिलाषेऽप्याहारासामर्थ्यरूपो बोध्यः । रुच्यभावे ।

अरुजः । पुं । आरग्वधे ।

अरुणः । पुं । अर्के ॥ अर्कसारथौ ॥ अव्यक्तरागे । कृष्णलोहिते । कृष्णमिश्रितरक्ते ॥ सन्ध्यारागे ॥ निःशब्दे ॥ कपिले । दानवान्तरे । कुष्ठभेदे । पुन्नागपादपे ॥ गुडे । न । कुङ्कुमे । सिन्दूरे ॥ त्रि । गुणिनि । ऋच्छति । ऋगतौ । अर्त्तेश्चेत्युनन् । अरुणो वर्णोऽस्यास्ति । अर्श आद्यच् ।

अरुणकमलम् । न । रक्तोत्पले ।

अरुणलोचनः । पुं । पारावते ।

अरुणसारथिः । पुं । सूर्ये । अरुणः सूरसूतः सारथिर्यस्य ।

अरुणा । स्त्री । अतिविषायाम् ॥ श्यामायाम् ॥ मञ्जिष्ठायाम् ॥ त्रिवृतायाम् । प्रचद्दीपस्य रथ्यन्तरे । इन्द्रवारुण्याम् । गुञ्जायाम् । मुण्डितिकायाम् । कदम्बपुष्पायाम् । ऋच्छति । ऋगतौ । अर्त्तेश्चेत्युनन् । टाप् । अरुणो वर्णोऽस्त्यस्याः । अर्श आद्यच् । टाप् ।

अरुणात्मजः । पुं । जटायुनामविहगे । अरुणस्यानूरोरात्मजः ।

अरुणावरजः । पुं गरुडे ।

अरुणोदकम् । न । सरोविशेषे । मेरोः प्राच्यांदिशियो विष्कम्भशैलस्तस्य मूले सरोऽरुणोदकंनाम तच्चहेमाब्जमण्डितम् ।

अरुणोदयः । पुं । प्रातर्मुहूर्त्ते । सूर्योदयात् पूर्वमुहूर्त्तद्वये । यथा । रजनीशेषयामस्यशेषार्द्धमरुणोदयःइति । अपिच । चतस्रोघटिकाःप्रातररुणोदयउच्यते । यतीनांस्नानकालोयंगङ्गाम्भःसदृशःस्मृतःइति ॥ सप्तपञ्चारुणोदयइतिदेवी भागवतम् । अपसप्तपञ्चाशत् घटिकोत्तरमरुणोदयइतितदर्थः । अरुणस्योदयोयस्मिन्सः ।

अरुणोदयसप्तमी । स्त्री । माकर्य्याम् । भविष्योक्तविवरणायांतपः शुक्लसप्तम्याम् ॥

अरुणोदा । स्त्री । मन्दरगिरिशिखरान्निपतन्त्यांसरिति ॥ अरुणोयश्चाम्रफलरसः सएवउदकं यस्याः ॥

अरुणोपलः पुं । पद्मरागे । चुन्नीतिलोके ॥ अरुणोऽरुणवर्णश्चासावुपलः पाषाणश्च ।

अरुन्तुदः । त्रि । मर्मस्पृशि । मर्मपीडके । अरुंषि मर्माणितुदति । तुद व्यथने । विध्वरुषोस्तुदइतिखश् । अरुर्द्विषदितिमुम्किृतेसंयोगान्तस्येत्यरुषःसकारस्यलोपः ।

अरुन्धती । स्त्री । वशिष्ठपत्न्याम् । अक्षमालायाम् । कर्दममुनेः कन्यायाम् ।

अरुन्धतीजानिः । पुं । वशिष्ठे । अरुन्धती जायायस्यसः । जायायानिङ् ।

अरुन्धतीनाथः । पुं । वशिष्ठे । अरुन्धत्यानाथः स्वामी ।

अरुष्कः । पुं । भल्लातके । इतिशब्दरत्नावली ।

अरुष्करः । पुं । भल्लातकवृक्षे । न । भल्लातकफले । त्रि । व्रणकृति । अरुर्व्रणं करोति । दिवाविभेतिटः । नित्यंसमासेनुत्तरपदस्येतिषः ॥

अरुः । न । मर्मणि ॥ पुं । रक्तखदिरे । अर्के । पुं : न । व्रणे । ऋते । इयर्त्ति । ऋगतौ । अर्त्तिपृवपियजीत्युसिः ॥

अरुहा । स्त्री । भूधात्र्याम् । भूमि आंवला इतिख्यातायाम् ॥

अरूपः । त्रि । रूपशून्ये ॥ कुत्सितरूपे ॥

अरूषः । पुं । रवौ । सर्पविशेषे ॥ ऋच्छति अर्य्यते वा । ऋगतिप्रापणयोः

। ऋंहनिभ्यामूषन् ।

अरे । । । नीचसम्बोधने । यथा । अरे यमभटा: शठा:कपटविग्रहेषूद्भटानि वेदयतवोवचस्तवनचाधिकारोमयि । अहन्तु शिवसुन्दरीचरणचारुपङ्क रुहस्खलनमधुसुधासवंसमपिबंनजानीतरेदूति । रुषाह्वाने । अपाकृतौ । असूयायाम् ॥

अरेरे । । । नीचसम्बोधने ॥ रुषाह्वाने । सक्रोधाह्वाने ।

अरोक: । त्रि । निष्प्रभे । छिद्रवर्जिते । रोचनम् रोक: । रुचदीप्तौ । घञ् । नरोकोऽस्य ॥

अरोग: । त्रि । व्याधिरहिते ॥ पुं । दोषसाम्ये । रोगाभाव: । नरोगोऽस्यवा ।

अरोचक: । पुं । रोगविशेषे । अरुचि रोग इतिभाषा ।

अर्क: । पुं । रक्तार्के । अर्कपर्णे ॥ अस्य गुणायथा । अर्कद्वयं सरंवातकुष्ठकण्डूविषव्रणान् । निहन्तिप्लीहगुल्माशं: श्लेष्मोदरयकृत् क्रिमीन् । अर्कद्वयं रक्तार्क:श्वेतार्कश्च । शुक्लार्ककुसुमंवृष्यंलघुदीपनपाचनम् । अरोचकप्रसेकार्शकासश्वासनिवारणम् । रक्तार्कपुष्पंमधुरंसतिक्तं कुष्ठक्रिमिघ्नंकफनाशनञ्च । अर्शोविषंहन्तिचरक्तपित्तंसङ्ग्राहिगुल्मेश्वयथौहितंतत् ॥ क्षीरमर्कस्यतिक्तोष्णांस्निग्धंसलवणं-लघु । कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचनमिति भावप्रकाश: । स्फटिके । रवौ । लघ्वशयारविवारे । ताम्रे । दिवस्पतौ । पिडौजसि । श्रीहरौ । ब्रह्मादिभि: पूज्यतमैरर्चनीयत्वात् । द्वादशांके । हस्तर्क्षे । सर्वदर्शिनि । अर्च्यते । अर्चपूजायाम् कर्मणिघञ् । चजोरितिकुत्वम् । यद्वा । कृदाधारार्चिकलिभ्य:क इतिक: । अर्क्यते । अर्कस्तवने । ह्रस्व । अरकइतिप्रसिद्धे क्वाथविशेषे ॥ यथा । द्रव्यकल्प:पञ्चधास्यात्कल्कंचूर्णंरसस्तथा । तैलमर्क:क्रमाज्ज्ञेयंयथोत्तरगुणंप्रिये इतिरावण: ।

अर्ककान्ता । स्त्री । आदित्यभक्तायाम् ।

अर्कचन्दनम् । न । रक्तचन्दने ॥

अर्कज: । पुं । यमे । शनैश्चरे ॥

अर्कजौ । पुं । अश्विनीसून्वो: ॥ नित्यद्विवचनान्तोयम् ॥

अर्कतनय: । पुं । कर्णे । राधेये ॥ वैवस्वतमनौ । सावर्णिमनौ ॥ शनौ ॥ यमे ।

अर्कतनया । स्त्री । यमुनायाम् । तपत्याम् ।

अर्कनन्दन: । पुं । अर्कतनये । सुग्रीवे ॥

अर्कस्य नन्दनः ।

अर्कनामा । पुं । रक्तार्के ।

अर्कपत्रः । पुं । आदित्यपत्रवृक्षे ।

अर्कपत्रा । स्त्री । सुनन्दायाम् । अर्कमूलायाम् ॥

अर्कपर्णः । पुं । अर्काह्वे । मन्दारे । अर्काभानि तीक्ष्णानि पर्णान्यस्य ॥

अर्कपादपः । पुं । निम्बे । इति त्रिकाण्डशेषः ॥

अर्कपुष्पिका । स्त्री । सूर्यवल्ल्याम् ।

अर्कपुष्पी । स्त्री । कुटुम्बिनीवृक्षे । अर्कपुष्पीकृमिश्लेष्ममेहपित्तविकारजिदिति भावप्रकाशः ॥

अर्कप्रिया । स्त्री । जवायाम् ।

अर्कबन्धुः । पुं । गौतमे । बुद्धे ॥ स च इक्ष्वाकुकुलोद्भवशाक्यवंशीयोबोद्धव्यः । अर्कस्यबन्धुः सूर्यवंशजत्वात् । अम्बुजे ॥ अर्कोबन्धुर्यस्यसः ।

अर्कबान्धवः । पुं । अम्बुजे । अर्कोबान्धवोयस्यसः ॥ बुद्धे । बुद्धभिदि । अर्कस्यबान्धवः ।

अर्कभम् । न । सूर्याक्रान्तनक्षत्रे ।

अर्कभक्ता । स्त्री । आदित्यभक्तायाम् । हुल्हुल् इति प्रसिद्धे शाके ।

अर्कमूला । स्त्री । अर्कपत्रायाम् । ईश्वरमूलेतिगौडेषुप्रसिद्धायाम् ।

अर्करेताजः । पुं । सूर्यात्मजविशेषे । रेवन्ते । इतिहेमचन्द्रः ।

अर्कवल्लभः । पुं । बन्धूकवृक्षे ॥

अर्कवेधम् । न । तालीशपत्रे ॥

अर्कव्रतम् । न । राज्ञोव्रतविशेषे । यथा । अष्टौमासान् यथादित्यस्तोयं हरतिरश्मिभिः । तथाहरेत्करंराष्ट्रान्नित्यमर्कव्रतंहितदितिमनुः । आरोग्यसप्तम्यादिसूर्यव्रते ।

अर्कसूनुः । पुं । शनौ । यमे ॥ सुग्रीवे । कर्णे । अर्कस्यसूनुः । द्विवचनान्तः आश्विनेययोः ।

अर्कसोदरः । पुं । ऐरावते । इतिहेमचन्द्रः ॥

अर्कहिता । स्त्री । अर्कभक्तायाम् ।

अर्काश्मा । पुं । अरुणोपले । अर्कस्य अश्मा । सूर्यकान्तमणौ ॥

अर्काह्वः । पुं । रक्तार्के । अर्कपर्णे । अर्कआह्वायस्य ।

अर्की । पुं । अर्कवति । शस्त्ररूपमन्त्रवति होतरि ।

अर्कोपलः । पुं । सूर्यकान्तमणौ ।

अर्गलम् । न । कपाटद्वयमध्यस्थदण्डे । दुर्गापाठादौपाठ्येदेवीस्तोत्रविशेषे । यथा । मार्कण्डेयउवाच । ब्रह्मन्केनप्रकारेणदुर्गामाहात्म्यमुत्तमम् । शीघ्रंसिद्ध्यतितत्सर्वंकथयस्वमहाप्रभो । ब्रह्मोवाच । अर्गलंकीलक-

स्वादौ पठित्वा कवचं पठेत् । जपेत् सप्तशतीं पश्चात् क्रमएष शिवोदित- इति । त्रि । कल्लोले ॥ अर्ज्यते । अर्ज अर्जने । इषादित्वात् कलच् । न्यङ्क्वादिः ।

अर्गला । स्त्री । आगल इतिभाषाप्रसिद्धे कपाटबन्धककाष्ठविशेषे । कपाटान्तरविष्कम्भदण्डे । त्रि । कल्लोले ॥ टाप् ॥

अर्गलिका । स्त्री । अर्गले । आगलीइतिभाषाप्रसिद्धायां क्षुद्रार्गलायाम् ॥

अर्गली । स्त्री । कपाटरोधनार्थं तन्मध्यस्थे क्षुद्रदण्डे ॥ गौरादित्वान्ङीष् ।

अर्गवधः । पुं । राजवृक्षे ।

अर्घः । पुं । मूल्ये । पूजाविधौ । पूजोपचारभेदे । अर्घ्यतेऽनेन । अर्घपूजायाम् । हलश्चेति घञ् । न्यङ्क्वादिः । अर्घिधात्वन्तरं वा । अयंशब्दः सामगानां सर्वत्राभिव्यापेसयकारोमपुंसकलिङ्गेनैवमयोज्यः । अन्यवेदिनां निर्यकारः पुल्लिंगेन प्रयोज्यः । इति श्राद्धतत्त्वे रघुनन्दनः ।

अर्घीशः । पुं । ईश्वरे । शिवे । इति शब्दरत्नावली ।

अर्घ्यम् । न । अरत्काशमुनेस्तपोवनतरुद्भूतमधुनि । उपचारभेदे । मस्तके दीयमाने अर्घजले । अर्घायेद

म् । पाद्यार्घाभ्यां चेति यत् । त्रि । पूजार्हे । अर्घस्य योग्ये । अर्घमर्हति । दण्डादिभ्य इति यत् । पुं । मूल्ये ॥ पूजाविधौ ।

अर्चकः । त्रि । पूजके । यथा । अर्चकस्य तपोयोगादर्चनस्यातिशायनात् । आभिरूप्याच्च बिम्बानां देवः सान्निध्यमृच्छतीति तिथ्यादितत्त्वम् । अर्चति । अर्च० । ण्वुल् ।

अर्चनम् । न । पूजायाम् । यथा । धनधान्यकरं नित्यं गुरुदेवद्विजार्चनमिति । अर्चपूजायामस्माच्चौरादिकाण्ण्यासश्रन्थोयुच् । त्रि । पूजाद्रव्ये ।

अर्चना । स्त्री । पूजायाम् । टाप् ।

अर्चा । स्त्री । प्रतिमायाम् । यथाहश्रीकृष्णोव्यासादीन् प्रति । किं स्वल्पतपसां नृणामर्चायां देवचक्षुषाम् । दर्शनस्पर्शनप्रश्नप्रह्वपादार्चनादिकमिति दशमस्कन्धे ८४ अध्यायः ॥ पूजायाम् । अर्चनम् अर्च्यते वा । अर्चपूजायामस्माद्भ्वादिकात् गुरोश्चहलइत्य प्रत्ययः । टाप् ।

अर्चिः । स्त्री । ज्वालायाम् । इसन्तः । अर्च० । शिजन्तादचइर्वा ।

अर्चितम् । त्रि । पूजिते । अर्च्यते स्म० । अर्चपूजायाम् । क्तः ।

अर्चिरादिमार्गः । पुं । उत्तरमार्गे ।

अर्चिरादयुपलक्षिते देवयानपथि ।

अर्चिष्मान् । पुं । वह्नौ । भास्करे । दीप्ते । अर्चिर्विद्यते ऽस्यास्मिन्वा । मतुप् ।

अर्चिः । न । स्त्री । मयूखे । वह्निशिखायाम् । दीप्तौ । अर्च्यते । अर्च पूजायाम् । अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः । अर्चिः सान्तः ।

अर्च्यः । त्रि । पूज्ये । स्तूयते । स्तुयत्तु तौ । ण्यत् । यजयाचरुचप्रवचर्चश्चे तिकुत्वनिषेधः ।

अर्जकः । पुं । बावुई इतिभाषाप्रसिद्धे श्वेतपर्णासे । अस्यगुणाः । कटुष्णाः कफवातामयंनेत्ररोगनाशी रुचिकारी सुखप्रसवकारकश्चेतिराजनिर्घण्टः । अर्जयति । अर्जसर्जप्रर्जने । स्तूगतिस्थानार्जनोपार्जनेषु वा । ण्यन्तः । ण्वुल् । त्रि । उपार्जनस्य कर्त्तरि ।

अर्जनम् । नं । अर्जयितृव्यापारे । स्वामित्वहेतुभूतव्यापारे । संग्रहे ॥ सम्पादने ॥ अर्ज° । ल्युट् ॥

अर्जुनः । पुं । ककुभद्रुमे । कौहइति ख्याते । अस्यगुणा यथा । क्षतभग्नरक्तस्तम्भनमूत्रकृच्छ्ररोगे पथ्यत्वमितिराजवल्लभः । कषायत्वमुष्णत्वं च शोधनत्वम् कफपित्तश्रमतृष्णापित्तनाशित्वं वायुरोगप्रकोपकारित्वमिति राजनिर्घण्टः । सर्वसम्पत्तिपूर्णपराक्रमे तृतीयेपाण्डुतनये । कार्त्तवीर्य्ये । मयूरे । मातुरेकसुते । धवले ॥ करवीरे । न । तृणे ॥ नेत्ररोगे । यथा । एकोयः शशरुधिरोपमस्तु बिन्दुः शुक्लस्थोभवतितदर्जुनंवदन्तीति । त्रि । धवलवर्णवति ॥ अर्ज्यते । अर्ज अर्जने । अर्जेर्णिलुक्चेत्युनन् । तृणाख्यायांचिद्वियित्वोमनन् ।

अर्जुनधनुः । न । गाण्डीवे । अर्जुनस्य धनुः ।

अर्जुनध्वजः । पुं । वायुपुत्रे । हनूमति ।

अर्जुननामा । पुं । ककुभद्रुमे ।

अर्जुनी । स्त्री । गवि । अर्जुनवर्णयोगात् । अन्यतोङीष् ॥ उषायाम् ॥ बाहुदानद्याम् ॥ कुट्टन्याम् ॥

अर्जुनोपमः । पुं । शाकद्रौ । महापत्रे । शेगनइति गौड देश ख्याते ॥ अर्जुनउपमायस्य ।

अर्णः । पुं । अक्षरे । शाकद्रुमे ॥ ऋत्तेः क्तः ॥

अर्णवः । पुं । अम्बुनिधौ ॥ अर्णांसस्यन्सन्ति । अर्णसोलोपश्चेतिवः सलोपश्च ।

अर्णवजः । पुं । न । समुद्रफेने ।

अर्णवमन्दिरः । पुं । वरुणे । अर्णवेम

न्दिरमस्य ॥

अर्णबोद्भवः । पुं । अग्निजारदृक्षे ॥

अर्णः । न । जले ॥ ऋच्छति । ऋगतौ । उदकेनुट्चेत्यर्त्तेरसुन् तस्य चनुट् ॥

अर्णोदः । पुं । मुस्तके ॥ मेघे ॥

अर्णोभवः । पुं । शङ्खे ॥ इतिराजनिर्घण्टः ॥

अर्त्तगलः । पुं । नीलझिण्टराम् ॥

अर्त्तनम् । न । जुगुप्सायाम् । हृणीयायाम् ॥ ऋतिः सौत्रोधातुः । इयङभावेल्युट् ॥

अर्त्तिः । स्त्री । पीडायाम् ॥ धनुष्कोटौ ॥ अर्हनम् । अर्द्दहिंसायाम् । क्तिन्नावादिभ्यः । तितुत्रेतिनेट् ॥

अर्थः । पुं । विषये ॥ अर्थनायाम् ॥ अर्यते गम्यते ऋच्छतिवा । ऋगतौ । उषिकुषिगार्त्तिभ्यस्थन्नितिथन् ॥ यद्वा । अर्थ्यते प्रार्थ्यतेसुखरूपत्वात्सर्वैः । अर्थउपयाञ्चायाम् । अकर्त्तरीतिघञ् ॥ कारणे ॥ वस्तुनि ॥ वाच्ये । शब्दानामभिधेये ॥ यथा । अर्थोवाच्यश्च लक्ष्यश्चव्यङ्ग्यश्चेति त्रिधामतः । वाच्योर्थोऽभिधया वोध्योलक्ष्योलक्षणयामतः । व्यङ्ग्योव्यञ्जनयाताःस्तुतिस्रः शब्दस्यशक्तय इतिसाहित्यदर्पणः ॥ अर्थिनोऽनुकूले ॥ निवृत्तौ ॥

प्रयोजने ॥ अर्थ्यते । कर्मणि घञ् ॥ फले ॥ धने ॥ प्रकारे ॥ द्वितीयभवने ॥ अभिलाषे ॥ अर्थनमर्थः । भावेघञ् ॥

अर्थक्रमः । पुं । क्रमनिर्णये ॥ यथा । यत्रप्रयोजनवशेन क्रमनिर्णयःस अर्थक्रमः । यथा ऽग्निहोत्रंजुहोतियवागूंपचतीत्यग्निहोत्रहोमयवागूपाकयोः । अत्र हि यवाग्वाहोमार्थत्वेनतत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते । सचायं पाठक्रमाद्बलवान् । यथा पाठंह्यनुष्ठाने क्रमप्रयोजनवाधे ऽदृष्टार्थत्वंस्यात् । नहिहोमानन्तरं क्रियमाणस्य पाकस्य किञ्चिद्दृष्टं प्रयोजनमस्ति ॥

अर्थदूषणम् । न । क्रोधजव्यसनेषु षष्ठे । अर्थानामपहरणे ॥ देयानामदाने ॥

अर्थना । स्त्री । याञ्चायाम् ॥ अर्थयाञ्चायाम् । चुरादिः । ण्यासेतियुच् ॥

अर्थपतिः । पुं । राज्ञि ॥ कुबेरे ॥ अर्थानांपतिः ॥

अर्थप्रयोगः । पुं । कुसीदे ॥ अर्थस्यप्रयोगः ॥

अर्थभावना । स्त्री । आर्थीभावनायाम् । स्वर्गंयागेन प्रयाजादिभिरुपकृत्य साधयेदिति पुरुषप्रवृत्तिरर्थभावनोच्यते ॥

अर्थमर्यादा । स्त्री । सत्यंकारव्यवसाम

र्थानार्थोत्पादे ।

अर्थवान् । त्रि । धनिनि । अर्थःसन्निहितोऽस्यास्य । मतुप् । असन्निहितेतु अर्थीत्यथेव । प्रयोजनवति ॥ पुं । पुरुषे इतिराजनिर्घण्टः ।

अर्थवादः । पुं । विधिशेषे । स्तुतौ । काल्पनिकफलश्रुतौ । अङ्गफलश्रुतौ । तल्लक्षणं यथा ॥ अभिधेयया गौण्या वा वृत्त्या भूतमर्थंवदन् स्वाध्यायविध्यापादित प्रयोजनवत्त्वलाभाय विधिसाकांक्ष इति । सच षड्विधलिङ्गेषु पञ्चमम् । यथा । प्रकरणप्रतिपाद्यस्य तत्रतत्र प्रशंसनमर्थवादः । यथाछान्दोग्ये षष्ठप्रपाठके उततमादेशमप्राक्षो येनाश्रुतंश्रुतं भवति अमतं मत मविज्ञातं विज्ञातमित्य ऽद्वितीयवस्तुप्रशंसनमिति । अर्थस्य प्रयोजनस्य वदनं विध्यर्थप्रशंसापरंवचनम् । अर्थवादोहि स्तुत्यादिद्वारा विध्यर्थं शीघ्रं प्रवृत्तये प्रशंसतीति ॥ स्तुतिर्निन्दापरकृतिःपुराकल्पइत्यर्थवाद इति न्याय सूत्रम् । स्तुतिःसाक्षा द्विध्यर्थस्य प्रशंसार्थकं वाक्यम् । यथा । सर्वजिता वैदेवाः सर्वमजयन् सर्वस्य व्याप्त्यै सर्वस्य जित्यै सर्व मेवैते नाप्नोति सर्वंजयतीत्यादि । अनिष्टबोधनद्वा

रा विध्यर्थप्रवर्त्तकं निन्दा । यथा । एषवाव प्रथमोयज्ञानां यज्ज्योतिष्टोमो यएतेनानिष्ट्वा अन्येन यजते स गर्त्ते पतत्ययमेवैतज्जीर्यते प्रवामीयत इत्यादि । पुरुषविशेषनिष्ठमियो विरुद्धकथनं परकृतिः । यथा । हुत्वावपामेवाग्रेऽभिघारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्यवःपृषदाज्यमेवाग्रेभिघार यन्त्यग्नेः प्राणाः पृषदाज्यमित्यभिदधतीत्यादि । ऐतिह्यसमाचरितनयाकीर्त्तनं पुराकल्पः । यथा । तस्माद्वाएते पुराब्राह्मणा बहि ष्पवमानसामस्तोम मस्तौषन् यज्ञं प्रतनवामह इत्यादीत्यर्थः ॥ प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादइतिलौगाक्षिभास्करः । यथा । विरोधे गुणवादःस्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधामतइति । अस्यार्थः । विरोधविशेष्यविशेषणयोः सामानाधिकरण्येनान्वयविरोधे गुणवादःअङ्गकथनरूपत्वात् । यथा यजमानः स्तस्तर इति । अत्रस्तस्तरः कुशमुष्टिः तस्य यजमानेऽभेदान्वयबाधात् यजमानस्य कुशमुष्टिधारणरूपार्थवादरूपत्वात् गुणवादः । अवधारिते प्रमाणान्तरसिद्धेर्थे यो वादः । यथा नान्तरीचेऽग्नि

श्चेतव्यः अग्निर्हिमस्य भेषजमित्यादि च । अन्तरीक्षेऽग्निश्चयनस्थासम्भवेन तद्भावस्य अग्नेर्हिमनाशकत्वस्य च लौकिकप्रमाणसिद्धत्वाद्नुवादः । तद्यथा तयोर्विरोधावधारणयोरभावे भूतार्थवादः । यथा इन्द्रो वृत्रहत्रमित्यादि । सोऽपि त्रिविधः । स्तुत्यर्थवादो निन्दार्थवादश्च । यथा । सन्ध्यामुपासते येचेत्यादिस्तुत्यर्थवादः । स्त्रीतैलमांससम्भोगी पर्वस्वेतेषु वै पुमान् । विण्मूत्रभोजनं नाम प्रयाति नरकं मृत इत्यादिनिन्दार्थवाद इति । तत्त्वसम्बोधनीमतेतु सप्तविधः । यथा । स्तुत्यर्थवादः १ फलार्थवादः २ सिद्धार्थवादः ३ निन्दार्थवादः ४ परकृतिः ५ पुराकल्पः ६ मन्त्रः ७ । एषामुदाहरणानि श्रौतानि ग्रन्थगौरवभिया न लिखितानि ॥

अर्थविज्ञानम् । न । शुश्रूषाद्यष्टधीगुणान्तर्गतगुणविशेषे । शब्दार्थज्ञाने ॥

अर्थविप्रकर्षः । पुं । पूर्वपूर्वमपेक्ष्योत्तरोत्तरस्य विलम्बेनार्थोपपादकत्वे ॥

अर्थव्यपाश्रयः । पुं । प्रयोजनसम्बन्धे ॥

अर्थव्ययज्ञः । त्रि । धनव्ययप्रकारविदि । मुकुले ॥ अर्थव्ययं जानाति । ज्ञा । कः ॥

अर्थशास्त्रम् । न । अथर्ववेदस्योपवेदे चतुष्षष्टिकलासङ्ग्राहके शिल्पशास्त्रादिशास्त्रभेदे । दण्डनीत्याम् । यथा । बृहस्पतिप्रभृतिभिः प्रणीतमर्थशास्त्रकम् । तथैव दण्डनीतिः स्यादत्र योगेनवानयोरिति । अर्थ्यते गम्यते । ऋ गतौ । उषिकुषिगार्त्तिभ्यस्थन् । अर्थस्य भूमिधनादेः शास्त्रम् ।

अर्थसमाहर्त्ता । त्रि । सम्यग्धनार्जनशीले ॥

अर्थसिद्धकः । पुं । सिन्दुवारवृक्षे ।

अर्थागमः । पुं । आये ।

अर्थान्तरम् । न । प्रकृतानाकाङ्क्षितार्थे । यथाक्षगौतमः । प्रकृतादर्थादसम्बद्धार्थमर्थान्तरम् । ५ । ५ । प्रकृतात् कृतोपयुक्तात् । स्वप्रोपेपञ्चमी । तेनप्रकृतोपयुक्तमर्थमुपेक्ष्य असम्बद्धार्थाभिधानमर्थान्तरम् । प्रकृतानाकाङ्क्षिताभिधानमिति फलितार्थः । यथा शब्दोऽनित्यः कृतकत्वादित्युक्ता शब्दोगुणः सचाकाशस्येत्यादि ॥

अर्थान्तरन्यासः । पुं । अर्थालङ्कारभेदे । यथा । सामान्योवाविशेषोवा तदन्येन समर्थ्यते । यत्रसोऽर्थान्तरन्यासः साधर्म्येणेतरेणवा ॥ साधर्म्येणवैधर्म्येण वासामान्यं विशेषेण यत्समर्थ्य

तेषिमेषोवासामान्येनसोऽर्थोऽन्यत्र्यासः। क्रमेणोदाहरणम्। निजदोषावृतमनसा अतिसुन्दरमेवभाति विपरीतम्। पश्यतिपीतोपहतःशशिशुभ्रं शङ्खमपिपीतम्। सुतं तव समालङ्कारायां कदाचन कौमुदीमहसि सुहृद्भिस्त्वैरं यान्त्यां गतोऽस्तमभूद्विधुः। तदनु भवतः कीर्त्तिः केनाप्यगीयत येन सा प्रियगृहमगात्मुक्ताशङ्का कनासिशुभ्रमदः। गुणानामेवदौरात्म्याद्धुरि धुर्य्यो नियुज्यते। असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गलिः। अहो हि मे बह्वपराद्धमायुषा यदप्रियं वाच्यमिदं मयेदृशम्। तएवधन्याः सुहृदः पराभवं जगत्यदृष्ट्वैव हि ये क्षयं गताइति।

अर्थापत्तिः। स्त्री। प्रमाणविशेषे। जीवतश्चैत्रस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनायाम्। अनुपपद्यमानेनार्थेनोपपादककल्पने॥ यथा दृष्टयामेघध्वानं वृष्ट्यासह मेघस्य वैयधिकरण्याद्व्याप्तिरिति नानुमानेऽन्तर्भावः। उक्तेनानुक्तमाक्षिपति यासा अर्थापत्तिः॥ अलङ्कारान्तरं। एकस्य वस्तुनोभावाद्यत्र वस्त्वन्यदापतेत्। कैमुत्यन्यायतः साक्षादर्थापत्तिरलङ्क्रिया॥ दण्डापूपिकया र्थान्तरस्यापतनमर्थापत्तिरितिसूत्रम्।

अर्थार्थी। त्रि। इच्छानुगता यज्ञोपकरणंतदभीप्सी। अर्थस्य अर्थी।

अर्थिकः। पुं। वैतालिके। निद्राणस्य राजादेः सुखादिना प्रातर्जागरयितरि।

अर्थितः। त्रि। याचिते। अर्थ्यतेस्म। अर्थ॰। क्तः।

अर्थी। त्रि। याचके। सेवके। विवादिनि। धनिनि। सहाये। अर्थोऽसर्थितोऽस्यास्ति। अर्थाच्चासन्निहिते इतिइनिः॥ अर्थयतेवा। अर्थ याचने। ग्रह्यादित्वाण्णिनिः। स्त्रियामर्थिनी।

अर्थ्यः। त्रि। पण्डिते॥ सम्प्रार्थ्ये। न्याय्ये॥ अर्थशालिनि। न। शिलाजतुनि। अर्थेसाधुः। तत्रसाधुरिति यत्॥ अर्थादनपेतः। धर्मपथ्यर्थेति यत्॥ अर्थ्यते। अर्थ उपयाच्ञायाम्। ण्यन्तः। अचोयत्॥

अर्हनम्। न। गमने। पीडने। याचने॥ हनने। अर्हभर्विस्फुट्।

अर्हना। स्त्री। याच्ञायाम्॥ अर्हगतौयाचनेच। स्वार्थणयन्तः। ण्यासेतियुच्। टाप्।

अर्हितम्। त्रि। याचिते। हिंसिते।

रोगिणि । गते ॥ न । वातव्याधिविशेषे ॥ तस्य लक्षणम् । वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते । शिरश्चलति वाक्संगो नेत्रादीनां च वैकृतम् । ग्रीवा चिबुकदन्तानां तस्मिन् पार्श्वे च वेदना । तमर्द्दितमिति प्राहुर्व्याधिं व्याधिविशारदा इति । यस्मिन् पार्श्वे अर्द्दितं तस्मिन् पार्श्वे ग्रीवादीनां वेदनेत्यर्थः । अस्यौषधं यथा । रसोनकल्कं तिलतैलमिश्रं योऽश्नाति नित्यं व्यार्द्दितरोगयुक्तः । तस्यार्द्दितं नाशमुपैति शीघ्रं वृन्दं घनानामिव वायुयोगादिति ॥ विषमज्वरेप्येतद्देयम् ॥ अर्द्धते स्म । अर्द्द गतौ याचने च । क्तः ।

अर्द्धः । पुं । भित्ते । खण्डे ॥ न । समांशे । आधा इति भाषा । स्थाने । रूपकार्द्धे । ऋध्नोत्यनेन । ऋधु वृद्धौ । हलश्चेति घञ् । अत्रायं विवेकः । अर्द्धशब्दः खण्डमात्रविवक्षायां पुल्लिङ्ग एव । असि अर्द्धे अर्द्धः । समखण्डविवक्षायां क्लीबएव । यदा त्वर्द्धशब्दो धर्मिपरस्तदा त्रिलिङ्ग एवेति ।

अर्द्धगङ्गा । स्त्री । कावेर्याम् । अर्द्धं गङ्गायाः । अर्द्धं नपुंसकमिति समासः ।

अर्द्धगुच्छः । पुं । चतुर्विंशतिलतिकहारे ॥ गुच्छार्द्धे । अर्द्धं गुच्छस्य ।

अर्द्धचन्द्रः । पुं । नखक्षते । गलहस्ते । बाणभेदे । चन्द्रार्द्धे । अर्द्धचन्द्राकारे स्त्रीणां ललाटाभरणविशेषे ॥

अर्द्धचन्द्रा । स्त्री । कृष्णत्रिवृति । अर्द्धश्चन्द्रोयस्याः । एतद्दिदलस्यार्द्धचंद्राकारत्वात् ।

अर्द्धचन्द्रिका । स्त्री । कर्णस्फोटालतायाम् । चित्रपर्ण्याम् ।

अर्द्धचोलकः । पुं । कूर्पासे । काँचुली इति प्रसिद्धे वस्त्रे । कुर्त्ती इति च प्रसिद्धे । इति शब्दरत्नावली ।

अर्द्धजाह्नवी । स्त्री । कावेर्याम् ।

अर्द्धतिक्तः । पुं । नेपालनिम्बे ॥

अर्द्धनारीश्वरः । पुं । शिवे । उमामहेश्वरे । अस्य ध्यानं यथा । नीलप्रवालरुचिरं विलसत्त्रिनेत्रं पाशारुणोत्पलकपालकशूलहस्तम् । अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं बालेन्दुबद्धमुकुटं प्रणमामि रूपमिति ॥

अर्द्धनावम् । न । नावोर्द्धे । नावोऽर्द्धम् । अर्द्धं नपुंसकमिति तत्पुरुषः । अर्द्धाच्चेति नावष्टच् ॥

अर्द्धपारावतः । पुं । चित्रकण्ठे । तित्तिरिपक्षिणि ॥

अर्द्धपुलायितम् । न । अश्वस्य मण्डलगतिविशेषे । यथा । शताद्धौ क्रमाद्दूनैर्मण्डलायितवल्गितैः । उन्मुखस्याश्वमुख्यस्य गतिरर्द्धपुलायितमिति ।

अर्द्धभ्रमकः । पुं । कामचक्रप्रभेदे ।

अर्द्धमाणवकः । पुं । द्वादशयष्टिकेहारे ।

अर्द्धमात्रा । स्त्री । विन्दुचन्द्ररूपिण्याम् ब्रह्मरूपिण्याम् । अर्द्धमात्रापरं पदम् । यथा । अकारोभगवान्ब्रह्मा उकारोविष्णुरुच्यते । मकारोभगवान्रुद्रोप्यर्द्धमात्रामहेश्वरी । उत्तरोत्तरभावेनाप्युत्तमत्वं स्मृतंबुधैः । अतःसर्वेषुशास्त्रेषु देवीसर्वोत्तमास्मृता । अर्द्धमात्रास्थितानित्यायानुच्चार्याविशेषतइति ॥

अर्द्धयामः । पुं । वारवेलायाम् । यामार्द्धे । कालवेलायाम् । कुलिकवेलायाम् ।

अर्द्धरथः । पुं । रथान्यूने ।

अर्द्धरात्रः । पुं । निशीथे । रात्र्यर्द्धभागे । अर्द्ध रात्रेः । अर्द्धं नपुंसकमिति समासः । अचः सर्व्वैकेत्यच् ।

अर्द्धर्चः । पुं । न । ऋचोर्द्धे ।

अर्द्धलक्ष्मीहरिः । पुं । विष्णौ । तद्ध्यानं यथा । उद्यत् प्रद्योतनशतरुचिंतप्तहेमावदातं पार्श्वद्वन्द्वेजलधिसुतया विश्वधात्र्याचजुष्टम् । नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रं विष्णुं वन्देदरकमलकौमोदकीचक्रपाणिमिति ।

अर्द्धवीक्षणम् । न । कटाक्षे । अपाङ्गदर्शने ।

अर्द्धवैनाशिकः । पुं । वैशेषिके । वैशेषिकस्तावत् परिणामभेदेन देहादेरास्थिरविनाशित्वाङ्गीकारादात्मनःस्थायित्वाङ्गीकाराच्चार्द्धवैनाशिकत्वेनप्रसिद्धएव ।

अर्द्धशनम् । न । अर्द्धभुक्तौ । अर्द्धाशने ।

अर्द्धशफरः । पुं । क्षुद्रमत्स्यविशेषे । हण्डपाल्ले । दाँडिकामाच इतिगौडानां भाषयाख्याते ।

अर्द्धहारः । पुं । चौंसठलडाहार इतिलोकभाषा प्रसिद्धे चतुष्षष्टियष्टिकहारे ।

अर्द्धाशनम् । न । अर्द्धभोजने ।

अर्द्धासनम् । न । स्नेहदाने । अभिनन्दने । इतिधरणिः ।

अर्द्धेन्दुः । पुं । अर्द्धचन्द्रे । चन्द्रार्द्धभागे । गलहस्ते । नखाङ्के । अतिप्रौढस्त्रीयोन्यङ्गुलियोजने । अर्द्धचन्द्रवाणे । अर्द्धम् इन्दोरितिविग्रहः ॥

अर्द्धोदयः । पुं । पर्वविशेषे । तच्चोक्तं कामधेनुतन्त्रे । यथा । माघेमासि अमावास्या यदिअर्कयुताभवेत् । नक्षत्रश्रवणेदैविव्यतीपातोभवेद्यदि । अर्द्धोदयःसविज्ञेयः कूर्यपर्व्वशतैः समइति । दिवैवयोगः शस्तोऽयंनचरात्रौकदाचन । अर्द्धं द्विशेतुसम्प्राप्तेस

वंगङ्गासमंजलम्। शुद्धात्मानोद्विजाः सर्वेभवेयुर्ब्रह्मसन्निभाः। यत्किञ्चित्क्रियतेदानं तद्दानंमेरुसन्निभमिति स्कन्दपुराणम्।

अर्द्धोरुकम्। न। चण्डातके। ऊर्वोरर्द्धाच्छादनांशुके। उत्तमस्त्रीणामर्द्धोरुपर्यन्ते चोलकाकारे परिधेयवस्त्रे। ऊरोरर्द्धम्। अर्द्धनपुंसकमिति समासः। अर्द्धोरौ काशते। काशृदीप्तौ। अन्येभ्योपीतिडः।

अर्द्ध्यम्। त्रि। अर्द्धभवे। अर्द्धभवः। अर्द्धाद्यत्।

अर्पणम्। न। समर्पणे॥ अर्प्यतेऽनेनेति व्युत्पत्त्या जुह्वादौ। मन्त्रादौ। अर्प्यतेऽस्मैइति व्युत्पत्त्या देवतादिरूपे सम्प्रदाने। अर्प्यतेऽस्मिन्निति व्युत्पत्त्याअधिकरणे देशकालादौ। हविरादौ। अर्प्यतेयत्तत् कर्मणि ल्युट्।

अर्पितः। त्रि। सम्प्रवेशिते। व्याप्ते।

अर्पिसः। पुं। हृदये। अग्रमांसे॥ अर्पयति। ऋगतौ। ऋतन्यञ्जीत्यादिना अर्पयतेरिसन्।

अर्ब्बुदः। पुं। न। मांसकीले। रसौली इति ख्याते रोगविशेषे॥ दशकोटिसंख्यायाम्। १०००००००० ॥ पुं। आबू इति प्रसिद्धे महीधरविशेषे। न।

वर्त्तुलफलाद्रौ।

अर्भः। पुं। बाले। उत्तानशये। ऋच्छति। इयर्त्तिवा। ऋ०। अर्त्तिगृभ्यांभन्।

अर्भकः। पुं। बाले। मूर्खे। कृशे॥ सदृशे। अल्पे। अर्य्यते वृद्धिं प्राप्यते। ऋगतौ प्रापणेच। अर्भकपृथुकपाकावयसीतिसाधुः। यद्वा। इयर्त्तिवृद्धिं गच्छतिवा। अर्त्तिगृभ्यांभन्। स्वार्थेकः। यद्वा। ऋभ्नोति। ऋधुवृद्धौ। अर्भकपृथुकेति वुन् भष्चान्तादेशः॥

अर्म्मः। पुं। न। नेत्ररोगभेदे। तत्पञ्चविधम्। प्रस्तार्य्यर्म्मशुक्लार्म्म रक्तार्म्ममांसार्म्मस्नाय्वर्म्मभेदात्। एषांलक्षणानि तत्तच्छब्दे द्रष्टव्यानि। ऋच्छति। ऋगतिप्रापणयोः। अर्त्तिस्तुस्विति मन्।

अर्म्मणः। पुं। द्रोणपरिमाणे। इति वैद्यकपरिभाषा।

अर्य्यः। पुं। स्वामिनि॥ वैश्ये॥ त्रि। श्रेष्ठे। अर्य्यते। ऋगतौ। अर्यःस्वामिवैश्ययोरिति साधुः।

अर्य्यमा। पुं। सूर्ये। अर्कवृक्षे॥ पितृणांराज्ञि। उत्तरफल्गुन्याम्। इयर्त्ति अर्यः। ऋगतौ। श्वन्नुक्षन्पूषन्प्लीहन्नित्यादिना अर्यपूर्वान् माङः कनि-

न निपातित: ।

अर्य्या । स्त्री । वैश्यजातीयायाम् ॥ स्वामिन्याम् । अर्यः क्षत्रियाभ्यांवास्वाय इति आनुगागमाभाव्टाप ॥

अर्य्याणी । स्त्री । वैश्यजातीयायाम् । स्वामिन्याम् । अर्यक्षत्रियाभ्यांवास्वार्थ इतिपक्षे आनुगागमोङीषच ।

अर्य्यी । स्त्री । वैश्यप्रियायाम् । अर्य्यस्य स्त्री । पुंयोगलक्षणोङीष् ।

अर्वती । स्त्री । कुभ्भदास्याम् । वडवायाम् । घोटक्याम् । तुरग्याम् ।

अर्वा । पुं । तुरङ्गमे । ऋच्छति । ऋगतौ । अन्येभ्योपीति सामर्दीत्यादिनावावनिप् । यद्वा । अर्वलिवा । अर्व गतौ । बाहुलकात् कनिप् । महेन्द्रे । हयकर्णपरिमाणे । त्रि । अधमे । ऋच्छतेः अवद्यावमाधमार्वरेफाः कुत्सितइतिवक्ष्यन्तो निपातः ।

अर्वाकतन: । त्रि । निर्मूले । अवेदमूले । स्वेच्छाकृते । अर्वाक्भव: । सायंचिरमित्यादिनाट्युः ॥

अर्वाक । । । अवरे । पूर्वकालत:पश्चादर्थे । अवरे अञ्चति । अस्तातिः । अञ्चेर्लुक् । पृषोदरादि: । अर्वन्तम् अञ्चति वा । विपर्यस्ते । इतिधरणि: ।

अर्वाचीन: । त्रि । अर्वाचि । पश्चाज्जाते । अर्वागेव । विभाषाञ्चेरदिक्-

न निपातित: ।

क्षियामितिख: ।

अर्शम् । न । गुदव्याधौ । इतिशब्दरत्नावली ।

अर्श: । न । अर्शो । गुदव्याधिभेदे । दुर्नामके । गुदकीले । अस्यसामान्यलक्षणं यथा । दोषास्त्वङ्मांसमेदांसिसन्दूष्यविविधा कृतीन् । मांसाङ्कुरानपानादौ कुर्वन्त्यर्शांसितान् जगुरिति । अथास्यसामान्यतोनिदानंयथा । पृथग्दोषै:समस्तैश्चशोणितात् सहजानिच । अर्शांसिषट्प्रकाराणि विद्याद्गुदवलित्रये ॥ सामान्यतो ऽर्शसश्चिकित्सायथा । यद्वायोरानुलोम्याय यदग्निबलवृद्धये । अन्नपानौषधंसर्वंतत्सेव्यंनित्यमर्शसैरिति । ऋच्छति । ऋगतौ । व्याधौ शुट् चेत्यर्त्तेरसुन् ।

अर्शस: । त्रि । गुदव्याधियुक्ते । अर्शोरोगयुते । अर्शांस्यस्यविद्यन्ते ॥ अर्श आदिभ्योऽच ।

अर्शसान: । पुं । अग्नौ । ऋच्छति । ऋ० । अर्त्तेर्गुण: शुट्चेत्यसानच् । अर्शसानाय शवसांश्चिमिव इति वेदभाष्यम् ।

अर्शी । त्रि । गुदव्याधियुते । इतिशब्दरत्नावली ॥

अर्शोघ्न: । पुं । सूरणे । भल्लातके । अ-

शांसि हन्ति । अमनुष्यकर्तृकेपुचे तिहन्तेष्टक् ।

अर्शोघ्नी । स्त्री । तालमूल्याम् । भल्लातक्याम् । टित्त्वान्ङीप् ।

अर्शोरोगयुतः । त्रि । अर्शसे । भूलन्याधिमति । अर्शोरोगेणयुतः ।

अर्शोऽहितः । पुं । अर्शोघ्ने । अर्शसोऽहितः ।

अर्हन्तः । पुं । क्षपणे । बुद्धे । त्रि । मान्ये । इतिमेदिनीमुद्राङ्किता ।

अर्हः । पुं । पूजाप्रशंसास्तुतिनमस्कारादिभिः पूजनीये परमेश्वरे । अर्च्यते पूज्यतेषोडशभिरुपचारै रित्यर्हः । अर्हःकर्मणिघञ् । शक्रे । त्रि । योग्ये अर्हति । अर्हपूजायाम् । पचाद्यच् ।

अर्हणः । पुं । जिने । न । पूजने । उपायने । पुष्पादौ ।

अर्हणा । स्त्री । अर्हायाम् । योग्यायां पूजायाम् । अर्हपूजायां चुरादिः । ण्यासश्रन्थोयुच् । टाप् ।

अर्हणीयः । त्रि । पूज्ये ।

अर्हन् । पुं । जिने । जिनभेदे । अनादिसिद्धजीवास्तिकाये । क्षपणे । बुद्धे । कोङ्कवेङ्ककुटकानांराज्ञिऋषभदेवे । त्रि । पूज्ये । अर्हति । अर्ह० । अर्हः प्रशंसायामिति शतृप्रत्ययः ।

अर्हत्तमः । त्रि । अत्याचाराभिजनादिभिः पूज्यतमे ।

अर्हन्तः । पुं । सुगते । क्षपणे । अर्हति । अर्ह० । बाहुलकाज्झच् ।

अर्हा । स्त्री । पूजायाम् । अर्ह० । गुरोश्चहलइत्यकारप्रत्ययः । टाप् ।

अर्हितम् । त्रि । अर्चिते । अर्ह्यतेस्म । अर्हपूजायाम् क्तः ।

अलम् । न । वृश्चिकपुच्छकण्टके । हरिताले ।

अलकः । पुं । न । चूर्णकुन्तले । अलति भूषयति मुखम् अलतेवा । अलभूषादौ । क्वुनादिभ्याकुन् ।

अलकनन्दा । स्त्री । कन्यायाम् । गङ्गायाम् । यथा । तथैवालकनन्दापितृपिथ्ये मैतिभारतम् । ययातिसागरंभूत्वाससभेदामहामुने इति । तथासौ तावत् ।

अलकप्रभा । स्त्री । यक्षेशपुर्य्याम् ।

अलकप्रियः । पुं । पीतसालके । विजयसार इतिख्याततरौ ।

अलका । स्त्री । कुबेरपुर्य्याम् । अष्टवर्षावधिदशवर्षपर्यन्तवयस्कायांकन्यायाम् । अलति भूषयति । अलभूषणादिषु । क्वुनशिल्पिसंज्ञयोरपूर्वस्यापि । क्षिपकादित्वात्नेत्वम् ।

अलकाधिपः । पुं । धनपतौ । अलकायाअधिपः ।

अलक्तः । पुं । लाक्षारसे । अस्य गुणाः
। तिक्तत्वम् उष्णत्वम् कफवातरोगम्न
लदोषनाशित्वम् कण्ठरोगशमनत्व
म् रुचिकारित्वञ्चेति राजनिर्घण्टः ।
लाक्षायाम् । न लज्जतेऽस्मात् । ओल
जी ओलस्जी व्रीडे । बाहुलकात्तन्
। यद्वा । न लक्ष्यतेऽस्मा । अभ्यक्तात्
। क्तः । यद्वा । अरक्तो भात् । कपि
लकादित्वाल्लत्वम् ।

अलक्तकः । पुं । लाक्षारसे । निर्भर्त्सने ।
लाक्षायाम् । यथा । कदाकालेमात:
कथयकथितालक्तकरसंपिबेयंविधा-
र्यीतवचरणानिर्यन्मनअलमिमि । अ
लक्तमेवालक्तकम् ।

अलक्षणः । त्रि । परेतम्बे । अननुमेये
। नविद्यतेलक्षणंयस्मिन् । न । दुर्ल
क्षणे । त्रि । तद्वति ।

अलक्षितः । त्रि । अज्ञाते ।

अलक्ष्मीः । स्त्री । निर्ऋतौ । नरकदे
वतेतिकश्चित् । अशोभायाम् । ल
क्ष्म्यंशाःविरुद्धा ।

अलगर्दः । पुं । जलव्याले । नागरुदप
कृष्णसर्पजातौ । लगति । लगेसङ्गे ।
क्विप् । अर्दयति । अच् । लक्चासा
वर्दश्च । अयः सन् पीडकत्वस्यार्थः ।
निर्विषत्वान्नञ्चिकोऽलगर्दः । यद्वा
। अलति । अलगत्वादौ गर्दशब्दे

। अच् । अलगावौगर्दश्चेति ।

अलगर्दः । पुं । जलव्याले । अलंगृध्यति
। गृधु अभिकाङ्क्षायाम् । पचाद्यच्
। पृषोदरादिः ।

अलङ्करणम् । न । भूषायाम् । कृञ्
। ल्युट् ।

अलङ्करिष्णुः । त्रि । भूषके । भूषणे ।
अलङ्करोति तच्छीलः । अलंकृञि
तीष्णुच् ।

अलङ्कर्त्ता । त्रि । अलङ्करिष्णौ । अल
ङ्करणशीले । अलङ्करोति । तृन् ।

अलङ्कर्म्मीणः । त्रि । कार्यार्हे । कर्मक्ष
मे । क्रियाकरणसमर्थे । कर्मणेक्रि
यायै अलंसमर्थः । अषडक्षेतिखः ।
प्राप्तापन्नालंपूर्वेतिपरवल्लिङ्गनिषेधा
त् ज्ञापकात् समासः । पर्यादयोग्ला
नाद्यर्थे इतिवा ।

अलङ्कारः । पुं । हारादौ । कङ्कणाद्या
भरणे । यथालङ्कारधारणादिमनुच्य
ते । रेवत्यश्विधनिष्ठासुहस्तादिष्व-
पिपञ्चसु । गुरुशुक्रबुधस्याह्निवस्त्रा-
लङ्कारधारणम् । अनिष्टेष्वपिनिर्दि
ष्टंवस्त्रालङ्कारधारणम् । उद्वाहेराज
सम्माने ब्राह्मणानाञ्चसम्मते । शिर
स्कंमुकुटंहारः कुण्डलञ्चाङ्गदंतथा ।
कङ्कणंचालकञ्चैवमेखलाष्टाविति क्र-
मात् । प्रधानभूषणान्येषु यथासंख्या

नि निश्चयः। पद्मरागश्च वज्रश्च विज योगोविद्रास्तथा । मुक्तावैदूर्यनीलानितथामरकतंक्रमात् । आदित्यादिग्रहाणां सर्वसम्पत्तिदामता: । सुवर्णेनापिघटनासर्वेषामुपयुज्यते । प्रधानभूषणेष्वेवमप्रधाने न निश्चयः । प्रधानभूषणंप्रायः शिरसोह्यभिधीयते । तस्यप्रधानभूषत्वादित्याहभृगुनन्दनः ॥ सुखदामणयः शुद्धादुःखदादोषशालिनः । अतोमणीनांवक्ष्यामिलक्षणानि यथाक्रममितियुक्तिकल्पतरुः॥मणिविशेषलक्षणानितत्तच्छब्देद्रष्टव्यानि॥ काव्यालङ्कारे । उपमादौ ॥ सद्विविधः । शब्दालङ्कारोऽर्थालङ्कारश्च । तल्लक्षणोदाहरणान्युपमादितत्तच्छब्देवलोकनीयानि । चतुष्कलेशेषगुरौ: । ऽ संज्ञायाम् । अलंक्रियतेऽनेन । डुकृञ्० । घञ् ॥

अलङ्कृतः । त्रि । भूषिते । अलंक्रियते-स्म० । क्तः ॥

अलङ्क्रिया । स्त्री । भूषायाम् अलङ्कारसाध्यशोभायाम् ॥ अलंकरणम् । कृञः शच । टाप् ॥

अलन्धूमः । पुं । धूमसंहतौ ॥

अलब्धः । त्रि । अप्राप्ते ।

अलब्धभूमिकत्वम् । न । कुतश्चिन्निमि-त्तात् समाधिभूमेरलाभे ॥

अलम् । । । भूषणे । पर्याप्तौ । वारणे । निषेधे । निरर्थके । शक्तौ । अव्यर्थे ॥ अवधारणे । अलति अलनं वा । अलभूषणादौ । बाहुलकादम् ॥

अलमपुरुषीणः । त्रि । प्रतिमल्लादौ । अलंपुरुषायेत्यर्थे अपञ्चेतिखः ।

अलम्बुषः । पुं । प्रहस्ते । छर्दे । राक्षसान्तरे ।

अलम्बुषा । स्त्री । मुण्डीर्याम् । स्वर्वेश्याभेदे । लज्जालुप्रभेदे । गलायाम ॥ अलम्बुषालघुःस्वादुः कृमिपित्तकफापहेत्यस्यागुणाः ।

अलम्बुसाः । पुं भूम्नि । देशविशेषेषु ।

अलर्कः । पुं । प्रतापसे । धवलार्के । यथा । अलर्ककुसुमं हृद्यंलघुदीपनपाचनम् । अरोचकप्रसेकार्शः कासश्वासनिवारणमिति ॥ उन्मत्तशुनि । विक्षिप्तकुक्कुरे । नृपान्तरे । अलति । अलभूषणादौ । क्विप् । अल चासावर्कश्च । यद्वा । अलमर्कते अर्च्यते वा । अर्कस्तवने अर्चपूजायां वा । घञ् । शकन्ध्वादिः । अम्लविशेषे ।

अलर्ककः । पुं । अलर्कार्थे ।

अलले । । । पिशाचभाषयासंबोधने ॥

अलवालम् । न । आलवाले । लवमा-

लाति । लाआदाने । मूलविभुजादित्वात्कः । नञ्समासः ॥

अलसः । त्रि । अवश्यकर्त्तव्येष्वप्रवृत्तिशीले । क्रियामन्दे । क्रियाजडे । शीतके । यथा । स्त्रीभिः शठवृत्तिभिरलसः परिभूयते । इतिकामंदके । श्रियंहिसततोत्थाहीदुर्बलोपि समश्नुते इतिच ॥ पुं । पादरोगप्रभेदे । यथा । क्लिन्नाङ्गुल्यंतरौपादौकण्डूदाहरुजान्वितौ । दुष्टकर्दमसंस्पर्शादलसंतंविभावयेदिति । द्रुमभेदे ॥ नलसति । लसश्लेषणे । पचाद्यच् ॥

अलसकः । पुं । उदररोगविशेषे । अस्यस्वरूपन्तु । कुक्षिरानह्यते ऽत्यर्थंप्रताम्येत् परिकूजति । निरुद्धोमारुतश्चैवकुक्षावुपरिधावति । वातवर्चोनिरोधश्चयस्यात्यर्थंभवेदपि । तस्यालसकमाचष्टेतृष्णोद्गारौचयस्य-तु । इति ॥

अलसा । स्त्री । हंसपद्याम् । टाप् ।

अलसीका । स्त्री । शरीरजोदकविशेषे । उक्तंच चरकेण । आमगंधियत्तुमांसत्वगन्तरे व्रणगतमुदकंतदलसीकाशब्दंलभते इति ।

अलसेक्षणा । स्त्री । स्त्रीविशेषे । अलसे ईक्षणेयस्याः ।

अलातः । पुं । न । अङ्गारे । उल्मुके । अर्द्धदग्धकाष्ठे ॥ लानम् । लाआदाने । क्तः । नलातमस्य ॥

अलाबुः । स्त्री । तुम्ब्याम् ।

अलाबूः । स्त्री । तुम्ब्याम् । नलम्बते लविभवस्रंसने । नञिलम्बेर्नलोपश्चेत्यूणित । अलाबूः कथितातुम्बीद्विधादीर्घाचवर्त्तुला । मिष्टतुम्बीफलंहृद्यं पित्तश्लेष्मापहंगुरु । वृष्यंरुचिकरंप्रोक्तंधातुपुष्टिविवर्द्धनम् । अलाबुका फलंदीर्घंघृतेपक्कं सजीरकम् । दुग्धसैन्धवचूर्णेनसंसिक्तंत्वनुशोषितम् ॥

अलाबूकटम् । न । तुम्बीरजसि । अलाबूनांरजः । अलाबूतिलोमाभङ्गाभ्यो रजस्युपसंख्यानमितिकटच् ।

अलारम् । न । कपाटे ।

अलिः । पुं । स्त्री । सुरायाम् ॥ पुष्पलिहि । कोकिले । काके । वृश्चिके । अलति दंशसमर्थो भवति । अलभूषणादौ । सर्वधातुभ्यइन् ।

अलिकम् । न । ललाटे ॥ अलति अल्यतेवा । अल० । बाहुलकादिकन् ।

अलिकुलसङ्कुलः । पुं । कुब्जकवृक्षे ।

अलिङ्गः । त्रि । सर्वसंसारधर्मवर्जिते परमात्मनि । लिङ्गंबुद्ध्याद्यविद्यमानमस्येति । सन्निहितमपिनलिङ्ग्यतइतिवा । धर्मध्वजित्वरहिते ॥ अव्यक्त

लिड्रेव ।

अलिजिह्वा । स्त्री । अधरसने । जिह्वोपरिक्षुद्रजिह्वायाम् ।

अलिञ्जरः । पुं । मणिके । मांट इति ख्याते । अलनम् । अलभूषणादौ । इकृञ्ज्यादिभ्यः । इन्वा । अलिंताम र्थंजरयति जृषातिवा । अवयोहा मैा जृषयोरामैावा । अथ अथवा । पृषोदरादिः ॥

अलिदूर्वा । स्त्री । मालादूर्वायाम् ।

अली । पुं । वृश्चिके ॥ भ्रमरे । अलमर्थोऽस्यास्ति । ब्रीह्यादित्वादिनिः । अथवाना भमावेटिलोपः । यद्वा । अलोद्वृश्चिकलांगूलम् । तदिवास्त्यस्य । अतइनिः ।

अलिन्दः । पुं । प्रघाणे । बहिर्द्वारप्रकोष्ठे । द्वारप्रकोष्ठा बहिर्द्वाराग्रवर्त्तिच तुष्के ॥ द्वारबहिर्भागे । अल्यतेभूष्यते । अलभूषणादौ । बाहुलकात् किन्दच् ॥

अलिपकः । पुं । पिके ॥ भृङ्गे । कुक्कुरे ॥

अलिपत्रिका । स्त्री । वृश्चिकासञ्ज्ञके क्षुपे ।

अलिपर्णी । स्त्री । वृश्चिकाल्याम् ।

अलिप्रियम् । न । कोकनदे । रक्तोत्पले ॥ अलेर्मांप्रियम् ।

अलिप्रिया । स्त्री । पाटलावृक्षे ।

अलिमकः । पुं । भेके । पिके ॥ अलौ । भ्रमरे । पद्मकेशरे । मधूके । इति मेदिनिकारः ।

अलिमोदा । स्त्री । गणिकारीवृक्षे ।

अलिम्पकः । पुं । पिके । अलौ । पद्मकेशरे । मधूके । भेके । इतिहेमचन्द्रः ॥

अलिल् । पुं । सततंगगनचारिणि प्रसिद्धे पक्षिविशेषे । तथाचोदाहरन्तिवेदान्तेषु वार्त्तिककाराः । अलिलः पक्षिणःपुत्रोगगनान्नातिभूतलम् । स्वबोधाभावतः स्वस्यबोधेयात्यम्बरंपुनरिति ॥

अलिवल्लभा । स्त्री । पाटलैः । पाटलद्रु-याम् ।

अलिवाहिनी । स्त्री । केवेरइतिकोकनदेशप्रसिद्धे केविकापुष्पे ।

अलीकम् । न । अप्रिये । दिवि । भाले । अलति अल्यतेवा । अलभूषणादौ । अलीकादयश्चेतिसाधुः । असत्ये । अतन्त्यनेनाऽऽघोगतिम् । अल० अलीकादिः ।

अलीकमत्स्यः । पुं । रिकवच्छइतिख्याते ॥ यथा । माषपिष्टिकयालिप्तं नागवल्लीदलंमतत् । तत्तुसंस्वेदयेत्सम्यक्स्थाल्यामास्तारकोपरि । ततोनिष्कासनं खण्डंतत्तैलेन भर्जयेत ॥

अशीतमत्स्य उक्तोयंप्रकारः पाकपतैः । तंहत्वाकभटिकेन वास्तूकेन चभक्षयेत् । अशीकमत्स्यकोरुच्यो हृद्योबल्योऽतिपुष्टिदः । वातघ्नुच्छुक्रदःप्रोक्तःकिञ्चित्पित्तं प्रकोपयेदिति ।

अलुब्धः । त्रि । निर्लोभे । लोभहीने ।

अले । त । पिशाचोक्त्याम्भुट्टौ ।

अलेपकम् । न । निरवद्ये ।

अलेले । त । पिशाचोक्त्यासम्भुद्दो ॥

अलोकः । पुं । अतलादिसप्तसु । नलोक्यते अस्माभिः । लोकृ० । घञ् ।

अलोकाकाशास्तिकायः । पुं । लोकानां बहिर्भूताकाशे ।

अलोभः । पुं । लोभाभावे । त्रि । तद्वति । यथा । अलोभीस्यात् प्रजाविलोगृह्णीयात् सञ्चितंकरम् । रक्षन्नङ्गीकृतंधर्मं पुत्रवत्पालयेत् प्रजा इतिराज्ञोर्धः ।

अलोभी । त्रि । लोभरहिते । अलोभोस्यास्तिइनिः ।

अलोलुपः । त्रि । इन्द्रियाणां विषयसन्निधानेप्यविक्रियपुरुषे ।

अलैाकिकः । त्रि । लोकातीते । लैाकिकप्रत्यक्षाविषये । अमानुषिके । नलैाकिकः ।

अल्पम् । त्रि । किञ्चिदर्थे । ईषत् । मनाक् । स्तोके । अल्प्यतेवार्यते । अल भूषणादैा । बाहुलकात्पः । ह्रस्वे । स्वल्पे । मर्त्ये ॥

अल्पकम् । त्रि । अल्पार्थे । क्रूपणे । पुं । यवासे । अल्पमेवस्वार्थेकः ।

अल्पकेशी । स्त्री । भूतकेश्याम् ॥

अल्पगन्धम् । न । रक्तकैरवे ।

अल्पतनुः । त्रि । स्वल्पदेहवति । पृश्नौ । खर्वे । दुर्बले । अल्पास्थियुक्ते । अल्पातनुःशरीरमस्य ।

अल्पप्रज्ञः । त्रि । अल्पमेधसि । अल्पा प्रज्ञायस्यसः ।

अल्पप्रमाणकः । पुं । चेलाने । चेलो । चेलातरमूज इतिगैाडभाषाप्रसिद्धे फललताविशेषे । त्रि । अल्पमाने ॥ अल्पंप्रमाणमस्य ।

अल्पबुद्धिः । त्रि । मन्दे । अल्पाबुद्धिरस्य ॥

अल्पमारिषः । पुं । तण्डुलीये । चंउराई इतिप्रसिद्धशाके । अल्पश्चासैामारिषश्च ॥

अल्पमेधाः । पुं । मन्दप्रज्ञत्वेनवस्तुविवेकासमर्थे । अल्पप्रज्ञे । अल्पामेधा यस्य । नित्यमसिच् प्रजामेधयोः ॥

अल्पशमी । स्त्री । शमीरे ।

अल्पसरः । न । वेशन्ते । अल्पंचतत्सरश्च ॥

अल्पायुः । पुं । छागे । त्रि । मितायुषि

। अल्पम् आयुर्यस्य ।

अल्पिका । स्त्री । भूम्यपर्ण्याम् । अल्प माषायाम् ।

अल्पिष्ठः । त्रि । स्वल्पे । अत्यल्पे ॥ अय मेषामतिशयेनाल्पः । अजादौ गुणव चनादेवेतीष्ठन् ।

अल्पीयान् । त्रि । स्वल्पे । अणीयसि । अयमनयोरतिशयेनाल्पः । अजादौ गुणवचनादेवेतीयसुन् ।

अल्ला । स्त्री । मातरि । अम्बायाम् । अथर्वशाखोक्तायांपरदेवतायाम् ॥

अव ।। । व्याप्तौ । निश्चये । अनादरे । असाकल्ये ।

अवकटः । त्रि । अवाचीने । अवकुटारे । अवाचीनः । अवात् कुटारश्चेति चात् कटच् । न । वैरूप्ये ।

अवकम्पितः । त्रि । कम्पिते । पुं । बुद्धान्तरे ।

अवकरः । पुं । सम्मार्जन्यादिक्षिप्ते धूल्यादौ । सङ्करे । अवकीर्यते । कृ विक्षेपे हिंसायां वा । ऋदोरप् ।

अवकर्षः । पुं । अनुकर्षे । अवकृष्यते । कृष° । घञ् ।

अवकलितम् । त्रि । दृष्टे ॥ वृत्तिधरश्चिः ।

अवकल्कनम् । न । मिश्रीकरणे । चिन्तने ।

अवकाशः । पुं । अन्तरे ॥ कर्मरहितकाले । अवसरे । यथा । अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि रमन्तः । अवपूर्वात् काशतेर्घञ् ।

अवकीर्णः । त्रि । अवध्वस्ते । विक्षिप्ते । अव कृ° । क्तः ।

अवकीर्णी । त्रि । क्षतब्रह्मचर्यादिनियमे । क्षतव्रते । स्त्रीसंपर्कात् विप्लुत ब्रह्मचर्ये प्रथमाश्रमिणि यतौ च । ब्रह्मचार्यवकीर्णी स्यात् कामतस्तु-स्त्रियं प्रजन्वित्युक्तः । अवकरणम् । कृ विक्षेपे हिंसायां वा । भावे क्तः । अवकीर्णं विक्षिप्तं व्रतं हिंसनं वा अनेन । इष्टादिभ्यश्चेतीनिः ।

अवकुटारः । त्रि । अवकटे । अवाचीनः । अवात् कुटारश्च ।

अवकृष्टः । त्रि । बहिष्कृते । निष्कासिते । अवकृष्यते स्म । कृष विलेखने । क्तः ।

अवकेशी । त्रि । कालानुत्पन्नफलद्रुमे । वन्ध्ये । अफलवृक्षे । अवसन्नाः केशा यस्यासौ अवकेशी निष्फलः । सा स्तिदृष्टान्तत्वेन अस्य । अतइनिः । स यथा निष्फलः एवमयं निष्फलः । अवकं शून्यमीष्टे तच्छीलः । सुप्यजातौ णिनिर्वा ।

अवक्रः । त्रि । अकुटिले ॥

अवक्रचेताः । पुं । परमात्मनि । अवक्रम

हिरण्यप्रकाशवक्त्रियमेव अवस्थित मेकरूपंचेतो विज्ञानमस्येति । त्रि । अकुटिलचित्ते । अवक्रांतरश्चेतो यस्य ॥

अवक्रयः । पुं । मूल्ये । वस्ने । राजग्राह्यद्रव्ये । वणिग्भिः शुल्कस्थानेप्रतिभाण्डमधिपतयेदेये । एतावत् कालमुपयोगार्थं भाण्डवस्त्रादि मयाद्दीयते मह्यंच युष्माभिरेतावद्रूमंदेय मित्येवंविधेभाटके । भाडा इति प्रसिद्धे ॥ अवक्रीयते ऽनेन । क्रुक्रीञ्द्रव्यविनिमये । पुंसीतिघः । एरजित्यच्तुन ल्युटावाधात् ।

अवक्रोदनम् । न । किञ्चिदार्द्रत्वे ।

अवक्षुतम् । न । उपरिकृतक्षुते ।

अवक्षेपः । पुं । निन्दायाम् ।

अवक्षेपणम् । न । भर्त्सने ।

अवक्षेपणी । स्त्री । वल्गायामिति हेमचन्द्रः ।

अवगणितम् । त्रि । तिरस्कृते । परिभूते । अवगण्यतेस्म । गणसंख्याने । क्तः ।

अवगण्डः । पुं । गण्डव्यवणे । वरण्डे । अवगच्छति । गम्लृ गतौ । समन्ताड्डुः ।

अवगतः । त्रि । मते । ज्ञाते । विदिते । अवगम्यतेस्म । गम्लृ गतौ । क्तः ।

अवगतिः । स्त्री । ज्ञानमात्रे । ज्ञानस्या मान्ये । अवगम्यतेऽनया । गम्लृ । क्तिन् ।

अवगतः । त्रि । मातःज्ञाते । अवगीयते । इण्० । निर्मीयगोपीया वगया इतिवत् गाण्डोह्रस्वश्च निपातनात् ।

अवगमः । पुं । ज्ञाने । अवगम्यतेऽनेन । फले । अवगम्यते प्राप्यते । गम्० । अप् ।

अवगाढः । त्रि । निविडे । अन्तः प्रविष्टे । निमग्ने । अवपूर्वाद्गाहेः कर्त्तरि क्तः ॥

अवगाहः । पुं । जलद्रोण्याम् । नौका जलसेचनकाष्ठपात्रे । इतिहलायुधः ॥

अवगाहः । पुं । स्नाने ॥ स्नानगृहे ॥

अवगाहनम् । न । अवलोडने ॥ निमज्जने । अवगाहे । गोताभारके न हाना इतिभाषा ॥

अवगीतः । त्रि । निर्वादे । जनापवादे । मुहुर्दृष्टे । दुष्टे । गर्हिते । ख्यातगर्हणे । अवगीयतेस्म । गैशब्दे । क्तः । घुमास्थेतीत्वम् । मुहुर्गीते ॥

अवगीर्णः । त्रि । वर्णिते । अवगीर्यते स्म । गशब्दे । क्तः । अपानान्निर्गते द्रव्ये ॥

अवगुणः । पुं । दोषे ।

अवगुण्ठनम् । न । योषाच्छिरः प्रावरण क्रियायाम् । घूंघट कर्ना इतिभाषा ॥

योषाननावरकसरन्ध्रवस्त्रे । स्त्रीमुखाच्छादनवस्त्रे । आच्छादनंसमुद्दिष्टमवगुण्ठनमीश्वरि । धूल्यादिप्रक्षणे ॥ वेष्टने । मुद्राविशेषे ॥

अवगुण्ठिका । स्त्री । योषाप्रावरणक्रियायाम् । अवगुण्ठने । जवनिकायाम् ॥

अवगुण्डितम् । त्रि । चूर्णिते ॥

अवगृह्यम् । न । प्रातिशाख्यादिषु पदविशेषे । यस्यपदस्यावग्रहः क्रियते तदेत्यर्थः ॥ अवगृह्यते ग्रहउपादाने । विच्छेदोऽनग्रहेरर्थः । पदास्वैरिबाह्यापक्ष्येषुचेतिक्यप् । ग्रहिज्येति सम्प्रसारणम् । कुगतीतिसमासः ॥

अवगोरणम् । न । ताडनार्थंयष्ट्यादीनामुद्यमे । मारणेकूं लट्ठउठावना इतिभाषा ॥

अवग्रहः । पुं । वृष्टिरोधे । ज्ञानभेदे ॥ प्रतिबन्धे । गजालिके । हस्तिललाटे ॥ अवगृह्यतेऽङ्कुशेन । ग्रहेरप् ॥ विच्छेदे । अवान्तरपदसंज्ञांसूचयितुं पदपाठकाले किञ्चित्कालमवसाने । अवग्रहणमवग्रहः । ग्रहउपादाने । अवपूर्वात्ग्रहेर्घञोभावे ग्रहवृदृनिश्चिगमश्चेत्यप् । स्वभावे

अवग्रहणम् । न । प्रतिरोधे । तिरस्कृतौ । अनादरे ॥

अवग्राहः । पुं । वृष्टिरोधे ॥ अवग्रहणमवग्राहः । अवेग्रहोवर्षप्रतिबन्धे इति अवपूर्वात् ग्रहेर्बाघञ् ॥ शापे । आक्रोशेऽवन्योर्ग्रहइतिघञ् । अवग्राहस्ते भूयात् अभिभवइत्यर्थः ॥

अवघट्टः । पुं । गर्त्ते । भूरन्ध्रे ॥

अवघातः । पुं । अवहनने । तण्डुलादिकण्डने ॥ अवहननम् । हनहिंसागत्योः । घञ् । हनस्तोऽचिण्णलोः । होहन्तेरितिकुत्वम् ॥

अवचयः । पुं । पुष्पफलादीनांछेदने ॥

अवचूडः । पुं । अवचूले ॥ अधोलम्बिकलापे ॥

अवचूर्णितम् । त्रि । पेषिते । अवध्वस्ते ॥ चिमसुधादिचूर्णस्यलेखादौ ॥ फल्गुचूर्णैराचिते । अवचूर्ण्यतेस्म । सत्यापेतिण्यन्तात् क्तः । यद्वा । चूर्णपेषेचुरादिः

अवचूलः । पुं । अवाग्ध्वजकञ्चुके । ध्वजाग्रवस्त्राधो मुखवस्त्रे । झण्डेका पटका इतिभाषाप्रसिद्धे ॥

अवचूलकम् । न । चामरे ॥

अवच्छिन्नः । त्रि । सङ्कुचिते ॥ अवच्छेदकतानिरूपके । विशिष्टअवच्छेदाश्रये ॥ अवच्छिद्यतेस्म । छिदिर्० । क्तः ॥

अवच्छुरितम् । न । अट्टहासे । अवच्छु

रणम् । छुरच्छेदने । भावेक्तः ॥

अवच्छेदः । पुं । विरामे ॥ सङ्कोचे ॥ विशेषणत्वे ॥ एकदेशे । परिच्छेदे ।

अवच्छेदकम् । त्रि । न्यायमतेन अव्याप्य वृत्त्यधिकरणसम्बन्धैकदेशे ॥ इतर व्यावर्त्तके । विशेषणे ॥

अवच्छेदकावच्छेदः । पुं । व्यापकत्वे ॥

अवच्छेद्यम् । त्रि । अवच्छेदाऽवच्छेदकोभयनिरूपणीये ।

अवज्ञा । स्त्री । अनादरे ॥ अवज्ञानम् । ज्ञातश्चोपसर्ग इत्यङ् । टाप् ।

अवज्ञातम् । त्रि । अवमानिते ॥ अवज्ञायतेस्म । ज्ञा अवबोधने । क्तः ।

अवज्ञानम् । न । तिरस्कारे ।

अवटः । पुं । खिले । गर्त्ते । यथा । रसातलगतस्थानामेषधर्मः सनातनः । अवटे येनिधीयन्ते तेषांलोकाः सनातना इतिरामायणम् । कूपे । कुहकजीविनि ॥ अवन्त्यस्मात् अवरक्षणादौ । शकादिभ्योऽटन् ।

अवटनिरोधनः । पुं । नरकविशेषे ॥

अवटिः । स्त्री । गर्त्ते । इतिहलायुधः ॥

अवटीटः । त्रि । नतनासिके । अवनाटे । अवनमनं नासिकायाः । नते नासिकायाः संज्ञायां टीटच् नाटच् भ्रटचः । अवटीटश्च नासिकायानतमस्य

स्याः । अर्शआद्यच् । अवटीटानासिका सा अस्त्यस्यपुरुषस्य । अर्शआद्यच् ॥

अवटुः । पुं । वृक्षभेदे । गर्त्ते ॥ कूपे ॥ पुं । स्त्री । घाटायाम् । ग्रीवापश्चाद्भागे । ग्रीवायामुन्नतभागे । अवटलति । टलवैक्लव्ये । अवटीकतेवा । टीकृगतौ । मितद्र्वादित्वात् डुः ॥ यद्वा । मवटति । वटवेष्टने वटभाषणे वा । बाहुलकादुः ।

अवटोदा । स्त्री । भारतवर्षस्यनद्यन्तरे ॥

अवडीनम् । न । पक्षिणामवरोहणे । पक्षिणामधोगमने ॥

अवतंसः । पुं । न । कर्णपूरे ॥ शेखरे । शिरोभूषाभेदे । उत्तंसे । अवतंसयति अवतंस्यतेऽनेनवा । तसिः सौत्रोभूषार्थः । पचाद्यच् हलश्चेति घञ्वा ।

अवतमसम् । न । क्षीणान्धकारे । अव क्षीनं तमः । अवसमन्धेभ्यस्तमस इत्यच् ।

अवतरणम् । न । अवतारे ॥

अवतारः । पुं । अवतरणे । अवरोहे । पुष्करिण्यादौ । देवानांविशेषतो विष्णोर्मूर्त्त्यन्तरेण पूर्णांशावेशरूपेण पृथिव्यां प्रादुर्भावे । अवतारास्त्वसङ्ख्यातास्तेष्वेते विशेषतःप्रसिद्धाः

। मत्स्यः कूर्मोवराहश्चनरसिंहोथवा
मनः।रामोरामश्चरामश्चबुद्धःकल्की
चतेदश ॥ अपिच। प्रकृतिर्विष्णुरू
पाचपुंरूपश्चमहेश्वरः । एवंप्रकृति
भेदेनभेदास्तुप्रकृतेर्दश ॥ कृष्णरू
पाकालिकास्याद्रामरूपाचतारिणी-
। वगलाकूर्ममूर्त्तिःस्यान्मीनोधूमाव
तीभवेत् ॥ छिन्नमस्तानृसिंहःस्याद्व-
राहश्चैवभैरवी। सुन्दरीजामदग्न्यः
स्याद्वामनोभुवनेश्वरी। कमलाबौद्ध
रूपास्यान्मातङ्गीकल्किरूपिणी। स्व
यंभगवतीकालीकृष्णस्तुभगवान्स्व-
यम्। स्वयञ्चभगवान्कृष्णःकालीरू
पोभवेद्ध्रुवम्। इतिमुण्डमाला। विशे
षोलिलितोपाख्यानेद्रष्टव्यः।पुनश्चश्री
भागवते १ स्कन्धे ३ ऽध्याये सएवप्रथ
मं देवः कौमारंसर्गमाश्रितइत्यादि
नाद्रष्टव्यः । तीर्थे । नद्यादितीर्थे ॥
अवतरन्त्यनेनास्मिन्वा । तॄप्लवनसन्त
रणयोः । अवेतॄस्त्रोर्घञ् ।

अवतारणम् । न । भूतादिग्रहे । वस्त्रा
ञ्चले । अर्चने । अवरोहणे ॥

अवतीर्णः । त्रि । अवतरणविशिष्टे ।
प्रादुर्भूते । जलादौकृतावरोहे ।
प्रविष्टे ।

अवतोका । स्त्री । स्रवद्गर्भायाम् । पति
तगर्भायांगवि । अवगलितं तोकम-
पत्यं यस्याः ॥

अवदंशः । पुं । दंशने । भर्जितद्रव्यचर्व
णे । मद्यपानरुचिजनकभक्ष्यद्रव्ये ।
अवदंश्यते पानरुच्यर्थम् । दंशदशने
। कर्मणिघञ्भावेवा ।

अवदातः । पुं । सिते । गौरे । त्रि । वि
शुद्धे । शुक्लगुणविशिष्टे । पीतवर्णव
ति ॥ मनोज्ञे । अवदायतेस्म । दैप्
शोधने । क्तः ।

अवदानम् । न । खण्डने । पराक्रमे ॥
अतिवृत्ते । युद्धकर्मणि । यथा । वि
पञ्चगायन्तीविविधमवदानंपुररि
पोरिति । उशीरे ॥ दोऽवखण्डने
दैप्शोधनेवा । भावेल्युट् ।

अवदारकः । पुं । खनित्रे । त्रि । विदा
रणकर्त्तरि ।

अवदारणम् । न । खनित्रे ॥ अवदार्यते
ऽनेन । दृविदारणे । णिजन्तः । ल्युट् ।

अवदाहः । पुं । अवदहने । न । वीरण
मूले । अवनीयते दाहोऽस्मात् ।

अवदीर्णम् । त्रि । खण्डिते । द्रुते । द्र-
वीभूते घृतादौ । अवदीर्यतेस्म । दृ
विदारणे क्तः ।

अवदोहः । पुं । दुग्धे ॥ अवदुह्यते । दु
ह० । कर्मणि घञ् ।

अवद्यम् । त्रि । अधमे । पापे । निन्द्ये ।
नवदति परंगुणम् नउद्यते नउच्यते

वा । अवज्ञावमाधमार्वरेफाः कुत्सिते इति वदेर्नञिकर्त्तरियत् । अवद्यप ण्येतितु कर्मणियत् ॥

अवद्योतनम् । न । प्रकाशे । त्रि । त इति ।

अवद्रङ्गः । पुं । हट्टे ।

अवधानम् । न । मनोयोगे ॥ अवडुधाञो ल्युट् ।

अवधारणम् । न । निश्चये । अवधृतौ । इयत्तादिपरिच्छेदे । परिमाणनिश्चये ।

अवधारितः । त्रि । निश्चिते । कृतावधारणे ॥

अवधार्य्यः । त्रि । अवधारणीये । निर्धार्य्ये ।

अवधिः । पुं । अवधाने । सीम्नि । परस्यां काष्ठायाम् । काले । बिले । अवधानम् । डुधाञ्० । उपसर्गे घोः किः ।

अवधीरितः । त्रि । अवज्ञाते ।

अवधूतः । त्रि । अभिभूते । निवर्त्तिते । यथा । अवधूतभयः । वायौ । अवधुनोति धूञ्० । क्तः ॥ अनादृते । योगेश्वरे । सन्न्यासाश्रमिणि ॥ तन्निरुक्तिर्यथा । अक्षरत्वाद्वरेण्यत्वाद्धूतसंसारसङ्कटात् । तत्त्वमस्यर्थसिद्धत्वादवधूतोभिधीयत इति । अपि च । योविलङ्घ्याश्रमान् वर्णान् आत्मन्येवस्थितः पुमान् । अतिवर्णाश्रमीयोगी अवधूतःसकथ्यतइति । यथा रविःसर्वरसान् प्रभुङ्क्ते हुताशनश्चापिहि सर्वभक्षकः । तथैवयोगी विषयान् प्रभुङ्क्ते नलिप्यते पुण्यपापैश्चशुद्धइरत्यपि । अत्रान्यो विशेषो हंसेद्रष्टव्यः ।

अवधूननम् । न । तिरस्करणे ।

अवधूलनम् । न । अवचूर्णने ।

अवधृतः । त्रि । आकर्णिते । निश्चिते ।

अवधृतिः । पुं । अवधारणे ।

अवध्यः । त्रि । मारणायोग्ये । यथा । अवध्यांस्त्रियं प्राहुस्तिर्यग्योनिगतास्वपीति । अपिच । किंत्वयान श्रुतं लोके अवध्याः पशवोषितइति । अवध्यवधे पापमुक्तंमनुना । यावानवध्यस्यवधेतावान् वध्यस्य मोक्षणे । अधर्मोनृपतेर्दृष्टोधर्मस्तु विनियच्छत इति । ९ ऽध्याये २४९ श्लोकः ॥

अवध्वंसः । पुं । परित्यागे । निन्दने । अवचूर्णने ।

अवध्वस्तः । त्रि । परित्यक्ते । निन्दिते । अवचूर्णिते ॥ अवध्वस्यतेस्म । ध्वंसुगतौच । क्तः ।

अवनम् । न । प्रीतौ । रक्षणे । प्रीणने । अवरक्षणादौ । ल्युट् ।

अवनतम् । त्रि । अवाग्भूते । आनते ।

अवनमतिस्म । नम्रप्रह्वत्वे । नन्थ र्थे तिक्तः । अनुदात्तोपदेशेत्यनुना सिकलोपः ॥

अवनतिः । स्त्री । विनये । अनौद्धत्ये ॥

अवनद्धः । त्रि । मथ्युते ॥

अवनाटः । त्रि । नतनासिके । नासिकायाःनतम् । नतेनासिकाया इति नाटच् । तद्योगान्नासिकाऽवनाटा । साम्रस्यस्य । अर्शआद्यच् ॥

अवनामः । पुं । प्रणामे । अवनमनम् । अवणमोघञ् ॥

अवनायः । पुं । अधोनयने । निपातने । अवनयनम् । णीञ् प्रापणे । अवो दोर्णिय इति घञ् ॥

अवनिः । स्त्री । भुवि । अवति अव्यते वा । अवरक्षणादैा । अर्त्तिसृधृधमी त्यनिः ॥

अवनिक्तः । त्रि । क्षालिते ॥

अवनी । स्त्री । स्थिरायाम् । भूमैा । त्रायमाणायाम् ॥ कृदिकारादितिवा ङीष् ॥

अवनीपतिः । पुं । राजनि । अवन्याः पतिः ॥ अवनीं पातिवा । पारक्षणे पातेर्डतिः ॥

अवनेजनम् । न । प्रक्षालने । हस्तसंस्कारे । अव णिजिर् । ल्युट् । पिण्ड प्रदानार्थमास्तृतकुशोपरिजलसे-चने ॥

अवन्तयः । पुं । देशभेदे । मालवेषु ॥ अवति । अवरक्षणादैा । बाहुलकाज्झच् ॥

अवन्तिका । स्त्री । उज्जयिन्याम् ॥

अवन्तिसोमम् । न । काञ्जिके । अवन्तिषु अभिषुतं सोमम् । शाकपार्थिवादिः ॥

अवन्ती । स्त्री । देशभेदे ॥ यथा । ताम्रपर्णीं समासाद्य शैलाद्रुमिखरोद्गतः । अवन्तीसंज्ञकोदेशः कालिकातत्रतिष्ठतीति ॥

अवपातः । पुं । बिले । निपाते । अधः पतने । अवपतनम् । पत्लृ० । घञ् । गजग्रहणगर्त्ते । अवपातस्तु हस्त्यर्थे गर्त्तेछन्नेतृणादिनेतियादवः । औघी इतिभाषा ॥

अवपाचितः । त्रि । भिन्नोदकीकृते अपपाचिते ॥

अवपाश्रितः । त्रि । वद्धे ॥

अवप्लुतः । त्रि । अवतीर्णे । सद्यसैवावतीर्णे ॥

अवबुद्धः । त्रि । अनुभूते ॥

अवबोधकः । पुं । परिदीपके ॥ अवबोधयति । बुध । णवुल् ॥

अवभर्जितः । त्रि । दग्धे ॥

अवभासः । पुं । साक्षात्कारे ॥

अवभासकः। त्रि। प्रकाशके।

अवभृथः। पुं। दीक्षान्तयज्ञे। मुख्ययज्ञशेषकर्त्तव्यकर्मविशेषे। प्रधानकर्मसमाप्तौ क्रियमाणेष्टिविशेषे॥ यज्ञाङ्गभूतस्नानविशेषे॥ अवभ्रियतेऽनेन। डु भृञ्धारणपोषणयोः भृञ्भरणेवा। अवेभृञइतिकथन्॥

अवभ्रटः। त्रि। नतनासिके॥ अवनतं नासिकायाः। नतेनासिकायाः संज्ञायामितिभ्रटच्। अवभ्रटंच नासिकायानतमस्त्यस्याः। अर्शआद्यच्। अवभ्रटानासिकास्त्यस्य पुरुषस्य। अर्शआद्यच्॥

अवमः। त्रि। कुत्सिते। अवत्यस्मादात्मानम्। अवरक्षणादौ। अवमेति सूत्रेणावतेरमः प्रत्ययोनिपातितः॥ अवोभवोवा। अवोधसोर्लोपश्चेतिमः। न। अवमदिने।

अवमतम्। त्रि। अवमानिते॥ अवमन्यतेस्म। मनज्ञाने। क्तः॥

अवमतिथिः। स्त्री। स्पृष्टत्रितययो वारे एकस्मिन्नवमातिथि रिति स्पृष्टतिथौ॥

अवमदिनम्। न। अवमे। यथा। तिथ्यन्तद्वयमेकोदिनवारःस्पृशतियत्र तदवमदिनम्। अस्यार्थः। दिनेतावद्वारद्वयंभवति वारप्रवृत्तिकालात्

पूर्वमेकोवारस्तत्परंचान्यः। तत्रदिनस्याहोरात्रस्य एकोवारस्तिथिद्वयं तिथित्रयंवायत्रदिनेस्पृशति तदवमदिनम्। वारप्रवृत्तिकालात् परंपरदिनसूर्योदयावध्येकवारेण तिथ्यन्तद्वयस्पर्शे तिथित्रयस्पर्शेवा अवमदिनंस्यादित्यर्थः।

अवमन्ता। त्रि। अवमानस्यकर्त्तरि॥ अवमन्यते। अवपूर्वान्मनेस्तृच्।

अवमर्द्दः। पुं। पीडने। अवमर्द्दनम्। मृदक्षोदे। घञ्॥

अवमर्शः। पुं। नाटकसन्ध्यन्तरे।

अवमानना। स्त्री। अवज्ञायाम्॥ अवमाननम्। मनेर्ण्यन्ताद्युच्।

अवमानितम्। त्रि। अवज्ञाते। अवमान्यतेस्म। मानपूजायाम्। क्तः।

अवमूर्द्धशयः। त्रि। अधोमुखशायिनि॥ अवनतो मूर्द्धायस्य सः। अवमूर्द्धा शेते शीङ्स्वप्ने। पार्श्वादिषूपसंख्यानादच्।

अवमोटनम्। न। परिवर्त्तने।

अवमोटनी। स्त्री। परिवर्त्तनशीलायाम्।

अवयवः। पुं। अङ्गे। प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्य ऽनुमानावयवाः। अवयौति। युमिश्रणे। पचाद्यच्।

अवरः। त्रि। चरमे। पश्चाद्भवे। अधमे।

कार्य्ये । न । गवाक्षमजाहित्ये ।
अवराति । राहाने । आतश्चोपसर्ग इतिकः । यथा । महत्त्वोतिक्रियतेवा । इत्यवरणे । अच् ग्रहद्रिश्चवा ।

अवरजः । पुं । कनिष्ठभ्रातरि । यवीयसि । शूद्रे । अवरस्मिन् काले जातः । सप्तम्यांजनेर्डः ॥

अवरजा । स्त्री । कनिष्ठायांभगिन्याम् ।

अवरतः । । । पश्चादर्थे । अवरस्मात् तसिल् । अवरस्तादर्थे । विभाषापरावराभ्यामित्यतसुच् । अवरतोवस्त्यागतोरमणीयंवा ॥

अवरतिः । स्त्री । विरतौ । उपरामे । अवरमणम् । रमक्रिडायाम् । क्तिन् ।

अवरप्रोक्तः । त्रि । प्राकृतबुद्धिनोक्ते । हीनमतिनाप्रोक्ते । अवरेणप्रोक्तः ।

अवरवर्णः । पुं । स्त्री । शूद्रे । वृषले । अवरोऽधमोवर्णोऽस्य । अवरश्चासौवर्णश्चेतिवा ।

अवरवर्णकः । पुं । स्त्री । शूद्रे । अवरवर्णएव ।

अवरव्रतः । पुं । अर्के । त्रि । हीनव्रते ।

अवरस्तात् । । । अवरे । अवस्तादर्थे । अवरस्मिन् अवरस्याम् अवरस्मात् अवरस्याः अवरोऽवरावावस्त्यागतोरमणीयंवा । दिक्शब्देभ्यइत्यस्तातिः तस्मिन्नियोगेनविभाषावरस्येति

अवरस्यपश्चेऽआदेशाभावः ।

अवरा । स्त्री । भवान्याम् । पार्वत्याम् ।

अवरार्द्ध्यम् । त्रि । अवरार्द्धभवे । अवरार्द्धभवम् । परावराधमोत्तमपूर्वाच्चेतियत् ।

अवरीणम् । त्रि । धिकृते । अवरीणते स्म । रीङ्स्रवणे । क्तः ।

अवरुग्णः । त्रि । भग्ने ।

अवरुद्धः । त्रि । स्थगिते । आच्छादिते ।

अवरुद्धा । स्त्री । अन्तःपुरचारिण्यांभोग्यायांकर्मकर्याम् ।

अवरूढः । त्रि । अवतीर्णे ।

अवरोधः । पुं । तिरोधाने । राजदारेषु । शुद्धान्ते । राजस्त्रीगृहे ॥ अवरुध्यतेऽत्र । रुधिर्आवरणे । घञ् ।

अवरोधकः । त्रि । रोधकारके । अवरोधकर्त्तरि । अवरोधयति । अवपूर्वात् रुधधातोर्ण्वुल् ।

अवरोधनम् । न । राज्ञामन्तःपुरे । अवरुध्यतेऽत्र । रुधिर् आवरणे । ल्युट् । अवरोधकरणे रोकना इति भाषा । यथा । कक्षावरोधनमिति ।

अवरोधायनम् । न । अन्तः पुरे ।

अवरोधिकः । पुं । अन्तःपुराध्यक्षे । अवरोधेनियुक्तः । तत्रनियुक्तइतिठक् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । अवरोधास्याक्षिवा । ठञ् ।

अवरोपितः । त्रि । उद्वासिते ।

अवरोप्यमाणः । त्रि । अवतार्यमाणे । रुहेश्चंक्रमणकर्मविवक्षायां णिच् । रु-हः पोऽन्यतरस्यामितिपः ।

अवरोहः । पुं । अवतारे । अवतरणे । आरोहे । तरुमूलात्प्रभृतिशाखाग्रपर्यन्तं गतायां गुडूच्यादिलतायाम् । अतोऽक्रमे । अधोगतौ । स्वर्गे । अवरोहतिलब्धते । वटवीअजन्मनि । पाषाणच ।

अवरोहशाखी । पुं । प्ररोहे ।

अवरोहिका । स्त्री । अश्वगन्धालतायाम् ।

अवरोही । पुं । वटद्रुमे ।

अवर्णः । पुं । निन्दायाम् । परिवादे । वर्ण्यते । वर्ण वर्णने । घञ् । वर्णः प्रशंसा । तद्विरुद्धोऽवर्णः ।

अवलग्नः । पुं । न । देहमध्ये । त्रि । लग्नमात्रे । संलग्ने । लग्यतेस्म । लग सङ्गे । क्षुब्धस्वान्तेतिसाधुः । यद्वा । लज्जतेस्म । ओलस्जी व्रीडने । गत्यर्थेतिक्तः । ओदितश्चेति नत्वम् । स्वीदितइतिनेट् । अवकृष्टमवलग्नं वा लग्नम् । प्रादयो गतेतिसमासः ।

अवलम्बः । पुं । आधारे । अवलम्बने ।

अवलम्बनम् । न । आश्रये । यथा । प्रतिकूलतामुपगतेहि विधौविफलत्वमेतिबहुसाधनता । अवलम्बनायदिनभर्तुरभून्न पतिष्यतःकरसहस्रमपीतिमाघे ९ सर्गः । पुं । हृदयस्थ कफे ।

अवलम्बितम् । त्रि । अविलम्बिते । आश्रये । संश्रिते । आश्रिते । वस्त्रादिनाबद्धे । अधोलम्बायमाने । अवलम्बतेऽस्म । लबि० । क्तोधिकरणे चेति-क्तः ।

अवलिप्तः । त्रि । गर्वेणाविवेकहीने ।

अवलिप्तता । स्त्री । अहङ्कारे ।

अवलिमा । पुं । अबलभावे । देहस्यरोगादिनिमित्ते जरादिनिमित्तेवाकृशीभावे ।

अवलीढः । त्रि । भक्षिते । कृतावलेहे ।

अवलीला । स्त्री । अवज्ञायाम् । अनायासे ।

अवलुण्ठनम् । न । लुण्ठने । लोटनाइति भाषा ।

अवलेपः । पुं । गर्वे । लेपने । दूषणे । सङ्गे । अवलेपनम् । लिप उपदेहे । घञ् ।

अवलेपनम् । न । प्रलम्बे । विलेपने । मलना । इतिभाषा ।

अवलेहः । पुं । लेह्यौषधे । अवलिह्यते । लिहेर्घञ् । तल्लक्षणं पर्यायाश्च

यथा। क्षाभादेर्यत्पुनः आकारादमत्वं सारसक्रिया। सोमवत्सेवत्प्रगाम इत्युच्यते बुधैरिति वैद्यकपरिभाषा।

अवलेहनम्। न। लेहने। जिह्वयाऽऽस्वादने। चाटना इतिभाषा।

अवलोकनम्। न। आलोके। दर्शने। अनुसन्धाने। लोकदर्शने। ल्युट्॥

अवलोकितम्। त्रि। निरीक्षिते। देखा इतिभाषा॥ पुं। लोकनाथे। बुद्धविशेषे॥ नपुंसके भावेक्तः। न। प्रेक्षणक्रियायाम्॥

अवल्गुजः। पुं। सोमराज्याम्॥ त्रि। असाधुजे॥ अवल्गोरशोभनाज्जातः॥ कृष्णावर्णा सोमराज्याम्। बाकुच इतिलोकभाषा।

अववादः। पुं। निन्दायाम्॥ आज्ञायाम्॥ विस्रम्भे॥ अवाऽऽलम्बने। कार्यमवलम्ब्यवदनमत्र। वदेर्घञ्॥

अवशः। त्रि। निःश्रेयससाधनायाऽप्रयतमाने। परतन्त्रे। अस्वाधीनशरीरे॥ अविद्याकामकर्मादिपरवशे॥ प्रतिकूले॥ नविद्यतेवशः मायस्यास्त्वंयसमासः॥

अवशिष्टः। त्रि। उर्वरिते। परिशिष्टे॥

अवश्यम्। अ। निश्चये। अवश्यमित्यादौ। नित्ये॥ प्रयत्ने॥ अवश्यायते

श्यैङ्गतौ। डम्प्रत्ययः॥ लुम्पेदवश्यमःकृत्ये। यथा। अवश्यपाव्यम्। अवश्यमावश्यके इतिकुल्लूकः॥ त्रि। अनायत्ते॥

अवश्या। स्त्री। कुज्झटिकायाम्॥ त्रि। अनायत्ते॥

अवश्यायः। पुं। नीहारे॥ अभिमाने। दर्पे॥ अवश्यायते शैत्यमापद्यते। श्यैङ्गतौ। श्याद्व्यधेतिणः। आतोयुगितियुक्॥

अवश्रयणम्। न। चुल्ल्यादितोऽवतार्यस्थापने॥

अवष्टब्धः। त्रि। अविदूरे। आसन्ने॥ आक्रान्ते॥ अवलम्बिते॥ अवष्टम्भितेऽमा। ष्टभिस्तम्भे स्तम्भुरोधनेवा। क्तः। स्तम्भेः अवाच्चेतिषः॥ अवाच्चालम्बनेतिकुमेव आविदूर्येस्तम्भःषत्वविधानादवष्टब्धशब्द आसन्नपर इतिअवष्टम्भिनावष्टब्धे इत्यमनोरमायांस्थितम्॥

अवष्टम्भः। पुं। स्वर्णे॥ स्तम्भे॥ प्रारम्भे॥ सौष्ठवे॥ अवष्टम्भनम्। ष्टम्भुरोधे। घञ्॥

अवष्वाणम्। न। भक्षणे॥

अवस्। अ। बाह्ये। बहिरर्थे॥ अधोगच्छति॥ अवस्तादर्थे॥ अवरस्मिन् अवरस्याम् अवरस्मात् अवरस्माः अव

रो ऽवरावा वसन्त्यागतोऽस्मनीयंवा । पूर्वाधरावराणां मिश्यसितस्तसन्धियोगेनावरस्थावादेशश्च ॥

अवसः । पुं । अर्के । भूपे । अवति । अवरश्चयादौ । अस्वविचभोऽस्थादिनाऽसच ॥

अवसक्तः । त्रि । लग्ने ।

अवसक्थिका । स्त्री । पर्य्यङ्कबन्धे । पर्यङ्कः ॥

अवसण्डीनम् । न । पक्षिणोऽधःपतने शोभनमवस्तायाम् ।

अवसन्नः । त्रि । प्राप्तावसादे । विदग्धे । अवासदत । षद्ऌ० । गत्यर्थेति क्तः ।

अवसन्नता । स्त्री । खेदे । भावे तल् ।

अवसरः । पुं । प्रस्तावे ॥ शिष्यजिज्ञासानिवृत्त्यावश्यवक्तव्यत्वरूपे सङ्गतिविशेषे । अनन्तरवक्तव्यत्वमवसरः । यथोपमानेऽवसरसङ्गतिरिति जगदीशतर्कालङ्कारः । वत्सरे । मन्त्रभेदे । वर्षणे । अवसरणम् । सृगतौ । वाहुलकादप् ॥ अधिकरणेपुंसिसंज्ञायामितिघोवा । योग्यकाले ।

अवसरालयः । पुं । अर्द्धरात्रे ।

अवसर्गः । पुं । निरवग्रहे । स्वतन्त्रे ॥ अवसर्जनम् अवसृज्यतेवा । सृज० । घञ् ॥

अवसर्पः । पुं । चारे । अवसर्पति । सृप्ऌ गतौ । पचाद्यच् ॥

अवसर्पिणी । स्त्री । बौद्धकल्पे । समदशकोटिकोटिसागरवर्षमानसमाख्यते ।

अवसादः । पुं । अवसन्नत्वे । विषादे । अवसदनम् । षद्ऌ० । भावे घञ् ।

अवसादनम् । न । नाशे । शैथिल्यापादने ।

अवसानम् । न । समापने । विरामे । पर्य्यन्ते । मृत्यौ । सीमायाम् । षोऽन्तकर्मणि । ल्युट् ॥

अवसायः । पुं । शेषे । समाप्तौ । निश्चये ॥

अवसायकः । पुं । अवसानकरे । स्यतेर्ण्यन्तात् ण्वुल् ।

अवसितम् । त्रि । ऋद्धे । परिपक्वमर्द्दितधान्ये । ज्ञाते । गतौ । अवसाने । अवसानगते । समाप्ते । सम्बद्धे । चिनबन्धने इत्येतस्यावपूर्वस्यनिष्ठायांरूपम् । अवस्यतिस्म अवसीयतेस्मवा । षोऽन्तकर्मणि । क्तः । द्यतिस्यतीतीत्वम् ।

अवसृष्टम् । त्रि । निःसृते ।

अवसेकिमः । पुं । वटके । वडाइतिख्याते । इति हेमचन्द्रः ।

अवस्कन्दः । पुं । शिविरे । विजिगीषूणां निवेशस्थाने । अवस्कन्दति । स्कन्दि-

र० । पचाद्यच् । अवगाहने ।

अवस्कन्दनम् । न । अवतरणे । अवगाहने ।

अवस्करः । पुं । विष्ठायाम् । अपाने । गुह्ये । उपस्थे ॥ गोप्ये । अवकीर्य्यते क्षिप्यते । हविक्षेपे । ऋदोरप् । कस्कादिः । वर्चस्केऽवस्कर इतिवासाधुः ।

अवस्तात् । ।। अवरे । अवोर्थे । अवरस्मिन् अवरस्याम् अवरस्मात् अवरस्याः अवरो ऽवरावा वसन्त्यागतोरमणीयंवा । दिक्छब्देभ्य इत्यस्तातिः । विभाषावरस्येतिपक्षेऽवादेशः ।

अवस्तारः । पुं । जवनिकायाम् । कनात इति चिक इति प्रसिद्धायाम् । आस्तरणे ॥ अवस्तृणात्यऽनेनास्मिन्वा । स्तृञ् आच्छादने । अवेतस्तोर्घञ् ॥

अवस्तु । न । अज्ञानादिसकलजडसमुदायस्वरूपे महाप्रपञ्चे । वस्तुनोऽन्यस्मिन् । असद्वस्तुनि ॥

अवस्था । स्त्री । दशायाम् । कालकृतविशेषे । कालकृतोधर्मोवपुषोवैवनादिविशेषस्तस्मिन् ॥ यथाहुः । कौमारं पञ्चमाब्दान्तंपौगण्डंदशमावधि । कैशोरमापञ्चदशाद्यौवनंतु ततः परमिति । अपिच । आषोडशाद्भवेद्वालस्तरुणस्तत उच्यते । वृद्धस्सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परइति । अवस्थाने ॥ अवतिष्ठति । अवपूर्वात् स्थाधातोर्भ्यवस्थायामितिव्यापकात् साधुः ॥ अवतिष्ठतेऽनयावा । आतश्चोपसर्गइत्यङ् । टाप् ।

अवस्थाचतुष्टयम् । न । वैद्यकमतेकालकृतचतुर्विधदशायाम् । यथा । आपञ्चदशवर्षंवाल्यम् । आत्रिंशद्वर्षं कौमारम् । आपञ्चाशद्वर्षं यौवनम् । पञ्चाशतऊर्द्ध्वं वृद्धत्वमिति ।

अवस्थानम् । न । स्थितौ । वासे । प्रतिष्ठायाम् । अवपूर्वात्तिष्ठतेर्ल्युट् ॥

अवस्थितः । त्रि । प्रतिफलिते ॥ आसीने । कृतावस्थाने । स्थिते । अवपूर्वः ष्ठागतिनिवृत्तौ । क्तः । वर्तिस्यतीतीक्ष्णम् ।

अवस्थितिः । स्त्री । अवस्थाने ॥

अवस्यन्दनम् । न । माद्ये ।

अवस्रंसनम् । न । अधः पतने ।

अवस्रंसितः । त्रि । लम्बिते ।

अवहः । पुं । वायोस्तृतीयस्कन्धे ॥ यथा । ततःसप्तोमुवोधत्तोविधत्तोच विधारणः । चरणश्चतृतीयोयमाच न्द्रादवहोगणः ३ इति ॥

अवहननम् । न । अवघाते ।

अवहस्तः । पुं । हस्तपृष्ठे ।

अवहारः । पुं । चोरे ॥ द्यूतयुद्धादिषि

ग्रहे। निमन्त्रणोपनेतव्यद्रव्ये। ग्राहाख्ययादसि। अवहरति। अवपूर्वात् हृञः स्याद्यधेतिणः। यद्वा। अवह्रियन्तेऽस्मिन्। हृञ०। अवहाराधारेतिघञ्। धर्मान्तरे।

अवहारकः। पुं। अवहारार्थे। हांगर इतिख्यातेजलजन्तुविशेषे। नक्राराजे॥ अवहारएव। स्वार्थेकः।

अवहार्य्यः। त्रि। समर्पणीये। दण्डनीये।

अवहालिका। स्त्री। प्राचीरे। इति हारावली॥

अवहासः। पुं। परिहासे। अवहसनम्। हसे०। घञ्।

अवहितम्। त्रि। सावधाने। विख्याते। प्रवेष्टिते॥ निहिते। अवधीयतेस्म। डुधाञ् धारणपोषणयोः। क्तः। दधातेर्हिः।

अवहित्थम्। न। स्त्री। आकारगुप्तौ॥ अवहिः स्थितम्। सुपिस्थ इत्यत्र स्थ इतियोगविभागात्कः। पृषोदरादिः। अवहित्थमथोभ्रतेति भरतोक्तेः क्लीवम्।

अवहित्था। स्त्री। आकारगोपने। अवहिःस्थितिः अवहित्था। सुपिस्थ इत्यत्र स्थ इतियोगविभागात्कः। पृषोदरादिः। टाप्।

अवहेलम्। न। स्त्री। अनादरे। अवज्ञायाम्। अवहेलनम्। हेडृ अनादरे। घञर्थेकः। डलयोरेकत्वस्मरणात्लः।

अवहेलनम्। न। अनादरे। तिरस्कारे।

अवहेला। स्त्री। अनादरे॥

अवहेलितम्। त्रि। कृतावहेले।

अवाक्पुष्पी। स्त्री। मधुरिकायाम्। शतपुष्पायाम्। सौंफ इतिख्यातायाम्। अवाञ्चिपुष्पाण्यस्याः। गौरादिः। अधःपुष्प्याम्। मङ्गल्यायाम्। हेठाहुलीति गौडप्रसिद्ध तृणे।

अवाक्शाखः। पुं। स्वर्गनरकतिर्य्यक्प्रेतादिशाखाभि शाखिभिसंसाररूपे। अर्वाञ्चोनिकृष्टाः कार्य्योपाधयोहिरण्यगर्भादयो महदहङ्कारतन्मात्रादयोवा शाखा इव शाखायस्यसः।

अवाक्शिराः। पुं। अधोमुखे। अवाक्शिरोऽस्य।

अवाचः। त्रि। परिरक्षके।

अवाग्रः। त्रि। नम्रे। अवनते। अवनतमग्रमस्य।

अवाङ्मनसगोचरम्। त्रि। वाङ्मनसयोरविषये। वाङ्मनसयोर्गोचरम्। नवाङ्मनसगोचरम्॥

अवाङ्मुखः । चि । अधोमुखे ॥ अवाङ्मुखंयस्यसः ॥

अवाक् । ।। अधोदेशे । अवाचिदेशे अवाचोदेशात् अवाङ्देशो वा । दिक्शब्देभ्यः सप्तमी पञ्चमी प्रथमाभ्य इत्यस्तातिः । अञ्चेर्लुक् ।

अवाङ् । चि । अधोमुखे । नम्रे ॥ अवाञ्चत्यधोमुखीभवति । ऋत्विगितिक्विन् ।

अवाक् । चि । मूके । नवाग्यस्य ।

अवाची । स्त्री । दक्षिणादिशि । अधोदिशि । अधोमुख्याम् । अवोमध्यार्थः । अक्षोमध्येञ्चतिस्वर्यम् । ऋत्विगादिनाक्विन् । उगितश्चेति ङीप् इतिस्वामी ॥ वस्तुतस्तु दक्षिणादिशि असाधुरेवायम् । अवपूर्वस्याञ्चतेरधोमुखीभावेवृत्तेः ॥

अवाचीनम् । चि । दक्षिणदिग्भवे । अधोमुखे । अवागेव । विभाषाञ्चेरितिखः ॥

अवाच्यम् । न । दुर्वचने । अनक्षरे ॥ नवचनार्हम् । ण्यत् । वचोऽशब्दसंज्ञायामितिनकुत्वम् । त्रि । अनिन्दिते । अवक्तव्ये ॥ यथा । नैवपश्येन्नशृणुयादवाच्यंजातुकस्यचित् । ब्राह्मणानां विशेषेणनैवब्रूयात् कथञ्चन । यद्ब्राह्मणस्य कुशलंतदेवसततंवदेत् ।

तूष्णीमासीत निन्दायां कुर्वन्भैषज्यमात्मन इतिमहाभारतम् ।

अवाच्यदेशः । पुं । योनौ । भगे ॥ अवाच्यश्चासौदेशश्च ।

अवाच्यवचनम् । न । दोषविशेषे । यदेवावाच्यवचनम् वाच्यवचनंहितत् ।

अवान्तरः । चि । प्रधानान्तःपातिनि । इयंफलश्रुतिर्नश्रेयःपरमपुरुषार्थसाधनपरा भवति । किन्तुबहिर्मुखानां मोक्षविवक्षयाऽवान्तरकर्मफलैः कर्मसुरुच्युत्पादनमात्रम् । यथा । पिबनिम्बंप्रदास्यामिखलुते खण्डलड्डुकान् । पित्रैवमुक्तः पिबति तिक्तम प्यतिबालकइति ॥

अवाप्तः । त्रि । प्राप्ते ।

अवाप्तिः । स्त्री । प्राप्तौ ।

अवाप्यः । चि । लब्धव्ये ।

अवारम् । न । नद्यादेः पूर्वतीरे । अर्वाक्तटे ॥ अर्वाक्तीरमवारम् । अवव्रियते । वृङ्गतौ । कर्मणि घञ् ॥ नवारमस्त्यत्रेतिवा । अर्शआद्यच् ।

अवारपारः । पुं । समुद्रे ।

अवारपारीणः । त्रि । पारगे । अवारपारंगच्छति अवारपारयोर्भवोवा तत आगतोवा । राष्ट्रावारपाराद्घखाविति खः । अवारपारंगामिनि ॥ अवारपारात्यन्तानुकामंगामीतिखः ।

अवारिका । स्त्री । धन्याके ॥ अवरिकापिपाठ इतिराजनिर्घण्टः ॥

अवारितः । त्रि । अकृतवारणे ॥

अवारीणः । त्रि । अवारगामिनि ॥ अवारंगच्छतीत्यावर्थेषु । अवारपाराद्विगृहीतादिपरीताच्चेतिखः ॥ अवारंगामीवा । अवारपारात्यन्तानुकामंगामीतिखः ॥

अवावटः । पुं । द्वितीयेनपित्रासवर्णायामुत्पादिते ॥ यथा । द्वितीयेनतु यःपित्रासवर्णायां प्रजायते । अवावट इतिख्यातः शूद्रधर्मःसजातित इति स्मृतिः ॥

अवासाः । त्रि । नग्ने ॥ नवासोऽस्य ॥

अवाह्यः । त्रि । आभ्यन्तरे । प्रतीचि ॥ प्रतीचोऽन्यस्यबाह्यस्याभावात् । न विद्यते बाह्यमन्यदस्य ॥

अविः । पुं । नाथे ॥ रवौ ॥ मेषे ॥ शैले ॥ मूषिककम्बले ॥ अवति अव्यतेवा । अवरवर्णादौ । इन् ॥ स्त्री । स्त्रीधर्मिण्याम् ॥ अवतिरज्जायाः । सर्वधातुभ्य इन् ॥

अविकः । पुं । अविशब्दार्थे ॥ अविरेव । अवेः कइतिकः ॥

अविकटः । पुं । मेषसमूहे ॥ अवीनांसङ्घातः । सङ्घातेकटच् ॥

अविकम्पः । त्रि । अप्रचले ॥ नास्तिविशिष्टः कम्पोवेपथुर्यस्य सः ॥

अविकम्पितः । त्रि । अचलिते ॥ नविकम्पितः ॥

अविकल्पः । त्रि । एकरूपे ॥ नविकल्पोऽस्मिन् ॥

अविकारी । त्रि । विक्रियाशून्ये कूटस्थे परमात्मनि ॥

अविकृतिः । स्त्री । मूलप्रकृतौ ॥ नास्ति विकृतिर्यस्याः ॥

अविगन्धिका । स्त्री । अजगन्धावृक्षे ॥

अविगीतम् । त्रि । अनिन्दिते ॥

अविघ्नः । पुं । करमर्दके ॥ विजयतेस्म । ओविजीभयचलनयोः । गत्यर्थेतिक्तः । ओदितश्चेतिनत्त्वम् । नविघ्नः ॥

अविचारः । पुं । अन्याये ॥ विवेकाभावे ॥ यथा । अविचारसिद्धुं वेयविलासिनीवमाया असतोपिभावानुपदर्शयन्तीपरपुरुषंवञ्चयतीति ॥ त्रि । विचाररहिते ॥

अविचारकः । त्रि । मूढे ॥

अविचारितम् । त्रि । अकृतविचारे । अविवेचिते ॥

अविचाली । त्रि । देशान्तरप्राप्तिरहिते ॥

अविच्युतः । त्रि । निश्चये ॥

अविज्ञः । त्रि । अनभिज्ञे । अप्रवीणे ॥

अविज्ञातः । त्रि । अर्थापरिज्ञानाद-

निश्चिते। यथा। यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचिदिति। न तज्ज्वलतीति। निष्फलं भवतीत्यर्थः। ईश्वरे॥ यदविज्ञायते पुम्भिर्नामभिर्वा क्रियागुणैरिति निरुक्तः॥

अविज्ञातार्थम्। पुं। परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम्॥ ५।५२॥ त्रिरभिहितं वादिनेति शेषः॥

अविज्ञानवान्। पुं। अनिपुणे। अविवेकिनि। अविज्ञानमस्ति अस्यास्मिन्वा। मतुप्॥

अविज्ञेयम्। न। प्रमाणान्तरानवगाह्ये। औपनिषदे ब्रह्मणि। तद्धि रूपत्वाद्रूपादिहीनत्वात् इदमेवमितिविस्पष्टज्ञानार्हं न भवति। अविज्ञेयम्। त्रि। प्रमाणानवगाह्ये। दुर्ज्ञेये।

अविडीनम्। न। पक्षिणामाभिमुख्याभिगमने॥

अवितम्। त्रि। रक्षिते। अव्यतेस्म। अवरक्षणादौ। क्तः॥

अवितथम्। न। सत्ये। तथ्ये। नवितथम्। त्रि। तद्विशिष्टे।

अवितर्क्यम्। त्रि। अनूहनीये। श्रौतार्थे।

अविता। त्रि। पालयितरि॥

अविश्वजः। पुं। न। पारदे। इतिराजनिर्घण्टः॥

अविदग्धः। त्रि। अनम्ले। निर्गन्धे। अचतुरे॥

अविदासी। त्रि। उपक्षयशून्ये।

अविहितः। त्रि। विहितविपरीते। अव्याकृते। अज्ञाते। विज्ञानाभेद्ये। अविहितविज्ञाना यद्धिलोकप्रवृत्तेः।

अविदूसम्। न। मेषदुग्धे॥ अवेर्दुग्धम्। अवेर्दुग्धे सोढदूसमरीसचः॥

अविद्धकर्णी। स्त्री। पाठायाम्। अविद्धौ कर्णौ यया। पाककर्णेति ङीष्। अविद्धोऽच्छिद्रः पर्णरूपः कर्णोऽस्या वा॥

अविद्यः। त्रि। विद्यारहिते॥

अविद्यमाना। स्त्री। मायायाम्॥ त्रि। अभावे। अवर्त्तमाने॥

अविद्या। स्त्री। अहम्मतौ। अज्ञाने। यथाहुः। अविद्याया अविद्यात्वमिदमेव तु लक्षणम्। यत्प्रमाणाऽसहिष्णुत्वमन्यथा वस्तुता भवेदिति॥ अन्यच्च। सेयं भ्रान्तिर्निरालम्बा सर्वन्यायविरोधिनी। सहते न विचारं सा तमो यद्वद्दिवाकरमिति॥ पुनश्च। दुर्घटत्वमविद्याया भूषणं न तु दूषणम्। कथञ्चिद्घटमानत्वेऽविद्यात्वं दुर्घटं भवेदिति॥ अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातौ। अव्यक्त

महदहङ्कारपञ्चतन्मात्रेष्वनात्मस्वात्मबुद्धौ । अतस्मिंस्तद्बुद्धौ । विपर्यये । मिथ्याज्ञाने । अनात्मन्यात्मख्यातौ । यथा शरीरे मनुष्योऽहमित्यादि । इयञ्च सर्वक्लेशमूलभूतात्मत्वमुच्यते । अनादिभावरूपाज्ञाने । अस्मितादिक्लेशकर्मणि । मलिनसत्त्वप्रधानायाम् । संहतौ ॥ परमानन्दस्वरूपात्मज्ञाने । वेदनंविद्या । विद ज्ञाने । संज्ञायां समजनिषदनिपतेति क्यप् । विद्याविरुद्धा अविद्या ॥

अविद्वान् । त्रि । अज्ञे । नविद्वान् ॥

अविधिः । पुं । शास्त्राविहिते । अविधाने । यथा । वसेत्सनरके घोरे दिनानि पशुरोमभिः । सम्मितानि दुराचारो योऽहन्त्यविधिना पशूनित्याह्निकतत्त्वे याज्ञवल्क्यः ।

अविनः । पुं । राशि । अध्वर्यौ । अवति । अवरक्षणादौ । श्यास्त्याह्वञ विव्यधिभ्य इनच् । त्रि । यष्टरि ॥

अविनतः । त्रि । उन्नते ।

अविनयः । पुं । विनयाभावे । त्रि । अविनीते ।

अविनाभावः । पुं । व्याप्तौ । व्याप्यनिष्ठव्यापकनिरूपितधर्मे । यथा । वह्निमान् धूमादित्यादौ धूमनिष्ठा वह्निनिरूपिता व्याप्तिरिति न्यायमीमांसयोर्मतम् । तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावे । यथा । केयमाकाङ्क्षा न तावदविनाभावः । नीलं सरोजमित्यादौ तदभावात् । विमलं जलं नद्याः कच्छे महिषश्चरतीत्यत्र जलान्वितनद्या अविनाभावात् कच्छेसाकाङ्क्षतापत्तेश्च । इत्याकाङ्क्षा चिन्तामणिः । अविनाभाव इति । तत्पदार्थेन विनायोभावः सत्त्वं तदभाव इत्यर्थः । तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावस्तत्पदार्थे तत्पदार्थाकांक्षा इतिभाव इति- मट्टीकामाधुरी ।

अविनाशी । त्रि । अन्त्यविकारवर्जिते । नित्ये । सत्ये । अबाध्ये सर्वप्रकारपरिच्छेदशून्ये । अविक्रियआत्मनि । विनष्टुं शीलमस्येति विनाशी । नविनाशी ।

अविनीतः । त्रि । विघाते । समुद्धते । न व्यनायि । णीञ् । क्तः ।

अविनीता । स्त्री । कुलटायाम् । नव्यनायि । णीञ्प्रापणे । क्तः । नविनीता वा ।

अविन्ध्यः । पुं । राक्षसान्तरे ॥

अविपटः । पुं । मेषविस्तारे । अवीनां विस्तारः । विस्तारे पटच् ॥ कम्बलादौ ।

अविपश्चित् । पुं । विचारजन्यतात्पर्यपरिज्ञानशून्ये । अविवेकिनि । नविपश्चित् ।

अविप्रकृष्टः । त्रि । आसन्ने ।

अविप्रियः । पुं । श्यामाकतृणे ।

अविप्रिया । स्त्री । श्वेतालतायाम् ।

अविभक्तम् । त्रि । अभिन्ने । एकमेवार्थे । अथाहन्ते सर्वत्राऽनुस्यूते अधिष्ठातार्थम् ॥ ५ अधितयाच सर्वस्मिन्वि नतयाबाधाः ॥ अवि घमाने । नविभक्तम् ।

अविभावितः । त्रि । अनुपलक्षिते ।

अविमरीसम् । न । मेषीदुग्धे । अवेर्दुग्धम् । अवेर्दुग्धेमरीसच्प्रत्ययः ॥

अविमुक्तम् । न । काशीक्षेत्रे । अविमुक्ते महादेवोविश्वालाक्षीशिवापरेऽप्यागमः । यथा । मुनेप्रलयकालेऽपि तत्क्षेत्रं कदाचन । विमुक्तंनशिवाभ्यांयदविमुक्तंततो विदुरिति । अविमुक्तंनमोक्तव्यंसर्वथैवमुमुक्षुभिः । किन्तु शिवाभविष्यन्तिकाश्यांनिवसतांसतामिति श्रीदेवीभागवतम् । त्रि । अत्यक्ते । नविमुक्तम् ॥

अविरतम् । न । सन्तते । अनवरते । अनुपरते । नास्तिविरतमस्य । क्रियाविशेषणे वर्त्तमानंक्लीवम् । सत्त्वगामितुत्रिलिङ्गम् ।

अविरतिः । स्त्री । चित्तस्यविषयसम्प्रयोगात्मनिगर्हे ।

अविरलः । त्रि । घने । निविडे ।

अविरुद्धः । त्रि । अनुकूले । अप्रतिषिद्धे । नविरुद्धः ।

अविरोधः । पुं । विवादाभावे ॥ यथा । श्रुतिस्मृतिविरोधेतु श्रुतिरेवगरीयसी । अविरोधेसदाकार्यंस्मार्त्तंवैदिकवत्सतेति ॥ नविरोधः ।

कक ... । न । मेषदाभ ...

अविलम्बितम् । त्रि । आशुगे । उत्सृष्टे ॥ न । आशुनि । शीघ्रे । विलम्बतेस्म । लविस्रवस्रंसने । आषथ्योपधः । अकर्मकत्वात् कर्त्तरिक्तः । नञ्समासः ।

अविला । स्त्री । मेष्याम् । भेड्याम् ।

अविवरः । त्रि । नीरन्ध्रे ।

अविवाक्यम् । न । दशरात्रस्यदशमेह्नि ।

अविवादः । पुं । विवादाभावे । नविवादः ।

अविवेकः । पुं । विषयविरक्त्यभावे । सम्भूयकारितायाम् ॥ नह्निकिञ्चिदेकंकार्यं पर्याप्तमपितुसम्भूय । विपर्यासे । व्याकुलत्वहेतौमोहे ॥ अविमृश्यकारित्वे ॥ सदसद्विवेचनाराहित्ये । त्रि । तद्वति । नविवेकः ॥

अविवेकी । त्रि । विवेकहीने । अविवेचके । तस्मादविवेकिनःसुखकामस्यबोनाऽत्राधिकारित्वमिति मुक्तिवाद

रुगादाधरीटीका । अनुमुक्तिवि-चारे ।

अविवेकि । न । व्यक्ते ः प्रधाने ॥ महदादौ ॥ यथा प्रधानं स्वतोनविविच्यते एवंमहदादयोपि न प्रधानाद्विविच्यन्ते ॥ वालिशे । मूर्खे । गुरुशास्त्राद्युपदेशरहिते । नविवेकी ।

अविशिष्टम् । त्रि । समाने । नविशिष्टम् ।

अविशेषः । पुं । तन्मात्रेषु । तानि ह्यम्बरादिभिःपरस्परव्यावर्त्तनानि नानुभूयन्त इत्यविशेषाः स्त्वम्यग्शेच्यन्ते । निष्प्रपञ्चे । विशेषाभावे ॥ त्रि । विशेषरहिते । तुल्ये ।

अविश्रान्तम् । न । अनवरते ॥ त्रि । विश्रामहीने ॥

अविश्वस्तः । त्रि । प्रत्ययायोग्ये । विश्वासानर्हे ॥ यथा । नविश्वसेदविश्वस्तेविश्वस्तेनातिविश्वसेत् । विश्वासाद्भयमुत्पन्नंमूलान्यपिनिकृन्ततीति ॥

अविश्वासा । स्त्री । चिरप्रसूतायांगवि ।

अविषः । पुं । अब्धौ । राजनि । अवति । अवरत्तशादौ । अविमह्यौषिषच्च । त्रि । निर्विषे ।

अविषा । स्त्री । निर्विषातृणे ।

अविषी । स्त्री । नद्याम् । टिस्वात्ङीप् ॥

अविसोढम् । न । अविमर्षे । अवेर्दुग्धम् । अवेर्दुग्धेसोढदूसमरीसचोबक्तव्याः ॥

अविस्पष्टम् । न । क्लिष्टे । अप्रकटवचने । नविस्पष्यतेस्म । स्पशबाधनस्पर्शनयोः । कर्मणिक्तः । अविस्पष्टेति निर्देशाद्विडभावः ॥

अवीः । स्त्री । ऋतुमत्याम् ॥ अवति लज्जायाः । अवरत्तशादौ । अविदृशृस्तन्निभ्यईः ।

अवीचिः । पुं । नरकभेदे । नरके ॥ नास्तिवीचिः सुखमत्र । त्रि । नरकशून्ये ।

अवीचिमयः । पुं । नरकभेदे । यःसाक्ष्यादावनृतंवदति सनिरवलम्बे ऽवीचिमये ऽधश्शिरानिपात्यते ॥ इति श्रीभागवतम् ॥

अवीजा । स्त्री । ईषद्वीजायांद्राक्षायाम् । किसमिस् इतिलोके ।

अवीतम् । न । अनुमानप्रभेदे । व्यतिरेकमुखेन प्रवर्त्तमाने निषेधके । तत्रावीतंशेषवत् । विशेषेणास्पष्टमितोवीतः समभवतीत्यवीतः ॥

अवीरः । त्रि । निःसत्त्वे । निर्वीर्ये ।

अवीरा । स्त्री । निष्पतिसुतायाम् । वीरयति । वीरविक्रान्तौ । अच् । पतिपुत्रवतीनारी वीराप्रोक्तामनीषिभिः । नवीरा । अजातापत्यविधवा

ऽवीरेतिस्मृतिः ।

अवृजिनः । त्रि । यथोक्तकारितयानिष्पापे ।

अवेक्षणम् । न । दर्शने । ईषद्दर्शने । ल्युट् ।

अवेक्षा । स्त्री । अवेक्षणे । प्रतिजागरे । अवधाने । अवेक्षणम् । ईषद्दर्शने । गुरोश्चहलइत्यः । टाप् ।

अवेक्षिता । न । अवेक्षके । अध्यक्षे । आयव्ययादिनिरीक्षके । अवेक्षते । ईक्ष० । तृच् ।

अवेद्यः । पुं । गोवत्से । त्रि । अज्ञेये ।

अवेलः । पुं । अपलापे ॥ त्रि । वेलाशून्ये ।

अवेला । स्त्री । पूगचर्वितै । चवाई सुपारी इतिभाषा ।

अवैधम् । त्रि । विधिविवर्जिते । निषिद्धविषये । यथा । अवैधंपशुमं कुर्वन् राशोदषुडेनशुध्यतीति ॥

अवोदम् । त्रि । अवक्लेदने । उन्दीक्लेदने अवपूर्वः । भावेघञ् । अवोदैधौद्मेतिनिपातनान्नलोपः ।

अव्यक्तः । पुं । हरौ । स्मरहरे । सर्वकारणे । रूपादिहीनतया चक्षुराद्यगोचरे योगाभ्यासावसेये भावे । कल्पितेषुसर्वकार्येषुसद्रूपेणानुगते । हिरण्यगर्भे । सूक्ष्मशरीरे । आपा वस्थायाम् । निर्विकारे । शब्दप्रवृत्तिनिमित्तैर्जातिगुणक्रियासम्बन्धै रहिते । व्यक्तःस्पष्टोनेत्यव्यक्तः ॥ यत्र ध्वनावकारादयोवर्णा विशेषरूपेण नव्यज्यन्तेसध्वनिरव्यक्तः । मूर्खे । कन्दर्पे ॥ न । प्रकृतौ । तथाहि । यत् सर्वस्यजगतो बीजभूत मव्याकृतनामरूपसतत्वम् सर्वकार्यकारणशक्तिसमाहाररूपम् अव्यक्ताव्याकृताकाशादिनामवाच्यंपरमात्मन्योतप्रोतभावेन तमाश्रितम् वटकणिकायामिव वटवृक्षशक्तिः । तत्त्वादिरूपेण निरूप्यमाणे व्यक्तिरस्यनास्तीत्यव्यक्तम् । तदुक्तम् । हेतुमदनित्यमव्यापिसक्रियमनेकमाश्रितंलिङ्गम् । सावयवंपरतन्त्रं व्यक्तं विपरीत मव्यक्तमिति । साङ्ख्योक्तमहदादौ । आत्मनि । परमात्मनि । मायोपाधिके ब्रह्मणि ॥ त्रि । अवयवरहिते । अव्यक्तमितिविज्ञेयंलिङ्गग्राह्यमतीन्द्रियम् । सूक्ष्मे । अविज्ञेये । अस्फुटे ॥ नव्यज्यतेस्म । अञ्जूव्यक्त्यादौ । क्तः । अव्याकृतकार्यभूतसूक्ष्मे ॥ भूतसूक्ष्मलयाधिकरणे । नव्यक्तम् इतिवा ।

अव्यक्तमूलप्रभवः । पुं । संसारवृक्षे ।

अव्यक्तरागः । पुं । अरुणवर्णे । किञ्चिल्लोहिते । अव्यक्तोरागोयस्य ।

अव्यक्तलिङ्गः । त्रि । अदृष्टेनश्रुतिस्मृत्युक्तेनप्रकारेण श्रमवति । नव्यक्तंदृष्टं नगृहीतंलिङ्गमाश्रमिचिह्नमनेन ॥

अव्यग्रः । त्रि । अनाकुले । नव्यग्रः ॥

अव्यङ्गः । त्रि । अविकले । परिपूर्णे । अविकलाङ्गे । नव्यङ्गः ।

अव्यङ्गा । स्त्री । शूकशिम्ब्याम् ॥

अव्यञ्जनः । पुं । शृङ्गहीनपशौ । त्रि । अव्यक्ते । अस्फुटे । अविद्यमानंव्यञ्जनंयस्ययस्मिन्वा ।

अव्यण्डा । स्त्री । शूकशिम्ब्याम् । कौञ्च इतिख्यातायाम् ॥ नविगतमण्डमस्याः ।

अव्यतिकरः । पुं । अप्रसङ्गे ।

अव्यथः । पुं । सर्पे । त्रि । निर्व्यथे । न व्यथायस्य । नव्यथते । व्यथभयसञ्चलनयोः । पचाद्यच् ॥

अव्यथा । स्त्री । पथ्यायाम् । चारव्याम् ॥ चोषधीभेदे । मुण्ड्याम् ॥ नव्यथायस्याः । नव्यथते । व्यथ । पचाद्यच् । टाप् ॥

अव्यथी । पुं । अश्वे । नव्यथते तच्छीलः । व्यथ० । जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्चेतीनिः ॥

अव्यथिषः । पुं । अर्णवे । सूर्ये । नव्यथते । व्यथ० । नजिव्यथिभ्यांटिषच् ॥

अव्यथिषी । स्त्री । धरायाम् । रात्रौ ॥

टित्वान्ङीप् ॥

अव्यभिचारी । त्रि । केनापिप्रतिकूलेन हेतुनानिवारयितुमशक्ये ॥

अव्ययः । पुं । न । स्वरादिशब्दे । पुं । विष्णौ । शिवे ॥ अनाद्यनन्तेदेशादिसम्बन्धाश्रये आत्मज्ञानमन्तरेणानुच्छेद्येमायामयेसंसारवृक्षे । त्रि । उत्पत्तिविनाशादिसर्वक्रियाशून्ये । नित्ये । अविनाशिनि । अपरिच्छिन्ने । यथा । सदृशंत्रिषुलिङ्गेषु सर्वासुचविभक्तिषु । वचनेषुचसर्वेषु यन्नव्येति तदव्ययमिति ॥ नविद्यतेव्ययोऽवयवापचयोगुणापचयोविनाशोवा यस्य । यद्वा । नव्येति विकारं नभजत इत्यव्ययम् । विपूर्वादिणः पचाद्यच् । नव्ययः ।

अव्ययात्मा । पुं । अनश्वरस्वभावे ।

अव्ययीभावः । पुं । प्रायः पूर्वपदार्थप्रधानेसमासविशेषे ।

अव्यलीकः । पुं । सत्ये ।

अव्यवसायवान् । त्रि । शिक्षौ । व्यवसायरहिते ॥ इतित्रिकाण्डशेषः ।

अव्यवस्था । स्त्री । शास्त्रविरुद्धव्यवस्थायाम् । अपसिद्धान्ते । अविधौ ।

अव्यवस्थितः । त्रि । नीतिशास्त्रादिव्यवस्थानभिज्ञे ॥ सिद्धान्तरहिते ।

अव्यवहार्य्यः । त्रि । अभिधानाभिधेयक

पयोर्वाङ्मनसयोरविषये ॥ अव्यवहारायोग्ये । नञ्‌ समासः ॥

अव्यवहितम् । त्रि । व्यवधानशून्ये । संसक्ते । अपक्षान्तरे । नव्यवधीयतेस्म । क्तः । दधातेर्हिः ।

अव्याकृतः । पुं । वीजरूपे । अविवेके । अव्यक्ते । प्रकृतौ । असम्भूतौ । साभासाज्ञाने । अनिर्वाच्ये । नव्याकृतः ॥

अव्याकृताकाशः । पुं । अव्यक्ते ।

अव्याजः । पुं । छलाभावे । शीघ्रे ।

अव्यापकम् । त्रि । परिच्छिन्ने । नव्यापकम् ॥

अव्यापि । न । व्यक्ते ।

अव्याप्यम् । त्रि । व्याप्तिरहिते । अव्यापनीये । अनधीने ।

अव्याप्यवृत्तिः । त्रि । किञ्चिदवच्छिन्नवृत्तौ । स्वसमानाधिकरणाभावप्रतियोगिनि ॥ दैशिककालिकभेदेन सद्विविधः । तत्पर्यायः । प्रादेशिकः । आत्मनोविशेषगुणाः । वुद्धिसुखदुःखेच्छाद्वेषयत्नधर्माधर्मभावनाख्यसंस्काराः ९ । आकाशस्यविशेषगुणः शब्दः १० । सामान्यगुणौ संयोगविभागौ १२ । एतेसर्वे अव्याप्यवृत्तयः स्युरितिन्यायभाषा ।

अव्युत्पन्नः । त्रि । अनभिज्ञे ।

अशक्यम् । त्रि । अशक्ते ।

अशक्रुम्भी । स्त्री । पानीयपृष्ठजे । काईइतियस्याः प्रसिद्धिः ।

अशक्तः । त्रि । असमर्थे । सामर्थ्यहीने ॥ यथा । उपवासेष्वशक्तानांनक्तंभोजनमिष्यतइति । नशक्तिरस्य । नञ्दुःसुभ्योहलिसक्थ्योरितिपाठात्पक्षेअच् ।

अशक्तिः । स्त्री । करणवैकल्यहेतुकेवुद्धिधर्मे । साचाष्टाविंशतिभेदभिन्ना । यथा । एकादशेन्द्रियवधाःसहवुद्धिवधैरशक्तिरुद्दिष्टा । सप्तदशधाचवुद्धेर्विपर्ययात्तुष्टिसिद्धीनामिति । एकादशेन्द्रियवधास्तु । बाधिर्यंकुष्ठतान्धत्वंजडताजिघ्रतातथा । मूकताकौण्यपङ्गुत्वक्लैव्योदावर्त्तमत्तताः । यथासंख्यंश्रोत्रादीनामिन्द्रियाणांवधाः । एतद्धेतुकाबुद्धेरशक्तिः स्वव्यापारेभवति । तथाचैकादशहेतुत्वादेकादशधाबुद्धेरशक्तिरुच्यते । हेतुहेतुमतोरभेदविवक्षया सामानाधिकरण्यम् । तदेवमिन्द्रियवधद्वारेण बुद्धेरशक्तिमुक्त्वास्वरूपतोऽशक्तिमाह । सहबुद्धिवधैरिति । कतिबुद्धेःस्वरूपतोवधाइत्यतआह । सप्तदशधाचबुद्धेः । कुतः । विपर्ययात्तुष्टिसिद्धीनाम । तुष्टयोनवेतितद्विपर्ययानवरूप

न्यान्नभवंति । एवंसिद्धयोऽष्टाविति तद्विपर्ययास्तन्निरूपणादष्टौभवन्ति । इतिसांख्याः । अपिच । अशक्तिः कारकापायेसद्य्योप्रभविष्णुता । कारकाणामन्तःकरणबहिष्करणाना मपायेविनाशेसति विद्यमानेप्यर्थे अप्रभवनशीलत्वमशक्तिः । अन्धब धिरादेरिवरूपशब्दादाविति ।

अशक्यः । त्रि । असाध्ये । अशकनीये ।

अशशुः । पुं । चन्द्रे । त्रि । शशुरहिते । मित्रे ।

अशनम् । न । ओदने । भक्षणे । अश० । ल्युट् । त्वरयानत्वरयन्निर्जितो यथालघुकुर्यादशनंदिनात्यये ।

अशनाया । स्त्री । बुभुक्षायाम् । क्षुधायाम् । अशितुमिच्छा अशनस्येच्छा वा अशनायतिवा । क्षुधादितिक्यच् । अशनायेति ईत्वाभावः । अप्रत्यया दित्यः ।

अशनायितम् । त्रि । क्षुधिते । अशनस्येच्छा । अशनायेतिसाधुः । अशनायाजाताअस्य । तारकादिः ।

अशनिः । स्त्री । पुं । चञ्चलायाम् । विद्युति । पवौ । वृक्षादिविनाशकेमेघोत्पन्नज्योतिषि । अश्नाति सङ्घातं करोति । अश्यतेऽनेनेतिवा । अर्तिसृधृधम्यश्यादिना अनिः ।

अश्मवर्षके । उल्काविशेषे ।

अशनित्विट् । स्त्री । विद्युति । अशनेः त्विट् ।

अशब्दः । पुं । न । अवेदमूलके ।

अशमः । पुं । इदंकृत्वेदंकरिष्यामीति सङ्कल्पप्रवाहानुपरमे ।

अशय्यः । पुं । तापसान्तरे । यःकदापिनशेते ।

अशरीरः । पुं । स्वेनरूपेणाकाशकल्पे परमात्मनि । त्रि । शरीररहिते । यथा । प्रत्यग्ज्ञानशिखिध्वस्तेमिथ्याज्ञानेसहेतुके । नेतिनेतिस्वरूपत्वादशरीरोभवत्ययमिति ।

अशर्म । न । दुःखे । त्रि । पीडायुक्ते । शर्मसुखम् तद्विरुद्धम् । नञ्निन समासः ।

अशाखा । स्त्री । शूलीतृणे ।

अशान्तः । त्रि । इन्द्रियलौल्यादनुपरते । आत्मसाक्षात्कारशून्ये । नशान्तः ।

अशाश्वतः । त्रि । अस्थिरे । इष्टनष्टप्राये । नशाश्वतः ॥

अशास्त्रम् । न । वेदादिविरुद्धे । नशास्त्रमस्मिन् ।

अशास्त्रविहितम् । त्रि । वेदेनप्रत्यक्षादिनावा अविहिते । बुद्ध्यागमबोधिते ॥ शास्त्रेणाविहितम् । नशास्त्रविहितम् ।

अशिक्षितः । त्रि । अनिपुणे । शिक्षारहिते ।

अशितम् । त्रि । भुक्ते । तृप्ते । अश्यते स्म । अशभोजने । क्तः ।

अशित्रम् । त्रि । चौरे । पुं । चरौ । अश्नन्ति तेन । अशभोजने । अशित्रादिभ्यश्चोत्रावितीत्रन्प्रत्ययः ।

अशिरः । पुं । वीतिहोत्रे । राक्षसे । भास्करे । वायौ । न । हीरके ।

अशिरा । स्त्री । अशिरराक्षसनार्य्याम् ।

अशिश्विका । स्त्री । पुत्ररहितायाम् । न शिशुर्यस्याः । सख्यशिश्वीतिसाधुः । स्वार्थे कन् ।

अशिश्वी । स्त्री । अशिश्विकायाम् । नास्याः शिशुरस्तीत्यर्थे सख्यशिश्वीति भाषायामिति निपातनान् ङीष् ।

अशीतिः । स्त्री । सङ्ख्याविशेषे ८० । सङ्ख्येये । अष्टदशतः परिमाणमस्य । पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतीत्यादिना निपातनात्प्रकृतेरशीभावस्तिप्रत्ययश्च ।

अशीर्षिकः । त्रि । अशीर्षवति । ब्रीह्यादिषु शीर्षान्न इतिपाठाट्ठक् ।

अशीलः । त्रि । दुःशीले ।

अशुचिः । पुं । विण्मूत्रश्लेष्मादौ । त्रि । शास्त्रोक्तशौचहीने । यथा । व्रतानामुपवासानां श्राद्धादीनाञ्च सङ्गमे । करोति यः क्षौरकर्म सोऽशुचिः सर्वकर्मस्विति ॥ न शुचिः ॥

अशुद्धः । त्रि । अज्ञाततत्त्वार्थमलयुक्ते । अपवित्रे । अकृतशोधने । न शुद्धः ।

अशुभम् । न । पापे । अनिष्टफले । यथा । स्वेन्द्रियाणाञ्चासामर्थ्यं स्वकर्मणि कृतानि च । मुहुर्मुहुश्च विभ्रंशो विरमे दशुभान्यमूनि । अमङ्गले । त्रि । तद्युक्ते । न शुभम् ।

अशून्यशयनव्रतम् । न । श्रावणकृष्णद्वितीयायां कर्त्तव्यमत्स्यपुराणोक्तव्रतविशेषे ।

अशृतम् । त्रि । अपक्वे । न शृतम् ।

अशेषः । त्रि । निःशेषे । सम्पूर्णे । न शेषोऽस्य ॥

अशोकः । पुं । कङ्केलिपादपे । यथा । अशोकश्चरणाघाताज्जायते पुष्पवानिति । अस्य गुणा यथा । अशोकः शीतलस्तिक्तो ग्राही वर्ण्यः कषायकः । दोषापचीतृषादाहकृमिशोषविषास्रजिदिति । न शोकोऽस्मात् । वकुलद्रुमे ॥ न । पारदे । पुष्पे । अशोकस्य पुष्पम् । पुष्पमूलेषु बहुलमिति यणो विकारावयवार्थस्य लुक् । त्रि । सन्तापवर्जिते । निःशोके ।

अशोककरोहिणी । स्त्री । कटुकायाम् । कटुरोहिण्याम् । अशोकश्चरोहिणीति । क

सर्व्वोपमाने इतिविनिः ॥

अशोकषष्ठी । स्त्री । चैत्रशुक्लषष्ठ्याम् ।

अशोका । स्त्री । कटुरोहिण्याम् । बुद्धस्यशासनदेवीविशेषे । नशोकोऽस्याः ॥

अशोकारिः । पुं । कदम्बद्रौ ।

अशोकाष्टमी । स्त्री । चैत्रशुक्लाष्टम्याम् ॥

अशोचः । पुं । अनहङ्कृतौ ।

अशोच्यः । त्रि । शोचितुमयोग्ये । निरपराधे ।

अशौचम् । न । आशौचे । वैदिककर्मानर्हत्वप्रयोजके संस्कारविशेषे । विहितकर्मविरोध्यदृष्टविशेषे । शुचित्वाभावे । यथा । क्रियाहीनस्यमूर्खस्य महारोगिणएवच । यथेष्टाचरणस्यामरणान्तमशौचकमिति । क्रियाहीनस्यनित्यनैमित्तिकक्रियाननुष्ठायिनः । मूर्खस्य गायत्रीरहितस्यसार्थगायत्रीरहितस्येतिगदाधरः । महारोगिणः उन्मादादिपापरोगाष्टकान्यतमरोगवतः । यथेष्टाचरणस्यद्यूतवेश्यावासक्तस्येत्यर्थः । नशौचम् ।

अश्मकदली । स्त्री । काष्ठकदल्याम् ॥

अश्मकीटः । पुं । नारकीटे ।

अश्मकुट्टः । न । तपोविशेषाल्लब्धसंस्कृतापसान्तरे । भक्षणार्थं प्रियङ्ग्वादीनश्मन्येवकुट्टयति । कुट्ट० अच् ॥

अश्मकेतुः । पुं । क्षुद्रपाषाणभेदाख्ये ।

अश्मगर्भः । पुं । हरिन्मणौ । मरकते ॥ अश्मनोगर्भः ।

अश्मगर्भजम् । पुं । पन्नाइतिप्रसिद्धे मरकतमणौ ।

अश्मघ्नः । पुं । पाषाणभेदनवृक्षे । हाथाजोडीति भाषा ।

अश्मजम् । त्रि । शिलाजाते ॥ न । शिलाजतुनि । अश्मनोजातम् । जनीप्रादुर्भावे । पञ्चम्यामजाताविति डः । लोहे ।

अश्मजतुकम् । न । शिलाजतुनि ॥

अश्मजातिः । स्त्री । मरकतादिरत्ने । अश्मनोजातिः ।

अश्मदारणः । पुं । टाँकी इति प्रसिद्धे । टङ्के । दारयति । दृ० । णयन्ताल्ल्युः । अश्मनोदारणः । दार्यते ऽनेनवा । णयन्ताल्ल्युट् ।

अश्मा । पुं । पाषाणे । अश्नुते । अशूव्याप्तौसङ्घातेच । अन्येभ्योऽपीतिमनिन् ॥ अशिशकिभ्यांछन्दसी तिमनिन्वा । भाषायामपीष्यते छन्दसीतितुशकिनैवान्वेतिव्याख्यानात् ।

अश्मन्तम् । न । अशुभे । चुल्ल्याम् । मरणे । अनवधौ । क्षेत्रे । अश्मनोप्यन्तोऽत्र । शकन्ध्वादिः ।

अश्मन्तकः । पुं । न । उद्दाने । चुल्ल्याम् । मल्लिकाच्छदने । दीपाधाराच्छादने

। पुं । तृणविशेषे । अस्फोटके ॥ द्र
व्यान्तरे । आवुडेति प्रसिद्धे । इन्दुके ।
कुराख्याम् । अम्लपत्रे । कोविदारस
दृशे ॥

अश्मपुष्पम् । न । शैलेये । कालानुसा
र्य्ये । शिलाजतुनि ॥ अश्मनःपुष्पमिव ॥

अश्मभाण्डम् । न । लौहभाण्डे । इमाम
इस्तेतिख्याते ॥

अश्मभित् । पुं । अश्मभेदे । पाषाणभे-
दे । त्रि । पाषाणभेदके । अश्मानं
भिनत्ति । भिदिर्० क्विप् तुक् ॥

अश्मभेदः । पुं । पाषाणभेदे । गुणास्तु
अश्मभेदोहिमस्तिक्तः कषायोवस्ति-
शोधनः । भेदनोहन्तिदोषार्शोगुल्म
कृच्छ्राश्महृद्रुजः । योनिरोगान् प्रमे
हांस्स्ललीहशूलव्रणानिचेति ।

अश्मरः । पुं । पाषाणजाते । प्रस्तर
सम्बन्धिनि ।

अश्मरी । स्त्री । मूत्रकृच्छ्रे । अश्मानंरा
ति । रादाने । आतोनुपेतिकः । गौ
रादिः ।

अश्मरीघ्नः । पुं । वरुणद्रौ ॥ अश्मरींह
न्ति । हन० । हन्तेरमनुष्यकर्तृके
चेतिटक् ।

अश्मरीहरः । पुं । देवधान्ये ।

अश्मसारः । पुं । न । लौहे । अश्मनः
सारः ॥

अश्मीरः । पुं । न । अश्मरीरोगे ।

अश्मोत्थम् । न । शिलाजतुनि ॥

अश्यमानः । त्रि । भुज्यमाने ॥

अश्रम् । न । नेत्राम्बुनि । अश्नुते कण्ठम्
अशूव्याप्तौ । अन्यत्रापीतिरक् ॥

अश्रद्धानः । त्रि । श्रद्धाहीने । पापका
रिणि । असुरसम्पदमारूढे । गुरुवे
दान्तवाक्यार्थे इदमेवंनभवत्येवेति-
विपर्ययरूपानास्तिक्यवुद्धि रश्रद्धा त
इति ।

अश्रान्तम् । न । सन्तते । त्रि । अश्रमे ।
श्रमुतपसिखेदेच । भावेक्तः । अनुना
सिकस्येतिदीर्घः । अविद्यमानंश्रान्त
मत्र । क्रियाविशेषणत्वेक्लीवत्वम् ।
द्रव्यविशेषणे तुत्रिलिङ्गम् ।

अश्रिः । स्त्री । कोण्याम् । खड्गाद्यग्रभागे
। गृहादेःकोणे । अश्नातिअश्नुतेवा ।
अशभोजने अशूव्याप्तौवा । वह्व्या
दिः । आश्रीयतेप्रहारार्थम् । आङ्
श्रिहनिभ्यांह्रस्वश्चेतीण् सचडित् ।
डित्वाट्टिलोपआङोह्रस्वश्च ।

अश्रु । न । नेत्रजले । अश्नुते कण्ठम् ।
अशूव्याप्तौ । अश्वादयश्चेति क्रन्प्रत्य
यान्तंसाधु । नञ्पूर्वाच्छ्रयतेर्डुर्वा ।
नश्रूयते इतिविग्रहः ।

अश्रुतः । त्रि । मूर्खे । अकृतश्रवणे । अ
नाकर्णिते ।

अश्लीलम् । न । अश्लीके । श्रीमे । रेफ स्यलकार: ॥

अश्लीलम् । न । ग्राम्यगन्धि । भण्डादि वचने ॥ श्रियंराति । आलोमपेतिक: । तद्भिन्नम् । कपिलकादी नामुपसङ्ख्यानमितिलत्वम् । श्रीश्रोभानस्या: सिध्मादित्वाल्लच् । अश्लीलंतदमङ्गलजुगुप्साव्रीडर्थीकरम् ॥

अश्लेषा । स्त्री । नवमनक्षत्रे । तत्रजातस्यफलंयथा । वृथाटनःस्यादतिदुष्टचेताः कष्टप्रदश्चापिदृथाजनानाम् । सर्पेसदर्पोहिशठार्पितार्थः कन्दर्पसन्तप्तमनामनुष्यइति । चि । श्लेषयुन्ये ॥

अश्लेषाभव: । पुं । केतुग्रहे । अश्लेषायां भवोयस्य ।

अश्लेषाभू: । पुं । केतुग्रहे ।

अश्व: । पुं । तुरगे । अश्वमांसगुणा यथा । अश्वमांसंतुलवणं वह्निकृत्कफपित्तलम् । वातघ्नंबृंहणंबल्यंचक्षुष्यंमधुरंलघु ॥ इति । इगंनेमध्यगुरु ॥ संज्ञायाम् ॥ पुं । सप्ताङ्के । पुंजातिभेदे । यथा । कामुकतनुलघुवपुर्धृष्टोमिथ्याचारश्चनिर्भय: । व्दादशाङ्गुलमेढ्रश्च दरिद्रश्चयोमत: इत्यस्य लक्षणम् ॥ अश्नुते । अशूव्याप्तौसंघातेच । अशूप्रुषिलटीतिक्वन् ।

अश्वकन्दिका । स्त्री । अश्वगन्धायाम् ।

अश्वकर्ण: । पुं । सालवृक्षे । सर्जइतिख्याते ॥ अश्वकर्णइवपत्रमस्य । अश्वकर्ण: कषाय: स्यात्स्वेदकफकृमीन् । व्रणविद्रधिवाधिर्ययोनिकर्णगदान्हरेत् ।

अश्वकर्णक: । पुं । शालवृक्षे । अरत्नद्रुमे ॥

अश्विनी । स्त्री । अश्विनीनक्षत्रे ।

अश्वखरज: । पुं । खेसरे । खच्चर इति भाषाप्रसिद्धे ॥

अश्वखुर: । पुं । नखीतिख्याते गन्धद्रव्ये ।

अश्वखुरा । स्त्री । अपराजितायाम् ।

अश्वगन्धा । स्त्री । वराहकर्ण्याम् । असगन्धइतिख्यातौषधौ ॥ अश्वगन्धानिलश्लेष्मश्वित्रशोथक्षयापहा । बल्या रसायनीतिक्ता कषायोष्णातिशुक्रला ॥

अश्वगन्धिका स्त्री । । अश्वगन्धायाम् । अश्वगन्धैव । स्वार्थेक: ॥

अश्वगोयुगम् । न । अश्वयुग्मे ॥ द्वावश्वौ । द्वित्वेगोयुगच् ॥

अश्वगोष्ठम् । न । मन्दुरायाम् ॥ अश्वानांस्थानम् । गोष्ठजादय:स्थानादिषुपशुनामभ्य इतिगोष्ठच् प्रत्यय: ।

अश्वग्रीव: । पुं । विष्णुद्वेष्टर्यसुरविशेषे ।

अश्वघ्न: । पुं । करवीरे ॥ अश्वंहन्ति । हन० । अमनुष्यकर्तृके चेतिटक् । गमहनेत्युपधालोप: । कुत्वम् ॥ चि

। वृषभे ।

अश्वतरः । पुं । गन्धर्वविशेषे । नागभेदे ॥ वेगसरे । गर्द्दभेनाश्वायामुत्पन्ने । घोटकाद्गर्द्दभीजाते । तनुरश्वः । वत्सोक्षाश्वर्षभेभ्यस्तनुत्वइति ष्टरच् ॥ अश्वेनाश्वायामुत्पन्नोऽश्वः अश्वस्त्वजातिः तत्सहचरितस्योक्तधर्मस्य तनुत्वमन्यपितृकत्वात् । ङीषि । अश्वतरी ॥

अश्वत्थः । पुं । पिप्पलद्रौ । वृक्षादीनां मध्ये भगवद्विभूतौ ॥ गर्द्दभाण्डे । प्लक्षे । पार्श्वपिप्पले । अश्वत्थं जलमस्यास्ति । मूले सिक्तत्वात् । अर्शआद्यच् । अश्वत्थवत् कामकर्मवातेरितनित्यप्रचलितस्वभावत्वात् आशुविनाशित्वेन श्वोपिस्थास्यतीतिविश्वासानर्हत्वाच्च मायामयेसंसारवृक्षे ॥ शाल्मलिवटाद्यपेक्षयान श्वश्चिरं तिष्ठति अश्वइवतिष्ठतिवा । ष्ठागतिनिवृत्तौ । पृषोदरादित्वात्पूर्वोत्तरपदान्तयोःसकारयोस्तकारौ । सुपिस्थइतिकः । अस्थिररूपोयंसंसारवृक्षः । न । जले ।

अश्वत्थकम् । न । क्षुपविशेषे । अश्वत्थस्यफलमश्वत्थः । तद्युक्तःकालोप्यश्वत्थः । अश्वत्थे अश्वत्थफलोत्पत्तिकाले देयमृणम् । कलाप्यश्वत्थयवबुसाद्वुन् ।

अश्वत्थफला । स्त्री । हवुषायाम् ॥

अश्वत्थभेदः । पुं । स्थालीवृक्षे ।

अश्वत्थव्रतम् । न । कन्यानांबालवैधव्यदोषनिवारके व्रतविशेषे ॥ यथा । सुस्नाताचित्रवस्त्राढ्या कन्यापितृगृहावधिः । करकेणाम्बुपूर्णेनसिञ्चेत्संप्रतिवासरम् । चैत्रेचाश्विनमासेचतृतीयासितपक्षतः । यावत्कृष्णातृतीयास्यान्मासमेकंयथाविधि । ब्राह्मणान् भोजयेन्नित्यंपूजनंचसमाचरेत् । तदाशिषामुयात्कन्यासौभाग्यं चसुखान्वितम् । प्रतिमांपार्वतीशयोर्नवेभाजनेर्च्चयेत् । चन्दनाक्षतदूर्वाद्यैर्बिल्वपत्रैर्यथाविधि । उपचारैर्यथाभक्त्यानैवेद्यैःप्रतिवासरम् । एवंव्रतप्रभावेनबालवैधव्यनिवृत्तिः । जायतेकन्यकानांचततःपाणिग्रहक्रियेति ।

अश्वत्था । स्त्री । पूर्णिमातिथौ ॥ वृषपौर्णमास्याम् ।

अश्वत्थामा । पुं । द्रोणाचार्यपुत्रे । कृपीसूनौ ॥ अश्वस्येव स्थामबलंयस्य । पृषोदरादित्वात् सस्यतः । यद्वा । अश्वइवतिष्ठति । ष्ठा॰ । आतोमनिन् ।

अश्वत्थिका । स्त्री । } वृक्षविशेषे । पवित्रायाम् । पिप्पलिकायाम् ।
अश्वत्थी । स्त्री । }

अश्वनायः । पुं । अश्वपाले । अश्वान्न यति । कर्मण्यण् ।

अश्वपतिः । पुं । रामायणप्रसिद्धे नृप तौ । कैकेये ॥

अश्वपालः । पुं । घोटकरक्षके ।

अश्वपुच्छी । स्त्री । माषपर्ण्याम् ॥

अश्ववालः । पुं । काशे । अश्वस्यवाले ।

अश्वमहिषिका । स्त्री । अश्वमहिषयोः स्वाभाविकेवैरे । अश्वमहिषयोर्वैर म् । द्वन्द्वाद्वुन्वैरमैथुनिकयोः ।

अश्वमारः । पुं । करवीरे ।

अश्वमारकः । पुं । करवीरे ॥ अश्वानां मारकः ।

अश्वमुखः । पुं । किन्नरे । अश्वस्येवमुख मस्य ।

अश्वमुखी । स्त्री । किम्पुरुषयोषिति । अश्वस्येवमुखंयस्याः ।

अश्वमेधः । पुं । यागभेदे । क्रतुराजि ॥

अश्वमेधीयः । पुं । ययौ । अश्वमेधा र्थे । अश्वमेधायहितः । अश्वमेधा च्छश्च ॥ अश्वलक्षणंयथा । गोक्षीरस मवर्णश्चकुन्देन्दुहिमसन्निभम् । पीत पुच्छंश्यामकर्णंसर्वतोगतिमत्तमम् । श्यामंवापिमहीपालयज्ञेस्मिंस्तुर गंविदुरिति ॥

अश्वयुग् । पुं । आश्विने । स्त्री । अश्वि नीनक्षत्रे । अश्वयुनक्तिरूपेणानुकरो ति । युजिर्योगे । सत्सूद्विषेतिक्विप् । षि । अश्वयुजिजाते । जातार्थप्रत्य यस्यबालुक् । पक्षे आश्वयुजः ।

अश्वयुजः । पुं । आश्विने । अश्वयुजायु क्तापौर्णमास्यस्मिन्नस्ति । संज्ञापूर्व कत्वाद्वृद्ध्यभावः ॥

अश्वरोधकः । पुं । करवीरवृक्षे ।

अश्वलः । पुं । वेदप्रसिद्धे ऋषिभेदे ।

अश्वलक्षणम् । न । घोटकलक्षणे ।

अश्वलोमा । स्त्री । सर्पविशेषे । हला हले । अश्वलालेत्यपिपाठः । इति त्रिकाण्डशेषः ।

अश्ववक्त्रः । पुं । किन्नरे । अश्वस्येववक्त्र मस्य ।

अश्ववारः । पुं । सादिनि । असवारइ तिख्याते । अश्वंवारयति । कर्म० । अण् ।

अश्ववारणः । पुं । गवये । गोसदृशे ॥ इतिहेमचन्द्रः ।

अश्ववाहः । पुं । सादिनि ।

अश्ववित् । पुं । नले । दमयन्तीपतौ । त्रि । अश्वविद्यान्विते ॥

अश्ववैद्यः । पुं । घोटकचिकित्सके । शा लिहोत्रिणि । सालोतरीतिख्याते ।

अश्वशाला । स्त्री । मन्दुरायाम् ।

अश्वशृगालिका । स्त्री । अश्वशृगालवैरे । अश्वशृगालयोर्वैरम् । द्वन्द्वाद्वुन् वै

रमैथुनिकयोरितिवुन् ।

अश्वपञ्चम् । न । अश्वानांषटके । अश्वानांषट्त्वम् । षट्त्वेषञ्चवत् ।

अश्वसेनम्रुपनन्दनः । पुं । सनत्कुमारे । इतिहेमचन्द्रः ।

अश्वस्तनः । पुं । हस्तिविशेषे ।

अश्वस्तनिकः । पुं । एकदिननिर्वाह्योचिताने । श्वोभवंश्वस्तनंभक्तंतदस्यास्तीति मत्वर्थीयष्ठन् । नञ् समासः ।

अश्वा । स्त्री । वडवायाम् ॥ अजादिषु पाठाट्टाप् ॥

अश्वाद्यः । पुं । देवसर्षपे ।

अश्वाभिधानी । स्त्री । अश्वबन्धनरज्ज्वाम ।

अश्वारिः । पुं । महिषे । अश्वस्यअरिः ।

अश्वारूढः । पुं । अश्वारोहे ।

अश्वारूढा । स्त्री । देवीविशेषे ।

अश्वारोहः । पुं । अश्ववारके । सादिनि । त्रि । अश्ववाहके । अश्वमारोहति । बहबीजजन्मनि प्रादुर्भावेच । कर्मण्यण् ।

अश्वारोहा । स्त्री । अश्वगन्धायाम् ।

अश्वावरोहकः । पुं । अश्वगन्धायाम् ॥

अश्विनौ । पुं । द्विवचनान्तः । अश्विनीकुमारयोः ॥

अश्विनौ । पुं । स्वर्वैद्ययोः । अश्विनीकुमारयोः ॥ तौचावियुक्तस्वभावौ । प्रशस्ता: अश्वा:सन्त्यनयोः । इनिः । प्रदा । अश्विन्यांजातौ सन्धिवेले पयवो नक्षत्रेभ्यो बहुलमितिलुकि लुकतद्धितलुकीतिङीपोलुक् । विशिष्टाश्वयोः । यथा । कपोलयोस्तावकयोर्विद्येते वाजिनोर्यदि । तावश्विनावितिप्रोक्तौ राज्यवृद्धिकरौपराविति ॥

अश्विनी । स्त्री । अश्वयुजि । प्रथमनक्षत्रे । अस्यांजातस्यफलं यथा । सदैवदेवाभ्युदितो विनीतः सत्यान्वितः प्राप्तसमस्तसम्पत् । योषाविभूषात्मजभूषितोयःस्यादश्विनीजन्मनिमानवस्येतिकोष्ठीप्रदीपः । अश्वः अश्वरूपमस्त्यस्याः । इनिः । ङीप् ।

अश्विनीकुमारौ । पुं । अश्विनीसुतयोः । अश्वीभूतसंज्ञानामसूर्यपत्न्याःयमजपुत्रौतौचदेवचिकित्सकौ । नित्यद्विवचनान्तोयम् ।

आश्विनीपुत्रौ । पुं । स्वर्वैद्ययोः ।

अश्विनीसुतौ । पुं । नासत्ययोः । स्वर्वैद्ययोः । वडवारूपिण्यो संज्ञायाअश्वरूपयोगादश्विनी । अश्विन्याःसुतौ ॥

अश्वीयम् । न । आश्वे । वाजिसङ्घे । त्रि । अश्वहिते । अश्वानांसमूहः । केशाश्वाभ्यांयञ्छावन्यतरस्यामितिछः । अश्वेभ्योहितंवा । अपपादिभ्यश्छः ।

अश्वेङ्गितम् । न । घोटकेङ्गिते ।

अश्वोरसम् । न । मुख्याश्वे । अश्वानामुर इव । अग्राख्यायामुरसइतिटच् ।

अश्व्यम् । त्रि । अश्वीये । अश्वेभ्योहितम् । पच्चेयत् ।

अषडक्षीणः । त्रि । तृतीयाद्यमंचे । द्वाभ्यामेवकृतेमंचे ॥ अविद्यमानानि षडक्षीण्यत्र । अषडक्षाशितङ्ग्वलङ्कर्मेतिखः स्वार्थे । अक्षिशब्दोऽत्राचक्षिण्येवर्त्तते । बहुव्रीहौसक्थ्यक्ष्णोरितिषच् ।

अषाढः । पुं । मासभेदे । पालाशदण्डे । त्रि । अषाढायांजाते । श्रविष्ठाफल्गुनीत्यत्रवालुक् । लुकतद्धितलुकि । स्त्रियाम् फल्गुन्यषाढाभ्यांमित्यम् । टाप् । अषाढा ॥

अषाढकः । पुं । अषाढार्थे ।

अषाढा । स्त्री । पूर्वाषाढायाम् । उत्तराषाढायाम् । अषाढायामुत्पन्नायाम् ।

अष्टकम् । न । पाणिनेःसूत्रपाठे ॥ अष्टावध्यायाः परिमाणमस्य । सङ्ख्यायाअतिशदन्तायाःकन् । त्रि । अष्टसङ्ख्यायाम् । अष्टसङ्ख्यकाध्यायादिपरिमितेग्रन्थे । अष्टसङ्ख्याविशिष्टे । यथा गङ्गाष्टकंनामाष्टकमिति ।

अष्टकर्णः । पुं । ब्रह्मणि ॥ अष्टौकर्णाःअस्य ।

अष्टकर्मा । पुं । अष्टगतिकेनृपे । अष्टौकर्माण्यस्य । तानिचोक्तान्युशनसायथा । आदानेचविसर्गेचतथाप्रैषनिषेधयोः । पञ्चमेचार्थवचनेव्यवहारस्यचेक्षणे । दण्डशुद्ध्योः सदायुक्तस्तेनाष्टगतिकोनृपः । अष्टकर्मादिवंयातिराजाशक्राभिपूजितइतिमनुः । तत्रादानंकरादीनाम् । विसर्गोभृत्यादिभ्योधनदानम् । प्रैषोऽमात्यादीनांदृष्टादृष्टानुष्ठानेषु । निषेधोदृष्टादृष्टविरुद्धक्रियासु । अर्थवचनंकार्यसन्देहेराजाज्ञयैवतत्रनियमात् । व्यवहारेक्षणं प्रजानामृणादिविप्रतिपत्तौ । दण्डःपराजितानांशास्त्रोक्तधनग्रहणम् । शुद्धिःपापेकर्मणि जाते तत्प्रायश्चित्तसम्पादनमितिकुल्लूकभट्टाः । मेधातिथिस्तु । अकृतारम्भः । कृतानुष्ठानम् । अनुष्ठितविशेषणम् । कर्मफलसङ्ग्रहः । तथासामदानभेददण्डाः । एतदष्टविधंकर्मेत्याहु । अथवावणिक्पथः । उदकसेतुबन्धनम् । दुर्गकरणम् । कृतस्य संस्कारनिर्णयः । हस्तिबन्धनम् । खनिखननम् । सैन्यनिवेशनम् । दारुवनच्छेदनञ्चेत्याहु ।

अष्टका । स्त्री । सप्तम्यादिदिनत्रये । यथा । अष्टकासुसमाख्यातासप्तम्यादि

दिनचयम् । शास्त्रं तवनाधीयीत व्रत चर्य्यं विवर्जयेदिति ब्रह्माण्डपुराणम् ॥ श्राद्धभेदे । पौषादिमासत्रयाणां कृष्णाष्टम्याम् ॥ यथा । तिस्रोऽष्टका भवन्ति पूपाष्टका मांसाष्टका शाकाष्टका चेति । तत्रापूपस्यानुरूपतया तस्यैव तृप्तिजनकतया मुख्यत्वम् । मांसशाकयोस्तूपकरणत्वेनान्वयो यथासङ्ख्यमष्टकाद्वये मुख्यद्रव्यमोदनादिकमेव । अग्निन्ति पितरोऽस्याम् । अश भोजने । इष्यशिभ्यांतकन् । अष्टका पितृदेवत्ये ॥

अष्टकाङ्गम् । न । नयपीठम् । पाशारङ्क इति गौडभाषा प्रसिद्धे । इति त्रिकाण्डशेषः ।

अष्टौ । त्रि । सङ्ख्याविशेषे ८ । सङ्ख्येये । अश्नुते । अशूव्याप्तौ सङ्घाते च । सप्यशूभ्यांतुट्चेति कनिन् ।

अष्टपात् । पुं । शरभे । लूतायाम् ।

अष्टपादः । पुं । किन्तनौ । ऊर्णनाभविशेषे । शरभे ।

अष्टपादिका । स्त्री । चापरमाली इति गौडभाषाप्रसिद्धे लताविशेषे ।

अष्टमः । त्रि । अष्टानाम् पूरणे । तस्यपूरणेडट् । नान्तादसङ्ख्यादेर्मट् । पञ्चमांशभागे । मानपञ्चाङ्गयोः कन्

लुकौ चेति जस्य पनीषाणुक् ।

अष्टमङ्गलः । पुं । श्वेतोरःखुरपुच्छास्यपृष्ठकेशतुरङ्गमे । न । द्रव्यान्तरे ॥ तद्यथा । मृगराजोवृषोनागः कलशोव्यजनंतथा । वैजयन्ती तथा भेरी दीपइत्यष्टमङ्गलमिति ॥ अन्यच्च । लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणोगौर्हुताशनः । हिरण्यंसर्पिरादित्यआपोराजा तथाष्टम इतिस्मृतिः । अष्टौमङ्गलानियस्य । अष्टानांमङ्गलानांसमाहारः ॥ अष्टौषधयुक्तपक्वघृते । यथा वभावमिश्रः । वचाकुष्ठंतथाब्राह्मीसिद्धार्थकमथापिच । सारिवासैन्धवञ्चैवं पिप्पलीघृतमष्टमम् । सिद्धंघृतमिदंमेध्यंपिवेत् प्रातर्दिनेदिने । दृढस्मृतिः कुमाराणांपिवतामष्टमङ्गलमिति ॥

अष्टमानम् । न । कुडवपरिमाणे । शरावार्द्धे ।

अष्टमिका । स्त्री । शुक्तिपरिमाणे । चतुस्तोलके । इतिवैद्यकपरिभाषा ।

अष्टमी । स्त्री । चीरकाकोल्याम् । तिथिविशेषे । अष्टानांपूरणी । ङीप् । अथजातस्यफलन्तु । भूपालतः प्राप्तधनः कृशाङ्गः सुखीकृपालुर्युवतिप्रियश्च । चतुष्पदाश्वाद्यमधान्ययुक्तः स्यादष्टमीजोमनुजः सुधीर इति ।

अष्टमूर्त्तिः । पुं । शिवे । अष्टौमूर्त्तं

योयस्य । यथा । पृथिवीसलिलंतेजो वायुराकाशमेवच । सूर्याचन्द्रमसौ याजिरष्टौशङ्करमूर्त्तयइतियादवः । क्षितिमूर्त्तिः सर्वः १। जलमूर्त्तिर्भवः २। अग्निमूर्त्तीरुद्रः ३। वायुमूर्त्तिरुग्रः ४। आकाशमूर्त्तिर्भीमः ५ । यजमानमूर्त्तिः पशुपतिः ६। चन्द्रमूर्त्तिर्महादेवः ७। सूर्यमूर्त्तिरीशानः ८ । एताःशरभमूर्त्तिशिवस्याष्ट पाहाः ।

अष्टरवः । पुं । मेघनादे ।

अष्टलोहकम् । न । अष्टसङ्ख्यकधातुविशेषे । यथा । सुवर्णम् । रजतम् । ताम्रम् । वङ्गः । सीसम् । कान्तलोहम् । मुण्डलोहम् । तीक्ष्णलोहमिति ।

अष्टवर्गः । पुं । आह्निकादिवर्गेषु । जीवकादौ । यथा । जीवकर्षभकौमेदे काकोल्यावृद्धिवृद्धिके । अष्टवर्गोऽष्टभिर्द्रव्यैः कथितश्चरकादिभिः । अष्टवर्गो हिमः स्वादुर्बृंहणः शुक्रलोगुरुः । भग्नसन्धानकृत्तन्यबलासबलवर्द्धनः । वातपित्तास्रतृट्दाहज्वरमेहक्षयप्रणुत् । राज्ञामप्यष्टवर्गस्तु यतोयमतिदुर्लभः । तस्मादस्यप्रतिनिधिंगृह्णीयात्तद्गुणंभिषक् । मेदाजीवककाकोली ऋद्धिद्वन्द्वेपिचासति । वरीविदार्यश्वगन्धावाराहीश्चक्रमात्क्षिपेत् । मेदामहामेदास्थाने शतावरीमूलम् । जीवकर्षभयोः स्थानेविदारीमूलम् । काकोलीक्षीरकाकोल्योः स्थाने अश्वगन्धामूलम् । ऋद्धिवृद्ध्योः स्थानेवाराहीकन्दंक्षिपेत ॥ नीतिवेदिनांवर्गान्तरे । कृषिर्वणिक्पथोदुर्गं सेतुःकुञ्जरबन्धनम् । खन्याकरबलादानंसैन्यानांचनिवेशनम् । अष्टवर्गमिमंसाधुः स्वंवृद्धोपिवर्द्धयेदिति । अष्टानांवर्गः ।

अष्टश्रवाः । पुं । ब्रह्मणि । द्रुहिणे ॥

अष्टाकपालः । पुं । हविर्भेदे ॥ यथाष्टसुकपालेषुपुरोडाशः पच्यते-तस्मिन्यज्ञे ॥ अष्टसुकपालेषुसंस्कृतः । संस्कृतंभक्ष्याइत्यणोद्विगोर्लुगनपत्यइतिलुक् । अष्टनः कपालेह विषीत्यात्वम् ।

अष्टाङ्गः । पुं । योगभेदे । अष्टअङ्गान्यस्य । तानियथा । यमंनियममासनं प्राणायामौततःपरम् । प्रत्याहारंधारणाञ्चध्यानंसार्द्धंसमाधिना । अष्टाङ्गान्याहुरेतानियोगिनांयोगसाधने इति । पाशके । प्रणतिविशेषे । यथा । जानुभ्याञ्चतथा पद्भ्यांपाणिभ्यामुरसाधिया । शिरसावचसादृष्ट्याप्रणामोऽष्टाङ्गईरित इति ।

अष्टाङ्गार्घ्यः। पुं। अष्टद्रव्यघटितपूजोपकरणविशेषे। यथा। आपःक्षीरं कुशाग्राणि दधिसर्पिः सतण्डुलाः। यवाःसिद्धार्थकाश्चैव अष्टाङ्गार्घ्यः प्रकीर्त्तितइतितन्त्रशास्त्रम्। अपिच। आपःक्षीरं कुशाग्राणि घृतंमधु तथादधि। रक्तानि करवीराणि तथारक्तंचचन्दनम्। अष्टाङ्ग एष अर्घ्यो वै भानवेपरिकीर्त्तितः॥ इतिकाशीखण्डम्।

अष्टादशः। त्रि। अष्टादशानां पूरणे। डट्।

अष्टादश। त्रि। साष्टदशसङ्ख्यायाम्। साष्टदशसङ्ख्येये। अष्टौचदशच अष्टाधिकादशेतिवा। अष्टनःसङ्ख्यायामित्यात्वम्। अथाष्टादशवाचकाः शब्दाः॥ द्वीपः। विद्या। पुराणम्। स्मृतिः। धान्यमिति।

अष्टादशाङ्गः। पुं। अष्टादशद्रव्यात्मके पाचने।

अष्टापदः। पुं। न। कनके। शारीणां खेलनाधारपट्टे। शारीफलके। पुं। शरभे। मर्कटे। मकडी इति भाषाप्रसिद्धे। कृमौ। कैलाशे। कीलके॥ पंक्तौ पंक्तौ अष्टौ पदान्यस्य॥ अष्टौधातवः पदान्यस्य॥ अष्टसुधातुषुपदं प्रतिष्ठाअस्येतिवा। अष्टनः संज्ञायामितिदीर्घः। यद्वा। अष्टानामपदम्।

अष्टापदी। स्त्री। चन्द्रमल्लयाम्। लूतायाम्। अष्टौपादाः अस्याः। सङ्ख्यासुपूर्वस्येति पादस्यान्तलोपे पादोऽन्यतरस्यामिति ङीपिपादःपत्।

अष्टापाद्यम्। न। अष्टभिर्गुणिते। अष्टभिरापाद्यते गम्यते इतितत्।

अष्टारचक्रवान्। पुं। मञ्जुघोषे। जिनविशेषे। अष्टारचक्रमस्त्यस्यमतुप्।

अष्टिः। स्त्री। बीजे। अस्यते भूमौक्षिप्यते। असु०। कर्मणिक्तिन्। पृषोदरादिः। षोडशाक्षरायांवृत्तौ। षोडशाङ्के।

अष्टिदिनान्तरालः। त्रि। षोडशदिवसाभ्यन्तरे।

अष्ठीला। स्त्री। नाभेरधोभागेपाषाणपिण्डकावद्वातव्याधिविशेषे। यथा। आध्मापयन् वस्तिगुदंरुद्ध्वावातश्चलोन्नताम्। कुर्यात्तीव्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीमिति॥ वर्त्तुलेपाषाणखण्डे।

अष्ठीवत्। न। पुं। जानुनि। ऊरुपर्वणि। अतिशयितमस्थियस्मिन्। मतुप्। आसन्दीवदष्ठीवदितिनिपातनादस्थिशब्दस्याष्ठीभावः। जानूर्वोः सन्धौ।

असः। पुं। अन्यस्मिन्। सन्मवति। न

असमासः ।

असंवीतः । त्रि । नग्ने ।

असंस्कृतः । त्रि । गर्भाधानादिसंस्कारविधुरे । अनुपनीते । नसंस्कृतः । सुसंस्कृतःसुतः श्रेष्ठोनापरोवेदपारगः ।

असंस्तुतः । त्रि । अपरिचिते । नसंस्तुतः ।

असंहतः । पुं । सेनानांपृथग्वृत्तिमति व्यूहे । असंलग्ने ।

असकृत् । अ । पौनःपुन्ये ॥ अनेकशः । नसकृत् ।

असक्तः । त्रि । सर्वसम्बन्धशून्ये ॥ फलाभिलाषरहिते कर्त्तृत्वाभिमानहीने यथाविधिकर्मकर्त्तरि ॥ नसक्तः ।

असक्तबुद्धिः । त्रि । अहमेषां ममैतेइत्यभिष्वङ्गरहितबुद्धौ । असक्ताबुद्धिर्यस्य ।

असक्तात्मा । त्रि । अनासक्तचित्ते । तृष्णाशून्यतयाविरक्ते । असक्तःआत्मा अन्तःकरणंयस्य ।

असक्तिः । स्त्री । सङ्गाभावे । ममेदमित्येतावन्मात्रेणप्रीतिः सक्तिस्तदभावे । नसक्तिः ।

असङ्गस्पृक्‌ः । त्रि । स्थिरमतौ । नसङ्गस्पृक्‌ः ।

असङ्कुलः । पुं । गजाद्यध्वनि । विस्तृतेपथि । नसङ्कुलः ।

असङ्क्रान्तमासः । पुं । मलमासे । मलिम्लुचे ॥

असङ्ख्यः । त्रि । युद्धवर्जिते । परार्द्धातीतसंख्यायाम् ॥ सामान्यतोगणनारहिते ।

असङ्ख्यातः । त्रि । अकृतसङ्ख्ये । अनगिने इतिभाषा ।

असङ्ख्येयः । पुं । परमात्मनि । हरौ ॥ यस्मिन्संख्याईनामरूपभेदादिनविद्यते । ३ । सङ्ख्यातुमयोग्ये ।

असङ्गः । पुं । सङ्गविरोधिनि । पुत्रवित्तलोकैषणात्यागरूपे वैराग्ये ॥ निर्विषये चिदात्मनि ॥ यथा । आत्मस्थामप्यविद्यांतामसङ्गोनस्पृशत्यसौ । दृष्टुातपौवियद्विष्णावस्पृश्यौ वियता यथा । नदह्याक्लिद्यते व्योमनातपेनापिशुष्यति । अविद्यया विद्यया वानात्मन्यतिशयस्तथेति । त्रि । रागाभाववति । आशायात् निराशत्वमभावंशातुभावना । अमनस्त्वंमनोयातुतवासङ्ग नजीवतः ॥ नास्तिसङ्गो यस्य ।

असङ्गतः । त्रि । अनुचिते । नसङ्गतः । सङ्गतिरहिते । नासङ्गतंप्रयुञ्जीत ॥

असङ्गतिः । स्त्री । अर्थालङ्कारभेदे । यथा । भिन्नदेशतयात्यन्तंकार्यकारणभूतयोः । युगपद्धर्मयोर्यत्रख्यातिः

साध्यादसङ्गतिः । इदयदेशं कारणं त
द्देशमेव कार्यमुत्पद्यमानं दृष्टम् । य
था धूमादि । यत्र हेतुफलरूपयोरपि
धर्मयोः केनाप्यतिशयेन नानादेश
तयायुगपदवभासनं तातयोःस्वभा-
वोत्पन्न परस्परसङ्गतित्यागादसङ्ग-
तिः । उदाहरणम् । अस्ये च व्रणो त
स्य च वेदना भव इतं जयो जातमसम्
। दन्तक्षतं कपोले वधूष वेदनासप
त्नीनाम् । अन्यसंस्कृतं यथा । यस्यै
व व्रणस्तस्यैव वेदनाभवतितज्जनो ऽ
लीकम् । दन्तक्षतं कपोले वध्वा वेद
नासपत्नीनामिति ।

असत् । पुं । इन्द्रे । इति त्रिकाण्डशेषः ॥
त्रि । निरुपाख्ये । प्रागभावप्रतियोगि
नि । निःस्वरूपे । यत्सम्बन्धितयाय
द्विद्यते तत्तत्रासदित्युच्यते । नि
षेधमुखेन प्रतीयमाने अभावत्वाश्र-
ये । अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं
च यत् । असदित्युच्यते पार्थ न च तत्
प्रेत्य नो इह । यत्कालतो देशतो व
स्तुतो वा परिच्छिन्नं तदसत् । अवि
द्यमाने । प्रत्यक्षाद्यगोचरत्वादसत्
स्वभावमिव वर्तमाने कारणात्मनि ॥
असज्जने । दुराचारा दुर्विचेष्टा दु
ष्प्रज्ञाः प्रियसाहसाः । असन्तस्त्विति
विख्याताः सन्तश्चाचारलक्षणाः ॥

सदत्यंताभावोऽसदिति बौद्धाः ।

असती । स्त्री । व्यभिचारिण्याम् । कु
लटायाम् । सत्याभिन्ना ।

असतीसुतः । पुं । स्त्री । कौलटेरे । अ
सत्यासुतः ।

असत्कृतः । त्रि । परिभूते । प्रियभाषण
पादप्रक्षालनपूजादिसत्कारशून्ये ।
नसत्कृतः ।

असत्पथः । पुं । मन्दमार्गे । कुपथे । न
सत्पथः ।

असत्यम् । त्रि । मिथ्यायाम् । सत्यंना
स्तियत्रतस्मिन् ॥

असदध्येता । त्रि । कुपाठिनि । अजपे ।
असदध्ययनशालिनि ॥ नसदध्येता ॥

असद्ग्रहः । पुं । दुष्टग्रहे । नसद्ग्रहः । अ
सट्टौ । बालकौकाष्ठ इतिभाषा ।

असद्योनिः । स्त्री । पश्वादियोनौ । त
स्यांस्थितामसमनिष्टंफलंभुज्यते । न
सद्योनिः ।

असद्रूपः । त्रि । देहादिप्रपञ्चे । असदा
ध्यमन्वतंरूपं स्वरूपंयस्य ।

असनम् । न । क्षेपणे । पुं । जीवकद्रुमे ।
प्रियसालके । विजयसाराख्ये । अज
कर्णे । महासर्जद्रुमे । अस्यते । अ
सुक्षेपणे । ल्युः ।

असनपर्णी । स्त्री । वातकरञ्जे । शीत
लवातके ।

असम्बद्धः। त्रि। समुद्भूते। पण्डितमान्ये। हसे। रतिलम्पटाधरः। सकृतसम्बाहे। नसम्बद्धः॥

असपत्नः। त्रि। शत्रुवर्जिते॥ नविद्य-तेसपत्नोयस्य॥

असभ्यः। त्रि। सभायामनर्हेस्त्रीवर्ग्यमादौ। सभायामनुपयुक्ते। खले॥

असमः। पुं। बुद्धे। त्रि। विषमे। अतुल्ये। नविद्यते समोयस्य।

असमञ्जसम्। त्रि। अयुक्ते॥ नसमञ्जसम्। पुं। केशिन्यामुत्पन्नेसगरात्मजे॥

असमर्थः। त्रि। सापेक्षे। अशक्ते। दुर्बले। नसमर्थः।

असमवायिकारणम्। न। कार्यकारणयोरन्यतरस्मिन्नेकस्मिन्नर्थे समवेतत्वेसति कारणे। यथातन्तुसंयोगःपटस्य तन्तुरूपंपटरूपस्य। यथावा। परमाणुद्वयसंयोगोद्व्यणुकस्य कपालरूपंच घटरूपस्य। असमवायिकारणन्तु सर्वत्रद्रव्येगुणः गुणेगुणः कर्मच॥ असमवायिच तत्कारणञ्च।

असमानयानकर्मा। पुं। सन्धेः प्रभेदे। मन्त्रत्वमत्रयाहि अहमन्नयास्यामीति साम्प्रतिकोत्तरकालीनफलार्थितयै क्रियते सोऽसमानयानकर्मासन्धि-बोध्यः॥

असमाहितः। त्रि। अनेकाग्रमनसि। विक्षिप्तचित्ते॥ नसमाहितः।

असमीक्ष्यकारी। त्रि। आकस्मे। अविचार्यकर्त्तरि। असमीक्ष्याविचार्यकर्तुंशीलमस्य। सुपोतिणिनिः।

असमेषुः। पुं। अनङ्गे। असमाः इषवोयस्य।

असम्पृक्तः। त्रि। असम्बद्धे। नसंपृक्तः।

असम्प्रज्ञातसमाधिः। पुं। निर्विकल्पकसमाधौ। निवृत्तचेतोव्यापारे यः परमानन्दसाक्षात्कारः सौषुप्तानन्दसाक्षात्कारवत् सोऽसम्प्रज्ञातसमाधिः।

असम्बद्धम्। त्रि। अबद्धे। अनर्थकवाक्ये। नसम्बद्धम्॥

असम्बद्धप्रलापः। पुं। सत्यस्यापिराजदेशपौरवार्त्तादेर्निष्प्रयोजनवर्णने॥ त्रि। तद्वति॥

असम्बाधः। त्रि। अन्योन्यपीडारहिते।

असम्भूतिः। स्त्री। प्रकृतौ। त्रिगुणात्मिकायांमायायां परमेश्वरस्योपाधौ। सम्भवनंसम्भूतिःकार्यम्। तस्याःअन्या॥

असम्भेदः। पुं। अविदारणे। अविनाशे॥ सम्भेदनम्। भिदिरविदारणे। घञ्। नसम्भेदः।

असम्मतम्। त्रि। अग्राह्ये। अनभिप्रेते॥ नसम्मतम्॥

असम्मूढः । त्रि । स्थिरमत्ये । सम्मोहव र्जिते । भ्रान्तिरहिते ॥ नसम्मूढः ।

असम्मोषः । पुं । प्रत्युत्पन्नेषु वाङ्मेषु कर्म्मभेषुवा अव्याकुलतयाविवेकेन प्रवृत्तौ ॥ नसम्मोषः ॥ त्रि । तद्वति ।

असम्प्रज्ञ्वयः । पुं । आयतुरीयांशादधि कव्यये । असमविषयव्यये ।

असवः । पुं । कुकरौधा इतिविश्रुते वृषे ।

असलम् । न । लौहे ॥ अस्त्रमन्त्रवि शेषे ।

असहनः । पुं । स्त्री । शत्रौ ॥ अमर्षणे ।

असाधारणम् । त्रि । तन्मात्रसम्बन्धि नि ॥ साधारणाद्भिन्ने । विशेषे । न्यायमते साध्यव्यापकीभूताभावप्र तियोगिनिहेतौ । यथा । वह्निमान् जलत्वादित्यादि ।

असाधारणत्वम् । न । तदितरावृत्ति त्वेसतितत्त्वतद्वृत्तित्वे ।

असाधारणानैकान्तिकः । पुं । हेत्वाभा सविशेषे । सर्वसपक्षव्यावृत्ते । यथा शब्दोनित्यःशब्दत्वादिति । शब्दत्वं सर्वेभ्योनित्येभ्योव्यावृत्तं शब्दमात्रवृ त्ति ।

असाधुः । त्रि । खले ॥ सहजाह्गत्रम्य दुर्नये परदोषेक्षणदिव्यचक्षुषः । स्वगुणोच्चगिरो मुनिव्रताः परवर्णग्र हणेष्वसाधवः ॥

असाध्यः । त्रि । याप्ये । अप्रतिक्रिये । अ साधनीये । बुद्धिमद्साध्यंनकिञ्चि दितिवात्स्यायनः ॥ नसाध्यः ।

असान्द्रम् । त्रि । विरले । नसान्द्रम् ॥

असाम्प्रतम् । ा । अयुक्ते । यथा । भिन्न त्तिसर्वमर्यादामान्ययाद्यपेक्षते । अस्पदग्धोदरस्यार्थेकोनकुर्यादसा म्प्रतमिति । नसाम्प्रतम् ।

असारः । पुं । एरण्डवृक्षे । न । अगुरु णि ॥ त्रि । फल्गौ । निस्सारे । नसारो ऽत्र ।

असि ।ा । त्वमित्यर्थे । यथा वेत्थसि । वाक्यालङ्कारे ।

असिः । पुं । निस्त्रिंशे । खड्गे ॥ स्त्री । न दीभेदे । अस्यते असुक्षेपणे । अ सतिवा असदीप्तौ । सर्वधातुभ्यइन् । खनिकष्यज्यसिवसीत्यादिनावर्णा ।

असिकम् । न । अधरचिबुकयोर्मध्य भागे । इतिहेमचन्द्रः ।

असिकारः । पुं । खड्गकारिणि । असिं करोति । कृञ्० । कर्मण्यण् ॥

असिक्निका । स्त्री । असिकन्याम् । दा स्याम् ॥ यथा । गतोगणस्तूर्णमसि क्निकानामिति ॥

असिक्नी । स्त्री । अन्तःपुरचारि- ण्यांप्रेष्यायाम् । नदीभेदे । सिनोति

। षिञ् बन्धने । अविहृषिभ्यः क्तः । यद्वा । सीयते स्म । क्तः । सिता शुक्लत्वात् तद्भिन्ना । छन्दसि क्रमेकद्दतिवस्य क्नः । नान्तत्वान्ङीप् । नीरिग्ल्याम् ।

असिगण्डः । पुं । क्षुद्रोपधाने ॥ छोटा सिर्काना इति भाषा ।

असितः । पुं । श्यामवर्णे । व्यासशिष्ये ऋषिविशेषे । शनौ ॥ कृष्णपक्षे । न । कासीसे । त्रि ० कृष्णवर्णवति । श्यामले ॥ सितविरुद्धोऽसितः ।

असितफलः । पुं । मधुनारिकेरे ॥

असिता । स्त्री । खञ्जतायाम् । नील्याम् । असितपलितयोः प्रतिषेधात् वर्णादनुदात्तादिति ङीष् तकारस्य नकारादेशश्च न ।

असिताश्मशेखरः । पुं । बुद्धभेदे ।

असितार्चिः । पुं । अनले । असिताश्चिर्ज्वाला अस्य ।

असिताम्बुः । पुं । नीलालौ ।

असितोत्पलम् । न । नीलोत्पले ।

असिदंष्ट्रः । पुं । मकराख्ययादसि ।

असिद्धः । पुं । हेत्वाभासविशेषे । स च त्रिविधः । आश्रयासिद्धः स्वरूपासिद्धः व्याप्यत्वासिद्धश्चेति । त्रि । अपक्के । अस्विन्ने । सिद्धिरहिते ।

असिद्धिः । स्त्री । अनिष्पत्तौ । न्यायमते सा त्रिविधा । यथा । आश्रयासिद्धिः १ यथा । काञ्चनमयपर्वतो वह्निमानित्यादिः । स्वरूपासिद्धिः २ यथा पर्वतः काञ्चनमयवह्निमानित्यादिः । व्याप्यत्वासिद्धिः ३ यथा पर्वतो वह्निमान् ज्वलत्वात् इत्यादिः ।

असिधाराव्रतम् । न । असिधाराव्रतम् अतिदुःसाध्ये व्रतविशेषे । यथा । युवा युवत्या सार्द्धं यन्मुग्धाभर्तृवदाचरेत् । अन्तर्निवृत्तसङ्गः स्यादसिधाराव्रतं हि तदिति यादवः ।

असिधावः । पुं । शस्त्राणां मार्जके । असिं धावति । धाव० । कर्मण्यण् ।

असिधावकः । पुं । शस्त्रमार्जके । असिं धावति । धावुगतिशुद्ध्योः । कर्मण्यण् । स्वार्थे कन् । क्वुन् वा ।

असिधेनुः । स्त्री । छुरिकायाम् । असेर्धेनुरिव । स्वल्पखड्गे ।

असिधेनुका । स्त्री । छुरिकायाम् । असेर्धेनुकेव ।

असिपत्रः । पुं । इक्षौ । नरकान्तरे ॥ खड्गकोषे । गण्डनामकवृक्षे । यथा स्यकन्दः कसेरुः । खड्गाकारपत्रे वृक्षविशेषे । आसनघातुके ।

असिपत्रकः । पुं । इक्षौ ।

असिपत्रवनम् । न । नरकविशेषे । यथा । यस्त्विह वै निजवेदपथादनापद्यपगतः पाखण्डञ्चोपगतस्तमसिप-

नरकं प्रविश्य क्रशयामवरन्ति तत्रासा वितस्ततोधावमान उभयतोधारैस्तालवनासिपत्रैश्छिद्यमानसर्वाङ्गोहाहतोस्मीति परमयावेदनया मूर्च्छितः पदेपदेनिपततिस्वधर्मत्यागीपाखण्डानुगतंफलंभुङ्क्ते । इति ।

असिपत्रव्रतम् । न । अश्वमेधक्रियमाणो व्रतविशेषे ।

असिपुच्छः । पुं । शिशुमारे ॥

असिपुत्रिका । स्त्री । छुरिकायाम् । असेः पुत्रीव । स्वार्थेकन् ।

असिपुत्री । स्त्री । छुरिकायाम् । असेः पुत्रीव ॥

असिमेदः । पुं । विट्खदिरे ।

असिहेतिः । त्रि । खड्गयोद्धरि । नैस्त्रिंशिके । असिर्हेतिर्यस्य ।

असु । न । चित्ते । तापे । असवः पुं भूम्नि प्राणादिपञ्चवायुषु । अस्यन्ते अस्यन्तिवा । असुक्षेपणे । अस्यन्तेआभिरितिवा । असदीप्तौ । भृमृशीङ्शीत्यादिनाउः । भूम्निवायुः प्राणादिपञ्चवाच्यआध्यात्मिकएकएव । प्राणापानाद्यास्तुपञ्चतस्यवृत्तयः । एवंचैकस्मिन्नपितत्र मैथिलीतस्यदाराइत्यादिवद्बहुवचनमेवप्रयोज्यम् प्राणेनासवायुरित्यादौतुवृत्त्यर्थः प्राणशब्दइतिनैकवचनंविरुध्यते ।

असुखम् । न । दुःखे ।

असुतरः । त्रि । दुस्तरे । सुतरोनभवतीत्यसुतरः ।

असुधारणम् । न । जीवने । असूनांधारणम् ।

असुरः । पुं । दैतेये । विरोचनादौ । सुरद्विजि । राहुग्रहे । सूर्ये । अस्यतिक्षिपतिदेवान् असुरः । असेरुरन्नित्युरन् । वा । नसुरः असुरः । नञीतितत्पुरुषः । अविद्यमानासुरायस्येतिवा ॥ असुषुरमतेवा । अन्येभ्योपोतिडः । सुरेभ्योऽन्योवा ।

असुररिपुः । पुं । विष्णौ । कृष्णे । असुराणांरिपुः ।

असुरा । स्त्री । रात्रौ । रात्रौ ।

असुराह्वम् । न । कांस्येइतिहेमचन्द्रः ।

असुर्य्यः । त्रि । असुरेभ्योहिते । गवादित्वाद्यत् । असुराणांस्वभूते ।

असुहृः । पुं । बाणे । असून्सुवति । षूप्रेरणे । सत्सूद्विषेत्यादिनाक्विप् ।

असूयकः । त्रि । असूयाशीले । असूयति । तच्छीलादिः । असुउपतापे । निन्दहिंसेतिवुञ् ।

असूया । स्त्री । परगुणेषुदोषाविष्कारे । अर्थदानादिगुणेषुदाम्भिकत्वादिरूपदोषारोपणे । असूयनम् । कण्ड्वादि । असूञ् असूयायाम् ।

त्वात् क्विप्प्रत्ययादित्यः ॥ रोषे ॥ वधूरसूयाकुटिलंददर्शेति रघुः ॥

असूयुः । पुं । समर्त्ते ॥ असूयति । असूञ् उपतापे । मृगय्वादित्वात् साधुः ॥

असूर्च्चणम् । न । अनादरे । सूर्च्चआदरे सरेफः । तस्माल्ल्युट् । नञ्समासः ॥

असूर्य्यम्पश्यः । त्रि । सूर्यादर्शिनि । गुप्तिपरेप्रयोगोयम् । यदपरिहार्य्यदर्शनं सूर्य्यमपिनपश्यतीति सत्यपिसूर्य्यदर्शने प्रयोगोभवति । यदातुसूर्य्यदर्शनाभावमात्रम् सूर्येतरस्य चन्द्रादेर्दर्शनं वाविवक्षितं तदासमासनभवति अनभिधानात् । सूर्यंनपश्यति । दृशिरप्रेक्षणे । पाघ्राध्मेतिपश्यादेशः ।

असृक्करः । पुं । शरीरस्थरसधातौ ॥

असृक्पः । पुं । स्त्री । राक्षसे । असृक् पिबति । पा । कः ॥

असृग्दरः । पुं । प्रदरे । फलितयोनेरक्तादिधातुक्षरणे ॥

असृग्धरा । स्त्री । त्वचि ॥ असृजोरक्तस्यधरा ॥

असृक् । न । रक्ते । ताम्ररसादिवन्मध्येसृज्यते सृजत्वात् । नसृजति वा । सृजविसर्गे । क्विप् । क्विम्प्रत्य

यस्येतिकुत्सम् । क्विन्प्रत्ययोयस्मादिति बहुव्रीहिः । ऋत्विग्दधृगादिनाक्विन्नः क्विनविहितः । यद्वा । असृते । असुक्षेपणे । बाहुलकात् ऋजः । कुङ्कुमे । षोडशयोगे । तज्जातस्यफलं यथा । धनीकुरूपः कुमतिर्दुरात्माविदेशगामीरुधिरप्रकोपः । महामलोभी पुरुषोबलीयानसृक्प्रसूतौकिलयस्यजन्तोरिति ॥

असृष्टान्नम् । त्रि । अन्नदानहीने । असृष्टमन्नंयेनसः ।

असेचनकम् । त्रि । अत्यन्तप्रियदर्शने । यस्यदर्शनान्नतृप्यति किन्तुपुनः पुनर्दिदृक्षतएवतस्मिन् । तदसेचनकं तृप्तेर्नास्त्यन्तोयस्यदर्शनात् । नसिच्यतेमनोऽत्र । षिचक्षरणे । करोतिल्युट् । संज्ञायांकन् ॥

असौम्यस्वरः । त्रि । मन्दस्वरे । अस्वरे ॥ असौम्योरूक्षःस्वरोयस्यसः ।

अस्खलितः । त्रि । अप्रतिहते ।

अस्तः । पुं । चरमाचले । पश्चिमाचले । लग्नात्सप्तमे ॥ त्रि । क्षिप्ते । अवसिते । अवसानप्राप्ते । निम्लोचने ॥ अस्यतेस्म । असुक्षेपणे । क्तः । यद्वा । असतिस्म । असदीप्तौ । गत्यर्थेतिक्तः ॥ न । मृत्यौ । कालधर्मे ॥

अस्तकः । पुं । निर्वाणे । मोक्षे ।

अस्ततन्द्रिः । त्रि । अनलसे । अस्तात न्द्रिरालस्यं यस्य ।

अस्तम् ।।। विनाशे । अदर्शने । अस नम् । अनुपेपणे । तम प्रत्ययः ।

अस्तमनम् । न । सूर्याद्यदर्शने । यथा । तिरोधानमथपैतितद्देवास्तमनंरवेः । नैवास्तमनमर्कस्य नोदयः सर्वदा- सतः । इति ।

अस्तमयः । पुं । प्रलये ॥ ग्रहाणांसूर्य प्रत्यासत्तौ । यथा । रविणास्तम योयोगोवियोगस्तूदयोभवेदिति ।

अस्तमितः । त्रि । दरिद्रे ॥

अस्तसन्ध्या । स्त्री । अर्द्धार्कास्तमना न् घटिकात्रयसम्मितेकाले ।

अस्ताचलः । पुं । चरमाद्रौ । पश्चिम पर्वते ॥ अस्तश्चासावचलश्च ॥

अस्ताद्रिः । पुं । चरमाचले ।

अस्ति ।।। विद्यमाने । सत्त्वे । यथा । अतिथिर्बालकश्चैव राजाभार्यातथै वच । अस्तिनास्तिनजानन्ति देहि देहिपुनःपुनरिति । असनम् । अ सद्दीप्तौ । क्तिच्तिर्वा ।

अस्तिमान् । त्रि । धनिनि ॥

अस्तु ।।। अभ्यनुज्ञाने । अङ्गीकारे । असूयायाम् ॥ पीडायाम् । प्रतिक्षे पे ॥ प्रशंसायाम् । प्रकर्षे । स्वरूपे । असम्प्रत्यये । असूयापूर्वकाङ्गीकारे । असति अस्तिवा । तुन् ।

अस्तुङ्कारः । पुं । अभ्युपगमे । अस्तुकरो ति । कर्मण्यण् । अस्तुइतितिङन्त प्रतिरूपकमव्ययम् । अस्तोश्चेत्रिवक्त व्यमितिमुम् ॥

अस्तेयम् । न । अदत्तादानरूपपरस्वह रणादिराहित्ये ।

अस्त्यानम् । न । निन्दायाम् । भर्त्सने ।

अस्त्रम् । न । क्षेप्यशरादौ । प्रहरणे ॥ चापे । करवाले । अस्यते । अनुक्षेप णे । असतिवा । असदीप्तौ । सर्वधा तुभ्यष्ट्रन् ।

अस्त्रकण्टकः । पुं । बाणे ।

अस्त्रगृहम् । न । आयुधागारे ।

अस्त्रचिकित्सकः । पुं । शस्त्रवैद्ये ।

अस्त्रजित् । पुं । कपाटवक्षे । कपोतव क्षसि ।

अस्त्रमार्जः । पुं । अस्त्रसंस्कारिणि । अ स्त्रमार्जे । शाणाजीवे । असिधावे ।

अस्त्रसायकः । पुं । नाराचास्त्रे । समुद यलौहमयवाणे ।

अस्त्रागारः । पुं । अस्त्ररक्षणगृहे ।

अस्त्री । त्रि । धन्विनि । अस्त्रंधनुरस्या स्ति । अतइनिः ।

अस्थागम् । त्रि । अतलस्पर्शे । अगाधे ।

अस्थाघम् । त्रि । अगाधे ।

अस्थानम् । त्रि । अतलस्पर्शे । न । म

न्दस्थले । अनधिकारिणि । अस्थाने स्थाप्यमानेचवाच्यमितिलक्ष्यम् ।

अस्थायम् । त्रि । अगाधे ।

अस्थायी । त्रि । नश्वरे । स्थितिरहिते ॥

अस्थारम् । न । गभीरे ।

अस्थावरम् । त्रि । स्थावरेतरद्रव्ये । जङ्गमवस्तुनि ।

अस्थि । न । कीकसे । बीजे । अस्यते । असुक्षेपणे । असिसञ्जिभ्यां क्थिन् । अस्थीनि तरुण नलक कपाल रुचक वलयभेदात् पञ्चविधानि भवन्तीति वैद्याः ॥

अस्थिकम् । न । अस्थिनि । स्वार्थे यावा दिस्वात्कन् ।

अस्थिकृत् । पुं । शरीरस्थमेदोधातौ ।

अस्थिजः । पुं । मज्जनि ।

अस्थितुण्डः । पुं । स्त्री । पक्षिणि ।

अस्थिधन्वा । पुं । शम्भौ ।

अस्थिपञ्जरः । पुं । शरीरास्थिसमूहे । करङ्के ।

अस्थिभक्षः । पुं । स्त्री । पक्षिभेदे । कुक्कुरे ।

अस्थिभुक् । पुं । स्त्री । कुक्कुरे । शुनि ।

अस्थिमाली । पुं । रुद्रे । अस्थ्नांमालासा ऽस्ति अस्य । व्रीह्यादित्वादिनिः ॥

अस्थिरः । त्रि । चञ्चले । सङ्कसुके । न स्थिरः ॥

अस्थिविग्रहः । पुं । भृङ्गरीटे । भृङ्गिनामकशिवद्वारपाले ॥

अस्थिशृङ्खला । स्त्री । ग्रन्थिमति । अस्थिसंहारे ।

अस्थिसंहारः । पुं । हस्तिशुण्ड्याम् । ग्रन्थिमति । यथा । अस्थिसंहारकः प्रोक्तो वातश्लेष्महरोऽस्थियुक् । उष्णः सरः कृमिघ्नश्च दुर्नामघ्नोऽक्षिरोगजित् ॥ रूक्षः स्वादुर्लघुर्वृष्यः पाचनः पित्तलः स्मृतः ॥ काण्डं त्वक् विरहितमस्थिशृङ्खलाया माषार्द्धं द्विदलमकञ्चुकं तद्दद्युम् । सम्पिष्टं सुतनु ततस्तिलस्य तैले सम्पक्कं वटकमतीववातहारि ।

अस्थिसंहारिका । स्त्री । ग्रन्थिमति । हाडजोडा इतिख्यातौषधौ ।

अस्थिसंहारी । पुं । अस्थिसंहारके ग्रन्थिमति ।

अस्थिसारः । पुं । मज्जायाम् ।

अस्थिस्नेहसम्भवः । मज्जनि । मज्जायाम् ।

अस्नाविरम् । त्रि । शिरावर्जिते । स्थूलशरीरवर्जिते । अविद्यमानाःस्नावाः शिरा यस्मिन् ।

अस्निग्धदारु । न । देवदारुभेदे । देवकाष्ठे ।

अस्पर्शः । त्रि । स्पर्शाभाववति । सम्बन्धशून्ये ।

अस्पर्शयोगः । पुं । ब्रह्मस्वभावे । स्पर्श संस्पर्शः सम्बन्धो न विद्यते यस्य योगस्य केनचित् कदाचिदपि सः । यथाहुः । अस्पर्शयोगो वै नाम सर्वसत्त्वसुखो हितः । अविवादोऽविरुद्धश्च देशितस्तं नमाम्यहमिति । अद्वैतानुभवोऽस्पर्शः । स एव योगो जीवस्य ब्रह्मभावेन योजनात् । सर्व सम्बन्धास्पर्शवर्जितत्वात् अस्पर्शयोगः ॥

अस्पष्टम् । त्रि । अव्यक्ते ॥ नस्पष्टम् ॥

अस्फुटम् । त्रि । अस्पष्टे ॥ नस्फुटम् । सर्वःशब्दो वर्णात्मक एव व्यञ्जकविशेषाभावादस्फुटः ॥

अस्फुटवाक् । त्रि । अव्यक्तवाचि । लोहले ॥ नस्फुटा वागस्य ॥

अस्म् । त्रि । अस्मच्छब्दस्य प्रथमैकवचने । देहत्रयविशिष्टत्वेनाशुद्धजीवे । कर्त्ताऽसुखीत्यादिव्यवह्रियमाणे । अहंशब्दप्रत्ययालम्बने । अहंप्रत्ययवेद्ये । अहंशब्दप्रत्ययालम्बनत्वेन प्रत्यक्षे । सर्वदोपलब्धिस्वरूपे प्रत्यगात्मनि ॥ अस्ति । असभुवि । युष्यसिम्यांमदिक् ।

अस्मि । । । अहमित्यर्थे । यथा । दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये इति । अस्मीत्यस्मदर्थानुवादेऽव्ययमपी

तिगणव्याख्यानम् ॥

अस्मिता । स्त्री । दृग्दर्शनशक्त्योरेकात्मतायाम् । बुद्धिपुरुषयोरभेदाभिमाने । मोहे ॥ स चाष्टविधः । देवादिरष्टविधमैश्वर्यमासाद्याऽमृताभिमानिनोऽणिमादिकमात्मीयमशाश्वतमभिमन्यन्त इति । सोऽयमस्मितामोहोऽष्टविधैश्वर्यविषयत्वादष्टविधः ॥

अस्रः । पुं । कोणे । कचे । न । अश्रुणि । शोणिते । अस्यते । असुक्षेपणे । बाहुलकाद्रः ।

अस्रकण्ठः । पुं । शरे । अस्रःकण्ठे यस्य ॥

अस्रखदिरः । पुं । रक्तखदिरवृक्षे ॥

अस्रजम् । न । मांसे ।

अस्रपः । पुं । राक्षसे ॥ अस्रं रक्तं पिबति । पा० । आतोनुपेतिकः । न । मूलर्क्षे ॥

अस्रपत्रकः । पुं । भिण्डायाम् । भिण्डीति प्रसिद्धशाके ।

अस्रपा । स्त्री । जलौकायाम् । अस्रं पिबति । पा० । कः । टाप् ॥

अस्रफला । स्त्री । सल्लकीवृक्षे ।

अस्रबिन्दुच्छदा । स्त्री । लक्ष्मणानामकन्दे ।

अस्रमातृका । स्त्री । शरीररसे ।

अस्ररोधिनी । स्त्री । लज्जालुलता-

याम् ।

अस्ताश्मक: । पुं । श्वेततुलस्याम् ।

अस्त्री । त्रि । अस्त्रवति : अस्त्रोऽस्यास्य । सुखादित्वादिनि: ।

अस्रु । न । नेत्रजले । अस्यति । असु क्षेपणे । अश्वादिषु दन्त्यमध्यस्यापि पाठात् साधु ।

अस्वच्छन्द: । त्रि । अतन्त्रे । अधीने । नस्व: छन्दोऽस्य ।

अस्वन्तम् । न । अशुभे । चुल्याम् । म रणे । अनवधौ । क्षेपे । अशुभनामन्तोऽत्र ।

अस्वन्तर: । त्रि । अशुभस्तदुरन्ते ॥

अस्वप्न: । पुं । देवतायाम् । त्रि । अनि द्रे । अविद्यमान: स्वप्नो निद्रा यस्येति विग्रह: ।

अस्वर: । त्रि । अशोभनस्वरे । काका दिवद्दुःस्वरे । अप्रशस्त: स्वरोयस्य ।

अस्वर्ग्यम् । त्रि । स्वर्गहेतुधर्मविरोधि नि । अस्वर्ग्यं लोकविद्विष्टंधर्ममप्या चरेन्नतु ॥ स्वर्गायहितंनभवतीति ॥

अस्वादुकण्टक: । पुं । गोक्षुरके । अ स्वादु: कण्टकोयस्य स: ।

अस्वाध्याय: । पुं । विधिपूर्वकवेदाध्यय नवर्जिते । निराकृतौ ॥ नस्वाध्यायो वेदाध्ययनमस्य ।

अस्वामिकम् । त्रि । स्वामिरहितेवस्तु नि ॥ यथा । एतच्चाप्रदानंस्वभूताव-स्वामिकायाश्चनद्यात् । अस्वामि कान्याह्यम: । अटव्य:पर्वता:पुण्या नद्यस्तीर्थानियानिच । सर्वाण्यस्वा-मिकान्याहुर्नहितेषुपरिग्रह: । पु ण्याइतिविशेषणात् अटव्योनैमिषा द्या: । पर्वताहिमाचलाद्य: । नद्यो गङ्गाद्या: । तीर्थानिपुरुषोत्तमादि क्षेत्राणि । वाराणस्याद्यायतनानिच । स्वाम्यभावेहेतुमाह नहितेष्विति । इतिश्राद्धतत्त्वम् ।

अस्वैरी । पुं । परतन्त्रे । नस्वैरी ।

अह । I । प्रशंसायाम् । क्षेपणे । नि योगे । विनिग्रहे । आचारातिक्रमे ॥ पूजायाम् ।

अहंयु: । त्रि । अहङ्कारिणि । अहमस्या स्ति । अहमितिमान्तमव्ययम् । अ हंशुभमोर्युस् ॥

अहङ्कार: । पुं । अहमितिकरणे । ग र्वे । अहङ्कारस्तुसर्वेषां पापबीजम मङ्गलम् । ब्रह्माण्डेषुचसर्वेषां गर्वप र्यन्तमुन्नति: । सचद्विविध: । विशे षरूप:सामान्यरूपश्चेति । तत्राय महमेतस्य पुत्रइत्येवंव्यक्तमभिमन्य मानोविशेषरूपोऽव्यपह्यहङ्कार: । अ स्मीत्येतावन्मात्रमभिमन्यमान: सा मान्यरूप: समष्ट्यहङ्कार: । सचद्वि

रण्यगर्भोमहान् आत्मेतिच सर्वानु
स्यूतत्वादुच्यते । अयमेवपराहन्ता
रूपोवृहदारण्यके योवेदाहं ब्रह्मा
स्मीतिश्रुतिरूपउक्तः । अहमभिमा
नरूपोयोहङ्कारः सतुसर्वसाधारणः ।
आरोपितैर्गुणैरात्मनोमहत्वाऽभि-
माने । अहमेव श्रेष्ठइतिदुरभिमाने
। महाकुलमहतोहं महतांशिष्यो
ऽतिविरक्तोस्मि नास्ति द्वितीयोम-
त्समइत्यभिमाने । आत्मश्लाघना
भावेपि मनसि प्रादुर्भूते हं सर्वोत्कृष्ट
इतिगर्वे । महाभूतकारणभूतेऽभि
मानलक्षणे ॥ अभिमानात्मिकाया
मन्तःकरणहत्तौ ॥ कोनाममानवो-
लोकेदेवोवादानवोपिवा । अहङ्कार
जयंकृत्वासर्वदासुखभाग्भरेत् ॥ अ
हङ्कारस्य मनस्यन्तर्भावः । तस्यसङ्क-
ल्पात्मकत्वाविशेषात् । तथाहि मन
सोबाह्य आभ्यन्तरश्च यथायोगंस-
र्वोविषयः । अहङ्कारस्यतु अनात्मो
परक्तआत्मैवेति अतोविषयभेदेपिस्व
रूपाभेदाद्युक्तोन्तर्भावः ॥ पुराणमते
सात्त्विकराजसतामसभेदात् सत्रिवि
धः । तत्रसात्विकाहङ्कारात् इन्द्रिया
धिष्ठातारोदेवा मनश्चजातम् । रा
जसाद्दशेन्द्रियाणिजातानि । ताम
सात्तु पञ्चभूतानिजातानीति ॥

यथोक्तंविष्णुपुराणे । वैकारिकस्तैज
सश्च भूतादिश्चैवतामसः । त्रिवि-
धोयमहङ्कारोमहतत्त्वादजायते-
ति । वैकारिकःसात्त्विकाहङ्कारः ।
तैजसो राजसइन्द्रियादिश्च । भूतादि
स्तामसः ।

अहङ्कारवान् । त्रि । अहंयौ । अहङ्का
रोस्यास्ति । मतुप् ।

अहङ्कारी । त्रि । अहङ्कारयुक्ते । अभि-
मानिनि ॥

अहङ्कृतः त्रि । अहङ्कारवति ।

अहङ्कृतिः । स्त्री । गर्वे । स्वरूपे ।

अहतम् । न । नूतनांसुके । यथा । ई
षद्धौतंनवंश्वेतं सदशंयन्नधारितम् ।
अहतंतंविजानीयात् पावनंसर्वकर्म
स्विति । त्रि । अनाहते । अनुपहते ।

अहः । न । दिवसे । नजहाति । ओहा
कत्यागे । नञिजहातेरितिकनिन् ।
रोसुपीतिरः ।

अहन्ता । स्त्री । अहम्भावे ।

अहन्धीः । पुं । देहादावनात्मन्यात्म-
बुद्धौ ।

अहम् । । । अहङ्कारार्थे । विभक्तिप्रति
रूपकमव्ययम् ।

अहमहमिका । स्त्री । परस्पराहङ्कारे ।
अहमहंशब्दोऽस्त्यत्र । वीप्सायांद्वित्व
म् । शौण्डादित्वाट्ठन् । अनित्यत्वा

द्व्ययानामिति नटिलोपः ॥

अहङ्कारः । पुं । अभिमानाधिक्ययुक्ते ॥ अहमहंभावः अहंकारः अभिमानस्तेनाऽधिकोयस्य ।

अहम्पूर्विका । स्त्री । अभिमानविशेषे । अहम्पूर्वमहम्पूर्वमितियोधानांधावनक्रियायाम् । अहम्पूर्वं महम्पूर्वमित्यहम्पूर्विकास्त्रीयामित्युक्तेः । अहम्पूर्वम् । सुप्सुपेतिसमासः । स्वार्थेकन् । अहम्पूर्वमित्यस्तियस्याम् । ठन्वा ॥

अहम्मतिः । स्त्री । अज्ञाने । अविद्यायाम् । अहमितिविभक्तिप्रतिरूपकमव्ययमहङ्कारार्थकम् । अहम्प्रधानामतिः ।

अहर्गणः । पुं । मासे । अह्नां गणः ॥ ग्रहाणां मध्यादिज्ञानार्थं श्वेतवराहकल्पावधिसृष्ट्यवधिब्रह्मसिद्धान्तोक्तकल्पावधिकल्याद्यब्दावधिवा इष्टकालपर्यन्तं परिगणिते दिनसमूहे । दिनपिण्डे । द्युवृन्दे ।

अहर्जरः । पुं । संवत्सरे । वत्सरोहि अहोभिःपरिवर्त्तमानो लोकान् जरयतीति अहानिवाऽस्मिन् जीर्यन्त्यन्नभवन्तीतिभाष्यकृतांव्याख्यानात् । औपनिषदोयं प्रयोगः ॥

अहर्दिवम् । न । अहन्यहनि ॥ अहनिचदिवाच । अचतुरेत्यादिनावीप्सा

यांद्वन्द्वोऽच्प्रत्ययश्च ।

अहर्पतिः । पुं । सूर्ये । अह्नःपतिः । अहरादीनांपत्यादिषुवारेफः । पक्षे अहःपतिः ।

अहर्बान्धवः । पुं । दिवाकरे ।

अहर्मणिः । पुं । भास्करे ॥ अह्नोमणिरिव । अर्कवृक्षे ॥

अहर्मुखम् । न । प्रत्यूषे । अह्नोमुखम् । रोऽसुपीतिरः ।

अहल्यम् । त्रि । हलानाकृष्टक्षेत्रे । देशभेदे ।

अहल्या । स्त्री । गौतमर्षिपत्न्याम् । इयम्पञ्चकन्यास्वेका । अप्सरोभेदे ।

अहस्करः । पुं । भास्करे । अहःकरोति । दिवाविभेतिटः । कस्कादित्वात्सः ।

अहस्पतिः । पुं । यदाक्षयमासोभवति तदाक्षयमासस्यपूर्वोत्तरावधिमासौ भवतः तयोः परस्मिन्नधिमासे ।

अहह । । । अद्भुते । खेदे । परिक्लेशे । प्रकर्षे । सम्बोधने ॥ अहंजहाति जिहीतेवा । ओहाक्त्यागेओहाङ्गतौ । अन्येभ्योपीतिडः । पृषोदरादित्वान्मलोपः । भावेवाप्रत्ययः ॥

अहहा । । । अहहेत्यस्यार्थेषु । अहंजहातिजिहीतेवा । ओहाक्त्यागेओहाङ्गतौ । क्विप् । पृषोदरादित्वान्मलोपः । भावेवाप्रत्ययः ।

अहार्य्यः । पुं । पर्वते । त्रि । हर्त्तुमशक्ये । ह्रियते । हृञ् हरणे । ऋहलोर्ण्यत् । नहार्य्यः । अभेद्य ।

अहिः । पुं । वृत्रासुरे । सर्पे । सूर्य्ये । सीसके । राहौ । पथिके । खले । यथा । विषधरतोप्यतिविषमः खलइतिनमृषावदन्तिविद्वांसः । यदहिर्नकुलद्वेषीस्वकुलद्वेषीपुनःपिशुन इति । वप्रे । अश्लेषानक्षत्रे । अष्टमे । षण्मात्रिकस्यषष्ठे ।ऽऽ। प्रभेदे । आहन्ति । हनहिंसागत्योः । आङिश्रिहनिभ्यांह्रस्वश्चेतीण् । सचडित् । डित्त्वाट्टिलोपः । आङोह्रस्वश्च ॥

अहिंसा । स्त्री । वाङ्मनःकर्यैः परपीडावर्ज्जने । प्राणिनांपीडायामिष्टौ । अशास्त्रीयप्राणिपीडनाभावे । यथाह मनुः। यावेदविहिताहिंसानियतास्मिंश्चराचरे । अहिंसामेवतांविद्या द्वेदाद्धर्मो हिनिर्बभाविति । हिंसनम् हिंसा । नहिंसा ।

अहिंस्रा । स्त्री । ओषधिभेदे । कुलेखाडा इतिगौडभाषा । कुलिकद्रुमे । हिंस्राख्यौषधिप्रभेदे ।

अहिकः । पुं । भुवर्च्चे ।

अहिका । स्त्री । शाल्मलिद्रुमे ।

अहिकान्तः । पुं । समीरे । अहेःकान्तः ।

अहिगणः । पुं । पञ्चमात्रिकस्यसप्तम ऽ।।। प्रभेदे । सर्पाणांसमूहे ।

अहिच्छत्रः । पुं । देशविशेषे । प्रत्यग्रथे । मेषशृङ्गीवृक्षे ।

अहिच्छत्रा । स्त्री । कान्यकुब्जदेशप्रसिद्धे पुरीविशेषे । चीनीति प्रसिद्धायां शर्करायाम् ।

अहिजित् । पुं । हरौ । शक्रे । अहिंसर्पमिन्द्रंवाऽजैषीत् । जिजये । क्विप् ॥

अहिजिह्वा । स्त्री । नागजिह्वाख्यलतायाम् ।

अहितः । त्रि । शत्रौ । अपथ्ये । नहितमस्मात् ।

अहितुण्डिकः । पुं । व्यालग्राहिणि । भिक्षार्थंसर्पखेलके । सपेरा इति ख्याते । अहेस्तुण्डंमुखम् तेनदीव्यतीतिठक् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः ।

अहिद्विट् । पुं । गरुडे । शक्रे । मयूरे । नकुले । हरौ । अहिंद्वेष्टि । द्विष० । क्विप् ।

अहिनकुलिका । स्त्री । अहिनकुलयोर्वैरे । अहिनकुलयोर्वैरम् । द्वन्द्वाद्वुन् वैरमैथुनिकयोरितिवुन् ।

अहिनिर्ल्वयनी । स्त्री । सर्पनिर्मोके । सर्पत्वचि । अहिर्निलीयतेऽस्यां सा अहिनिर्ल्वयनीति व्याख्यातारः ।

अहिपतिः । पुं । वासुकिनागे । शेषना

गे । अहीनांपतिः

अहिपुत्रकः । पुं । तरालौ । नौकाजलोत्तारके ॥

अहिपूतनः । पुं । क्षुद्ररोगविशेषे ॥

अहिफेनम् । न । आफूके । अफीमइतिविश्रुते ॥ इतिराजनिर्घण्टः ।

अहिव्रध्नः । पुं । रुद्रबिशेषे । शिवे ॥

अहिब्रध्नदेवता । स्त्री । उत्तरभाद्रपदायाम् । अहिब्रध्नोदेवताअस्याः ॥

अहिभयम् । न । राज्ञांस्वपक्षप्रभवेभये ॥ अहिरिवगूढस्वत्वात् आहताकारत्वाच्च स्वस्यपक्षएवाहिः । अहेर्भयम् । निजोयमित्रश्चसमाश्रितश्च-सम्बन्धतः कार्यसमुद्भवश्च । भृत्यागृहीतोविविधोपचारैः पक्षंबुधाःसप्तविधंवदन्ति । सर्पभये ।

अहिभयदा । स्त्री । भूम्यामलक्याम् ।

अहिभुक् । पुं । गरुडे ॥ बर्हिणि ॥ नाकुल्याम् । गन्धनाकुल्याम् । अहिंभुङ्क्ते । भुजअभ्यवहारे । क्विप् ॥

अहिमः । त्रि । शीतस्पर्शशून्ये ॥

अहिमर्द्दनी । स्त्री । गन्धनाकुलीनामकन्दे ॥

अहिमारः । पुं । } अरिमेदकवृक्षे ।
अहिमेदकः । पुं । }

अहिलता । स्त्री । नागवल्ल्याम् । अहिलोकस्यपाताललक्षणता । शाकपार्थिवादिः । गन्धनाकुल्याम् ।

अहीनः । पुं । अहर्गणसाध्यसुत्याकक्रतौ । अङ्गांसमूहः । अङ्गःखःक्रतौ । अहीनयजनमशुचिकरमितिश्रुतिः । अहिस्वामिनि ।

अहीरणिः । पुं । द्विवक्त्राहौ । द्विमुखसर्पे । इति त्रिकाण्डशेषः ।

अहुतः । पुं । ब्रह्मयज्ञाख्येजपे ॥

अहे । ा । क्षेपे । बियोगे ।

अहेरुः । स्त्री । शतमूल्याम् । नहिनोति । हिगतौ । बाहुलकाद्रुः ।

अहैतुकः । त्रि । फलाभिसन्धानरहिते ।

अहो । ा । धिगर्थे । शोके । करुणार्थे । विषादे । सम्बोधने । प्रशंसायाम् । विस्मये । पादपूरणे । असूयायाम् । वितर्के । अहानम् । ओहाङ्गतौ । डोप्रत्ययः ।

अहोरात्रः । पुं । दिनरात्रिमात्रात्मके काले । सूर्योदयद्वयपरिच्छिन्ने त्रिंशन्मुहूर्त्तात्मकेकाले । सच (मानुषाहोरात्रः) षष्टिघटिकाभिर्भवति । यथा । अहोरात्रेविभजतेसूर्योमानुषदैविके । रात्रिः स्वप्नायभूतानां चेष्टायैकर्मणामहः इति ॥ मतान्तरे तुचतुर्विंशतिहोराभिर्मानुषाहोरात्रोभवति । यथोक्तंवह्निपुराणेगणभेदनामाध्याये । चतुर्विंशतिभिर्वाभि

रन्होरात्रंप्रचचते । पश्चिमादर्हरात्राद्धिहोरात्राणांविद्यतेक्रमइति ॥ (पैत्राहोरात्रः) पैत्र्येरात्र्यहनीमासःप्रविभागस्तुपक्षयोः । कर्मचेष्टास्वहःकृष्णःशुक्लः स्वप्नायशर्वरी ॥ (दैवाहोरात्रः) दैवेरात्र्यहनीवर्षंप्रविभागस्तयोःपुनः । अहस्तत्रोदगयनंरात्रिःस्याद्दक्षिणायनम् ॥ (प्राजापत्याहोरात्रः) युगसहस्राभ्यांप्राजापत्यमेकमहोरात्रम् ॥ अहश्चरात्रिश्चतयोः समाहारः । रात्राह्नाहाः पुंसि । अहः सर्वैकदेशेत्यच् समासान्तः ॥

अहोबत । ा । अनुकम्पायाम् ॥ खेदे ॥ सम्बोधने ॥ अहोच बतच ॥

अहोही । ा । चित्रे ॥ अहोच हीच ॥

अह्नाय । ा । द्रुते ॥ ह्नवनम् । ह्नुङ्अपनयने । बाहुलकाद्भावे घञ् । हद्धिः । पृषोदरादित्वाद्दस्ययः । ततोनञ् समासः ॥

अह्रीकः । पुं । क्षपणके ॥

अह्लला । स्त्री । भल्लातकहृत्ते ॥

—⋙⋘—

आ

आ॰ स्मृतौ । स्मृतिम्प्रचने यथा । आएवं किलतत् । वाक्ये ॥ वाक्यस्यान्ययास्त्वेयोस्येयथा । आएवंमन्यसे । पूर्वंमैवंमंस्था इदानींत्वेवंमन्यसइत्यर्थः ॥ अनुकम्पायाम् ॥ आदेवदत्तो दरिद्रः ॥ समुच्चये । देवेभ्यश्चपितृभ्यश्च आ ॥ आप्नोति । आप्लृव्याप्तौ । क्विप् । पृषोदरादित्वात् पलोपः ॥ स्वीकारे ॥ अयंप्रगृह्यसंज्ञकत्वात्सुतप्रगृह्याअचीतिसन्धिंनयाति ॥

आः । पुं । महेश्वरे ॥ पितामहे ॥

आकम्पितः । त्रि । कम्पविशिष्टे । प्रेंखिते ॥ आकंप्यतेस्म । कपिचलने । गत्यर्थेतिक्तः ॥

आकरः । पुं । निबहे ॥ धातुरत्नाद्युत्पत्तिस्थाने । खनौ ॥ श्रेष्ठे ॥ आकुर्वन्त्यत्र एत्यकुर्वन्तिव्यवहारमस्मिन्वा । डुकृञ्करणे । आकीर्यन्तेधातवोऽत्र वा । कृविक्षेपे । पुंसिसंज्ञायामिति घः ॥

आकरिकः । त्रि । आकरेनियुक्ते ॥ तत्रनियुक्त इतिठक् ॥

आकर्णनम् । न । श्रोत्रकर्मणि । श्रवणे ॥

आकर्णितः । त्रि । अवधृते ॥ श्रुते ॥

आकर्षः । पुं । द्यूते ॥ इन्द्रिये ॥ प्राशके ॥ शारिफलके ॥ धन्वाभ्यासाङ्गे । कोदण्डाभ्यासवस्तुनि ॥ आकर्षणे ॥ निकषोपले ॥ आकर्षणमाकृष्यते आ

कर्षन्त्यस्मिन्वा । कृषविलेखने । घञ् ॥ काष्ठविशेषे ॥ आकृष्यतेऽनेन खलादिगतं धान्यमित्याकर्षः ॥

आकर्षकः । पुं । अयस्कान्ते ॥ चुम्बके ॥ त्रि । कर्षके । आकर्षणकर्त्तरि ॥ आकर्षकुशले ॥ आकर्षकुशलः । आकर्षादिभ्यःकन् ॥

आकर्षणम् । न । आकर्षे । बलादानयने ॥

आकर्षणी । स्त्री । फलपुष्पाद्याकर्षकयष्टिकाविशेषे । आँकडाइतिभाषा ॥

आकर्षिकः । पुं । वणिग्विशेषे ॥ आकर्षेणचरति । आकर्षात् ष्ठल् ॥ स्त्री । आकर्षिकी । ङीष् ॥

आकलनम् । न । आकाङ्क्षायाम् ॥ परिसंख्याने ॥ बन्धने ॥ कलशब्दसंख्यानयोः । आङ्पूर्वादस्माल्ल्युट् ॥

आकलितः । त्रि । अनुस्मृते ॥ धृते ॥

आकल्पः । पुं । कल्पने ॥ वेषे । मण्डने ॥ आभरणे ॥ त्रि । कल्पान्तावधिके ॥ आकल्पनम् । कृपूसामर्थ्ये । घञ् । कृपोरोलः ॥ आकल्पतेवा । आकल्पयतिवा स्वार्थणयन्तः ॥

आकल्पकः । पुं । तमोमोहग्रन्थौ ॥ उत्कलिकायाम् ॥ मुदि ॥

आकषः । पुं । निकषोपले । कसौटीतिख्याते कषपाषाणे । आङ्पूर्वात् कषेरच् ॥

आकषकः । त्रि । आकषेकुशले ॥ आकषादिभ्यःकन् ॥

आकस्मिकम् । त्रि । अकस्माद्भवे ॥

आकाङ्क्षा । स्त्री । अभिलाषे ॥ वाक्यार्थज्ञानहेतौ पदस्यपदान्तरव्यतिरेकप्रयुक्तान्वयाभावे ॥ आकाङ्क्षारहितं वाक्यं नप्रमाणम् । यथागौरश्वःपुरुषोहस्तीतिनप्रमाणमाकाङ्क्षाविरहात् ॥ न्यायमते यत् पदमृतेयत्पदान्वयबोधो नभवतितत्पदेतत्पदवत्तेति ॥ प्रतीतपर्य्यवसानविरहइत्यालङ्कारिकाः ॥

आकायः । पं । निवासे ॥

आकारः । पुं । इङ्गिते । अभिप्रायानुरूपचेष्टाविष्करणे ॥ आकृतौ । मुखप्रसादवैवर्ण्यादिरूपेप्रीत्यप्रीतिसूचकेदेहधर्मे ॥ मूर्त्तौ ॥ आकरणम् । घञ् ॥ आकारश्छाद्यमानोपि नशक्योविनिगूहितुम् । बलाद्धिविवृणोत्येवभावमन्तर्गतंनृणाम् ॥

आकारकरभः । पुं । अकर्कराइतिप्रसिद्धे ॥

आकारगुप्तिः । स्त्री । रत्याद्युत्थरागादिगोपने । अवहित्थायाम् ॥ आकारस्यशोकादिजनितमुखम्लान्यादेर्गोपनम् । क्तिन् ॥ रत्यादिसूचकोमु-

स्वरागादिराकारः अङ्गवैकृतमिति
यावत्। गुप्तिर्गोपनम्। आकारस्यभ
यलज्जादिनागुप्तिराकारगुप्तिः॥
आकारगोपनम्। न। आकारगुप्तौ॥
आकारणम्। न। आह्वाने॥ आकर-
णम्। आङ्पूर्वात् कृञोणयन्ताल्ल्युट्॥
आकारणा। स्त्री। आकारणार्थे। हू-
तौ॥ आकारणम्। कृञोणयन्ताद्युच्
। टाप्॥
आकारमौनम्। न। अवचनमात्रे॥
आकालिकम्। त्रि। क्षणध्वंसिनि। आ
शुविनाशिनि॥ पूर्वदिवसे मध्याह्ना
दावुत्पद्यदिनान्तरेतत्रैवनश्वरे॥ स-
मानकालावाद्यन्तौयस्य। आकालि-
कडाद्यन्तवचनइति समानकालस्या
कालादेशः इकट्प्रत्ययश्चनिपातना
त्॥ स्तनयित्नौ॥ अकालोत्पन्नवस्तु
नि॥ कालंमर्यादीकृत्येत्याकालम्।
अकालेभवम्। ठञ्॥
आकालिकप्रलयः। पुं। कपिलशापेना
काले जगत्प्लावनरूपेप्रलयविशेषे॥
आकालिका। स्त्री। विद्युति॥ आका-
लाट्ठंश्चेतिठन्॥
आंकालिकी। स्त्री। सौदामिन्याम्॥ आ
कालाट्ठंश्चेति चकाराट्ठञ्। ङीप्॥
आकाशः। पुं। न। शब्दतन्मात्रादुत्प-
न्ने। वियति॥ आकाशगुणास्तु। श

ब्दः श्रोत्रेन्द्रियव्यापिच्छिद्राणिचवि
विक्तता। वियतः कथिताएतेगुणा-
गुणविचारिभिरिति॥ आसमन्ता-
त्काशते इतियोगाद्ब्रह्मणि। असङ्ग
स्वभावे॥ यथाहुः। आसमन्तात्का
शतेयमित्याकाशस्त्वमात्मनः। जग-
त्कारणतातस्यसर्ववेदान्तसम्मतेति॥
आसमन्तात्काशन्ते सूर्यादयोऽत्र।
काशृदीप्तौ। हलश्चेतिघञ्॥ दिशो
ऽनतिरिक्तमेवाकाशमित्याहुः॥
आकाशकल्पः। त्रि। आकाशादीषदू
नत्वमात्रांशेनन्यूनेपरमात्मनि॥ त-
थाचोक्तम्। निरंशत्वाद्विभुत्वाच्च त-
थाऽनश्वरभावतः। ब्रह्मव्योम्नोर्नभेदो
ऽस्तिचैतन्यंब्रह्मणोधिकमिति॥
आकाशजननी। स्त्री। प्रगण्डीमध्य-
स्थितजनानांबाह्यार्थदर्शनार्थेषुसु
द्रच्छिद्रेषु॥ यद्द्वारा ऽऽग्नेयास्त्रगु-
टिकाःप्रक्षिप्यन्ते इतिराजधर्मः॥
आकाशनिलयः। पुं। तापसविशेषे॥
योह्याकाशएव वायुधारणाबलेन
निलीयते न भूमौ सः॥
आकाशप्रदीपः। पुं। तुलायां दीयमा
ने राधादामोदरसम्प्रदानके आ-
काशदीपे॥
आकाशमांसी। स्त्री। निरालम्बाया-
म्। सूक्ष्मजटामांस्याम्। केदारे

उत्पत्तिरस्याः ॥

आकाशमूली । स्त्री । पाना इतिगौड भषाप्रसिद्ध कुम्भिकायाम् ॥ जलवल्कले ॥

आकाशरत्ती । पुं । प्रगण्डिस्थितप्रणिधौ । दुर्गवहिः प्राचीरोपरिस्थिते चरे ॥ इतिराजधर्मः । मत्वर्थीयइन् ॥

आकाशवल्ली । स्त्री । अमरवेल आकाशवेल इतिख्याते लताविशेषे । खवल्ल्याम् ॥

आकाशवाणी । स्त्री । अशरीरिवाणीवाचि । दैववाण्याम् ॥

आकाशसलिलम् । न । दिव्योदके ॥

आकाशास्तिकायः । पुं । अजीवपदार्थे ॥ सच लोकाकाशास्तिकायो ऽलोकाकाशास्तिकायश्चेति द्विरूपः ॥

आकिञ्चन्यम् । न । अकिञ्चनिमनि । अकिञ्चनतायाम् ॥ भावे ष्यञ् ॥

आकीर्णम् । त्रि । व्याप्ते । सङ्कीर्णे । नानाजातीयसम्मिलिते ॥ आकीर्य्यतेस्म । कृविक्षेपे । क्तः ॥

आकुञ्चनम् । न । न्यायमते पञ्चप्रकारकर्म्मान्तर्गतकर्म्मविशेषे । सङ्कोचे ॥

आकुञ्चितः । त्रि । आभुग्ने ॥

आकुलम् । त्रि । व्यस्ते । व्याकुले ॥ क्षुभिते । लोले ॥ आकोलति । कुल संस्थाने । इगुपधेतिकः ॥

आकुलाकुलम् । त्रि । आकुलप्रकारे ॥ प्रकारेगुणवचनस्येति द्विर्भावः ॥

आकुलितम् । त्रि । क्षोभिते । आकुलीकृते । सञ्चालिते ॥

आकूतम् । न । अभिप्राये । आशये ॥ इतिहेमचन्द्रः ॥

आकूतिः । स्त्री । स्वायम्भुवमनोः कन्यायाम् ॥ क्रियायाम् ॥

आकृतिः । स्त्री । रूपे । वपुषि । जातौ ॥ अवयवसंस्थानविशेषे ॥ आकृतिर्जातिलिङ्गाख्या । न्यायसूत्रम् । जातिलिङ्गमित्याख्या यस्याः जातेर्गोत्वादेर्हि सास्नादिसंस्थानविशेषो लिङ्गम् । तस्यच परम्परया द्रव्यवृत्तित्वम् । जातिर्द्रव्यासमवायिकारणतावच्छेदिकालिङ्गं धर्मो यस्याः सेत्यर्थ इति कश्चित् ॥ द्वाविंशत्यक्षरायांछन्दसि ॥ आकरणम् । कृञ्० । क्तिन् ॥ आक्रियतेऽयंगौरयमश्व इतिव्यज्यतेऽनेनेति आकृतिःसंस्थानम् ॥

आकृतिच्छत्रा । स्त्री । घोषातक्याम् ॥

आकृष्टम् । त्रि । आकर्षिते । कृताकर्षणे ॥ आकृष्यतेस्म । कृषविलेखने क्तः ॥

आकेकरा । स्त्री । दृष्टिविशेषे ॥ यथा । दृष्टिराकेकराकिञ्चित्स्फुटापाङ्गे प्र

सारिता'। मौलिताट्टीपुरालोकैता राध्यावर्त्तनोत्तरेति नृत्यविलासो-क्तेः॥

आकोकेर: । पुं । मकरराशौ॥

आकौशलम् । न । अकौशले ॥

आक्रन्द: । पुं । क्रन्दने ॥ आह्वाने ॥ मित्रे ॥ दारुणयुद्धे ॥ भ्रातरि ॥ शब्दे ॥ पार्ष्णिग्राहात् परस्मिन्राज्ञि ॥ देशाक्रमणाद्याचरत: पार्ष्णिग्राहस्ययो नियामकस्तस्याऽनन्तरो नृपतिरित्यर्थः ॥ न । दुःखिनांरोदनस्थाने ॥ सारावरुदिते ॥ आक्रन्दनम् आक्रन्दते आक्रन्द्यतेऽस्मिन् आक्रन्दयतिवा । क्रदिआह्वानेरोदनेच । आङः क्रन्दसातत्ये । घञ् ॥ पचाद्यच्वा ॥

आक्रन्दिक: । त्रि । दुःखिनांरोदनस्थाने गमनकर्त्तरि ॥ आक्रन्दंधावति । आक्रन्दाच्चेतिठञ् ॥ स्त्री । ङीप् ॥

आक्रम: । पुं । अधिक्रमे ॥ आक्रमणम । आङ् पूर्वात्क्रमेर्भावेघञ् ॥

आक्रमणम् । न । आक्रमकरणे । व्यापने ॥ आङ:क्रमेर्भावेल्युट् ॥

आक्रान्त: । त्रि । कृताक्रमणे । व्याप्ते । अभिभूते ॥ आक्रामतिस्म । क्रमुपादविक्षेपे । क्तः ॥

आक्रीड: । पुं । उद्याने । राज्ञ:क्रीडासाधनेसाधारणेवने ॥ लीलास्थाने ॥ आक्रीडन्त्यत्र । क्रीडृविहारे । हलश्चेतिघञ् ॥

आक्रुष्ट: । त्रि । निन्दिते ॥ क्रोशतेःकर्मणिक्तः । व्रश्चेतिषत्वेष्टुत्वम् ॥

आक्रोश: । पुं । अभिशापे ॥ शापे ॥ विरुद्धानुध्याने ॥ आक्रोशनम् । क्रुशआह्वाने । भावे घञ् ॥

आक्रोशनम् । न । अभीषङ्गे ॥ आक्रोशे ॥ आङ्पूर्वात्क्रुशेर्ल्युट् ॥

आचद्यूतिकम् । न । अचद्यूतेन निर्वृत्तेवैरे ॥ निर्वृत्तेचद्यूतादिभ्यइति ठक् ॥

आचपाटिक: । पुं । अचदर्शके । धर्म्माध्यक्षे ॥

आचपाद: । पुं । नैयायिके ॥ न । न्यायशास्त्रे ॥

आचार: । पुं । आचारणायाम् ॥

आचारणम् । न । मैथुनार्थाक्रोशे ॥ चरसञ्चलने । प्रयोजकण्यन्ताल्ल्युट् ॥

आचारणा । स्त्री । मैथुनंप्रत्याक्रोशे । परस्त्रीनिमित्तंपुंस: परपुरुषनिमित्तंस्त्रियावा दूषणे ॥ यथा कृताऽगम्यागमनस्त्वं स्थानान्तरंगच्छेति ॥ आचारणम् । चरे:प्रयोजकण्यन्तात् युच् ॥

आचारित: । त्रि । अभिशस्ते । मिथ्यापवाददूषिते ॥ परस्त्रियां परपुरुषे वा

मैथुनं प्रति मिथ्या दूषिते । आक्षार्यते स्म । क्षरेर्ण्यन्तात् क्तः । आक्षारः सञ्जातोऽस्येति तारकादित्वादितच् वा ।

आक्षिकः । पुं । आचेरगाछ इति गौड भाषा प्रसिद्धे आछुकवृक्षे । रञ्जनद्रौ । त्रि । अक्षदेविनि । अक्षैर्दीव्यति अदेवीत् देविष्यति वा तैर्जयति वा । तेन दीव्यतीति ठक् । अक्षैर्जिते ।

आक्षिप्तः । त्रि । क्षिप्ते । आक्षिप्यते स्म । क्षिपेः क्तः ।

आक्षीवः । पुं । शोभाञ्जने । अक्षीवे । त्रि । मत्ते । आक्षीवति आक्षीवयति वा । क्षीवृ मदे । पचाद्यच् ।

आक्षेत्रज्ञम् । न । अक्षेत्रज्ञे ।

आक्षेपः । पुं । अपवादे । भर्त्सने । आकृष्टौ । धनादिन्यासकरणे । काव्यार्थालङ्कृतिप्रभेदे । यथा । निषेधोवक्तु मिष्टस्य यो विशेषाभिधित्सया । वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधामतः ॥ विवक्षितस्य प्राकरणिकत्वा दनुपसर्जनीकार्यस्याशक्यवक्तव्यत्व मतिप्रसिद्धत्वं वा विशेषं वक्तुं निषेधो निषेध इव यः स वक्ष्यमाणविषय उक्तविषयश्चेति द्विधा आक्षेपः । क्रमेणोदाहरणम् । एण्हि किं

पि कीए कएण णिक्किव भणामि अलमहवा । अविआरिअकज्जारम्भआरिणी मरउ ण भणिस्सम् । अस्य संस्कृतं यथा । एएहि किमपि कस्याः कृते निष्कृप भणामि अलमथवा । अविचारितकार्यारम्भकारिणी म्रियतां न भणिष्ये । ए इत्यव्ययं सानुनयसम्बोधने एहि आगच्छ । एण्हिं वीतिपाठे इदानीमपीत्यर्थः । अव वेतिपूर्वाक्षेपे । अलं न भणिष्यामीत्यर्थः । खेदातिशयात् पुनरुक्तिः । अलंव्यर्थमिति । अविचारितेतिस्वभावमनालोच्य अनुरागवर्द्धनपरेत्यर्थः । अत्रविरहदुर्दशातिशयोवक्ष्यमाणोवक्तु मशक्य तयानिषिद्धइत्याक्षेपालङ्कारः । ज्योत्स्नामौक्तिकदामचन्दनरसः शीतांशुकान्तद्रवः कर्पूरं कदलीमृणालवलयान्यम्भोजिनी पल्लवाः । अन्तर्मानसमास्त्वया प्रभवतातस्याः स्फुलिङ्गोत्करव्यापाराय भवन्ति हन्तकिमनेनोक्तेन न ब्रूमहे इति । आक्षेपणम् । क्षिपमेरणे । घञ् ।

आक्षेपकः । पुं । निन्दाकरे । व्याधे । अनिलव्याधिविशेषे । तस्य कारणलक्षणे यथा । यदातु धमनीः सर्वाः कुपितोऽभ्येतिमारुतः । तदाक्षिपत्या

मुहुर्मुहुर्दैन्यंमुहुश्चरः ॥ मुहुर्मुहुस्तदाक्षेपादाक्षेपकइतिस्मृतइति ॥ आक्षिपति । ण्वुल् ।

आक्षोटः । पुं । शैलपीलौ ॥ अक्षोट एव । स्वार्थे अण् ॥

आक्षोडः । पुं । अक्षोटवृक्षे ॥

आखः । पुं । खनित्रे ॥ आखनत्यनेन । खनु अवदारणे । खनेर्डः ॥

आखण्डलः । पुं । सहस्राक्षे ॥ आखण्डयति । खडि भेदने । वृषादिभ्यःकलच् ॥

आखनः । पुं । खनित्रे ॥ आखनत्यनेन । खनु॰ । खनो घचेति घः ॥

आखनिकः । पुं । चौरे ॥ शूकरे ॥ मूषिके ॥ देवताडवृक्षे ॥ त्रि । खनितरि ॥ आखनति । खनु॰ । आङि-पर्णिपनिपति खनिभ्यइति इकन् ॥ पुं । खनित्रे ॥ आखनत्यनेन । खनेडंडरइकइकवकावाच्याइतिइकप्रत्ययः ॥

आखनिकवकः । पुं । खनित्रे ॥ आखनत्यनेन । खनु॰ । इकवकप्रत्ययः ॥

आखरः । पुं । खनित्रे ॥ आखनत्यनेन । खनु॰ । खनेर्डडर इतिडर प्रत्ययः । डित्त्वसामर्थ्यादभस्यापिटेर्लोपः ॥

आखानः । पुं । आखने ॥ आखनन्त्यनेन । खनु॰ । खनोघचेतिचकाराद्घञ् ॥

आखुः । पुं । मूषिके ॥ शूकरे ॥ चौरे ॥ कृपणे ॥ यथा । विभवेसतिनैवात्ति नददातिजुहोतिन । तमाहुराखुंतस्मान्नंभुक्ताकृच्छ्रेणशुद्ध्यतीति ॥ देवताडवृक्षे ॥ आखनति । खनु॰ । आङ्परयोःखनिशृभ्यांडिच्चेतिकुः ॥

आखुकर्णपर्णिका । स्त्री । आखुपर्णीम् ॥

आखुकर्णी । स्त्री । मूसाकानीइतिभाषाप्रसिद्धायां भूमिचर्य्याम् । मूषककर्ण्याम् ॥ पाककर्णेतिङीष् ॥

आखुगः । पुं । गजानने । गणेशे ॥

आखुघातः । पुं । शूद्राद्यधमे ॥ आखुं हन्ति । हन॰ । बाहुलकादण् ॥

आखुपर्णिका । स्त्री । लताविशेषे । उपचित्रायाम् । वृषायाम् ॥ स्वार्थे कः ॥

आखुपर्णी । स्त्री । उंदुरकन्नी इतिप्रसिद्धायांमूषकपर्ण्याम् । वृषायाम् ॥ आखुः पर्णमस्याः । ततकर्णाकारपत्रत्वात् । पाककर्णेति ङीष् ॥ आखुपर्णी कटुस्तिक्ता कषाया शीतला लघुः । बिपाके कटुकामूत्रकफामयकृमिप्रणुत् ॥

आखुपाषाणः । पुं । पाषाणप्रभेदे ॥ आखुपाषाणनामायं लोह सङ्करकारकः । इतिराजनिर्घण्टः ॥

आखुभुक् । पुं । बिडाले ॥ आखून् भुङ्क्ते । भुजपालनाभ्यवहारयोः । क्विप् ॥

आखुरथः । पुं । गणेशे। आखूरथेऽस्य ॥

आखुविषघ्ना । पुं । देवताडवृक्षे । देवदाली लतायाम् ॥

आखेटः । पुं । मृगयायाम् । आखिद्यन्ते प्राणिनोऽत्र । खिदत्रासे । हलश्चेति घञ् ।

आखेटकः । पुं । मृगयायाम् । स्वार्थे-कन् ।

आखेटशीर्षकम् । न । सुडङ्ग इति गौडभाषाप्रसिद्धे कुट्टिमान्तरे । यथा । कपिशीर्षं द्रुमशीर्षं तथाचाखेटशीर्षकम् । इतिकुट्टिमभेदाःस्युःशाब्दिकैः समुदाहृता इति ।

आखेटिकः । पुं । विश्वकद्रौ । मृगयाकुशलकुक्कुरे ॥

आखोटः । पुं । अक्षोटे । पार्वतीये ।

आख्या । स्त्री । नाम्नि । संज्ञायाम् । उक्तौ । आख्यानम् । ख्याप्रकथने । आतश्चोपसर्गइत्यङ् ।

आख्यातम् । त्रि । कथिते । व्याख्याते । न । तिङि । क्रियाप्रधानमाख्यातमिति वैयाकरणाः । भावप्रधानमाख्यातमिति नैगमाः । आख्यायतेस्म । ख्या० । चक्षिङ आदेशोवा । क्तः ।

आख्याता । त्रि । प्रतिपादयितरि । वक्तरि तृच् ।

आख्यानम् । न । सौपर्णमैत्रावरुणाद्युपाख्याने । आङ्पूर्वात्ख्यातेर्ल्युट् ।

आख्यानकी । स्त्री । आख्यानकीतौजगुरूगश्चोजे जतावनेजेजगुरूगुरूश्चेदिति लक्षणलक्षितेवृत्ते ।

आख्यायिका । स्त्री । उपलब्धार्थकथायाम् । यथा । प्रबन्धकल्पनांस्तोकसत्यांप्राज्ञाःकथांविदुः । परम्पराश्रयायास्यात्सामताख्यायिका क्वचिदिति ॥ गद्यपद्यप्रबन्धे । त्रि । कथके । आचष्टे । चक्षिङःख्याञ् । ण्वुल् ।

आगतम् । त्रि । आयाते । उपस्थिते । प्राप्ते । गम० । क्तः ।

आगतिः । स्त्री । आगमने । क्तिन्नन्तः ।

आगन्तुः । त्रि । अतिथौ । आगमनशीले । अनियते । आगन्तूनामन्ते सन्निवेशः । आगच्छति । गम्लृगतौ । सितनिगमीतितुन् ।

आगन्तुकः । त्रि । अतिथौ । आहार्य्ये । अनित्यस्थायिनि । स्वार्थेकन् ।

आगमम् । न । तन्त्रशास्त्रे । अस्यार्थः । आगतंशिववक्त्रेभ्योगतञ्चगिरिजामुखे । मतंश्रीवासुदेवस्यतस्मादागममुच्यतेइति । तस्यलक्षणं यथा । सृष्टिश्चप्रलयश्चैवदेवतानांतथार्चनम् ।

साधनञ्चैव सर्वेषांपुरश्चरण मेवच । षट्कर्मसाधनंचैवध्यानयोगश्चतुर्विधः । सप्तभिर्लक्षणैर्युक्तमागमंतद्विदुर्बुधाः इति ॥ अपिच । पुं । सिद्धंसिद्धैः प्रमाणैस्तु हितं चात्रपरत्रच । आगमःशास्त्रमाप्तानामाप्तास्तस्यार्थवेदिनइति ॥ शास्त्रमात्रे । उपदेशपरम्परायाम् । आगतौ । साक्षिपत्रादौ । वेदे । प्रकृतिप्रत्ययानुपघातिनि कार्ये । एकादशभवने ॥ आगमनम् । गम्लृ॰ । ग्रहवृद्गनिश्चिगमश्चेत्यप् ॥

आगमनम् । न । आगतौ । आवना इतिभाषा ।

आगमवेदी । पुं । गौडपादाचार्ये । शङ्कराचार्यस्य परमगुरौ ।

आगमापायी । त्रि । उत्पत्तिविनाशवति । आगमापायौ विद्येतेऽस्य । इनिः ।

आगमार्थः । पुं । अद्वैतदर्शने ।

आगमावर्त्ता । स्त्री । त्रिकाटी इति गौडभाषा प्रसिद्धे क्षुपविशेषे । वृश्चिकाल्याम् ।

आगमितम् । त्रि । अधीते । पठिते ।

आगरा । स्त्री । स्वप्रपुरे । यथा । कालपीमन्दिरे बालपीनस्तनी जारपीतासवा लालपीतिप्रियम् । नागराजीमहामोदमेदस्विनी मागरामागतः साक्षज्ञालदीतियवनाधिकारप्रसिद्धोयंशब्दः ॥

आगवीनः । त्रि । गोःप्रत्यर्पणपर्यन्तं कर्मकर्त्तरि । आङ्मर्यादाभिविध्योरित्यव्ययीभावेउपसर्जनह्रस्वे चकृते आगवीन इतिखः । गुणावादेशौ ।

आगः । न । अपराधे । पापे । एनि । इण्गतौ । इण आग अपराधेचेत्यसुन् आगादेशश्च ।

आगस्कृत् । त्रि । अपराधिनि ।

आगस्त्यः । पुं । अगस्त्यतनये । अगस्त्यस्यापत्यम् । ऋष्यण् । बहुत्वे अगस्त्यः ॥ न । अगस्तिकुसुमादौ ।

आगाधम् । न । अगाधे । अतिगभीरे ।

आगामी । त्रि । आगन्तुके । प्रवासिनि ॥ भविष्यत्काले ॥ आगमिष्यति । गम्लृ॰ । आङिणिदितिगमेरिनिः ।

आगारम् । न । मन्दिरे । गृहे ॥ अग्यते । अगकुटिलायांगतौ । कर्मणि भावेवाघञ् । आगमृच्छति । ऋगतौ । कर्मण्यण् ।

आगूः । स्त्री । प्रतिज्ञाने । आगमनम् । आगमेः क्विपि गमः क्वावित्यन्तलोपे ऊचगमादीनामित्यूकारादेशः । ओःसुपीतियणि अमि शसिच । आगुवम् आगुवः । शेषंवधूवत् ॥

आग्निमारुतम् । न । अग्निमरुतोर्देव

ग्निमरुतौदेवते अस्य । साग्न्देवते स्यण्। देवताद्वन्द्वे चेत्युभयपदवृद्धि: ।
आग्निष्टोमिक: । पुं । अग्निष्टोमविदि ॥ अग्निष्टोममधीते वेदवा । क्रतूक्थादीतिठक् । ग्रन्थे । अग्निष्टोमस्य व्याख्यानस्तत्र भवोवा । क्रतुयज्ञेभ्यश्चेति ठञ् ।
आग्नीध्र: । पुं । प्रियव्रतपुत्रेन्वपतिविशेषे । आग्नीध्रोनामन्वपतिर्जम्बूनाथोऽभवो:कुले । तज्जातन्वपसंज्ञाभि: कथ्यन्ते भारतादय: । न । होतृगृहे । अग्निमिन्धे । भिइन्धीदीप्तौ । क्विप् । नलोप: । अग्नीध: स्थानम् । अग्नीध:शरणेरञ्भञ्च । तात्स्थ्यात्तद्वृत्विगप्याग्नीध्रउच्यते । आग्नीध्रसाधारणादञ् इत्यञि तु ङीपि आग्नीध्रीति वोध्यम् ।
आग्नेयम् । न । स्वर्णे । रक्ते । महापुराणे । यथा । अग्निनोक्तं पुराणं यदाग्नेयं वेदसम्मितम् । भुक्तिमुक्तिप्रदं पुण्यं पठतांशृण्वतांन्वणामिति । त्रि । ऋषिविशेषे । अग्निहिते । अग्निदेवताके । स्थालीपाके । अग्निर्देवता अस्य अग्नायी देवता अस्यवा । अग्नेर्ढगितिढक् । भस्याढइतिपुंवद्भाव: ।
आग्नेयास्त्रम् । न । अग्निदेवताके अस्त्रविशेषे ।
आग्नेयी । स्त्री । अग्निकोणे । अग्नियोषिति । स्वाहायाम् ॥ अग्निदेवताकायामृचि । ङीप् ।
आग्रयणम् । न । नवसस्येष्टयाम् ।
आग्रह: । पुं । अनुग्रहे । आसङ्गे । आक्रमे ॥ ग्रहणे ॥ आग्रहणम् । ग्रहउपादाने । ग्रहवृद्दृनिश्चेत्यप् । आवेशे ।
आग्रहायण: । पुं । मार्गशीर्षे । आग्रहायण्या युक्तापौर्णमासी अस्मिन्नस्मिन् । ज्योत्स्नादित्वादण् ।
आग्रहायणिक: । पुं । मार्गशीर्षे । आग्रहायण्या मृगशिरसा युक्तापौर्णमासी अस्मिन् । आग्रहायणयश्वत्थाट्ठक् । मतान्तरे वत्सराद्यमासोयम् ।
आग्रहायणी । स्त्री । मार्गपूर्णिमायाम् । मृगशिरोनक्षत्रे । अग्रेहायनमस्या: । मतभेदे मार्गशीर्षमारभ्यवर्षप्रवृत्ते: । प्रज्ञाद्यण् । पूर्वपदादितिणत्वम् । गौरादित्वान्ङीष् । आग्रहायणीपौर्णमासो तद्योगान्नक्षत्रमपितथा ।
आग्रहारिक: । पुं । अग्रदानिनि ॥
आघट्टक: । पुं । रक्तापामार्गे ।
आघाट: । पुं । सीमायाम् । अपामार्गे ॥
आघात: । पुं । वधस्थाने ॥ आघट्टनायाम् । हनने । चोट इतिभाषा । आहन्यते अत्रआहननंवा । हन० ।

घञ् ॥

आघातनम् । न । वधस्थले ॥ हनने ॥

आघारः । पुं । घृते । वैदिकानांकर्मविशेषे । ऋग्वेदिनांस्रुवेणचतुराज्यं स्रुचिदत्त्वा प्रजापतिंमनसाध्यात्वातूष्णी मग्नेर्वायव्यकोणादारभ्याग्नेयीं यावदविच्छिन्नाघृतधारा दीयते पुनश्च स्रुवेण चतुराज्यं स्रुचिदत्त्वाइन्द्रं ध्यात्वा अग्नेर्नैर्ऋतींदिशमारभ्य ऐशानीं दिशमवधीकृत्य सन्तत्या घृतं चार्यते तस्मिन् कर्मणि ॥ यजुर्वेदिनांतु स्रुवेणमन्त्रोच्चारणपूर्वकं पूर्वोक्तक्रमेणघृतधारादाने ॥ इतिपशुपतिः ॥ आघरणम् । घृक्षरणदीप्त्योः । घञ् ॥ सेके ॥

आघारणम् । न । सेचने ॥

आघूर्णितः । त्रि । आहते ॥ घूर्णिते । भ्रामिते ॥ घूर्णितनेत्रादौ ॥

आघोष्टा । त्रि । ध्वन्यात्मकशब्दकारि ॥

आघ्राणम् । न । तृप्तिसामान्ये ॥ गन्धग्रहणे ॥ आघ्रायतेस्म । घ्रागन्धोपादाने । क्तः । नुदविदेतिवा नत्वम् ॥

आघ्रातम् । त्रि । शिङ्घिते । घ्राणविषयीकृते ॥ आक्रान्ते ॥ तृप्ते ॥ आघ्रायतेस्म । घ्रा० । क्तः । नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्यामितिपाक्षि

को नत्वाभावः ॥

आङ् । आ । सीमायाम् । मर्यादायाम् । तेन विनेत्यर्थे ॥ यथा । आसमुद्रक्षितीशानाम् ॥ अभिव्याप्तौ । तेनसहेत्यर्थे ॥ यथा । आकुमारं यशः ॥ क्रियायोगे । धातुनायोगे सतियोर्थोजायते तत्र ॥ यथा । आरोहति ॥ ईषदर्थे ॥ यथा । आपिङ्गलः ॥ अतति । अतसातत्यगमने । बाहुलकात् डाङ्प्रत्ययः ॥

आङ्गम् । न । कोमलाङ्गे ॥ त्रि । अङ्गाधिकारीये ॥ अङ्गसम्बन्धिनि ॥ अङ्गस्येदम् । अण् ॥

आङ्गारम् । न । अङ्गारवृन्दे ॥ अङ्गाराणां समूहः । भिक्षादिभ्योऽण् ॥

आङ्गिकः । त्रि । माहङ्गिके ॥ अङ्गनिष्पन्नभावव्यञ्जकभ्रूक्षेपादौ ॥ अङ्गजाते ॥ अङ्गेनहस्तादिना निर्वृत्तम् । निर्वृत्तेऽक्षद्यूतादिभ्यइति ठक् ।

आङ्गिरसः । पुं । वाचस्पतौ । जीवे ॥ अङ्गिरसोऽपत्यम् । ऋष्यन्धकेत्यण् ॥ बहुत्वे अत्रिभृग्वित्यणो लुक् । आङ्गिरसः आङ्गिरसौ अङ्गिरसः ॥

आचक्षाणः । त्रि । ब्रुवाणे ॥

आचमः । पुं । आचमने । जलप्राशने ॥

आचमनम् । न । उपस्पर्शे ॥ वैधकर्मारम्भात् पूर्वं वारत्रयजलपानामन्तरं-

यथा क्रमाष्टाङ्गस्पर्शरूपशुद्धिजनक-
क्रियायामित्यर्थः । अत्र प्रमाणम् ।
प्रक्षाल्यपाणीपादौचत्रिः पिबेदम्बु-
वीक्षितम् । सम्मृज्याङ्गुष्ठमूलेन द्विः
प्रमृज्यात् ततोमुखम् । संहत्यति-
सृभिः पूर्बमास्यमेव मुपस्पृशेत् । अ
ङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तर
म् ॥ अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे
पुनःपुनः ।नाभिंकनिष्ठाङ्गुष्ठेनहृदयन्तु
तलेनवै । सर्वाभिस्तुशिरःपश्चात् वा
हूवाग्रेणसंस्पृशेत् । इतिदक्षः । आ
यतं पर्वणांकृत्वागोकर्णाकृतिवत् क
रम् । संहताङ्गुलिनातोयंगृहीत्वा
पाणिनाद्विजः । मुक्ताङ्गुष्ठकनिष्ठाभ्यां
शेषेणाचमनंचरेत् । माषमज्जनमा
त्रास्तुसंगृह्यत्रिःपिबेदपः । इतिभार
द्वाजः ॥ दक्षिणेनोदकंपीत्वावामेन
संस्पृशेद्बुधः । तावन्नशुध्यतेतोयंयाव
द्वामेन नस्पृशेदितिदेवीभागवतम् ।
अद्भिस्तुप्रकृतिस्थाभिर्हीनाभिः फेन
बुद्बुदैः । हृत्कण्ठतालुगाभिस्तुयथा
संख्यंद्विजातयः ॥ शुद्धेरन् स्त्रीचशूद्र
श्चसकृत्स्पृष्टाभिरन्ततः । इतियाज्ञव
ल्क्यः । स्त्रियास्तैदशिकंतीर्थं शूद्र-
जातेस्तथैवच । सकृदाचमनाच्छु
द्धिरेतयोरेवचोभयोरिति । चमुअ
दने । भावे ल्युट् । अदनंचात्र जल

स्यैवेतिव्याख्यातारः । आचम्यते अ
नेनात्र । अधिकरणे वाल्युट् ।

आचमनकः । पुं । निष्ठीवनपात्रे । पत
द्ग्रहे । प्रोगण्ठे ।

आचमनीयम् । न । मुखप्रक्षालनार्थ
जले । यथा । उदकंदीयतेयत्तुप्रस
न्नंफेनवर्जितम् । आचमनायदेवेभ्य
स्तदाचमनमुच्यतइति ॥ कालिका
पुराणम् ।

आचरणम् । न । आचारे । व्यवहारे
। आङ्पूर्वाच्चरतेर्भावे ल्युट् । रथा
दौ ॥ आचरतिगच्छत्यनेनेतिकर
णे ल्युट् ।

आचरितम् । त्रि । कृताचरणे । व्यवहृ
ते ॥ पारिभाषिकन्तद्यथा । दारपुत्र
पशून् हत्वाकृत्वाद्वारोपवेशनम् । य
त्रार्थी दाप्यतेर्थंस्वंतदाचरितमुच्य
ते । इति ।

आचर्य्यः । पुं । गन्तव्येदेशे । चरेराङि
चागुराविितियत् ।

आचान्तः । त्रि । कृताचमने ।

आचामः । पुं । आचमने । भक्तमण्डे
। मासरे । आचम्यते । चमु० । अक
र्त्तरीतिघञ् । वृद्धिः । भावेवाघञ् ।

आचारः । पुं । मन्वाद्युक्तस्नानाचमना
दिव्यवहारे । चरित्रे । शीले । सर्व
त्रास्यप्राधान्यं यथा । सर्वागमानामा

चार:प्रथमं परिकल्पते। आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युत इति महाभारतम्। आचार: परमो धर्म:श्रुत्युक्त: स्मार्त्त एव चेति मनु:। अपि च। आचाराद्विच्युतो विप्रो न वेदफलमश्नुते। आचारेण तु संयुक्त: सम्पूर्णफलभाग्भवेत्। एवमाचारतो दृष्ट्वा धर्मस्य मुनयो गतिम्। सर्वस्य तपसो मूलमाचारं जगृहु:परमिति च। आचर्यते। चर०। घञ्।

आचारवर्जित:। त्रि। आचारवहिर्भूते। आचारेण वर्जित:। आचारहीने। लोकवाह्यव्यवहर्त्तरि॥

आचारहीन:। त्रि। गुर्वतिथिप्रत्युत्थानाद्याचारवर्जिते। आचारेण आचाराद्वा हीन:। आचारहीनं न पुनन्ति वेदा यद्यप्यधीता: सह षड्भिरङ्गै:।

आचारी। त्रि। आचारवति। श्रुतिस्मृत्युक्ताचारयुक्ते। स० इनि:।

आचारी। स्त्री। हिलमोचिकायाम्।

आचार्य्य:। पुं। मन्त्रव्याख्याकृति। साङ्गकृत्स्नवेदाध्यापयितरि। यथाह मनु:। उपनीय तु य:शिष्यं वेदमध्यापयेद्द्विज:। सकल्पं सरहस्यञ्च तमाचार्यं प्रचक्षते। इति। मोक्षसाधनस्योपदेष्टरि श्रीगुरौ॥ सचोक्त:कुलार्णवे। स्वयमाचरते शिष्यानाचारे स्थापयत्यपि। आचिनोति हि शास्त्रार्थमाचार्य्यस्तेन कथ्यते॥ आम्नायतत्त्वविज्ञानाच्चराचरसमासत:। यमादियोगसिद्धत्वादाचार्य इति कथ्यते। इति। श्रीशङ्कराचार्ये॥ द्रोणाचार्य्ये॥ आचर्यते। चरेर्ण्यत्॥

आचार्य्यकम्। न। आचार्यकर्म्मणि॥ योपधाद्गुरूपोत्तमाद्वुञ्।

आचार्य्यमिश्र:। पुं। गौरवान्विते॥

आचार्य्या। स्त्री। स्वयंमन्त्रव्याख्यानकारिण्याम्। पुंयोगाभावाञ्चानुगागमोङीष्च। टाप्॥

आचार्य्यानी। स्त्री। आचार्य्ययोषिति॥ आचार्यस्य स्त्रीत्यर्थे इन्द्रवरुणभवशर्वेत्यादिना आचार्यशब्दस्यानुगागमोङीष्च। आचार्यादणत्वंचेति णत्वाभाव:॥

आचिख्यासा। स्त्री। आख्यातुमिच्छायाम्॥

आचित:। पुं। शकटोन्मये। शाकटे भारे। छकडेकाभार इति भाषा॥ अयुतपले॥ न। दशभारपरिमाणे। २५ मण इति भाषा। त्रि०। सङ्गृहीते। छन्ने। व्याप्ते। आचीयते स्म। चिञ् चयने। क्त:॥ ग्रथिते। गुम्फिते।

आच्छन्नम्। त्रि। आच्छादिते। आवृ

ते ।

आच्छादः । पुं । वस्त्रे । इतिहेमचन्द्रः ।

आच्छादनम् । न । पिधाने । वस्त्रे । अ
पवृतिमात्रे । छादयति । छद अपवार
णे आङ्पूर्वः । णिजन्तात् ल्युट् । आच्छा
द्यतेऽनेनवा ।

आच्छादितः । त्रि । आवृते । कृताच्छा
दने ।

आच्छिन्नः । त्रि । बलाद्धृते ।

आच्छुकः । पुं । आचगाछ इतिगौड
भाषा प्रसिद्धे वृक्षविशेषे । पक्षी
के । रत्नद्रौ ।

आच्छुरितम् । न । सशब्दहास्ये । नख
वाद्ये । नखाघातविशेषे । आच्छुर
णम् । छुर च्छेदने । क्तः ।

आच्छुरितकम् । न । सशब्दहासे । प
रस्यामर्षजनकेहास्ये । नखाघातवि
शेषे । आच्छुरणमपरच्छेदनम् । आ
छुरेर्भावेक्तः । स्वार्थेकः ।

आच्छोदनम् । न । मृगयायाम् । आ
च्छिद्यन्तेऽत्र । छिदिर्० । ल्युट् । पृषो
दरादिः ।

आज्यम् । न । घृते । त्रि । अजस्यमांसा
दौ । यथा । तिलजतैलसुपाकसुपा
चितंकासमर्दसुरसेविमर्दितम् । सू
पभूपभवधूपधूपितं वह्निमान्द्यजरणं
कृतापहम् । याहृशाधातवोनृणाम्
जानामपि तादृशाः । अतोधातुविह
ह्यर्थमाजमांसंप्रशस्यते । इति । अ
जस्येदमित्यर्थे अण् ।

आजकम् । न । छागवृन्दे । अजानांस
मूहः । गोत्रोचोष्ट्रेतिवुञ् ।

आजकारः । पुं । भेरीवृषे । शिवस्यवृ
षे ।

आजगवम् । न । शिवस्यधनुषि । अ
जगवे । प्रज्ञाद्यण् ।

आजन्मसुरभिपत्रः । पुं । मरुवके ।

आजमीढः । पुं । युधिष्ठिरपाण्डवे ।
स्वार्थेऽण् ।

आजानम् । न । देवलोके । स्वभावे ।

आजानदेवः । पुं । देवताविशेषे ।
यथा । सृष्टेराजननादादौ देवत्वंये
प्रपेदिरे । आजानदेवास्तेत्रस्युः पू-
र्वेभ्यः सूक्ष्ममूर्त्तयःइति । पूर्वेभ्यः पू
र्वपूर्वेभ्यः । अपिच । कल्पादावेवदेव
त्वंगता आजानदेवता इति ।

आजानुबाहुः । त्रि । जानुपर्यन्तदीर्घ-
बाहुविशिष्टे । यथा । आजानुबाहुः
सुशिराः सुललाटः सुविक्रम इति
रामायणम् ।

आजानेयः । पुं । स्त्री । कुलीनाश्वे । शो
भनाश्वे । यथा । शक्तिभिर्भिन्नहृद-
याः स्खलन्तश्चपदेपदे । आजानन्ति
यतः संज्ञामाजानेयास्ततः स्मृताः ।

इत्यस्यशासनम्। अजनम्। अजगतिक्षेपणयोः। घञ्। आजेन क्षेपेण आनेयः प्रापणीयः आयत्तोवा।

आजिः। स्त्री। समभूमौ। सङ्ग्रामे। आक्षेपे। क्षणे। मर्यादायाम्। यथा। आजेः शरणम्। अजन्त्यस्याम्। अज०। अज्यतिभ्याञ्चेतीण्। अजनम्। इणजादिभ्यइतीण् विधानसामर्थ्याद्वजेर्नवी। अन्यथा। आदिभ्यइत्येवावक्ष्यत्। बहुलंतणीति वा॥

आजीवः। पुं। जीविकायाम्। आजीव्यते अनेन। जीवप्राणधारणे। हलश्चेति घञ्।

आजीवी। पुं। एकदण्डिनि।

आजीव्यम्। न। उपजीव्ये।

आजुः। स्त्री। वेतनंविनाकर्मकर्त्तरि। रेफान्तः।

आजूः। स्त्री। वेतनं विनाकर्मकर्त्तरि। विष्टायाम्॥ वेठी वेठु इ० हिमस्रेणीप्रसिद्धम् वेगारीत्यन्यत्र॥ आजवति। जुगतौ। क्विब्वचिप्रच्छ्रीतिक्विप् दीर्घौ। छठादभृतिकः क्लेशोविष्टिराजूश्चकीर्त्यते।

आज्ञप्तः। त्रि। आदेशिते। प्राप्ताज्ञे।

आज्ञा। स्त्री। निदेशे। शासने। लक्ष्मीहृदयस्थाने। आज्ञानम्। आज्ञावबोधने। आतश्चोपसर्गइत्यङ्। टाप्॥

आज्ञाकारी। त्रि। आज्ञानुवर्त्तिनि। आज्ञयाकर्मकारिणि।

आज्ञाचक्रम्। न। भ्रुवोर्मध्ये। षट्चक्रान्तर्गतषष्ठचक्रे। आज्ञासंज्ञकं चक्रम्। यथा। आज्ञाचक्रंतदूर्द्ध्वंतु आत्मनाधिष्ठितंपरम्। आज्ञासङ्क्रमणंतत्रतेनाज्ञेति प्रकीर्त्तितम्। तत्र निहितचित्तस्यपुरुषस्यसर्वपदार्थसाक्षात्कारेण एवं भूतमेवंवर्त्तते एवंभविष्यतीतिज्ञानेन आज्ञायाइतः परंत्वयैवंकर्त्तव्यमिति परमेश्वराज्ञायाः सङ्क्रमणंभवति तेनहेतुनातदाज्ञाचक्रमितिकीर्त्तित मित्यर्थः।

आज्ञापकः। त्रि। आज्ञाकर्त्तरि।

आज्ञापत्रम्। न। आदेशलिपौ। निदेशलिखने। हुकम्नामा इतिपारस्यभाषा।

आज्ञापनम्। न। विज्ञापने। जनावना इति भाषा।

आज्ञातः। त्रि। आज्ञातिविशिष्टे। लब्धाज्ञे।

आज्यम्। न। घृते। आअज्यतेऽनेन। अञ्ज्व्यक्तिम्रक्षणकान्तिगतिषु। आङ्पूर्वादञ्जेः संज्ञायामितिक्यप्। आअनक्त्यनेनवा। श्रीवासे।

आज्यपाः। पुं। पुलस्त्यसुतनयेषु वैश्य।

नापिहृषु । आज्यंपिबति । पाबाने । क्विप् ।

आज्यभागः । पुं । वैदिकनामाहुतिविशेषे । तत्र । ऋग्वेदिनामग्नेरुत्तरभागे स्रुवेणाग्निसम्प्रदानक घृताहुतिः । तद्दक्षिणभागे सोमसम्प्रदानकाहुतिश्च । यजुर्वेदिनान्तुअग्नेरुत्तरदक्षिणयोः पश्चिमादिप्राच्यन्तघृतधारेति पशुपतिः ।

आज्यस्तोत्रम् । न । सामगानां प्रातःसवनेगायत्रसाम्नामीयमानेषु चतुर्षुस्तोत्रेषु ।

आञ्जनेयः । पुं । हनूमति । यथा । उल्लङ्घ्य सिन्धोः सलिलं सलीलं यः शोकवह्निं जनकात्मजायाः । आदाय तेनैव ददाह लङ्कां नमामि तं प्राञ्जलिराञ्जनेयमिति । अञ्जनायाः अपत्यम् । स्त्रीभ्योढक् ।

आञ्जिनेयः । पुं । अञ्जनधारी इतिभाषाप्रसिद्धे जन्तुविशेषे । इतिशब्दमाला ।

आटरूषः । पुं । वृषे । वासके । अटरूषएव । स्वार्थेऽण् ॥

आटिः । पुं । शरारिपक्षिणि । आअटति । अटगतौ । इन् ।

आटिकी । स्त्री । अनुपजातपयोधरादिस्त्रीलक्षणायाम् ॥ गृहान्तराद्यटनार्हत्वादाटिकी ।

आटिक्यः । त्रि । अटनायप्रवृत्ते ॥

आटीकनम् । न । वत्सानांगमने ॥ आ ईषत् । टीकृगतौ । ल्युट् ।

आटीकरः । पुं । वृषे ॥

आटीकनम् । न । वत्सानांक्रीडाख्यव्याम् ॥

आटोपः । पुं । दर्पे । संरम्भे ॥ आध्माने । उदरेवायुजन्यगुडगुडाशब्दे ।

आडम्बरः । पुं । तूर्यस्वने । पक्ष्माणि । संरम्भे । कोपे । गजगर्जिते । युद्धपटहे । हर्षे । आरम्भे ॥ दर्पे । - यथा । असारस्यपदार्थस्यप्रायेणाडम्बरोमहान् । नहितादृक् ध्वनिः-स्वर्णे यादृक्कांस्येप्रजायते इति । आडम्ब्यते । डम्बिक्षेपे । चु० । घञ् । भावेवा । आडम्बंराति रायतिवा । आतोनुपेतिकः । मूलविभुजेतिवाकः । आडम्बयतिवा । बाहुलकादरन् ॥

आडिः । स्त्री । शरालिखगे । स्वनाम्नाख्याते मत्स्यविशेषे । इति गौडाः । आअडति । अडउद्यमने । इन् ॥

आडिका । स्त्री । शरारिविहगे ।

आडी । स्त्री । शरालिपक्षिणि । कृदिकारादितिङीष् ।

आडूः । पुं । उडुपे । भेले । जलप्रवद्ध्ये । डोंगा डोंगी इतिभाषाप्रसिद्धे ।

अणति । अणशब्दे । अणोडश्चेत्युः ॥

आढकः । पुं । न । धान्यमानभेदे । सर्वतोदशाङ्गुलमाने । प्रस्थचतुष्टये ॥ चतुःप्रस्थमथाढकमित्युक्तेः ॥ चतुःपुष्कलमितेधान्यमानपात्रे । पुष्कलानितुचत्वारिआढकः परिकीर्त्तित-इतिवचनात् । द्रोणचतुर्थभागइति लीलावती ॥ अष्टमुष्टिर्भवेत्कुञ्चिरित्यादिवचनात् षट्पञ्चाशदधिकद्विशतमुष्टिर्भवति । व्यवहारे षोडशसेरोविंशतिसेरोवा । वैद्यकमते अष्टशरावपरिमाणम् । तत्पर्यायः । पात्रम् कंसम् भाजनमितिपरिभाषा ॥ अपचयविवक्षायामाढकिकेप्यपिस्यादितिसारसुन्दरी ॥

आढकिकः । त्रि । आढकपरिमितव्रीह्यादिवापयोग्येक्षेत्रे । आढकस्यवापः । तस्यवापइतिठञ् । आढकंपचति । सम्भवत्यवहरतिपचतीतिठञ् । टिड्ढेतिङीप् आढकिकी ॥

आढकी । स्त्री । शमीधान्यविशेषे । तुवरीम् । अरहर इतिभाषा । अस्या गुणा यथा । आढकीतुवराक्षामधुराशीतलालघुः । ग्राहिणी वातजननीवर्ण्यापित्तकफास्रजिदिति । त्रि । परिमाणान्तरे । आसमन्तात्ढौकते ढौक्यतेवा । ढौकृगतौ । अच् घञ्वा । पृषोदरादिः । आढकमस्ति अस्याःपरिच्छेदकत्वेन । अर्शआद्यच्वा । गौरादित्वान्ङीष् ॥

आढकीनः । त्रि । आढकिके । आढकं सम्भवति अवहरति पचतिवा । आढकाचितपात्रात् खोन्यतरस्यामिति-खः ।

आढ्यः । त्रि । युक्ते । विशिष्टे ॥ यथा गुणाढ्यो धनाढ्यइति । सम्पन्ने । बहुधने । आध्यायति । ध्यै । आतइति कः । पृषोदरादिः । यद्वा । आढौकते जनायम् । ढौकृगतौ । बाहुलकात् ड्यः । गृहंशरीरंमानुष्यंगुणाढ्योह्याढ्यउच्यते ।

आढ्यचरः । त्रि । पूर्वमाढ्ये । आढ्योभूतपूर्वः । भूतपूर्वेचरट् । ङीपि आढ्यचरी ।

आणकः । त्रि । अधमे । अणकएव । स्वार्थेअण् ।

आणवम् । न । अणिमनि । अणुत्वे । अणोर्भावः । इगन्ताच्चेत्यण् ।

आणवीनम् । त्रि । अणव्ये । अणुधान्योद्भवे । चितक्षेत्रे ॥ अणूनां भवनं क्षेत्रम् । विभाषातिलमाषोमाभङ्गाणुभ्यइतिखञ् ।

आणिः । पुं । स्त्री । अक्षाग्रकीले । रथचक्राग्रस्थितकीले । [illegible] । को

टौ । सीमनि ।

आण्डम् । त्रि । अण्डसम्भवे ।

आण्डजः । त्रि । अण्डजे । स्वार्थे अण् ।

आण्डीरः । त्रि । आण्डवति । आण्डोस्त्यस्य । काण्डाण्डादीरन्नीरचावितीरच् ।

आतः । । । इतोपीत्यर्थे ।

आतङ्कः । पुं । रोगे । सन्तापे । शङ्कायाम् । मुरजध्वनौ । भये । ज्वरे ॥ आतङ्कनम् । तङ्किकृच्छ्रजीवने । घञ् । हलश्चेतिकरणे वा ॥

आतञ्चनम् । न । प्रतीवापे । गलितस्य स्वर्णादेर्द्रव्यान्तरेणाव चूर्णने । इति स्वामी । निःसरणमिति सुभूतिः । उपद्रव इति रायमुकुटः । द्रवद्रव्यप्रक्षेपणोचित चूर्णमिति सारसुन्दरी । दुग्धादेर्दध्यादिभावार्थं तक्रादि प्रक्षेपे । जवने । वेगे ॥ प्रापणे । आप्यायने । तञ्चुगतौ । ल्युट् ।

आततः । त्रि । विस्तृते । व्याप्ते । आसमन्तात्ततम् । आतन्यते वा । तनु विस्तारे । तनिमृङ्भ्यां किच्चेति तन् । आतन्यतेस्मवा । क्तः । अनुदात्तोपदेशेतिनलोपः ॥

आततायी । त्रि । वधोद्यते । सयथा । अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारापहारी च षडेते ह्याततायिनः ॥ आततायिनमायान्तं हन्यादेवाविचारयन् । नाततायिवधे दोषो हन्तुर्भवति कश्चनेति । द्रोहकारिणि । आततं यथा तथा अयितुं शीलमस्य ।

आतपः । पुं । प्रकाशे । द्योते । सूर्यालोके । अस्य गुणा यथा । आतपः कटुको रूक्षः स्वेदमूर्च्छातृषावहः । दाहवैवर्ण्यजननो नेत्ररोगप्रकोपणः इति । आतपति । तप सन्तापे । अच् ॥

आतपत्रम् । न । छत्रे ॥ आतपात् त्रायते । त्रैङ्पालने । आतोनुपेतिकः । सुपीतियोगविभागात्कः ।

आतपवारणम् । न । छत्रे । आतपस्य वारणम् ।

आतपाभावः । पुं । छायायाम् ।

आतपोदकम् । न । मृगतृष्णाजले । आतपेनोष्णोदके । आतपस्य उदकम् ।

आतरः । पुं । तरपण्ये । नद्यास्तरणाय देयेकपर्दकादौ । यथा ॥ आतरलाघवहेतोर्मुररिपुतरणीं तदावलम्बेहम् । अपणं पणमिह कुरुषे नाविक पुरुषे न विश्वास इति ॥ आतरन्त्यनेन । पुंसि संज्ञायामिति घः ।

आतर्पणम् । न । प्रीणने । तृप्तौ । मङ्गलालेपने । आङ्पूर्वात्तृपेर्भावे ल्युट् ।

आतापी । पुं । असुरविशेषे ।

आतायी । पुं । चिल्ले । चील इति प्र° ख्गे । आतायते तच्छीलः । तायृ सन्तानपालनयोः । सुप्यजातावितिणिनिः । यद्यप्यत्र वृत्तिकारादिभिरनुपसर्गे इत्युक्तम् तथापि भाष्ये उपसर्गे णिनिः स्वीकृतः ।

आतारः । पुं । तरपण्ये । आतरे ॥

आतिः । स्त्री । शरारिविहगे । आअतति । अत° । अज्यतिभ्यांचेतीण् । यद्वा । अतनम् । इणजादिभ्यतीण् ॥

आतिथेयम् । न । अतिथ्यर्थे । अतिथिभोजनादौ । चि । अतिथौ साधौ । अतिथिसेवके । तत्रसाधुरित्यधिकारे । पथ्यतिथिवसतिस्वपतेर्ढञ् । स्त्री । ङीप् ॥

आतिथ्यः । पुं । अतिथौ । त्रि । अतिथ्यर्थवस्तुनि भक्ष्यभोज्यादौ । अतिथिसेवायाम् ॥ अतिथयेइदम् । अतिथेर्ञ्यः ।

आतिवाहिकः । पुं । अर्चिरादिमार्गेन । शरीरान्तरे । देवतायेनशरीरेण विशिष्टंजीवं परलोकं नयतितदातिवाहिकं शरीरान्तरमितिव्याख्यानात् ॥

आतुः । पुं । उडुपे । भेलके । डोंगा डोंगी इतिभाषा ।

आतुरः । त्रि । आमयाविनि । रोगिणि । कातरे । आतुतोर्त्ति । तुरत्वरणे । छान्दसाअपिक्वचिद्भाषायां प्रयुज्यन्ते । इगुपधेतिकः ॥

आतृप्यम् । न । आता इतिगौडभाषाप्रसिद्धे फलविशेषे । सरीफा इति भाषाप्रसिद्धे ॥ अस्यगुणास्तु । तृप्तिजनकत्वरक्तवर्द्धकत्वस्वादुत्वशीतलत्ववलमांसकारित्वहृद्यत्वदाहरक्तपित्तवायुनाशित्वानीतिद्रव्यगुणः ॥

आतोद्यम् । न । वीणावंश्यादिवाद्ये । तच्चतुर्विधं भवति यथा । ततंवीणादिकंवाद्य मानद्धं मुरजादिकम् । वंश्यादिकन्तुशुषिरं कांस्यतालादिकंघनमिति । आसमन्तात् तुद्यतेताड्यते । तुदव्यथने । ण्यत् ।

आत्तः । त्रि । गृहीते । ग्रस्ते ।

आत्तगन्धः । त्रि । दूरीभूताहङ्कारे । अभिभूते ॥ आत्तः अरिणागृहीतः गन्धोगर्वोयस्यसः । गृहीतगन्धे ।

आत्तगर्वः । त्रि । भग्नाहङ्कारे । आत्तगन्धे । आत्तः वैरिणा गृहीतोगर्वोयस्य ।

आत्मगुणः । पुं । तार्किकसमयप्रसिद्धेषु बुद्ध्यादिचतुर्दशसु ॥ तेचोक्ताः । बुद्ध्यादिषट्कं सङ्ख्यादि पञ्चकं भावना तथा । धर्माधर्मौ गुणाएते

आत्मनःस्फुरन्तु इमे । तेषु नवासाधारणगुणाः । पञ्चसाधारणगुणाः । इति । अत्राहुः । कामादयो मनोधर्मास्त्विच्छाद्या आत्मनो गुणाः । उक्ता ब्रह्मात्मनो नैते किन्तु लिङ्गात्मनो हिते- इति ।

आत्मगुप्ता । स्त्री । कौँच इति प्र० लता विशेषे । मर्कट्याम् । शूकशिम्ब्याम् । आत्मना गुप्ता दुःस्पर्शत्वात् । कर्त्तृकरणे इति समासः ॥ त्रि । स्वरक्षिते ।

आत्मग्राही । त्रि । कुक्षिम्भरौ । स्वोदरपूरके । स्वार्थिनि ।

आत्मघाती । त्रि । आत्महन्तरि । अवैधबुद्धिपूर्वकात्महनने । यथा । व्यापादयेत् वृथात्मानं स्वयं योऽग्न्युदकादिभिः । विहितं तस्य नाशौचं नापि नोप्युदकादिकमिति कूर्मपुराणम् ।

आत्मघोषः । पुं । काके । कुक्कुटे । काका इति शब्दात् आत्मानं घोषयति । घुषिर् विशब्दे । अण् ।

आत्मचैतन्यम् । न । नित्यज्ञानस्वरूपे ।

आत्मजः । पुं । तनये । पुत्रे । आत्मनो देहाज्जातः । पञ्चम्यामजाताविति जनेर्डः ।

आत्मजन्मा । पुं । पुत्रे । सुते । आत्मनो जन्मास्य ।

आत्मजा । स्त्री । कन्यायाम् । दुहितरि । बुद्धौ । आत्मनो जाता । डः । टाप् ।

आत्मतत्त्वम् । न । तत्त्वज्ञासके नित्यशुद्धबुद्धमुक्तसत्यस्वभावे प्रत्यक्चैतन्ये ॥

आत्मदः । पुं । अविद्यानिरासेन जीवस्वरूपाभिव्यञ्जके श्रीगुरौ । हरौ ॥ आत्मानं ददाति । डुदाञ् दाने । आतश्चेति कः ॥

आत्मदर्शः । पुं । दर्पणे । आत्मा स्वरूपं दृश्यतेऽनेन अत्रवा । पुंसीतघः ॥

आत्मध्यानम् । न । आत्मनश्चिन्तने । ब्रह्मैवास्मीति सवृत्त्या निरालम्बतया स्थितिः । ध्यानशब्देन विख्याता परमानन्ददायिनी त्याचार्योक्तेः ।

आत्मा । पुं । स्वभावे । यथा । पुण्यात्मा । प्रयत्ने । यथा । महात्मा । शरीरे । यथा । कृष्णात्मा ॥ परव्यावर्त्तने । यथा । मैत्रेणात्मनाकृतम् ॥ मनसि । धृतौ । मनीषायाम् । अर्के । हुताशने ॥ वायौ ॥ जीवे । चेतने । त्वंपदार्थे । नित्योपलब्धिस्वभावे । प्रत्यगात्मनि । यथा । प्रत्यग्रूपः पराग्रूपाद्व्यावृत्तोऽनुभवात्मकः । प्रथते यः स आत्मेति प्राहुरात्मविदो बुधा इति ॥ अवस्थात्रयभावाभावसाक्षित्वेन सत्यज्ञानादिस्व-

रूपे । निरुपचरितस्वरूपे । ज्ञान
मूर्त्त्योराश्रये । सर्वजन्तूनां प्रत्यक्चे
तनेस्वसंवेद्ये प्रसिद्धे । मुख्यगौणमि
थ्येतित्रिविधेषु साक्षिपुत्रादिदेहादि
लक्षणेषु । भूतात्माचेन्द्रियात्माच
प्रधानात्मातथा भवान् । आत्माच
परमात्माचत्वमेकः पञ्चधास्थितः ।
त्यज्यमानेपिनत्त्यक्तः प्राप्यमाणेपि
नाप्यते । आगमापायसाक्षीयःसआ
त्मानुभवात्मकः । विशुद्धचिद्रूपेत्व
म्पदलक्ष्ये तुरीये । अहंप्रत्ययवेद्ये
। इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्या
त्मनोलिङ्गम् । न्यायसूत्रम् । १।१०
। यच्चाप्नोतियदादत्ते यच्चात्तिविष
यानिह । यच्चास्यसन्ततोभावस्तस्मा
दात्मेतिकीर्त्तितः । अततिसन्तत
भावेनजाग्रदादिसर्वावस्थास्वनुवर्त्त
ते । अतसातत्त्यगमने । सातिभ्यां
मनिन्मनिणाविति मनिण् । भावे
। ब्रह्मणि ॥ यथा । आत्मैवेदंसर्वम् ।
हार्दाकाशे ।

आत्मनीनः । पुं । सुते । श्याले । प्रा
णधारे । विदूषके । त्रि । आत्मने
हिते । यथा । अद्यापि नैवात्मनीनं
कृतंकर्म्मयातंजनुः क्वापिलब्धंनवै श
र्म । किंदारदेहात्मजस्वर्णवृन्देनचे
तोरतिंविन्दसेचेन् मुकुन्देनेति ॥ प

थ्ये । आत्मनेहितम् । आत्मन्विश्व
जनभोगोत्तरपदात् खः ।

आत्मपरिमाणम् । न । ब्रह्मात्मैक्यसा
क्षात् कारे । आत्मनः परिमाणम् ।

आत्मप्रकाशः । पुं । आत्मनः प्रकाशे
। आत्मनस्तत्प्रकाशत्त्वंयत् पदार्था
वभासनम् । नाग्न्यादिदीप्तिवद्दी
प्तिर्भवत्त्यान्ध्यंयतोनिशि ॥

आत्मबन्धुः । पुं । पितृष्वसुः पुत्रे । मा
तुलपुत्रे । मातृष्वसुः पुत्रे । आत्म
नोबन्धुः ।

आत्मवीरः । पुं । प्राणवति । श्याल
के । विदूषके ।

आत्मभवः । पुं । सुरज्येष्ठे । हिरण्यग
र्भे । विष्णौ ।

आत्मभावः । पुं । मनोवृत्तौ ।

आत्मभूः । पुं । ब्रह्मणि । पितामहे ।
चतुरानने । कामदेवे ॥ विष्णौ ।
शिवे । आत्मनोविष्णोः सकाशात्
आत्मनास्वयमेववाभवति । भू० ।
भुवःसंज्ञान्तरयोरिति क्विप् ॥

आत्ममूली । पुं । दुरालभायाम् ।

आत्मम्भरिः । त्रि । स्वोदरपूरके । आ
त्मोदरमात्रस्य भरणकर्त्तरि । आ
त्मानंबिभर्त्तीतिविग्रहे फलेग्रहिरा
त्मम्भरिश्चेतिआत्मनोमुमागमोभृ
ञइनप्रत्ययश्चनिपात्यते ।

आत्मयाजी । त्रि । सर्व्वत्रपरमात्मभावनापुरस्सरं नित्यं विहितकर्म्मणोनुष्ठातरि । आत्मशुद्ध्यर्थमेवस्वर्गाद्यासङ्कल्पित्वायोदेवान्यजतेसआत्मयाजी॥

आत्मयापनम् । न । कालक्षेपे । शरीररक्षणे । आत्मनः स्वस्ययापनम्।

आत्मयोनिः । पुं । कामदेवे । परमेष्ठिनि ॥ शिवे । विष्णौ । आत्मैव योनिः उपादानकारणमस्य ।

आत्मरक्षा । स्त्री । महेन्द्रवारुणीवृक्षे । आत्मनोरक्षणे ।

आत्मलाभः । पुं । ज्ञाने । आत्मनोह्यलाभोऽज्ञानमेव तस्मात् ज्ञानमेवात्मनोलाभः । नष्टग्रामाद्यनात्मलाभवदप्राप्तिलक्षणआत्मलाभः लब्धृलब्धव्ययोर्भेदाभावात् । आत्मलाभात् परोलाभोनास्तीति मुनयोविदुः ।

आत्मलोकः । पुं । स्वस्वरूपे ॥ आत्मैवलोकः ।

आत्मलोम । न । श्मश्रुणि । स्वलोममात्रे ।

आत्मवान् । त्रि । अप्रमत्ते । अप्रमादिनि । सर्व्वदासावधाने । ज्ञानिनि । स्वेमहिम्निसदामतिष्ठिते ॥ धृतिमति । मनस्विनि । अस्त्यर्थेमतुप् । आत्मवानसत्त्ववानुकम्पत्युपमाला ।

आत्मवश्यः । त्रि । मनोधीने । स्वाधीने ॥ आत्मनोवश्यः । आत्मावश्योयस्यवा ।

आत्मवित् । त्रि । मुक्ते । आत्मानंस्वंशब्दादिविषयबुद्धिप्रत्ययसाक्षिणं योवेदसतथा । कर्म्मिणि । आत्मानंशरीरेन्द्रियाद्यतिरिक्तंनित्याद्यकरणेपरलोकेदुःखभागिनंवेत्ति विजानातीति तथा ॥

आत्मशल्या । स्त्री । शतावर्य्याम् ॥

आत्मशुद्धिः । स्त्री । चित्तशुद्धौ । आत्मनःशुद्धिः ।

आत्मसम्भावितः । त्रि । सर्व्वगुणविशिष्टोहमित्यात्मनैव पूज्यतांप्रापितोनकैश्चित् साधुभिस्तथ । आत्मनासम्भावितः ।

आत्मसाक्षी । त्रि । बुद्धिवृत्तिज्ञे ।

आत्मस्थः । । त्रि । हृदिस्थे ।

आत्महत्या । स्त्री । आत्मघाते । स्ववधे ।

आत्महा । पुं । देवाजीवे । देवले । त्रि । आत्मघातिनि । उदरभेदिनि । अनात्मन्यात्माभिमानिनि । अविद्बुषि । आत्मघातस्य प्रायश्चित्तविधानादर्शनात् संसरणमेवफलं निश्चितम् ॥ आत्मानंहन्तिक्विप् । आत्माज्ञानंसर्व्वपापस्यमूलम् । अविद्यादोषेणविद्

मानस्यात्मनस्तिरस्करणात् विद्यमानस्यात्मनो यत्कार्यं फलमजरामरत्वादिसंवेदनादिलक्षणं तद्गतस्येवतिरोभूतं भवतीति प्राकृतोऽविद्वानात्महेत्युच्यते । येयथासन्तमात्मानमकर्त्तारं स्वयंप्रभुम् । कर्त्ता भोक्तेतिमन्यन्तेतएवात्महनोजनाः । यथाहुराचार्याः । लब्ध्वाकथञ्चिन्नरजन्मदुर्लभं तत्रापिपुंस्त्वंश्रुतिपारदर्शनम् । यस्त्वात्ममुक्त्यै नयतेतमूढधीः सह्यात्महास्वं विनिहन्त्यसद्ग्रहादिति । न्देहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् । मयानुकूलेन नभस्वतेरितं पुमान् भवाब्धिं नतरेत् सआत्महेति श्रीभागवतम् ।

आत्माधीनः । पुं । सुते । पुत्रे । प्राणधारे ॥ श्याले । विदूषके । इतिहेमचन्द्रः । त्रि । स्वायत्ते । आत्मनोऽधीनः ।

आत्माशी । पुं । मत्स्ये । इतित्रिकाण्डशेषः ॥

आत्माश्रयः । पुं । दोषविशेषे । स्वापेक्षत्वमात्माश्रयः । स्वस्यस्वापेक्षत्वेऽनिष्टप्रसङ्गआत्माश्रयः । सचोत्पत्तिस्थितिज्ञप्तिद्वारात्रेधा । यथा । यद्ययंघट एतद्घटजन्यःस्यात् तदाएतद्घटानधिकरणक्षणोत्तरवर्त्ती नस्यात् । यद्ययंघटएतद्घटवृत्तिःस्यात् एतद्घटव्याप्योनस्यात् । यद्ययंघट एतद्घटज्ञानाभिन्नःस्यात् ज्ञानसामग्रीजन्यः स्यात् । एतद्घटभिन्नःस्यादितिवासर्वत्रापाद्यम् ॥

आत्मीयः । त्रि । अन्तरङ्गे । स्वकीये ।

आत्मोद्भवः । पुं । आत्मजे । पुत्रे ।

आत्मोद्भवा । स्त्री । दुहितरि । पुत्र्याम् । माषपर्ण्याम् ।

आत्मोपजीवी । पुं । भारिकादौ । देहक्लेशोपजीविनि । आत्मनादेहेनउपजीवितुं शीलमस्य । सुप्यजातौणिनिस्ताच्छील्ये इतिणिनिः ।

आत्यन्तिकम् । त्रि । अतिशयेनजाते ॥

आत्ययिकः । त्रि । अत्ययः प्रयोजनमस्येत्यर्थे । अत्ययार्थे । विनयादित्वात् स्वार्थे ठक् ॥

आत्रेयः । पुं । अत्रिमुनेः पुत्रेषु । तेचत्रयः । दत्तोदुर्वासाश्चन्द्रश्चेति । अत्रेरपत्यम् । इतश्चानिञ इतिढक् ॥ शरीरस्थरसधातौ । इतिहेमचन्द्रः ।

आत्रेयिका । स्त्री । ऋतुमत्याम् । इतिहलायुधः ।

आत्रेयी । स्त्री । ऋतुमत्याम् । पुष्पवत्याम् । नदीविशेषे । आत्रेयीवाऽगम्यत्वात् । अपत्ये ढक् । ङीप् ।

आथर्वण: । पुं । अथर्ववेदज्ञब्राह्मणे । पुरोहिते । आथर्वणिकस्यायं धर्म आम्नायोवा । आथर्वणिकस्येकलोपश्चेत्यण् इकोलोपश्च । न । अथर्वणांसमूहे ॥ भिक्षादिभ्योण् । शान्तिगृहे ।

आथर्वणिक: । पुं । अथर्वाध्ययनपरे । अथर्वाणमधीते । वसन्तादिभ्यष्ठक् । दाण्डिनायनेतिनिपातनाट्टिलोपो न भवति ।

आददान: । त्रि । उपादानंकुर्वति ।

आदम: । पुं । मुनिविशेषे ॥ अयञ्चरमलप्रवर्त्तकोद्वापरान्तेबभूव ।:

आदर: । पुं । आरम्भे । सन्माने । समादरे । दृविदारणे । आङ्पूर्व: । ऋदोरप् ।

आदर्श: । पुं । टीकायाम् । दर्पणे । प्रतिपुस्तके । आदृश्यते रूपमत्र । दृशिर्प्रेक्षणे । हलश्चेति घञ् ।

आदह । ।। उपक्रमे ॥ कुत्सने ॥ हिंसायाम् ।

आदाता । त्रि । ग्रहीतरि ।

आदानम् । न । ग्रहणे । स्वीकारे । वाजिनामलङ्कारे । रोगलक्षणे । आङ्पूर्वाद्दाञो ल्युट् ।

आदानी । स्त्री । ननुवाँ इति प्रसिद्धे फलशाके । हस्तिघोषायाम् ।

आदास्यमान: । त्रि । गृहीष्यमाणे ।

आदि: । पुं । प्रथमे । प्रागसत्त्वावस्थायाम् । नियतपूर्ववर्त्तिकारणे । उत्पत्तौ हेतौ ॥ आदिशब्द: पदान्तेतुगणस्यसूचकोमत: । यथा गर्गादि: । सामीप्येथव्यवस्थायां प्रकारेऽवयवेतथा ॥ आदिशब्दन्तुमेधावीचतुर्ष्वर्थेषुलक्षयेत् । आप्रथमंदीयतेगृह्यते । डुदाञ्० । उपसर्गेघो: कि: । यद्वा । अदनम् । अद० । इणजादिभ्यइतीण् । पूर्वकालवृत्तित्त्वमादित्त्वम् ।

आदिकर: । पुं । प्रथमकर्त्तरि । आदे:कर्त्तरि ॥ आदिंकरोति । दिवाविभेतिट: ।

आदिकवि: । पुं । ब्रह्मणि । वाल्मीकिमुनौ । प्राचेतसे । आदौकवि: ॥ कर्मधारयोवा ॥

आदिकारणम् । न । पूर्वनिमित्ते । मूलहेतौ । निदाने । आदौ कारणम् । आदि: मुख्यंकारणम् ॥

आदिगदाधर: । पुं । गयास्थदेवताविशेषे ।

आदिजिन: । पुं । ऋषभदेवे ।

आदित: । ।। आदावित्त्यर्थे । आद्यादिभ्यउपसंख्यानात् तसि:

आदिताल: । पुं । तालविशेषे । यथा एकएवलघुर्यत्रआदिताल: सकथ्यते

। गुरुस्तत्पुरतोवाच्यः प्रायेणैतन्निदर्शनमितिसङ्गीतदामोदरः ॥

आदितेयः । पुं । देवे । अदित्याः अपत्यम् । कृदिकारादक्तिन इतिङीषन्तात् स्त्रीभ्योढक् । तस्य एयादेशः ।

आदित्यः । पुं । सवितरि । सूर्ये ॥ देवे ॥ आदित्याद्वादशप्रोक्ताइतिवचनात् गणेबहुवचनान्तः । यथा । तत्रचद्वादशादित्याश्चैत्रादिषु तपन्ति ये । विष्णुयमविवस्वन्तोंशुमान् पर्जन्य इत्यपि । वरुणेन्द्रधातृमित्राःपूषा त्वष्टाभगःपरइति । विष्णौ । आदित्यमण्डलान्तस्थे हिरण्मयेपुरुषे । अर्कवृक्षे । अदिते रादित्यस्यवाऽपत्यमित्यर्थे दित्यदित्येतिण्यः ॥ अदितेरखण्डितायामह्याः अयंपतिरित्यर्थेवा प्रत्ययः । पुनर्वसुनक्षत्रे द्विवचनान्तः । न । उपपुराणविशेषे ॥

आदित्यपत्रः । पुं । क्षुपविशेषे । अर्कपत्रे ॥

आदित्यपुष्पिका । स्त्री । लोहितार्के ।

आदित्यभक्ता । स्त्री । सुवर्चलायाम् । हुलहुल् इति प्रसिद्धे शाके ।

आदित्यभवनम् । न । उदयाद्रौ । आदित्योऽस्मिन्भवति प्रादुर्भवति ।

आदित्यवर्णः । त्रि । सर्वजगतोऽवभासके स्वभानेऽन्यप्रकाशानपेक्षे । आदित्यःवर्णोऽस्य ।

आदित्यसूनुः । पुं । सुग्रीववानरे । यमे । कर्णे । शनौ ॥ सावर्णिमनौ ॥ वैवस्वतमनौ । आदित्यस्यसूनुः ॥

आदिदेवः । पुं । देवदेवे । महादेवे । नारायणे । विष्णौ । जगदुपादानादिगुणवति वासुदेवे । विधातरि । आदिःकारणम् सचदेवश्च ।

आदिपुरुषः । पुं । ब्रह्मणि । चतुर्वक्त्रे ।

आदिवराहः । पुं । विष्णौ । हरौ ॥

आदिमम् । त्रि । आद्ये । प्रथमभववस्तुनि । आदौ भवम् । मध्यान्मइत्यत्रादेश्चेतिवचनात् मः । यद्वा । अग्रादिपश्चाड्डिमच् ।

आदिमत् । त्रि । कार्य्ये । सकारणे ॥ आदिर्विद्यतेऽस्य । मतुप् ॥

आदिराजः । पुं । पृथुसंज्ञके नृपे ॥ आदौराजा । टच् ।

आदिशक्तिः । स्त्री । परमात्मशक्तौ ।

आदिष्टम् । त्रि । आदेशिते । उपदिष्टे । न । आज्ञप्ते ॥ उच्छिष्टे । आदिश्यते । दिशः क्तः । आदिष्टमादेशितेत्रिषु । आज्ञप्तोच्छिष्टयोः क्लीवमिति मेदिनी ।

आदिष्टी । त्रि । आदेशककर्त्तरि । आदिष्टमनेन । इष्टादिभ्यश्चेति इनिः

॥ पुं । ब्रह्मचारिणि । व्रतादेशनम् आदिष्टं तदस्यास्ति । इनि: ।

आदीनव: । पुं । दोषे । परिक्लिष्टे । दुरन्ते । आदानम् । दीङ् क्षये । भावे क्त: । स्वाद्ययोदित: । ओदितश्चेति नत्वम् । आदीनस्य धानम् । घञर्थे कइति बाहुलकादातेःक: ॥

आदीपनम् । न । आलिम्पने । सन्दीपने ।

आदृत: । त्रि । कृतादरे । सादरे । अर्चिते । पूजिते । आद्रियतेस्म । दृङ् आदरे । क्त: ।

आदेश: । पुं । आज्ञायाम् । शासने । उपदेशे । शास्त्राचार्य्योपदेशगम्ये । वार्त्तासञ्चारे । ज्योतिश्शास्त्रफले । वर्णस्थाने वर्णान्तरोत्पत्तौ । प्रकृतिप्रत्ययोपघातिकार्य्ये । आदेशनम् । आदिश्यते येनवा । दिश° । घञ् ।

आदेशी । पुं । दैवज्ञे । गणके । त्रि । आदेशवति । म° इनि: । उपदेशके । आदिशतितच्छील: ।

आदेष्टा । पुं । आदेशकर्त्तरि । प्रतिवि । यजमाने । यागविषये ममेष्टसम्पादनाय यज्ञार्थं कर्मकुर्विति ऋत्विजांप्रेरके । आदिशति ऋत्विजादीन् यागादिस्वेष्टसम्पादनाय प्रेरयति । दिशअतिसर्जने । तृच् ॥

आद्य: । त्रि । प्रथमे । आदिभवे ॥ अदनीये । न । धान्ये । आदौभव: । दिगादिभ्योयत् ।

आद्यकवि: । पुं । धातरि । वाल्मीकौ ।

आद्यमाषक: । पुं । माषकपरिमाणे । पञ्चगुञ्जासु ॥ वैकृण्णलेसमधृते विज्ञेयो रौप्यमाषक इत्यपिदर्शनात् । केचित् अयमस्मिनकालेइत्याहु: । पूर्वंतु माषकंसप्तकृष्णलाइति । माष्यते । मषहिंसायाम् । हलश्चेति घञ् । क: । आद्योमुख्यश्चासौ माषकश्च ।

आद्यबीजम् । न । आदिकारणे । निमित्ते । कार्य्यमुख्यंबीजम् ।

आद्या । स्त्री । उमायाम् । दुर्गायाम् । काल्याम् । तारायाम् । त्रिपुरसुन्दर्याम् । भुवनेश्वर्य्याम् । प्रकृतौ ॥ यथा । सत्येतुसुन्दरी आद्या त्रेतायांभुवनेश्वरी । द्वापरेतारिणी आद्याकलौ काली प्रकीर्त्तितेतिमुण्डमालातन्त्रम् । आदौभवा । दिगादित्वाद्यत् । टाप् ।

आद्याकाली । स्त्री । परायां प्रकृतौ । यथा । कालसङ्कलनात्कालीसर्वेषामादिरूपिणी । कालत्वादादिभूतत्वादाद्याकालीति गीयतइति श्रीमहानिर्वाणतन्त्रम् ।

आध्यून: । त्रि । आद्विहीने । औदरिके । विजिगीषाविवर्जिते ॥ विजिगीषा व्यवसाय:कश्चित् प्रकर्षो वा आशस्या न तेनविहीनोऽयः केवलमुदराधीन इतिभरत: ॥ आद्वीन । आङ्‌पूर्वाद्वीव्यतेरकर्मकत्वात् क्त: । दिवो विजिगीषायामितिनिष्ठातस्यनत्वम् । यस्यविभाषेतिनेट् । च्छ्वोरित्यूठ् ॥

आद्योपान्तम् । न । पूर्वापरमित्यर्थे ॥

आधमनम् । म । बन्धके । इतिस्मृति: ॥

आधर्म्मिक: । त्रि । अधर्म्मशीले । अधर्म्मं चरति । अधर्माच्चेतिवार्त्तिकात् ठञ् । चरतिरिहासेवायाम् । नत्वनुष्ठानमात्रे । तेनदैववशात् अधर्मे प्रवृत्तोपिसुवृत्त: आधर्मिक इतिनोच्यते ॥

आधर्षित: । त्रि । अवमानिते ॥

आधानम् । न । अग्न्याधाने । गर्भाधाने । वीजप्रक्षेपकाले । आधीयते । डुधाञ् । ल्युट् । वन्धके । स्थापितद्रव्ये ॥

आधानिकम् । न । गर्भाधानसंस्कारे । आधानम् प्रयोजनमस्य । प्रयोजनमिति ठक् ॥

आधार: । पुं । अधिकरणे । आश्रये । औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा । यथा । कटे आस्ते स्थाल्यां पचतीत्यौपश्लेषिकस्योदाहरणम् । मोक्षेइच्छास्तीतिवैषयिकस्य । सर्वस्मिन्नात्मास्तीत्यभिव्यापकस्योदाहरणम् ॥ अम्बुधारणे । सेचनादिसेकार्थं सेतुना वहुनासंजलं निरुध्ययत्रस्थाप्यते स आधारोवद्धुकन्दरादि: वांधवन्धइतिख्यात: टीका इतिचेतिभरत: ॥ अस्यार्थं जलवन्धनमाधारइति वैकुण्ठ: ॥ सेकादिसेकार्थं जलाधारस्थानमाधार: इति मधु: ॥ आलवाले । आध्रियन्ते अस्मिन्निति आधार: । अध्यायन्यायेतिसूत्रे अवहाराधारे त्वु पसंख्यानादधिकरणे घञ् ॥

आधारशक्ति: । स्त्री । सर्वाधारशक्तिरूपायां परदेवतायाम् ॥

आधार्मिक: । त्रि । अधार्मिके । इति त्रिकाण्डशेष: । नाधार्मिके वसे द्ग्रामे नव्याधिवहुलेभृशम् ॥

आधि: । पुं । मन:पीडायाम् । मनस्याम् ॥ अधिष्ठाने ॥ वन्धके । यथा । आधिर्विनश्येद्द्विगुणेधनेयदिनमोच्यते इति । व्यसने । यथा । आधिप्राप्तोयेनमुच्येत सधीर: । आधीयतेदु:खमनेन आधानंवा । डुधाञ् धारणपोषणयो: । उपसर्गेघो: कि: ॥

आधिक्यम् । न । अतिशयतायाम् । अधिकत्वे । अधिकस्यभाव: । ष्यञ् ।

आधिग्न: । त्रि । वक्रे ॥ व्यथिते । इत्य जयपाल: ।

आधिदैविकम् । त्रि । दुःखशीलाद्युत्थे दुःखे । अतिवातातिवृष्ट्यादिहेतुके दुःखे । देवान् अग्निवाय्वादीन् अधिकृत्य प्रवृत्तम् । अधिदेवं वा भवम् । अध्यात्मादेष्ठञिष्यते । अनुशतिकादीनाञ्चेत्युभयपदवृद्धिः । यच्च राक्षसविनायकग्रहाद्यावेशनिबन्धनमाधिदैविकं दुःखमिति साङ्ख्याः ।

आधिपत्यम् । न । अधपतित्वे । प्रभुत्वे । स्वामित्वे । अधिपतेःकर्मभावो वा । ब्राह्मणादित्वात् ष्यञ् ।

आधिभोग: । पुं । बन्धकद्रव्यस्य भोगे ।

आधिभौतिकम् । त्रि । व्याघ्रसर्पादिप्रयुक्ते दुःखादै । भूतानि प्राणिनोऽधिकृत्य प्रवृत्तमधिभूतं वा भवम् । अध्यात्मादेष्ठञ् । अनु॰ उ॰ ।

आधिमन्यव: । पुं । ज्वराग्नौ ।

आधिवेदनिकम् । न । स्त्रीधनविशेषे । पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् । आधिवेदनिकञ्चैव स्त्रीधनं परिकीर्त्तितमित्यत्राधिवेदनिकस्य पृथक्त्वेनोक्तत्वात् तत्स्वरूपमाह । द्वितीयस्त्रीविवाहार्थिना पूर्वस्त्रियै पारितोषिकं धनं यद्दत्तं तदाधिवेदनिकमुच्यते । यथा । अधिविन्नस्त्रियै देयमाधिवेदनिकं समम् । न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितम् । इति याज्ञवल्क्य: ॥

आधिस्तेन: । पुं । बन्धकचोरे । यथा । न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेत् । मूल्येन तोषयेच्चैनमाधिस्तेनोऽन्यथा भवेदिति मनु: ॥

आधुत: । त्रि । आधूते । आधुयते स्म । धुञ् कम्पने । क्त: ॥

आधुनिक: । त्रि । इदानीन्तने । नव्ये । अधुनाजाते ॥ ठञ् ।

आधूत: । त्रि । ईषत् कम्पिते । आधूयते स्म । धूञ् कम्पने । क्त: । यस्य विभाषेति नेट् ।

आधेयम् । त्रि । आधारिणि । आधारस्थितवस्तुनि । आधातुं योग्यम् । अचो यत् । ईद्यति । उत्पाद्ये ॥ यथा पक्कसृन्मयपात्रे रक्ततागुण: सवह्निसंयोगादिना निष्पाद्यते ।

आधोरण: । पुं । निषादिनि । हस्तिपके । आधोरयति । धोऋ गति चातुर्य्ये । ल्यु: ।

आध्मात: । पुं । शब्दिते । दग्धे । त्रि । वातरोगविशेषविशिष्टे । यथा । साटोपमत्युग्ररुजमाध्मातमुदरं भृशमिति । जानीयादित्यन्वय: ॥

आध्मान: । पुं । वातव्याधिविशेषे । त

स्यात्स्वरूपम् । साटोपमत्युग्ररुजमाध्मातमुदरं भृशम् । आध्मानमिति-जानीयाद्घोरं वातनिरोधजमिति निदानम् । आनाहे ॥

आध्मानी । स्त्री । नलिकानामगन्धद्रव्ये ॥

आध्या । स्त्री । चिन्तने । स्मृतौ ॥

आध्यात्मिकम् । न । शरीरादौ । शोकमोहज्वरशिरोरोगादिनिमित्तदुःखादौ ॥ दुःखविशेषे ॥ आत्मानंस्वसङ्घातमधिकृत्य प्रवृत्तम् । अध्यात्मंभवंवा । अध्यात्मादेष्ठञ् ॥ तच्चद्विविधम् । शारीरकमानसञ्च । तत्रशारीरंव्याध्याद्युत्थम् मानसंकामाद्युत्थम् ।

आध्यानम् । न । चिन्तने । उत्कण्ठापूर्वकस्मरणे । ध्यै चिन्तायाम् ल्युट् ।

आध्यापकः । पुं । अध्यापके । स्वार्थेण ॥

आध्वर्य्यवम् । न । यजुर्वेदविहिते अध्वर्युसम्बन्धिनि ॥ अध्वर्योरिदम् पचाध्वर्युपरिषदश्चेत्यञ् । अध्वर्योःकर्मभावोवा । उद्गात्रादित्वादञ् ॥

आनः । पुं । अन्तर्मुखश्वासे । उच्छ्वासे ॥

आनकः । पुं । पटहे । भेर्य्याम् । मृदङ्गे । ध्वनदम्बुदे । सशब्दमेघे । आनयति प्रापयति मोक्षादाम् करोति योधान् । आङ् पूर्वकात् अनप्राणनइत्यस्मात् ण्वुल् ।

आनकदुन्दुभिः । पुं । कृष्णजनके । वसुदेवे । आनकैर्दुन्दुभिश्चोपलक्षितः । वसुदेवजन्मनिदेवैरानकदुन्दुभिघादनात् । पुं । स्त्री । बृहड्ढक्कायाम् ।

आनतः । त्रि । नते । अवाग्रे । अधोमुखे । विनयनम्रे । आनमतिस्म । णमप्रह्वत्वे । गत्यर्थेति क्तः ।

आनतिः । स्त्री । नम्रतायाम् ।

आनद्धम् । न । चर्मबद्धमुखवाद्यमात्रे मुरजपटहादौ । वेशभूषादिकल्पनायाम् । त्रि । सज्जिते । ग्रथिते । बद्धे । व्याप्ते । यथा । आनद्धःस्तिमितैर्दोषैरिति । आनह्यते मुखेचर्मणावध्यते । णहबन्धने । क्तः । नहोधः ॥

आननम् । न । मुखे । आ अनन्त्यनेन । अनप्राणने । ल्युट् ॥

आनन्तर्य्यम् । न । अनन्तरे । चतुर्वर्णादित्वात् स्वार्थेष्यञ् ।

आनन्त्यम् । न । अनन्तमित्यर्थे । देशकालवस्तुपरिच्छेदशून्ये । अनन्तमेव । अनन्तावसथेतिह भेषजाञ्ञ्यः ॥

आनन्दः । पुं । सम्मदे । हर्षे । सुखे

। मखे । छन्दोभेदे । ठगणे ऽ। आदिगुरुत्रिकले । प्राक्पश्चिमोत्तरद्वारगृहे । आत्मनि । सुख्यादौ प्रतिबिम्बतया ऽ वस्थितस्य प्रियादिशब्दवाच्यस्य आनन्दमयस्य कारणभूते । ब्रह्मणि । आनन्दनम् । टुणदि समृद्धौ । घञ् । ४८ वत्सरे । निष्पत्तिः सर्वसस्यानां सर्वशस्यसमार्घता । घृतं तैलसमं याति आनन्दे नन्दति प्रजा इति तत्फलम् । त्रि । आनन्दविशिष्टे । सुखिनि । हर्षयुक्ते । आनन्दः स्वरूपमस्य । आनन्दोऽस्ति अस्य अस्मिन् वा । अर्श आदिभ्योऽच् ।

आनन्दथुः । पुं । सुखे । आनन्दे ॥ त्रि । सुखिनि । टुणदि° । द्वितोऽथुच् ।

आनन्ददत्तः । पुं । मेहने ।

आनन्दनम् । न । गमनागमनसमये सुहृदादेरालिङ्गनारोग्यस्वागतादिप्रश्नादिद्वारानन्दोत्पादने । सभाजने । आमर्शे । टुणदि° । ल्युट् ।

आनन्दपटः । पुं । न । नवोढावस्त्रे ।

आनन्दप्रभवम् । न । रेतसि । वीर्य्ये । आनन्दात् प्रभवोऽस्य ।

आनन्दभुक् । पुं । प्राज्ञे ॥ यथा लोके निरायासस्थितः सुखी आनन्दभुगुच्यते तथा सुषुप्तोपि आनन्दभुक् । अत्यन्तानायासरूपा हीयं सुषुप्तिरूपा.

स्थितिरनेन प्राज्ञेनानुभूयते तस्मादानन्दभुक् प्राज्ञः ॥

आनन्दमयः । पुं । जीवे । आनन्दप्रचुरे । प्राज्ञे । मनसो विषयविषय्याकारस्पन्दनायासदुःखाभावादानन्दमयः आनन्दप्रायः प्राज्ञ उच्यते । कारणशरीरे सर्वोपरमत्वात् सुषुप्तौ स्थूलसूक्ष्मप्रपञ्चलयस्थाने । पञ्चमकोषे ॥ काचिदन्तर्मुखा हत्तिरानन्दप्रतिबिम्बभाक् । पुण्यभोगे भोगशान्तौ निद्रारूपेण वर्त्तते । कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम् । प्राचुर्य्ये मयट् । त्रि । आनन्दप्रधाने । न । ब्रह्मणि ॥

आनन्दसम्प्लवः । पुं । परमानन्दे । आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने ॥

आनन्दा । स्त्री । विजयायाम् ॥ आरामशीतलायाम् ।

आनन्दार्णवः । पुं । परमेश्वरे । यात्रायोगान्तरे । यथा । स्वोच्चमूलत्रिकोणस्थः सौम्यः पापविवर्जितः । आनन्दार्णवयोगोऽयं धर्मेणैव जयावह इति ।

आनन्दिः । पुं । कौतुके । हर्षे ।

आनन्दितः । त्रि । आनन्दयुक्ते । आह्लादिते । हृष्टे । आनन्दः सञ्जातोऽस्य । तारकादित्वादितच् ।

आनन्दी । त्रि । सुखिनि । हृष्टे । आ

नन्दविशिष्टे ॥ सर्वसम्पदासमृद्धे । आनन्दोऽस्यास्ति । इनिः ॥

आनन्दी । स्त्री । आकनपाता इति गौड़भाषा प्रसिद्धे क्षुपविशेषे ॥

आनमनम् । न । सर्वतोभावेन नमने ॥

आनमितः । त्रि । आवर्जिते ॥

आनयः । पुं । उपनयने ॥

आनयनम् । न । स्थानान्तरात् स्थानान्तरानीते । लाया इति भाषा ॥

आनर्त्तः । पुं । द्वारकाइतिख्यातेदेशे ॥ यथा । आनर्त्तान्सउपव्रज्यस्वृद्धान् जनपदान् स्वकान् । दध्मौदरवरंतेषांविषादं शमयन्निवेति । आनर्त्तदेशवासिनिजने । जले । रणे । नृत्यशालायाम् । आनृत्यन्त्यत्र । नृतोगात्रविक्षेपे । हलश्चेति घञ्॥

आनर्त्तपुरम् । न । द्वारावत्यांपुर्याम् ।

आनर्त्तितः । त्रि । कम्पिते ॥

आनाम्यः । त्रि । अभिभवनीये । आङ् पूर्वस्य नमते रभिभवोर्थः । पोरदुपधादितियतिप्राप्ते निपातनाण्ण्यत् ।

आनायः । पुं । जाले ॥ नयनम् । णीञ् प्रापणे । श्रिणीभुवोनुपसर्गे इतिघञ् । आसमन्तान्नायोऽनेन । यद्वा । आनयन्ति मत्स्याननेन । जालमानाय इति घञन्तोनिपातितः ॥

आनाय्यः । पुं । दक्षिणाग्नौ । आनीयते । णीञ० । आनाय्योऽनित्य इत्याङ् पूर्वान्नयतेर्ण्यदायादेशश्च निपात्यतेदक्षिणाग्निविषये । दक्षिणाग्निर्हिगार्हपत्यादानीयते अनित्यश्च सततमप्रज्वलनात् ।

आनाहः । पुं । विण्मूत्ररोधकरोगे । विबन्धे । विष्टम्भे । तस्यसम्प्राप्तिरूपे यथा । आमंशकृद्वानिचितंक्रमेण भूयोविबद्धंविगुणानिलेन । प्रवर्त्तमानं न यथास्वमेनंविकार मानाह मुदाहरन्तीतिनिदानम् । दैर्घ्ये । आनहनम् आनह्यतेऽनेनवा । णहबन्धने । भावे करणे वा घञ् ।

आनिलिः । पुं । हनूमति । भीमे ॥ अनिलस्यापत्यम् । अत इञ् ॥

आनिली । स्त्री । स्वातिनक्षत्रे । अनिलोदेवता अस्याः । अण् । ङीप् ।

आनीतः । त्रि । आहृते । आनीयतेस्म । णीञ० । क्तः ॥

आनीलः । पुं । नीलघोटके । त्रि । ईषन्नीले ।

आनुकल्पिकः । पुं । अनुकल्पज्ञे । अनुकल्पमधीते वेदवा । उ० । ठक् ।

आनुकूलिकः । त्रि । अनुकूले । अनुकूलंवर्त्तते । तत्प्रत्यनुपूर्वमीपलोमकूलमिति ठक् ।

आनुकूल्यम् । न । अनुकूलतायाम् । साहाय्ये ॥ भावे कर्म्मणि वा ष्यञ् ।

आनुपदिकः । त्रि । अनुपदं धावमाने । अनुपदं धावति । मायोत्तरपदप दव्यनुपदं धावतीति । ठक् । अनुप दमधीते । इ० ठक् ॥

आनुपूर्व्यम् । न । अनुक्रमे ॥ पूर्वं पूर्वं पूर्वानुक्रमेणावा । वीप्सायां योग्यता यां वा ऽव्ययीभावः । अनुपूर्वस्य भावः वर्णदृढादिभ्यःष्यञ् चेतिष्यञ् । ङीष् । हलस्तद्धितस्येतियलोपः । स्त्रियां वेतिपक्षेक्लीवता ॥

आनुपूर्वी । स्त्री । परिपाट्याम् । मूला वधिक्रमे ॥ अनुपूर्वं भावः । वर्णदृढा दिभ्यः ष्यञ्चेति ष्यञ् । षित्त्वान् ङीष् । यलोपः ॥

आनुमानिकम् । न । प्रकृतौ । प्रधाने ॥ त्रि । युक्तिसिद्धे । लैङ्गिकाने ॥ अनु मानविषयीभूते ॥ अनुमानसम्ब न्धिनि ॥

आनुरक्तिः । स्त्री । अनुरागे ॥

आनुलोमिकः । त्रि । अनुलोमे ॥ अनु लोमं वर्त्तते । तत्प्रत्यनुपूर्वमित्या दिना ठक् ॥

आनुश्रविकः । पुं । स्वर्गादिसाधनेकर्म कलापे ॥ शब्दप्रतिपन्ने स्वर्गभोगादौ ॥ गुरुपाठादनुश्रूयत इत्यनुश्रवो वे-

दः । तत्र भवइत्यर्थे ठक् प्रत्ययः ॥

आनुषक् । ऽ । आनुपूर्व्यम् ॥

आनूपम् । न । भैमपानीयप्रभेदे ॥ यथा । वञ्जुलवेणुवृक्षसंघातसंछन्नम यान्वितः । देशो ऽनूपइतिख्यात आ नूपं तज्जलंस्मृतम् ॥ आनूपंवार्य्यभिष्य न्दि स्वादुस्निग्धं घनंगुरु । वह्निहृत् कफकृद्धृद्यं विकारानकुरुतेबहूनि ति ॥ पुं । अनूपदेशस्थजन्तुमात्रे ॥

आन्ततः । त्रि । अन्ततस्वभावे ॥ अन्ततं शीलमस्य । छत्रादिभ्योऽण् ॥

आन्दोलनम् । न । अनुकम्पायाम् । अ निष्ठुरतायाम् ॥ भावेष्यञ् ॥

आनेयः । पुं । आप्रावैश्यकुलाद्वा आ नीते दक्षिणाग्नौ ॥ त्रि । आनेतुंश क्येघटादौ ॥ आनीयते । णीञ ० । अचोयत् ॥

आन्तरः । त्रि । अभ्यन्तरे ॥

आन्तरप्रपञ्चः । पुं । आभ्यन्तरे द्वैतवि स्तारे ॥ सचानन्दमयादिपञ्चकोषशरी रादित्रयास्तीत्वादिषड्भावविकार त्वङ्मांसादिषाट्कौशिकाशनापि पासादिषडूर्म्मिश्रोत्रादिज्ञानेन्द्रिय पञ्चकवागादिकर्मेन्द्रियपञ्चकमार्गा दिवायुपञ्चकमनआदन्तःकरणचतु ष्टयसङ्कल्पाद्यन्तःकरणवृत्तयस्तान् यतञ्चापारतदभिमानिविश्वतैजस-

प्राणसमाधिमूर्च्छाकरणत्रयकाम-
क्रोधाद्यरिषड्वर्गसाधनचतुष्टयसा-
त्त्विकादिगुणत्रयसुखदुःखज्ञानाज्ञा
नपञ्चक्लेशमैत्र्यादिचतुष्टययमाद्य-
ष्टाङ्गप्रत्यक्षादि प्रमाणचतुष्टयरो
ग्यरोग्यादिसमुदायो यथायोग्यं-
विविधनामरूपगुणधर्मशक्त्याश्रयो-
बोध्यः ।

आन्तरालः । पुं । आत्मनोऽणुत्त्ववादि
नि ॥ अणुवदन्त्यान्तरालाःसूक्ष्मना
डीप्रचारतः । रोम्णःसहस्रभागेन
तुल्यासु प्रचरन्त्ययम् ।

आन्तरीक्षम् । न । अन्तरीक्षे । गगने ।
त्रि । अन्तरीक्षभववस्तुनि ।

आन्तिका । स्त्री । अन्तिकायाम् ।

आन्त्रम् । न । अन्त्रे । अमतिअनेनवा ।
अमगतौ । अमिचिमीतिक्तः । अनु-
नासिकस्यक्विझलोरितिदीर्घः । त्रि
। अन्त्रसम्बन्धिनि ॥

आन्दोलनम् । न । पुनःपुनरालोचना
याम् । कम्पने । चलने ।

आन्दोलितम् । त्रि । कृतान्दोलने । क
म्पिते । चलिते ।

आन्धसिकः । त्रि । पाचके । सूपकारे ॥
अन्धोभक्तंशिल्पमस्य । शिल्पमिति-
ठक् ।

आन्धः । त्रि । अर्धंलघरि । अन्धंसखा ।.
अध्यासाः ।

आन्यभाव्यम् । न । अन्यभावे । अन्यस्य
भावोन्यभावः । ततोब्राह्मणादित्वा
त् स्वार्थे ष्यञ् । अथवा अन्योभावो
ऽन्यद्वस्तु तस्यभावइतिभाविष्यञ् ।

आन्वयिकः । त्रि । प्रशस्तकुलजे । सत्
कुलोद्भवे । कौले । दिव्यभावरतेकु
लाचारिणि साधके ॥ ऊर्द्ध्वस्रोतसि
कःशैवःकौल आन्वयिकःस्मृत इति
त्रिकाण्डशेषः । अन्वयेकुलेभवः ।
ठक् ।

आन्वाह्निकम् । त्रि । प्रतिदिनसम्पाद्ये
पाकादौ ।

आन्वीक्षिकी । स्त्री । तर्कविद्यायाम् ।
गौतमादिप्रणीते न्यायशास्त्रे ॥ आ
त्मविद्यायाम् । अनुश्रवणोत्तरमी-
क्षणं परीक्षणमन्वीक्षा । सा प्रयोज
नमस्याः । प्रयोजनमितिठञ् ।

आन्वीपिकः । त्रि । अनुकूले । अन्वीपं
वर्त्तते । ततप्रत्यनुपूर्वमीपलोमकू
लमिति ठक् ॥

आपः । पुं । अष्टवसुमध्ये वसुविशेषे ।
न । अपांसमूहे ॥ तस्यसमूहइत्य
ण् ॥

आपक्वम् । न । अभ्यूषे । भर्जितहरित
यवादौ ॥ ईषत् पक्वम् । आङीषद
र्थे इति समासः ।

आपगा । स्त्री । नदीमात्रे । अपांसमूहः आपम् । तेनगच्छति । गम्लृ° । अन्येष्वपीतिडः ।

आपणः । पुं । हट्टी हाट इतिभाषाप्रसिद्धायां क्रयविक्रयशालायाम् । निषद्यायाम् । आसमन्तात्पणायन्तेऽत्र । पण° । गोचरसञ्चरेतिघान्तःसाधुः ।

आपणिकः । पुं । वणिजि । पण्याजीवे । आपणो व्यवहारोऽस्यास्ति । अत इति ठन् ॥ आपणेन व्यवहरति इत्यर्थेवाठक् । यद्वा । आपणायते । पणव्यवहारे । आङ्पनिपतिखनिभ्यइति इकन् । आपणस्यधर्म्यं । तस्यधर्म्यमितिठक् । आपणस्यावक्रये । अवक्रय इति ठक् ॥

आपतिकः । पुं । श्येने । बाज इतिभाषाप्रसिद्धखगे । त्रि । दैवायत्ते ॥ आपतति । पत्लृगतौ । आङ्पणीति इकन् ।

आपत्तिः । स्त्री । आपदि । प्रापणे ॥ दोषे । आपदनम् अनयावा । पद गतौ । स्त्रियांक्तिन् ।

आपत्प्राप्तः । त्रि । आपन्ने । विपद्ग्रस्ते ॥ आपदंप्राप्तः ।

आपद् । स्त्री । विपत्तौ । विपदि । क्लेशे । मनस्तापं नकुर्वीत आपदंप्राप्यपार्थिवः । समबुद्धिः प्रसन्नात्मासुखदुःखेसमोभवेदित्युपदेशः ॥ आपदामपहर्त्तारं दातारं सर्वसम्पदाम् । लोकाभिरामंश्रीरामंभूयोभूयोनमाम्यहम् ॥ आपदनमनयावा । पदेः सम्पदादित्वात् क्विप् । आपत्कालेनास्तिमर्यादा ।

आपदा । स्त्री । विपत्तौ । भागुरिमते हलन्तादपि टाप् ।

आपनम् । न । मरिचे । प्रापणे ॥

आपनिकः । पुं । इन्द्रनीलमणौ । किराते । आपनायते । पनव्यवहारे । आङ्पणिपनीति इकन् ।

आपनेयः । त्रि । प्रापणीये । लब्धव्ये ।

आपन्नः । त्रि । विपद्ग्रस्ते । आपत् प्राप्ते ॥ प्राप्ते । यथा । आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् । ततः सद्योविमुच्येतयद्बिभेतिस्वयं भयमितिभागवतम् । आपद्यतेस्म । पदगतौ । क्तः । आगते ।

आपन्नसत्त्वा । स्त्री । गर्भवत्याम् । आपन्नः सत्त्वोजन्तुरनया स्यांवा ।

आपमित्यकम् । न । विनिमयात् प्राप्ते । परिवर्त्तनेनाप्ते । वदले कर्केलयीजा वस्तु इति भाषा । अपमानम् । मेङ्प्रणिदाने । उदीचां माङो व्यतीहारे इतिक्त्वा । कुगतीतिसमासः । समासेऽनञ्ञिति ल्यवादेशः । म

यतेरिदन्यतरस्यामितीत्त्वम्। अप-
मित्त्य निर्वृत्तम्। अपमित्त्ययाचि
ताभ्यां कक्कनौ वितिकक्।
आपराह्णिकम्। त्रि। अपराह्णतने। अ
पराह्णभवम्। कालाट्ठञ्॥
आपवः। पुं। वशिष्ठमुनौ।
आपः। न। जले। आपोभिर्मार्जनं कृ
त्वेतिस्मृतिः। आप्नोतेरसुनिसान्तं
क्लीवम्। आपःकर्माख्यायांह्रस्वोनु
ट्चवेत्यत्र वाहुलकात् आपः आप
सो इत्युक्तं कौमुद्याम्। तत्रवाहुल
का दित्युपलक्षणम् ह्रस्वनुटौ वास्त
इति व्याख्यानात्। तथाच ब्रुवते क
तमेपि नपुंसकमाप इतिकोशमुदा
हृत्य सर्वमापोमयं जगदिति प्र
योगो दुर्घटस्तौ समर्थित इति।
आपस्तम्बः। पुं। कल्पसूत्रकारे। शा
खान्तरे।
आपस्तम्भिनी। स्त्री। लिङ्गिन्यांलता
याम्।
आपाकः। पुं। आवा इतिप्रसिद्ध कुम्भका
रस्यमृत्पात्रदहनस्थाने। पवने।
आपातः। पुं। पतने। तत्काले। तदा
त्वे। पातने। मार्गे। आपतन्ति
सञ्चरन्ति अस्मिन्। घञ्।
आपाततः। । अवधारणंविमेश्यर्थे।
अकस्मादर्थे।

आपानम्। न। पानगोष्ठ्याम्। सुरा
पानायसम्भूयोपवेशने। मद्यपानार्थं
सभायाम्। आसम्भूय पिवन्त्यत्र।
पापाने। ल्युट्।
आपानभूमिः। स्त्री। मधुपानस्थाने।
आपिञ्जरम्। न। स्वर्णे।
आपीडः। पुं। शेखरे। शिखामाल्ये।
शिरोभूषणे। वहिर्निःसृतदारुणि।
आपीडयति पीडअवगाहने। पचा
द्यच्।
आपीडितः। त्रि। आकृष्टे। समन्ता
त्पीडिते॥
आपीतम्। न। माक्षिकधातौ।
आपीनम्। न। ऊधसि। आप्यायते
स्म। ओप्यायीवृद्धौ। गत्यर्थेतिक्तः
। प्यायःपी निष्ठायाम्। सोपसर्गस्यन
। आङ्पूर्वस्यान्धूधसोःस्यादेवेति पी
भावः। ओदितश्चेतिनिष्ठानत्वम्।
पुं। अन्धौ। कूपे। इतिवोपदेवः॥
त्रि। अतिस्थूले। ईषत्स्थूले।
आपूपिकम्। न। पिष्टकसमूहे। अ
पूपानांसमूहः। अचित्तहस्तिधेनो
ष्ठक्। त्रि। पिष्टकाजीवे। कान्दवि
के। भक्ष्यकारे॥ अपूपाःपण्यमस्य
। तदस्यपण्यमितिठक्। यद्वा। अपू
पभक्षणं शीलमस्य। शीलमिति अ
पूपभक्षणंशीलमस्य। शितंभक्षा इ

तिवाठक् । अपूपेसाधुर्वा । गुडादिभ्यष्ठञ् ॥

आपूप्य: । पुं । सक्तुषु । अपूपार्थकपिष्टादौ । चूर्णके ॥

आपूरित: । त्रि । अभिव्याप्ते । परिपूर्णे । यथा । आपूरितं महापात्रमिति ।

आपूर्त्ति: । स्त्री । ईषत्पूरणे । सम्यक् पूरणे ॥

आपूषम् । न । रङ्गे । राँग इतिभाषा ॥

आपृच्छा । स्त्री । आलापे । आभाषणे ॥ आपृच्छनम् । पृच्छ० । गुरोस्वहल इत्यः ।

आपृष्ट: । त्रि । अनुज्ञाते ।

आपोक्लिमम् । न । लग्नात्तृतीयषष्ठनवमद्वादशभवनेषु ।

आप्त: । त्रि । प्रत्ययिते । विश्वासाधारे । प्राप्ते । लब्धे । सत्ये । रागद्वेषादिवर्जितेयथार्थवक्तरि ॥ हितोपदेष्टरि ॥ युक्ते । भ्रमादिशून्ये । तत्त्वार्थवेदिनि ॥ पुं । भ्रमप्रमादविप्रलिप्साकरणापाटवरूपदोषचतुष्टयरहितेऋष्यादौ ॥ आप्यतेस्म । आप्लृव्याप्तौ । क्त: । स्वस्मिन् । जिने ।

आप्तकाम: । त्रि । प्राप्तस्वरूपानन्दतृप्ते । आप्त: कामोयेन ।

आप्तगर्व: । त्रि । प्राप्ताहङ्कारे ।

आप्तजन: । पुं । हिते । हितोपदेष्टरि । आप्तश्चासौजनश्च ।

आप्तवचनम् । न । आप्तश्रुतौ । शब्दे । आप्तस्यवचनम् । कर्मधारयोवा ॥

आप्तवाक्यम् । न । आगमे ।

आप्तवाक् । स्त्री । वेदे । कर्मधारय: ॥ बहुव्रीहिणामुनौ ॥ पुं ।

आप्तश्रुति: । स्त्री । आप्तवचने । वेदे । आप्ताचासौश्रुतिश्च ।

आप्ता । स्त्री । जटायाम् । इतिहारावली ।

आप्ति: । स्त्री । सम्बन्धे । योगे । लाभे । सम्प्राप्तौ ॥ व्याप्तौ । आप्यते । आप्लृ० । स्त्रियांक्तिन्नाबादिभ्य: ।

आप्तोक्ति: । स्त्री । राद्धे । सिद्धान्तवाक्ये ।

आप्यम् । न । कुष्ठौषधौ । त्रि । अम्मये । जलविकारे फेनादौ । कर्मणेषभूते मन्त्रादौ । प्राप्तव्ये । अपां विकार: । तस्यविकारइत्यणन्ताच्चतुर्वर्णादित्वात्स्वार्थेष्यञ् । स्त्री । आप्या ।

आप्यायक: । पुं । पुष्टिकरे ।

आप्यायनम् । न । तर्पणे । तृप्तौ । प्रीणने ॥ परिपूरके ।

आप्यायित: । त्रि । तृप्ते । प्रीते ॥ पूरिते ।

आप्रच्छनम् । न । आनन्दने । पृच्छ

ग्रीष्मायाम् । आङ्पूर्वोयमानन्दनार्थः । ल्युट् ॥

आप्रदानम् । न । आदाने ॥

आप्रपदम् । न । पादाग्रपर्य्यन्ते ॥

आप्रपदीनम् । त्रि । पादाग्रपर्य्यन्तलम्बमाने वस्त्रादौ ॥ पादस्याग्रं प्रपदम् । तन्मर्यादीकृत्य आप्रपदम् । आप्रपदं प्राप्नोतीत्यर्थे अनेन खः ॥

आप्रवणम् । न । उत्प्लवने ॥ उद्धरणे ॥ त्रि । ईषदवनते ॥

आप्लवः । पुं । स्नाने ॥ आप्लवनम् । प्लुङ् गतौ । घञभावपक्षे ऋदोरप् ॥

आप्लवव्रती । पुं । स्नातके । समाप्तवेदाध्ययनकृतस्नाने ॥ आप्लवते । प्लुङ्० । अच् । आप्लवश्चासौ व्रतीच ॥ आप्लवः स्नानम् । तद्व्रतीनित्यस्नायीतिमुकुटः ॥

आप्लावः । पुं । स्नाने ॥ आप्लवनम् । प्लुङ्० । विभाषाङ्किरुप्लुवोरितिवा घञ् ॥

आप्लाव्यम् । न । आप्लवे ॥ आप्लवते । प्लुङ्० । भव्यगेयेतिसाधु ॥

आप्लुतः । त्रि । स्नाते । कृतस्नाने ॥ पुं । स्नातके ॥ आप्लवनम् । प्लुङ्० । क्तः ॥

आप्लुतव्रती । पुं । श्रुतेः पाठात् स्नाते । स्नातके । आश्रमान्तरमगते समाप्तवेदव्रते ॥ आप्लवते । प्लुङ्० । गत्यर्थाकर्मकेतिक्तः । सचासौव्रतीच ॥ मुकुटस्तु आप्लुतं स्नानं तद्व्रती नित्यस्नायीत्याह ॥

आप्वा । पुं । वायौ ॥ आप्नोतिसर्वम् । आप्लृ० । श्रेवयह्वेतिवन्नन्तः ॥

आफूकम् । न । अहिफेने ॥ आफूकंशोषणंग्राहिश्लेष्मघ्नंवातपित्तलम् । तथाखसफलोद्भूतवल्कलप्रायमित्यपि ॥

आबद्धः । पुं । दृढबन्धे ॥ प्रेम्णि ॥ अलङ्कारे ॥ भूषणे ॥ पुं । योक्त्रे ॥ त्रि । आप्ते ॥ आबध्यतेस्म । बध० । क्तः ॥

आबन्धः । पुं । बन्धने । प्रेम्णि । योक्त्रे । आबध्यतेऽनेन । बन्धबन्धने । हलश्चेति घञ् ॥

आबाधा । स्त्री । पीडायाम् । दुःखे ॥ भूखण्डे । त्रिकोणक्षेत्रमध्यरज्जुनिक्षेपेण यत्खण्डद्वयं जायते तस्मिन् ॥ बाधृलोडने । आङ्पूर्वःगुरोश्चेत्यः ॥

आबिलः । त्रि । अनच्छे । अप्रसन्ने । कलुषे ॥ आबिलति । बिलभेदने । इगुपधेतिकः ॥

आबिलकन्दः । पुं । मालाकन्दे ॥

आबुत्तः । पुं । नाट्योक्त्या भगिनीपतौ ॥ आपनम् आप् । सम्पदादित्वात् क्विप् । आपमुत्तनोति । अन्येभ्योपीतिडः ॥

आभण्डनम् । न । निरूपणे ॥

आभरणम् । न । अलङ्कारे । भूषणे ॥

आभ्रियतेऽनेन । भृञ्भरणे । ल्युट् ।

आभा । स्त्री । उपमायाम् । कान्त्याम् । शोभायाम् । दीप्तौ । बबूले । आभा बबूलपर्यायः कथितः कैश्चिदिरिति भावप्रकाशे वातव्याधौ त्रिकशूलचिकित्सा ॥

आभातिः । स्त्री । छायायाम् ॥

आभाषणम् । न । आलापे । कथने । भाषव्यक्तायांवाचि । आङ्पूर्वः । ल्युट् ।

आभाषितः । त्रि । अभिमुखीकृते ।

आभासः । पुं । प्रतिबिम्बे । दीप्तौ । सदृशे ॥ आभिमुख्येनभासते । भास॰ । पचाद्यच । ईषद्भासनंवा ॥

आभास्वरः । पुं । चतुष्षष्टिसङ्ख्यकगणदेवताविशेषे ॥ आभास्वराश्चतुष्षष्टिरित्युक्तः ॥ द्वादशसङ्ख्यके गणदेवताविशेषे ॥ आत्मा ज्ञाता दमो दान्तः शान्तिर्ज्ञानं शमस्तपः । कामः क्रोधो मदो मोहो द्वादशाऽऽभास्वरा इमे । आसमन्ताद्भासनशीलः । भासृदीप्तौ । स्थेशभासपिसकसोवरजिति वरच् ।

आभिजात्यम् । न । कौलीन्ये । पाण्डित्ये । अभिजातस्यभावः । ष्यञ् ।

आभिमन्यवः । पुं । परीक्षिति नृपे ॥ अभिमन्योरपत्यम् । अण् ।

आभिरः । पुं । गोपे । आसमन्तात् भियंराति । रादाने । आत इतिकः ।

आभिरूप्यम् । न । अभिरूपत्वे ।

आभीक्ष्ण्यम् । न । भृशे । अत्यन्ते । अतिशये ॥ नित्ये । त्रि । तद्युक्तक्रियायाम् ॥

आभीक्ष्ण्यम् । न । पौनःपुन्ये । भृशार्थे । भावेष्यञ् ।

आभीरः । पुं । अहीर इतिप्रसिद्धेगोपे । ब्राह्मणादम्बष्ठायामुत्पन्ने । वैश्यभेदएव आभीरोगवाद्युपजीवीतिस्वामी । देशविशेषे । यथा । श्रीकोङ्कणादधोभागेतापीतः पश्चिमेपरे । आभीरदेशो देवेशि विन्ध्यशैलेव्यवस्थित इतिशक्तिसङ्गमतन्त्रम् । न । मात्रावृत्तप्रभेदे । यथा । एकादशकलधारि कविकुलमानसहारि । इदमाभीरमवेहि जगणमन्तमनुधेहि । यथा । तरलनयनचलितेन मदमन्थरचलितेन । सुमुखिहृदय मभिलाषि सपदिनकस्यकरोषीति ॥ आअभिईरयति । ईरगतौकम्पनेच । पचाद्यच ।

आभीरपल्लिः । स्त्री । गोपग्रामे ॥ गोपगृहपङ्क्तौ । आभीराणांपल्लिः ।

आभीरपल्ली । स्त्री । गोपग्रामे । घोषे । अहीरवासा इति भाषा । आ

भीराणांपल्ली ।

आभीरी । स्त्री । महाशूद्रास्त्रम् । अाभीरमो इति भाषा । आभीरस्त्रीजातीया वा । पुंयोगादितिजातेरिति च ङीष् ।

आभीलम् । न । कृच्छ्रे । दुःखे । त्रि । कष्टयुक्ते । भयानके । आसमन्तात्भियंलाति । ला० । कः ।

आभुग्नः । त्रि । ईषद्वक्रे । आकुञ्चिते ।

आभेरी । स्त्री । रागिणीविशेषे ।

आभोगः । पुं । वरुणस्यच्छत्रे । परिपूर्णतायाम् । यत्ने । आभोजनम् । भुज० । भावे अधिकरणे वा घञ् । कविनामयुक्त गानसमापककाव्ये । यथा । यत्रैवकविनामस्यात्सआभोगइतीरितइतिसङ्गीतदामोदरः ।

आभ्यन्तरः । त्रि । अभ्यन्तरभवे । तत्रभव इत्यण् ।

आभ्युदयिकः । त्रि । अभ्युदयनिमित्ते श्राद्धादिकर्मणि ।

आभ्रिकः । पुं । काष्ठकुद्दालेन खननकर्त्तरि । अभ्रयाखनति । तेनदीव्यतीत्यादिनाठक् ।

आम् । । । अङ्गीकारे । स्माने । निश्चयस्मृतौ । प्रतिवचने । आमयति । अमगत्यादिषु । ततः क्विप् ।

आमः । पुं । रोगमात्रे । रोगविशेषे । मलवैषम्यरोगे । न । षट्प्रकाराजीर्णरोगमध्ये रोगविशेषे । आहारस्यरसःसारो योनपक्वोऽग्निलाघवात् । आमसंज्ञांसलभते बहुव्याधिसमाश्रयः । आममन्नरसंकेचित् केचित्तुमलसञ्चयम् । प्रथमांदोषदुष्टिंवा केचिदामंप्रचक्षते । अपिच । अविपक्व मसंसक्तं दुर्गन्धिबहुपिच्छिलम् । सादनंसर्वगात्राणामाममित्यभिशब्दितम् । तेनामेन सहायुक्ताद्दोषाद्दूष्याश्चताद्दृशाः । तदुद्भवा आमयायेसामाइतिबुधैः स्मृताः । त्रि । अपक्वे । असिद्धे । पाकरहिते ।

आमगन्धि । न । शवादुत्थगन्धयुक्ते । विस्रे । अपक्वमांसादिगन्धाढ्ये ।

आमण्डः । पुं । शुक्लैरण्डे ।

आमनस्यम् । न । पीडायाम् । व्यथायाम् । अमनसो भावः । ब्राह्मणादित्वात् ष्यञ् ।

आमन्त्रणम् । न । सम्बोधने । आनन्दने । निमन्त्रणे । कामचारानुज्ञायाम् । यस्याकरणे प्रत्यवायोनस्यात् । यथा । इह शयीत भवान् । मन्त्रगुप्तभाषणे । आङ्पूर्वः । ल्युट् ।

आमन्त्रणा । स्त्री । पृच्छायाम् ।

आमन्त्रितम् । न । सम्बोधनप्रथमायाम् । त्रि । निमन्त्रिते ।

आमन्दः । पुं । वासुदेवे ॥

आमन्दा । स्त्री । रज्जुभेदे ।

आमयः । पुं । रोगे । अमरोगे । भावे घञ् । आमंयात्यनेन । यामापणे । अन्येभ्योपीतिडः । यद्वा । आमयत्यनेनवा । मीञ्‌र्हिंसायाम् । एरच् । घोवा । न । कुष्ठौषधौ ।

आमयावी । त्रि । रोगिणि । मन्दानलयुक्ते । विकृते । आमयो स्यास्ति । आमयस्योपसंख्यानंदीर्घश्चेति-विनिः ।

आमर्शनम् । न । स्पर्शे ।

आमर्षः । पुं । कोपे । मर्षणम् । मृष तितिक्षायाम् घञ् । नञ्‌समासः । अन्येषामपीतिदीर्घः । मित्रघ्नोगमिरामर्षं निर्वीर्यमरिनन्दनमिति प्रयोगः ।

आमलकः । पुं । वासकवृक्षे । न । धात्रीफले । क्षुद्रामलके । आमलते । मल । क्वुन्‌शिल्पिसंज्ञयोः । आमलक्याःफलम् । फलेलुगितिविकारावयवप्रत्ययस्यलुक् । त्रि । धात्रीद्रुमे । तिष्यफलायाम् ।

आमलकी । स्त्री । अमृतायाम् । तिष्यफलाद्रुमे । आमलते । मलधारणे । क्वुन् । जातेरितिङीष् ।

आमवातः । पुं । स्वनामख्यातेरोगविशेषे । तल्लक्षणं यथा । युगपत् कुपितावेतौ त्रिकसन्धिप्रवेशकौ । स्तब्धञ्चकुरुतो गात्रमामवातःसउच्यते । स्तैः वातकफौ । त्रिकसन्धिप्रवेशकौ वेदनयेतिबोद्धव्यौ ॥

आमश्राद्धम् । न । आमान्नविहितश्राद्धे । आपद्यनग्नौतीर्थेच चन्द्रसूर्यग्रहे तथा । आमश्राद्धंद्विजैःकार्यं शूद्रेणतुसदैवहि । अपत्नीकः प्रवासीच भार्यायस्यरजस्वला । आमश्राद्धंद्विजैः कार्यं शूद्रेणतुसदैवहीतिच ।

आमातीसारः । पुं । षट्‌प्रकारातीसारमध्येरोगविशेषे ॥

आमात्यः । पुं । अमात्ये ।

आमानस्यम् । न । पीडायाम् ॥

आमान्नम् । न । अपक्वतण्डुलादौ ।

आमाशयः । पुं । नाभिस्तनयोर्मध्यभागे अपक्वस्थाने ।

आमिक्षा । स्त्री । वैश्वदेव्याम् । तप्ते पक्वेचपयसि दधियोगतो जातायांदुग्धविकृतौ । तत्रघनीभूतः पिण्डआमिक्षा जलंवाजिनम् ॥ आमिक्ष्यते । मिषुसेचने । बाहुलकात्सक् । यद्वा । आमक्षति । मक्षरोषे सङ्घातेच । अच् । पृषोदरादिः ॥

आमिक्षीयम् । न । आमिक्षे । दधिनि । आमिक्षायैहितम् । विभाषाह

किरपूपादिभ्यइति छः ।

आमिक्ष्यम् । न । आमिक्षीये । आमिक्षायैहितम् । यत् ।

आमिषम् । न । पुं । भोग्यवस्तुनि ॥ सम्भोगे ॥ उत्कोचे ॥ पलले । मांसे ॥ सुन्दराकाररूपादौ । लोभसञ्चये । लाभे । कामगुणे । रूपे । भोजने । लोभ्यवस्तुनि । विषये । आमिषति । मिषस्पर्द्धायाम् । मेषतिवा । मिषुसेचने । इगुपधेतिकः । यद्वा । अमति । अमगत्यादिषु । अमेर्दीर्घश्चेतिटिषच् ॥ यद्वा । आमिष्यते भुज्यते । मिषश्लेषणे । घञ् । संज्ञापूर्वकत्वान्नगुणः । घञर्थेकः इतितुपरिगणनादयुक्तम् ।

आमिषप्रियः । त्रि । मांसाभिलाषिणि ॥ पुं । कङ्कपक्षिणि ।

आमिषाशी । त्रि । मत्स्यमांसभोजनशीले । शौष्कले ॥ आमिषमश्नाति । अशभोजने । सुपीतिणिनिः ।

आमीक्षा । स्त्री । आमिक्षायाम् । आङ्पूर्वान्मिहेर्दीर्घश्चेतिसः ॥

आमुक्तः । त्रि । पिनद्धे । परिहितवस्त्रादौ । परिहितकवचेजने । आमुच्यतेस्म । मुच्लृमोचणे । क्तः ।

आमुपः । पुं । कण्टकयुक्तवंशविशेषे ।

आमुष्मिकः । त्रि । स्वर्गसुखाद्यनुभवे । अमुष्मिन् परलोकेभवः । ठक् ।

आमुष्यायणः । त्रि । ख्यातवंशोद्भवे । सत्कुलजाते । अमुष्यापत्यम् । नडादित्वात्फक् । षष्ठ्याः अलुक् ॥

आमूलम् । न । मूलपर्य्यन्ते ।

आमोदः । पुं । अतिदूरगामिनिगन्धे । गन्धे । हर्षे । निश्वासगन्धे ॥ सुमहद्गन्धे । आमोदनम् आमोदयतिवा । मुदहर्षे । आङ्पूर्वः । भावे घञ् । स्वार्थण्यन्तः । पचाद्यच्वा ।

आमोदनम् । न । आमोदकरणे । ल्युट् ।

आमोदितः । त्रि । आनन्दिते । सहर्षे । सुगन्धिते । आमोदःसञ्जातोऽस्य । तारकादित्वादितच् ।

आमोदी । त्रि । मुखवासने । कर्पूरादिनानाद्रव्यरचितमुखवासार्हद्रव्ये । आमोदोऽस्तिअस्य अस्मिन्वा । इनिः ।

आम्नातः । त्रि । अभ्युक्ते । यथा । अनाम्नातेष्वमन्त्रत्वमिति ।

आम्नायः । पुं । आगमे । निगमे । वेदे । सम्प्रदाये । गुरुपरम्परागतसदुपदेशे । उपदेशे । वंशे । कथने । कुलक्रमे । अभ्यासे । यथा । तस्यसन्दिदिहे वुद्धिर्मुहुः सीतांनिरीक्ष्यच । अम्नायानामयोगेनविद्यांमशिशिक्षा

मिवेति रामायणम् ॥ आम्नायते अ
भ्यस्यते । म्ना अभ्यासे । कर्मणिघञ् ।
श्याद्यधेतिणः । आम्नानंवा । भावे
घञ् । आत इति युक् ।

आम्बिकेयः । पुं । कार्त्तिकेये । स्कन्दे ॥
धृतराष्ट्रराजनि ॥ अम्बिकायाः अप
त्यम् । स्त्रीभ्योढक् ।

आम्भसिकः । पुं । मत्स्ये । अम्भसावर्त्त
ते । ओजस्सहोम्भसावर्त्ततेइतिठक् ।
ठस्येकः ॥

आम्रः । पुं । चूते । रसाले । अथास्यपु
ष्पादीनांगुणाः । आम्रपुष्पमतीसा
रकफपित्तप्रमेहनुत् । असृक्दुष्टि
हरंशीतंरुचिकृद् ग्राहिवातलम्
।*॥ आम्रंबालंकषायाम्लं रुच्यंमारुत
पित्तकृत् । तरुणंतु तदत्यम्लंरूक्षं
दोषचयास्रकृत् ।*। आम्रमामंत्व
चाहीन मातपेतीवशोषितम् । अ
म्लंस्वादुकषायंस्याद्भेदनंकफवातजि
त् । । पक्वन्तु मधुरंवृष्यंस्निग्धंशुक्र
बलप्रदम् । गुरुवातहरंहृद्यंवर्ण्यंशी
तमपित्तलम् । कषायानुरसं वह्नि
श्लेष्मशुक्रविवर्द्धनम् ॥ *। तदेववृक्ष
सम्पक्वं गुरुवातहरंपरम् ॥ मधुरा
म्लंसरंकिञ्चित् भवेत् पित्तप्रकोपन
म् ॥ । आम्रंकृत्रिमपक्वंयत्तद्भवे
त् पित्तनाशनम् । रसस्याम्लस्यनाशात्तु माधुर्याच्च विशेषतः । चूषितंतत्
परंरुच्यंबलवीर्यकरंलघु । शीतलं-
शीघ्रपाकिस्यात् वातपित्तहरंसरम् ॥*
। तद्रसोगालितोबल्योगुरुर्वातहरः
सरः । अहृद्यस्तर्पणोऽतीवबृंहणः-
कफवर्द्धनः॥ । तस्यखण्डंगुरुपरंरो
चनं चिरपाकिच । मधुरंबृंहणंबल्यं
शीतलंवातनाशनम् । वातपित्तह
रं रुच्यंबृंहणं बलवर्द्धनम् । वृष्यंवर्ण
करंस्वादुदुग्धाक्तं गुरुशीतलम् ॥ *॥
मन्दानलत्वं विषमज्वरञ्चरक्तामयं
बद्धगुदोदरञ्च । आम्रातियोगेन
यनामयञ्चकरोति तस्मा दतितानि
नाद्यात् ॥ ।एतदम्लाम्रविषयंमधुरा
म्रपरंनतु । मधुरस्य परंनेत्रहितत्वा
द्यागुणायतः ॥ *॥ शुण्ठ्यम्भस्त्वनुपा
नंस्यादाम्राणा मतिभक्षणे । जीरकं
वाप्रयोक्तव्यं सहसौवर्चलेनच ॥ *॥
आम्रबीजं कषायंस्या च्छर्द्यतीसार
नाशनम् । ईषदम्लञ्चमधुरं तथा हृ
दयदाहनुत् ॥ * ॥ आम्रस्यपल्लवंरुच्यं
कफपित्तविनाशनम् । पल्लवमचन
वदलम् । अस्य शाकप्रकारस्तु । स्वि
न्ना निष्पीडिताः कामंकोकिलाहा
रपल्लवाः । घृतसिन्धूत्थसंसिद्धारुच्या
रामठवासिताः ॥ सर्पिषाखण्डयुक्ता
स्तेमलिताश्चाम्रपल्लवाः । लवङ्गार्द्रक

संयुक्तामरीचैरुचिकारकाः॥ ॥ * अस्यपल्लवमुकुलानां प्रकारस्तु । आम्रस्यैवनवताम्ररुचिप्रवालाः खण्डीकृतालवणमिश्रितपिण्डितास्तु । वाह्लीकधूपनजुषोघृतदुग्धसिद्धाःसन्दीपयन्ति पवनस्यसखंहिएते ॥ मुकुलःसहकारशाखिनः शृतखण्डीकृतसैन्धवान्वितः । दधिमथ्यमरीचसंस्कृतश्चिरयातामरुचिंछिनत्तिहि ॥ कफपित्तहरौहृद्यौमुखवैरस्यनाशनौ । वह्निसन्धुक्षणौरुच्यौ चूतजौ पुष्पपल्लवौ ॥ ।आम्रमामंजलस्विन्नंमर्द्दितं दृढपाणिना । सिताशीताम्बुसंयुक्तं कर्पूरमरिचान्वितम् ॥ प्रपानकमिदंश्रेष्ठंभीमसेनेननिर्मितम् । सद्योरुचिकरंबल्यंशीघ्रमिन्द्रियतर्पणमिति ॥ अम्यते । अमगत्यादौ । अमितम्योर्दीर्घश्चेतिरक्दीर्घश्च ॥

आम्रगन्धकः । पुं । समष्ठिलायाम् । शाकविशेषे ॥

आम्रपेषी । स्त्री । शुष्काम्रखण्डे ॥

आमरसाकृतिः । स्त्री । रसालायाः प्रभेदे ॥ यथा । किञ्चित्कुङ्कुमसंयुक्तं विमस्तुदधिगर्भितम् । सशर्करं भवेत् पीतापक्वाम्रसमसन्निभा ॥ पीता शिखरिणीया साज्ञेयावर्णवर्तीशिसा । मुकच्याम्रधुराबल्यावातपित्तह

रापरेति ॥

आम्रवणम् । न । चूतवने ॥ प्रनिरन्तःशरेत्यादिनावननकारस्यणत्वम् ॥

आम्रातः । पुं । आमडा अम्बाडा इति विख्यातफलवृक्षविशेषे । कपीतने । पीतने ॥ आम्रातमम्लंवातघ्नंगुरूष्णंरुचिकृत्परम् । पक्वन्तुतुवरं स्वादुरसपाकं हिमंस्मृतम् ॥ तर्पणंश्लेष्मलंस्निग्धंवृष्यंविष्टम्भिवृंहणम् । गुरुबल्यंमरुत्पित्तक्षतदाहक्षयास्रजित् ॥ अमावट इतिख्याते आम्रातके । राजाम्र ॥

आम्रातकः । पुं । आम्राते । कपीतनेवृक्षे ॥ अमैाट इतिख्याते आम्रावर्त्ते ॥ पक्वस्यसहकारस्यकटे विस्तारितोरसः । घर्मशुष्कोमुहुर्दत्त आम्रातक इतिस्मृतः ॥ आम्रमतति । अतसातत्यगमने । कृञादिभ्यउन् ॥

आम्रातकेश्वरः । पुं । सिद्धस्थानविशेषे ॥ आम्रातकेश्वरं सूक्ष्मासूक्ष्माख्यापरमेश्वरीत्यागमः । सूक्ष्माचाम्रातकेश्वरे इति देवीगीता च ॥

आम्रावर्त्तः । पुं । आम्रातके । अमावट अमैाट इतिभाषाप्रसिद्धे ॥ आम्रावर्त्तस्तृषाछर्द्दिवातपित्तहरःसरः । रुच्यःसूर्य्यांशुभिःपाकाल्लघुश्चसहिकीर्त्तितः ॥

आम्रेडितम्। न। द्विस्त्रिरुक्ते ॥ यथा। सर्पःसर्प इति। आम्रेड्यते आधिक्येना च्यतेस्म। म्रेडृउन्मादे। क्तः॥

आम्लवेतसः। पुं। अम्लवेतसवृक्षे।

आम्ला। स्त्री। अम्लिकायाम्। तिन्तिडीवृक्षे। श्रीवल्ल्याम्।

आम्लिका। स्त्री। चिञ्चायाम्। अम्लोद्गारे।

आयः। पुं। धनागमे। प्राप्तौ। लाभे। एकादशभवने॥ वास्तुविषये ध्वजाद्यष्टसु॥ आयाध्वजोधूम्रहरिश्वगोखरेभध्वाङ्क्षकाः स्मृताः। ग्रामादिषुस्वामिग्राह्ये भागे। स्त्र्यगाररक्षके।

आयःशूलिकः। त्रि। तीक्ष्णकर्मणि। तीक्ष्णोपायेनयोऽन्विच्छतसआयःशूलिकोजनः। अयः शूलेन अर्थानन्विच्छति। अयः शूलदण्डाजिनाभ्यांठक् ठञाविति ठक्।

आयतः। त्रि। दीर्घे। लम्बा इति भाषा॥ आयम्यतेस्म। क्तः। आयतते वा। यतीप्रयतने। पचाद्यच्। आकृष्टे॥ अतिप्रसक्ते।

आयतच्छदा। स्त्री। कदल्याम्। आयताश्छदाः यस्याः सा॥

आयतनम्। न। आश्रये। विश्रामस्थाने। यज्ञस्थाने। चैत्ये। देवस्थाने। आयतन्तेऽत्र। यती०। अधिकरणे ल्युट्।

आयतिः। स्त्री। दैर्घ्ये। प्रभावे। कोषदण्डजे तेजसि। उत्तरकाले। आगामिकाले। फलदानकाले। प्रापणे। सङ्गे। संयमे॥ आयम्यते अनया अत्रवा आयमनं वा। यमउपरमे। स्त्रियांक्तिन्। आयास्यतिवा। याते र्बाहुलकाड्डुतिः॥

आयती। स्त्री। भविष्यत्काले। कृदिकारादिति ङीष्।

आयत्तः। त्रि। अधीने। वशीभूते। आयततेस्म। यती०। अकर्मकत्वात् कर्त्तरि क्तः॥

आयत्तिः। स्त्री। स्नेहे। वशित्वे। वासरे। बले। स्थाने। सामर्थ्ये। सीमनि। आयतनम्। यती०। स्त्रियां॥ क्तिन्।

आयमनम्। न। आकर्षणे। यथादृढस्यधनुष आयमनमिति। आकृष्य दीर्घीकरणे।

आयल्लकम्। न। उत्कण्ठायाम्॥ इति हेमचन्द्रः॥

आयसम्। न। लौहे। त्रि। अयसोविकारे। अयोनिर्मिते॥ अण्।

आयसी। स्त्री। लोहमयकवचे। अङ्गरक्षिण्याम्। जालिकायाम्। ङीप्।

आयस्तः । त्रि । तेजिते । शाणादिना-तीक्ष्णीकृते । क्षिप्ते ॥ क्लेशिते ॥ कुपिते । हते । उत्सुके । प्रयत्नकुर्वाणे ॥ यत्नप्रयत्ने । कर्त्तरि क्तः ॥

आयस्थानम् । न । स्वामिग्राह्योभागः आयः स यस्मिन्नुत्पद्यते तस्मिन् ॥

आयातः । त्रि । आगते ॥

आयामम् । न । स्वभावे । इतिजटा-धरः ॥

आयामः । पुं । दैर्घ्ये । आयम्यते अने-न वा आयमनं वा । घञ् । यथा । आयाति । या० । अर्त्तिस्तु सुह्विति मन् ।

आयामवान् । त्रि । आयामिनि ॥ आ-यामोऽस्ति अस्य अस्मिन् वा । यस्मा दिभ्योमतुबन्यतरस्यामिति मतुप् ॥

आयामी । त्रि । आयामवति । पक्षे इनिः ।

आयासः । पुं । व्यायामे । श्रमे । आय-सनम् । यसु० । घञ् ।

आयी । त्रि । लाभवति । मतुबर्थे इ-निः ।

आयुः । पुं । छान्दसः । मनुष्ये । एति । इण्० । छन्दसीणः इत्युण् । बहुलव-चनात् भाषायामपीति व्याख्यानकृत् । जीवितव्याप्यकाले । आयुषि ॥ आयुनाजगदायुर्नेत्तिवर्णविवेकः । मा

वधिष्ठाजटायुं मामितिभट्टिः । तटीं विन्ध्यस्याद्रेरभजतजटायोः प्रथमज इत्यादिप्रयोगाश्चानुकूलास्तेषाम् । आयाति । या० । मृगय्वादिर्वा ।

आयुक्तः । त्रि । व्यापारिते । ईषद्युक्ते । कर्माध्यक्षे । नियोगिनि ॥

आयुतः । त्रि । समन्तात्युक्ते ॥

आयुधम् । न । शस्त्रमात्रे ॥ आयुधानां त्रयोभेदः प्रहरणानि पाणिमुक्तानि यन्त्रमुक्तानि चेति । तत्र । प्रहरणानि खड्गादीनि । पाणिमुक्तानि चक्रादीनि । यन्त्रमुक्तानि शरप्रस्तरादीनि ॥ आयुध्यन्तेऽनेनि । युधसम्प्रहारे घञर्थेकविधानम् ॥

आयुधधर्म्मिणी । स्त्री । जयन्तीवृक्षे ॥

आयुधागारम् । न । अस्त्रगृहे ॥ अत्र नियुक्तस्य लक्षणमुक्तं मात्स्ये १८९ अध्याये । स्थापनाजातितत्त्वज्ञः सततं प्रतिजागरः । राज्ञःस्यादायुधागारेदक्षःकर्म सुचोद्यत इति ॥

आयुधिकः । पुं । अस्त्रजीविनि । शस्त्राजीवे । काण्डपृष्ठे । आयुधेनजीवति । आयुधाच्छचेतिचाट्ठन् ।

आयुधीयः । पुं । आयुधिके ॥ आयुधेन जीवति । छः ॥

आयुर्द्रव्यम् । न । औषधे ॥

आयुर्वेदः । पुं । अष्टादशविद्यान्तर्गतध

न्वन्तरिप्रणीत विद्याविशेषे । चिकित्साशास्त्रे । रोगोपशमपूर्वकानन्दफलके अष्टस्थानसंयुते अथर्ववेदस्योपाङ्गे । आयुःशरीरेन्द्रियसत्त्वात्मसंयोगः । तदस्मिन् विद्यते ॥ अथवा आयुरनेन विन्दतीत्यायुर्वेदः ॥ ऋग्वेदस्योपवेदे ॥ इति शौनकोक्तचरणव्यूहः ॥

आयुर्वेदी । त्रि । आयुर्वेदज्ञे । चिकित्सके । वैद्ये ॥

आयुर्योगः । पुं । औषधे ॥

आयुष्मान् । त्रि । चिरजीविनि । दीर्घायुषि । अतिशयित मायुरस्य । मतुप् । तसौमत्वर्थे ॥ पुं । तृतीय योगे ॥ तत्रजातस्य फलं यथा । यस्यायुष्मान्जन्मकालेधनुष्मान् यानेयानं तस्यदेशेषुकार्य्यम् । कुर्यान्नूनं क्रीडनं पुष्पशाय्यांदासैर्दासैरन्वितोगर्वितश्चेति ॥

आयुष्यम् । त्रि । पथ्ये ॥ आयुषोनिमित्ते ॥ आयुर्हिते ॥ यत् ॥

आयुष्‌ । न । जीवितकाले । परमायुषि ॥ पथ्याशिनांशीलवतांनराणां सद्‌वृत्तिभाजांविजितेन्द्रियाणाम् । एवं विधानामिदमायुरत्रचिन्त्यंसदाष्टद्विमुनिप्रवादः ॥ एते ॥ अष्टमभवने ॥ एति । इणगतौ । एतेर्णिच्चेत्युसिः ॥ चिरकालस्थायित्वात् शरीरेऽन्वर्थतायामायादेशः ॥

आयुस्करः । त्रि । परमायुर्जनके ॥

आयोगः । पुं । गन्धमाल्योपहारे ॥ व्यापृतौ । व्यापारे ॥ रोधे ॥ आयोजनम् । युजिर्० । घञ् ॥

आयोगवः । पुं । शूद्राद्वैश्यायामुत्पन्ने जातिविशेषे ॥ काष्ठतक्षणमस्य कर्म ॥

आयोजनम् । न । आहरणे । द्रव्यासादने ॥ यथा । कुत्रचित्तण्डुलाः सन्निकटस्यालीकाचेन्धनम् । तेषामायोजनं कुर्वन् मुख्यः कर्ताभिधीयत इति ॥

आयोधनम् । न । युद्धे ॥ वधे ॥ युधसम्प्रहारे । भावे ल्युट् ॥

आरः । पुं । मङ्गलग्रहे ॥ शनिग्रहे ॥ पित्तले ॥ रेफल इतिगौडभाषाप्रसिद्धे मधुराम्लफले । वृक्षविशेषे ॥ न । मण्डलोहे ॥ पित्तले । रीत्याम् ॥ कोणे । प्रान्तभागे ॥ ऋगतौ । भावे घञ् ॥

आरकूटः । पुं । न । पित्तले । रीत्याम् ॥ यथा । अकाञ्चनेकाञ्चननाधिकाङ्क्षे किमारकूटाभरणेन न श्रियइति ॥ आरं कूटयते । कूटदाहे । पचाद्यच ॥

आरट्‌ः । पुं । हस्तिकुम्भाधःस्थले । गजकुम्भसन्धौ । हस्तिशीर्षमर्मणि ॥ सैन्ये ॥ त्रि । रक्षके ॥ रक्षणीये ॥

। स्त्री । रक्षायाम् । आरक्षति । र
क्षपालने । पचाद्यच् ।

आरग्वधः । पुं । धनवहेडा सोनालु गि
रमालव अमलतास इतिभाषाप्रसि
द्धे राजवृक्षे । व्याधिघाते । अस्यगु-
णाः । आरग्वधोगुरुः स्वादुःशीतलः
स्रंसनोत्तमः । ज्वरहृद्रोगपित्ता-
स्रवातोदावर्त्तशूलनुत् । तत्फलंस्रं
सनंरुच्यंकुष्ठपित्तकफापहम् । ज्वरे-
तुसततं पथ्यंकोष्ठशुद्धिकरंपरमिति-
। आरगणम् । रणेशङ्कायाम् । सम्प
दादित्वात् क्विप् । आरगंरोगशङ्का
मपिहन्ति । कर्मण्यण् । बहुलंतणी
तिहन्तेर्वधः अदन्तः । यद्वा । रुजरा
गे । सम्पदादित्वात् क्विप् । आरजं-
रोगशङ्कामपिहन्ति ।

आरट्टः । पुं । अश्वयोनौ देशविशेषे ।

आरट्टजः । पुं । आरट्टदेशोद्भवघोटके
। पारसीके । आरट्टे जातः । जनी०
। डः ।

आरणिः । पुं । पयसांभ्रमे । आवर्त्ते ।
कुलहण्डके । इतिहारावली ॥

आरण्यः । त्रि । वृक्षपक्षिमृगादौ । अ
रण्ये भवः । अरण्याण्णः । गोमये ।
वागोमयेषु ।

आरण्यकः । पुं । पथि । अध्याये । न्या
ये । विहारे । मनुष्ये । हस्तिनि ।
गजे । अरण्ये भवः । पथ्यध्यायाद्य-
र्थे अरण्यान्मनुष्यइतिवुञ् । गोम-
ये । वा गोमयेषु । न । काण्वानां-
माध्यन्दिनानाञ्चब्राह्मणविशेषे । अ
रण्येऽनूच्यमानत्वात् तस्य । अर-
ण्येध्ययनादेतदारण्यकमुदाहृतम् ।

आरण्यकुक्कुटः । पुं । वनकृकवाकौ ।
आरण्यकुक्कुटः स्निग्धोऽहंहणःश्लेष्मलो
गुरुः । वातपित्तक्षयवमीविषमज्वर
नाशनः ।

आरण्यपशुः । पुं । अरण्यजातपशौ ।
सचसप्तधा । यथा । महिषः । वान
रः । ऋक्षः । सरीसृपः । रुरुः । पृष-
तः । मृगः । इतितिथ्यादितत्त्वेपैठी
नसिः ॥

आरण्यमुद्गा । स्त्री । मुद्गपर्ण्याम् ।

आरण्यराशिः । पुं । मेषे । वृषे ॥ सिं-
हे । मकरप्रथमार्द्धे ॥

आरतिः । स्त्री । उपरमे । निवृत्तौ ।
आरमणम् । रमक्रीडायाम् । क्ति-
न् ।

आरथः । पुं । एकाश्वगन्त्याम् ।

आरनालम् । न । काञ्जिके । आरना
लन्तुगोधूमैरामैः स्यान्निस्तुषीकृ-
तैः । पक्वैर्वासन्धितैस्तत्तुसौवीरसदृ
शंगुणैः । आर्च्छति । ऋगतौ । अच्
। नलति । णलगन्धे । ज्वलतीतिणः

। आरो नालोऽस्य ।

आरनालकम् । न । काञ्जिके । आरो नालोऽस्य । शेषाद्विभाषेति कप् ।

आरबी । स्त्री । आरबनाम्नो म्लेच्छविशेषदेशस्य भाषायाम् । अस्य पठनमु हूर्त्तः पारसीवद्बोध्यः ।

आरब्धः । त्रि । कृतारम्भे । न । आरम्भे ।

आरबः । पुं । म्लेच्छदेशप्रभेदे ।

आरबभाषा । स्त्री । आरबीभाषायाम् ॥

आरभटी । स्त्री । नाट्यवृत्तौ ॥

आरमणम् । न । आरामे ।

आरम्भः । पुं । त्वरायाम् । उद्यमे । स्वार्थं परोपकारार्थं वा गृहचैत्यादिसम्पादनप्रयत्ने । वधे । दर्पे ॥ प्रस्तावनायाम् ॥ उपक्रमे । प्रथमकृतौ । प्रारम्भे । आरम्भणम् । रभराभस्ये । घञ् । रभेरशब्लिटोरिति नुम् ।

आरम्भवादः । पुं । तार्किकाणां मीमांसकानाञ्च वादे ॥ स यथा । आत्मा काशाणुमुखतः कारणं पूर्वमिष्यते । कुलालादिव दण्डन्तु घटवज्जन्मनाशभाक् । पृथिव्यम्भोऽग्निवायूनां कर्मसंयोजिताणवः । द्व्यणुकादिक्रमेणाण्डमारभन्तइदं महदिति ।

आरम्भवादी । पुं । वैशेषिके । त्रि । तन्मतवादिनि ।

आरम्भसिद्धिः । स्त्री । कार्यसिद्धौ ।

आरम्भी । पुं । आरम्भवादिनि । वैशेषिके । समवाय्यसमवायिनिमित्तकारणेभ्योभिन्नस्य कार्यस्योत्पत्तिस्तां योवक्ति तस्मिन्नित्यर्थः । स च वैशेषिकः ।

आरवः । पुं । शब्दमात्रे ॥ आरवणम् । रुशब्दे । विभाषाङिरुप्लुवोरिति घञोभावे ऋदोरप् ॥

आरा । स्त्री । चर्मप्रभेदकास्त्रे । चर्मप्रभेदिकायाम् । आऋयर्त्ति ऋच्छति वा । ऋगतौ । अच् । आर्यते वा । भिदाद्यावाराशस्त्र्यामिति पाठात् साधुः । प्रतोदे । अर्यन्तेऽनयाऽश्वाः । आङ्पूर्वात्त्तेः । आङोर्त्तेश्च । उपसर्गादृतीति वृद्धिः ॥

आराग्रम् । न । अर्द्धचन्द्राद्यस्त्रमुखे ॥ अर्द्धचन्द्रक्षुरप्रादिधाराग्रंमुखमुच्यते । आराग्रन्तु मुखन्तेषां पुष्पदन्तादिभेदतः । इति हलायुधः ॥

आरात् । ा । दूरे । समीपे ॥ आराति । रादाने । बाहुलकादातिप्रत्ययः ।

आरातिः । पुं । अरौ । शत्रौ ।

आरातीयः । त्रि । दूरस्थे । निकटस्थे । आराद्भवः जातः आगतो वा । वृद्धाच्छः ॥

आरात्रिकम् । न । नीराजनायाम् । नीराजननिमित्तदीपे । नीराजनामन्त्रे । आदौ चतुष्पादतले च विष्णोर्द्वौ नाभिदेशे मुखमण्डलैकम् । सर्वेषु चाङ्गेष्वपि सप्तवारानारात्रिकं भक्तजनस्तु कुर्य्यात् ॥

आराधनम् । न । पचने । साधने । अवाप्तौ । तोषणे ॥ पूजने । असारसंसारविवर्त्तनेषु मायात तोषं प्रसभं ब्रवीमि । सर्वत्र दैत्याः समताम्रुपेत सत्त्वमाराधनमच्युतस्येति प्रह्लादः ॥ असारोऽयं संसारस्तत्र विवर्त्तनानि देवमनुष्यतिर्य्यगादिजन्मानि तेषु सत्त्वदुश्चितैर्भोगैस्तोषं मायात किन्तु सर्वत्र सर्वेषु भूतेषु समतां समदर्शितामुपेत प्राप्नुत । तदेवाच्युतस्याराधनमित्यर्थः ॥ आराध्यतेऽनेन । राधसंसिद्धौ । भावकरणादौ ल्युट् ॥

आराधना । स्त्री । साधनायाम् । सेवायाम् । परिचर्य्यायाम् । टाप् ॥

आराधनीयः । त्रि । आराधयितुं योग्ये ॥

आराध्यः । त्रि । उपास्ये । सेव्ये ॥

आरामः । पुं । उपवने । कृत्रिमवने । क्रीडार्थवने ॥ आरमन्त्यत्र । रमक्रीडायाम् । हलश्चेति घञ् ॥

आरामशीतला । स्त्री । सुगन्धिपत्रविशेषे । आनन्द्याम् । गन्धाढ्यायाम् ।

आरालिकः । त्रि । पाचके । सूपकारे । जिह्मगामिनि ॥ अरालं कुटिलं चरति । चरतीति ठक् ॥

आरावः । पुं । आरवे । निनादे । निस्वने । आरवणम् । रुशब्दे । विभाषाङि रुप्लुवोरिति घञ् ॥

आरुः । पुं । वृक्षविशेषे । कर्कटे । शूकरे ॥

आरुणिः । पुं । उद्दालके । गौतमे ॥ अरुणस्यापत्यम् । अतइञ् ॥

आरुणेयः । पुं । श्वेतकेतुमुनौ । आरुणेरपत्यम् । ढक् ॥

आरुरुक्षुः । त्रि । आरोढुमिच्छौ ॥

आरूः । पुं । तरोर्भेदे । कर्कटे । दंष्ट्रिणि । शूकरे । पिङ्गलवर्णे । त्रि । पिङ्गलवर्णवति । ऋच्छति । अर्यतेवा । ऋगतिप्रापणयोः । क्षितकसिपद्यर्त्तिभ्य ऊः ॥

आरूकम् । न । वीरसेनरत्ने । आडूइति भाषा । हिमाचलप्रसिद्धौषधीविशेषे । आड इति गौडभाषा ॥ तत्पत्रपुष्पादिभेदतस्तज्जाति ।

आरूढः । त्रि । कृतारोहणे ॥ उच्चस्थानगते । आङ्पूर्व्वाद्रुहेर्गत्यर्थे तिक्तः । ढत्वधत्वष्टुत्वढलोपदीर्घाः ॥ आरूढो नैष्ठिकं धर्म्मं यस्तु प्रच्यवते पुनः । प्रायश्चित्तं न पश्यामि येन शुध्येत् स आ

त्वग्वा ।

आरेवतः । पुं । आरग्वधे । राजवृक्षे । न । पारेवतवृक्षफले । आरेवयति निस्सारयतिमलम् सारकत्वात् । रेवृप्लवगतौ । णिच् । विच् । अतति । अत० अच् । आरेवश्चासौ अतश्च ।

आरोग्यम् । न । अनामये । लाघवे । रोगराहित्ये । अरोगस्य भावः । ब्राह्मणादित्वात्ष्यञ् । रोगाभावसाधने ।

आरोग्यशाला । स्त्री । चिकित्सालये । यथा । धर्मार्थकाममोक्षाणामारोग्यंसाधनंयतः । अतस्त्वारोग्यदाता च नरोभवति सर्वदः ॥ आरोग्यशालांकुर्वीतमहौषधपरिच्छदाम् । विदग्धवैद्यसंयुक्तांभृत्यवर्गसंयुताम् । वैद्यस्तुशास्त्रवित्प्राज्ञोदृष्टौषधपराक्रमः । ओषधीमूलतत्त्वज्ञःसमुद्धरणकालवित् ॥ बलवीर्यविपाकज्ञः शालिनांसौषधीगणे । त्यागिवद्देहिनांतद्वदनुकूलःप्रियंवदइतिवैद्यकम् ॥

आरोपः । पुं । मिथ्यारोपणे । यथारज्जौसर्पारोपवत् वस्तुन्यवस्त्वारोपः ॥ मिथ्याविष्करणे ॥

आरोपणम् । न । न्यासे । संस्थापने ।

आरोपितः । त्रि । कल्पिते । कृतारोपणे । निहिते । न्यस्ते ।

आरोहः । पुं । अवरोहे । वरारोहाकटौ । वरस्त्रियाःश्रोण्याम् । आरोहणे । गजारोहे । दीर्घत्वे । समुच्छ्रये ॥ परिमाणविशेषे । नितम्बे । आरुह्यते अनेनवा आरोहणम् आरोहतिवा । रुहेःकरणेभावेवा घञ् । अचवा ॥

आरोहकः । त्रि । आरोहणकर्त्तरि ॥

आरोहणम् । न । सोपाने । पैडी इतिभाषा । पाषाणादिनिर्मिते सौधाद्युपरिगमनमार्गे । समारोहे । नीचादूर्ध्वगमने । चढना इतिभाषा । प्ररोहणे । अङ्कुरादिजनने । आरुह्यतेऽनेन । रुहप्रादुर्भावे । करणेल्युट् ।

आर्किः । पुं । अर्कपुत्रे । शनैश्चरे ।

आर्गवधः । पुं । राजवृक्षे । आरग्वधे ।

आर्घा । स्त्री । मधुमक्षिका विशेषे । यापीतादीर्घतुण्डा षट्पदसन्निभा भवति ।

आर्घ्यम् । न । मधुप्रभेदे । मधूकवृक्षानिर्यासंजरत्कार्वाश्रमोद्भवाः । स्वल्पार्घ्यंतदाख्यातंश्वेतकं मालवेपुनः । तीक्ष्णतुण्डास्तुयाःपीतामक्षिकाःषट्पदोपमाः । आर्घास्तास्तत्कृतं यत्तदार्घ्यमित्यपरेजगुः । आर्घ्यम्भवति चक्षुष्यंकफपित्तहरं परम् ।

कषायं कटुकं पाके तिक्तम्बलपुष्टिकृत् ।

आर्च्चः । त्रि । अर्च्चावति । अर्चास्ति अस्य अस्मिन्वा । प्रज्ञाश्रद्धार्चाभ्योण इति पाणिनीयेनाणः ।

आर्च्चिकः । पुं । ऋचांव्याख्याने । त्रि । ऋग्भवे । द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक् ।

आर्जवम् । न । अकौटिल्ये ॥ आर्जवंहि कुटिलेषु न नीतिः। यथा हृदयंवच्च स्तथा । परप्रतारणाराहित्ये । परचित्तानुसारित्वे ॥ अश्रद्धानेषुश्रोतृषुस्वज्ञातार्थसञ्ज्ञापने । विहितप्रतिषिद्धयोरेकरूपप्रवृत्तिनिवृत्तिशालित्वं शारीरमार्जवम् । ऋजोर्भावः । इगन्ताच्चलघुपूर्वादित्यण् ।

आर्त्तः । त्रि । पीडिते । अस्वस्थे । जराव्याध्यादिना ऽवसन्ने । दुःखाभिभूते । पुत्रवियोगादिदुःखिते ।

आर्त्तगलः । पुं । नीलझिण्ट्याम् । वाणायाम् । आर्त्तःक्षीणोगलोति । गलमदने । प० अच् ।

आर्त्तभागः । पुं । ऋषिविशेषे । ऋतभागस्य गोत्रापत्यम् । विदाद्यञ् ।

आर्त्तवम् । न । रजसि । स्त्रीपुष्पे । पुष्पे । त्रि । ऋतुजे । ऋतुसम्बन्धिनि । ऋतुः प्राप्तोऽस्य । ऋतोरण् ॥ ऋतुरेववा । प्रज्ञादिभ्यश्चेत्यण् ।

आर्त्तवी । स्त्री । घोटक्याम् । वाजिन्याम् ।

आर्त्तिः । स्त्री । पीडायाम् ॥ रोगे । आङ्ऋच्छतेः क्तिनिउपसर्गादृतीतिवृद्धिः ।

आर्त्विजीनः । पुं । ब्राह्मणे । यजमाने । ऋत्विक्कर्मार्हति । ऋत्विजंवा अर्हति । यज्ञर्त्विग्भ्यांघखञाविति सूत्रेण यज्ञर्त्विग्भ्यांतत्कर्मार्हतीतिचोपसङ्ख्या नमितिवार्त्तिकेन खञ् । विद्वान्यजेत विद्वानेवयाजयेदितिद्वयोरपिविदुषोरधिकारात् । योवाइमांपदशःस्वरशोवर्णशोवाचंविदधाति स आर्त्विजीनोभवति आर्त्विजीनाः स्यामेत्यध्येयंव्याकरणमितिभाष्यम् ॥

आर्त्विज्यम् । न । ऋत्विक्साध्यकर्मणि । ऋत्विजः कर्म । ष्यञ् ।

आर्थिकः । त्रि । अर्थग्राहके । अर्थादागते ॥ अर्थंगृह्णाति । प्रतिकण्ठार्थललामञ्चेतिठक् ॥

आर्थीभावना । स्त्री । भावनाविशेषे ॥ प्रयोजनेच्छाजनितयागादिक्रियेच्छाविषयव्यापार आर्थीभावना । साचाख्यातत्वांशेनोच्यते । आख्यातसामान्यस्य व्यापारवाचित्वात् । सा

चांशन्वयमपेक्षते । साध्यंसाधनमि
तिकर्त्तव्यताञ्च । किम्भावयेत् केन
भावयेत् कथंभावयेदिति । तत्रसा
ध्याकाङ्क्षायां स्वर्गादिफलंसाध्यत्वे
नान्वेति । साधनाकाङ्क्षायांयागा
दिः करणत्वेनान्वेति । इतिकर्त्त-
व्यताकाङ्क्षायां प्रयाजाद्यङ्गजात-
मितिकर्त्तव्यतात्वेनान्वेति ॥

आर्द्रिकः । पुं । कृषके ॥

आर्द्रः । त्रि । सजलवस्तुनि । क्लिन्ने ।
स्तिमिते । भीजा गीला इतिभाषा ।
कर्त्तरिक्तः । अर्द्दगतौ । अर्हेर्दीर्घ-
श्चेतिरक् ॥ आर्द्रद्रव्यंद्विधाप्रोक्तं सर
संनीरसंतथा । सदुग्धंगुसरसंकंद्वि
धानीरसमुच्यते । वास्तूकंसार्षपंशा
कंनिर्गुण्ड्यरण्डमार्षकम् । धत्तूरा-
द्यमिदंसर्वमार्द्रंसरसमुच्यते । वटाश्व
त्थकरीराद्यमार्द्रद्रव्यन्तुनीरसम् ।
सदुग्धन्तुद्विधाप्रोक्तंमृदुतीक्ष्णमिति
क्रमात् । शातलावजसीहुण्डसैरि
ण्याद्यास्तुतीक्ष्णकाः । दुग्धिकार्क-
क्षीरिण्याद्यामृदुदुग्धाः प्रकीर्त्ति-
ताः ॥

आर्द्रकम् । न । मूलविशेषे । अपाकशा
के । शृङ्गवेरे । अदरख इतिभाषा
। आर्द्रिकाभेदिनीगुर्वीतीक्ष्णोष्णा
दीपनीचसा । कटुकामधुरापाके
रूक्षावातकफापहा ॥ येगुणाःकथि
ताःशुण्ठ्यास्तेपिसन्त्यार्द्रकेखिलाः ।
भोजनाग्रेसदापथ्यंलवणार्द्रक भक्षण
म् । अग्निसन्दीपनंरुच्यं जिह्वाकण्ठ
विशोधनम् ॥ कुष्ठपाण्ड्वामयेकृच्छ्रे
रक्तपित्ते कफज्वरे । दाहेनिदाघेश
रदिनैवपूजितमार्द्रकम् । अपिच ।
चक्षुष्यंरोचनंस्वर्य्यविकाशिविशदंस
रम् । स्तम्भाटोपानिलघ्नञ्चलवणार्द्र-
कभक्षणम् ॥ गुडार्द्रकंवातहरंचक्षु
ष्यंपित्तनाशनम् । ज्वरघ्नंचातितृष्य
ञ्चवर्च्चोभेदिकफापहम् ॥ सुत्वचा
रहितमङ्कुरतःसत्क्षालितंविमलकै
र्बहुतोयैः । मिश्रितंलवणनिम्बुपयो
भिर्वालमार्द्रकमुपैतियोग्यताम् ।
तैलासुरीरजनिसिन्धुजपङ्कसङ्क्षिप्र-
स्यन्दमाननवनिम्बुरसप्रसक्तम् । स्वा
दुस्तरांशिशिरवासरभोजनेषु कस्यै-
तिवर्णनपथंखलुशृङ्गवेरम् । हृष्यो
ष्णांदीपनंहृद्यंसक्षेपंलघुपाचनम् ।
रोचनंतर्पणंबल्यंचार्द्रकंपरिकीर्त्ति
तम् । वातपित्तकफेभानांशरीरव
नचारिणाम् । एकएवनिहन्तास्ति-
लवणार्द्रककेशरी । आर्द्रायांजातम्
। पूर्वाह्णापराह्णार्द्रेति वुन् । आर्द्र
यतिजिह्वायांवा । वुन् । आर्द्रसंज्ञ
कंवा संज्ञायामितिकन् । अर्द्दयतिक

फंथा । अर्द्द° । अर्द्दोर्दीर्घश्चेतिरक् । कः ।

आर्द्रकवटः । पुं । महार्द्रकवटे ।

आर्द्रता । स्त्री । पङ्किलत्वे ॥

आर्द्रपटवासाः । पुं । तापसविशेषे । आर्द्रपटंवासआच्छादनंयस्य ।

आर्द्रमाषा । स्त्री । माषाणीति गौड भाषा प्रसिद्ध माषपर्ण्याम् ।

आर्द्रशाकम् । न । आर्द्रके ।

आर्द्रा । स्त्री । षष्ठनक्षत्रे । तत्रजातस्यफलंयथा । क्षुधाधिकोरुक्षशरीरकान्तिःकलिप्रियः कोपयुतोऽविनीतः । प्रसूतिकालेचभवेत्किलार्द्रान चार्द्रचेताःशरणागतेपीति । टाप् ।

आर्द्रालुब्धकः । पुं । केतुग्रहे ।

आर्षटिः । स्त्री । अत्यादरे । टी । स्त्री ।

आर्य्यः । पुं । स्वामिनि । वृद्धे । गुरौ ॥ सुहृदि । त्रि । श्रेष्ठकुलोत्पन्ने । सत्कुलोद्भवे । पूज्ये । श्रेष्ठ । सङ्गते । नाट्योक्त्या मान्ये । उदारचरिते । स्वच्छस्वान्ते । कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन् । तिष्ठतिप्रकृताचारे सतुआर्यइतिस्मृतः । अर्त्तुं योग्यः अर्य्यतेवा । ऋगतौ । ऋहलोर्ण्यत् ।

आर्य्यकः । पुं । पितामहे । मातामहे । न । पिण्डपात्रादिपितृकार्ये । इति त्रिकाण्डशेषः ॥

आर्य्यका । स्त्री । श्रेष्ठायांनार्य्याम् । उदीचामात इति पक्षेइत्वाभावः ।

आर्य्यगृह्यः । त्रि । आर्यपक्षाश्रिते । आर्यैर्गृह्यते । पदास्वैरिबाह्यापक्ष्येषुचेतिग्रहेः पक्ष्येक्यप् ।

आर्य्यधर्म्मः । पुं । सदाचारे । त्रि । तः इति ।

आर्य्यपुत्रः । पुं । भर्त्तरि । गुरुपुत्रे ।

आर्य्यमिश्रः । त्रि । गौरवयुक्ते ।

आर्य्यहलम् । न । बलात्कारे ।

आर्य्या । स्त्री । उमायाम् । गौर्य्याम् । पार्वत्याम् । मात्रावृत्तभेदे । यथा । पादेद्वादशविषमे मात्राश्चाष्टादशद्वितीयेपि । पञ्चदशचेततुरीये कथितागाथा तथैवार्य्या । सानवधा । पथ्या विपुला चपला मुखचपला जघनचपलाच । गीत्युपगीत्युद्गीतय आर्यागीतिश्चनवधार्यार्हि

आर्य्यावर्त्तः । पुं । देशविशेषे । पुण्यभूमौ । यथा । आसमुद्रात्तुवैपूर्वादासमुद्रात्तु पश्चिमात् । हिमवद्विन्ध्ययोर्मध्य मार्यावर्त्तंमनुर्जगौ । आर्याः आसमन्तात् वर्त्तन्ते पुनः पुनरुद्भवन्त्यत्र । वृत्° । हलश्चेतिघञ् ।

आर्य्यिका । स्त्री । आर्य्यकायाम् । उदीचामिति पक्षेइत्वम् ।

आर्षः । त्रि । ऋषिप्रणीते । वेदोक्ते ॥ पुं । विवाहविशेषे । वराद् गोद्वयं गृहीत्वा तेनैवसह कन्यादाने ॥ यत्र स्यायस्त्विजैदैव आर्ष आदाय गोयुगम् । चतुर्दशप्रथमजः पुनात्युत्तरजश्च षट् । इति याज्ञवल्क्यः । ऋषेरिदायम् । अण् । ऋषिणाप्रोक्तम् । तेनप्रोक्तमित्यण् ॥

आर्षधर्म्मः । पुं । मन्वत्रिविष्णुहारीत याज्ञवल्क्यादिप्रणीतेधर्म्मे ।

आर्षभिः । पुं । चक्रवर्त्तिनि । भरते । ऋषभस्यापत्यम् । अतइञ् ॥

आर्षभी । स्त्री । कपिकच्छाम् ॥ मध्यममार्गे नक्षत्र विशेषाणांसंज्ञाविशेषे ॥ यथा । तथाहेचापिफल्गुन्यौमघाचैवार्षभीमतेति ।

आर्षभ्यः । पुं । षण्डतायोग्येवृषे । ऋषभस्यप्रकृतिः । ऋषभोपानहोर्ञ्यः ।

आर्ष्टिषेणः । पुं । मुनिविशेषे ॥ ऋष्टिषेणस्यगोत्रापत्यम् । विदाद्यञ् । अपत्यसामान्ये शिवाद्यण् ॥

आर्हतः । पुं । सप्तपदार्थवादिनिजिन विशेषे । वादवादिनि ।

आर्हन्ती । स्त्री । योग्यतायाम् ॥ अर्हतोभावः । ब्राह्मणादिषु अर्हतानुमचेतिनु मागमः ष्यञ्च । ङीष् । यलोपः ।

आर्हन्त्यम् । न । योग्यत्वे । अर्हतोभावः । नुमप्यञौ ॥

आलम् । न । हरिताले । त्रि । अनल्पे । आआलयति । अलभूषादौ । अच् । आलातिवा । ला० । आतश्चोपेति कः ।

आलम्बितः । त्रि । स्नाते ।

आलगर्द्दः । पुं । अलगर्द्दे । स्वार्थेऽण् ।

आलभनम् । न । स्पर्शने ।

आलम्बः । पुं । अवलम्बे । आश्रये । घञ् ।

आलम्बनम् । न । आश्रये । विभावविशेषे । लवि अवस्रंसने । आङ्पूर्वाद्रस्माल्युट् ॥

आलम्बितः । त्रि । धृते ।

आलम्बी । त्रि । आलम्बितुंशीले । लवि० । सुपीतिणिनिः ॥

आलम्भः । पुं । वधे । मारणे । स्पर्शे । आलभनम् । डुलभष् प्राप्तौ । घञ् । लभेश्च । उपसर्गात्खलघञोरितिनुम् ॥

आलम्भ्यः । त्रि । वधार्हे ।

आलयः । पुं । गृहे । आलीयतेऽत्र । लीङ्श्लेषणे । पुंसीतिघः ।

आलयम् । । । मोक्षपर्यन्ते । लयमर्यादीकृत्य ।

आलयविज्ञानम् । न । अहङ्कारास्पदे

पूर्वापरानुसन्धातरि ॥

आलवालम् । न । वृक्षमूलसेकार्थं स्वल्पजलखाते । आवाले । आसमन्ताज्जलस्यालयमालाति । लाआदाने । मूलविभुजादित्वात्कः ॥

आलसः । त्रि । अलसे । क्रियामन्दे । आलसति । लसश्लेषणे । पचाद्यच् ॥

आलस्यम् । न । अलसत्वे । सत्तिसामर्थ्ये अवश्यकर्त्तव्यकरणानुत्साहलक्षणे । कौसीद्ये । सत्त्यामप्यौदासीन्यप्रच्युतौ कफादिना तमसा च कायचित्तयोर्गुरुत्वे ॥ व्याधित्वेनाप्रसिद्धमपि योगविषये प्रवृत्तिविरोधिनि ॥ प्रवृत्त्यसामर्थ्यं रजः कार्यविरोधि आलस्यम् ॥ त्रि । अलसयुक्ते । मन्दपरिसृजे । मन्दे ॥ आलसएव । स्वार्थे ष्यञ् । अलसस्य कर्मभावो वा । ब्राह्मणादित्वात् ष्यञ् । आलस्यमस्यास्ति । अ० अच्वा ।

आलातम् । न । अङ्गारे ॥ स्वार्थेऽण् ॥

आलानम् । न । करिणो वन्धनस्तम्भे ॥ गजवन्धनरज्जौ । वन्धने । आलीयतेऽत्र । लीङ्श्लेषणे । अधिकरणेल्युट् । विभाषालीयतेरित्यात्वम् ।

आलापः । पुं । आभाषणे । कथोपकथने । सम्भाषणे । आलपनम् । लपेर्घञ् ।

आलाप्यः । त्रि । आलापयोग्ये ।

आलावर्त्तम् । न । वस्त्रनिर्म्मितव्यजने ।

आलाबुः । स्त्री । } अलाबूम् । तुम्ब्याम् ।
आलाबूः । स्त्री । }

आलास्यः । पुं । कुम्भीरे । इतिहेमचन्द्रः ॥

आलिः । पुं । भ्रमरे ॥ वृश्चिके । स्त्री । वयस्यायाम् । सख्याम् । सेतौ । चुद्रसेतौ । आगन्तुजलधारणार्थायां वृतौ । सस्यार्थजलधारणे । पङ्क्तौ । आरामस्थपुष्पादिगुल्मपङ्क्त्याम् । सन्ततौ । त्रि । विशदाशये । शुद्धान्तःकरणे ॥ अनर्थे । अलति दंशेसमर्थो भवति । अलेर्वाहुलकादिण् । आलयति । अलभूषणे । अचइः । आ अलन्त्यम्भः । अलवारणे । सर्वधातुभ्य इन् । अल्यतेऽनयावा । अलभूषादौ । इगुजादिभ्यः ॥ आलति । आङिइन् ॥

आलिङ्गनम् । न । प्रीतिपूर्वकमिथोदेहसंश्लेषे । उपगूहने । परिरम्भे । कामशास्त्रे तत्सप्तधा । यथा । आमोदालिङ्गनम् । मुदितालिङ्गनम् । प्रेमालिङ्गनम् । आनन्दालिङ्गनम् । रुच्यालिङ्गनम् । मदनालिङ्गनम् । विनोदालिङ्गनमिति ।

आलिङ्गितः । त्रि । आश्लिष्टे ॥

आलिङ्गी । पुं । मृदङ्गविशेषे । आलिङ्ग्ये ।

आलिङ्ग्य: । पुं । यवाकृतिमृदङ्गे । गोपुच्छाकृतिरालिङ्ग्य: ॥ शब्दार्णवेतु । चतुरङ्गुलहीनोङ्गुल्यन्मुखेचैकाङ्गुलेबय: । यवाकृति: सआलिङ्ग्य- आलिङ्ग्यसहिवाद्यते इत्युक्तम् । आलिङ्ग्यते । लिगिगतौ । कर्म- लोयत् ।

आलिञ्जर: । पुं । माट कुण्डा गोल जालाइत्यादि भाषाप्रसिद्धे मणिके । जलभाण्डे । अलिञ्जरएव । स्वार्थे अण् ॥

आलिन्द: । पुं । अलिन्दे । स्वार्थे प्र० अण् ।

आलिम्पनम् । न । मङ्गलालेपने । आलर्पणे । मण्डोदके । इतित्रिकाण्डशेष: ॥

आली । स्त्री । आलिशब्दार्थे ॥ कृदिकारादितिङीष् ।

आलीढम् । न । धन्विन:पादन्यासप्रभेदे । दक्षपतसङ्कोचान्यपादप्रसारणे । दक्षिणजङ्घाप्रसारणामपादसङ्कोचरूपावस्थानेच । लक्षणं यथा । नमितापूर्वजङ्घाच पश्चिमाप्रगुणाभवेत । असमोमध्यकायश्चस्यादालीढस्य लक्षणमिति । त्रि । अशिते । भुक्ते ॥ क्षते । सेनान्यमालीढमिवासुराञ्जै रितिक्षतेलक्षम् । आलेहनम् । लिहेर्नपुंसकेभावे क्त: ।

आलीढकम् । न । तर्णकानांस्थलीषु क्रीडने ।

आलीनकम् । न । रङ्गे । राँग इतिभाषा ।

आलु: । पुं । कोकणदेशप्रसिद्धे कन्दविशेषे । कासकन्दे । कासालौ । विशालपत्रे । पेचके ॥ स्त्री । झारी इति भाषाप्रसिद्धे सनालजलपात्रे । कर्कर्याम् ॥ न । कचालू इत्यादिप्रसिद्धेषु मूलविशेषेषु । अथोच्यते । कन्दोबहुविधोलोकेआलुशब्देनभण्यते । कशालुचैवघण्टालु पिण्डालु शर्करादिकम् ॥ इङ्गजैर्यस्तमानीतंविलातीपदपूर्वकम् कोषादिषुनदृष्टंततभक्षितव्याविवेकिभि: ॥ निघण्टौनास्यपर्यायानगुणा:परिकीर्त्तिता: । स्मार्त्तैर्नैतद्व्यवहृतमभक्ष्यंतद्धितार्थिभि: । सावूदानायथाऽभक्ष्यस्तथैततत्कथितंबुधै: । निजधर्मंमजानद्भिर्गृहीतं वालिशैर्वृथेति । भेलके । आलाति । ला० । मितद्र्वादित्वात् डु: । इयर्त्ति अर्यतेवा । ऋ० । जोरश्चलः- च्यच जोरितिछित्वाकृधातोरपिम

श्लेषातन्तु ख्यातिकेचित् ।

आलुकः । पुं । नागाधिपे । शेषनागे । कासालौ । न । मूलविशेषे । तद्विवरणं यथा । आलुकमप्यालूकं तत्कथितं वीरसेनस्य । काष्ठालुक शङ्खालुकहस्त्यालूकानिकथ्यन्ते । पिण्डालुकमध्वालुकरक्तालूकानिकथितानि । काष्ठालुकंकाठिन्ययुक्तंकठारु । शङ्खालुकं श्वेततायुक्तंसाँखालु । हस्त्यालुकं दीर्घतयुक्तं महाशरीरम् । पिण्डालुकंवर्त्तुलं । सुथनी । मध्वालुकं मधुरतायुक्तं रोमान्वितदीर्घ सुथनी । रक्तालुकं रतारु रतएडा इतिच । एषांगुणाः । आलुकं शीतलंसर्वंविष्टम्भिमधुरं गुरु । सृष्टमूत्रमलंरूक्षंदुर्ज्जंररक्तापित्तनुत् । कफानिलकरं वल्यंवृष्यंस्तन्यविवर्द्धनमितिभावप्रकाशः । एलवालुके ।

आलुकी । स्त्री । अरुइं घुइआ इतिख्याते । रक्तालुप्रभेदे । रक्तालुभेदेया दीर्घातन्वीचग्रथितालुकी । आलुकीवल्कृत् स्निग्धागुर्वीहृत्कफनाशिनी । विष्टम्भकारिणीतैलेतलिता तिरुचिप्रदा ।

आलूः । स्त्री । आलुशब्दार्थे । आलुनाति । लूञ् ० । क्विप् ।

आलूकम् । न । आलुके । वीरसेने ॥

आलूकं शीतलंसर्वंविष्टम्भिमधुरंगुरु । सृष्टमूत्रमलंरूक्षंदुर्जररक्तपित्त-नुत् । कफानिलकरं वल्यं वृष्यंस्तन्यविवर्द्धनम् । एलवालुके ।

आलूनः । त्रि । छिन्ने ।

आलेख्यम् । न । चित्रे ॥ नानार्थे ।

आलेख्यशेषः । त्रि । मृते ।

आलेपः । पुं । उपलेपे ।

आलोकः । पुं । द्योते । प्रकाशे । चाँदनाइतिभाषा । दर्शने । देखना इति भाषा । वन्दिभाषणे । स्तुताविति-यावत् । आलोकनम् । लोकृदर्शने । घञ् ।

आलोकनम् । न । दर्शने । लोकृ॰ ल्युट् ।

आलोकितः । त्रि । दर्शिते ॥

आलोचनम् । न । दर्शने । विवेचने ।

आलोचितः । त्रि । विवेचिते । कृतालोचने । इतिकर्त्तव्यतयावधारिते ॥

आवनेयः । पुं । भौमग्रहे । त्रि । अवनीसम्भूते ॥

आवन्त्यः । पुं । वाटधाने । ब्रात्याद्ब्राह्मणात्सवर्णायामुत्पन्ने ॥

आवपनम् । न । द्रव्यस्थापनपात्रे । भाण्डे । शोगयाम । यत्रप्रक्षिप्य धान्यादिनीयते तस्यामित्यर्थः । आ-प्यते निक्षिप्यते धान्यमत्र । टुवपबी

जतन्तुसन्ताने । ल्युट् ॥ वपने । सम्य
क्क्षुरिकर्म्मणि ॥

आवरकः । पुं । अपवरके । आच्छादके
॥ आव्रियतेऽनेन । वृञ्० । कृञादि
भ्यःसंज्ञायांवुन् ॥

आवरणम् । न । ढाल इतिप्रसिद्धफ
लके ॥ आच्छादने ॥ अविद्यादिव
न्धने ॥ अञ्जने ॥

आवरणच्युतिः । स्त्री । बन्धनाशे ॥

आवरणशक्तिः । स्त्री । अज्ञानशक्तौ ॥
यथा ऽल्पोपिमेघोऽनेकयोजन माय
तमादित्यमण्डल मवलोकयितृन
यनपथपिधायकतयाच्छादयतीव त
था ऽज्ञानंपरिच्छिन्नमपि आत्मा-
नमपरिच्छिन्नम संसारिण मवलो
कयितृबुद्धिपिधायकतयाच्छादयती
वतादृशं सामर्थ्यम् । अनया आवर
णशक्त्या ऽऽच्छन्नस्यात्मनः कर्त्तृत्वभो
क्तृत्व सुखित्वदुःखित्वादिसंसारस-
म्भावनापि भवति । यथा स्वाज्ञाने
नावृतायांरज्जौ सर्पत्वसम्भावना भ
वति । अन्तर्दृग्दृश्ययोर्भेदं वहिश्च ब्र
ह्मसर्गयोर्भेदं वा स्वात्मावलोकयितृ
बुद्धिमखण्डसच्चिदानन्दस्वरूपंवा आ
वृणोति । वृञ्वरणे । कर्त्तरिल्युट् ।
तदेवशक्तिः ॥

आवर्जितः । त्रि । आहृते ॥ मच्चिते ॥
यथा । हविरावर्जितंहोतस्त्वयाविधि
वदग्निष्विति ॥ आनमिते ॥

आवर्त्तः । पुं । चक्राकारेवारिभ्रमे ॥
भ्रुवाद्येरोमसंस्थानविशेषे ॥ आव-
र्त्तने । चिन्तने ॥ राजावर्त्तना-
मोपरत्ने ॥ मेघनायकचतुष्टयान्त
र्गतमेघाधिपविशेषे । आवर्त्तोनि
र्जलोमेघः ॥ न । माक्षिकधातौ ॥
आवर्त्तनम् । वृतु० । भावेघञ् ॥

आवर्त्तकी । स्त्री । लताविशेषे । भग
तवल्ली इति कोकणप्रसिद्धायाम् ।
मनोज्ञायाम् । रक्तपुष्प्याम् ॥

आवर्त्तनम् । न । अह्नोमध्यभागे । सूर्य
स्यपश्चिमदिगवस्थितच्छायायाः पूर्व-
दिग्गमनारम्भसमये ॥ आवर्त्तनात्तु
पूर्वाह्णोह्यपराह्णस्ततःपरम् ॥ दुग्धा
देरालोडने । औटाना इतिभाषा
॥ धातुद्रव्यस्यद्रवीकरणे । गलावना
इतिभाषा ॥ पुं । जम्बुद्वीपोपद्वीप
विशेषे ॥ श्रीहरौ ॥ पुनःपुनर्जनन
मरणसृष्टिप्रलयादिरूपंसंसारचक्र
मावर्त्तयति । वृतु० । बहुलमन्यत्रा
पीतियुच् ॥

आवर्त्तनमणिः । पुं । राजावर्त्तनाम्नो
परत्ने ॥

आवर्त्तनी । स्त्री । ताम्रादिधातुद्रव्यद्रा
वणार्थे मृत्पात्रविशेषे । तैजसावर्त्त

न्याम् । मृषायाम् ॥

आवर्त्तितः । त्रि । गुणिते ॥

आवर्त्ती । त्रि । आवर्त्तनशीले ॥ आवर्त्तयति । प्रशंसायांणिनिः ॥

आवर्त्तिनी । स्त्री । अजशृङ्गीवृक्षे ॥

आवर्हः । पुं । उत्पाटने ॥ आवर्हणम् । वृहउद्यमे । घञ् ॥

आवर्हितः । त्रि । उत्पाटिते । उन्मूलिते ॥

आवलिः । स्त्री । वीथ्याम् । श्रेण्याम् । वृक्षादिपङ्क्तौ ॥ आवलति । वल सम्वरणे । आङि इन् ॥ परम्परायाम् ।

आवलितः । त्रि । चञ्चले ॥

आवली । स्त्री । आवलौ । श्रेण्याम् ॥

आवल्यम् । न । दौर्वल्ये । भावेष्यञ् ॥

आवश्यकम् । न । अवश्यम्भावे ॥ मनोज्ञादित्वाद्वुञ् । अव्ययानां भमात्रे इतिटिलोपः ॥ अवश्यकर्त्तव्ये ॥

आवसथः । पुं । गृहे । वेश्मनि ॥ आर्याकोषे । आर्याछन्दसि ग्रथभेदे ॥ व्रतविशेषे ॥ न । गृहे । गेहे । दवसिते ॥ वसतिस्थाने । विश्रामस्थाने ॥ आवसन्त्यत्र एत्य वसन्तियत्रवा । वसनिवासे । उपसर्गेवसेरित्यथः ॥

आवसथिकः । पुं । गृहस्थे ॥ त्रि । गृहवासिनि ॥ आवसथे वसति । आवसथात्ठल् । स्त्री । ङीष् ॥

आवसथ्यः । पुं । आवसथसम्बन्धिनिलौकिकेग्नौ ॥ आवसथएव । अनन्तावसथेतिहभेषजाञ्ञ्यः ॥

आवसितम् । त्रि । ऋद्धे । निष्पन्नधान्ये ॥ आअवसीयतेस्म । षोन्तकर्मणि । क्तः ॥ रक्षार्थमाच्छादितेधान्ये ॥ आवस्यतेस्म । वसआच्छादने । क्तः ॥ मर्द्दनानन्तरमपनीततृणेवहुलीकरणयोग्ये धान्यराशाविति राजमुकुटः ॥

आवहः । पुं । कामदे । वायोः प्रथमगणे । भूमिवायौ ॥ यथा । द्यौशुक्रज्योतिरादित्यौ नन्दोहरिक्तपास्त्था । चित्रज्योतिः सत्यज्योतिर्ज्योतिष्मानस्कन्धआवहइति॥आभिमुख्येनवहतीति । अभिमुखमागच्छन्‌वा वायुरावहः ॥ पचाद्यच् ॥

आवहमानः । त्रि । क्रमागते ॥

आवापः । पुं । आलवाले ॥ पानभेदे ॥ प्रक्षेपे ॥ भाण्डपचने । आपाके ॥ वलये ॥ शत्रुचिन्तने । परराष्ट्रचिन्तायाम् ॥ निम्नोच्चभूमौ ॥ प्रधानहोमे ॥ आवपन्तिजलमत्र । टुवपवीजतन्तुसन्ताने । हलश्चेति घञ् ॥

आवापकः । पुं । वलये । प्रकोष्ठाभरणे । आउप्यते । टुवप० । कर्मणिवुञ्

। स्वार्थे संज्ञायांवाकन् ॥

आवापनम् । न । सूत्रयन्त्रे । ताँत इति भाषा ॥

आवापस्थानम् । न । आहुतिप्रक्षेपप्रदेशे ॥

आवारि । न । हट्टगालये । हट्टवेश्मनि । हाटघर इतिभाषा ॥ इत्युणादिकोषः ॥

आवारित: । चि । छादिते ॥

आवालम् । ा । बालमभिव्याप्येत्यर्थे । आङ्मर्यादाभिविध्योरित्यव्ययीभाव: ॥

आवालम् । न । आलवाले । वृक्षमूलकृतजलाधारे ॥ आवलते ऽम्भोनेन । वलसंवरणे । हलश्चेतिघञ् । आ ईषत्वालाद्वा: अन्नवा ॥

आवास: । पुं । गेहे । वासस्थाने ॥ आवसन्त्यत्र । वसेर्हलश्चेतिघञ् ॥

आवाहनम् । न । आह्वाने ॥ यथा । विनायकं तथादुर्गां वायुमाकाशमेवच । आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकाविति मत्स्यपुराणम् ॥ निमन्त्रणे ॥

आवाहनी । स्त्री । पूजायांमुद्राविशेषे ॥

आविक: । पुं । कम्बले ॥ त्रि । मेषसम्बन्धिनिमांसादौ ॥ भेडीदुग्धे ॥ आविकंलवणं स्वादुस्निग्धोष्णंचाश्मरीप्रणुत् । अहृद्यंतर्पणं केश्यंशुक्रपित्तकफप्रदम् ॥ गुरुकासेनिलोद्भूते केवलेचानिले वरम् ॥

आविग्न: । पुं । करमर्दे । करोँदा इति भाषा ॥ आविजतेस्म । ओविजीभयचलनयो: । आङ्पूर्व: । गत्यर्थाकर्मकेति क्त: । ओदितश्चेनिन्नत्वम् ॥ भीते ॥

आविद्ध: । त्रि । कुटिले ॥ पराहते । क्षिप्ते ॥ मूर्खे ॥ अभिभूते ॥ विद्धे ॥ आविध्यतेस्म । व्यधे: क्त: । सम्प्रसारणम् ॥

आविद्धकर्णी । स्त्री । पाठायाम् ॥

आविध: । पुं । वेधनास्त्रे । वेधसाधने सूच्यादौ ॥ भ्रमरसूच्यादौ । वर्मा इतिभाषा ॥ आविध्यन्त्यनेन आविध्यते येनवा । व्यध० । घञर्थेक:

आविध्य: । पुं । रावणमन्त्रिदूते ॥

आवि: । ा । प्राकाश्ये । प्रादु: ॥ अवते । उङ्शब्दे । इर् ॥

आविर्भाव: । पुं । प्रकाशे । प्रादुर्भावे । देवावतरणे ॥ उत्पत्तौ ॥

आविर्भूत: । चि । प्रकाशिते । प्रादुर्भूते । अवतीर्णे ॥

आविष्कार: । पुं । प्रकाशे ॥

आविष्कृत: । चि । प्रकटिते ॥ प्रकटीकृते ॥ आवि: अकारि । डुकृञ्० । क्त:

। आवि: क्रियतेस्मवा ॥

आविष्ट: । त्रि । प्रेतबाधिते । भूतादिग्रस्ते ॥ आवेशयुक्ते । निविष्टे ॥ व्याप्ते ॥

आविस् । अ । प्राकाश्ये । स्फुटत्वे । प्रादु: ॥ अयंनिपात: प्रकाशवाची ॥

आवीत: । पुं । व्यतिरेकन्याये ॥ यथा । यत्कृतकं तदनित्यमित्यन्वयादनित्यत्वमवगम्य यन्नानित्यंनतत्कृतकमितिव्यतिरेकइति ॥ विशेषणाद्यष्टमितावीत: सनभवतिइत्यवीत: । अवीतएव आवीत: ॥

आवीरचूर्णम् । न । फागइति आवीरइतिचभाषाविदिते फल्गुनि ॥ यथा । चन्दनागुरुकस्तूरीकुङ्कुमद्रवसंयुतम् । आवीरचूर्णंरुचिरंगृह्यतांपरमेश्वरेति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८ अध्याय: ॥

आवुक: । पुं । नाट्योक्त्याजनके ॥ अवति । अव° । बाहुलकादुण् । णित्त्वादुपधावृद्धि: ॥

आवृत् । स्त्री । अनुक्रमे । परिपाट्याम् ॥ आवर्त्तनमत्रवा । वृतुवर्त्तने । सम्पदादिक्विप् ॥

आवृत: । त्रि । कृतावरणे । आच्छादिते । वेष्टिते । संवीते ॥ आव्रियतेस्म । वृञ्वरणे । क्त: ॥ ब्राह्मणादुग्रकन्यायामुत्पन्ने ॥

आवृति: । स्त्री । आवरणे ॥

आवृत्त: । त्रि । व्यावृत्ते । निवृत्ते ॥ यथा । आवृत्तानांगुरुकुलाद्विप्राणांपूजकोभवेदिति ॥ कृतावरणे ॥ आवर्त्ततेस्म । वृतु° । क्त: ॥

आवृत्तचक्षु: । त्रि । कार्यकारणभावादुपरतकरणग्रामे ॥ आवृत्तानि विमुखीकृतानिविषयेभ्य श्चक्षूंषि करणानियेन चक्षुर्ग्रहणस्योपलक्षणार्थत्वात् ॥ निवृत्तचक्षुपि ॥

आवृत्ति: । स्त्री । अभ्यासे । पुनरुच्चारणे ॥ आवर्त्तनम् । वृतु° । क्तिन् ॥ ध्याने ॥

आवेग: । पुं । त्वरायाम् । वेगे ॥ आवेजनम् । ओविजी° । घञ् ॥

आवेगी । स्त्री । वृद्धदारकवृक्षे ॥ आवेगोऽस्त्यस्या: । अर्शआद्यच् । गौरादि: ॥

आवेदनम् । न । निवेदने ॥ आङ्पूर्वाद्विदेर्ल्युट् ॥

आवेश: । पुं । अहङ्कारविशेषे । आटोपे । संरम्भे ॥ अभिनिवेशे । सङ्गे ॥ अनुप्रवेशे ॥ ग्रहामये । भूतसञ्चारे । भूतादिनारोगे ॥ अपस्माररोगे ॥ आवेशनम् । विश° । घञ् ॥

आवेशनम् । न । शिल्पशालायाम् । गृहादन्यस्मिन्कारूणां कर्मस्थाने ॥ भूतावेशे ॥ प्रवेशे ॥ कोपे ॥ परिवेशे ॥

। सूर्यादिपरिधौ । आविशन्त्यत्र। विशप्रवेशने। करणेति ल्युट् युच्चा।
आवेशिकः। त्रि। अतिथौ। असाधारणे। स्वीये। अवेशे अगृहेभवः। अध्यात्मादित्वाट्ठञ्।
आवेशितः। त्रि। निवेशिते। स्थापिते। यथा। नमय्यावेशितधियां कामः कामायकल्पते। भर्जिताः क्वथिताधानाः प्रायोबीजायनेशते इतिश्रीभागवतेश्रीकृष्णोक्तिः। मयि परमात्मनीत्यर्थः।
आवेष्टकः। पुं। प्राचीरादौ। घेर इतिभाषा।
आशंसा। स्त्री। इच्छायाम्। स्पृहायाम्। अप्राप्तप्राप्तीच्छायाम्। आशंसनम्। शंसुस्तुतौ। गुरोश्चेत्यः। टाप्।
आशंसितः। त्रि। वांछिते। आख्याते। उक्ते। नपुंसके भावेक्तः।
आशंसिता। त्रि। इच्छावति। आकाङ्क्षाशीले। आशंसते। आङः शासुइच्छायाम्। तृन्।
आशंसुः। त्रि। इच्छौ। इच्छाशीले। इष्टार्थप्राप्तीच्छौ। आशंसितरि। आशंसते। आङःशा०। सनाशंसभिक्षउः।
आशक्तः। त्रि। सम्यकशक्तिविशिष्टे।

आशङ्का। स्त्री। भये। त्रासे। सङ्कोचे। ईषद्वितर्के।
आशनः। पुं। असनवृक्षे।
आशयः। पुं। अभिप्राये। पनसे। आधारे। विभवे। अजीर्णे। चेतसि। वासनाख्ये संस्कारे। आफलविपाकाच्चित्तभूमौशेते इतिव्याख्यानात्। कोष्ठागारे। सन्ताने। आशयविज्ञाने। आशेरते ऽस्मिन्कर्मानुभववासना इत्यर्थात्। किम्पचाने। धर्माधर्मे। अदृष्टे। शयने। आशयनम्। शीङ्स्वप्ने। एरच्। कुक्षौ। यथा। अहमात्मागुडाकेशसर्वभूताशयस्थितइति।
आशयाशः। पुं। पावके। वह्नौ। आशेरतेऽत्रेत्याशयः। एरच्। आधारः। तमश्नाति। कर्मण्यण्।
आशयिता। त्रि। भोजयितरि। अशेर्ण्यन्तात् तृच्।
आशरः। पुं। अग्नौ। राक्षसे। आशृणाति। शृहिंसायाम्। पचाद्यच्।
आशा। स्त्री। दीर्घाकाङ्क्षायाम्। अशक्योपायार्थविषयायां तृष्णायाम्। अनवगतोपायार्थविषयायां-वाप्रार्थनायाम्। अप्राप्तवस्त्वाकाङ्क्षायाम्। अनिर्ज्ञातप्राप्तीष्टार्थप्रार्थनायाम्। आयतायांतृष्णायाम्।

यथा। पिशाचमोचनंतीर्थंकतिधानावगाहितम्। तथाप्याशा पिशाचीनामाशामिश्नंनमुञ्चतीति॥ ह-रिति। दिशि॥आसमन्तादश्नुते। अशूङ्व्याप्तौ। पचाद्यच्॥

आशापुरसम्भवः। पुं। भूमिजगुग्गुलौ। आसापुरीधूप इतिभाषा॥

आशाबन्धः। पुं। समाश्वासे॥ मर्कटजालके॥ दिग्बन्धे॥ आशयाबन्धः। आशायाः बन्धोवा॥

आशाम्बरः। त्रि। दिगम्बरे॥

आशास्यम्। त्रि। आशंसनीये। आशीःसाध्ये॥

आशितः। त्रि। अशिते। भुक्ते॥ आ-शायतेस्म। शोतनूकरणे। क्तः। आ-छोरन्यतरस्यामितीत्त्वम्॥

आशितङ्गवीनम्। त्रि। पुरागोस्तृप्तिकृतस्थले। पहलेगायजहाँचरी हैं इतिभाषा॥ त्रिष्वाशितङ्गवीनंतत् गावोयत्राशिताःपुरा॥ आशिताः-भोजिताः गावोयत्र। अषडक्षाशितङ्ग्वलमितिखः। निपातनात्पूर्वस्य मुम्॥

आशितम्भवः। पुं। तृप्तौ॥ न। अन्नादौ॥ आशितो भवत्यनेन आशितस्य भवनंवेतिविग्रहे। आशिते भुवःकरणभावयोरित्याशितशब्दोप-

पदाद्भवतेः करणभावयोः खच्प्रत्ययः। मुमागमः पूर्वपदस्य॥ यावताऽन्नेना तिथ्यादिर्भोजितो भवतिसएवमुच्यते॥ भावे आशितम्भवम्॥

आशिता। त्रि। अह्वरे। बहुभोजनशीले॥

आशिरः। पुं। अग्नौ॥ सूर्य्ये॥ राक्षसे॥ अश्नुते। अशूव्याप्तौ सङ्घाते च। अश्नातिवा। अशभोजने। अशेर्णिदितिकिरच्॥

आशीः। स्त्री। हितस्याशंसने। यस्य यदपेक्षितं तम्प्रतितदभिवृद्धिप्रार्थने। आशीर्वादे॥ सर्पतालुगदन्ते॥ आशीस्तालुगतादंष्ट्रा तयाविद्धोमजीवति। इति विषविद्या॥ फलतृष्णायाम्। अप्राप्तप्रार्थने॥ वृद्धिनामौषधौ॥ आशास्ते इतिविग्रहे। आङः शासुइच्छायाम्। शासुअनुशिष्टौ। अस्मात् क्विप्चेति क्विप्। आशासः क्वौ उपधायाइत्त्वम्। यद्वा आशासनमनयावा। सम्पदादिः। आशासःक्वाविनीत्त्वम्॥

आशीः। स्त्री। सर्पदंष्ट्रायाम्। सर्पविषे॥ हिताशंसने॥ आशीमिवकला मिन्दोरितिराजशेखरोक्त्या ईकारान्तायम्। आशीराश्यहिदंष्ट्रायामिति द्विरूपकोशाच्च॥

आशीर्वादः । पुं । आशीर्वचने । मङ्गलप्रार्थनायाम् । आशिषोवादः ॥

आशीविषः । पुं । विषधरे । सर्पे । आशिषि विषमस्य । पृषोदरादिः ॥

आशु । ।। क्षिप्रे ॥

आशुः । पुं । न । व्रीहिप्रभेदे । वर्षाभव धान्येषष्टिकादौ । पाटले व्रीहौ ॥ न । द्रुते । शीघ्रे । शीघ्रेक्रियाविशेषणात्त्वेक्लीवम् । सत्त्वगामित्त्वे वाच्यलिङ्गम् । अश्नुते । अशूङ्व्याप्तौ । कृवापाजिमिस्वदिसाध्यशूभ्यउण् इत्युण् ॥

आशुगः । पुं । वायौ ॥ वाणे । शरे । अर्के । त्रि । शीघ्रगामिनि । आशु गच्छति । अन्यत्रापीतिगमेर्डः ॥

आशुतोषः । पुं । महादेवे । महेश्वरे । त्रि । शीघ्रंसन्तुष्टे । आशुशीघ्रंतोषस्तुष्टिर्यस्य ॥

आशुपत्री । स्त्री । गजभक्ष्यायाम् । शल्लकीलतायाम् ॥

आशुव्रीहिः । पुं । आशुधान्ये । पाटले । आशुसंज्ञकोव्रीहिः ॥

आशुशुक्षणिः । पुं । अग्नौ । वायौ । आसमन्तात् शोष्टुमिच्छति । आङ्पूर्वाच्छुष्यतेःसमन्तात् आङिशुषेःसनश्छन्दसीत्यनिः । छान्दसानामपिकचिद्भाषायां प्रयोगः॥

आशेकुटो । पुं । पर्वते । इति शब्दमाला ॥

आशौचम् । न । अशुद्धौ । वर्णाश्रमविहितकर्मानुष्ठानसङ्कोचावस्थायाम् ॥ अशौचमेव । स्वार्थे अण् ।

आश्चर्य्यम् । न । अपूर्वे । अद्भुते । चित्रे । विस्मये ॥ त्रि । अद्भुतवति ॥ आइतिचर्यते अभिनीयते । आश्चर्यमनित्त्य इति अभूततद्भावेसुट्निपात्यते । यथा । आश्चर्यंयदिसभुञ्जीत । अद्भुतमित्यर्थः ।

आश्मः । पुं । अश्मनोविकारे । तस्यविकारइत्यण् ॥

आश्मनः । पुं । अरुणे । सूर्यसारथौ ॥

आश्मरथ्यः । पुं । ऋषिविशेषे । अश्मरथस्य गोत्रापत्यम् । गर्गादिभ्यो यञ् ॥

आश्यानः । त्रि । शोषिते ॥

आश्रमः । पुं । न । ब्रह्मचारिणि । गृहिणि । वानप्रस्थे । भिक्षौ । यथा । ब्रह्मचारीगृहस्थश्चवानप्रस्थोयतिस्तथा । एतेगृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः । सर्वेपिक्रमशस्त्वेते यथाकालंनिषेविताः । यथोक्तकारिणं विप्रंनयन्ति परमाङ्गतिमिति । अत्र कलौविशेषो यथा । ब्रह्मचर्याश्रमो नास्तिवानप्रस्थोपिनप्रिये । गार्ह-

स्थोभैक्षुकश्चैव आश्रमौ द्वौकलौ युगे इति॥ वने । मठे॥ मुनीनांवा सस्थाने । आश्रमन्त्यत्रानेनवा । श्र मुतपसि खेदेच । घञ् । नोदात्तो पदेशस्येतिवृद्धिर्न । यद्वा । आसम न्ताच्छ्रमो ऽत्र स्वधर्मसाधनक्लेशात्॥ परमात्मनि । आश्रमवत् सर्वेषांसं साराराण्येभ्रमतांविश्रामस्थान त्वा- दाश्रमः परमात्मा । अस्यार्थः । आ श्रमवदाश्रमः यथारण्येचरतामाश्र- मश्छायादानां विश्रामस्थानम् एवं संसारारण्ये भ्रमतांप्राणिनां सुषुप्ते मोक्षेच विश्रामस्थानं भवति परमे श्वर इति ।

आश्रमधर्म्मः । पुं । आश्रमाणां ब्रह्मचा रिप्रभृतीनां शास्त्रविहिते साधने । यथा । ब्रह्मचारिणः स्वाध्यायः । गृ हस्थस्य दानंदमश्च यज्ञश्च । वानप्रस्थ स्यतपः । परिव्राजकस्य अभयंसत्त्वसं शुद्धिर्ज्ञानयोगव्यवस्थितिरिति । य स्वाश्रमंसमाश्रित्य अधिकारःप्रवर्त्त ते । सखल्वाश्रमधर्मस्तु भिक्षादण्डा दिको यथा । यतीनान्तुशमो धर्मो नियमोवनवासिनाम् । दानमेवगृ हस्थानांशुश्रूषा ब्रह्मचारिणामिति स्मृतिः । महानिर्वाणेतु । पुरैवकथितं तावत्कलिसम्भवचेष्टितम् । तपःस्वा

ध्यायहीनानां नृणामल्पायुषामपि- । क्लेशप्रयासाशक्तानां कुतोदेहपरिश्र मः । ब्रह्मचर्याश्रमोनास्तिवानप्रस्थो ऽपि न प्रिये । गार्हस्थोभैक्षुकश्चैवआ श्रमौद्वौकलौयुगे । गृहस्थस्य क्रियाः सर्वाआगमोक्ताः कलौशिवे । नान्य मार्गैः क्रियासिद्धिः कदापिगृहमेधि नाम् ॥ भैक्षुके प्याश्रमेदेवि वेदोक्तं दण्डधारणम् । कलौनास्त्येवतत्त्वज्ञ यतस्तच्छ्रौत संस्कृतिः । शैवसंस्कार विधिनाव धूताश्रमधारणम् । तदे व कथितंभद्रे संन्यासग्रहणंकलौ । विप्राणामितरेषाञ्चवर्णानां प्रवले कलौ । उभयत्राश्रमेदेविसर्वेषा- मधिकारिता । सर्वेषामेवसंस्काराः कर्माणिशैववर्त्मना । विप्राणामितरे षाञ्चकर्मलिङ्गंपृथक् पृथक् । इत्यु क्ते रागमोक्त एव आश्रमधर्मः कला वनुष्ठेयः । सचतस्मादेवतन्त्रो त्समा दनुसन्धेयः ।

आश्रमवित् । पुं । दक्षप्रभृतिषु । तेहि आश्रमाः परमार्था इतिसमर्थयन्ते । तदसत् वेषस्याश्रमशब्दार्थत्वे शूद्रा देरपि प्रसङ्गात् । जातेश्चदुर्विवेचन त्वात् । तन्मूलस्याश्रमस्यदर्शयितुम शक्यत्वात् । संस्कारस्यचदेहसमवा- यित्वे पारलौकिकत्वायोगात् । अस

ङ्गचात्मनितद्सम्भवात् ॥

आश्रमिकः । त्रि । आश्रमयुक्ते ॥

आश्रमी । पुं । ब्रह्मचर्याद्याश्रमविशिष्टे ॥ अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः ॥

आश्रयः । पुं । व्यपदेशे ॥ सामीप्ये ॥ आधारे । अवलम्बे ॥ यथा । परिजनस्य राजादिः ॥ निकेते । आयतने । गृहे ॥ राज्ञां सन्ध्यादिषड्गुणान्तर्गतगुणविशेषे । अरिणापीड्यमानस्य जिगीषोर्बलवदाश्रयणे ॥ विषये ॥ आश्रयणम् । श्रिञ् एरच् ॥

आश्रयाशः । पुं । अग्नौ । पावके ॥ चित्रकवृक्षे ॥ त्रि । आश्रयनाशके । आश्रयध्वंसिनि ॥ आश्रयमाधारमश्नाति अशभोजने । कर्मण्यण् ॥

आश्रयासिद्धः । पुं । हेत्वाभासविशेषे ॥ यथा । गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् इति । अत्र गगनारविन्दमाश्रयः स च नास्त्येव । आश्रयः असिद्धो यस्य सः ॥

आश्रवः । पुं । अङ्गीकृतौ ॥ क्लेशे ॥ त्रि । प्रवृत्तिनिवृत्त्योर्विधातुं शक्ये । वचनस्थिते ॥ आशृणोतिवाक्यम् । श्रु श्रवणे । पचाद्यच् । आङ्पूर्वाच्छृणोतेर्न्र्दारवा ॥

आश्रितः । त्रि । आश्रयप्राप्ते । शरणागते । आधेये । उपविष्टे ॥ न्यायमते परमाण्वाकाशादिनित्यद्रव्यभिन्नसर्वद्रव्याणामाश्रितत्वं साधर्म्यम् ॥ आश्रयति आश्रीयते स्म वा । श्रिञ् । गत्यर्थेति कर्मणि वा क्तः ॥

आश्रुतः । त्रि । अङ्गीकृते । स्वीकृते ॥ कृतश्रवणे । आकर्णिते ॥ आश्रूयते स्म । श्रु श्रवणे । क्तः ॥

आश्लिष्टः । त्रि । आलिङ्गिते ॥ श्लिष आलिङ्गने । गत्यर्थाकर्मकेति क्तः ॥

आश्लेषः । पुं । आलिङ्गने ॥ एकदेशसम्बन्धे ॥ आश्लेषणम् । श्लिष० । घञ् ॥

आश्वम् । न । अश्वीये । अश्ववृन्दे ॥ अश्वानां समूहः । छस्याभावे अण् ॥ अश्वस्य कर्मभावयोः ॥ प्राणभृज्जातित्वात् अञ् ॥ त्रि । रथादौ ॥ अश्वैरुह्यते । शेषइत्यण् ॥

आश्वतराश्विः । पुं । बुडिलमुनौ ॥ अश्वतराश्वस्यापत्यम् । इञ् ॥

आश्वत्थम् । न । अश्वत्थवृक्षफले ॥ अश्वत्थस्य फलम् । प्लक्षादिभ्योण् विधेर्न लुक् ॥

आश्वयुजः । पुं । आश्विनमासे ॥ आश्वयुजी पौर्णमास्यस्मिन्नस्ति । सास्मिन् पौर्णमासीति अण् ॥

आश्वयुजी । स्त्री । आश्विनपूर्णिमायाम् ॥ अश्वयुजा युक्ता पौर्णमासी । नक्ष

त्रेणयुक्तःकाल इत्यण् । टिड्ढेति- ङीप् ॥

आश्वलायनः । पुं । ऋषिविशेषे ॥ अश्वलस्यगोत्रापत्यम् । नडादिभ्यः फक् ॥

आश्वस्तः । त्रि । जातविश्वासे ॥

आश्वासः । पुं । निर्वृतौ । आख्यायिकापरिच्छेदे । आश्वयप्रदाने ॥ आश्वसनम् । श्वसप्राणने । घञ् ।

आश्वासकः । त्रि । आश्वासकारिणि ।

आश्विनः । पुं । शरदःप्रथमेमासे । इषे ॥ तत्रजातस्यफलम् । राज्ञांप्रियः काव्यकलाविदग्धः स्याद्धर्मगर्भाग्रसुतीक्ष्णबुद्धिः । सुखीवदान्योबहुमानशाली भक्तो भवेदाश्विनमासजन्मेति ॥ अश्विन्यायुक्तापौर्णमासी अस्मिन्नस्ति । सास्मिन्पौर्णमासीत्यण् ॥ रवेःकन्याराशिस्थितिकाले ।

आश्विनेयौ । पुं । अश्विनीकुमारयोः । स्वर्वैद्ययोः ॥ अश्विन्याः अपत्ये । स्त्रीभ्योढक् ॥ नित्यद्विवचनान्तः ॥

आश्वीनः । त्रि । एकाह्नेनैकाश्वगम्यमार्गे ॥ अश्वेनैकाह्नेनातिक्रम्यते । अश्वस्यैकाहगम इति खञ् ।

आषाढः । पुं । ग्रीष्मद्वितीयमासे । शुचौ ॥ आषाढीपौर्णमासी अस्मिन् । सास्मिन् पौर्णमासीत्यण् ॥ तत्रजातस्यफलम् । अनल्पजल्पी प्रमदाभिलाषी प्रमादशीलो गुरुवत्सलश्च । बहुव्ययो मन्दहुताशनःस्या दाषाढमासप्रभवो मनुष्य इति ॥ व्रतिनांपालाशदण्डे ॥ आषाढीपूर्णिमाप्रयोजनमस्य । विशाखाषाढादण्मन्थदण्डयोरित्यण् ॥ मलयाचले ॥ रवेर्मिथुनराशि स्थितिकाले ।

आषाढकः । पुं । आषाढमासे ।

आषाढभवः । पुं । भौमग्रहे ॥ त्रि । आषाढजाते ।

आषाढभूः । पुं । कुजे । मङ्गलग्रहे ॥

आषाढा । स्त्री । पूर्वाषाढायाम् ॥ उत्तराषाढायाम् ॥

आषाढाभूः । पुं । मङ्गलग्रहे ।

आषाढिः । पुं । रतिदेव्याःस्थाने ॥

आषाढी । स्त्री । आषाढमासस्यपूर्णिमायाम् ॥ आषाढयायुक्ता पौर्णमासी । नक्षत्रेणयुक्तःकाल इत्यण् । ततो ङीप् ।

आषाढीयः । त्रि । आषाढायांजाते ॥ श्रविष्ठाषाढाभ्यांछण् वक्तव्यः ॥

आष्टम् । न । आकाशे । वियति ॥ अश्नुते अशूव्याप्तौ सङ्घातेच । अश्नातिवा । अशभोजने । अशिग्रसिगमिनमिमीत्यादिनाष्ट्रन्वृद्धिश्च ।

आः । अ । स्मरणे ॥ अपाकरणे ॥ को-

पे॥ आः रत्वक्तिष्ठतिष्ठ । सन्तापे । यथा । धिग्मातर मा: प्रदर्श्यम्बपभून् भिक्षामहे निस्तपारे ते । पीडायाम् । आःशीतम् । क्रोधाविष्कारे । साटोपतर्जने । आस्ते । आस उपवेशने । क्विप् । आङ्पूर्वादसतेर्वा ।

आस । । । बभूवेत्यर्थे ॥

आसः । पुं । धनुषि । अस्यन्तेशरा अनेन । असु० । अकर्त्तरिच्कारकेसंज्ञायामिति घञ् ।

आसक्तः । त्रि । आसक्तिविशिष्टे । विषयान्तरपरिहारेण सर्वदानिविष्टे । तत्परे । प्रसिते । अत्यन्तरते । न । निरन्तरे । अनवरते । आसञ्ज । षञ्ज सङ्गे । कर्मणि क्तः ॥

आसक्तिः । स्त्री । अनुरागे । प्रीतौ । आनुरक्तौ । आङ्पूर्वात्षञ्जेः क्तिन् ।

आसङ्गम् । न । अनवरते । निरन्तरे ॥ पुं । अभिनिवेशे । परिष्वङ्गे । प्रासङ्गोपस्थितेऽपि विनाशे संरक्षणाभिलाषे । कर्तृत्वाभिमाने । भोगाभिलाषे । त्रि । तद्युक्ते । स्त्री । तुवर्य्याम् । सौराष्ट्रमृदि । आसञ्जनम् । षञ्ज० घञ् ।

आसङ्गिनी । स्त्री । वातभ्रमे । वात्यायाम् ।

आसत्तिः । स्त्री । सङ्गमे । लाभे । सन्निधौ । पदसन्निधानकारणे । यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितस्तयोर् अव्यवधानेनोपस्थितिकारणमिति न्यायमुक्तावली ।

आसनः । पुं । जीवकद्रुमे । अस्यति । असुक्षेपणे । ल्युः । प्रज्ञाद्यण् । न । द्विरदस्कन्धदेशे । यत्र महामात्रो निवसति । पीढा चौकी इत्यादिभाषाप्रसिद्धे पीठे । विष्टरे । विजिगीषोर्दुर्गादीनबद्ध्यतःस्थितौ । यापानिवर्त्तने । अरिविजिगीष्वोः प्रतिबद्धशक्त्योः कालप्रतीक्षयातूष्णीमवस्थाने । यथा । परस्परस्यसैन्यानां साम्यंवा स्वाविर्भवः । आसनं स्वामिनेब्रूयात्मन्त्रीस्वामिहितेरतइति ॥ अष्टाङ्गयोगस्यतृतीययोगाङ्गे । पञ्चप्रकारकरचरणादि संस्थानविशेषे । यथा । पद्मासनंस्वस्तिकाख्यं भद्रंवज्रासनं तथा । वीरासनमितिप्रोक्तं क्रमादासनपञ्चकमिति । एषांलक्षणानि यथास्थानेद्रष्टव्यानि । अन्यच्च । आसनानिकुलेशानि यावन्तो जीवजन्तवः । चतुरशीति लक्षाणि चैकैकं समुदाहृतम् । आसनेभ्यःसमस्तेभ्यः साम्प्रतंद्वयमुच्यते । एकंसिद्धासनंनामद्वितीयंकमलासनम् ॥ इतिनिरुत्तरतन्त्रम् । स्थिरसुखमासनमिति

पतञ्जलिः ॥ सुखेनैव भवेद्यस्मिन्नज
स्रंब्रह्मचिन्तनम् । आसनंतद्विजानी
यान्न तरत्सुखनाशनमितिपूज्यपा-
दाः ॥ आस्यतेऽत्र । आसउपवेशने
। करणेतिल्युट् ॥ शृङ्गारासनानि
वन्धशब्दे द्रष्टव्यानि ॥

आसनबन्धः । पुं । उपवेशने ।

आसना । स्त्री । स्थितौ । आस्यतेऽस्या
म् । आस० । ण्यासश्रन्थोयुच् ।

आसनी । स्त्री । विपणौ ॥ स्थितौ ।

आसन्दः । पुं । वासुदेवे । श्रीकृष्णे ।

आसन्दी । स्त्री । क्षुद्रखट्वायाम् । पीठि
कायाम् । सभामध्यवेदिकायाम् ।
आस्यतेऽस्याम् । आस० । अब्दादय
श्चेतिसाधुः ॥

आसन्नः । त्रि । निकटे । उपस्थिते ॥ आ
सीदतिस्म । गत्यर्थेतिक्तः । आसा
द्यतेस्मेतिवा । क्तः ।

आसन्यः । पुं । प्राणे ॥ त्रि । आस्यभवे ॥
आस्येभवः । यत् । पद्दन्नेत्यासन्नादे
शः प्रभृतिग्रहणस्यप्रकारार्थत्वात् ॥

आसवः । पुं । मद्यमात्रे । मद्यविशेषे ।
मैरेये । शीधौ । शीधुरिक्षुरसैःप
क्वैरपक्वैरासवो भवेत् । मैरेयंधात
कीपुष्पगुडधानाम्लसंहितमितिमा
धवेनभेदःकृतः । आर्षेरामायणेतु ।
शर्करासवमाध्वीकाः पुष्पासवफला
सवाः । वासचूर्णैश्चविविधैर्दृष्टास्तैस्तैः
पृथक्पृथगित्युक्तम् । कुल्लूकभट्टस्तु ।
आसूयतेऽस्मात् आसवो मद्यानामवस्था-
विशेषः सद्यःकृतसंसाधनः सन्धानम
शभावस्त्यात् ॥ यद्पक्वौषधाम्बुभ्यां
सिद्धंमद्यंसआसवः । आसवस्यगुणा
स्तेयावीजद्रव्यगुणैः समाः । आसू
यते । षुञ् अभिषवे । ऋदोरप् ॥

आसवद्रुः । पुं । तालवृक्षे ।

आसादनम् । न । सन्निधापने । स्थापने ॥

आसादितः । त्रि । प्राप्ते । लब्धे । आक्षि
वंशीधरे कामकेलीपरे । किंमयासा
दितंमौनमारोपितम् । आयोजिते
। सन्निधापिते ॥ आसाद्यतेस्म ।
षद्लृ० । ण्यन्तः । क्तः ॥

आसारः । पुं । धारासम्पाते । वेगवृष्टौ
। सुहृद्बले । प्रसरणे । सैन्यानांसर्व
तोव्याप्तौ । अन्वागच्छद्बले । आस
रणम् । आस्रियतेनेनवा । स्तृगतौ ।
घञ् ।

आसिकः । त्रि । खड्गधारिणि ॥ असिः
प्रहरणमस्य । प्रहरणमितिठक् ॥

आसिका । स्त्री । आसने । आसउपवे
शने । धात्वर्थनिर्देशेण्वुल् ॥

आसिक्तः । त्रि । ईषत्सिक्ते ॥

आसितम् । न । स्थानविशेषे । आस्यते
ऽस्मिन् । आस० । क्तोधिकरणेचेत्य

धिकरणे क्तः ॥

आसीनः । त्रि । उपविष्टे । बैठा इतिभाषा । आसनेोपविष्टे । ऽचले ॥ वृद्धावभिव्यक्तविज्ञानप्रकाशने । आस्ते । आस० । लटःशानच् । ईदासः ।

आसीनप्रचलायितम् । न । उपविश्य निद्रावशेनदोलने । ऊंघना इति-भाषा ॥

आसुतिः । पुं । अभिषवे । मद्यसन्धाने । मद्यचुवानाइतिभाषा । षुञ० । क्तिन् ॥

आसुतीवलः । पुं । कन्यापाले । शूद्रजातिविशेषे ॥ यज्वनि । शौण्डिके । आसुतिरस्यास्ति । रजःकृष्यासुतिपरिषदोवलच् । वले इति दीर्घः ।

आसुरः । पुं । असुरे । प्रज्ञाद्यण् । ब्राह्माद्यष्टविवाहान्तर्गतविवाहविशेषे । आसुरोद्रविणादानातइतियाज्ञवल्क्यः । ज्ञातिभ्योद्रविणंदत्त्वा कन्यायैचैवशक्तितः । कन्याप्रदानंस्वाच्छन्द्यादासुरोधर्मउच्यते इतिमनुः । अस्यमानुषइत्यपिसंज्ञा । गृह्यकेमानुषइतिव्यवहारात् । असुराणामिवायम् । अण् । न । विड्लवणे । असुरस्यकर्मभावयोः । त्रि । असुरसम्बन्धिनि । अण् ।

आसुरनिश्चयः । पुं । वेदार्थविरोधिनिश्चये । आसुरोविपर्यासरूपोवेदार्थविरोधीनिश्चयोयस्य ॥

आसुरभावः । पुं । हिंसानृतादिस्वभावे । आसुराणामसुरप्रकृतीनांभावःस्वभावः ।

आसुरस्वम् । न । अयज्वनांधने । यागादिशून्यानांवित्ते । अयज्वनान्तुयद्वित्तमासुरस्वं तदुच्यतेइतिमनोः । आसुराणांस्वम् ॥

आसुरिः । पुं । कपिलमुनेःशिष्ये ब्राह्मणे ॥

आसुरी । स्त्री । राजिकायाम् । छेदभेदाद्यात्मिकायां चिकित्सायाम् । असुरस्येयम् । तस्येदमित्यण् । अस्यतिवा । असेरुरन् । प्रज्ञाद्यण् । टिड्ढेतिङीप् ॥

आसुरीप्रकृतिः । स्त्री । शास्त्रानभ्यनुज्ञातविषयभोगहेतुरागप्रधानायां राजस्यां प्रकृतौ । वैदिकनिषेधातिक्रमेण स्वभावसिद्धरागद्वेषानुसारिसर्वानर्थहेतुप्रवृत्तिहेतुभूतायां राजस्यां प्रकृतौ । विषयभोगप्राधान्येन रागप्राबल्यादासुरीत्वम् ।

आसुरीसम्पत् । स्त्री । असुरत्वमात्रहेतुभूतायां रजस्तमोमय्यां सम्पदि । अशुभवासनासन्ततौ । यथा । दम्भोदर्पोभिमानश्चक्रोधःपारुष्यमेवच । अज्ञानंचाभिजातस्य पार्थसम्पदमासुरी-मिति । शरीरारम्भकालेपापकर्मभि

रभिव्यक्ता मभिलक्ष्यजातस्यकुपुरुषस्यदम्भाद्या अस्मानान्तादोषाएवभवन्ति नत्वभयाद्यागुणाइत्यर्थः ॥

आसेकः । पुं । आसेचने ॥

आसेक्यः । पुं । नपुंसकविशेषे ॥ तल्लक्षणंयथा । पित्रोस्तुस्वल्पवीर्यत्वादासेक्यः पुरुषो भवेत् । स शुक्रंप्राश्य लभते ध्वजोन्नतिमसंशयमिति ॥

आसेचनः । त्रि । अतृप्तिकृति । असेचनके । न आसिच्यतेमनोऽत्र । षिचक्षरणे । करणेतिल्युट् ।

आसेचनकम् । त्रि । असेचनके । आसेचने ॥ संज्ञायांकन् । तदासेचनकं तृप्तेर्नास्त्यन्तोयस्यदर्शनात् ।

आसेदिवान् । त्रि । आसन्ने ॥

आसेधः । पुं । राजाज्ञया ऽवरोधे ॥

आसेवनम् । न । पौनः पुन्ये ॥

आसेवा । स्त्री । स्वारसिक्यां प्रवृत्तौ ॥

आस्कन्दनम् । न । तिरस्कारे ॥ रणे ॥ संशोषणे ॥ स्कन्दिर् गतिशोषणयोः भावे ल्युट् ॥

आस्कन्दितम् । न । अश्वगतिविशेषे । उत्तेरिताख्यवेगे ॥ स चसम्यग्गतिः ॥ आस्कन्दने ॥ स्कन्देः स्वार्थणयन्तात् भावेक्तः । आस्कन्दः सञ्जातोऽस्य । तारकादित्वादितच्वा ।

आस्कन्दितकम् । न । आस्कन्दिते । अश्वानांपञ्चमगतौ । उत्तेरिते । उपकण्ठे ।

आस्तः । त्रि । क्षिप्ते ॥

आस्तरः । पुं । करिकम्बले ॥ वस्त्राद्यास्तरणे ॥

आस्तरणम् । न । हस्तिपृष्ठस्थितचित्रकम्बले । प्रवेण्याम् । झूलइतिभाषा । आस्तीर्यते ऽनेनवा । स्तृञ् आच्छादने । कर्मणि करणेवा ल्युट् ।

आस्तारकः । पुं । माषवडीप्रभृति खाद्यद्रव्यसिद्ध्यर्थं स्थालीस्थजलोपरिदीयमाने तृणादौ । थर इतिभाषा ॥

आस्तावः । पुं । यज्ञीयदेशविशेषे । याज्ञिकानां संवाददेशे ॥ आगत्य स्तुवन्त्यस्मिन् । ष्टुञ् स्तुतौ । घञ् ॥

आस्तिकः । पुं । मुनिविशेषे । सतुजरत्कारुमुनेः पुत्रः । तत्पिता गर्भस्थं तं ज्ञात्वा अस्तीत्युक्त्वा गतइत्यस्मादास्तिकः । इतिमहाभारतम् ॥ आस्तीके ॥ त्रि । नास्तिकभिन्ने । वेदप्रमाणवादिनि । श्रद्धालौ ॥ अस्तिपरलोक इत्येवं मतिर्यस्यसः । अस्तिनास्तिदिष्टंमतिरिति अस्तीतिनिपातात् यद्वा वचनसामर्थ्या दस्तीत्याख्यातात् ठक् ॥

आस्तिकार्थदः । पुं । जनमेजयेराज्ञि ॥

आस्तिक्यम् । न । श्रद्धायाम् ॥ आस्ति कस्यकर्म भावो वा । पुरो० यक् ॥

आस्तीकः । पुं । मनसापुत्रे आस्तिक मुनौ ॥

आस्तीकजननी । स्त्री । मनसादेव्याम् ॥

आस्था । स्त्री । आलम्बनायाम् ॥ स्थाने ॥ यत्ने ॥ अपेक्षायाम् ॥ आस्थान्याम् ॥ आतिष्ठन्त्यस्याम् आस्थानंवा । ष्ठा० । आतश्चोपेत्यङ् । टाप् ॥ तात्पर्य्येणावर्त्तने ॥

आस्थानम् । न । सभायाम् ॥ निवासस्थाने ॥ आतिष्ठन्त्यस्मिन् । ष्ठा० अधिकरणे ल्युट् ॥ यत्ने ॥

आस्थाननिकेतनाजिरम् । न । सभामण्डपाङ्गने ॥

आस्थानी । स्त्री । सभायाम् ॥ आतिष्ठन्त्यस्याम् । ष्ठा० । अधिकरणे ल्युट् । ङीप् ॥

आस्थानीधूर्त्तः । त्रि । सभाधूर्त्ते ॥

आस्थितः । त्रि । आरूढे ॥ प्राप्ते ॥ आङ्पूर्वात्तिष्ठतेर्गत्यर्थे तिक्तः । यति स्यतीतीत्वम् ॥ अङ्गीकृतवति ॥

आस्थितिः । स्त्री । आस्थायाम् । तात्पर्य्येणावर्त्तने ॥

आस्पदम् । न । पदे । स्थाने । प्रतिष्ठायाम् ॥ यथा । अनुवाद्यमनुक्त्वातु न विधेयमुदीरयेत् । नह्यलब्धास्पदं किञ्चित्कुत्रचित् प्रतितिष्ठतीति ॥ कृत्ये ॥ प्रभुत्वे ॥ दृश्यमग्रहे ॥ आपद्यते ऽस्मिन् । आत्मनः पदंस्थानं वा । आस्पदं प्रतिष्ठायामितिनिपातनात् सुट् ॥

आस्पन्दनम् । न । कम्पने । स्पन्दने ॥

आस्फालः । पुं । हस्तिकर्णास्फालने । झलज्झलायाम् ॥

आस्फालनम् । न । ताडने ॥ आटोपे । प्रागल्भ्ये ॥

आस्फुजित् । पुं । शुक्राचार्य्ये ॥

आस्फोटः । पुं । अर्कद्रुमे ॥ शूरादेर्वाह्वादिशब्दे । आस्फोटयति । स्फुटिर् विकसने । अच् ॥

आस्फोटकः । पुं । खरोट इति भाषाप्रसिद्ध शैलपीलौ ॥

आस्फोटनम् । न । मुद्रणे ॥ विकाशे ॥ वाह्वादिशब्दे ॥ स्फुटने ॥ आ स्फुटे ल्युट् ॥

आस्फोटनी । स्त्री । बेधनिकायाम् । मुक्तादिवेधिन्याम् ॥ आस्फुट्यते ऽनया । स्फुटभेदनेचुरादिः । करणे ल्युट् ॥

आस्फोटा । स्त्री । नवमल्लयाम् । वनमल्लयाम् ॥ आस्फोटयति । स्फुटिर० । पचाद्यच् ॥

आस्फोटितम् । न । करास्फोटे ॥

आस्फोत: । पुं । अर्कवृक्षे ॥ कोविदारे ॥ भूपलाशवृक्षे ॥ आस्फोटयति । स्फुटिर्० । पचाद्यच् । पृषोदरादि: ॥

आस्फोतक: । पुं । अर्कपर्णे ॥

आस्फोता । स्त्री । अपराजितायाम् ॥ वनमल्लिकायाम् ॥ सारिवायाम् ॥ हापरमालीति गौडभाषाप्रसिद्धवृक्षविशेषे । कुष्ठविषरोगनाशित्वं अस्या गुणा: ॥ टाप् ॥

आस्माक: । त्रि । अस्मत्सम्बन्धिनि ॥ युष्मदस्मदोरितिपक्षेऽण् । तस्मिन्नणि चयुष्माकास्माकौ ॥

आस्यम् । न । मुखे ॥ मुखमध्ये ॥ त्रि । मुखमध्यभवे ॥ आस्यन्दते अन्नादिना प्रस्रवति । आस्यन्द्यतेवा अन्नादिना द्रवीक्रियते । स्यन्दूप्रस्रवणे । अन्येभ्योपीतिड: ॥ यद्वा । अस्यतेवर्णायेन अस्यन्तेग्रासोऽस्मिन्वा । असु क्षेपणे । कृत्यल्युट इति ण्यत् ॥

आस्यपत्रम् । न । पद्मे ॥ आस्यमिवपत्रमस्य ॥

आस्यलाङ्गल: । पुं । शूकरे ॥

आस्यलोम । न । श्मश्रुणि ॥

आस्यशुद्धि: । स्त्री । मुखस्यप्रकृतरसत्वे ॥

आस्या । स्त्री । स्थितौ ॥ आसनम् । आसउपवेशने । ऋहलोर्ण्यत् । वाहुलकात् यद्वा ॥

आस्यासव: । पुं । लालायाम् ॥

आस्रप: । पुं । मूलनक्षत्रे ॥

आस्रव: । पुं । क्लेशे ॥ अनेकान्तवादिनां पदार्थान्तरे । चक्षुरादीन्द्रियपथकस्य यथास्वं प्रवृत्तौ ॥ वृत्ति: पञ्चविकल्पा ध्रुवाध्रुवा चक्षुरादिवर्गस्य । येषामास्रवणयजस्रंयतस्ततो सावित्यास्रव:प्रोक्त इत्याहु: ॥

आस्वाद: । पुं । रसे ॥ रसानुभवे ॥

आस्वादवान् । त्रि । रसवति । स्वादुयुक्ते ॥

आस्वादित: । त्रि । भुक्ते । लीढे ॥

आह । अ । क्षेपे ॥ नियोगे ॥ दृढसम्भावने ॥ उवाचेत्यर्थे ॥ कालमात्रेनिपातोयम् ॥

आहकज्वर: । पुं । नासाज्वरइतिप्रसिद्ध नासारोगविशेषे ॥ तल्लक्षणं यथा । तनुनारक्तशोथेन युक्तोनासापुटान्तरे । गात्रशूलज्वरकर: श्लेष्मणाह्याहकज्वरइति ॥

आहत: । त्रि । गुणिते ॥ ताडिते ॥ मिथ्योक्ते । मृषार्थके । वन्ध्यासुतोसीत्यादिवचने ॥ ज्ञाते ॥ पुं । आनके । ढक्कायाम् ॥ न । पुरातनेवस्त्रे ॥ नूतनेवस्त्रे ॥ मृषार्थकवाक्ये ॥ आघू

षिते । आहन्यतेस्म । हन० क्तः ॥

आहतलक्षणः । त्रि । कृतलक्षणे । गुणैः प्रसिद्धे । आहतमभ्यस्तं लक्षणं यस्य ।

आहरः । पुं । उच्छ्वासे । अन्तर्मुखश्वासे ॥

आहरणम् । न । द्रव्याद्यानयने । अमानीते ।

आहवः । पुं । युद्धे । यज्ञे ॥ आह्वानम् आहूयते ऽस्मिन्निति वा । ह्वेञ् स्पर्द्धायां शब्दे च । आङि युद्धे इत्यप् सम्प्रसारणञ्च ।

आहवनम् । न । यागे । आसमन्तात् जुहोत्यस्मिन् । ल्युट् ।

आहवनीयः । पुं । यज्ञाग्निविशेषे । होमार्थे । आहुत्यधिकरणे । गार्हपत्याग्नेरुद्धृत्य होमार्थं यो ऽग्निः संस्क्रियते तस्मिन् । आहूयते प्रणीयते प्रक्षिप्यते वा हविरत्र । कृत्यल्युट इत्यधिकरणे अनीयर् । यद्वा । आहवनमर्हति । तदर्हतीति छः ॥

आहाः । पुं । अभियोक्तरि । आजिहीते । ओहाङ्गतौ । क्विप् । विश्वपावत् प्रक्रिया ।

आहारः । पुं । द्रव्यगलाधःकरणे । जेमने । भोजने । चर्व्यचोष्यलेह्यपेयात्मके दृष्टफले । सात्त्विकराजसतामसभेदात्त्रिविधे । आहरणम् हृञ० । घञ् । यद्वा । आहरन्ति रसमस्मात् । अकर्त्तरि चेति घञ् । आह्रियते हृ० ण्यु० अन्ने । हारे । आहरणे ।

आहारसम्भवः । पुं । शरीरस्थरसधातौ ।

आहार्य्यम् । त्रि । आगन्तुके । आहरणीये । आरोप्यमाणे । आहर्त्तुं योग्यः । हृञ्० । ऋहलोर्ण्यत् । पुं । नाट्योक्तौ भूषादिना रचिते व्यञ्जकविशेषे ।

आहार्य्यशोभा । स्त्री । कृत्रिमशोभायाम् । चित्रभूषादिना कृतद्युतौ ।

आहावः । पुं । निपाने । कूपसमीपे पश्वादीनां जलपानाय प्रस्तरादिनिर्मिते जलाशये । खेल इति भाषा । आह्वाने ॥ युद्धे । विग्रहे । आहूयन्ते ऽत्र । ह्वेञ् स्पर्द्धायां शब्दे च । निपानमाहाव इति ह्वेञः । सम्प्रसारणमप्प्रत्ययश्च निपाने निपात्यते ।

आहिकः । पुं । पाणिनिमुनौ ॥ केतुग्रहे ।

आहिण्डिकः । पुं । निषादेन वैदेह्यां जनिते अन्त्यजविशेषे । अस्य च बन्धनस्थानेषु० बाह्यसंरक्षणाद् आहिण्डिकानामित्यौशनसे उक्तिरुक्ता । कारावराहिण्डिकयोः समान मातापितृकत्वेपि वृत्तिभेदात् संज्ञाभेदः ।

आहितः । त्रि । अर्पिते । निहिते । न्यस्ते । स्थापिते । संपादिते । कृते ।

यथा। आहितोऽजयविपर्ययेऽपि मे श्लाघ्य एव परमेष्ठिनात्वयेति रघुवंशे रामं प्रतिभार्गववाक्यम्। आधीयते स्म। डुधाञ्० क्तः। दधातेर्हिः॥

आहितलक्षणः। त्रि। सौन्दर्यादिगुणविशिष्टे। गुणैःप्रतीते। प्रख्यातगुणे॥ आहितानिलक्षणानि यस्मिन्॥

आहिताग्निः। पुं। अग्निहोत्रिणि। साग्निके॥ आहितः अग्निर्येन। वाहिताग्न्यादिः॥

आहितुण्डिकः। त्रि। व्यालग्राहिणि॥ अहेस्तुण्डं मुखं तेन दीव्यति। तेन दीव्यतीति ठक्॥

आहुकः। पुं। उग्रसेने।

आहुतम्। न। भूतयज्ञे॥ पञ्चमहायज्ञान्तर्गतन्नयज्ञे॥ त्रि। हुतवस्तुनि। समिधादिद्रव्यैर्विभिराभिमुख्येन हुते।

आहुतिः। स्त्री। देवयज्ञे। होमे। देवमुद्दिश्य मन्त्रोच्चारणपूर्वकाग्नौ हविर्निक्षेपे॥ तद्विशेषो यथा। अल्पकूत्रसस्फुलिङ्गवामावर्त्ते भयानके। आर्द्रकाष्ठैः समुत्पन्ने फुत्कारवति पावके॥ कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम्। आहुतिं जुहुयाद्यस्तु तस्य नाशो भवेद्ध्रुवमिति॥

आहुल्यम्। न। तरवट इ० काश्मीरादिषु प्रसिद्धेक्षुपविशेषे। काञ्चनपुष्पे। बिम्बीफले॥

आहूतः। त्रि। कृताह्वाने॥ ह्वयतेः कर्मणि क्ते सम्प्रसारणाद्दीर्घे॥

आहूतसम्प्लवः। त्रि। प्रलयकालपर्यन्ते॥ आहूतस्य विश्वस्य सम्प्लवःसलिले सम्यक् प्लवनं यत्र।

आहूतिः। स्त्री। आह्वाने॥ आङ्पूर्वात् ह्वेञः स्त्रियांक्तिन्निति भावेक्तिन्। सम्प्रसारणम्॥

आहृतः। त्रि। आनीते।

आहेयम्। त्रि। अहिसम्बन्धिविषास्थ्यादौ॥ अहेर्भवम्। दृतिकुक्ष्यादिना ढञ्। स्त्री। आहेयी॥

आहो। अ। प्रश्ने॥ विकल्पे॥ विचारे॥ आहन्ति। हन्तेर्डो प्रत्ययः॥

आहोपुरुषिका। स्त्री। दर्पोत्थात्मसम्भावनायाम्। आत्मनि श्लाघ्याविष्करणे॥ अहो अहम्पुरुषः। शुशुमेतिसमासः अहोइति अहमित्यर्थे। मयूरव्यंसकादित्वात्समासः। अहोपुरुषस्यभावःमनो० वुञ्। आहोपुरुषिकादर्पाद्यास्यात सम्भावनात्मनीत्यमरः॥

आहोस्वित्। अ। विकल्पे। आहो॥ आहो चस्वित्च।

आह्नः। पुं। अह्नां समूहे॥ खण्डिका

इ

त्विषा इञ्। अकृष्टखोरेवेति नियमा द्विलोपेन॥

आह्निकः। दिननिर्वर्त्ये। दिनसाध्ये। दिनसम्बन्धिनि। न। प्रकरणसमूहे। ग्रन्थभागे। भोजने। नित्यक्रियायाम्। अह्ना निर्वृत्तम्। तेन निर्वृत्तमिति ठञ्। आह्निकश्चिसन्ध्यान्तंभवति।

आह्रादः। पुं। मेघशब्दे। स्तनने।

आह्लादः। पुं। आनन्दे। हर्षे।

आह्लादितः। त्रि। आनन्दिते। हृष्टे।

आह्वयः। पुं। नामनि। आह्वयति- ह्वयत्याह्वः। आतोनुपसर्ग इति के प्राप्ते कविधौ सर्वत्र प्रसारणिभ्योड इति डः। तैर्यायते माप्यते। या०। घञर्थेकः॥

आह्वा। स्त्री। नाम्नि। संज्ञायाम्। आह्वानमाह्वा। आतश्चोपसर्ग इत्यङ्॥

आह्वानम्। न। आवाहने। आकारणे। हूतौ॥ नामनि। आङ्पूर्वात् ह्वेञो ल्युट्।

इः

—►►|◄◄—

इ। अ। भेदे। क्रोधोक्तौ। अपाकरणे॥

इक्षुः

अनुकम्पायाम्। खेदे॥ सम्बोधने। जुगुप्सायाम्॥ विस्मये। प्रत्ययस्य सन्निधावितिकश्चित्।

इः। पुं। कामदेवे। मदने। इकारे।

इक्कटः। पुं। वंशाङ्कुरे।

इक्कटः। पुं। तृणविशेषे। बहुमूले।

इक्षवः। पुं। इक्षुमात्रे। इतिशब्दरत्नावली॥

इक्षाणिका। स्त्री। शनिक्षौ।

इक्षुः। पुं। ईख इतिस्वनामप्रसिद्धे रसाले। मधुतृणे। गुडतृणे। असिपत्रे। मृत्युपुष्पे। अस्यगुणाः। इक्षवो रक्तपित्तप्रशमा बल्या वृष्याः कफप्रदाः। स्वादुपाकरसाः स्निग्धा गुरवो मूत्रला हिमाः॥ अस्यभेदाः। पौण्ड्रको भीरुकश्चापि वंशकः शतपोरकः। कान्तारस्तापसेक्षुश्च काण्डेक्षुः सूचिपत्रकः॥ नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत्। इत्येता जातयस्तेषां गुणा वोध्या यथाक्रमम्॥ बालइक्षुः कफं कुर्यान्मेदो मेहकरश्च सः। युवा तु वातहृत् स्वादुरीषत्तीक्ष्णश्च पित्तनुत्॥ रक्तपित्तहरो वृद्धः क्षतहृद्बलवीर्यकृत्। मूले तु मधुरोऽत्यर्थं मध्ये पि- मधुरः स्मृतः॥ अग्रे ग्रन्थिषु विज्ञेय इक्षुः पटुरसो जनैः॥ * ॥ दन्तनिष्पीडितस्येक्षोरसः पित्तास्रनाशनः।

शर्करासमवीर्य्यः स्यादविदाही कफ-
प्रदः । मूलाग्रजन्तुजग्ध्यादिपीडन-
नमलसङ्करात् । किञ्चित्कालं विधृ
त्याच विकृतिं याति यान्त्रिकः । त-
स्माद्विदाही विष्टम्भी गुरुः स्याद्यान्त्रि
कोरसः । रसः पर्य्युषितोनेष्टोऽम्
लोवातापहोगुरुः । कफपित्तकरः
शोषी भेदनश्चातिमूत्रलः । * । प
क्वोरसोगुरुः स्निग्धः सुतीक्ष्णः कफवा
तनुत् । गुल्मानाहप्रशमनः किञ्चित्
पित्तहरः स्मृतः । * । इक्षोर्विकारा
स्तृड्दाहमूर्च्छापित्तास्रनाशनाः ।
गुरवोमधुराबल्याः स्निग्धावातहराः
सराः । वृष्यामोहहराः शीतावृंह
णाविषहारिणश्चेति ॥ इष्यते । इषइ
च्छायाम् । इषेःक्सुः । षढोःकःसि
। आदेशप्रत्यययोः । कषयोगेक्षः
। अस्य विकाराः । रसोकाफाणित
गुडखण्डमत्स्यण्डिकासिताः । निर्म्म
लाखवोत्तराः शीतवीर्य्याश्चोत्तर
मिति ॥ कोकिलाक्षवृक्षे ।

इक्षुकाण्डः । पुं । मुञ्जे । काशतृणे ॥

इक्षुकुट्टकः । पुं । गौडिके । इक्षून्कुट्ट
यति । कुट्टच्छेदने । क्वुन् शिल्पिसं
ज्ञयोरपूर्व्वस्यापि ॥

इक्षुगन्धः । पुं । काशतृणे । क्षुद्रगो
क्षुरे ।

इक्षुगन्धा । स्त्री । कोकिलाक्षे । क्रोष्ट्रा
म् । शुक्लविदार्य्याम् । कृष्णभूमिकू
ष्माण्डे । काशे । गोक्षुरे । इक्षुग
न्धइवगन्धोऽस्याः । वा इक्षुः गन्धो
ऽस्याः । इक्षुशब्दस्तद्गन्धसदृशे गौणः ।

इक्षुगन्धिका । स्त्री । भूमिकूष्माण्डे । इ
क्षुगन्धैव ।

इक्षुजः । पुं । फाणितादिषु । फाणित
ञ्चैवमत्स्यण्डीगुडः खण्डकमेवच ।
सितासितोपलाचैतेषड्भेदाइक्षुजा
मताः ।

इक्षुतुल्या । स्त्री । आमाखुइतिगौड-
भाषाप्रसिद्धे तृणविशेषे । इक्षुवालि
कायाम् ।

इक्षुदर्भा । स्त्री । तृणविशेषे । तृणप
त्रिकायाम् । सुदर्भायाम् ।

इक्षुनेत्रम् । न । इक्षुमूले ।

इक्षुपत्रः । पुं । जुन्हरीजुवार इति च
प्रसिद्धधान्ये । यावनाले ।

इक्षुमः । पुं । शरतृणे ॥

इक्षुवालिका । स्त्री । ताखमखानाइ-
तिप्रसिद्धे क्षुरके । इक्षुवालिकायाम् ।
काशे ॥

इक्षुमती । स्त्री । सरिद्विशेषे ।

इक्षुमूलम् । न । मोरटवे । वंशनेत्रवृक्षे ।

इक्षुयन्त्रम् । न । कोल्हू बेलना इति-
चप्रसिद्धे इक्षुनिष्पीडनयन्त्रे ॥

इक्षुयोनिः । पुं । पुण्ड्रकेक्षौ ॥

इक्षुरः । पुं । गोक्षुरे ॥ तालमखाना इतिभाषाप्रसिद्धे कोकिलाक्षे । काशे ॥ इक्षुम् इक्षुगन्धं राति । रादाने । आतोनुपेतिकः ॥

इक्षुरकः । पुं । कोकिलाक्षवृक्षे ॥ स्थूलशरे ॥ काशतृणे ॥

इक्षुरसः । पुं । काशतृणे ॥

इक्षुरसक्वाथः । पुं । गुडे ॥

इक्षुरसोदः । पुं । इक्षुसमुद्रे ॥

इक्षुवल्लरी । स्त्री । } क्षीरकन्दे । क्षीरविदार्याम् । सिराले इतिहिमगिरिभाषा ॥
इक्षुवल्ली । स्त्री । }

इक्षुवाटिका । स्त्री । } पुण्ड्रके ॥
इक्षुवाटी । स्त्री । }

इक्षुवेष्टनः । पुं । भद्रमुञ्जे ।

इक्षुशरः । पुं । काशे ॥

इक्षुशाकटम् । न । इक्षुक्षेत्रे ॥ इक्षूणां भवनं क्षेत्रम् । भवने क्षेत्रेशाकटशाकिनौ ॥

इक्षुशाकिनम् । न । इक्षुशाकटे ॥ शाकिनः ॥

इक्षुसारः । पुं । गुडे ॥

इक्ष्वाकुः । पुं । वैवस्वतमनुपुत्रे ॥ सतु सत्ययुगे अयोध्यायांसूर्यवंशीयआदिराजः ॥ स्त्री । कटुतुम्ब्याम् ॥ इक्षुमाकरोति । मितद्र्वादित्वात् डुः ॥ इक्षु इतिशब्दमकति । अकगतौ । वाहुलकादुणवा ॥

इक्ष्वारिः । पुं । } काशतृणे ॥
इक्ष्वालिकः । पुं । }

इक्ष्वालिका । स्त्री । इक्षुतुल्यायाम् ॥

इङ्गः । पुं । अद्भुते ॥ ज्ञाने ॥ जङ्गमे ॥ इङ्गिते ॥ इङ्गनम् । इगिगतौ । घञ् । इङ्गतिवा । पचाद्यच् ॥

इङ्गना । स्त्री । संज्ञायाम् ॥

इङ्गितम् । न । इङ्गतेभावे ॥ चेष्टायाम् ॥ अभिप्रायसूचकेवचनस्वरादौ शरीरव्यापारे । आकारे । अभिप्रायानुरूपचेष्टाविष्करणे ॥ इङ्गनम् । इगि० क्तः । इङ्गिताकाराभ्याञ्च भावज्ञानमिच्याद्यौतु गोवलीवर्द्दन्यायेन इङ्गितंचेष्टितम् आकारोमुखरागादिरित्यभियुक्ताः ॥ गमने ॥

इङ्गितज्ञः । त्रि । भावज्ञे ॥ इङ्गितंजानाति । ज्ञा० । आतइति कः ॥ नहीङ्गितज्ञोऽवसरेऽवसीदति ॥

इङ्गुदः । पुं । इङ्गुदीवृक्षे । इंगुआ हिंगोटा इतिच०प्रसिद्धे तापसतरौ ॥ इङ्गुंद्यति । दोअवखण्डने । आतोनुपेतिकः । पृ० । इङ्गुदःकुष्ठभूतादिग्रहव्रणविषकृमीन् । हन्त्युष्णःश्वित्रशूलघ्नस्तिक्तकः कटुपाकवान् ॥

इङ्गुदी । स्त्री । तापसतरौ । तनुपत्रे
। विषकण्टे । तैलफले । हिंगोटा
इतिभाषा ॥ इङ्गुदाज्जातेरिति-
ङीष् ॥

इङ्गुलः । पुं ।
इङ्गुली । स्त्री । } इङ्गुदस्यार्थे ॥

इङ्ग्रेजः । पुं । लण्डजजने । लेण्डजे ॥
यथा । पूर्वाम्नाये नवशतंषडशीतिः
प्रकीर्त्तिताः । फिरङ्गभाषयामन्त्रा
स्तेषांसंसाधनात् कलौ ॥ अधिपाम
ण्डलानाञ्च सङ्ग्रामे ष्वपराजिताः ।
इङ्ग्रेजा नवषट्पञ्चलेण्ड्जाश्चापिभा
विन इतिमेरुतन्त्रे २३ प्रकाशः ॥

इच्छकः । पुं । रुचके । टावानेवु इति
गौडभाषाप्रसिद्धे ॥ त्रि । इच्छायुक्ते ॥

इच्छा । स्त्री । मनोधर्मविशेषे । वाञ्छा
याम् । लिप्सायाम् ॥ सुखे तत्साधने
चेदंमे भूयादिति स्पृहात्माचित्तवृ-
त्तिःकामइति रागइतिचोच्यते ॥ न्या
यमते अस्याः कारणम् । निर्दुःख
त्वे सुखे चेच्छातज्ज्ञानादेवजायते
। इच्छातुतदुपायेस्यादिष्टोपायत्त्व
धीर्यदि ॥ चिकीर्षाकृतिसाध्यत्त्वप्रका
रेच्छातुयाभवेत् । तद्धेतुः कृतिसा-
ध्येष्टसाधनत्त्वमतिर्भवेत ॥ अस्याः-
प्रतिवन्धः । वलवद्विष्टहेतुत्त्वमतिः
स्यात प्रतिवन्धिकेति भाषापरिच्छे-
दः ॥ एषणमिच्छा । इच्छेतिसूत्रेण
इषेः शप्रत्त्ययेनिपातितः ॥

इच्छावती । स्त्री । धनादीच्छायुक्तायां
स्त्रियाम् । कामुकायाम् ॥ इच्छास्त्य
स्याः । मतुप् ॥

इच्छावसुः । पुं । कुवेरे ॥

इच्छितः । त्रि । वाञ्छिते ॥ इच्छासं
जाताऽस्य । ता॰ इतच् ॥

इच्छुः । त्रि । इच्छाविशिष्टे । आकाङ्क्षा
युक्ते ॥ इच्छाशीले ॥ इच्छतितच्छी
लः । इषइच्छायाम् । विन्दुरिच्छु-
रितिसाधुः ॥

इज्जलः । पुं । हिज्जलवृक्षे । निचुले ॥
एति । इण॰ । क्विप् तुक् । इत् जल
मस्य ॥

इज्यः । पुं । सुरगुरौ । वृहस्पतौ ॥ पु
ष्यनक्षत्रे ॥ श्रीहरौ ॥ येयजन्तिमखैः
पुण्यैर्देवतादीन् वहूनपि । आत्मान
मात्मनानित्यं विष्णुमेवयजन्तिते ॥
इतिहरिवंशः ॥ त्रि । पूज्ये ॥ श्रीगु
रौ ॥ इज्याऽस्यास्ति । अर्शआद्यच् ॥

इज्या । स्त्री । दाने ॥ अध्वरे ॥ अर्चाया
म् ॥ सङ्गमे ॥ गवि ॥ कुट्टन्याम् ॥
यजनम् । यजदेवपूजासङ्गतिकरण
दानेषु । व्रजयज्योर्भावेक्यप् । वचि
स्वपीत्यादिनासम्प्रसारणम् । टाप् ॥

इज्याशीलः । पुं । यायजूके । पुनः पुन

यंत्रकर्त्तरि॥ इज्याशीलमस्य। इज्यां शीलति शीलयति वा। शीलसमाधौ। शीलिकामिभक्ष्याचाभ्यो ण इति णः॥

इञ्चाकः। पुं। इँचला मोचा चिङ्डी इति गौडभाषा प्रसिद्धे मत्स्यविशेषे॥

इट्चरः। पुं। षण्डे। गोपतौ॥ एषणम्। इट्। इष० क्विप्। इषा चरति। पचाद्यच्॥

इडविडा। स्त्री। पुलस्त्यभार्यायाम्॥

इडा। स्त्री। इक्ष्वाकोस्तनयायाम्। बुधग्रहस्य भार्यायाम्॥ गवि। सौरभेय्याम्॥ वचने॥ भूमौ। वसुमत्याम्॥ स्वर्गे॥ नाडीविशेषे। 'वाममुष्काधःस्याधनुर्वक्राधामनासापर्यन्त-गताया नाडीसेडेत्युच्यते॥

इडाचिका। स्त्री। गन्धोल्याम्। वरव्याम्। ततैया बरडै भिरड चिमडी इत्यादिभाषाप्रसिद्धायाम्॥

इडावत्सरः। पुं। संवत्सरे॥

इडिका। स्त्री। भूमौ॥ इडैव। स्वार्थे कः। इत्वम्॥

इडिक्कः। पुं। बनच्छगले॥ इति हेमचन्द्रः॥

इडुवत्सरः। पुं। संवत्सरे॥

इत्। अ। इत्थमेव॥

इतः। त्रि। गते॥ स्मृते॥ इण०। गत्यर्थे तिक्तः॥ प्राप्ते॥ ज्ञाते॥ एतेःकर्त्तरि क्तः॥

इतरः। त्रि। अन्यस्मिन्॥ पामरे। नीचे॥ तरणांतरः। तृ०। ऋदोरप्। एः कामस्य तरः। इना कामेन तीर्यते वा तरति वा। पचाद्यच्। यद्वा। इतं गमनं करोति। तत्करोतीति णिच्॥ यद्वा। इतेन ज्ञानेन चीयते। प्रातिपदिकाद्धात्वर्थ इति णिच्। बाहुलकाद्रः॥ यद्वा। इ इत्यव्ययमपकर्षे। द्विवचनेति तरप् द्रव्यप्रकर्षत्वान्नाम्॥

इतरविशेषः। पुं। अन्यप्रभेदे॥

इतरेतरम्। त्रि। अन्योन्यस्मिन्। परस्परे॥

इतरेतरयोगः। पुं। संहत्यप्राधान्ये चार्थविशेषे॥ यथा। प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ। धवश्च खदिरश्च पलाशश्च धवखदिरपलाशाः॥

इतरेतराश्रयः। पुं। इतरेतरयोराश्रये॥

इतरेद्युस्। अ। अन्यदिने। इतरस्मिन्नहनि॥ सद्यःपरुत्परार्य्यैषमः इत्यादिना इतरशब्दादेद्युस् प्रत्ययः॥

इतश्चेतश्च। अ। अनियतदिग्देशे॥

इतस्ततः। अ। अत्र तत्र॥

इतस्। अ। अपादानार्थे। पञ्चम्यर्थे॥ अस्मात्। पञ्चम्यास्तसिल् इदम इश्॥

इति । अ । हेतौ । प्रकाशने । निदर्श
ने । प्रकारे । परकृतौ ॥ अनुकर्षे ।
समाप्तौ । प्रकरणे । स्वरूपे । सा
न्निध्ये । विवक्षानियमे । मते ॥
प्रत्यक्षे ॥ अवधारणे । व्यवस्थायाम् ।
विवक्ष्यमाणे ॥ परामर्शे । माने ।
इत्थमर्थे । एवमर्थे । प्रकर्षे । उप
क्रमे । एति अयतिवा । इण्ः । क्ति
च् ।

इतिकथ: । त्रि । अपार्थवाचि । अश्रद्धेये ॥
नष्टे । इतिइत्थम्प्रकारेण कथायस्य ।

इतिकर्त्तव्यता । स्त्री । कल्पे । पद्धतौ ॥

इतिह । अ । उपदेशपारम्पर्य्ये । ऐतिह्ये॥
इति एवम् ह किल ।

इतिहा । अ । पारम्पर्य्यप्राप्तोपदेशे ॥

इतिहास: । पुं । पूर्वेषांकथायाम् ॥ पुरा
वृत्ते । व्यासादिप्रणीते पुरावृत्तप्र-
काशिनि भारतादिग्रन्थे । धर्मार्थका
ममोक्षाणा मुपदेशसमन्वितम् ।
पूर्ववृत्तकथायुक्त मितिहासंप्रचक्ष-
ते । इतिस्मृति: । इतिहइतिपारम्प
र्य्योपदेशोऽव्ययम् । सआस्तेऽस्मिन्स: ।
आस॰ । हलश्चेति घञ् ।

इतिहासपुराणम् । न । आथर्वणब्राह्म
णभागे ॥ प्रसिद्धयोरितिहासपुराण
यो: ।

इत्कट: । पुं । ओकडा इति गौडभाषा
प्रसिद्धे वृक्षविशेषे । बहुमूले । खर
च्छदे ।

इत्किला । स्त्री । रोचमायाम् । गन्धद्र
व्यविशेषे ।

इत्थम् । अ । एवम्प्रकारे । अनेन एतेन
वा प्रकारेणेत्यर्थे इदमस्थमु प्रत्यय:
। एतेतौरथोरितिइदादेश: ॥

इत्थम्भूत: । त्रि । एवम्प्रकारसमे । क
ञ्चित् प्रकारंप्राप्ते । इममेतंवा प्रका
रमापन्न: । द्वितीयान्तादपिथमु: ।
तथाच सौत्रोव्यवहार: । लक्षणेत्थम्भू
ताख्यानेत्यादि: । एतेन कथम्भूतो
व्याख्यात: ।

इत्था । अ । इत्थमर्थे । अनेन एतेनवा
प्रकारेणेत्यर्थे प्रकारवचने थाल् ।

इत्य: । त्रि । गम्ये ॥

इत्या । स्त्री । शिविकायाम् । ईयते ऽ
नया । इण्॰ । संज्ञायांसमजेतिक्यप् ।

इत्वर: । त्रि । क्रूरकर्मणि । पथिके ।
दुर्विधे । नीचे । पुं । षण्डे । एति
तच्छील: । इण्' । इण्नशजिसर्त्ति
भ्य:क्करप् ।

इत्वरी । स्त्री । अभिसारिकायाम् । अ
सत्याम् । एतितच्छीला । इण् । क्क
रप् । टिड्ढेतिङीप् ।

इत्वा । स्त्री । गन्त्र्याम् ।

इदम् । त्रि । पुरोवर्त्तिनि । दृश्येचराच

रात्मके जगति ॥ सन्निकर्षे ॥ सन्निधानादनन्तरोक्तमिदमोविषयः ॥ एति । इणगतै । इणो:इमुगितिदयपादोद्दत्तिः ॥ इन्दति । इदिपरमैश्वर्ये । इन्देःकमिर्नलोपश्चेतिदीक्षितः ॥ पुं । प्रथमैकवचने । अयम् । तथैतद्देशकालादै दृष्टोयमितिकीर्त्यते ॥ स्त्री । प्रथमैकवचने । इयम् ॥

इदङ्कार्य्या । स्त्री । दुरालभायाम् ॥

इदानीम् । अ । सम्प्रत्यर्थे ॥ वाक्यालङ्कारे ॥ अस्मिन्काले । दानीञ्च । इदमइश् ॥

इदानीन्तनः । त्रि । आधुनिके । सम्प्रतिजाते ॥ इदानीमपः । सायश्चिरमित्यादिनाट्युः ॥

इदावत्सरः । पुं । संवत्सरादिपञ्चान्तर्गतवत्सरविशेषे ॥

इद्धम् । न । आतपे ॥ दीप्ते ॥ आश्चर्ये ॥ त्रि । निर्मले ॥ वर्द्धिते ॥ ञिइन्धी दीप्तौ । ञीतःक्तइतिवर्त्तमानेक्तः ॥

इद्धशासनः । त्रि । अप्रतिहताज्ञे ॥

इद्धा । अ । प्राकाश्ये ॥ समिद्धमिद्धेशमद्धोददासि ॥

इध्मम् । न । समिधि । अग्निसन्दीपनकाष्ठे ॥ इध्यते अग्निरनेन । ञिइन्धी० । इषियुधीतिमक् । अनिदितामितिनलोपः ॥

इनः । पुं । अर्के । सूर्य्ये ॥ पत्यौ । प्रभौ ॥ नृपभेदे ॥ एति ईयतेवा । इण० । इणषिञिति नक् ॥

इनानी । स्त्री । वटपत्रीवृक्षे ॥

इन्दम्वरम् । न । इन्दीवरे । नीलोत्पले ॥

इन्दिन्दिरः । पुं । भ्रमरे । षट्पदे ॥

इन्दिरा । स्त्री । श्रियाम् । लक्ष्म्याम् ॥

इन्दिरामन्दिरम् । न । विष्णौ ॥ इति राजवल्लभः ॥

इन्दिरालयम् । न । पद्मे ॥ इन्दिरायाआलयः । क्लीबत्वमभिधानात् ॥

इन्दिरावरम् । न । नीलोत्पले ॥ इन्दिरायावरम् प्रियमिष्टमितियावत् ॥

इन्दिवरम् । न । नीलोत्पले ॥ इन्दति । इदिपरमैश्वर्ये । इगुपधात् किदिति इन् । इन्दिः लक्ष्मीः तस्याः वरमिष्टम् ॥

इन्दीवरम् । न । कुवलये । नीलाम्भोजे ॥ इन्देरिन्नन्तात् कृदिकारादिति ङीष् । इन्दी लक्ष्मीस्तस्याः वरमिष्टम् ॥

इन्दीवरिणी । स्त्री । उत्पलिन्याम् ॥

इन्दीवरी । स्त्री । शतमूल्याम् । शतावर्य्याम् ॥ इन्दीवरमस्त्यस्याः । अर्शआद्यच् । गौ० । ङीष् ॥

इन्दुः । पुं । चन्द्रमसि ॥ कर्पूरे ॥ मृगशिरोनक्षत्रे ॥ एकाङ्के ॥ उनत्ति अ-

मृतरसेन सर्वामपिभुवंक्लिन्नां करोति । उन्दीक्लेदने । उन्देरिच्चादेशइत्युः ॥

इन्दुकः । पुं । अश्मन्तकवृक्षे ॥

इन्दुकमलम् । न । सितोत्पले ॥

इन्दुकलिका । स्त्री । केतक्याम् ॥

इन्दुकान्तः । पुं । चन्द्रकान्तमणौ । इन्दुःकान्तोऽस्य ॥

इन्दुकान्ता । स्त्री । रजन्याम् । इन्दुःकान्तोयस्याः ॥

इन्दुक्षयः । पुं । अमावास्यायाम् ॥

इन्दुजनकः । पुं । समुद्रे । इन्दोः जनकः ॥

इन्दुजा । स्त्री । नर्मदायाम् । सोमोद्भवायाम् ॥

इन्दुपुत्रः । पुं । बुधग्रहे । इन्दोःपुत्रः ॥

इन्दुपुष्पिका । स्त्री । विषलाङ्गला इति विषलाङ्गलिया इतिच गौडभाषाप्रसिद्धे कलिकारीवृक्षे । स्वर्णपुष्पायाम् ॥

इन्दुभम् । न । मृगशिरोनक्षत्रे ॥

इन्दुभा । स्त्री । कौमुद्याम् । ज्योत्स्नायाम् ॥

इन्दुभृत् । पुं । शिवे । इन्दुंबिभर्त्ति । डुभृञ्० । क्विप् ॥

इन्दुमती । स्त्री । पूर्णिमायाम् ॥

इन्दुरत्नम् । न । मुक्तायाम् ॥

इन्दुलेखा । स्त्री । अमृतायाम् । गुडूच्याम् । सोमलतायाम् ॥ शशिनः कलायाम् ॥ यमानिकायाम् । इन्दोर्लेखेव ॥

इन्दुलोहकम् । न । रौप्ये ॥

इन्दुवल्ली । स्त्री । सोमलतायाम् । गुडूच्याम् ॥

इन्दुव्रतम् । न । चान्द्रायणे ॥

इन्दूरः । पुं । मूषिके ॥

इन्द्रः । पुं । देवराजे । पुरन्दरे । शक्रे । अन्तरात्मनि । परमेश्वरे । इन्द्रोमायाभिःपुरुहूपईयते इतिश्रुतौपरमेश्वरस्य प्रकरणात् ॥ आदित्यविशेषे । कुटजवृक्षे । राचौ । भारतवर्षोपद्वीप विशेषे । षण्मात्रस्यचतुर्थेऽऽऽ प्रभेदे । ज्येष्ठानक्षत्रे । विष्कम्भादिषु षड्विंशयोगे । तत्रजातस्यफलम् । प्रतापशीलोबलवान्गुणज्ञः श्लेष्माधिकःश्रीकमलाभ्युपेतः । किलेन्द्रयोगे यदिजन्मकालेमहेन्द्रतुल्यःपुरुषः प्रसन्न इति । इन्दति । इदि० । ऋग्विन्द्रेत्यादिनारन् ॥

इद्रकम् । न । सभागृहे । इतिहेमचन्द्रः ॥

इन्द्रकीलः । पुं । हिमवतोदक्षिणकुलान्तपीठसन्निहितेद्रिविशेषे । मन्दरपर्वते ॥

इन्द्रकुञ्जरः । पुं । ऐरावते ॥ इन्द्रस्यकु

श्वरः ॥

इन्द्रकोषः । पुं । मञ्चके । खट्वायाम् ॥

इन्द्रगोपः । पुं । तीज इति बीरबहुटी इतिच भाषाप्रसिद्धे वर्षाभवरक्तवर्ण कीटे । शक्रगोपे । अग्निके ॥ इन्द्रो गोपोऽस्य ॥

इन्द्रचन्दनम् । न । हरिचन्दने ॥

इन्द्रचिर्भिटी । स्त्री । लताविशेषे । युग्मफलायाम् । दीर्घवृन्तायाम् ॥

इन्द्रच्छदः । न । सहस्रगुच्छेहारे ॥

इन्द्रजालम् । न । कुहके । जाले । कुसृतौ । मन्त्रौषधादिना यथास्थितस्यवस्तुनोऽन्यथाप्रत्यायने । मायाकर्मणि । भानुमतीकाखेल/इतिभाषा ॥ वृद्धास्तु । एतस्मात्किमिवेन्द्रजालमपरं यद्गर्भवासस्थितंरेतश्चेतति हस्तमस्तकपदप्रोद्भूतनानाङ्कुरम् । पर्य्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतं पश्यत्यत्ति शृणोतिजिघ्रतितथागच्छत्यथागच्छतीत्याहुः ॥ इन्द्रेण योगविशेषेण जालम् ॥ क्षुद्रोपायविशेषे ॥

इन्द्रजालिकः । पुं । कुहककारिणि । शौभिके । भानमती इतिभाषा ॥

इन्द्रजित् । पुं । रावणात्मजे । मेघनादे ॥ इन्द्रमजैषीत् । जि० । क्विप् तुकौ ॥

इन्द्रजिद्विजयी । पुं । लक्ष्मणे ॥

इन्द्रतूलम् । न । आकाशेउड्डीयमानेसूत्रे । ग्रीष्महासे । वंशकफे ॥

इन्द्रतूलकम् । न । इन्द्रतूले ॥

इन्द्रदारु । न । देवदारुणि ॥

इन्द्रदिक् । स्त्री । पूर्वदिशि ॥

इन्द्रद्युम्नः । पुं । ऋषिविशेषे । भाल्लवेये ॥ नृपतिविशेषे ॥

इन्द्रद्रुः । पुं । अर्जुनवृक्षे ॥ कुटजवृक्षे ॥ इन्द्रस्यद्रुः ॥

इन्द्रधनुः । न । वक्रीभूतेरोहिते । शक्रधनुषि ॥ रविकिरणा बहुवर्णा वातेनविलोडितानभसि । शक्रायुधसंस्थानादृश्यन्ते तत्तुइन्द्रधनुः ॥

इन्द्रध्वजः । पुं । राज्ञावृष्ट्यर्थं क्रियमाणे उत्सवविशेषे । शक्रध्वजे ॥ यथोक्तंभविष्योत्तरपुराणे । एवंयः कुरुते यात्रामिन्द्रकेतोर्युधिष्ठिर । पर्जन्यः कामवर्षीस्यात्तस्मिन् राज्येनसंशय इति ॥

इन्द्रनीलः । पुं । पन्ना इतिभाषाप्रसिद्धे मरकतमणौ ॥ क्षीरमध्ये क्षिपेन्नीलंक्षीरंचेन्नीलतांव्रजेत । इन्द्रनीलमितिख्यातमितिपरीक्षा ॥

इन्द्रपुष्पा । स्त्री । लाङ्गलिकीवृक्षे । विषलाङ्गला इतिगौडभाषा प्रसिद्धे ॥

इन्द्रपुष्पिका । स्त्री । विषलाङ्गला इति

गौड भाषा प्रसिद्धे कलिकारीवृक्षे॥
इन्द्रप्रस्थः। पुं। न। युधिष्ठिरनिर्मितेपुरोत्तमे। वज्रराजधान्याम्। पार्थनगरे॥ दिल्ली इतियवनभाषा॥
इन्द्रप्रहरणम्। न। पवौ। वज्रे॥ इन्द्रस्यप्रहरणम्॥
इन्द्रभम्। न। ज्येष्ठानक्षत्रे॥
इन्द्रभूतिः। पुं। अर्हतांगणाधिपभेदे॥
इन्द्रभेषजम्। न। शुण्ठ्याम्॥
इन्द्रमहकामुकः। पुं। कुक्कुरे॥
इन्द्रयवः। पुं। न। इन्द्रजौ इतिभाषाप्रसिद्धेतिक्तबीजविशेषे। कलिङ्गे। भद्रयवे। कुटजबीजे॥ ऐन्द्रंयवंत्रिदोषघ्नं सङ्ग्राहि कटुशीतलम्। ज्वरातिसाररक्तार्शः कृमिवीसर्पकुष्ठनुत्॥ दीपनंगुदकीलास्रवातास्रश्लेष्मशूलजित्॥ यवाकारबीजत्वात् यवम्। इन्द्रसंज्ञस्यवृक्षस्य यवम्॥
इन्द्रलुप्तः। पुं। केशनाशकरोगे। केशघ्ने॥ न। मस्तकोद्भवरोगविशेषे। खालत्ये॥ तस्यलक्षणम्॥ रोमकूपानुगंरक्तं पित्तेनसहमूर्च्छितम्। प्रच्यावयति रोमाणिततः श्लेष्मासशोणितः॥ रुणद्धिरोमकूपाँस्तुततोऽन्येषामसम्भवः। तदिन्द्रलुप्तंखालत्यं रुज्येतिचविभाव्यते॥ खालत्यंरुज्येतितस्यपर्यायकथनम्। तथाचभोजः। तदिन्द्रलुप्तमित्याहुःखल्लीं ज्याश्चकेचनेति। कार्त्तिकस्त्वाह। इन्द्रलुप्तंश्मश्रुणिभवति खालत्यं शिरोरुहेष्वेव रुज्यासवेदनेति आगमस्तन्नास्तीति निदानटीका॥
इन्द्रलुप्तकम्। न। इन्द्रलुप्तरोगे॥
इन्द्रलुप्तिकः। त्रि। इन्द्रलुप्तरुजान्विते। निष्केशशिरसि॥
इन्द्रवंशा। स्त्री। वर्णवृत्तविशेषे॥ वंशस्थवृत्तस्यर्यदिपूर्वमक्षरं दीर्घप्रयुक्तंकवितावतारकैः। गौडावनीनाथ कुलप्रकाशक स्यादिन्द्रवंशेत्यभिधानतस्तदा॥
इन्द्रवज्रा। स्त्री। वर्णवृत्तविशेषे॥ कर्णद्वयीगणडम्बगेन्द्रहारा राजन्तियस्याश्चरणेसमस्ते। तामिन्द्रवज्रामतिमात्रकान्तां भोगीन्द्रवक्त्रोज्जमरन्दधाराम्॥ यथा। रक्ताम्बुदे नोदितलम्बमाला शीतांशुचण्डातपकुण्डलाभ्याम्। तारांशुतारावलिहृद्यहारैः स्वीयांश्रियम्भूषयतीवसन्ध्येति॥
इन्द्रवज्राहतपक्षः। पुं। पर्वते॥
इन्द्रवारुणिका। स्त्री। इन्द्रवारुण्याम्॥
इन्द्रवारुणी। स्त्री। राखालसशा इति गौडप्रसिद्धलतायाम्। विशालायाम्। पीतपुष्पायाम्। तोसतुंबी

कीजड जोश्वेतवर्ण और अतिकड वीहोती है इन्द्रारुणीतिचभाषा । इन्द्रंवारयति । वृञ्० । उ० । कृवृदारीतिबाहुलकगयन्तादुनन् ।

इन्द्रवृक्षः । पुं । देवदारुणि ।

इन्द्रवृद्धा । स्त्री । व्रणरोगविशेषे । तल्लक्षणम् । पद्मकर्णिकवन्मध्येपिडकापिडकाचिताम् । इन्द्रवृद्धान्तुतांविद्याद्वातपित्तोत्थितांभिषगिति ।

इन्द्रव्रतम् । न । राज्ञोव्रतविशेषे । यथा । वार्षिकांश्चतुरोमासान् यथेन्द्रोऽभिप्रवर्षति । तथाभिवर्षेत्स्वंराष्ट्रंकामैरिन्द्रव्रतंचरन्निति ।

इन्द्रशत्रुः । पुं । वृत्रासुरे । इन्द्रस्यशत्रुः शातयिता हन्तेतिषष्ठीसमासेन वृत्रस्येन्द्रहन्तृत्वम् । इन्द्रे ॥ इन्द्रःशत्रुर्यस्येतिबहुव्रीहिर्दृचस्येन्द्रेणवध्यत्वात् ।

इन्द्रसावर्णिः । पुं । चतुर्दशेमनौ ।

इन्द्रसुतः । पुं । जयन्ते । वालिनामवानरराजे । अर्जुनपाण्डवे । अर्जुनवृक्षे । इन्द्रस्यसुतः ।

इन्द्रसुरसः । पुं । इन्द्रसुरिसे ।

इन्द्रसुरिसः । पुं । निर्गुण्ड्याम् । सिन्दुवारे । स्यौंडी इति काशी भाषा । सभालूइतिभाषा । वनहाँ इतिपर्वतभाषा ।

इन्द्रसूनुः । पुं । इन्द्रसुतस्यार्थे ।

इन्द्रसेनः । पुं । प्लक्षद्वीपस्थेऽद्रिविशेषे ।

इन्द्रा । स्त्री । फणिज्झकेवृक्षे ॥

इन्द्राक्षः । पुं । ऋषभौषधौ ।

इन्द्राग्निधूमः । पुं । हिमे ।

इन्द्राणिका । स्त्री । इन्द्रसुरिसे । निर्गुण्ड्याम् । इन्द्रस्यजन्या । इन्द्रवरुणेतिङीषानुकौ । जन्यजनकलक्षणेपिपुंयोगस्तत्रगृह्यते । कन् । ह्रस्वत्वञ्च । यद्वा । इन्द्रमानयति । अनेर्णयन्तात् कर्मण्यण् । ङीप् । कन् । ह्रस्वः ।

इन्द्राणी । स्त्री । इन्द्रपत्न्याम् । शच्याम् । इन्द्रस्यस्त्री । इन्द्रवरुणेति ङीषानुकौ । दुर्गायाम् । यथा । ऐश्वर्यं परमंयस्याःवशेचै वसुरासुराः । इदिच परमैश्वर्ये इन्द्राणीतेनसाशिवेतिदेवी पुराणम् । इन्द्रसुरिसे । स्त्रीणांकरखे । नीलसिन्दुवारे । सूक्ष्मैलायाम् । स्थूलैलायाम् । मातृकाविशेषे ॥

इन्द्रानुजः । पुं । विष्णौ ।

इन्द्रायुधम् । न । इन्द्रधनुषि । शक्रायुधे ।

इन्द्रारिः । पुं । असुरे । इन्द्रस्यअरिः ।

इन्द्रावरजः । पुं । विष्णौ । इन्द्रस्यावरं जातः । अन्येष्वपीतिडः ।

इन्द्राशनः । पुं । भङ्गायाम् । संविदि ।

इन्द्रासनम् । न । पञ्चमात्रिकस्यप्रथमे

।ऽऽ प्रभेदे ।

इन्द्रियम् । न । विषयिणि । हृषीके । चक्षुरादिषु । सात्त्विकाहङ्कारोपादानानि इन्द्रियाणि । तानिच बुद्धीन्द्रियकर्म्मेन्द्रियभेदाद्द्विविधानि । उभयमपि इन्द्रस्यात्मनो विषयोपलब्धिकरणतया लिङ्गत्वादिन्द्रियमुच्यते । तत्र श्रोत्रत्वक्चक्षूरसनाघ्राणाख्यानि ज्ञानेन्द्रियाणि भवन्ति । वाक्पाणिपादपायूपस्थानिच कर्मेन्द्रियाणिभवन्ति । उभयात्मकंमनः । मिलित्वैकादशानीन्द्रियाणि भवन्ति ॥ भूतप्रकृतिकानीन्द्रियाणीति नैयायिकाः । तथाच गौतमप्रणीतं सूत्रम् । घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः । १ । १२ । विषयग्रहणकार्यानुमेयंकरणमिन्द्रियम् । इन्द्रस्यात्मनो लिङ्गम् इन्द्रेणदृष्टं ज्ञातं ममचक्षुर्मम श्रोत्रमित्यादिक्रमेण इन्द्रेणसृष्टम् इन्द्रेणजुष्टम् प्रीणितं सेवितंवा इन्द्रेणदत्तं यथायथंविषयेभ्यः । इतिशब्दः इत्थे प्रकारे तेनइन्द्रेण दुर्जयम् इत्याद्यर्थेषु इन्द्रियमिन्द्रलिङ्गमित्यादि निपातनादिन्द्रशब्दात् घच् । रेतसि । वीर्य्ये ।

इन्द्रियकर्म्म । न । वाक्प्राणांश्रोत्रचागादीनामान्तरयोश्चमनोबुद्ध्योःकर्म्मसु । तानिच शब्दश्रवणस्पर्शग्रहण रूपदर्शनरसग्रहणगन्धग्रहणानि वचना दानगमनविसर्गानन्दाख्यानि सङ्कल्पाध्यवसायौच यथासङ्ख्यम्भवन्ति ।

इन्द्रियग्रामः । पुं । इन्द्रियसमूहे ।

इन्द्रियनिग्रहः । पुं । विषयेभ्य श्चक्षुरादिवारणे । चक्षुश्श्रोत्रादिज्ञानेन्द्रियाणां वाक्पाण्यादिकर्मेन्द्रियाणाञ्च तत्तद्गोलकोपरोधमात्रेणहठान्निरोधइत्यर्थः ॥ इन्द्रियाणान्तु सर्वेषांयद्येकं क्षरतीन्द्रियम् । तेनास्य क्षरतिप्रज्ञा दृतेःपात्रादिवोदकम् ।

इन्द्रियबधः । पुं । एकादशविधे इन्द्रियाणाम्बधे । यथा । बाधिर्य्यंकुष्ठतान्धत्वं जडताऽजिघ्रता तथा । मूकताकौण्यपङ्गुत्वक्लैब्योदावर्त्तमत्तताः । यथा सङ्ख्यमेकादशाना मेकादशवधाभवन्ति ॥

इन्द्रियवृत्तिः । स्त्री । श्रोत्रादीनांशब्दादिषु । वागादीनां वचनादिषु । मनोबुद्ध्योः सङ्कल्पाध्यवसाययोः ॥ यथाहुः साङ्ख्याः । शब्दादिषुपञ्चानामालोचनमात्रमिष्यतेवृत्तिः । वचनादानविहरणोत्सर्गानन्दाश्चपञ्चा

नाम् ॥ चक्षुरिन्द्रियाणां सम्मुग्धवस्तुमात्रदर्शनमालोचनमुक्तम् । यथाहुः । सम्मुग्धं वस्तुमात्रन्तु प्राग्गृह्णात्यविकल्पितम् । तत्सामान्यविशेषाभ्यां कल्पयन्ति मनीषिण इति । तथा । अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् । बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥ ततः परं पुनर्वस्तुधर्मैर्जात्यादिभिर्यया । बुद्ध्यावसीयते सापि प्रत्यक्षत्वेन सम्मतेति ॥

इन्द्रियस्वापः । पुं । प्रलये ॥

इन्द्रियात्मा । पुं । इन्द्रियेषु ॥

इन्द्रियादिः । पुं । इन्द्रियाणांकारणे राजसाहङ्कारे ॥

इन्द्रियार्थः । पुं । शब्दस्पर्शरूपरसगन्धाख्ये । विषये । गोचरे । गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः । इति न्यायसूत्रम् । १ । १४ । वैशेषिकाणां द्रव्यगुणकर्मसु अर्थशब्दाभिधेयत्वम् । अतः पञ्चानां गन्धादीनामेवकथं तत्त्वमित्याशङ्कानिरासायतदर्था इत्युक्तम् । तेषामिन्द्रियाणामर्थाविषयाउद्दिष्टा अपि तएवेत्याशयः । इत्यत्र तदर्थत्वं लक्षणमितिमन्तव्यम् । तच्छब्देन वहिरिन्द्रियाणि परामृश्यन्ते । तथा च एकैकवहिरिन्द्रियमात्रग्राह्यविशेषगुणत्वं वहिरिन्द्रियद्वयाग्राह्यत्वे बहिरिन्द्रियग्राह्यगुणत्वं वा तदर्थः । पृथिव्यादिगुणा इति लक्ष्यनिर्देशः । ते च गुणा इत्याकाङ्क्षायां गन्धेत्यादि । पृथिव्यादीनां गुणा इति षष्ठीसमासो भाष्यसम्मतः तेन गुणगुणिनोरभेदो नेतिसूचितम् ॥ इन्द्रियैरर्य्यते । अर्थयाञ्चायाम् । कर्मणि घञ् ॥

इन्द्रियायतनम् । न । शरीरे ॥

इन्द्रियार्थसन्निकर्षः । पुं । प्रत्यक्षज्ञानहेतौ । स च षड्विधः । संयोगः । संयुक्तसमवायः । संयुक्तसमवेतसमवायः । समवायः । समवेतसमवायः । विशेषणविशेष्यभावश्चेति ॥

इन्द्रियेशः । पुं । आत्मनि । जीवे ॥

इन्द्रेज्यः । पुं । बृहस्पतौ । इन्द्रस्येज्यः ॥

इन्धनम् । न । वह्निसन्दीपनार्थतृणकाष्ठयोः । पाकार्हकाष्ठे । एधसि । इन्धेऽग्निरनेन । ञिइन्धी० । करणेति ल्युट् ॥

इभः । पुं । गजे । हस्तिनि ॥ उत्तरपदस्थः श्रेष्ठे । अष्टमे । एति इयते वा । इण्० । इणः किदिति भः ॥

इभकणा । स्त्री । गजपिप्पल्याम् । इभदवकणा ॥

इभदन्ता । स्त्री । नागदन्त्याम् । पर्वपुष्प्याम् । विषौषधौ ॥

इभनिमीलिका । स्त्री । भङ्ग्याम् ॥ छलंमिषञ्चवैदग्धीभङ्गिश्चेभनिमीलिकेतिचिकाण्डशेषः ॥
इभपालकः । पुं । हस्तिपके ॥
इभभरः । पुं । गजसमूहे ॥ इभानां-भरः ॥
इभमाचलः । पुं सिंहे ॥
इभया । स्त्री । स्वर्णक्षीरीवृक्षे ॥
इभाख्यः । पुं । नागकेशरवृक्षे ॥
इभोषणा । स्त्री । गजपिप्पल्याम् ॥
इभ्यः । त्रि । आढ्ये । धनवति ॥ पुं । राज्ञि ॥ हस्तिपके ॥ इभमर्हति । दण्डादित्वात्यत् ॥ यद्वा । एःकामात् भ्यसते । भ्यसभये । अन्येष्वपीति डः ॥
इभ्यग्रामः । पुं । हस्तिपकानांसंवसथे ॥
इभ्या । स्त्री । शल्लकीवृक्षे ॥ करेणवाम् । टाप् ॥
इभ्यिका । स्त्री । इभ्यायाम् ॥ इभ्यैव । स्वार्थेकन् । उदीचामितोदादेशः । पक्षे इभ्यका ॥
इयत् । त्रि । इदम्परिमाणविशिष्टे । एतावति ॥ इदम्परिमाणमस्य । किमिदम्भ्यांवोघइतिवतुप् वस्यचघः । इदङ्किमोरीश्की । यस्येतिलोपः । प्रत्ययमात्रमवशिष्यते ॥ पठन्तिचात्रवैयाकरणाश्चोपनिषदाश्च । उदितवतिपरस्मिन्प्रत्ययेशास्त्रयोनैगतवतिविलयञ्चप्राकृतेपिप्रपञ्चे । सपदिपदमुदीतं केवलं प्रत्ययोयत् तदियदितिमिमीतेकोविदापण्डितोपीति ॥ पुं । इयान् । स्त्री । इयती ॥
इयत्ता । स्त्री । सीमायाम् ॥ परिमाणे ॥ संख्यायाम् ॥ इयतोभावः । तल् ॥
इरम्मदः । पुं । मेघज्योतिषि । वज्राग्नौ ॥ इराउदकम् तेनमाद्यतिदीप्यते अविन्धनत्वात् इत्यर्थे उग्रम्पश्येरम्मदेत्यादिनाखश् प्रत्ययोमुमागमश्चनिपातितः ॥ वाडवोपिइरम्मद-इतिकेचित् ॥
इरा । स्त्री । भुवि ॥ वाचि । वारुण्याम् ॥ सुरायाम् ॥ इं कामंराति । रादाने । आतोनुपेतिकः ॥ अम्बुनि । जले ॥ इणगतौ । एति ईयतेवा । ऋज्रेन्द्राग्रेतिसाधुः । निपातनाद्गुणाभावः ॥ अन्ने ॥
इराचरम् । न । करकायाम् । वर्षोपले ॥ त्रि । भूचरे ॥ अम्बुचरे ॥ इरायांचरति । चरेष्टः ॥
इराजः । पुं । कन्दर्पे ॥
इरावती । स्त्री । वटपत्रीवृक्षे । पाषाणभेदीविशेषे ॥ परीक्षित्नृपतेर्भार्यायाम् ॥

इरिणम्। न। ऊषरभूमौ। शून्ये। निराश्रये। ऋच्छति। ऋगतिमापणयोः। अर्त्तेः किदिदेतिइनन्।

इरिमेदः। पुं। अरिमेदे। विट्खदिरे। इरिमेदः कषायोष्णो मुखदन्तगदास्रजित्। हन्ति कण्डुविषश्लेष्मकृमिकुष्ठविषव्रणान्।

इरिवेल्लिका। स्त्री। मस्तकोद्भवव्रणजन्यपीडाविशेषे। तल्लक्षणम्। पिडकामुत्तमाङ्गस्थां वृत्तामुग्ररुजाज्वराम्। सर्वात्मिकां सर्वलिङ्गां जानीयादिरिवेल्लिकामिति।

इरेशः। पुं। विष्णौ। वरुणे। वागीशे। राज्ञि। इरायाः ईशः।

इर्वारुः। स्त्री। कर्कट्याम्।

इर्वारुशुक्तिका। स्त्री। फूट इति भाषाप्रसिद्धे इर्वारुविशेषे। निर्भिन्नकर्कट्याम्।

इलः। त्रि। प्रेरके। इलति प्रेरणां करोति। इल प्रेरणे। इगुपधलक्षणः कः।

इलविला। स्त्री। पुलस्त्यभार्यायाम्। इडविड्भुवि। कुबेरस्य जनन्याम्।

इला। स्त्री। सौम्यकलत्रे। बुधयोषिति। धरित्र्याम्। गवि। वाचि। इलति। इल उत्क्षेपे। इगुपधेति कः।

इलावृतम्। न। जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषे। तत्र सुमेरुः संवेष्ट्यास्ते। पश्चान्माल्यवतः प्राक् गन्धमादनशैलतः। इलावृतं नीलगिरेर्याम्यतो निषधादुदक्।

इलिका। स्त्री। अचलायाम्। भुवि। इलैव। स्वार्थे कः।

इली। स्त्री। ईल्याम्। करवालिकायाम्। कटारी छायछुरी इति भाषा। इल गतौ क्षेपे च। इन्। कृदिकारादिति वा ङीष्।

इलीशः। पुं। इल्लिशे। ईलिश माछ इति गौडभाषाप्रसिद्धे मत्स्यविशेषे।

इल्लिशः। पुं। इलीशे। इल्लिशो मधुरः स्निग्धो रोचनो वह्निवर्द्धनः। पित्तहृत् कफकृत् किञ्चिल्लघुर्बल्यो निलापहः।

इल्लीशः। पुं। इल्लिशे।

इल्वकाः। स्त्री। इल्वलासु। नित्यं बहुवचनान्तः।

इल्वलः। पुं। वातापेर्भ्रातरि दैत्यविशेषे। मत्स्यप्रभेदे। पक्षिविशेषे। इलति। इल स्वप्ने क्षेपणे च। सानसिवर्णसि पर्णसीत्यादिना वलच् गुणाभावश्च निपात्यते।

इल्वलाः। स्त्री। मृगशिरःशिरोदेशस्थतारकासु। मृगशिरःशिरस्थानां पञ्चानां स्वल्पतारकाणां यास्तारकास्तच्छिरोदेशे निवसन्ति ताः इल्व

ला' । इलन्ति । इल० । निपातनाद्द्वत्त्वं गुणाभावश्च । नित्यबहुवचनान्तोऽयम् ॥

इव । अ । उपमायाम् । सादृश्ये । साम्ये । ईषदर्थे । उत्प्रेक्षायाम् । वाक्यालङ्कारे ।

इषः । पुं । आश्विनमासि । इषगतौ । एषणम् इट् यात्रा । भावेक्विप् । साऽस्मिन्नस्ति जिगीषूणाम् । अर्श आद्यच् ॥

इषिका । स्त्री । गजाक्षिगोलके ॥ ईष्यते । ईषउञ्छे । ईषगतिहिंसादर्शनेषु । ईषेःकिद्ध्रस्वश्चेतीकन् । धातोर्ह्रस्वश्च । तूलिकायाम् ॥ इष्यते । इषगत्यादौ । कृञादिभ्योवुन् ।

इषितः । त्रि । अभिप्रेते । इष्टे ।

इषिरः । पुं । अग्नौ । इष्यति । इषगतौ । इच्छतिवा । इषइच्छायाम् । इषमदीत्यादिना किरच् ।

इषीका । स्त्री । काशे । मुञ्जामध्यवर्त्तितृणे । सींक तुली इतिचभाषा । ईषति ईषतेवा । ईषउञ्छे । ईषगतिहिंसादर्शनेषु । ईषेःकिद्ध्रस्वश्चेतिर्ईकन् ॥ दर्भशलाकायाम् ।

इषुः । पुं । स्त्री । वाणे । सायके । पञ्चसु । ईष्यतेऽनेन । ईषगत्यादौ । ईषते छिनत्तिवा । ईषेःकिच्चेत्युरादेरित्त्वञ्च ।

इषुधिः । पुं । स्त्री । इषूणांस्थाने । तूणीरे । इषवोधीयन्तेऽत्र । डुधाञ्० । कर्मण्यधिकरणेचेतिकिः ॥

इषुपुङ्खा । स्त्री । शरपुङ्खायाम् ।

इषुमाला । स्त्री । शरावल्याम् ।

इषूपलयन्त्रम् । न । शरशिलाक्षेपके यन्त्रविशेषे ।

इष्टम् । त्रि । आशंसिते । पूजिते ॥ प्रिये । इष्यमाणे । इष्यते । इषइच्छायाम् । मतिबुद्धीतिक्तः । पुं । सप्ततन्तौ । यज्ञे ॥ एरण्डवृक्षे । न । संस्कारे । क्रतुकर्मणि ॥ क्रतुर्यज्ञः कर्मचदानादि तयोः समाहारः तदिष्टशब्दवाच्यम् । अतएव मनुः । एकाग्निकर्म हवनं त्रेतायां यच्चहूयते । अन्तर्वेद्याञ्चयद्दानमिष्टन्तदभिधीयते इति । अग्निहोत्रंतपः सत्यंवेदानाञ्चार्थपालनम् । आतिथ्यंवैश्वदेवञ्चप्राहुरिष्टञ्चनाकदम् । यजनम् । यजदेवपूजादौ । नपुंसके भावेक्तः । अनुकूलवेदनीये देवादिलक्षणेयागादिफले । ईश्वराराधनादौ । एषणम् । इषेःक्तः । परमानन्दरूपत्वेन सर्वेषां प्रियत्वादिष्टः परमात्मैव ।

इष्टका । स्त्री । गृहादिनिर्म्माणार्थं दग्धमृत्खण्डविशेषे । ईंटइतिप्रसिद्धे । इष्यते । इष० । इष्यसिभ्यांतकन् ।

इष्टकेषीकामालानामितिनिर्देशात् प्रत्ययस्थादितिनेत्त्वम् ॥

इष्टकापथम् । न । इष्टकाभिर्निर्मितेपथि । उशीरे । वीरणमूले । इष्टकापथमस्य अधोवायुकरत्वात् । यद्वा । इष्टकेव दृढ: पन्थायस्य । इष्टकायामपि पन्थायस्येतिवा ॥

इष्टकामधुक् । त्रि । अभीष्टभोगप्रदे । इष्टानांकामधुक् ।

इष्टकावः । त्रि । इष्टकावति । इष्टकाः सन्त्यस्यास्मिन् वा । अन्येभ्योपिदृश्य तइतिवप्रत्ययः ।

इष्टगन्धः । त्रि । सुगन्धौ । न । वालुके । इष्टस्वासौ गन्धश्च । इष्टोगन्धोयस्यय स्मिन् वा ।

इष्टा । स्त्री । शमीवृक्षे ।

इष्टापूर्त्तम् । न । यज्ञखातादिकर्मणि । यथा । अग्निहोत्रंतपः सत्यं वेदाना ञ्चानुपालनम् । आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते । वापीकूपतडागादिदेवतायतनानिच । अन्नप्रदानमारामः पूर्त्तमित्यभिधीयते । इष्टञ्च पूर्त्तञ्च अनयोः समाहारः ।

इष्टार्थोद्युक्तः । त्रि । उत्सुके । उत्साहयुक्ते । इष्टश्चासावर्थश्च तत्रउद्युक्तः ।

इष्टिः । स्त्री । यागे । दर्शपूर्णमासेष्ट्याम् । अभिलाषे । श्लोकसङ्ग्रहे । एषणम् । इष० । क्तिन् । इज्यतेऽनयेति वा । यज० क्तिन् ॥

इष्टिकापथिकम् । न । लामज्जकतृणे । इतिराजनिर्घण्टः ।

इष्टिपचः । पुं । दैत्ये । दनुजे ।

इष्टिमुट् । पुं । दैत्ये । इष्टिंमुष्णाति । मुषस्तेये । क्विप् ।

इष्टुः । स्त्री । इच्छाविशेषे ॥

इष्मः । पुं । कामे । वसन्ते । इष्यति । इषगतौ । इच्छतिवा । इषइच्छायाम् । इषियुधीतिमक् ।

इष्यः । पुं । वसन्तर्त्तौ ॥

इष्वः । त्रि । उपदेष्टरि । इष्यतेऽसौ । इष० । सर्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वाअतन्त्रेइतिवन्गुणाभावश्चनिपात्यते ।

इष्वसनः । पुं । चापे । अस्यतेऽनेनेष्वसनः । इषूनामसनः ।

इष्वासः । पुं । धनुषि । त्रि । इषुक्षेपके । धन्विनि । इषवो बाणा अस्यन्तेऽनेन । असु० । हलश्चेतिघञ् ।

इह । अ । दुःखभावनायाम् ॥ सन्तापे । कोपे ॥

इह । अ । अस्मिन् । अत्र । अधिकरणे । व्यवहारभूमौ । अस्मिन् । इदमोहः । इदमइश् ।

इहत्यः । त्रि । इहभवे । इहजातादौ ।

ईक्षणि

। अव्ययात्यप् ।

इहामुत्रार्थफलभोगविरागः । पुं । ऐहिकपारत्रिकविषयभोगेभ्योनितरांविरतौ । मुक्तेर्द्वितीयसाधने । ऐहिकानांस्रक्चन्दनादिविषयभोगानांकर्मजन्यतया अनित्यत्ववत् आमुष्मिकाणामप्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरांविरतौ ।

इही । अ । लङ्कार्थे स्वर्थे । स्वमप्रतिरूपकम् ।

ई:

ई । अ । विषादे । दुःखभावने । अनुकम्पायाम् । क्रोधे । प्रत्यक्षे । सन्निधौ । सम्बोधने ॥

ई: । स्त्री । लक्ष्म्याम् । अस्य स्त्री । ङीष् ॥

ईक्षणम् । न । दर्शने । चक्षुषि । दृशि ॥ ईक्ष्यतेऽनेन । ईक्षद° । ल्युट् ।

ईक्षणिकः । पुं । हस्तरेखाद्यवलोकनपूर्वकशुभाशुभफलकथनेनजीविनि ॥ शुभाशुभयोरीक्षणमस्त्यस्य ठन् ।

ईक्षणिका । स्त्री । दैवज्ञायाम् । लक्षणादिना जनानांशुभाशुभनिरूपिण्याम् । न° ठन् । ईक्षते । ईक्ष

ईदृक्

दर्शनाङ्कनयोः । स्वल्पश्चा ।

ईक्षणीयः । त्रि । शोभमाने । ईक्षितुंयोग्यः । अनीयर् ॥ अवलोकनीये ।

ईक्षा । स्त्री । दृष्टौ । ईक्षणम् । ईक्ष° । गुरोश्चहलः । टाप् ।

ईक्षितः । त्रि । अवलोकिते । ईक्ष° । नपुंसके भावेक्तः ।

ईजानः । पुं । यजमाने । कर्मणि । ईजते । ईज° । शानच् ।

ईडा । स्त्री । स्तुतौ । ईडनम् । ईड स्तुतौ । गुरोश्चहलः । टाप् ॥

ईडितः । त्रि । स्तुते । कृतस्तवे । ईड्यतेस्म । ईड° । क्तः ।

ईड्यः । त्रि । स्तुत्ये । वन्द्ये । स्तव्ये । ईडितुंयोग्यः । ण्यत् ॥

ईतिः । स्त्री । डिम्बे । प्रजन्ये । उत्पाते ॥ प्रवासे । कृषेः षट्प्रकारोपद्रवविशेषे । यथा । अतिवृष्टिरनावृष्टिः शलभामूषकाः शुकाः । अत्यासन्नाश्चराजानः षडेता ईतयः स्मृताः इति । ईयतेऽनया । ईङ् गतौ । क्तिन् ।

ईदृक्षः । त्रि । ईदृशे । इवचेतिर्दृश ॥

ईदृक् । त्रि । ईदृशे । इसकेन्याय इसम्प्रकार इतिभाषा । अयमिवदृश्यते । इदमिवपश्यतिवा । दृशिरप्रे° । त्यदादिषुदृशइतिक्विन् । इदंकिमो

रीशकी ॥

ईदृशः । त्रि । ईदृशि ॥ अयमिव दृश्यते । इदमिव पश्यतिवा । दृशेस्त्यदादिष्विति कञ् । इदम ईश् ॥

ईप्सा । स्त्री । आप्तुमिच्छायाम् ॥

ईप्सितः । त्रि । अपेक्षिते ॥ अभिप्रेते ॥ इष्टे ॥ आप्तुमिष्टम् । आप्लृव्याप्तौ । सन् । क्तः । आपज्ञपृधामीत् । अत्रलोपोऽभ्यासस्येत्यभ्यासलोपः ॥

ईप्सुः । त्रि । आप्तुमिच्छौ ॥

ईयिवान् । त्रि । उपगते ॥ इण° । उपेयिवाननाश्वाननूचानश्चेति क्विटः कसुर्द्वित्वमभ्यासदीर्घत्वं वस्वोरिट्च निपात्यते । सूत्रे उपइत्यविवक्षितम् ॥

ईरणः । पुं । वायौ ॥ ईरति ईरयतिवा । ईर° । युच् । ल्युर्वा ॥ न । चलने ॥

ईरितम् । त्रि । प्रोक्ते ॥ प्रेरिते ॥ क्षिप्ते ॥ ईर्यतेस्म । ईरगतौ कम्पनेच । क्तः ॥

ईरितात्मा । पुं । प्रकटितस्वरूपे ॥

ईर्म्मम् । न । व्रणे ॥ ईरति सुखम् । ईरगतिप्रेरणयोः । बाहुलकान्मक् ॥

ईर्य्या । स्त्री । ध्यानमौनादिकस्य भिक्षुव्रतस्यानुष्ठाने । चर्यायाम् ॥ चर्य्यान्त्वीर्यांविदुर्बुधाः ॥ ईर्यते । ईरगतौ । ऋहलोर्ण्यत् ॥

ईर्य्यापथः । पुं । ध्यानाद्युपाये ॥ ईर्यायाः पन्थाः । ऋक्पूरित्यः ॥

ईर्व्वारुः । पुं । स्त्री । कर्कट्याम् ॥ ईरणम् । ईर° । सं° क्विप् । ईरं इणोति वारयतिवा । वृञ्° । बाहुलकादुण् ॥

ईर्षा । स्त्री । अक्षमायाम् ॥

ईर्षालुः । पुं । अक्षमे । ईर्षायुक्ते ॥

ईर्ष्यकः । पुं । दृष्टियोन्याख्यक्लीवे ॥ दृष्ट्वाव्यवायमन्येषां व्यवायेयः प्रवर्त्तते । ईर्ष्यकःसतुविज्ञेयोदृष्टियोनिश्च सस्मृतः ॥

ईर्ष्या । स्त्री । अक्षान्तौ । परोत्कर्षासहिष्णुत्वे । परोत्कर्षाऽक्षमेर्ष्यास्याद्दैन्यात्मन्युतोपिच । ईर्ष्यणम् । ईर्ष्यईर्ष्यायाम् । गुरोश्चेत्यः ॥

ईर्ष्यालुः । त्रि । अक्षान्तिशीले । कुहने । सेर्ष्ये । ईर्ष्यांलाति । ला । मितद्र्वादित्वाडुः ॥

ईला । स्त्री । धरित्र्याम् ॥ गवि ॥ वाचि ॥ सौम्यकलत्रे ॥

ईलिः । स्त्री । ह्रस्वगदाकारेहस्तदण्डे । करपालिकायाम् । कटारी कटार इत्यादिभाषा ॥ ईर्त्ते ईर्यतेवा । ईर° । इन् । कपिलकादिः ॥ ईड्यते वा । ईड° । डलयोरभेदः ॥

ईलितः । त्रि । स्तुते ॥ ईड्यतेस्म । ई

डु० । ल: । डलयोरभेदाल्ल: ॥

ईली । स्त्री । ह्रस्वगदाकारे हस्तदण्डे । करपालिकायाम् ॥ कृदिकारादितिपाक्षिकोङीष् ॥

ईट् । पुं । परमेश्वरे ॥ ईष्टे । ईश ऐश्वर्य्ये । क्विप् ॥

ईश: । पुं । महादेवे । सदाशिवे ॥ ईशानकोणाधिपतैा ॥ सर्व्वेषामीशितरि । विशुद्धसत्त्वप्रधानमायोपाधिके परमेश्वरे । हिरण्यगर्भे ॥ त्रि । प्रभैा । स्वामिनि ॥ एकादशसु ॥ ईष्टे । ईश० । इगुपधेतिक: ॥

ईशवल्लम् । न । पाशुपतानां द्वितीये पाशे ॥ ईष्टे स्वातन्त्र्येणइति ईश: । तदीयंवलंरोधशक्तिर्द्वितीय: पाश: । तथाचोक्तम् । तासांमाहेश्वरीशक्ति:सर्व्वानुग्राहिकाशिवा । धर्म्मानुवर्त्तनादेवपाशइत्युपचर्य्यतेइति ॥

ईशसखा । पुं । कुबेरे ॥ ईश:सखास्य ॥

ईशा । स्त्री । पार्व्वत्याम् । दुर्गायाम् ॥ ईष्टे । ईश० ॥ कान्ताट्टाप् ॥

ईशान: । पुं । शिवे । महादेवे ॥ एकादशरुद्रान्तर्गतरुद्रविशेषे ॥ शिवाष्टमूर्त्त्यन्तर्गतसूर्य्यमूर्त्तैा ॥ शमीवृक्षे ॥ न । ज्योतिषि ॥ त्रि । ईशितरि । नियन्तरि । स्वामिनि ॥ ईष्टे तच्छील: । ताच्छील्यवयोवचनशक्तिषु चानश् ॥

ईशानी । स्त्री । स्कन्दमातरि । दुर्गायाम् ॥ ईशानस्यस्त्री । पुंयोगलक्षणोङीष् ॥ शमीवृक्षे ॥

ईशिता । स्त्री । ईशित्वे । अणिमाद्यष्टैश्वर्यान्तर्गतैश्वर्य्यविशेषे । प्रभुत्वे ॥ येनस्थावराअप्याज्ञाकारिणो भवन्ति ॥ ईशोऽस्यास्ति । अतइनिठनाविति इनि: । ईशिनो भाव: । तस्य भावस्त्वतलाविति तल् ॥

ईशिता । त्रि । ईश्वरे । अधिपतैा । प्रभैा । नियन्तरि ॥ ईष्टे । ईश० । तृन् तृच्वा ॥

ईशित्वम् । न । ईशितायाम् । देवानामष्टैश्वर्यान्तर्गतैश्वर्य्यविशेषे ॥ यत्रभूतभैातिकानां प्रभवव्यूहव्ययानामीशिताभवति । ईशिनोभाव: ।त्व: ॥

ईश्वर: । पुं । शिवे ॥ मन्मथे ॥ विशुद्धसत्त्वप्रधानाज्ञानोपहितचैतन्ये । ईशनादिशक्तियुक्ते जगदधिष्ठातरि ॥ हिरण्यगर्भे । विचित्रशक्तित्वात्-सर्व्वसमर्थे सर्व्वनियन्तरि नारायणे ॥ उक्तञ्चाचदेवीगीतायाम् । तत्रयाप्रकृति:प्रोक्तासाराजन् द्विविधामता ॥ सत्त्वात्मिकातुमायास्यादविद्यागुणमिश्रिता । स्वाश्रयं यातु संरक्षेत् सा मायेतिनिगद्यते ॥ तस्यां यत्प्रति

बिम्बस्यादिम्बभूतस्यचेशितुः । सई श्वरः समाख्यातः स्वाश्रयज्ञानवान् परः ॥ तस्यां स्वाश्रयायां मोहकारिण्यां शुद्धसत्त्वप्रधानायां मायायामीशितुःपरमात्मनोयत् प्रतिबिम्बंपतति तत् प्रतिबिम्बमीश्वरः । सचेश्वरः स्वाश्रयं व्यापकं ब्रह्मतज्ज्ञानवानभवति माययातदाधारब्रह्मणोनावरणात् । सर्वज्ञः सर्वकर्त्ताचसर्वानुग्रहकारकः । इति । देहेन्द्रियसङ्घातस्यस्वामिनिजीवे ॥ ईशनशीले । समर्थे । सर्वान्तर्यामिणि ॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषईश्वरः इतिपतञ्जलिः । ईशएवाहमस्त्यर्थेनचमामीशतेपरः । ददामिचसदैश्वर्यमीश्वरस्तेनकीर्त्तितः । प्रभवादिषष्ठिकादशेऽब्दे । मुभिक्षंक्षेममारोग्यंकार्पासस्यमहार्घता । लवणं मधुगव्यञ्चईश्वरेदुर्लभं प्रिये । त्रि । आढ्ये । स्वामिनि । ईशितुं शीलमस्येति । स्थेशभासपिसकसोवरच् इतिवरच् । ईष्टे । ईश० । वरच् ॥ यद्वा । अश्नुते । अशूव्याप्तौ सङ्घातेच । अश्नोतेराशुकर्मणिवरट्चेतिवरट् । चादुपधाया ईत्वम् ।

ईश्वरप्रणिधानम् । न । शौचादिपञ्चनियमेषु पञ्चमे नियमे । ईश्वरस्यमानसैरुपचारैरभ्यर्चने । सर्वकर्मणांतस्मिन् परमगुरौफलनिरपेक्षतयाऽर्पणे ॥ ईश्वरे प्रणिधानम् ॥

ईश्वरभावः । पुं । प्रजापालनार्थमीशितव्येषु प्रभुशक्तिप्रकटीकरणे ॥

ईश्वररथचरणः । पुं । कालचक्रे । ईश्वररथस्यचरणः ॥

ईश्वरसेतुः । पुं । मर्यादायाम् । वर्णाश्रमादिधर्मे । ईश्वरस्यसेतुरिव ॥

ईश्वरा । स्त्री । उमायाम् ॥ श्रीवाणयादिशक्तिषु । वरजन्तादीश्वरशब्दात् टाप् । पुंयोगविवक्षाभावान् न ङीप् ।

ईश्वरी । स्त्री । गौर्याम् । दुर्गायाम् ॥ श्रीवाणयादिशक्तिषु ॥ अश्नुते विश्वम् । वरजन्तादीश्वरान् ङीप् ॥ यद्वा । ईष्टे । ईश० । वनिप् । वनोरचेतिङीब्रौ ॥ लिङ्गिनीवृक्षे ॥ वन्ध्याकर्कोटक्याम् ॥ रुद्रजटालतायाम् ॥ नाकुलीकन्दे ॥

ईषत् । अ । अल्पे । किञ्चित् ॥ ईषणम् । ईषगत्यादौ । अतप्रत्ययः ॥

ईषत्करः । पुं । अत्यल्पे । अनुबन्धे । गन्धे । लेशे । त्रि । ईषत्क्रियमाणे वस्तुनि । ईषत्क्रियते । ईषद्दुःसुष्विति भावे कर्मणिचा अकृच्छ्रार्थेषु ख

ख प्रत्ययः ॥

ईषत्पाण्डुः । पुं । धूसरवर्णे ॥

ईषदुष्णम् । न । कवोष्णे । मन्दोष्णे ॥ त्रि । तद्वति ॥ ईषञ्चतदुष्णञ्च ॥

ईषद्धास्यम् । न । मन्दहास्ये । स्मिते ॥ ईषञ्चतद्धास्यञ्च ॥ त्रि । तद्वति ॥

ईषद्रक्तः । पुं । अरुणे ॥ त्रि । तद्वति ॥

ईषा । स्त्री । हलयुगयोर्मध्यस्थकाष्ठे । लाङ्गलदण्डे ॥ ईषते । ईषगत्यादौ । इगुपधेतिकः । करणे गुरोश्चेत्यो वा ॥

ईषादन्तः । पुं । दीर्घदन्तगजे । उद्‌ग्रदन्ते ॥ ईषेवदन्तावस्य ॥

ईषिका । स्त्री । अक्षिकूटे । गजाक्षिगोलके ॥ ईषालाङ्गलकीलिका सेव । इवेप्रतिकृताविति कन् । तूलिकायाम् ॥ अस्त्रविशेषे ॥ यथा । सोभिमन्त्र्यशरेषीका मौषिकास्त्रेणवीर्यवान् । काकंतमभिसन्धायससर्जपुरुषर्षभः ॥ इतिरामायणम् ॥ ईष्यते ईषतिवा । ईषगत्यादौ ईषउञ्छेवा । क्वुन् ॥

ईषिरः । पुं । अग्नौ । पावके ॥

ईषीका । स्त्री । इषीकायाम् । तूलिकायाम् ॥ ईषीकास्यादिषीकापीति विरूपकोषः । पर्फरीकादित्वात् साधुः ॥

ईष्मः । पुं । कामदेवे ॥ वसन्तर्त्तौ ॥ ईषति ईषतेवा । ईषउञ्छे ईषगतिहिंसादर्शनेषु । इषियुधीन्धिन ईषीति दीर्घादि पाठस्याप्युक्तत्वात् मक् ॥

ईहा । स्त्री । उद्यमे । चेष्टायाम् ॥ वाञ्छायाम् ॥ ईहचेष्टायाम् । गुरोश्चेत्यः । टाप् ॥

ईहामृगः । पुं । कृत्रिममृगे ॥ नाटकरूपकभेदे ॥ कोके । वृके । भेडिया इतिभाषा ॥ ईहा मृगेष्वस्य ॥ ईहां मृगयतेवा । मृगअन्वेषणे । कर्मण्यण् ॥ ईहाप्रधानो मृगोवा । शाकपार्थिवादिः ॥

ईहितः । त्रि । अपेक्षिते ॥ न । उद्योगे । चरिते ॥

उः

उ । अ । सम्बोधने ॥ रोषोक्तौ ॥ अनुकम्पायाम् ॥ नियोगे ॥ पदपूरणे ॥ पादपूरणे । विस्मये ॥ अवनम् । उङ् शब्दे । क्विप् । तुङन् ॥

उः । पुं । शम्भौ । चन्द्रमौलौ । शिवे ॥ उकारे ॥

उकनाहः । पुं । पीतरक्तवर्णे तुरङ्गे ॥

उक्तः । त्रि । कथिते । भाषिते । जल्पिते । अभिहिते ॥ न । एकाक्षरायां वृत्तौ । श्रीछन्दसि ॥ उच्यतेस्म । वचपरिभाषणे । ब्रूञोवचिर्वा । क्तः । सम्प्रसारणम् ॥

उक्तिः । स्त्री । व्याहारे । वचने ॥ वच४ । क्तिन् । सम्प्रसारणम् ॥

उक्थः । पुं । यज्ञविशेषे ॥ न । प्राणे ॥ सामभक्तौ ॥ सामवेदे ॥ यज्ञायज्ञीयात्परेण यानिसामानिगीयन्ते तान्युक्थानि ॥ महाव्रताख्येक्रतौ प्रधानभूतंशस्त्रमुक्थशब्दार्थः ॥ उच्यते । वच० । पातृतुदीत्यादिनाथक् ॥

उक्थशाः४ । पुं । यजमाने ॥ उक्थानि उक्थैर्वा शंसति । शंसुस्तुतौ । मन्त्रेश्वेतवहोक्थशस्पुरोडाशोण्विन्निच्यत्र श्वेतवहादीनांडस् पदस्येतिवक्तव्यम् । यत्रपदत्वंभावि तत्रडस् । उक्थशोभ्याम् । अन्यत्रक्विः । उक्थशाः । उक्थशासइत्यादिबोध्यम् ॥

उक्था । स्त्री । एकाक्षरवृत्ते ॥ साद्विधा । श्रीः १ सर्वगुरुः । श्रीस्तेसास्ताम् ॥ उः २ सर्वलघुः । उरवतु ॥

उक्षेदः । पुं । वाग्मौ ॥

उक्षः । त्रि । सिक्ते । धौते ॥

उक्षणम् । न । सेचने ॥

उक्षतरः । पुं । तृतीयंवयःप्राप्तेवृषे ॥ तनुक्षा । वत्सोक्षाश्वर्षभेभ्यश्चतनुत्व इतिष्टरच् । ङीषि । उक्षतरी ॥

उक्षा । पुं । बलीवर्दे । वृषे ॥ उक्षति उक्षसेचने । श्वन्नुक्षन्निति कनिन् ॥ ऋषभौषधौ ॥ चि । सेक्तरि ॥

उक्षितः । चि । सिक्ते ॥ लिप्ते ॥

उखर्वलः । पुं । तृणविशेषे । भूरिपत्रे । सुतृणे ॥

उखलः । पुं । उखर्वले । तृणोत्तमे ॥

उखा । स्त्री । पिठरे । रन्धनस्थाल्याम् । हाँडी भरथिया भाडू इत्यादिभाषा ॥ ओखति । उखगतौ । इगुपधेतिकः ॥ उखन्यतेवा । खनुअवदारणे । अन्येष्वपीतिडः । टाप् ॥

उख्यम् । त्रि । पैठरे । उखायां पक्वे मांसादौ ॥ उखायां संस्कृतम् । शूलोखाद्यत् ॥

उग्रः । पुं । महादेवे । रुद्रे ॥ वायुमूर्त्तियम् ॥ क्षत्रियाच्छूद्रायामूढायामुत्पन्ने । आगुरि इतिगौडभाषाप्रसिद्धे जातिविशेषे ॥ क्षत्रियाच्छूद्रकन्यायांक्रूराचारविहारवान् । क्षत्रशूद्रवपुर्जन्तुरुग्रोनामप्रजायते ॥ क्षत्तृग्रपुक्कसानान्तुविलौकोवधबन्धनमिति - मनुः । करणेनसमाक्षास्यवृत्तिः भार्गवनिर्मिता ॥ शोभाञ्जनद्रुमे ॥ केर

लदेशे ॥ याष्टीके ॥ न । क्रूरसंज्ञक-
नक्षत्रेषु । पूर्वोत्तरद्वारगृहे । वत्स
नाभाख्यविषे । त्रि । उत्कटे । दारु-
णकर्मकर्त्तरि । उच्यति क्रुधासमवैध्य
ते । उचसमवाये । ऋज्रेन्द्रेत्यादि
नारक् गश्चान्तादेशः ।

उग्रकर्म्मा । पुं । हिंस्रे । उग्रंकर्मास्य ॥

उग्रकाण्डः । पुं । कारवेल्ले ।

उग्रगन्धः । पुं । चम्पके । कट्फले । अ-
र्जकवृक्षे । लशुने ॥ न । हिङ्गुनि ।
त्रि । उत्कटगन्धयुक्ते । उग्रोगन्धो-
ऽस्य ।

उग्रगन्धा । स्त्री । अजमोदायाम् । व-
चायाम् । छिक्किकौषधौ । अजग-
न्धायाम् । यवान्याम् । उग्रोगन्धोऽ
स्याः ।

उग्रचण्डा । स्त्री । देवीविशेषे ।

उग्रतारा । स्त्री । देवीविशेषे । उग्राद्
पिभयात् त्राति यस्माद्भक्तान् सदा-
म्बिकेनिरुक्तिः ।

उग्रत्वम् । न । उग्रतायाम् । चण्डता-
याम् । उग्रस्य भावः । त्वः ।

उग्रधन्वा । पुं । इन्द्रे । शत्रुवधायोद्यत
धनुष्के । उग्रंधनुर्यस्य । धनुषश्चेति
नङ् ।

उग्रनासिकः । त्रि । दीर्घनासाविशिष्टे ॥

उग्रशेखरा । स्त्री । भीष्ममातरि । ग
ङ्गायाम् ।

उग्रश्रवाः । पुं । रोमहर्षणसुते । सूते ।

उग्रसेनः । पुं । आहुके । कंसजनके ।

उग्रसेनसुतः । पुं । कंसे ॥

उग्रा । स्त्री । कनखलाधिष्ठात्र्या मम्बा
याम् । वचायाम् । यवान्याम् । छि
क्किकौषधौ । उग्रजातेर्भार्यायाम् ॥
धन्याके । प्रखरायांनार्याम् ॥ टाप् ।

उचितम् । त्रि । न्यस्ते । परिमिते । स
मञ्जसे । ग्राह्ये । उच्यते । वचपरि-
भाषणे । रुचिवचिकुचिकुटिभ्यःकि
तच् । युक्ते ॥ ज्ञाते । विदिते ।

उच्चः । त्रि । उन्नते । तुङ्गे । प्रांशौ ॥
उच्चिनोति । चिञ् ० । अन्येष्वपी
तिडः ॥ उच्चैस्त्वम् अस्ति अचवा । अ
र्श आद्यच् । अव्ययानामितिटिलोपः
। नालिकेरे ।

उच्चकैः । अ । अतिशयोच्चे । उच्चैः ।
अव्ययसर्वनाम्नामितिप्रागिवीयेष्वर्थे
षुटेः प्रागकच् ।

उच्चटा । स्त्री । दम्भे ॥ चर्य्यायाम् । ल
शुनप्रभेदे । गुञ्जायाम् । भूम्याम
लक्याम् । नागरमुस्तायाम् । जटि
लौषधौ । चूडालायाम् । मुस्तावि
शेषे । श्वेतागुञ्जोच्चटाप्रोक्तेतिभाव
प्रकाशः । उच्चटति । चटगतौ । अ
न्तर्भावितण्यर्थः । अच् ।

उच्चण्डः । त्रि । त्वरायुक्ते । अविलम्बिते । प्रचण्डे । उच्चण्डनम् । चण्डिकोपे । घञ् ।

उच्चतरुः । पुं । नारिकेले ।

उच्चतालम् । न । पानगोष्ठ्यां नृत्ये ॥ इति हेमचन्द्रः ।

उच्चदेवः । पुं । श्रीकृष्णे । गोविन्दे ।

उच्चन्द्रः । पुं । रात्रिशेषे ॥

उच्चयः । पुं । नीव्याम् । परिधानवस्त्रग्रन्थौ । इति हेमचन्द्रः ।

उच्चलम् । न । मनसि । चञ्चले । पुं । ध्वजस्योर्द्ध्वकूर्च्चे ।

उच्चललाटा । स्त्री । उन्नतललाटवत्याम् ।

उच्चलितः । त्रि । प्रस्थिते ॥

उच्चाटनम् । न । वैरिण एकदेशेऽनवस्थाकरणे । उच्चाटनंस्वदेशादे र्भ्रंसनंपरिकीर्त्तितमितिशारदातन्त्रम् ॥

उच्चारः । पुं । उच्चारणे । विष्ठायाम् । उच्चार्यते त्यज्यते । चरगतौ । ण्यन्तः । घञ् ॥

उच्चारणम् । न । कथने । शब्दप्रयोगे ।

उच्चारितः । त्रि । उदाहृते ॥ प्रकाशिते ॥

उच्चावचः । त्रि । बहुविधे । नैकभेदे । उत्कृष्टापकृष्टे । उदक्च अवाक्च । मयूरव्यंसकादित्वात्साधुः ।

उच्चिकमिषा । स्त्री । उत्क्रान्तुमिच्छायाम् । उठवेकी इच्छा इतिभाषा ।

उच्चिङ्गटः । पुं । शृङ्गगडमत्स्ये । त्रि । कोपनपुरुषे ।

उच्चूडः । पुं । उच्चूले । अस्योच्चूडावचूडाख्यावूर्द्ध्वाधो मुखचूडकाविति ध्वजाङ्कषुहलायुधः ।

उच्चूलः । पुं । ध्वजस्योर्द्ध्वकूर्च्चे । झण्डेकीपाग इतिभाषा ॥

उच्चैःश्रवाः । पुं । श्वेतवर्णे समुद्रमन्थनोत्थिते इन्द्रस्य घोटके ।

उच्चैर्घुष्टम् । न । घोषणायाम् । उच्चैर्घुष्यतेस्म । घुषिर्विशब्दने । क्तः ।

उच्चैःश्रवाः । पुं । इन्द्रस्याश्वे । अश्वानां मध्येभगवतोविभूतौ । अयंसप्तमुखः । यथोक्तंभागवते । गृहीतोश्वः सप्तमुखस्त्वयान्हपवलात्किलेति । उच्चैर्महान्श्रवोयशोयस्य । उच्चैःश्रवसीयस्यवा । यद्वा । उच्चैःशृणोति । श्रुश्रवणे । असुन् । उच्चैःश्रवसस्तन्तुप्रणिपत्यसमर्पितमित्यपतुपृषोदरादित्वादगागमोबोध्यः । आकाशस्थैर्दिवौकसैरितिहरिवंशोक्तिवत् । त्रि । वधिरे ॥

उच्चैः । अ । अत्यर्थे । महति । उन्नते ॥ उच्चीयते । चिञ् ० । उदिचेर्डैसिः ।

उच्छन्नम् । त्रि । नष्टे ।

उच्छलत । त्रि । उत्पतति ॥

उच्छशितः । त्रि । उल्लङ्घिते ॥ शशप्लुतगताविस्यस्मात् । क्तः ॥

उच्छादनम् । न । उत्सादने । उद्वर्त्तने । गन्धद्रव्यद्वाराशरीरनिर्मलीकरणे ॥

उच्छास्त्रम् । त्रि । शास्त्रमतिषिद्धे ॥ शास्त्रविरुद्धे ॥ उद्गतं शास्त्रात् ॥

उच्छिखः । त्रि । उद्गतज्वाले ॥

उच्छित्तिः । स्त्री । उच्छेदे ॥ उच्छेदनम् । क्तिन् ॥

उच्छिन्नः । त्रि । नष्टे ॥ उच्छेदिते ॥ उच्छिद्यतेस्म । छिदिरद्वैधीकरणे । क्तः ॥

उच्छिलीन्ध्रम् । न । छत्राके । छत्रिकायाम् ॥

उच्छिष्टः । त्रि । भुक्तावशेषे । ऊंठ ऊंठन ऊंठा इतिभाषा ॥ त्यक्ते ॥

उच्छिष्टभोजनम् । त्रि । देवनैवेद्यबलिभोजनकर्त्तरि ॥ इति हेमचन्द्रः ॥

उच्छिष्टमोदनम् । न । सिक्थके । मैण सित्था इतिभाषा ॥

उच्छीर्षकम् । न । शिरःप्रदेशे ॥ उपधाने । सिराहना इतिभाषा ॥

उच्छूनः । त्रि । स्फीते । उन्नते । वर्द्धिते ॥ अनोदाचरन्ति प्राचीनाः । कामिन्याःकियदुच्छूनमुरः प्रेयानसमीक्ष्य ते । नयंशालिमि बैत्यमतिदीनःकृषीवलइति ॥ उतश्वीषतेस्म । टुओश्विगतिवृद्ध्योः । क्तः । ओदितश्चेतितस्यनः । यजादित्वा त्सम्प्रसारणे पूर्वरूपेचहल इतिदीर्घः ॥

उच्छूनता । स्त्री । जृम्भणे ॥ भावेतल् ॥

उच्छृङ्खलः । त्रि । अबाधे । बन्धनरहिते । अनियन्त्रितवस्तुनि । निरर्गले ॥ उद्गतंशृङ्खलंनिगडंयस्य ॥

उच्छेदः । पुं । विनाशे ॥

उच्छेदी । त्रि । बिनाशिनि ॥

उच्छेषणम् । न । उच्छिष्टे ॥

उच्छोषणः । त्रि । सन्तापकरे ॥

उच्छ्रयः । पुं । द्रुमादीनामुन्नतायाम् । उत्सेधे ॥ उच्छ्रयणम् । श्रिञ सेवायाम् । बाहुलकादेरच् ॥

उच्छ्रायः । पुं । उच्छ्रये ॥ उच्छ्रयणम् । श्रिञ० । उदिश्रयतिबैतीति घञ् ॥ उत्कृष्टः श्रायोवा ॥

उच्छ्रितः । त्रि । सञ्जाते ॥ समुन्नद्धे ॥ उन्नते ॥ प्रवृद्धे ॥ उच्छ्रयति उच्छ्रीयतेस्मवा । श्रिञोगत्यर्थेतिकर्मणिवा क्तः ॥

उच्छ्रित्य । अ । सन्तत्येत्यर्थे ॥ निखन्येत्यर्थे ॥

उच्छसितः । त्रि । प्रफुल्ले । विकसिते ॥ जीविते ॥ स्फुरणे । फरकना इति

भाषा। उतश्वसितिति। श्वस०। क्तः।

उच्छ्वासः। पुं। अन्तर्मुखश्वासे। आहरे। प्राणने। आख्यायिकापरिच्छेदे। आश्वासे। उच्छ्वसनम्। श्वसप्राणने। घञ्।

उज्जयनी। स्त्री। विशालायांपुरि। अवन्त्याम्।

उज्जयन्तः। पुं। रैवतपर्वते।

उज्जयिनी। स्त्री। महाकालपुर्य्याम्। अवन्तिकायाम्।

उज्जासनम्। न। वधे। मारणे। जसुहिंसायाम्। स्वार्थण्यन्तः। भावे ल्युट्॥

उज्जृम्भः। त्रि। प्रफुल्ले। प्रस्फुटिते। इतिहेमचन्द्रः॥ उज्जृम्भणम्। जृम्भि०। घञ्॥

उज्जृम्भणम्। न। उज्जृम्भे॥

उज्जृम्भितः। त्रि। प्रफुल्ले। न। चेष्टायाम्। उज्जृम्भःसञ्जातोऽस्य। तारकादित्वादितच्।

उज्ज्वलः। पुं। शृङ्गाररसे। न। स्वर्णे। त्रि। दीप्ते॥ विशदे॥ विकाशिनि॥ उच्चैर्ज्वलति प्रकाशते। ज्वलदीप्तौ। अच्। नतुज्वलितीतिणः। तत्राऽनुपसर्गादित्यनुवृत्तेः।

उज्झः। पुं। त्यागे। विसर्ज्जने।

उज्झितः। त्रि। उत्सृष्टे। त्यक्ते। वर्जिते।

उञ्। अ। सतर्के। सम्बोधने। पूरणे।

उञ्छः। पुं। उञ्छशिले। ऋते। धान्यकणोच्चये। कणशआदाने॥ अबाधितस्थानेषु पथिवा क्षेत्रेषुवा अप्रतिहतावकाशेषु यत्रयत्रौषधयो विद्यन्ते तत्रतत्राङ्गुलीभ्यामेकैककणं समुच्चयित्वेतिबौधायनस्मृतेर्दर्शनात् एकैकधान्यगुडकोच्चयनमुञ्छः। उञ्छनम्। उछिउञ्छे। घञ्।

उञ्छनम् न। आपणादिपतितकणोपादाने। उंछना इतिभाषा। ल्युट्।

उञ्छशिलम्। न। आत्तशस्यात् क्षेत्राच्छस्यस्यसञ्चये। ऋतदृत्तौ॥ उञ्छश्च शिलञ्चेत्येकवद्भावः।

उञ्छशीलः। त्रि। उञ्छजीविनि। उद्धृतशस्यस्यशेषाहरणकर्त्तरि।

उटः। पुं। तृणपर्णादौ।

उटजः। पुं। न। मुनीनांतृणपर्णादिरचितालये। पर्णशालायाम्। उटाज्जायते। जनी०। अन्यत्रापीतिडः।

उडु। न। भे। तारकायाम्। जले। उरोषोक्तिपूर्वकं डयते। डीङ् वि०। मितद्र्वादित्वात् डु प्रत्ययः।

उडुः। स्त्री। नक्षत्रे। ऋक्षे। अवतिइति उः। डयते डुः। डीङो मितद्र्वादित्वातडुः। उश्चासौडुश्चेतिविग्रहः। उडुः उडू। उडवः इत्यादि

धेनुवत् ॥

उडुप: । पुं । न । प्लवे । कोले । भेले ॥ चर्मावनद्धे यानपात्रे ॥ पुं । चन्द्रे ॥ उडुनोजलात् पाति । पारक्षणे । सुपिस्थइत्यत्रसुपीति योगविभागात् क: । उडुनि जले पातीतिवा ॥

उडुपति: । पुं । चन्द्रे ॥ उडूनाम्पति: ॥

उडुपथ: । पुं । आकाशे ॥

उडुराट् । पुं । चन्द्रे ॥ उडुषु नक्षत्रेषु राजते । राजृ० । क्विप् ॥

उडूप: । पुं । न । उडुपे ॥ पुं । चमन्द्रसि ॥

उड्डयनम् । न । नभोगतौ । उडान इतिभाषा ॥

उड्डामर: । त्रि । श्रेष्ठे । उद्भटे ॥ पुं । तन्त्रविशेषे ॥

उड्डीनम् । न । खगानामूर्द्ध्वगतौ ॥ ऊर्द्ध्वंडयनम् । डीङ्० । नपुंसके भावे क्त: । स्वादयओदितइत्योदित्त्वान्निष्ठानत्वम् ॥

उड्डीयमान: । त्रि । उड्डयनविशिष्टे खगे ॥ उडन्त उडता इतिभाषा ॥

उड्डीश: । पुं । आगमशास्त्रविशेषे ॥ चण्डीशे । शिवे ॥

उत । अ । प्रश्ने ॥ वितर्के ॥ संशये ॥ अत्यर्थे । भृशे ॥ ऊर्द्ध्वे ॥ अप्यर्थे ॥

उत । अ । अत्यर्थे ॥ विकल्पे ॥ समुच्चये ॥ वितर्के ॥ प्रश्ने ॥ पदपूरणे ॥ अप्यर्थे ॥ एवार्थे ॥ ऊयते स्म । उङ् शब्दे । क्त: ॥

उतम् । त्रि । स्यूते । बुना इतिभाषा ॥ ऊयते स्म । वेञ्० । क्त: । यजादित्वात्सम्प्रसारणम् ॥

उतथ्य: । पुं । गौतमपितरि मुनिविशेषे ॥ अङ्गिरस: श्रद्धायामुत्पन्नेबृहस्पतेर्ज्येष्ठभ्रातरि ॥

उतथ्यतनय: । पुं । गौतममुनौ ॥

उतथ्यानुज: । पुं । देवाचार्ये ।बृहस्पतौ ॥

उतथ्यानुजन्मा । पुं । बृहस्पतौ । जीवे ॥

उताहो । अ । परिप्रश्ने ॥ विचारे ॥ विकल्पे ॥ उतच आहोच अनयो: समाहार: ॥

उत्क: । त्रि । अन्यमनस्के । उन्मनसि ॥ उद्गतंमनो ऽस्य । उत्कउन्मनाइतिउद्गतमनस्कइत्येतच्छब्दात् स्वार्थेकन ॥

उत्कट: । पुं । मत्तेभे ॥ रक्तेचौ ॥ शरे ॥ न । त्वक्पत्रे । गुडत्वचि । तजाख्यौषधौ । दारचीनी इतिभाषा ॥ अन्यत उत्कटसुगन्धित्वातस्वार्थे उत्कच्छब्दात् कटच ॥ त्रि । तीव्रे ॥ मत्ते ॥ विषमे ॥ उद्गत:कटआवरणम् आवरकोवाअस्य ॥ यद्वा । उद्गतमद इत्येतच्छब्दातस्वार्थे सम्प्रोदश्चेतिकटच्

टच् ॥

उत्कटकासनः । त्रि । विषमासने ॥

उत्कटा । स्त्री । सैंहली लतायाम् ॥

उत्कण्ठः । पुं । शृङ्गारस्य षोडशबन्धान्तर्गतबन्धविशेषे । आसनमिति यस्य प्रसिद्धिः । तल्लक्षणम् । नारीपादौ च हस्तेनधारयेत्स्तके पुनः । स्तनार्पितकरःकामी बन्धश्चोत्कण्ठसंज्ञकः इति ॥

उत्कण्ठा । स्त्री । उत्कलिकायाम् । इष्टलाभे कालक्षेपासहिष्णुतायाम् ॥ उत्कण्ठनम् । कठिशोके । गुरोस्तु लङ्घ्यः ॥ आकाङ्क्षायाम् ॥

उत्कण्ठितः । त्रि । उत्सुके । उत्कण्ठायुक्ते ॥ उत्कण्ठासञ्जातास्य । तारकादित्वादितच् ॥

उत्कण्ठिता । स्त्री । स्वीयादिनायिकाभेदे ॥

उत्कता । स्त्री । गजपिप्पल्याम् ॥ उत्कण्ठायाम् ॥

उत्करः । पुं । धान्यादिराशौ । स्तूपे ॥ अवकरे ॥ हस्तपादादिविक्षेपे ॥ उत्कीर्यते । हविशेषे । कृदोरप् ॥

उत्कर्षः । पुं । अतिशये ॥ स्वकालात् परकालकर्त्तव्ये । इतिस्मृतिः ॥ अविद्यमानधर्मारोपे ॥ उत्कर्षणम् । कृषवि० । घञ् ॥ त्रि । अतिशययुक्ते ॥

उत्कलः । पुं । ओड्रदेशे । उडीसा इति भा० ॥ यथा । जगन्नाथप्रान्तदेशस्योत्कलःपरिकीर्त्तितइति ॥ व्याधे ॥ त्रि । भारवाहके । मोटिया इति भाषा ॥

उत्कलिका । स्त्री । उत्कण्ठायाम् । इष्टप्राप्तौकालक्षेपासहिष्णुत्वे ॥ कामादिजातस्मृतौ ॥ कलिकायाम् ॥ हेलायाम् ॥ सलिलतरङ्गे ॥ उत्पूर्वात्कलेः क्वुन्आदिभ्योवुन् ॥ क्वुन्वा ॥

उत्कलिकाप्रायम् । न । गद्यप्रभेदे ॥ यथा । भवेदुत्कलिकाप्रायं समासाढ्यं दृढाक्षरमिति यथा । प्रणिपातप्रवणसप्रधानाशेषसुरासुरादिवृन्दसौन्दर्यप्रकटकिरीटकोटिनिविष्टस्पष्टमणिमयूखच्छटाच्छुरितचरणनखचक्रविक्रमोद्दामवामपादाङ्गुष्ठनखशिखरखण्डितब्रह्माण्डविवरनिस्सरच्छरदमृतकरप्रकरभास्वरसुरवाहिनीप्रवाहपवित्रीकृतपिष्टपत्रितयकैटभारे क्रूरतरसंसारसागरनानाप्रकारावर्त्तविवर्त्तमानविग्रहं मामनुगृहाणेति ॥

उत्कलितः । त्रि । उन्मनसि ॥ वृद्धिमति ॥

उत्कर्पितः । त्रि । उद्दृष्टे ॥

उत्का । स्त्री । उत्कण्ठितायां नायिकायाम् ॥

उत्कारः । पुं । धान्यस्योर्द्धक्षेपणे । निकारे ॥ धान्यस्यराशीकरणे ॥ उत्कर

ग्राम । क्वचित्पे । कुधान्ये इतिघञ् ।
उत्कारा । स्त्री । प्रतिवर्षप्रसूताया-
ङ्गवि ॥
उत्कासिका । स्त्री । वमनव्याधौ ॥
उत्किरः । त्रि । निःक्षेपकर्त्तरि ॥ उत्कि
रतिविक्षिपति । कृ० । इगुपधेतिकः ॥
उत्कीर्णः । त्रि । उल्लिखिते । कृतवेधने
॥ उत्कीर्य्यतेस्म । कृ० । क्तः । नत्त्वम् ॥
उत्कुटम् । न । उत्तानशयने ॥
उत्कुणः । पुं । उद्दंशे । मत्कुणे ॥
उत्कूटः । पुं । छत्रे ॥ इतिहारावली ॥
उत्कृतिः । स्त्री । षड्विंशत्यक्षरायां-
वृत्तौ ॥
उत्कृष्टः । त्रि । प्रशस्ते । उत्तमे ॥ अ
तिशययुक्ते । उत्कर्षविशिष्टे ॥ उत्कृ
ष्यतेऽयम् । कृषः कर्मणिक्तः ॥
उत्कोचः । पुं । स्त्री । उपदायाम् । ढौ
कने ॥
उत्कोचकः । त्रि । कार्यिभ्योर्थंगृहीत्वा
अयुक्तंकार्यंकुर्वाणे ॥
उत्क्रमः । पुं । व्यतिक्रमे । व्युत्क्रमे ॥
उत्क्रमणम् । न । उत्क्रान्तौ ॥
उत्क्रान्तः । त्रि । निर्गते ॥
उत्क्रान्तिः । स्त्री । उत्क्रमणे ॥
उत्क्रोशः । पुं । स्त्री । पक्षिविशेषे । कु
ररे ॥ उत्क्रोशति । क्रुशआह्वाने ।
पचाद्यच् ॥

उत्क्लेदः । पुं । वमनोपस्थितावित्यस्या-
र्थे । उकलाइ इति यस्यप्रसिद्धिः ॥
उत्क्लेशः । पुं । पीडायाम् ॥ वमनाद्यो
पस्थितौ । उकलाइ इतिभाषा । य
था । कफोत्क्लेशः । कफस्य वमनाद्यो
पस्थितिः ॥ उत्क्लेश । उत्क्लिश्यामंन
निर्गच्छेत प्रसेकष्ठीवनेरितम् । हृदयं
पीड्यतेचास्यतमुत्क्लेशंविनिर्दिशेदि
ति ॥ उत्क्लेशइत्यप्येके ॥
उत्क्षिप्तः । पुं । धत्तूरफले ॥ त्रि । ऊ
र्द्ध्वक्षिप्ते ॥
उत्क्षिप्तिका । स्त्री । कर्णाभरणविशेषे
। तलाम्याम् । कर्णान्दौ । कानतड
क्का इतिभाषा ॥
उत्क्षेपः । पुं । ऊर्द्ध्वक्षेपणे । उछालना
इतिभाषा ॥
उत्क्षेपकः । त्रि । उत्क्षेपकर्त्तरि ॥
उत्क्षेपणम् । न । व्यजने ॥ धान्यमर्द्दन
वस्तुनि ॥ षोडशपणे ॥ उद्वमने ।
ऊर्द्ध्वदेशसंयोगहेतौ । ऊर्द्ध्वक्षेपे । अ
धःस्थितस्यवस्तुनऊर्द्ध्वंनयने ॥ उत्
ऊर्द्ध्वंक्षेपणम् ॥
उत्खला । स्त्री । मुरानामगन्धद्रव्ये । ता
लपर्ण्याम् ॥
उत्खातः । त्रि । उन्मूलिते । उखाडा
इतिभाषा ॥
उत्खातकेलिः । स्त्री । वप्रक्रीडायाम् ॥

यथा। उत्क्वांतकेलिःशृङ्गाद्यैर्वप्रक्रीडानिष्यते इतिशब्दार्णवः।

उत्तः। त्रि। आर्द्रवस्तुनि. क्लिन्ने। भीजा इतिभाषा॥ उनत्तिस्म। उन्दीक्लेदने। अकर्मकत्वात्कर्त्तरिक्तः। नुदविदेति पक्षेनत्वाभावः।

उत्तंसः। पुं। कर्णपूरे। कर्णाभरणे। शेखरे। शिरोभूषणे। उत्तंसयति उत्तंस्यतेनेनवा। तसिः सौत्रोभूषार्थः। पचाद्यच्। हलश्चेति घञ्वा।

उत्तप्तः। त्रि। सन्तप्ते॥ परिप्लुते। न। शुष्कमांसे। उत्तप्यतेस्म। तप०। क्तः॥ चञ्चले॥

उत्तब्धः। त्रि। उत्तम्भिते॥ उत् ऊर्द्धं स्तब्धः॥

उत्तभितम्। त्रि। उत्तम्भिते॥

उत्तमः। त्रि। उत्कृष्टे। अनुत्तमे। वरेण्ये॥ पुं। प्रियव्रतराजः पुत्रे तृतीयमनौ॥ वैशिकाख्यनायके॥ अतिशयेनउत्कृष्टः। उत्कृष्टार्थवृत्तेरुच्छब्दात्तमप्। द्रव्यप्रकर्षार्थत्वान्नाम्। यद्वा। उत्ताम्यति। तमु। अच्॥ उत्तम्यतेवा। घञ्। नोदात्तोपदेशेतिनवृद्धिः।

उत्तमःश्लोकः। त्रि। पुण्ययशसि। श्रीहरौ॥ उद्गच्छन्तितमोयस्मात्सउत्तमाः। उत्तमाःश्लोकायशोयस्य।

उत्तमफलिनी। स्त्री। दुग्धिकावृक्षे॥

उत्तमर्णः। पुं। ऋणदे। ऋणस्यदातरि। धनस्वामिनि। महाजन इतिभाषा॥ उत्तममृणमस्य। ऋणमाधमर्ण्ये इतिसूत्रे आधमर्ण्यशब्देनव्यवहारविशेषो लक्ष्यते। तेनोत्तमर्णोपिसिध्यति। लक्षणायान्तु धारेरुत्तमर्णइतिनिर्देशोलिङ्गम्। देवर्षिपितृणे॥

उत्तमश्लोकः। त्रि। पुण्ययशसि॥

उत्तमसङ्ग्रहः। पुं। सम्यक्सङ्ग्रहणे। निर्जने परभार्ययासह केशाकेशिपरस्परालिङ्गनसहासनादिरूपमिथुनीभावे। इतिमिताक्षरा।

उत्तमसाहसः। पुं। दण्डविशेषे। साशीतिपणसाहस्रे॥ साशीतिपणसाहस्रो दण्डउत्तमसाहसः। इति याज्ञवल्क्योक्तेः। सहस्रपणमिते। यथाह मनुः। पणानांद्वेशतेसार्द्धे प्रथमःसाहसःस्मृतः। मध्यमः पञ्चविज्ञेयःसहस्रंत्वेवचोत्तम इति।

उत्तमा। स्त्री। उत्कृष्टायां नार्य्याम्। वरारोहायाम्॥ दुग्धिकौषधौ। स्वीयादिनायिकाप्रभेदे। अहितकारिण्यपिप्रिये हितकारिण्याम्। टाप्।

उत्तमाङ्गम्। न। मस्तके। उत्तमञ्चतदङ्गञ्च। सन्महदितिसमासः।

उत्तमाम्भः । न । नवविधातुष्टिषु तुष्टिविशेषे । नानुपहत्यभूतानि विषयोपभोगो भवतीति हिंसादोषदर्शनाद्विषयोपरमे सति या तुष्टिः सा पञ्चमी उत्तमाम्भ उच्यते ।

उत्तमारणी । स्त्री । इन्दीवर्य्याम् ।

उत्तम्भः । पुं । स्वतःफलतो वा तथाऽनर्थानुबन्धित्वशङ्कायाः प्रवृत्तिप्रतिबन्धिकाया विगमे ।

उत्तम्भनम् । न । वर्द्धने । उत्स्तम्भनम् । उदः स्थास्तम्भोः पूर्वस्य ।

उत्तम्भितः । त्रि । विधृते । उत्स्तम्भितः ।

उत्तरम् । न । प्रतिवाक्ये । बदल इति भाषाप्रसिद्धे प्रश्नस्य भञ्जने । प्रश्नश्चोद्यधिया पृच्छा तस्य भञ्जनमुत्तरम् ॥ उत्तीर्यते निस्तीर्यते प्रकृताभियोगोऽनेन । तस्य स्वरूपम् । पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् । अव्याख्यागम्यमित्येवमुत्तरं तद्विदो विदुरिति । तस्य भेदाः । मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा । प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः ॥ इति नारदः । कात्यायनेनापि व्यवहारविषये चतुर्विधमुत्तरमुक्तम् । सत्यं मिथ्योत्तरञ्चैव प्रत्यवस्कन्दनं तथा । पूर्वन्यायविधिश्चैव

मुत्तरं स्याच्चतुर्विधमिति ॥ सिद्धान्तानुकूलतर्कोपन्यासे । उत्तरणम् । कृ ट देरप् । पुं । सदाशिवे । हरौ । संसारसागरादुत्तारयतीति व्युत्पत्तेः । विराटराजसुते । त्रि । ऊर्द्ध्वे । उदीच्ये ॥ प्रवरे । श्रेष्ठे । अनन्तरे । दिव्ये । वामभागे । उत्तरति । तॄ प्लवनतरणयोः । पचाद्यच् । यद्वा । अतिशयेनोन्नतः । तरप् । द्रव्यमकर्षत्वाम्नमुः ।

उत्तरकालः । पुं । भविष्यत्काले । गौणकाले ॥ यथा । एवमागामियागीयमुख्यकालादधस्तनः । स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मण इति हरिहरपद्धतिः ।

उत्तरकुरुः । पुं । जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषे । रम्यकस्योत्तरं वर्षं तस्यैवान्ते हिरण्मयम् । उत्तराः कुरवश्चैव यथा वै भारतं तथा । उत्तरं मेरोः ।

उत्तरकोशला । स्त्री । अयोध्यायाम् । रामपुरि । साकेते । अवधपुरी इति भाषा ।

उत्तरक्रिया । स्त्री । अन्तिमक्रियायाम् । सांवत्सरिकश्राद्धादिपित्र्यक्रियायाम् ॥ यथा । प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु । क्रियन्तयाः क्रि

याःपित्र्याःप्रोच्यन्तेतास्वपोत्तरा इति विष्णुपुराणम् ।

उत्तराङ्गम् । न । द्वारोर्द्ध्वस्थकाष्ठे । त्रि । उत्ततरङ्गे ।

उत्तरच्छदः । पुं । शय्याया उपर्य्यास्तरणवस्त्रे । निचोले ।

उत्तरणम् । न । नद्यादिपारगमने । उतरणा इतिभाषा ।

उत्तरतः । अ । उत्तरादिगर्थे । दिग्देशकालेषवाच्ये । दक्षिणोत्तराभ्यामतसुच् स्वार्थे । उत्तरतोवसत्यागतोरमणीयंवा ।

उत्तरपक्षः । पुं । विचारसिद्धान्ते । समाधाने । कृतान्ते । समाधौ । सिद्धान्तानुकूलतर्कोपन्यासे ॥ उत्तरस्मैपक्षस्य ।

उत्तरपादः । पुं । चतुष्पादव्यवहारान्तर्गतद्वितीयपादे । उत्तरे ॥

उत्तरपूर्वा । स्त्री । ईशानकोणे । उत्तरस्याः पूर्वस्याश्चदिशोन्तरालम् । दिङ्नामान्यन्तराले इतिसमासः ।

उत्तरफल्गुनी । स्त्री । द्वादशनक्षत्रे । अस्याःस्वरूपम् दक्षिणोत्तरमिलिततारकाद्वयम् ॥ पर्यङ्करूपंतारकाद्वयञ्च । अस्यांजातस्यफलम् दाता दयालुःस्वजने सुशीलो । विशालकीर्त्तिः सुमतिः प्रधानः । धीरोनरोऽत्यन्तमृदुस्वभाव श्चेदुत्तराफल्गुनिकाप्रसूतिरिति ।

उत्तरफाल्गुनी । स्त्री । अर्यमदेवतायाम् । उत्तरफल्गुन्याम् ।

उत्तरभाद्रपत् । स्त्री । उत्तरभाद्रपदायाम् ।

उत्तरभाद्रपदा । स्त्री । अहिर्बुध्नदेवतायाम् । प्रौष्ठपदायाम् । अस्याःरूपम् । उत्तरेसुमुखि भारमूर्त्तिभृत्युत्तमाङ्गमिलितेद्वितारके । नीलचामरकचेश्वयुग्मते।लोचनाचलकलाःपलायिताइति कालिदासः । पर्य्यङ्करूपम् द्वितारात्मकमितिदीपिका । अत्रजातस्यफलम् । धनीकुलीनःकुशलःक्रियादौभूपालमान्योबलवान्महौजाः । सत्कर्मकर्त्तानिजबन्धुभक्तोयस्तुत्तराभाद्रपदाप्रसूतः इति ।

उत्तरमीमांसा । स्त्री । ब्रह्ममीमांसायाम् ।

उत्तरवादी । त्रि । उत्तरस्यवक्तरि । आसामी इतिभाषा ।

उत्तरसाक्षी । त्रि । स्वपक्षसम्बन्धिसाक्ष्येपरिभाषतां साक्षिणां यःस्वयंशृणोतिअर्थिनाश्राव्यतेवा सदृक्षर्यः । तथाच नारदः । साक्षिणामपियःसाक्ष्यंस्वपक्षंपरिभाषताम् । श्रवणाच्छ्रावणाद्वापिससाक्ष्युत्तरसंज्ञकइति

॥ परसाची इतिगौड भाषा ॥

उत्तरसाधकः । पुं । साधकसहाये । सहकारिणि ॥

उत्तरा । अ । उत्तराहि अर्थे । उत्तराश्चेति पक्षेप्याच् ।

उत्तरा । स्त्री । उदीच्यान्दिशि । कौवेर्य्याम् । उत्तरफाल्गुन्याम् ॥ परीक्षिन्मातरि । वैराट्याम् । उत् ऊर्द्ध्वं तरत्यत्र । तॄ० । ऋदोरप् ।

उत्तरात् । अ । दिशि । देशे ॥ काले । उत्तरात् वसति आगतो रमणीयं वा । उत्तराधरदक्षिणादातिरिति स्वार्थे आतिः ।

उत्तराधिकारी । त्रि । प्रथमाधिकारिणः पश्चादधिकारिणि । दायादे । अंसी इति भाषा ।

उत्तरापथजन्मा । पुं । जातिविशेषे । यथा । उत्तरापथजन्मानः कीर्त्तयिष्यामि तानपि । यौनकाम्बोजगान्धाराः किराताबर्ब्बरैः सह । एते पापकृतस्तात चरन्ति पृथिवीमिमामिति ।

उत्तरापोशानम् । न । हस्तावसेचने ।

उत्तराभासः । पुं । दुष्टोत्तरे ॥ तथाच कात्यायनः । प्रकृतेनास्वसम्बन्धमल्पमतिभूरि च । पक्षैकदेशव्याप्येव तच्चनैवोत्तरं भवेदिति ।

उत्तरायणम् । न । माघादिषण्मासा

त्मकेसूर्य्यस्योत्तरदिग्गमनकाले । देवानामहनि । माघादिमासयुग्मैस्तु ऋतवः षट्क्रमादितः । उत्तरायणमाद्यैस्तैस्त्रिभिः स्याद्दक्षिणायनमित्युक्तेः । मकरसङ्क्रान्तौ ।

उत्तराशापतिः । पुं । कुवेरे ॥

उत्तराषाढा । स्त्री । एकविंशतितमे नक्षत्रे । वैश्वदेवे । अस्याः रूपम् । सूर्पाकृतितारा चतुष्टयात्मकमिति कालिदासः । गजदन्तवद्दृष्टतारामयमिति दीपिकाटीका ॥ तत्रजातस्य फलम् । दाता दयावान् विजयी विनीतः सत्कर्मचेता विभवैः समेतः । कान्तासुतावाससुखो नितान्तं वैश्वे सुषेशः पुरुषो मनीषीति ।

उत्तरासङ्गः । पुं । प्रावारे । उत्तरीयांशुके । उत्तरे ऊर्द्ध्वभागे आसज्यते । षञ्जसङ्गे । घञ् ।

उत्तराहि । अ । उत्तरादर्थे । अस्तातेर्विषये उत्तराच्चेत्यस्याहिप्रत्ययः दूरे चेदवधिमान् । उत्तराहि वसति रमणीयं वा ।

उत्तरीयम् । न । संव्याने । उत्तरासङ्गे । उपवीतवद्धृतवस्त्रे । उत्तरेऽस्मिन् देहभागे भवम् । गहादित्वाच्छः ॥ यथा यज्ञोपवीतं हि धार्यते यद्विजोत्तमैः । तथा सन्धार्यते यत्नादुत्तराच्छा

दर्गंशुभमितिस्मृति:॥ एकस्वेद्वासोभवति तस्योत्तरार्द्धेन प्रच्छादयतीति पारस्कर: ॥ नस्यात्कर्माणिकञ्चुकी ॥

उत्तरेण । अ । उत्तरदिग्देशकालेषु ॥ एनबन्यतरस्यामदूरेऽपञ्चम्या इति स्वार्थे एनप् अदूरेचेदवधिमानवधेर्वर्त्तते । उत्तरेण वसति रमणीयंवा॥

उत्तरेद्युः । अ । आगामिदिने ॥ उत्तरस्मिन्नहनि इत्यर्थेसद्य:परुदितिउत्तरशब्दादेद्युस् प्रत्ययोनिपातित: ॥

उत्तलित: । त्रि । उतक्षिप्ते ॥

उत्तस्थू: । त्रि । उत्थिते ॥

उत्तान: । त्रि । अगभीरे ॥ ऊर्द्धमुखशयिते ॥ उद्गतस्तानोविस्तारोस्मात् ॥

उत्तानक: । पुं ।उच्चटायाम् ॥

उत्तानपत्रक: । पुं । रक्तैरण्डे ॥

उत्तानपाद: । पुं । स्वायम्भुवमनो:पुत्रे न्वपतिविशेषे ॥

उत्तानपादज: । पुं । उत्तानपादस्यपुत्रे । ज्योतीरथे । ग्रहाधारे । ध्रुवे ॥

उत्तानशय: । त्रि । अतिशिशौ । डिम्भे । स्तनपे ॥ उत्तान:शेते । शीङ्स्वप्ने । पार्श्वादिषूपसंख्यानमित्यच् ॥

उत्तानशया । स्त्री । स्तनन्धय्याम् ॥ टाप् ॥

उत्ताप: । पुं । उष्णतायाम् । तेजसि । सन्तापे ॥ उत्तापयसि । तपेर्ण्यन्तात् पचाद्यच् ॥

उत्तार: । त्रि । वहिर्निर्गतनेत्रे ॥ मंहति । उद्भटे । उदारे ॥

उत्तारी । त्रि । चपले ॥ इतिभूरिप्रयोग: ॥

उत्ताल: । त्रि । उत्कटे ॥ श्रेष्ठे ॥ विकराले ॥ प्लवङ्गमे ॥ त्वरिते ॥ उन्नते ॥

उत्तिष्ठद्धोम: । पुं । वषट्कारप्रयोगान्ते॥ याज्यापुरोनुवाक्यान्ते ॥

उत्तिष्ठमान: । त्रि । वर्द्धमाने ॥

उत्तीर्ण: । त्रि । मुक्ते । पारगते ॥

उत्तुङ्ग: । त्रि । उच्चे । उन्नते ॥

उत्तुण्डित: । त्रि । अनिर्गतशल्येव्रणे ॥

उत्तुष: । पुं । भृष्टधान्ये । खाजिके । लाजासु । खील इतिभाषा ॥

उत्तेजना । स्त्री । प्रेरणायाम् । व्यग्रकरणे ॥

उत्तेजितम् । न । अश्वचतुर्थगतौ । रेचिते ॥ उत्तेजितंमध्यवेगं योजनंश्वथवल्गयेत्युक्त: ॥ त्रि । प्रेरिते ॥

उत्तेरितम् । न । अश्वपञ्चमगतौ । आस्कन्दिते । उपकण्ठे ॥ उत्तेरितोतिवेगान्धोनश्रणोतिनपश्यति ॥

उत्तोलनम् । न । ऊर्द्धनयने । उठावना इतिभाषा ॥

उत्तोलित: । त्रि । उदस्ते ॥

उत्त्यक्तः । त्रि । ऊर्द्ध्वक्षिप्ते । परित्यक्ते ॥

उत्त्रासः । पुं । भये ॥

उत्थानम् । न । उद्यमे ॥ तन्त्रे ॥ पौरुषे ॥ पुस्तके ॥ रणे ॥ प्राङ्गणे ॥ उद्गमे ॥ हर्षे ॥ मलरोगे । मलोत्सर्गे ॥ वास्त्वन्ते ॥ चैत्ये ॥ सन्निविष्टोद्गमे ॥ उत्थीयतेऽत्र । ष्ठागतिनिवृत्तौ । अधिकरणे भावेवा ल्युट् ॥

उत्थानैकादशी । स्त्री । कार्त्तिकशुक्लैकादश्याम् ॥

उत्थापनम् । न । उत्तोलने ॥

उत्थितः । त्रि । उत्पन्ने ॥ प्रोद्यते ॥ वृद्धिमति ॥ उत्तिष्ठतिस्म । ष्ठा° गत्यर्थेति क्तः ॥

उत्थिताङ्गुलिः । पुं । चपेटे । विस्तृताङ्गुलिकरतले । चपेटा थाप इतिभाषा ॥

उत्पतः । पुं । खगे । पक्षिणि ॥

उत्पतनम् । न । उत्पत्तौ ॥ ऊर्द्ध्वगमने ॥ कूर्द्दने ॥

उत्पतितः । त्रि । उद्गते । उत्पन्ने ॥ उच्छ्रिते ॥

उत्पतिता । त्रि । ऊर्द्ध्वगमनशीले । उत्पतिष्णौ ॥ उत्पतति तच्छीलः । पत्लृगतौ । तृन् ॥

उत्पतिष्णुः । त्रि समुद्गते । उत्पतितरि । ऊर्द्ध्वपतनशीले ॥ उत्पतति । पत्लृगतौ । अलङ्कृञितीष्णुच् ।

उत्पत्तिः । स्त्री । देहसम्बन्धे ॥ जन्मनि ॥ आविर्भावे ॥ सत्कार्य्यवादेहि मृत्पिण्डेविद्यमानस्य घटस्याविर्भावएवोत्पत्तिर्यथा तथैवकारणात्मना विद्यमानानां तत्त्वानामाविर्भावएवोत्पत्तिर्विवक्षिता ॥ उत्पदनम् । पदगतौ । क्तिन् ॥

उत्पत्तिक्रमः । पुं । उत्पत्तेरनुक्रमे ॥ स यथा । आत्मन आकाशः आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः ओषधीभ्योऽन्नम् अन्नात्सर्वाणि भूतानीति श्रुतिप्रसिद्धः ॥

उत्पत्तिमत् । त्रि । अनित्त्येवस्तुनि ॥

उत्पत्तिविधिः । पुं । कर्मस्वरूपमात्रबोधकेविधौ ॥ यथा । आग्नेयोऽष्टाकपालोभवति । यथावा । अग्निहोत्रंजुहोतीति । अत्रचविधौकर्मणः कर्त्तृत्त्वेनान्वयः । अग्निहोत्रहोमेनेष्टम्भावयेदिति ॥ ननुयागस्यद्वेरूपे द्रव्यं देवताच । तयोश्च रूपाश्रवणे अग्निहोत्रंजुहोतीतिकथमुत्पत्तिविधिः अग्निहोत्रशब्दस्य तत्प्रख्यन्यायेन नामधेयत्त्वादितिचेन्न । रूपाश्रवणेप्यस्योत्पत्तिविधित्त्वात् । अन्यथारूपश्रवणाद्दध्नाजुहोतीत्य-

यमेवोत्पत्तिविधिः स्यात् । तथाचा ग्निहोत्रं जुहोतीतिवाक्यमनर्थकं स्यात् ॥

उत्पत्तिव्युत्क्रमः । पुं । उत्पत्तेर्विपर्य्यस्तक्रमे ॥ अयमर्थः । पृथिवीगन्ध तन्मात्रात्मिका रसतन्मात्रात्मिकाप् मात्रम्भवति । आपश्चता रूपतन्मात्रात्मकतेजोमात्रं भवन्ति । तच्च तेजः स्पर्शतन्मात्रात्मकवायुमात्रं भवति । सच वायुः शब्दतन्मात्रात्मकाकाशमात्रं भवति । सचाऽऽकाशः स्वकारणभूताऽज्ञानोपहितचैतन्यमात्रं भवतीति ॥

उत्पन्नः । त्रि । प्राप्तजन्मनि । उद्भूते । जाते ॥ उत्पद्यतेस्म । पद० । क्तः । रदाभ्यामिति नत्वम् ॥

उत्पलम् । न । इन्दीवरे । नीलकमले ॥ कुष्ठौषधौ ॥ जलजपुष्पमात्रे । कुवलये ॥ जलजपुष्पविशेषे । कोंत्रि इतिभाषा ॥ त्रि । मांसशून्ये ॥ उत्पलति । पलगतौ । पचाद्यच ॥

उत्पलगन्धिकम् । न । चन्दनविशेषे । कृष्णताम्रे । गोशीर्षे ॥

उत्पलपत्रम् । न । कुवलयदले ॥ स्त्री नखक्षते । तिलके ॥

उत्पलशारिवा । स्त्री । अनन्तायाम् । श्यामालतायाम् ॥ उत्पलमस्त्यस्याः उत्पलाकारपुष्पत्वात् । अर्शआद्यच ॥ यद्वा । उत्पलंपलमनया । उत्पला चासौशारिवाच ॥

उत्पलाक्षी । स्त्री । सुपर्णाख्यतीर्थदेव्याम् ॥

उत्पलिनी । स्त्री । कैरविण्याम् । छोटीकोकी इतिभाषा ॥ पद्मसमूहे । उत्पलाकरे ॥ उत्पलानि सन्त्यस्याम् । पुष्करादिभ्योदेशे इति इनिः ॥

उत्पली । स्त्री । तृणचर्पण्याम् ॥

उत्पटः । पुं । वृक्षनिर्यासे ॥ वैदिकोयम् ॥

उत्पवनम् । न । कुशपिञ्जिकाभ्यांपवित्रमध्येन जलादेरुत्क्षेपणे ॥

उत्पश्यः । त्रि । उन्मुखे । ऊर्द्धदृष्टिविशिष्टे ॥

उत्पाटः । पुं । योगविशेषे ॥ यथा । रवौविशाखा सोमे पूर्वाषाढा भौमे धनिष्ठा बुधेरेवती गुरौरोहिणी शुक्रेपुष्या शनावुत्तराफाल्गुनी चेदुत्पाटयोगः ॥

उत्पाटनम् । न । उन्मूलने । उपाडना इति भाषा ॥

उत्पाटिका । स्त्री । वृक्षस्यनीरसायांत्वचि ॥ वैदिकोयम् ॥

उत्पाटितः । त्रि । उन्मूलिते । उपाडा इतिभाषा ॥

उत्पातः

उत्पातः । पुं । अजन्ये । उपद्रवे । दि
व्यान्तरीक्ष्यभूमिजोपसर्गे ॥ तत्र दि
व्यो यथा । अपर्व्वणि चन्द्रादित्यग्रा
सः । आन्तरीक्ष्यो यथा । उल्कापा
तनिर्घातादिः । भौमो यथा भूकम्पा
दिः ॥ आध्यात्मिकाधिदैविकाधि-
भौतिकभेदभिन्ने प्राणिनां शुभाशुभ
सूचके महाभूतविकारे ॥ * ॥ अथोत्पा
ताध्यायः ॥ यानत्रोत्पातान् गर्गः
प्रोवाच तानहं वक्ष्ये । तेषां सङ्क्षेपो
यं प्रकृतेरन्यत्वमुत्पातः ॥ अपचा
रेण नराणा मुपसर्गः पापसञ्चयाद्भ
वति । संसूचयन्ति दिव्यान्तरिक्षभौ
मास्तमुत्पाताः । मनुजानामपचा
रादपरक्ता देवताः सृजन्त्येतान् । त-
त्प्रतिघाताय नृपः शान्तिं राष्ट्रे प्रयु
ञ्जीत ॥ दिव्यं ग्रहर्क्षवैकृत मुल्कानि
र्घातपवनपरिवेषाः । गन्धर्व्वपुरपुर-
न्दरचापादि यदान्तरिक्ष्यं तत् ॥ भौमं
चरस्थिरभवं तच्छान्तिभिराहतं शम
मुपैति । नाभसमुपैति मृदुतां शाम्य
ति नो दिव्यमित्येके ॥ दिव्यमपि शम
मुपैति प्रभूतकनकान्नगोमहीदानैः
। रुद्रायतने भूमौ गोदोहात्कोटि-
होमाच्च ॥ आत्मसुतकोशवाहनपु-
रदारपुरोहितेषु लोकेषु । पाकमु
पयाति दैवं परिकल्पितमष्टधा नृप-

तेः ॥ अनिमित्तभङ्गचलनस्वेदाश्रु-
निपातजल्पमाद्यानि । लिङ्गार्च्चाय
तनानां नाशाय नरेशदेशानाम् । दै
वतयात्राशकटाक्षचक्रयुगकेतुभङ्ग
पतनानि । सम्पर्य्यासनसादनसङ्गा
श्च नदेशस्य पशुभदाः ॥ ऋषिधर्म्मपितृ
ब्रह्मप्रोद्भूतं वैकृतं द्विजातीनाम् । यद्रु
द्रलोकपालोद्भवं पशूनामनिष्टं तत् ॥
गुरुसितशनैश्चरोत्थं पुरोधसां विष्णुज
ञ्च लोकानाम् । स्कन्दविशाखसमुत्थं
माण्डलिकानां नरेन्द्राणाम् ॥ वेद
व्यासे मन्त्रिणि विनायके वैकृतं चमू-
नाथे ॥ विधातरि सविश्वकर्म्मणि लो
काभावय निर्द्दिष्टम् ॥ देवकुमारकु
मारीवनिताप्रेष्येषु वैकृतं यत्स्यात् ।
तन्नरपतेः कुमारकुमारिकास्त्रीपरि
जनानाम् ॥ रक्षःपिशाचगुह्यकना
गानामेव मेव निर्द्दिष्टः । मासै-
श्चाप्यष्टाभिः सर्व्वेषामेव फलपाकः ॥
बुद्ध्वा दैवविकारं शुचिः पुरोधास्त्र्यहो
पितः स्नातः । स्नानकुसुमानुलेपनव
स्त्रैरभ्यर्च्चयेत प्रतिमाम् ॥ मधुपर्केण
पुरोधा भक्ष्यैर्व्वलिभिश्च विधिवदुपति
ष्ठेत् । स्थालीपाकं जुहुयाद्विधिवन्म-
न्त्रैश्च तल्लिङ्गैः ॥ इति विबुधविकारे शा
न्त्यस्सप्तराचं द्विजविबुधगणार्च्चागी-
तनृत्योत्सवाश्च । विधिवदवनिपा

उत्पातः

तैर्यैःप्रयुक्तानतेषांभवति दुरितपाकोदक्षिणाभिस्स्वरुद्धः।राष्ट्रेयस्यानग्निःप्रदीप्यते दीप्यतेचनेन्धनवान्।मनुजेश्वरस्यपीडा तस्यचराष्ट्रस्यविज्ञेया ॥ जलमांसार्द्रज्वलने नृपतिवधः प्रहरणेरणोरौद्रः। सैन्यग्रामपुरेषुच नाशोवह्नेर्भयंकुरुते ॥ प्रासादभवनतोरणकेत्वादिषुचानलेनदग्धेषु । तडितावाषण्मासात् परचक्रस्यागमोनियमात् ॥ धूमोनग्निसमुत्थोरजस्तमस्चाह्निजंमहाभयदम् । व्यभ्रेनिश्युडुनाशोदर्शनमपिचाह्निदोषकरम् ॥ नगरचतुष्पादाण्डजमनुजानांभयकरंज्वलनमाहुः । धूमाग्निविस्फुलिङ्गैःशय्याम्बरकेशजैर्मृत्युः ॥ आयुधज्वलनसर्पणस्वनाः कोषनिर्गमनवेपनानिवा । वैकृतानियदिवायुधेपराण्याशुरौद्ररणसङ्कुलंवदेत् ॥ मन्त्रैराग्नेयैः क्षीरवृक्षात्समिद्भिर्होतव्योग्निःसर्षपैः सर्पिषाच । अग्न्यादीनां वैकृतेशान्तिरेवंदेयंचास्मिन् काञ्चनंब्राह्मणेभ्यः ॥ शाखाभङ्गोऽकस्माद्वृक्षाणांनिर्दिशेद्रणोद्योगम् । हसनेदेशभ्रंशंरुदितेच-व्याधिबाहुल्यम् ॥ राष्ट्रविभेदस्त्वनृतौ बालवधोतीवकुसुमितेबाले । वृक्षात्क्षीरस्रावेसर्वद्रव्यक्षयोभवति

उत्पातः

॥ मद्ये वाहननाशःसङ्ग्रामः शोणिते मधुनि रोगः । स्नेहेदुर्भिक्षभयंमहद्भयंनिस्सृतेसलिले ॥ शुष्कविरोहे वीर्याग्निसङ्क्षयः शोषणेचविरुजानाम् । पतितानामुत्थानेस्वयमभयंदैवजनितञ्च ॥ पूजितवृक्षेह्यनृतौकुसुमफलंनृपवधायनिर्दिष्टम् । धूमस्तस्मिन्ज्वालाथवाभवेन्नृपवधायैव ॥ सर्पस्तुतरुषुजल्पस्तुवापिजनसङ्क्षयोपिनिर्दिष्टः । वृक्षाणांवैकृत्येदशभिर्मासैः फलविपाकः ॥ स्रग्गन्धधूपाम्बरपूजितस्यछत्रंविधायोपरि पादपस्य । कृत्वाशिवं रुद्रजपोत्रकार्योरुद्रेभ्यइत्यत्रषडेवहोमाः ॥ पायसेनमधुनाच भोजयेद्ब्राह्मणान्घृतयुतेनभूपतिः । मेदिनीनिगदितात्र दक्षिणावैकृतेतरुकृते हितार्थिभिः ॥ नालेऽब्जयवादीनामेकस्मिन्द्वित्रिसम्भवोमरणम् । कथयतितदधिपतीनांयमलंजातंच कुसुमफलम्॥ अतिवृद्धिः सस्यानांनानाफलकुसुमसम्भवोवृक्षे । भवतिहियद्येकस्मिन् परचक्रस्यागमोनियमात् ॥ अर्धेनयदातैलं भवतितिलानामतैलता-वास्यात्। अन्नस्यचवैरस्यंदातुर्विद्याद्भयंसुमहत् ॥ विकृतंकुसुमफलं वाग्रामाद्वापुराद्वहिष्कार्यम् ।-

उत्पात:

सौम्योऽष्टचरु: कार्यो निर्वाप्योऽथ पशु:
शान्त्यै ॥ सस्ये चाष्टौ हि विकृतिं प्रदेयं त
त्क्षेत्रमेव प्रथमं द्विजेभ्य: । तस्यैवम
ध्ये चरुमष्टभौमं कृत्वा न दोषं समुपै-
ति तज्जम् ॥ दुर्भिक्षमनावृष्टावति
वृष्टौ क्षुद्भयं परभयञ्च । रोगो ह्यनृतु
भवायां नृपतिवधोऽनभ्रजातायाम् ॥
शीतोष्णविपर्यासे नो सम्यगृतुषु स-
म्प्रवृत्तेषु । षण्मासाद्राष्ट्रभयं रोगभ
यं दैवजनितञ्च ॥ अन्यर्त्तौ सप्ताहं प्र
वृत्तवर्षे प्रधाननृपमरणम् । रक्ते शस्त्रो
द्योगो मांसास्थिवसादिभिर्मरक: ।
॥ धान्यहिरण्यत्वक्फलकुसुमाद्यैर्व
र्षिते भयं विद्यात् । अङ्गारपांसुवर्षे
विनाशमायाति तन्नगरम् ॥ उपला
विना जलधरैर्विकृता वा प्राणिनो य
दा वृष्टा: । छिद्रं वाप्यतिवृष्टौ सस्यानां
मीतिसञ्जननम् ॥ यद्यमलेऽर्कच्छाया
न दृश्यते दृश्यते प्रतीपा वा । देशस्य
तदा सुमहद्भयमायातं विनिर्देश्यम् ॥
व्यभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यते
ऽथवा रात्रौ । प्राच्यामपरस्यां वा तदा
भवेत् क्षुद्भयं सुमहत् ॥ सूर्येन्दुपर्ज
न्यसमीरणानां याग: स्मृतो वृष्टिवि
कारकाले । धान्यान्नगोकाञ्चनद
क्षिणाश्च देयास्तत: शान्तिमुपैति पा
पम् ॥ अपसर्पणं नदीनां नगरादचि

उत्पात:

रेणाशून्यतां कुरुते । शोषाश्चाशोषा
णामन्येषां वा ह्रदादीनाम् ॥ स्नेहा
सृङ्मांसवहा: सङ्कुलकलुषा: प्रती
पगाश्चापि । परचक्रस्यागमनं नद्य:
कथयन्ति षण्मासात् ॥ ज्वालाधूमक्वा
था* रुदितोत्क्रुष्टानि चैव कूपानाम् ।
गीतप्रजल्पितानि च जनमरकायोप
दिष्टानि ॥ सलिलोत्पत्तिरखाते-
गन्धरसविपर्यये च तोयानाम् । सलि
लाशयानां विकृतौ महद्भयं तत्र शा-
न्तिमिमाम् ॥ सलिलविकारे कुर्यात् पू
जां वरुणस्य वारुणैर्मन्त्रै: । तैरेव च ज
पहोमं शममेवं पापमुपयाति ॥ प्र-
सवविकारे स्त्रीणां द्वित्रिचतुष्प्रभृति
सम्प्रसूतौ वा । हीनातिरिक्तकाले-
च देशकुलसङ्क्षयो भवति ॥ वड-
वोष्ट्रमहिषगोहस्तिनीषु यमलोद्भ-
वे मरणमेषाम् । षण्मासात् सूति
फलं शान्तौ श्लोकौ च गर्गोक्तौ ॥ ना-
र्य: परस्वविषयेऽस्य त्यक्तव्यास्ता हितार्थि
ना । तर्पयेच्च द्विजान् कामै: शान्ति-
ञ्चैवात्र कारयेत् ॥ १ ॥ चतुष्पदा: स्व
यूथेभ्यस्त्यक्तव्या: परभूमिषु । नगर
स्वामिनं यूथमन्यथा तु विनाशयेत् ॥
२ ॥ परयोनावभिगमनं भवति ति-
रश्चामसाधु धेनूनाम् । उक्षाणो वा-
न्योन्यं पिबति श्वा वा सुरभिपुत्रम् ॥

[* क्वाथ: फेन: ।]

उत्पातः

मासत्रयेणविद्यात्तस्मिन्निः संशयंप-
रागमनम्। तत प्रतिघातायैतैास्त्रे
कैागर्गेणनिर्दिष्टैा॥ त गोविवास-
मंदानंतंतस्याशु शुभं भवेत्। तर्पये
द्ब्राह्मणांश्चाचजपंहोमञ्चकारयेत्॥
१॥ स्थालीपाकेन धातारं पशुना-
चपुरोहितः। प्राजापत्येनमन्त्रेणाय
जेदत्त्वन्दक्षिणाम्॥ २॥ यानंवाह
विमुक्तंयद्दिगच्छेत्त्वग्रजेश्ववाहयुतम्।
राष्ट्रभयंभवतितदाचक्राणांसादभङ्गे
च॥ अनभिहततूर्य्यनादःशब्दोवाता
डितेषुयदिनस्यात्। व्युत्पत्तैावातेषां
परागमोन्नृपतिमरणंवा॥ गीतरव
तूर्य्यशब्दानभसियदावाचरस्थिरान्य
त्वम्। मृत्युस्तदागदावाविस्वरतू-
र्य्येपराभिभवः॥ गोलाङ्गलयोः सङ्गे
दर्वीशूर्पाद्युपस्करविकारे। क्रोष्टुक
नादेच तथा शस्त्रभयंमुनिवचश्चेद
म्॥ वायव्येष्वेवन्नृपतिर्वायुंसक्तुभि-
रर्चयेत्। आवायोइति पञ्चचैाजप
व्याःप्रयतैर्द्विजैः॥ ब्राह्मणान्परमान्ने
न दक्षिणाभिश्चतर्पयेत्। वह्लन्द-
क्षिणोहोमःकर्त्तव्यश्चप्रयततः॥ पुर
पक्षिणोवनचरा वन्यावानिर्भयाविश
न्तिपुरम्। नक्तंवादिवसचराः क्षपा
चरावाचरन्त्यहनि॥ सन्ध्याद्वयेपि
मण्डलमावभ्रन्तो मृगाविहङ्गावा।

उत्पातः

दीप्तायांदिश्यथवांक्रोशन्तः संहता-
भयदाः॥ श्येनाःप्रहदन्तःस्वद्वारेक्रो-
शन्तिजम्बुकादीप्ताः। प्रविशेन्नरेन्द्रभ
वनेकपोतकः कैाशिकोयदिवा॥ कु
क्कुटरुतंप्रदोषेह्येमन्त्यादैाच कोकि
लालापाः। प्रतिलोममण्डलचराः-
श्येनाद्याश्चाम्बरेभयदाः॥ गृहचैत्य-
तोरणेषु द्वारेषुचपक्षिसङ्घसम्पातः।
मधुवल्मीकाम्भोरुहसमुद्भवश्चापिना
शाय॥ श्वभिरस्थिशवावयवप्रवेशनं
मन्दिरेषुमरकाय। पशुशस्त्रव्याहा
रेन्नृपमृत्युर्मुनिवचश्चेदम्॥ मृग
पक्षिविकारेषु कुर्याद्धोमान्सदक्षि-
णान्। देवाःकपोतइतिचजप्तव्याःप
ञ्चभिर्द्विजैः॥ १॥ सुदेवाइतिचैकेन-
देयागावश्चदक्षिणाः। जपेच्छाकुन
सूक्तंवामनो वेदशिरांसिच॥ २॥
शक्रध्वजेन्द्रकीलस्तम्भद्वारप्रपातभ-
ङ्गेषु। तद्वत्कवाटतोरणकेतूनांनरप
तेर्मरणम्॥ सन्ध्याद्वयस्यदीप्तिर्धूमे
त्पत्तिश्चकाननेनग्नौ। छिद्राभावेभू
मेर्दरणंकम्पश्चभयकारी॥ पाषण्डा
नांनास्तिकानाञ्चभक्तःसाध्वाचारप्रे
ज्झितःक्रोधशीलः।ईर्ष्युःक्रूराविग्रहर्
सक्तचेतायस्मिन्राजातस्यदेशस्यना
शः॥प्रहरहरछिन्धिभिन्धीत्यायुधका
ष्ठास्सपाणयोबालाः। निगदन्तःप्रह-

रन्तेतथापिभयं भवन्त्याशु ॥ अङ्गार
गैरिकाद्यैर्विकृतप्रेताभिलेखनं य-
स्मिन् । नायकश्चिचितमथवाचयेच्च
यंयातिनचिरेण ॥ लूतापटाङ्गभव-
लंनसन्ध्ययो: पूजितंकलशयुक्तम् ।
नित्योच्छिष्टस्त्रीकञ्चयद्गृहं तत्चयं
याति ॥ दृष्टेषुयातुधानेषुनिर्द्दिशे
न्मरकमाशुसम्प्राप्तम् । प्रतिघाता
यैतेषांगर्ग:शान्तिञ्चकारेमाम् ॥ म
हाशान्त्योथवलयो भोज्यानिसुमहा
न्तिच । कारयेतमहेन्द्रञ्चमाहेन्द्री
ञ्चसमर्च्चयेत् ॥*॥ अथयत्रकालेउत्पा
तादृष्टाविफलाभवन्तितत् प्रदर्शना-
र्थमाह ॥ नरपतिदेशविनाशेकेतो
रुदयेथवाग्रहेर्केन्द्वो: । उत्पातानां
प्रभव:स्वर्त्तुभवश्चाप्यदोषाय ॥ येच
नदोषान्जनयन्त्युत्पातास्तान्नतुस्व
भावकृतान् । ऋषिपुत्रकृतै:श्लोकैर्वि
द्यादेतै:समासोक्तै:॥*॥ तत्रवसन्ते ॥ व
ज्राशनिमहीकम्पसन्ध्यानिर्घातनि:
स्वना: । परिवेशरजोधूमरक्ताकास्त
मयोदया: ॥ द्रुमेभ्योन्नरसस्नेहबहु-
पुष्पफलोद्गमा: । गोपक्षिमदवृद्धिश्च-
शिवायमधुमाधवे ॥*॥ ग्रीष्मे ॥ तारो
ल्कापातकलुषंकपिलार्केन्दुमण्डल-
म् । अनग्निज्वलनंस्फोटधूमरेणवनि
लाहतम् ॥ रक्तपद्मारुणासन्ध्यानभ:

उत्पात:

क्षुब्धार्णवोपमम् । सरितांचाम्बुसंशो
षंदृष्टाग्रीष्मेशुभंवदेत् ॥*॥ वर्षासु ॥
शक्रायुधपरिवेशौविद्युच्छुष्कविरोह
णम् । कम्पोद्वर्त्तनवैकृत्यंरसनं दर
णंक्षिते: ॥ सरोनद्युदपानानांवृद्ध्यूर्द्ध्व
तरणप्लवा: । शरणंचाद्रिगेहानांवर्षा
सुनभयावहम् ॥*॥ शरदि ॥ दिव्यस्त्री
भूतगन्धर्वविमानाद्भुतदर्शनम् । ग्रह
नक्षत्रताराणांदर्शनञ्चदिवाम्बरे ॥
गीतवादित्रनिर्घोषा वनपर्वतसानुषु
। सस्यवृद्धिरपांहानिरपापा: शरदि
स्मृता: ॥*॥ हेमन्ते ॥ शीतानिलतुषा
रत्वेनर्द्दनंमृगपक्षिणाम् । रक्षोयक्षा
दिसत्त्वानांदर्शनंवागमानुषी ॥ दि
शोधूमान्धकाराश्च सनभोवनपर्व-
ता: । उच्चै:सूर्योदयास्तौचहेमन्ते-
शोभना:स्मृता: ॥*॥ शिशिरे ॥ हिम
पाताऽनिलोत्पाताविरूपाद्भुतदर्शन
म् । कृष्णाञ्जनाभमाकाशतारोल्का
पातपिञ्जरम् ॥ चित्रगर्भोद्भवा: स्त्री
षुगोजाश्वमृगपक्षिषु । पत्राङ्कुरल
तानाञ्चविकारा: शिशिरे शुभा: ॥*॥
अत्रविशेषमाह ॥ ऋतुस्वभावजाह्ये
तेदृष्टा:स्वर्त्तौशुभप्रदा: । ऋतोरन्यत्र
चोत्पातादृष्टास्तेचातिदारुणा: ॥ य
द्यद्विशेषेणफलप्रदंभवतितत्तदाह ॥
उन्मत्तानाञ्चया गाथा: शिशूनांयच्च

भाषितम् । स्त्रियोयस्त्रमभाषन्तेतस्य नास्तिव्यतिक्रमः ॥ येनकारणेनैतत् सत्यरूपंभवति तत्प्रदर्शनार्थमाह ॥ पूर्वंचरतिदेवेषुपश्चाच्चरतिमानुषान् । नाचोदितावागवदति सत्याह्येषासरस्वती ॥ उत्पातशास्त्रस्य प्रभावमाह ॥ उत्पातान् गणितविवर्जितोपिवुक्षाविख्यातो भवतिनरेन्द्रवल्लभश्च । एतत् तन्मुनिवचनंरहस्यमुक्तंयज्ज्ञात्वा भवतिनरस्त्रिकालदर्शी ॥ इतिवाराह्यांचतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ अकस्मादायाति । उत्पतनम् । पत्लृगतौ । घञ् । उत्पतति वा । ज्वलतीतिणः ॥

उत्पातभम् । न । यस्मिन्नक्षत्रेउत्पातः सम्भूतस्तस्मिन् ॥

उत्पादः । पुं । उत्पादने ॥

उत्पादकः । पुं । पशुविशेषे । कुञ्जराराती । शरभे ॥ त्रि । उत्पादयितरि । जनके ॥ उत्पादयति । पद० । णवुल् ॥

उत्पादनम् । न । उत्पन्नकरणे ॥

उत्पादना । स्त्री । क्रियायाम् । भावनायाम् ॥

उत्पादशयनः । पुं । स्त्री । टिट्टिभपक्षिणि ।

उत्पादिका । स्त्री । देहिकानामकीटे ॥ पूतिकायाम् ॥ हिलमोचिकायाम् ॥

उत्पाद्यः । पुं । पुरोडाशादिकर्मविशेषे ॥ त्रि । उत्पादितुंयोग्ये ॥

उत्पाली । स्त्री । आरोग्ये । सुस्थतायाम् ॥

उत्पिञ्जलः । त्रि । भृशमाकुले । समुत्पिञ्जे । अतिशयव्याकुले ॥

उत्पित्सुः । त्रि । उत्पतितुमिच्छौ । पततेः सन्नन्तादुप्रत्ययः । सनिमीमेतीसादेशः । अत्रलोपोभ्यासस्य ॥

उत्प्रासः । पुं । उपहासे ॥ उत्प्रासनम् । असुक्षेपणे असगतिदीप्त्यादानेषुवा । घञ् ॥

उत्प्रेक्षा । स्त्री । अनवधाने ॥ काव्यालङ्कारविशेषे ॥ यथा । सम्भावनमथोत्प्रेक्षाप्रकृतस्यसमेनयत् । अस्यार्थः । प्रकृतस्य उपमेयस्यसमेन उपमानेन यत्सम्भावनम् मिथ्यात्त्वेनवर्णनमिति । उदाहरणम् उन्मेषयोमनसहते जातिवैरी निशाया मिन्दो रिन्दीवरदलदृशा तस्य सौन्दर्यदर्पः । नीतःशान्तिंप्रसभमनया वक्त्रकान्त्ये तिहर्षोल्लग्ना मन्ये ललित्ततनु ते पादयोः पद्मलक्ष्मीः ॥ लिम्पतीवतमोङ्गानिवर्षतीवाञ्जनंनभः । असत् पुरुषसेवेवदृष्टिर्निष्फलताङ्ग

ता ॥ उत्प्रेक्षणम् । ईषदर्शमाङ्गन-योः । गुरोश्चेत्यः । टाप् ॥

उत्प्रेक्षाव्यञ्जकम् । न । शब्दविशेषे ॥ यथा । मन्येशङ्के ध्रुवंनूनंकिंवा प्रायोनु वेद्मिच । ननुनानञ्जिजानामि उत्प्रेक्षाव्यञ्जकानिचेति ॥

उत्प्लवनम् । न । उल्लङ्घने । फलाङ्ना इतिभाषा ॥

उत्प्लवा । स्त्री । नैाकाप्रभेदे ॥

उत्फालः । पुं । लम्फे ॥

उत्फुल्लः । त्रि । प्रफुल्ले । विकसितेपुष्पे । दलानामन्योन्यविश्लेषे ॥ उत्ताले ॥ न । स्त्रीणांकरणे ॥ उत्फलति । ञिफला० । ञीतः क्तः । आदितश्चेतीडभावः । उत्फुल्लसम्फुल्लयोरुपसंख्यानमितिनिष्ठातस्यलः ॥

उत्सः । पुं । प्रस्रवणे । पर्वतात्स्रवज्जलस्यपातस्थाने ॥ स्रवज्जले ॥ गिरेरुपरिनिर्झराद्युत्थाम्बुसङ्घे ॥ उनत्तिजलेन । उन्दी० । उन्दिगुधिकुषिभ्यश्चेतिसः । किदित्यनुवृत्तेर्नलोपः ॥

उत्सङ्गः । पुं । अङ्के । क्रोडे ॥ चि । असङ्गे ॥

उत्सङ्गवर्त्ती । त्रि । क्रोडस्थिते ॥

उत्सत्तिः । स्त्री । उच्छेदे ॥

उत्सन्नः । त्रि । उन्नते ॥ नष्टे ॥

उत्सर्गः । पुं । सामान्ये । सामान्यविधैा ॥ न्याये ॥ त्यागे ॥ दाने ॥ वर्जने ॥ साग्निककर्त्तव्यक्रियाविशेषे ॥ नीलोद्वाहादैा ॥ अपानवायोर्व्यापारे ॥ वाहुल्यदृष्टस्यवलवत्त्वे ॥ उत्सर्जनम् उत्सृज्यतेवा । घञ् ॥

उत्सर्जम् । त्रि । शब्दंकुर्वति ॥

उत्सर्जनम् । न । अपवर्जने । विश्वापिते । दाने । त्यागे ॥ उत्सृज० । ल्युट् ॥

उत्सर्पणम् । न । उल्लङ्घने ॥ उत्कृष्ट्यपुरतोगमने ॥

उत्सर्पिणी । स्त्री । जिनानांकालचक्राऽवयवे ॥

उत्सर्पितः । त्रि । उपरिभावंप्रापिते ॥

उत्सर्पी । त्रि । ऊर्द्धप्रसारिणि ॥

उत्सवः । पुं । नियताह्लादजनकव्यापारे उपनयनविवाहादैा । महे । उद्धषे । उत्सेके ॥ इच्छाप्रसरे ॥ कोपे ॥ उत्सुवति । षूप्रेरणे । पचाद्यच ॥ यद्वा । उत्सवनम् । षूप्रसवैश्वर्ययोः । ऋदोरप् ॥

उत्सवसङ्केतः । पुं । पार्वतीयानांगणे ॥ यथा । गणानुत्सवसङ्केतानजयत्सप्तपाण्डव इतिमहाभारतम् ॥

उत्सादनम् । न । समुत्क्षेपे ॥ उद्वाहने ॥ उद्वर्त्तने ॥ उत्साद्यतेऽनेन । ह

कृ० । यथन्सः । ल्युट् ॥

उत्सादितः । त्रि । कृतोत्सादने । उद्वर्त्तिते । निर्म्मलीकृतशरीरे ॥

उत्सारकः । पुं । द्वारपाले ॥ त्रि । उत्सारणकर्त्तरि ॥

उत्सारणम् । न । दूरीकरणे ॥ चालने ॥ स्थानान्तरप्रापणे ॥

उत्सारितः । त्रि । अपसारिते ॥

उत्साहः । पुं । उद्यमे । अध्यवसाये । इदमहङ्करिष्याम्येवेतिनिश्चयात्मिकबुद्ध्याधृतिहेतुभूते ॥ कर्त्तव्यार्थेषुस्थेयसिप्रयत्ने । उत्साहोमन्त्रमूलंस्यादितिनीतिविदांमतम् । प्रभुशक्तिर्मन्त्रमूलात्तस्मादुत्साहवान्भवेत् ॥ लोकोत्तरेषुकार्येषुस्थेयसिप्रयत्ने ॥ सूचे ॥ उत्सहनम् उत्सह्यते अनेन वा । षह० । हलश्चेति घञ् ॥ कर्मसुसुकरप्रत्ययः दृढयत्नकारकोभावोवाउत्साहः ॥ सङ्गीतोक्ते ध्रुवकविशेषे ॥

उत्साहवान् । त्रि । उत्साहविशिष्टे । उत्साहिनि ॥ उत्साहोऽस्त्यस्य । बलादिभ्योमतुबन्यतरस्याम् ॥

उत्साहवर्द्धनः । पुं । उद्यमवृद्धौ । वीररसे ॥ उत्साहेन वर्द्धते । वृधु० । अनुदात्तेतश्चहलादेरितियुच् ॥ उत्साहंवर्द्धयतीति वा । ल्युः ॥

उत्साहशक्तिः । स्त्री । राज्ञांशक्तिविशेषे ॥ विक्रमबलमुत्साहशक्तिरित्युक्तेः ।

उत्साही । त्रि । उत्साहवति ॥ बलादिभ्योमतुबन्यतरस्यामिति पक्षे इनिः ॥

उत्सिक्तः । त्रि । उद्धते ॥ गर्व्विते ॥ वर्द्धिते ॥ उद्रिक्ते ॥ उपप्लुते ॥ त्यक्तमर्यादे ॥ उत्पूर्वात् सिचेःक्तः ॥ सिक्ते ॥

उत्सिच्यमानः । त्रि । उद्रिच्यमने । वृद्धिमति ॥

उत्सुकः । त्रि । ईप्सितकर्मोद्यते । इष्टार्थोद्युक्ते ॥ अद्यममगुरुरागमिष्यतीत्युत्कण्ठाविशिष्टे । उत्कण्ठिते ॥ उत् उद्योगंसुवति सौति सुनोतिवा । षु प्रसवैश्वर्ययोः षुञ् अ० । विधिसंज्ञापूर्वकत्वात् गुणाभावः । क्विपिआगमशास्त्रस्यानित्यत्वात्तुग भावोवा । ततःसंज्ञायांकन् ॥ यद्वा । उत्सुवति । षू प्रेरणे । मितद्र्वादित्वाड्डुः । सत्विति क्विबवा । कनि केणइतिह्रस्वः ॥

उत्सूरः पुं । दिनावसाने ॥ इतिहेमचन्द्रः ॥

उत्सृष्टः । त्रि । कृतोत्सर्गे । त्यक्ते । विभूते ॥ यथा । आमंशूद्रस्यपक्वान्नं पक्वमुत्सृष्टमुच्यते इति ॥ उत्सृज्यते स्म । सृजवि० । क्तः ॥

उत्सेकः । पुं । उत्सेचनेन शोषणे ॥ उद्वृत्त्यवहिःसेचने ॥ उद्रेके ॥ उत्सेचनम् । षिचक्ष० । घञ् ॥

उत्सेचनम् । न । ऊर्द्ध्वसेके ॥

उत्सेधः । पुं । गिरिद्रुमादीनामुन्नतौ । उच्छ्रये ॥ न । शरीरे । संहनने ॥ उत्सेधनम् अनेनवा । षिधुग० । घञ् ॥

उत्स्वनः । पुं । उच्चशब्दे । त्रि । तद्वति ॥

उद् । अ । प्रकाशे ॥ विभागे ॥ प्राबल्ये ॥ अस्वास्थ्ये ॥ शक्त्याम् । प्राधान्ये ॥ बन्धने ॥ भावे ॥ मोक्षे । लाभे ॥ ऊर्द्ध्वकर्म्मणि ॥ ऊर्द्ध्वे ॥ उत्कर्षे ॥ प्राकठ्ये ॥ नैकठ्ये ॥

उदम् । न । जले । जगत्त्रयान्तोदधिसम्प्लवोदेनारायणस्योदरनाभिमात्रादितिभागवतोक्तेः ॥

उदकम् । न । जले । वारिणि ॥ उनत्ति । उन्दीक्ले० । उदकमित्युणादिसूत्रेणसाधु ॥

उदककुम्भः । पुं । उदकुम्भे ॥ उदकस्य कुम्भः ॥

उदकपरीक्षा । स्त्री । दिव्यविशेषे ॥

उदकलोलः । त्रि । जलप्रिये ॥

उदकिलः । त्रि । उदकवति ॥ उदकमस्त्यस्य अस्मिन्वा ॥ पिच्छादित्वादिलच् ॥

उदकीर्णः । पुं । महाकरञ्जे ॥

उदकीर्य्यः । पुं । डालकरम्चा डहरकरञ्ज इतिगौडभाषाप्रसिद्धे करञ्जविशेषे ॥

उदकुम्भः । पुं । जलकलशे ॥ उदकस्य कुम्भः । एकहलादाविल्युदादेशः ॥

उदक्तम् । त्रि । कूपादिभ्यउत्थितेजलादौ ॥ उतपूर्वादञ्चतेःक्तः ॥

उदक्या । स्त्री । ऋतुमत्याम् । रजस्वलायाम् ॥ उदकमर्हति । संज्ञायामितियत् ॥ त्रि । जलार्हे ॥ दण्डादित्वाद्यत् ॥

उदगद्रिः । पुं । हिमालयपर्वते ॥

उदगयनम् । न । उत्तरायणे । देवानां दिवसे ॥

उदगाहः । पुं । जलावगाहने । उदकस्यगाहः अवगाहनम् । मन्थौदनेत्यादिनोदादेशः ॥

उदग्भूमः । पुं । उत्कृष्टस्थाने । सङ्गमौ ॥ कृष्णोदक्पाण्डुसंख्यापूर्वायाभूमेरजिष्यते ॥

उदग्रः । त्रि । उच्चे ॥ उन्नतमग्रमस्य ॥

उदग्रदन् । पुं । उच्चदन्तेहस्तिनि ॥ त्रि । वृहद्दन्तयुक्ते ॥ उदग्रोदन्तावस्य । अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्चेतिदन्तस्यदतृ ॥

उदङ्कः । पुं । चर्म्ममयेघृतादिपात्रे ॥ उ

दच्यते उदञ्चियतेऽस्मिन्। अच्चु०। उदङ्कोऽनुदक इतिघञ्। तैलोदङ्कः घृतोदङ्कः।

उदक्। अ। उदग्दिग्भवे॥ उदग्देशोद्भवे॥ उदक्कालोत्पन्ने॥ उदीच्यां दिशि उदीच्याःदिशः उदीचीदिग्वा। दिक्शब्देभ्यःसप्तमीपञ्चमीप्रथमाभ्योदिग्देशकालेष्वस्तातिः॥ अञ्चेर्लुगित्यस्तातेर्लुक्। एवंदेशेकालेच॥

उदङ्। पुं। दिशि॥ देशे॥ काले॥ त्रि। तद्भवे॥ उत्कृष्टमञ्चति। अञ्चु०। ऋत्विगितिक्विन्। नलोपः। नुम्। संयोगान्तलोपः। कुत्वम्॥,

उदजः। पुं। पशुप्रेरणे॥ उदजनम्। अज०। समुदोरजःपशुष्वित्यप्। अघञपोरितिपर्युदासाद्वीभावोन॥

उदञ्चनः। पुं। भाण्डे॥ न। पिधानार्थपात्रे। ढकना ढकनी इतिभाषा॥ उदञ्चतेऽस्मिन्। अञ्चु०। ल्युट्। उदकोदञ्चनम्॥ ऊर्द्धक्षेपणे॥

उदञ्चितः। त्रि। ऊर्द्धक्षिप्ते॥ पूजिते। उत्ऊर्द्धमञ्चितम्॥

उदण्डपालः। पुं। मत्स्यविशेषे॥ सर्पप्रभेदे॥

उदधा। स्त्री। तैलपिपीलिकायाम्॥

उदधिः। पुं। समुद्रे। उदकानिधीयन्तेऽत्र। कर्मण्यधिकरणेचेतिधाञःकिः॥ घटे॥

उदधिमलः। पुं। समुद्रफेने॥

उदधिमेखला। स्त्री। पृथिव्याम्॥

उदन्तः। पुं। वार्त्तायाम्। वृत्तान्ते॥ साधौ॥ उद्गतोन्तोयस्य॥

उदन्तकः। पुं। उदन्तार्थे॥ स्वार्थेकन्॥

उदन्तिका। स्त्री। तृप्तौ॥

उदन्या। स्त्री। पिपासायाम्॥ उदन्यति उदकस्येच्छाया। सुपआत्मनःक्यच्। अशनायोदन्येति ईच्छाभावःक्यचि उदकस्यउदन्भावश्चनिपात्यते। अप्रत्ययादित्यः॥

उदन्वान्। पुं। उदधौ। पारावारे। समुद्रे॥ उदकानिसन्त्यत्र। उदन्वानुदधौचेत्युदकस्योदन्भावो निपातितो मतुपि॥ ऋषिविशेषे॥

उदपानः। पुं। न। कूपे॥ क्षुद्रजलाशये॥ उदकंपिवन्त्यस्मिन्। अधिकरणेल्युट्। उदकस्योदः॥

उदमानः। पुं। आढकस्यपञ्चाशत्तमेभागे॥ कुल्यास्यादष्टभिर्द्रोणैर्द्रोणपादेनचाढकः। अतोद्वैशतिकोभागउदमानउदाहृतइत्युक्तेः॥

उदमेयः। त्रि। उदकंमेयंयस्यतस्मिन्॥ उदकस्योदः संज्ञायाम्॥

उदयः। पुं। पूर्वपर्वते। उदयाचले॥ उदयाऽचलसम्बन्धे। लग्ने॥ यैयन्त्र

श्यते भास्वान् सतेषामुदयःस्मृतः । तिरोधानञ्चयच्चैति तदेवास्तमनं रवेः ॥ नैवास्तमनमर्कस्य नोदयः सर्वदासतः । उदयास्तमनेनामदर्शनादर्शने रवेः ॥ उद्यन्ति ग्रहा अस्मात् । इण० । एरच् ॥ वृद्धौ । समुन्नतौ ॥ महिम्नि ॥ उत्पत्तौ ॥

उदयनः । पुं । वत्सराजे । वत्सेशे ॥ अगस्त्ये । घटोद्भवे । कुसुमाञ्जलिग्रन्थकर्त्तरि । उदयनाचार्य्ये ॥ न । उदये ॥

उदयसन्ध्या । स्त्री । अर्द्धोर्कोदयात् प्राक्षघटिकाद्वये ॥

उदरम् । न । जठरे । तुन्दे । कुक्षौ । नाभिस्तनयोर्मध्यभागे ॥ अन्तःसुषिरे ॥ युधि । रणे । पुं । उदररोगे । उत्कृणाति । कृगतौ । अच् । यद्वा । उद्दृच्छति । उदियर्त्तिवा । ऋगतौ । अच् । यद्वा । दृणाति । दृविदारणे । उदिदृणातेरजत्तौपूर्वपदान्त्यलोपश्च ॥

उदरग्रन्थिः । पुं । गुल्मरुजि ।

उदरत्राणम् । न । उदरबन्धवस्त्रादौ । नागोदे । पेटी कमरबन्ध इतिभाषा ॥ उदरस्यत्राणंयेन ॥

उदरथिः । पुं । समुद्रे ॥ वियन्मणौ । सूर्य्ये ॥ उत्कृच्छति उदर्यतेवा । ऋ० । उद्यर्त्तेश्चिदितिगथिन् ॥

उदरपिशाचः । त्रि । सर्वान्नभक्षके । सर्वान्नीने ॥ इतिहेमचन्द्रः ॥

उदरभेदी । त्रि । आत्महनि ॥

उदरम्भरिः । त्रि । स्वोदरमात्रपूरके । आत्मम्भरौ ॥ उदरम्बिभर्त्ति इति विग्रहे उदरस्यमुमागमोभृञ इन्प्रत्ययश्चनिपातसिद्धः ॥

उदररोगः । पुं । जठरव्याधिविशेषे । उदरी इतिभाषाप्रसिद्धे ॥

उदरव्याधिः । पुं । उदररोगविशेषे ॥ यथा । कदलीयवक्षारन्तुपानीयेन प्रसाधितम् । तदास्वादनान्नश्यन्ति उदरव्याधयोऽखिला इतिगारुडे-१९४ अध्यायः ॥

उदरशाण्डिल्यः । पुं । उपनिषद्प्रसिद्धे अतिधन्वनः शिष्ये ऋषिविशेषे ॥

उदरामयः । पुं । अन्नगन्धौ । अतिसाररोगे ॥

उदरावर्त्तः । पुं । नाभौ । तुन्दकूप्याम् ॥

उदरिकः । त्रि । उदरिले ॥ ठक् ॥

उदरिणी । स्त्री । गर्भवत्याम् ॥

उदरी । त्रि । तुन्दिले । पिचिण्डिले ॥ अतिशयितमुदरमस्य । तुन्दादिभ्य इलच्चेतिचकारादिनिः ॥

उदरिलः । त्रि । वृहत्कुक्षौ । उदरिणि

॥ अतिशयितमुदरमस्य । तुन्दादिभ्यइलच्चेतिइलच् ॥

उदर्कः । पुं । एष्यत्कालीनफले । भाविनिकर्मफले ॥ मयनफल इतिप्रसिद्धे मदनवृक्षस्य कण्टके ॥ उदर्क्यते । अर्कस्तवने । घञ् ॥ उदर्च्यतेवा । अर्चपूजायाम् । उदृच्यतेवा । ऋट्चस्तुतौ । घञ् ॥ भविष्यत्काले ॥

उदर्चिः । पुं । अग्नौ ॥ शिवे । हरे ॥ कन्दर्पे । दर्पके ॥ त्रि । उज्ज्वले ॥ उत् ऊर्द्धमर्च्चीरश्मिर्यस्यसः ॥

उदर्दः । पुं । रोगविशेषे ॥ तल्लक्षणम् । वरटीदष्टसंस्थानः शोथःसंजायतेबहिः । सकण्डुस्तोदबहुलश्छर्दिज्वरविदाहवान् ॥ उदर्दमितितंविद्याच्छीतपित्तमथापरे । वाताधिकं शीतपित्तमुदर्दस्तुकफाधिकमिति ॥

उदलावणिकम् । त्रि । लवणाम्भसासिद्धेव्यञ्जनादौ ॥

उदवसितम् । न । आलये । भवने । गृहे ॥ उत्ऊर्द्धमवसीयते स्म । षोऽन्तकर्मणि षिञ्बन्धनेवा । क्तः । व्यसिस्यतीतीत्वम् ॥

उदश्वित् । न । अर्द्धजलयुक्ते घोले ॥ तक्रंह्युदश्विन्मथितं पादाम्ब्वर्द्धाम्बुनिर्जलमित्युक्तः ॥ छच्छिकायाम् ॥ उदकेनश्वयतिवर्द्धते । टुओश्विगतिवृद्ध्योः । क्विप् तुक् । उदकस्योदः संज्ञायाम् । उदश्वितइतिनिर्देशाद्सम्प्रसारणम् ॥ उदश्वित्कफकृद्बल्यं श्रमघ्नंपरमंमतम् ॥

उदसनम् । न । अपनयने ॥ उत्क्षेपणे ॥

उदस्तः । त्रि । उत्तोलिते ॥ उत्क्षिप्ते ॥

उदाजः । पुं । पशुभिस्तानांप्रेरणे ॥ उद्अजनम् । अज० । घञ् । अघञपोरित्युक्ते र्वीभावोन ॥

उदात्तः । पुं । स्वरप्रभेदे ॥ उच्चैरुदात्त इतितत्स्वरूपम् । उत् उच्चैरादीयतेस्म । क्तः । अचउपसर्गात्त इतितादेशः ॥ काव्यालङ्कारविशेषे । उदात्तंवस्तुनः सम्पत् । समृद्धिमद्वस्तुवर्णनमुदात्तः । इत्यलङ्कारसूत्रम् ॥ त्रि । दयात्यागादिसम्पन्ने ॥ महति ॥ श्रव्ये ॥ दातरि ॥

उदानः । पुं । कण्ठदेशस्थेवायौ । कण्ठस्थानीये ऊर्द्धगमनवत्युत्क्रमणवायौ । स्पन्दयत्यधरंवक्त्रंनेत्रभागप्रकोपनम् । उद्वेजयति मर्म्माणिह्युदानोनाम मारुतः ॥ उदानोह्युत्कण्ठतालुभ्रूमध्यमूर्द्धदर्शीत्तवायुः ॥ ऊर्द्धेन अनिति अनेन । अन० । हलश्चेति घञ् ॥ उदरावर्त्ते ॥ भुजङ्गमविशेषे ॥

उदायुधः । त्रि । गृहीतशस्त्रे ॥

उदारः । त्रि । दातरि ॥ महति ॥ ऋज्वाशये । दक्षिणे । सरले ॥ गम्भीरे ॥ असाधारणे । उत्कृष्टमासमन्तात् राति । रा । आतश्चेतिकः ॥ उदर्यते । ऋगतिप्रापणयोः । कर्मणि घञ् वा ॥ उद्गुरासमन्तात् ऋच्छति । पचाद्यच् ॥

उदारधीः । त्रि । महाबुद्धौ ॥ उदारा धीर्यस्य ॥

उदावत्सरः । पुं । संवत्सरादिपञ्चान्तर्गतवत्सरविशेषे ॥

उदावर्त्तः । पुं । रोगविशेषे । गुदग्रहे ॥ मलमूत्रवायुरोधकरोग इतिस्पष्टार्थः ॥ यत्नोर्द्ध्वंजायतेवायोरावर्त्तः सचिकित्सकैः । उदावर्त्तइतिप्रोक्तो व्याधिस्तत्रानिलः प्रभुः । अपिच । वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः । [*] क्षुत्तृष्णोच्छ्वासनिद्राणांधृत्योदावर्त्तसम्भवः ॥ जलावर्त्ते ।

उदावृत्तः । त्रि । अर्द्धनीते ।

उदासः । पुं । उत्क्षेपे ॥ उद्भावे ।

उदासीनः । त्रि । परतरे । शत्रुमित्रभिन्ने । शत्रुमित्राभ्यांपरस्मिन् राजनि ॥ विजिगीषोःशत्रुमित्रभूमितोऽव्यवहिते ॥ अव्यवहितत्वादेव नोपकारी नाप्यपकारीकेवलमूर्द्ध्वमासीनएव । इतिभरतः ॥ अनुत्थशुभाशुभे । कियद्मानयोरुभयोरप्युपेक्षके । योन कस्यचिन्मित्रादेःपक्षं भजते मध्यस्थे ॥ उदास्ते । आस० । लटःशानच् । ईदासइतिईत्वम् ॥ विषयानन्तरो राजाशत्रुर्मित्रमतः परम् । उदासीनः परतरोऽस्येयः कार्यविशारदैः ॥

उदास्थितः । पुं । द्वारपाले । प्रतीहारे ॥ अध्यक्षे । पञ्चवर्गान्तर्गतचारविशेषे । प्रव्रज्यावसिते प्रव्रज्याच्युतपतिते नष्टसन्न्यासे । प्रव्रज्यातःपतितउदास्थितः । तंलोकेषुविहितदोषंप्रज्ञाशौचयुक्तं छत्त्वर्थिमंत्रान्त्वा रहसिराजा ब्रूयात् । यस्यदुर्वृत्तंपश्यसि तत् तदानीमेवमयिवक्तव्यमिति । तच्चवृत्त्युत्पत्तिकालेस्थापयेत् । प्रचुरसस्योत्पत्तिकंभूम्यन्तरञ्च तद्वृत्त्यर्थमुपकल्पयेत् । सचान्येषामपिप्रव्रजितानां राजचारकर्मकारिणां ग्रासाच्छादनादिकंदद्यात् ॥ २ ॥ उदाङ्पूर्वात् ष्ठाधातोर्गत्यर्थाकर्मकेतिक्तः । द्यतिस्यतीतीत्वम् ॥

उदाहरणम् । न । उपोद्घाते । दृष्टान्ते । एकदेशप्रसिद्ध्याऽशेषप्रसिद्ध्यर्थं यदुदाह्रियतेतस्मिन् ॥ उदाङ्पूर्वाद्धरतेर्ल्युट् ॥

उदाहारः । पुं । उपोद्घाते । उदाहृतौ ॥ उदाहरणम् । घञ् ॥

[* सहार्थे तृतीया ।]

उदाहृतः । त्रि । उच्चारिते ॥

उदाहृतिः । स्त्री । उदाहरणे ॥ उदाङ्पूर्वात् हृञः स्त्रियांक्तिन् ॥

उदितः । त्रि । उक्ते ॥ उद्यतेस्म । वद-व्य० । क्तः । इट् । वचिस्वपीतिसम्प्रसारणम् ॥ उन्नते । उन्नते ॥ यथा । उदिते जगतीनाथे यः कुर्याद्दन्तधावनम् । सपापिष्ठःकथंब्रूते पूजयामि जनार्दनमिति ॥ वद्धे ॥ ऊर्ज्जिते ॥ उद्यतेस्म । दो अ० । क्तः । द्यतिस्यती तीत्वम् ॥

उदितोदितः । त्रि । शास्त्रज्ञे ॥

उदीची । स्त्री । उत्तरदिशि ॥ उतउत्तर मञ्चत्यर्कम् । उत्क्रान्तंदृष्टिपथमञ्चतिसूर्यंवा । उदईदित्यञ्चेरतईकारः । ऋत्विगादिनाक्विन् । उगितश्चेतिङीप् ॥

उदीचीनः । त्रि । उदग्भवे ॥ उदक् । विभाषाञ्चेरिति खः ॥

उदीच्यः । पुं । शरावत्याःपश्चिमोत्तरदेशे ॥ अथोदीच्यदेशाः । वाह्लीका वाटधानाश्चआभीराः कालतोयकाः । परन्ध्राश्चैवशूद्राश्च पह्लवाश्चात्मखण्डिकाः ॥ गान्धाराजवनाश्चैव सिन्धुसौवीरमद्रकाः । शकाद्रुह्याःपुलिन्दाश्चपारदाहारमूर्त्तिकाः ॥ रामठाः कण्ठकाराश्च केकयादेशमानिशाः । क्षत्रियोपनिवेशाश्च वैश्यशूद्रकुलानिच ॥ आत्रेयोऽथभरद्वाजःप्रस्थलाः सदशेरकाः । लम्पकास्तलगानाश्चसैनिकाःसहसाकुजैः ॥ एतेदेशाउदीच्यास्तुपुराणेमत्स्यसंज्ञके ॥ न । वालनामगन्धद्रव्ये । ह्रीबेरे ॥ त्रि । उदग्भवे ॥ उदीचिजाते ॥ उदीच्यां भवःजातःआगतोवा । द्युप्रागपागुदक्प्रतीचोयत् ॥

उदीरणम् । न । कथने । उच्चारणे ॥

उदीरितः । त्रि । उक्ते ॥ उद्दीपिते ॥ उद्घोषिते ॥ उन्नते ॥ उदीर्यतेस्म । ईर् । क्तः ॥

उदीर्णः । त्रि । उदारे । महति ॥

उदुत्तमः । त्रि । अतिशयेनोत्तमे ॥ उत उच्चै रुत्तमः ॥

उदुम्बरः । पुं । जन्तुफलवृक्षे । यज्ञाङ्गे । हेमदुग्धे । डुमरइतिभाषा । उदुम्बरोहिमोरूक्षोगुरुः पित्तकफास्रनुत् । मधुरस्तुवरोवर्ण्यो व्रणशोधनरोपणः ॥ देहल्याम् । गृहावग्रहण्याम् ॥ षण्डके । नपुंसके ॥ कुष्ठविशेषे ॥ न । ताम्रे ॥ यथा । यदुदुम्बरवर्णानां घटीनां मण्डलं महत् । पीतं नगमयेत्स्वर्गं किन्तत् क्रतुगतं नयेदित्ययंश्लोकः सौत्रामणीयागे-सुरापानस्य दुष्टत्व मुद्भावयति । तत्र

महाभाष्यकारआह । प्रमत्तगीतए ष: तत्रभवतोयस्त्वप्रमत्तगीतस्तत् प्रमाणमिति । प्रमत्तगीतइति । प्रमादेनविप्रतिपन्नत्वेनगीत इत्यर्थइतिकैयटः । विप्रतिपन्नत्वेन वेदविषयविप्रतिपत्त्याश्रयत्वेन तत्त्वंस्वस्मिन्नारोप्यदैन्यनाशाय पूज्यस्यापिभगवतईश्वरस्यतथोक्तिरिति सन प्रमाणमितिभाव इतिविवरणकारः ॥ उं- ग्रम्भंवृणोति । वृञ्० । संज्ञायांभृतवृजीतिखच् । अरुर्द्विषदितिमुम् । उत्कृष्टम् उम्बरम् । प्रादिसमासः । उल्लङ्घितमम्बरमनेन ॥ उदतिशये- नाम्बते वा । अविशब्दे । बाहुलकादरन् । पृषोदरादिः ॥ अशीतिरक्तिकापरिमिते । कर्षे ॥

उदुम्बरदला । स्त्री । दन्तीवृक्षे ॥ उदुम्बरस्येवदलान्यस्याः ॥

उदुम्बरपर्णी । स्त्री । दन्तिकौषधौ ॥ उदुम्बरस्येवपर्णान्यस्याः । पाककर्णेति ङीष् ॥

उदूखलम् । न । तण्डुलादिकण्डनार्थं काष्ठादिनिर्मिते कण्डनसाधने । उलूखले । ऊखल इतिभाषा ॥ गुग्गुले । गुग्गुलौ ॥ ऊर्द्ध्वंखततखञ्च । ऊर्द्ध्वं खंलाति । ला आ० । आतोनुपेतिकः । पृषोदरादिः ॥

उदूढः । त्रि । ऊढे ॥ स्थूले ॥ उदुह्यते स्म । वह० क्तः ॥

उद्गतः । त्रि । उत्पन्ने । उदिते ॥ ऊर्द्ध्वगते ॥ उद्वान्ते । छर्दितवस्तुनि ॥ निसृते ॥ यथा । वदनोद्गतावाणी ॥ उद्गम्यते स्म । गम्लृ० । क्तः ॥

उद्गता । स्त्री । विषमवृत्तविशेषे ॥ सजसादिमेसलघुकेच नसजगुरुकेष्वथोद्गता । अंघ्रिगतभनजलागयुताःस जसाजगौचरणमेकतः पठेत् । इति तल्लक्षणम् ॥

उद्गमः । पुं । आविर्भावे । उदये ॥ ऊर्द्ध्वगमने ॥ उद्गमनम् । गम्लृ० । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥

उद्गमनम् । न । ऊर्द्ध्वगमने ॥ ल्युट् ॥

उद्गमनीयम् । न । प्रक्षालितांशुकद्वये ॥ उद्गम्यते अभिलष्यते । गम्लृ० । अनीयर् । द्वयइत्यविवक्षितम् । गृहीतवन्युद्गमनीयवस्त्रे । इतिदर्शनात् ॥ त्रि । ऊर्द्ध्वगम्ये ॥

उद्गरणम् । न । उद्गारे ॥

उद्गाढम् । न । अतिशये । अत्यर्थे ॥ त्रि । अतिशययुक्ते ॥ उद्गाह्यतेस्म । गाहूवि० । क्तः ॥ क्रियाविशेषणत्वे क्लीवत्वम् । द्रव्यविशेषणत्वेतुवाच्यलिङ्गता ॥

उद्गाता । पुं । सामवेदज्ञर्त्विजि ॥ उद्गा

यतिसाम। गैशब्दे। तृनतृचौशंसिक्षदादिभ्यः संज्ञायाञ्चानिटौ॥

उद्गारः। पुं। उद्वमने॥ ढकार इतिभाषाप्रसिद्धनागवायोः कर्मणि। कण्ठगर्जने॥ उद्गरणम्। गृशब्दे। उन्न्योर्ग्रइति घञ्॥

उद्गारशुद्धिः। पुं। सधूमाम्लोद्गाराभावे॥

उद्गारशोधनः। पुं। कृष्णजीरके॥

उद्गिरणम्। न। ऊर्द्ध्वमुखस्य वायोः-क्रियायाम्। छर्द्दौ॥ टुवमउद्गिरणे इतिधातुपाठेन निपातनात् गिरतेः कृतइत्त्वम्। अन्यथागुणेसति उद्गरणमिति स्यात्। यद्यप्यर्थनिर्देश-आधुनिकः तथासति पृषोदरादित्त्वंबोध्यम्॥

उद्गीतम्। त्रि। उच्चैर्गीते॥

उद्गीतिः। स्त्री। उच्चैर्गाने॥ आर्याप्रभेदे॥ यथा। नारायणस्यसन्तत मुद्गीतिः संस्मृतिर्भक्त्या। अर्चायां मासक्ति दुस्तरसंसारसागरे तरणिरिति॥ उदुच्चैर्गीतिः गानम्॥

उद्गीथः। पुं। प्रणवे॥ साम्नामुद्गाने॥ सामविशेषे॥ पाञ्चभक्तिकस्य साम्नो द्वितीयायां तृतीयायां वा भक्तौ॥ उद्गीयतेसौ। गश्चोदीति थक्॥

उद्गीर्णः। त्रि। उद्वमिते॥ भक्षितस्यापकर्षणे॥

उद्गूर्णः। त्रि। उद्यते। उत्तोलिते। उत्तोल्यधृतेवस्त्रादौ। उद्गूर्यतेस्म। गूरीउद्यमे। क्तः॥

उद्ग्रन्थः। त्रि। उत्तुङ्गे॥

उद्ग्रहणम्। न। उद्ग्राहे। ऊर्द्धग्रहणे॥ उपसंहरणे॥ उत्ऊर्द्धग्रहणम्॥

उद्ग्राहः। पुं। वादप्रभेदे। विद्याविचारे॥ उद्ग्रहणे। ऊर्द्धीकृत्यकस्यचिद्ग्रहणे॥ उद्ग्रहणम्। ग्रहउपादाने। उदिग्रहइति घञ्॥

उद्ग्राहमल्लः। त्रि। वादसमर्थे॥ उद्ग्राहेमल्लइव॥

उद्ग्राहिणी। स्त्री। पाशाख्यरज्जौ। फाँसा इतिभाषा॥

उद्ग्राहितः। त्रि। उपन्यस्ते। बद्धे॥ उद्दीर्णे॥ ग्राहिते॥ प्रख्यायिते॥

उद्घः। पुं। हस्तपुटे॥ वह्नौ॥ श्लाघायाम्॥ उद्धन्यते उत्कृष्टोज्ञायते। हन्तेःकर्मण्यप् टिलोपाद्यत्वञ्चनिपातनात्॥ देहजानिले॥ त्रि। प्रकाण्डे। प्रशस्ते॥ उद्घन्तिनीचताम्। उत्पूर्वाद्धन्तेः सङ्घोद्घौ गणप्रशंसयोरितिनिपातितः। मनुष्योद्घः। अस्यरूढिशब्दत्वात् प्रशंसावचनैश्चेतिसमासः। प्रशस्तोमनुष्यइत्यर्थः॥

उद्घनः। पुं। काष्ठतक्षणसाधने। अधः

काष्ठे ॥ निधायतक्ष्यते यत्रकाष्ठे काष्ठंसउद्घनः । ऊर्द्धंहन्यतेऽस्मिन् । उद्घनोऽत्याधानमिति अधिकरणेऽप्॥

उद्घर्षः । पुं । घर्षणे । झामकेन गात्रादिघर्षणे ॥

उद्घर्षणम् । न । झामकेन पादादिगात्रघर्षणे ॥ इष्टकयोद्घर्षणे गुणाः । कण्डुकोठनाशित्वम् त्वग्गताग्नितेजस्त्वम् । शिरामुखकारकत्वञ्च ॥

उद्घसम् । न । मांसे ॥ इतिहारावली॥

उद्घाटः । पुं । उद्घाटने ॥ गृहविशेषे । चौकीकाघर इतिभाषा ॥

उद्घाटकम् । न । पुं । कूपाज्जलोद्धृत्यर्थेयन्त्रविशेषे । घटीयन्त्रे । अरहट इतिभाषा । घिर्नी इतिच ॥

उद्घाटनम् । न । कूपाज्जलोत्तोलनार्थे यन्त्रे। घटीयन्त्रे । अरहटरहंटइतिच भाषा । कूपात्सलिलमुद्घाट्यतेऽनेनवा । घटसङ्घाते । णयन्तः । ल्युट्॥

उद्घाटितः । त्रि । अपावृते । कृतोद्घाटने । उघाडा खुलाइति भाषा ॥ गृहेऽनुद्घाटितद्वारिनाहूतः प्रविशन्नरः । वारितायेप्रवक्तापिपश्चाद्दमशनंत्यजेदितितन्त्रशास्त्रम् ॥ घटेः क्तः । इट् ॥

उद्घाटिताङ्गः । पुं । प्राज्ञे ॥ त्रि । अनावृतगात्रे ॥ उद्घाटितानिअङ्गान्यस्य॥

उद्घातः । पुं । पादस्खलने ॥ समुपक्रमे ॥ पवनाभ्यासयोगायकुम्भकादित्रये । पवनाभ्यासयोगस्यकालभेदे ॥ नाभिमूलात् प्रेरितस्यवायोर्विविच्यमानस्यशिरस्यभिहननम् मुद्घात इत्युच्यतेसेयंकालपरीक्षा । प्राणेन प्रेर्य्यमाणेनअपानःपीड्यतेयदि । गत्वाचोर्द्धंनिवर्त्तेत एतदुद्घातलक्षणम् । उत्तुङ्गे ॥ मुद्गरे ॥ आरम्भे ॥ शास्त्रे ॥ ग्रन्थपरिच्छेदे ॥ उत्हननम् । हन० । घञ् । हनस्तोचिण्णलोः ॥ पाषाणादिभिःप्रतिघाते । ठोकर आतखलीत्यादिभाषाप्रसिद्धे ॥ यथा । ययावनुद्घातसुखेन मार्गमितिरघुः ॥

उद्घुष्टः । त्रि । उद्घोषिते । नादिते ॥

उद्घोषः । पुं । उद्घोषणे ॥ घुषघुष्टौ । घञ् ॥

उद्घोषितः । त्रि । उद्घुष्टे ।

उद्दंशः । पुं । उत्कुणे । मत्कुणे । कोणकुणे । किटिभे ॥ उत्कृष्टोदंशः ।

उद्दण्डपालः । पुं । सर्पविशेषे ॥ मत्स्यप्रभेदे ॥

उद्दन्तुरः । त्रि । उत्तुङ्गे ॥ कराले ॥ उत्कटदन्ते ॥

उद्दानम् । न । बन्धने ॥ उत्पूर्वात्द्यतेर्भावेल्युट् ॥

उद्दान्तः । वि । उत्कृष्टदमिते ॥

उद्दामः । पुं । प्रचेतसि । वरुणे ॥ पञ्चचत्वारिंशदक्षरायां वृत्तौ ॥ त्रि । अप्रतिबद्धे । बन्धरहिते ॥ स्वतन्त्रे ॥ महति ॥ यथा । उद्दामदन्तुरविधुन्तुददन्तघातैः । इतिप्रव्रज्या ॥ गम्भीरे ॥

उद्दामगीः । वि । प्रगल्भवाचि ॥

उद्दालः । पुं । बहुवारके । लसोडा इतिभाषा ॥ वनकोद्रवे ॥ उद्दालस्तु भवेदुष्णोग्राही वातकरो भृशम् ॥ उद्दालयति । दलविशरणे । णिजन्तादच् ॥

उद्दालकः । पुं । वेदादिषुप्रसिद्धे ऋषिविशेषे । श्वेतकेतोः पितरि ॥ बहुवारकवृक्षे ॥ स्वार्थे कः ॥

उद्दालकपुष्पभञ्जिका । स्त्री । क्रीडाविशेषे ॥ यथा । विधिविष्णुमखाम रोदयस्थितिनाशेषु शिवोप्यनीश्वरः । जगदम्बतवत्वयङ्क्रमः खलमुद्दालकपुष्पभञ्जिकेति ॥ उद्दालकस्य श्लेष्मातकस्य पुष्पाणिभज्यन्तेयस्यांक्रीडायां सा । संज्ञायामितिण्वुल् ॥ नित्यंक्रीडाजीविकयोरिति षष्ठीसमासः ॥

उद्दिष्टः । त्रि । उपदिष्टे ॥

उद्दीपकः । त्रि । उद्दीपनकर्त्तरि ॥

उद्दीपनम् । न । प्रकाशने ॥ विभावविशेषे ॥

उद्दीपितः । त्रि । प्ररोचिते ॥ व्यक्ते ॥

उद्दीप्तम् । वि । अतिप्रकाशिते ॥ उद्दीप्यतेस्म । दीपीदीप्तौ । क्तः ॥

उद्देशः । पुं । अनुसन्धाने । अन्वेषणे ॥ सोपपत्तिकस्वरूपसङ्क्षेपे ॥ कीर्त्तने ॥ यथा । नवने नन्दनोद्देशे नचैत्ररथसंश्रये । इतिरामायणप्रयोगः ॥ उद्दिश्यते । दिशअतिसर्जने । हलश्चेतिघञ् ॥

उद्देशकः । त्रि । उद्देशकर्त्तरि ॥ उदाहरणे ॥

उद्देशतः । अ । एकदेशेन ॥ सार्वविभक्तिकस्तसिल् ॥

उद्देश्यः । त्रि । उद्दिष्टव्ये । उद्देशनीये । प्रयोजने ॥ यमुद्दिश्यविधेयस्यप्रवृत्तिर्भवति ॥

उद्देहिका । स्त्री । कीटविशेषे । उपजिह्विकायाम् ॥

उद्द्योतः । पुं । प्रकाशे ॥ उद्द्योतनम् । द्युत० । घञ् ॥

उद्द्रावः । पुं । पलायने । सन्द्रावे ॥ उद्द्रवणम् । द्रुगतौ । उदिश्रयतियौतिपूद्रुवइति घञ् ॥

उद्धतः । पुं । राजमल्ले ॥ त्रि । चञ्चले । वाक्पाणिपादचापलवति । अविनी

ते । अशान्ते ॥ प्रगल्भे ॥ आहते ॥

उद्धतमनस्कत्वम् । न । अभिमाने । गर्वे ॥

उद्धतिः । स्त्री । उन्नतौ ॥

उद्धरणम् । न । उद्धारे । मुक्तौ ॥ वान्तान्ने ॥ उन्मूलने ॥ ऋणशुद्धौ ॥ उन्नये ॥ उद्ध्रियते । उद्धरते ल्युट् भावे वा ॥

उद्धर्षः । पुं । उत्सवे । उद्धर्षयति । हृषु अलीके णिजन्तः । उन्नतो हर्षो येति वा । घञ् ॥

उद्धर्षणम् । न । रोमाञ्चे ।

उद्धवः । पुं । कृष्णमातुले । कृष्णशिष्ये । वृष्णीनां सम्मतो मन्त्री कृष्णस्य दयितः सखा । शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तम इति श्रीविष्णुभागवतम् ॥ उत्सवे । महे ॥ क्रतुपावके । यज्ञाग्नौ ॥ उद्धुनोति दुःखम् । धूञ् कम्पने पचाद्यच् ॥

उद्धानम् । न । चुल्ल्याम् ॥ उद्धीयतेऽत्र । डुधाञ्० । ल्युट् ॥ त्रि । उन्नते । वमिते ॥

उद्धारः । पुं । उद्धृतौ । मुक्तौ ॥ यथा । पण्डितोऽपि हि मूर्खोऽसौ शक्तियुक्तोऽप्यशक्तिकः । यः संसारान्नचात्मानं समुत्तारयितुं क्षम इति वह्निपुराणम् ॥ ऋणे ॥ परहस्तगतद्रव्यस्य पुनरादाने ॥ उद्ध्रियते । हृञ्० । धृञ्० वा ।

कर्मणि घञ् ॥

उद्धारणम् । न । उद्धारकरणे ॥

उद्धुरः । त्रि । निर्भरः । दृढे ॥ ऋक्पूरित्यादिना समासान्तः ॥

उद्धूतः । त्रि । अतिशयिते ॥ उत्थापिते ॥

उद्धूननम् । न । ऊर्द्ध्वप्रक्षेपणे ॥

उद्धूलनम् । न । व्यञ्जनोपकरणभूतचूर्णे ॥ यथा । एलालवङ्गकर्पूरकस्तूरीमरिचजम्बाम् । चूर्णस्योद्धूलनं देयं भोज्ये चौरेषु सम्भवे ॥ व्यञ्जनेषु च सर्वेषु शाकजेष्वन्नजेषु च । मांसमत्स्यभवेष्वेवं प्रलेहलतनादिषु ॥ आदावेव पचेत्स्नेहे ततो हिङ्गूदकं क्षिपेत् । वेसवारं सलवणं क्षिप्वा तत्पिशितं पचेत् ॥ अर्द्धस्विन्ने क्षिपेत्तक्रमथवा दाडिमीरसम् । सिद्धपाके च दातव्यं चूर्णमुद्धूलनस्य तदिति ॥

उद्धूषणम् । न । रोमाञ्चे ॥ इति हलायुधः ॥

उद्धृतः । त्रि । उत्क्षिप्ते ॥ परिभुक्तोज्झिते ॥ कृतोद्धरणे । समुद्धृते । उठाया इति भाषा । पृथक्कृते ॥ उच्छेदिते ॥ उद्ध्रियतेस्म । हृञ्० धृञ् वा । क्तः ॥

उद्धृतपाणिः । त्रि । उत्तरीयाद्बहिष्कृतदक्षिणबाहौ ॥ उद्धृतः पाणिर्येन ॥

उद्धृतिः । स्त्री । उद्धारे ॥ धृञ् क्तिन् ॥

उद्ध्मानम् । न । चुल्लिमात्रे । चूल्हा भट्ठी इतिभाषा ॥ उत् ध्मायतेऽस्मिन्न । ध्माशब्दाग्निसंयोगयोः । ल्युट् ॥

उद्ध्यः । पुं । नदे ॥ उज्झत्युदकम् । उज्झ उत्सर्गे । भिद्योद्ध्यौनदे इति कर्त्तरि क्यप् उज्झेर्धत्वञ्चनिपात्यते ॥

उद्बन्धनम् । न । ऊर्द्ध्वबन्धने । गलेमेरस्सीदेकरल्लटकमर्ना फांसी इतिभाषा ॥

उद्बुद्धः । त्रि । विकसिते ॥ इतिहलायुधः ॥

उद्बोधः । पुं । किञ्चिद्ज्ञाने ॥

उद्भटः । पुं । कच्छपे ॥ शूर्पे । प्रस्फोटने । सूप इतिभाषा ॥ ग्रन्थादह्निर्भूतेश्लोके ॥ त्रि । श्रेष्ठाश्रये । महाशये । महात्मनि ॥ प्रवरे ॥

उद्भवः । पुं । जन्मनि । उत्पत्तौ ॥ उत्कर्षेभगवद्विभूतिशब्दिते ॥ उद्भवन्म् । उद्भवत्यस्मादितिवा । भू० । ऋदोरप् ॥ हरौ ॥ प्रपञ्चंप्रत्युपादानकारणत्वात् । उन्नतोभवात् संसाराद्वा । उत्कृष्टंजन्मस्वेच्छयाभजते इति वा ॥

उद्भावनम् । न । कल्पने ॥

उद्भावितः । त्रि । उत्थापिते ॥

उद्भासितः । त्रि । प्रकाशिते ॥

उद्भिज्जः । त्रि । उद्भिद्यजाति । बीजकाण्डप्ररोहिस्थावरमात्रे । भूमिमुद्भिद्यजातेतृणवृक्षादौ ॥ यथा । उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिण इतिमनुः ॥ उद्भेदनमुद्भित् । सम्पदादित्वात्किप् । उद्भिदोजातम् । पञ्चम्यामजातावितिडः ॥

उद्भिद् । पुं । यागविशेषस्यनाम्नि ॥ उद्भिद्यते पशुफलमनेन यागेनेतिनिरुक्तः ॥ त्रि । उद्भिज्जे ॥ तत्पञ्चविधम् । तृणवृक्षगुल्मलतावल्लीभेदात् ॥ भुवमुद्भिनत्ति । भिदिर्वि० । इगुपधेतिकः ॥

उद्भूतम् । त्रि । उत्पन्ने । जाते ॥ उद्भवतिस्म । भू० । क्तः ॥ प्रत्यक्षयोग्ये ॥

उद्भिदम् । त्रि । तरुगुल्मादौ । उद्भिज्जे ॥ न । पांशुलवणे ॥ उद्भिनत्ति । भिदिर्० । इगुपधेतिकः ॥

उद्भूतरूपम् । न । नयनगोचररूपे ॥ यथा । उद्भूतरूपंनयनस्यगोचरोद्रव्याणितद्वन्तिपृथक्त्वसंख्ये । विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ॥ क्रियांजातिंयोग्यवृत्तिंसमवायञ्चतादृशम् । गृह्णातिचक्षुःसम्बन्धादालोकोद्भूतरूपयोरितिकारिकावली ॥

उद्भेदः । पुं । रोमाञ्चे ॥ उद्भिद्यतेऽ

ख्यिनषा। अकर्त्तरि चेतिघञ्॥ स्फुरणे॥

उद्भ्रमः। पुं। उद्वेजने। उद्वेगे॥ उद्भ्रमणम्। भ्रमुअनवस्थाने। घञ्। नोदात्तोपदेशेति न वृद्धिः॥

उद्भ्रान्तः। त्रि। भ्रमान्विते। भ्रान्तिमापन्ने॥ न। बाहुमुद्यम्य मण्डलाकारेणखड्गभ्रामणे॥

उद्यतः। त्रि। प्रवृत्ते॥ उद्गूर्णे॥ ऊर्द्धीकृते॥ पुं। ग्रन्थपरिच्छेदे॥ उद्यम्यते स्म। यमउप०। क्तः॥

उद्यमः। पुं। उद्योगे। गुरणे॥ उद्यमनम्। यमउपरमे। घञ्। संज्ञापूर्वकत्वाद्वृद्ध्यभावः। अतउद्यमइतिनिर्देशाद्वा॥

उद्यमनम्। न। उत्क्षेपणे॥

उद्यमितः। त्रि। प्रेरिते॥

उद्यानम्। न। निःसरणे॥ प्रयोजने॥ आक्रीडे। फलप्रधानेराज्ञः सर्वोपभोगयोग्यवने॥ उद्गमे॥ उद्यान्त्यनेनअस्मिन्वा। या प्रापणे। करणेल्युट्॥

उद्यानपालः। पुं। माली इतिख्याते आक्रीडरक्षके॥ उद्यानाध्यक्षे॥

उद्युक्तः। त्रि। उद्यमयुक्ते। उद्योगविशिष्टे। उद्योगिनि॥

उद्योगः। उद्यमे। यत्ने। चेष्टायाम्॥ यथा। उद्द्योगादनिवृत्तस्य सुसहायस्य धीमतः। छायेवानुगतातस्य नित्यंश्रीः सहचारिणीति॥

उद्योगी। त्रि। उद्योगयुक्ते। उद्यमिनि॥ यथा। उद्योगिनंपुरुषसिंहमुपैति लक्ष्मीर्दैवेनदेयमितिकापुरुषावदन्ति। दैवंनिहत्यकुरुपौरुषमात्मशक्त्यायत्नेकृतेयदिनसिद्ध्यतिकोऽत्रदोषइति॥

उद्योजकः। त्रि। प्रवर्त्तके॥

उद्रः। पुं। जलजन्तुविशेषे। अम्बुविडाल ओदविडाल इतिचभाषा॥ उनत्ति।उन्दी०। स्फायीतिरक्॥

उद्रङ्कः। पुं। }
उद्रङ्गः। पुं। } प्रतिमार्गके। नङ्के॥

उद्रथः। पुं। रतकीले॥ ताम्रचूडखगे॥

उद्रिक्तः। त्रि। स्पष्टे। स्फुटे॥ उद्रिच्यते स्म। रिच०। क्तः॥

उद्रेकः। पुं। अतिशये। वृद्धौ॥ उपक्रमे॥

उद्रेका। स्त्री। महानिम्बे। डेक बकायन इतिचभाषा॥

उद्वत्सरः। पुं। वत्सरे॥

उद्वमनम्। न। उद्गिरणे॥

उद्वर्त्तः। त्रि। अतिरिक्ते। उबरा इति भाषा॥ यथा। उद्वर्त्तोऽस्मिन्ग्रन्थः समधिकफलमाचष्टे॥

उद्वर्त्तनम्। न। उत्पतने। ऊर्द्ध्वगतौ॥ विलेपने॥ घर्षणे॥ उत्सादने। शरीरनिर्म्मलीकरणग-द्रव्यादौ। उबटना इतिभाषा॥ उद्वर्त्त्यतेऽनेन। इतुव॰णयन्तः। ल्युट्॥

उद्वर्त्तितः। त्रि। उद्गामिते॥

उद्वर्द्धनम्। न। अन्तर्हासे॥

उद्वर्हितः। त्रि। उद्धृते॥

उद्वसनः। त्रि। वासोरहिते॥

उद्वहः। पुं। पुत्रे॥ सप्तवाय्वन्तर्गतवायुविशेषे॥ सतुप्रवहवायोरूर्द्धस्थितः॥ इतिशिरोमणिः॥ उत्ऊर्द्धेन वहति। वहप्रापणे। पचाद्यच्॥ नायके॥

उद्वहा। स्त्री। कन्यायाम्। पुत्र्याम्॥

उद्वान्तः। पुं। निर्मदेगजे॥ उद्गतंवान्तमन्तर्मदं वमनमस्मात्॥ त्रि। उद्वमिते। उद्गते। वमित्वात्यक्तेऽन्नादौ॥ उद्वम्यतेस्म। टुवम् उ॰। क्तः॥

उद्वासनम्। न। वधे। मारणे। वासच्छेदने। चुरादिः। भावे ल्युट्॥

उद्वाहः। पुं। विवाहे। दारपरिग्रहे। भार्य्यात्वसम्पादकग्रहणे। परिणये॥ उत्कृष्टंवहनम्। वह॰। घञ्॥

उद्वाहनम्। न। विवाहे। रणरणे॥ द्विगुणाकृते। द्विसीत्ये। द्विवारकृष्टक्षेत्रे॥

उद्वाहनी। स्त्री। रज्जौ। वराटके। रस्सीइतिभाषा॥

उद्वाहितः। पुं। परिणीते॥

उद्वाहिता। स्त्री। परिणीतायाम्॥ कलिकाले आगमोक्तान्यमार्गेण विवाहितागर्हिता भवति। यथा। उद्वाहितापियानारीजानीयात्सातुगर्हितेत्यागमसिद्धान्तः॥

उद्वाहुः। त्रि। ऊर्द्धवाहुपुरुषे। उद्धतहस्ते॥ उद्वाहुरिववामनः॥

उद्विग्नः। त्रि। क्षुभिते। उद्वेगयुक्ते। दुःखपरिहाराक्षमतया व्याकुलचित्ते॥ भीते। ओविजीभयचलनयोः। क्तः। ओदितश्चेति तस्य नः। श्वीदितइतिनेट्॥

उद्विग्नमनाः। त्रि। कम्पितहृदये॥

उद्विवर्हणम्। न। उद्धरणे॥

उद्वृत्तः। त्रि। उत्क्षिप्ते। उच्छलिते॥ परिभुक्तोज्झिते॥ दुर्वृत्ते॥

उद्वेगः। पुं। उद्वेजने। उद्भ्रमे। एकाकीविजने कथंसर्वपरिग्रहशून्योजीविष्यामीत्येवंविधे व्याकुलतारूपे चित्तवृत्तिविशेषे॥ विरहजन्यदुःखे॥ उद्भ्रमने॥ भये॥ न। गुवाकफले। सुपारी इतिभाषा॥ उद्गतोवेगोऽस्मात्॥ त्रि। स्तिमिते॥ शीघ्रगामिनि॥ उद्वाहौ॥ उद्वेजनम्।

ष्ठोविजी । द्म् ॥
उद्वेजनम् । न । उद्वेगे ॥
उद्वेजनीयः । त्रि । उद्वेगकरे ॥
उद्वेलः । त्रि । वेलामुल्लङ्घ्यवर्त्तमाने सिन्धौ ॥ उद्गता वेलाम् । अत्यादय इतिसमासः ॥
उद्वेष्टनम् । न । हस्तपादयोर्वृतौ । वाँजटा सरली इतिभाषा ॥ उन्मुक्तवन्धविश्लेषे ॥
उद्वोढा । पुं । परिणेतरि ॥ कलिकाले आगमोक्तान्यमार्गेण विवाहंकुर्वाणोगर्हितोभवति । यथा । उद्वोढापि भवेत् पापी संसर्गात् कुलनायिके । वेश्यागमनजंपापं तस्यपुंसोदिनेदिने ॥ इतिमहानिर्वाणतन्त्रम् ॥
उनः । त्रि । निकृष्टे ॥
उननुन्नः । त्रि । निकृष्टेन विद्धे ॥
उन्दः । पुं । क्लेदने । आर्द्रीभावे ॥
उन्दनम् । न । क्लेदने ॥
उन्दरुः । पुं । मूषिके ॥ इतिद्विरूपकोषः ॥
उन्दुरः । पुं । मूषिके ॥
उन्दुरुः । पुं । आखौ । मूषिके ॥ उनत्ति । उन्दी० । बाहुलकादुरुः ॥
उन्दुरुकर्णी । स्त्री । आखुकर्णीलतायाम् ॥
उन्दूरुः । पुं । मूषके ॥ इतिहेमचन्द्रः ॥
उन्नः । त्रि । क्लिन्ने ॥ दयापरे ॥ उनत्ति स्म । उन्दीक्ले० । कर्त्तरिक्तः । नुदविदेतिपक्षे नत्वम् ॥
उन्नतः । त्रि । उच्चे । प्रांशौ ॥ उन्नमतिस्म । णमप्रह्वत्वे । गत्यर्थेतिक्तः ॥ महति ॥ उन्नतानामनुगमने खलु सम्पदोऽग्रतःस्थाः ॥
उन्नतनाभिः । त्रि । वृहन्नाभौ ॥
उन्नतभूतलम् । न । माले ॥ उन्नतञ्च ततभूतलञ्च ॥ क्षेत्रमारुह्यमालम् ॥
उन्नताननम् । त्रि । उच्चनीचस्थानादौ । वन्धुरे ॥ उन्नतञ्चतदाननञ्च ॥
उन्नतिः । स्त्री । उदये ॥ समृद्धौ ॥ गरुडभार्यायाम् ॥
उन्नतीशः । पुं । गरुडे । वैनतेये ॥ समृद्धे ॥
उन्नद्धः । त्रि । उत्कटे ॥ उद्वद्धे ॥
उन्नमितः । त्रि । उत्तोलिते ॥ ऊर्द्ध्वीकृते ॥
उन्नयः । पुं । कूपादेर्जलादेरूर्द्ध्वनयने ॥ उन्नयनम् । णीञ् ० । क्वचिदपवादविषयेप्युत्सर्गोभिनिविशते इत्यरेच् ॥
उन्नयनम् । न । वितर्के ॥ उन्नये ॥ त्रि । शोभके ॥ णीञ्० । ल्युट् ॥
उन्नसः । त्रि । उन्नतनासिके ॥ उन्नतानासिकाऽस्य । उपसर्गाच्चेतिनसादेशः ॥
उन्नादः । पुं । महच्छब्दे ॥

उन्नायः । पुं । ऊर्द्धनयने । उन्नये । उठाना इति भाषा ॥ उन्नयनम् । णीञ् प्रापणे । अवोदोर्नि इति घञ् ।

उन्नाहम् । न । काञ्जिके ॥

उन्निद्रः । त्रि । उत्फुल्ले । विकसिते । प्रबुद्धे ॥ शयनादुद्बुद्धे ॥

उन्मज्जकः । पुं । तपोविशेषाल्लब्धसंज्ञे तापसविशेषे ॥ कण्ठदघ्नजले स्थित्वा तपः कुर्वन्प्रवर्त्तते । उन्मज्जकः स विज्ञेयस्तापसो लोकपूजितः ॥

उन्मत्तः । पुं । धत्तूरे । धूस्तूरे ॥ मुचुकुन्दवृक्षे ॥ त्रि । उन्मादवति । ग्रहवाताद्यावेशवति ॥ उन्माद्यति स्म । मदी हर्षे । । गत्यर्थेति क्तः । नध्याख्येति न नत्वम् ॥ उन्मत्तयति वा । तत्करोतीति णिच् । पचाद्यच् ॥

उन्मत्तकः । पुं । तापसान्तरे ॥ उन्नतो मत्तो मत्तत्वं यस्य सः । स्वार्थे कः ॥

उन्मथनम् । त्रि । व्यथके ॥ बाहुलकात्कर्त्तरि ल्युट् ॥

उन्मथितः । त्रि । उद्घर्षिते ॥

उन्मदः । त्रि । उन्मादविशिष्टे । उन्मादिष्णौ ॥ उन्नतो मदो हर्षोऽस्य ॥ मदकरे । उन्मदयति । पचाद्यच् ॥

उन्मदिष्णुः । त्रि । उन्मादशीले । उन्मदे ॥ उन्मदनशीलः । मदी हर्षे । अलङ्कृञीतीष्णुच् ॥

उन्मनाः । त्रि । उत्के । उत्कण्ठितमनसि ॥ उन्नतं मनोऽस्य ॥

उन्मनी । स्त्री । योगिनोवस्थाविशेषे । यथाहुः पूज्यपादाः । उन्मन्यवस्थाधिगमाय विद्वन्नुपायमेकं तव निर्दिशामः । पश्यन्नुदासीनतया प्रपञ्चं सङ्कल्पमुन्मूलय सावधान इति ॥

उन्मन्थः । पुं । वधे । मारणे ॥

उन्माथः । पुं । कूटयन्त्रे । मृगादिवधोपयुक्ते यन्त्रे । आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत्सन्धानयन्त्रं निवेश्यते तस्मिन् ॥ उन्मथ्यतेऽनेन । मथ विलोडने । हलश्चेति घञ् ॥ मारणे ॥ घातके ॥ उन्मथनम् । मथ हिंसायाम् । घञ् ॥

उन्मादः । पुं । चित्तविभ्रमे ॥ भूताद्यावेशाच्चित्तानवस्थितौ ॥ विरहिणः कस्मिंश्चिदवस्थाविशेषे ॥ वातिकरोगविशेषे । मतिभ्रंशे ॥ मदयन्त्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः । मानसोयमतो व्याधिरुन्माद इति कीर्त्तितः ॥ उन्मदनम् । मदी हर्षे । घञ् ॥

उन्मादकः । त्रि । उन्मत्तताजनके धत्तूरादौ ॥

उन्मादनः । पुं । स्मरस्य पञ्चबाणान्तर्गतबाणविशेषे ॥

उन्मादवान् । त्रि । उन्मत्ते । वातकृतचित्तविभ्रमे ॥ उन्मादोऽस्यास्ति । मतुप् ॥

उन्मादी । त्रि । उन्मादिष्णौ ॥ उत्पूर्वान्मदेः शमित्यष्टाभ्योघिनुण् ॥

उन्मानम् । न । ऊर्द्ध्वमाने ॥ द्रव्यान्तरपरिच्छिन्नगुरुत्वेन पलादिशब्दवाच्येन पाषाणादिना तुलादावारोपितेन येनसुवर्णादेर्गुरुत्वमुन्मीयते-तदूर्द्ध्वारोपणादूर्द्ध्वमानमितिशब्देन विवक्षितं तदुन्मानमिति ऊर्द्ध्वमानं किलोन्मानमितिवार्त्तिकार्थे दीक्षितोक्तः ॥ वैद्यकपरिभाषयातु द्रोणपरिमाणे॥ सामान्यतो लोकव्यवहारेणतु परिमाणमात्रे ॥

उन्मिषितः । त्रि । प्रफुल्ले । विकसिते ।

उन्मीलनम् । न । उन्मेषे । विकासने ॥ उन्मीलनंचित्तकुतूहलानाम् । मीलनिमेषणे ल्युट् ॥

उन्मीलितः । त्रि । प्रस्फुटिते । विकसिते ।

उन्मुखः । त्रि । उत्पश्ये । ऊर्द्ध्वास्ये ॥ उदूर्द्ध्वंमुखंयस्य ॥ उद्युक्ते ॥

उन्मुद्रः । त्रि । प्रफुल्ले । विकसिते ॥

उन्मूलनम् । न । उत्पाटने ॥ उन्मूलनं पापविनिन्दकानाम् ॥

उन्मूलितः । त्रि । उत्पाटिते । कृतोत्पाटने ॥

उन्मेषः । पुं । चक्षुषोरुन्मीलने ॥ उन्मिषति । मिषस्पर्द्धायाम् । इगुपधेति कः ॥

उप । अ । अधिकार्थे ॥ हीनार्थे॥ आसन्ने । सामीप्ये ॥ सादृश्ये॥ प्रतियत्ने। गुणाधाने ॥ व्याप्तौ ॥ पूजायाम् ॥ शक्तौ ॥ आरम्भे ॥ दाने ॥ दोषाख्याने ॥ आश्चर्यकरणे ॥ अत्यये ॥ निदर्शने ॥ उद्योगे ॥

उपकण्ठम् । न । ग्रामान्ते । उपशल्ये ॥ अश्वस्यपञ्चमगतौ । आस्कन्दिते ॥ कण्ठासन्ने ॥ त्रि । निकटे । समीपे ॥ उपगतः कण्ठम् । अत्यादय इति समासः । उपगतः कण्ठःसामीप्यमस्येतिवा ॥

उपकरणम् । न । नृपादीनां छत्रचामरादौ । परिच्छदे ॥ साधनसामग्र्याम् ॥ यथा । भोजनादौ व्यञ्जनादि । पूजायां गन्धादि । रणे शस्त्रादि । मृगबन्धनादौ वागुरादि । एवमन्यदप्यूह्यम् ॥ उपक्रियते । कृ० । ल्युट् ॥

उपकर्त्ता । त्रि । प्रतिकर्त्तरि ॥ उपकारकारिणि ॥

उपकल्पितः । त्रि । समर्पिते ॥

उपकारः । पुं । उपकृतौ ॥ विकीर्णकुसुमादिषु ॥ उपकरणम् । कृञ् ।

घञ् ॥

उपकारिका । स्त्री । उपकारकर्त्र्याम् ॥ पिष्टभेदे ॥ सामान्यनृपालये । पटमण्डपादिराजसदने । उपकरोति । ण्वुल् । इत्त्वम् ॥

उपकारी । त्रि । उपकारकर्त्तरि । उपकारविशिष्टे । उपकारिणि मित्रेयो नोपकुर्य्यात्कथञ्चन । तं धिगस्तु नरं देवी भवेन्नत्तृणवद्भुवि ॥ देवीनासत्या विति संबोध्य च्यवनोक्तिः ॥ म० इनिः ॥

उपकारी । स्त्री । सामान्यसौधे । पटमण्डपादिराजसदने ॥ उपकारयति । पंचाद्यजन्तात् गौरादित्वात् ङीष् ॥

उपकार्य्यः । त्रि । उपकारयोग्ये ॥ कृञोण्यत् ॥

उपकार्य्या । स्त्री । नृपालये । सामान्यराजगृहे ॥ पटमण्डपादिराजसदने । पटभवने ॥ उपक्रियते । कर्मणि ऋहलोर्ण्यत् । टाप् ॥

उपकुञ्चिः । स्त्री । कृष्णजीरके ॥ कलाजाज्याम् ॥

उपकुञ्चिका । स्त्री । कृष्णाजीरके ॥ कलाजाज्याम् ॥ तुत्थायाम् । सूक्ष्मैलायाम् ॥ उपकुञ्चति । कुञ्चकौटिल्ये । ण्वुल् ॥

उपकुर्वाणः । पुं । सावधिब्रह्मचर्य्यवति । स्वाध्यायग्रहणार्थिनि ॥

उपकुल्या । स्त्री । वैदेह्याम् । पिप्पल्याम् ॥ उपकोलति । कुलसंस्त्यानेबन्धुषु च । अघन्यादिः ॥ त्रि । कुल्यासन्ने ॥ उपगता कुल्याम् ॥

उपकूजितम् । त्रि । नादिते । शब्दिते ॥

उपकूपः । पुं । कूपसमीपस्थजलाशये । आहावे ॥ उपगतः कूपम् ॥ न । कूपसमीपे ॥

उपकृतिः । स्त्री । उपकारे ॥ उपकरणम् । स्त्रियांक्तिन् ॥

उपकोसलः । पुं । वेदप्रसिद्धे कामलायनर्षौ ॥

उपक्रमः । पुं । उपधायाम् । राज्ञा धर्म्मार्थकामभयै रमात्यादेः परीक्षणे ॥ उपधाऽमात्यपरीक्षणमितिस्वामी । उत्कोच इतिनव्याः ॥ ज्ञात्वारम्भे । अयमस्योपायः अनेनैतत् सिद्ध्यतीति ज्ञात्वा प्रथमारम्भे ॥ यथा मानेनन्दस्य प्रथमारम्भः उपक्रमः सः । उपायपूर्वआरम्भे ॥ प्रथमारम्भे ॥ विक्रमे ॥ चिकित्सायाम् ॥ उपक्रमणम् अनेनवा । क्रमु० । भावे घञ् । उपक्रम्यते इतिकर्मणिवा घञ् । नोदात्तोपदेशस्येतिनवृद्धिः ॥

उपक्रमोपसंहारौ । पुं । तात्पर्य्यनिर्णायकषड्विधलिङ्गेषु प्रथमलिङ्गयोः ॥ प्र

करणप्रतिपाद्यस्यार्थस्य तदाद्यन्तयो रुपपादनमुपक्रमोपसंहारौ । यथा छान्दोग्ये षष्ठप्रपाठके प्रकरणप्रतिप्रा द्यस्याद्वितीयवस्तुनः एकमेवाद्विती यमित्यादौ ऐतदात्म्यमिदंसर्वमि-त्यन्तेचप्रतिपादनम् ॥ उपक्रमश्च उपसंहारश्चतौ ॥

उपक्रान्तः । त्रि । तते । विस्तृते ॥

उपक्रोशः । पुं । निन्दायाम् । परीवादे ॥ उपक्रोशनम् । क्रुशआह्वाने । भावे घञ् ॥ न । क्रोशासम्ने ॥

उपक्रोष्टा । पुं । स्त्री । गर्द्दभे ॥ त्रि । निन्दके ॥

उपक्लृप्तः । त्रि । विन्यस्ते ॥ उपभोगार्थंकृतसंस्कारे ॥ रचिते ॥

उपक्लेशः । पुं । मदादिषु ॥

उपक्वणः । पुं । वीणानिनदे ॥

उपक्वाणः । पुं । वीणायाः क्वणिते ॥ क्वणशब्दे । क्वणोवीणायाञ्चेतिपाक्षिको घञ् ॥

उपक्षेपणधर्म्मः । पुं । शूद्रस्वामिकामान्नस्य पाकार्थं ब्राह्मणगृहेसमर्पणे ॥ इतिशुद्धितत्त्वेकल्पतरुः ॥

उपगतः । त्रि । स्वीकृते ॥ आसन्ने ॥ ज्ञाते ॥ उपगम्यतेस्म । गम्लृ० । क्तः । प्राप्ते ॥

उपगतिः । स्त्री । उपाये ॥ उपगम्यतेऽनया । गम्लृ० । क्तिन् ॥

उपगमः । पुं । अन्तिकगतौ । समीपगमने ॥ अङ्गीकारे । उपगमनम् । गम्लृ० । ग्रहवृढनिश्चिगमश्चेत्यप् ॥

उपगीतिः । स्त्री । आर्याप्रभेदे । आर्यापरार्द्धसदृशं प्रथमार्द्धमपीरितंयस्याम् । उपगीतिर्यशवन्तञ्चितिनायकसोदिताकविभिः ॥ नवगोपसुन्दरीणां रासोल्लासेमुरारातिम् । अस्मारयदुपगीतिः स्वर्गकुरङ्गीदृशांगीतिम् ।

उपगूढः । त्रि । गृहीते ॥ उपगूहने ।

उपगूहनम् । न । आश्लेषे । परिरम्भे ॥ गुहू० । ल्युट् ॥

उपग्रहः । पुं । प्रग्रहे । वन्दीग्रहणादौ । वन्दीवान् वंदुवा इतिभाषा । वन्द्याम् ॥ उपयोगे ॥ अनुकूलने ॥ अनुकूलवति ॥ सर्वतोभद्रचक्रोक्तोल्कादौ ॥ उपगृह्यते । ग्रहउपादाने । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥

उपग्रहणम् । न । उपग्रहे ॥

उपग्रामम् । अ । ग्रामाधिकरणे । ग्रामेइत्यर्थे ॥ ग्रामे इति । विभक्त्यर्थेव्ययीभावः ॥

उपग्राह्यम् । न । उपायने । उपढौकने । भेट इतिभाषा । उपगृह्यते । ग्रह० । ण्यत् ॥

उपघातः । पुं । रोगे ॥ अपकारे ॥ उपहननम् । उपहन्यतेऽनेन वा भावे करणे वा हन्तेर्घञ् ॥

उपघ्नः । पुं । निकटाश्रये ॥ उपहन्यते उपहननंवा । उपघ्नआश्रयइति-साधुः ॥

उपचक्रः । पुं । चक्रवाक पक्षिणि ॥

उपचयः । पुं । उन्नतौ । वृद्धौ ॥ अरि-कर्मलाभदुश्चिक्यसंज्ञकगृहेषु । न-चेद्भवन्तितेदृष्टाः पापस्वस्वामिशत्रु-भिः ॥ उपचयनम् । चिञ् । एरच् ॥

उपचरितः । त्रि । उपासिते । शुश्रूषिते । सेविते ॥ उपचर्यतेस्म । चर० । क्तः ॥

उपचर्य्यः । त्रि । उपचरणीये ॥

उपचर्य्या । स्त्री । चिकित्सायाम् ॥ उपसमीपे चर्य्या ॥

उपचाय्यः । पुं । यज्ञाग्नौ ॥ अग्निधारणार्थेस्थलविशेषे ॥ उपचीयते अग्नि-धारणार्थमिष्टकाचयनेन निर्मितं स्थलमग्निः तस्मिन्नभिधेये उपपूर्वाच्चिनोतेः अग्नौपरिचाय्योपचाय्यसमूह्या इतिण्यदायादेशौनिपात्येते ॥

उपचारः । पुं । रुक्प्रतिक्रियायाम् । निग्रहे । रोगप्रतीकारे । चिकित्सायाम ॥ सेवायाम् ॥ व्यवहारे ॥ उत्कोचे ॥ पूजाद्रव्ये ॥ उपचर्यते उपचरणंवा । चर० । घञ् ॥

उपचारच्छलम् । न । धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेधे ॥ तथाहि । धर्मशब्दस्यार्थेनसम्बन्धः तस्य विकल्पो विविधः कल्पः शक्तिलक्षणान्यतररूपः । तथाचशक्तिलक्षणयो-रेकतरवृत्त्याप्रयुक्ते शब्दे तदपरवृ-त्त्यायःप्रतिषेधः सउपचारच्छलम् । यथा । मञ्चाः क्रोशन्ति नीलोघट इत्यादौ मञ्चस्था एवक्रोशन्ति नतु मञ्चाः एवंघटस्य कथंनीलरूपाभेदः । एवमर्थंनित्यइतिशक्त्याप्रयुक्ते अमु कस्मादुत्पन्नस्त्वंकथंनित्यइतिप्रतिषेधोप्युपचारच्छलम् । वाद्यभिप्रेतार्थस्यादूषणेन छलस्यासदुत्तरत्वम् । नचश्लिष्टलाक्षणिके प्रयोगाद्वादिन अपराधःस्यादितिवाच्यम् । तत्तदर्थबोधकतयाप्रसिद्धस्य शब्दस्य प्रयोगे वादिनोऽनपराधात् । अन्यथापर्वतो वह्निमानित्युक्ते पर्वतोयं कथमवह्निमानित्यादिदूषणेनानुमानाद्युच्छेदः स्यात् ॥

उपचाय्यः । पुं । चिकित्सायाम् । रोगप्रतीकारे ॥

उपचितः । त्रि । दग्धे ॥ समृद्धे ॥ समाहिते ॥ निदिग्धे । लेपादिनावर्द्धिते ॥ पुष्टे ॥ सञ्चिते ॥ उपचीयतेस्म ।

चित्र० । क्तः ॥

उपचितिः । स्त्री । पूजायाम् ॥

उपचित्रम् । न । एकादशाक्षरवृत्तवि-
शेषे ॥ यथा । मुरवैरिवपुस्तनुतां-
मुदं हेमनिभांशुकचन्दनलिप्तम् ।
गगनंचपलामिलितं यथा शारदनी
रधरै रुपचित्रमिति ॥

उपचित्रा । स्त्री । मूषिकपर्ण्याम् ॥ द
न्तीवृक्षे ॥ स्वातीनक्षत्रे ॥ उपगता
चित्राम् ॥

उपच्छन्नः । त्रि । गूढे ॥

उपजनः । पुं । नानाविधदेहभेदसङ्ग्र-
हे ॥ समीपजने ॥ उपसमीपेजनः ॥

उपजप्यः । पुं । उपजापार्हे ॥ रिपुवंश्या
राज्यार्थिनः कुद्धामात्याश्चोपजापा
र्हाभवन्ति ॥

उपजातिः । स्त्री । वर्णवृत्तप्रभेदे ॥ य-
था । उपेन्द्रवज्रापदसङ्गतानि यदी
न्द्रवज्राचरणानिसन्ति । तदोपजा
तिःकथिताकवीन्द्रैर्भेदाभवन्तीह च
तुर्दशास्याइति ॥

उपजापः । पुं । खलादीनांमिथोभेद
कभाषिते । भेदे । विच्छेदे ॥ उपां
शुजपनम् । जपव्यक्तायांवाचि । ज
पमानसेच । घञ् ॥

उपजापसहः । त्रि । भेदयोग्ये ॥ सह
ते । षहमर्षणे । पचाद्यच् । उपजापे
सहः ॥

उपजिह्वा । स्त्री । कीटविशेषे । वल्म्या-
म् ॥ दीमक सीमक इतिचभाषा ॥
इतिहेमचन्द्रः ॥

उपजिह्विका । स्त्री । प्रतिजिह्वायाम् ।
घण्टिकायाम् ॥ कीटविशेषे । उत्पा
दिकायाम् ॥

उपजीविका । स्त्री । उपजीव्ये । जीव-
नोपाये ॥ उपजीव्यतेऽनया । जीव
प्रा० । गुरोश्चेत्यः । संज्ञायांकन् कु
त्वा ॥

उपजीवी । त्रि । आश्रिते ॥

उपजीव्यम् । न । उपजीविकायाम् ॥

उपजोषम् । अ । आनन्दे । सुखे ॥ क
ल्याणार्थे ॥ उपजोषणम् । जुषीप्री
तिसेवनयोः ॥ अम्प्रत्ययः ॥ यथा
कर्मभोगमित्यर्थे ॥

उपजोषणम् । न । सेवने ॥

उपज्ञा । स्त्री । आद्यज्ञाने ॥ यथापाणि
नेर्व्याकरणस्य वाल्मीकेःश्लोकनिर्मा
णस्य । उपज्ञायते । ज्ञाअवबोधने ।
आतश्चोपसर्ग इतिकर्मण्यङ् । उप
ज्ञानंवा ॥ विनोपदेशेनाद्यज्ञाने ॥

उपज्ञातः । त्रि । विनोपदेशेनज्ञाते ॥

उपढौकनम् । न । पारितोषिकद्रव्ये ।
उपहारे । उपायने ।

उपतन्त्रम् । न । शास्त्रविशेषे ॥ यथा ।

सैद्धान्तान्युपतन्त्राणि कापिलोक्तानि यानि च। अद्भुतानि च तन्त्राणि जैमिन्युक्तानि यानि च। वशिष्ठः कपिलश्चैव नारदो गर्ग एव च। पुलस्त्यो भार्गवः सिद्धो याज्ञवल्क्यो भृगुस्तथा॥ शुक्रो बृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः। एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च॥ न सङ्ख्यातानि तान्यत्र धर्मविद्भिर्महात्मभिः। सारात्सारतराण्येव सङ्ख्यातानि निबोधतेति वाराहीतन्त्रम्॥

उपतपनम्। न। सन्तापकरे॥ तपसन्तापे। करणे ल्युट्॥

उपतप्ता। पुं। उपतापकमात्रे। स्पृष्टरि॥ उपतपति। तप०। तृच्। उपतपनम्। कृत्यल्युटो बहुलमिति भावे तृज्वा॥

उपतापः। पुं। त्वरायाम्॥ उत्तापे॥ उपघाते। गदे॥ इष्टवियोगादिना मानसपीडायाम्॥ उपतापयति। तपदाहे। चुरादिः। अच्॥ उपतपनं वा। तपसन्तापे। घञ्। यथा। परोपतापनं कर्म न कर्त्तव्यं कदाचन। न सुखं विन्दते प्राणी परपीडापरायण इति॥

उपतापी। त्रि। ज्वराद्युपतापवति॥ म० इनिः॥

उपत्यका। स्त्री। अद्रेरासन्नायां भूमौ॥ तराई इति तलहटी दून इति च भाषा॥ उपासन्ना। उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्। त्यकनश्च निषेध इतीत्वाभावः॥

उपदंशः। पुं। अवदंशे। मद्यपानरोचके भक्ष्यद्रव्ये॥ मेढ्ररोगविशेषे॥ तस्य निदानम्। हस्ताभिघातान्नखदन्तघातात् द्धावनादत्युपसेवनाद्वा। योनिप्रदोषाच्च भवन्ति शिश्ने पञ्चोपदंशा विविधापचारैरिति॥ सप्तच्छद वृक्षे। शिग्रुवृक्षे॥ दंशने॥ उपदंश्यते। दंशदशने। कर्मणि भावे वा घञ्॥

उपदर्शकः। पुं। द्वारपाले॥ दर्शयितरि॥

उपदा। स्त्री। उत्कोचे॥ उपायने॥ उपदीयते। डुदाञ्०। आतश्चोपसर्गे इत्यङ्॥

उपदानम्। न। उत्कोचे॥ उपायने॥ उपदीयते। डुदाञ्०। ल्युट्॥

उपदानकम्। न। उपदाने॥ स्वार्थे कः॥

उपदिका। स्त्री। वल्म्याम्॥ इति हेमचन्द्रः॥

उपदिष्टः। त्रि। देशिते। प्राप्तोपदेशे॥ उक्ते॥ उपदिश्यते। दिश अतिसर्जने। क्तः।

उपदी। स्त्री। वन्दायाम्। वन्दाके।

उपदेशः । पुं । अनुशासने ॥ चोदनायाम् । प्रवर्त्तकवाक्ये ॥ हितकथने ॥ मन्त्रकथने । दीक्षायाम् ॥ यथा । चन्द्रसूर्यग्रहेतीर्थे सिद्धक्षेत्रे शिवालये । मन्त्रमात्रप्रकथनमुपदेशः -सउच्यत इतिरामार्चनचन्द्रिका ॥ गुरुसम्प्रदाये ॥ यत्रापेक्षितस्यार्थजातस्य प्रतिपादकोग्रन्थसन्दर्भः पठ्यते स उपदेशः ॥ उपदेशनम् । दिश० । घञ् ॥ साधनहीनायोपदेशोनिरर्थकः ॥

उपदेष्टा । पुं । उपदेशकर्त्तरि । आचार्ये ॥ उपदिशति । दिश० । तृच् ॥ आचार्यद्वारा आत्मसुखोपदेशके चिद्रूपे ॥

उपदेहः । पुं । वृद्धौ ॥

उपदेहिका । स्त्री । कीटविशेषे । उपजिह्वायाम् । दीमक इतिभाषा ॥

उपद्रवः । पुं । उत्पाते ॥ रोगारम्भकदोषप्रकोपजन्येऽन्यस्मिन् विकारे ॥ यथा । योव्याधिस्तस्ययोहेतुर्दोषस्तस्यप्रकोपतः । योन्योविकारो भवति सउपद्रवउच्यते ॥ उपद्रवणम् । द्रुग । ऋदोरप् ॥

उपद्रष्टा । त्रि । उपदर्शके । उदासीनबोधरूपत्वेन गुणप्रचारदर्शिनि ॥ देहचक्षुर्मनोबुद्ध्यात्मसु द्रष्टृसमर्थे-

बाह्यान्देहादीनपेक्ष्याऽत्यन्तव्यवहिते द्रष्ट्रात्मनि पुरुषे । साक्षिपुरुषे ॥ यथा । ऋत्विग्यजमानेषु यजनकर्मव्यापृतेषु तत्समीपस्थोऽन्यः स्वयमव्यापृतो यज्ञविद्याकुशलत्वात् ऋत्विग्यजमानव्यापारगुणदोषाणामीक्षिता तद्वत् कार्यकरणव्यापारेषु स्वयमव्यापृतो विलक्षणस्तेषांकार्यकरणानां सव्यापाराणां समीपस्थो द्रष्टा उपद्रष्टा साक्षिपुरुषः ॥ उपपश्यति । दृशिर्० । बाहुलकात् तृन् ॥

उपद्रुतः । त्रि । व्याकुले ॥

उपधर्म्मः । पुं । पाषण्डे ॥ इतिश्रीभागवतम् ॥

उपधा । अ । भेदे ॥

उपधा । स्त्री । पदोपान्त्यवर्णे ॥ धर्माद्यैः परीक्षणे । राज्ञा धर्मार्थकामभयोपन्यासेन अमात्यादीनामाशयान्वेषणे ॥ यथोक्तं कालिकापुराणे । धर्मार्थकाममोक्षैश्चप्रत्येकं परिशोधनैः । उपेत्यधीयतेयस्मादुपधापरिकीर्त्तिता ॥ अर्थकामोपधाभ्यांतु भार्याः पुत्रांस्तुशोधयेत् । धर्मोपधाभिर्विप्रांस्तु सर्वाभिः सचिवान् पुनरिति ॥ उपधीयते शुद्धिज्ञानमत्र । डुधाञ्० । आतश्चोपसर्गइत्यङ् । टाप् ॥ ॥

उपधातुः । पुं । अष्टप्रधानधातुसदृशेषु स्वर्णमाक्षिकादिसप्तसु ॥ यथा । सप्तोपधातवः स्वर्णमाक्षिकं तारमाक्षिकम् । तुत्थं कांस्यञ्च रीतिश्च सिन्दूरञ्च शिलाजतु ॥ उपधातुषु सर्वेषु तत्तद्धातुगुणा अपि । सन्ति किन्त्वेषु ते गौणास्तत्तदंशांशभावतः इति ॥ शरीरस्थधातुभवोपधातवश्च सप्त । यथा । रसात् स्तनदुग्धम् १ । रक्तात् स्त्रीरजः २ । मांसात् वसा ३ । मेदसो घर्मः ४ । अस्थ्नो दन्तः ५ । मज्जनः केशः ६ । शुक्रात् ओजः ७ इति वैद्याः ॥

उपधानम् । न । विषे ॥ गण्डौ । उपबर्हे । सिरान्हना इति भाषा । प्रणये ॥ व्रते ॥ उपधीयते आरोप्यते शिरोऽत्र । उधाञ० । करणे इति ल्युट् ॥ विशेषे ॥

उपधानीयम् । न । उपबर्हे । शिरोधाने ॥

उपधिः । पुं । कपटे । व्याजे ॥ रथचक्रे ॥ उपधीयते आरोप्यतेऽनेन । डुधाञ० । उपसर्गे घोः किः ॥

उपधूपितः । त्रि । आसन्नमरणे ॥ परिधूपिते ॥

उपधृतिः । स्त्री । किरणे ॥

उपध्मानीयः । पुं । पफयोः पूर्वमर्द्धविसर्गसदृशे विसर्गविशेषे ॥

उपनतः । त्रि । उपस्थिते ॥ प्राप्ते ॥

उपनयः । पुं । उपनयने ॥ यथा । गृह्योक्तकर्मणा येन समीपं नीयते गुरोः । बालो वेदाय तद्योगाद्बालस्योपनयं विदुरिति स्मृतिः ॥ न्यायविशेषे ॥ यथा । उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः ॥ न्या० सू० १ । ३७ साध्यस्य पक्षस्य उदाहरणापेक्ष उदाहरणानुसारी य उपसंहारः उपन्यासः प्रकृतोदाहरणोपदर्शितव्याप्तिविशिष्टहेतुविशिष्टपक्षविशिष्टबोधजनकोपायावयवः इत्यर्थः । निगमनं हेतुविशिष्टत्वेन न पक्षबोधकम् किन्तु पक्षवृत्तिहेतुबोधकमिति तद्व्युदासः । अत्र च अन्वयव्यतिरेकव्याप्त्योरन्यतरत्वादिनानुगमः कार्यः उदाहरणोपदर्शितेति तु परिचायकमात्रमिति तु न वाच्यम् । उदाहरणविपरीतव्याप्त्युपदर्शकोपनयवारकत्वात् । वस्तुतोऽवयवपदेनैव तद्व्युदासः । स चोपनयो द्विविधोऽन्वयिव्यतिरेकिभेदात् । तथेति साध्यस्योपसंहारोऽन्वय्युपनयः । न तथेति साध्यस्योपसंहारो व्यतिरेक्युपनयः । अत्र च तथाशब्दप्रयोगावश्यकत्वे न तात्पर्यम् किन्तु व्याप्तिविशिष्टवत्त्वबोधे

। तथाचवह्निव्याप्यधूमवांश्चायमिति वा तथाचायमिति वोपन्यासः। एवं व्यतिरेकिण्यपि वह्न्यभावव्यापकीभूताभावप्रतियोगिधूमवांश्चायमिति वा नतथेति वोपन्यासः ॥

उपनयनम्। न। आचार्येण वटुकृत्याया म्। ब्राह्मणक्षत्रियविशां यज्ञसूत्रधारणादिरूपप्रधानसंस्कारे। व्रतबन्धे। अध्ययनार्थमाचार्यस्य उपसमीपंनीयते येनकर्मणातस्मिन् ॥ णी ञोल्युट् ॥ पादयोर्निपतने ॥ प्रापणे॥

उपनागरिका। स्त्री। वृत्त्यनुप्रासघटकवृत्तिप्रभेदे ॥ माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकेष्यते ॥ उदाहरणम्। अपसारय घनसारं कुरुहारंदूरएवकिंकमलैः। अलमलमालिमृणालैरितिवदतिदिवानिशंबालेति ॥ वैदर्भीरीतौ ॥

उपनायः। पुं। उपनयने ॥

उपनायनम्। न। उपनयने ॥ उपनयनमेव। अन्येषामपिदृश्यत इतिदीर्घः ॥

उपनाहः। पुं। व्रणालेपनपिण्डे। प्रलेपइतिभाषा॥ वीणायां यत्रतन्त्री निबध्यते तस्योर्द्धभागे। निबन्धने ॥ वीणादितन्त्रबन्धनस्थाने ॥ उपनह्यतेऽस्मिन्। णह० । हलश्चेतिघञ् ॥

उपनिधिः। पुं। विश्वासार्पितवस्तुनि। उपन्यस्तवस्तुनि। न्यासे॥ वासनस्थमनाख्याय हस्ते न्यस्ययदर्पितम्। द्रव्यमुपनिधिः प्रोक्तः स्मृतिषुस्मृतिवेदिभिः ॥ उपनिधीयते। डुधाञ्० । उपसर्गेघोःकिः ॥

उपनिषत्। स्त्री। वेदशिरोभागे॥ तत्राशीतिसहितशताधिकसहस्रसंख्याका उपनिषदश्चतुर्णां वेदानाम्। तथाहि। ऋचएकविंशतिः। यजुषोनवाधिकशतम्। साम्नःसहस्रम्। पञ्चाशदुपनिषदोऽथर्वणस्य ॥ ब्रह्मविद्यायाम्। ब्रह्मात्मैक्यसाक्षात्कारे ॥ यथाहुः। अत्रचोपनिषच्छब्दोब्रह्मविद्यैकगोचरः। तच्छब्दावयवार्थस्य विद्यायामेव सम्भवात् ॥ उपोपसर्गः सामीप्ये तत्प्रतीचिसमाप्यते। सामीप्यतारतम्यस्यविश्रान्तेः स्वात्मनो यतः ॥ त्रिविधस्यसदर्थस्य निशब्दोपिविशेषणम्। उपनीयत मात्मानं ब्रह्मापास्तद्वयंयतः ॥ निहन्त्यविद्यां तज्जञ्चतस्मादुपनिषद्भवेत्। निहत्यानर्थमूलंस्वाविद्यां प्रत्यक्तयापरम् ॥ गमयत्यस्तसम्भेदमतोवोपनिषद्भवेत्॥ प्रवृत्तिहेतून्निःशेषांस्तन्मूलोच्छेदकत्वतः। यतोऽवसादयेद्वि

ध्यातस्मादुपैनिषद्भवेत् ॥ यथोक्तविद्याहेतुत्वाद्ग्रन्थोपितदभेदतः। भवेदुपनिषन्नामा लाङ्गलं जीवनं यथेति ॥ उपनिषदनम् उपनिषीदति श्रेयोऽस्यां वा । पद्लृविशरणगत्यवसादनेषु । सं० क्विप् सत्सूद्विष इतिषा-। सदिरप्रतेरितिषः ॥ धर्म्मे ॥ निर्जनस्थाने । रहसि ॥ समीपसदने ॥ व्रतविशेषे ॥ रहस्यग्रन्थे पुराणोपनिषदादौ ॥

उपनिष्क्रम् । न । महति राजमार्गे । पुरस्यघण्टापथे ॥ उपनिष्किरन्तिसैन्यान्यत्र । कॄविक्षेपे । घः ऋदोरप्तुन। अपोवाधकस्यल्युटोपि घस्याऽपवादत्वात् ॥ यद्वा । उपनिष्कीर्यते सैन्यैर्हन्यते । कॄहिंसायाम् । कर्मणयप् । इदुदुपधस्येति षः ॥

उपनिष्क्रमणम् । न । निष्क्रमणाख्यसंस्कारे ॥ प्रधानमार्गे । राजपथे ॥ उपनिष्पूर्वात्क्रमे ल्युट् ॥

उपनिहितः । त्रि । निक्षिप्ते ॥

उपनीतः । पुं । कृतोपनयने ॥ त्रि । प्रापिते ॥ समर्पिते ॥ उपपूर्वान्नयतेः क्तः ॥

उपनेत्रम् । न । स्फटिकादिनिर्मितेनेत्रोपकारके ॥ नेत्रयोः समीपम् ॥

उपन्यस्तः । त्रि । समर्पिते ॥

उपन्यासः । पुं । वाङ्मुखे । वाक्योपक्रमे ॥ उपन्यसनम् । अमुक्षेपणे । घञ् ॥

उपपतिः । पुं । जारे ॥ उपमितः पत्या । अवादयः क्रुष्टाद्यर्थे तृतीययेतिसमासः । उपसृष्टः पतिरनेनवा । प्रादिभ्योधातुजस्यवाच्योवाचोत्तरपदलोपश्चेतिसमासः ।

उपपत्तिः । स्त्री । सङ्गतौ ॥ समाधाने । सिद्धान्ते ॥ अनुग्राहिकायांयुक्तौ। युक्तौ ॥ षड्विधलिङ्गेषुषष्ठलिङ्गे ॥ यथा । प्रकरणप्रतिपाद्यार्थसाधने तत्र श्रूयमाणायुक्तिरुपपत्तिः । यथा । छान्दोग्येषष्ठप्रपाठके यथासोम्यैकेन मृत्पिण्डेन सर्वंमृन्मयं विज्ञातंस्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येवसत्यमित्यादावद्वितीय-वस्तुसाधने विकारस्य वाचारम्भणमात्रत्वयुक्तिः श्रूयते ॥ उपपदनम् । पदगतौ । स्त्रियांक्तिन् ॥

उपपत्तिमत् । त्रि । युक्तियुक्तः ॥

उपपदम् । न । पदस्यसमीपपदे । समीपोच्चारितेपदे । व्यावर्त्तके ॥ यथानामोत्तरे शर्म्मवर्म्मादि ॥ लेशे ॥ समभिव्याहृतस्यार्थपोषकपदे ॥ यथा प्रहारादौ प्रादि ॥ उपोच्चारितं पदम् ॥

उपपन्नः । त्रि । अर्हे ॥ युक्ते । सङ्गते ॥

उपपातकम् । न । पापविशेषे ॥ यथा ह

मनुः । गोवधोऽयाज्यसंयाज्यपार-
दार्य्यात्मविक्रयाः । गुरुमातृपितृ
त्यागः स्वाध्यायाग्न्योः सुतस्य च ॥
परिवित्तितानुजेनोढे परिवेदनमे
व च । तयोर्दानञ्च कन्यायास्तयोरेव
च याजनम् ॥ कन्याया दूषणञ्चैव वा
र्द्धुष्यं व्रतलोपनम् । तडागारामदा
राणामपत्यस्य च विक्रयः ॥ व्रात्यता
बान्धवत्यागो भृत्याध्यापनमेव च ।
भृताच्चाध्ययनादान मपण्यानाञ्च-
विक्रयः ॥ सर्वाकरेष्वधीकारो महा
यन्त्रप्रवर्त्तनम् । हिंसौषधीनांस्त्र्या
जीवोऽभिचारो मूलकर्म च ॥ इन्ध
नार्थमशुष्काणां द्रुमाणामवपातनम्
। आत्मार्थञ्च क्रियारम्भो निन्दिता
न्नादनं तथा ॥ अनाहिताग्निता स्तेय
मृणानामनपक्रिया । असच्छास्त्राधि
गमनं कौशीलव्यस्य च क्रिया ॥ धा
न्यकुप्यपशुस्तेयं मद्यपस्त्रीनिषेवण
म् । स्त्रीशूद्रविट्क्षत्रवधो नास्ति
क्यञ्चोपपातकमिति ॥ अस्यार्थः । गो
हननम् १ । जातिकर्मदुष्टानांयाजन
म् २ । परपत्नीगमनम् ३ । आत्म
विक्रयः ४ । गुरुत्यागो मातृत्यागः
पितृत्यागः ७ । गुर्वादीनांशुश्रूषाद्य
करण मित्यर्थः ॥ सर्वदा ब्रह्मयज्ञत्या
गः ८ । अग्नेस्स्मार्त्तस्य त्यागः ९ । सु

तस्य च संस्कारभरणाद्यकरणरूप -
स्त्यागः १० ॥ कनिष्ठस्यादौ विवाहे
कृते ज्येष्ठस्य परिवित्तिता भवति
११ । अकृतदारज्येष्ठस्य कृतदा-
रस्य कनिष्ठस्य परिवेदनम् १२
। तयोश्च कन्याप्रदानम् १३ । तयोरे
व विवाहहोमादियागेष्वार्त्विज्यम् -
१४ ॥ कन्याया मैथुनवर्जमङ्गुलीप्रक्षे
पादिना दूषणम् १५ । वृद्धिजीवन
म् १६ । व्रतलोपनं ब्रह्मचारिणोमै
थुनम् १७ । तडागविक्रयः १८ । आ
रामविक्रयः १९ । भार्याविक्रयः २०
अपत्यविक्रयः २१ ॥ यथाकालमनु
पनयनं व्रात्यता २२ । बान्धवानां
पितृव्यादीनामननुवृत्तिः २३ । प्रति
नियतवेतनग्रहणपूर्वकमध्यापनं भृ
त्याध्यापनम् २४ । प्रतिनियतवेत
नप्रदानपूर्वक मध्ययनञ्च भृतादध्य
यनादानम् २५ । अविक्रेयाणां तिल
लाक्षागोरसादीनां विक्रयः २६ ॥
सुवर्णाद्युत्पत्तिस्थानेषु राजाज्ञयाऽ
धिकारः २७ । महतां जलप्रवाहप्रति
बन्धहेतूनांयन्त्राणां सेतुबन्धादीनां
प्रवर्त्तनम् २८ । ओषधीनां जाति
मात्रादीनां हरितानां धान्यानां हिं
सनं नाशः २९ । भार्यादिस्त्रीणां वेश्या
त्वं कृत्वा तदुपजीवनं स्त्र्याजीवः ३०

श्येनादियज्ञेनानपराद्धस्य मारणम भिचारः ३१ । मन्त्रौषधादिना वशीकरणं मूलकर्म ३२ ॥ इन्धनार्थम शुष्काणां द्रुमाणां छेदनम् ३३ । अनातुरस्य देवपित्राद्युद्देशमन्तरेण पाकाद्यनुष्ठान मात्मार्थं क्रियारम्भः ३४ । निन्दितस्य लशुनादेर्भक्षणं निन्दितान्नादनम् ३५ ॥ सत्यधिकारे ऽग्न्यनाधान मनाहिताग्निता ३६ । स्तेयं सुवर्णादन्यस्य सारद्रव्यस्यापहारः ३७ । देवर्षिपितृणामृणस्य अनपक्रियाऽशोधनम् ३८ । असच्छास्त्रस्य श्रुतिस्मृतिविरुद्धस्य शिक्षणं ३९ । कौशीलव्यस्यतौर्य्यत्रिकस्य उपसेवनं सततानुष्ठानम् ४० ॥ धान्यस्तेयम् ४१ । कुप्यस्यताम्रलोहादेश्चौर्यम् ४२ । पशूनांचौर्यम् ४३ । द्विजातीनां पीतमद्यायाः स्त्रियाः गमनम् ४४ । स्त्रीबधः ४५ । शूद्रबधः ४६ वैश्यबधः ४७ । क्षत्रियबधः ४८ । अदृष्टार्थकर्माभावबुद्धि र्नास्तिक्यम् ४९ ॥ एतत् प्रत्येक मुपपातकमित्यर्थः ॥

उपपादनम् । न । सम्यक्कथने ॥

उपपादितः । त्रि । सम्यक्कथिते ॥ समर्पिते ॥

उपपादी । त्रि । उपपादनशीले ॥

उपपापम् । न । उपपातके ॥

उपपुरम् । न । शाखानगरे ॥ पुरसन्निधौ ॥ उपसमीपे पुरम् ॥

उपपुराणम् । न । व्यासोक्ताष्टादशपुराणसदृशनानामुनिप्रणीताष्टादशपुराणेषु ॥ तानियथा । आद्यंसनत्कुमारोक्तं १ नारसिंहमतः परम् २ । तृतीयं वायवीयञ्च ३ कुमारेणानुभाषितम् । चतुर्थं शिवधर्माख्यं ४ साक्षान्नन्दीशभाषितम् । दुर्वाससोक्तमाश्चर्य्यं ५ नारदीयमतः परम् ६ ॥ नन्दिकेश्वरयुग्मञ्च ७ तथैवोशनसेरितम् ८ । कापिलं ९ वारुणं १० शाम्बं ११ कालिकाह्वयमेवच १२ ॥ माहेश्वरं १३ तथापाद्मं १४ दैवं सर्वार्थसाधकम् १५ । पराशरोक्तमपरं १६ मारीचं १७ भास्कराह्वयम् १८ ॥ इतिकूर्मपुराणम् ॥ दैवं देवीपुराणम् ॥

उपपुष्पिका । स्त्री । जृम्भायाम् । हाफिकायाम् ॥ इतिहारावली ॥

उपप्रदानम् । न । उत्कोचे ॥ उपसमीपेप्रदाम् ॥ दानाख्यउपाये ॥ भूमिधनादीनांप्रदानमुपप्रदानम् ॥

उपप्लवः । पुं । सैंहिकेये ॥ विप्लवे ॥ उत्पाते ॥ ग्रहणे ॥ यथा । उपप्लवेचन्द्रमसोरवेश्चेति स्मृतिः ॥ उपप्लवमम

। प्लुङ्गतौ । ऋदोरप् ॥

उपप्लवी । त्रि । सभये ॥

उपप्लुतः । त्रि । मर्द्दिते ॥ प्लवमाने ॥ पीडिते ॥

उपबृंहितः । त्रि । वर्द्धिते ॥

उपभुक्तिः । स्त्री । उपभोगे ॥ उपभोजनम् । भुज० । क्तिन् ॥

उपभूषणम् । न । घण्टाचामरादिषु ॥ यथा । घण्टाचामरकुम्भादि पात्रोपकरणादिकम् । तद्भूषणान्तरे देयाद्यस्मात् तदुपभूषणमिति ॥ प्रावारः पानपात्रञ्च गेण्डुकोगृहमेव च । पर्य्यङ्कादियदन्यच्च सर्वं तदुपभूषणमितिकालिकापुराणे ६८ अध्यायः ॥

उपभृत् । स्त्री । स्रुचोभेदे । यज्ञाकारेयज्ञपात्रे ॥ आश्वत्थ्युपभृदित्यापस्तम्बः ॥ उपविभर्त्ति । डुभृञ् । क्विप् ॥

उपभोगः । पुं । निर्वेशे । भोजनातिरिक्तभोगे ॥ उपभोजनम् । भुज० । घञ् ॥

उपमन्त्रणम् । न । रहस्युपच्छन्दने ॥

उपमन्युः । पुं । मुनिविशेषे ॥

उपमर्द्दः । पुं । धर्म्मिनिवृत्तौ धर्म्मान्तरप्रयोगे ॥ यथा अस्तेर्भूः ॥ अभावे ॥

उपमा । स्त्री । उपमाने । सादृश्ये ॥ अलङ्कारविशेषे । यथा । उपमायत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः । हंसीव कृष्ण ते कीर्त्तिः स्वर्गङ्गामवगाहते ॥ यत्रोपमानोपमेययोः सहृदयहृदयाह्लादित्वेन चारुसादृश्यमद्भुततयोल्लसति व्यङ्ग्यमर्यादांविना स्पष्टं प्रकाशते तत्रोपमालङ्कारः । हंसीवेत्युदाहरणम् । इयञ्च पूर्णोपमेत्युच्यते । हंसीकीर्त्तिः स्वर्गङ्गावगाहनमिवशब्दश्चेत्येतेषा मुपमानोपमेयसाधारणधर्म्मोपमावाचकानाञ्चतुर्णामप्युपादानात् ॥ यथा वा । गुणदोषौ बुधोगृह्णन्निन्दुक्ष्वेडाविवेश्वरः ॥ शिरसाश्लाघते पूर्वं परं कण्ठेनियच्छति ॥ अत्र यद्यप्युपमानोपमेययोर्नैकः साधारणोधर्म्मः । उपमाने ईश्वरे चन्द्रगरलयोर्ग्रहणमुपादानं तयोर्मध्ये पूर्वस्य चन्द्रस्य शिरसाश्लाघनं वहनम् । उत्तरस्य गरलस्य कण्ठे नियमनं स्थापनम् । उपमेये बुधे गुणदोषयोर्ग्रहणं ज्ञानं तयोर्मध्ये पूर्वस्य गुणस्य शिरसाश्लाघनं शिरःकम्पनेनाभिनन्दनम् । उत्तरस्य दोषस्य कण्ठेनियमनं कण्ठादुपरि वाचा अनुद्घाटनमितिभेदात् । तथापि चन्द्रगरलयोर्गुणदोषयोश्च बिम्बप्रतिबिम्बभावेनाभेदात् उपादानज्ञानादीनां गृह्णन्नित्येकशब्दोपादानेनाभेदा

ध्यवसायाश्च साधारणधर्मतेति पूर्वस्माद्विशेषः । वस्तुतोभिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्यादभिन्नयोः पृथगुपादानं विम्बप्रतिविम्बभाव इत्यालङ्कारिक समयः ॥ * ॥ उपमाने ॥ उपपूर्वान्माङोभावे करणेवा अङ् ॥ उपमानं येनोपमीयते याचोपमितिः सोपमेत्यर्थः ॥

उपमाता । स्त्री । मातुस्तुल्यायाम् ॥ साषड्विधा । यथा । मातुःस्वसा-मातुलानी पितृव्यस्त्री पितृष्वसा । श्वश्रूःपूर्वजपत्नीच मातृतुल्याःप्रकीर्त्तिताः इतिस्मृतिः ॥ धायइतिभाषयाभाषितायां धात्र्याम् ॥ त्रि । उपमानकर्त्तरि ॥

उपमानम् । न । उपमायाम् । सादृश्ये ॥ अधिकगुणेचन्द्रादौ ॥ सादृश्यज्ञाने । उपमितिकरणे । यथा गौ गवयस्तथेतिवाक्ये ॥ प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानमिति न्यायसूत्रम् । १ । ६ । प्रसिद्धस्यपूर्वप्रमितस्यगवादेः साधर्म्यात् सादृश्यात् तज्ज्ञानात् साध्यस्यगवयादिपदवाच्यत्वस्यसाधनंसिद्धिरुपमान मुपमितिर्यतद्व्यध्याहारेणच करणलक्षणम् । अथवा साध्यसाधनमिति करणल्युटा करणलक्षणमेवेदम् । अचवैधर्म्योपमितिमपिमन्यन्ते टीकाकृत. । यथाच अतिदीर्घग्रीवत्वादिपश्वन्तर-वैधर्म्यज्ञानादुष्ट्रेकरभपदवाच्यताग्र-हः । एवमन्योप्युपमानस्य विषय इतिभाष्यम् । तथामुद्गपर्णी सदृसी ओषधी विषंहन्तीत्यतिदेशवाक्यार्थे ज्ञाते मुद्गपर्णीसादृश्यज्ञानेजाते इयमोषधी विषहरणीत्युपमित्या विषयी क्रियते इत्यादि ॥ उपमितौ । उपमित्यनुयोगिनि ॥ उपमीयतेयेन तदुपमानम् । उपपूर्वान्माङः करणे ल्युट् । प्रादिसमासः । उपपूर्वकोमाङ् सादृश्यहेतुके परिच्छेदेरूढः । येनवस्त्वन्तरं सादृश्येन परिच्छिद्यते तदुपमानमित्यर्थः । यथागौरिव गवयः । इहहिगौःकरणम् । सादृश्यंहेतुः । पुरुषःपरिच्छेत्ता । सहिगोसादृश्येन गवयंपरिच्छिनत्ति ॥

उपमितः । त्रि । सादृश्यकृते ॥ उपमेये ॥

उपमितिः । स्त्री । उपमायाम् ॥ मितिभेदे । संज्ञासंज्ञिसम्बन्धज्ञाने ॥ न्यायमतेन सादृश्यज्ञानजन्यज्ञाने । उपमाने ॥ यथा गे शोगवयपद-वाच्यइत्याकारशक्तिज्ञानम् । अस्यकरणंगवादिसादृश्यवत् पिण्डप्रत्य

चम । अस्यव्यापारः अतिदिष्टवाक्या
र्थस्मरणम् । इत्युपमानखण्डम् ॥
अपिच । ग्रामीणस्य प्रथमतः पश्यतो
गवयादिकम् । सादृश्यधीर्गवादी-
नां यास्यात्सोपमितिः स्मृता ॥ वा
क्यार्थस्यातिदेशस्य स्मृतिर्व्यापार उ-
च्यते । गवयादिपदानान्तु शक्तिधी
रुपमाफलम् ॥ पदज्ञानन्तुकरणं श
क्तिधीरुपमाफलमिति भाषापरि-
च्छेदः ॥ उपमानम् । डुमिञ्° ।
क्तिन् ॥

उपमेतः । पुं । शालवृक्षे ॥ इतिशब्दच
न्द्रिका ॥

उपमेयम् । त्रि । उपमिते ॥ उपमीय
ते यत् तत् । माङ् । अचोयत् । ई
द्यति ॥

उपमेयोपमा । स्त्री । अर्थालङ्कारविशे
षे ॥ यथा । पर्यायेणद्वयोस्तच्चेदुपमे
योपमामता । धर्मोर्थइवपूर्णश्रीर-
र्थोधर्मइवत्वयि ॥ द्वयोः पर्यायेणोप
मानोपमेयत्वकल्पनं तृतीयसादृश्य
व्यवच्छेदार्थम् । धर्मोर्थम् । धर्मार्थ
योर्हिकस्यचित् केनचित्सादृश्ये व-
र्णिते तस्याप्यनेन सादृश्य मर्थसिद्ध
मपिमुखतोवर्ण्यमानं तृतीयसादृ-
श्य व्यवच्छेदार्थंफलति । यथावा ।
खमिव जलं जलमिवखंहंसश्चन्द्रइव
चन्द्रइवहंसः । कुमुदाकारास्तारा
स्ताराकाराणि कुमुदानि ॥ पूर्वेच पू
र्णश्रीरितिधर्म उपात्तः इहामलत्वा
दिधर्मोनोपात्त इति भेदः । उदाह
रणद्वयेऽपिप्रकृतयोरेवोपमानोपमे
यत्वकल्पनम् । रात्रि धर्मार्थसमृद्धेः
शरदि गगनसलिलादिनैर्मल्यस्यच-
वर्णनीयत्वात् । प्रकृताप्रकृतयोरप्ये
षा सम्भवति । यथा । गिरिरिवगज
राजोयं गजराजइवोच्चकैर्विभाति-
गिरिः । निर्झरइवमदधारा मदधा
रेवास्यनिर्झरःस्रवतीति ॥

उपयन्ता । पुं । दयिते । पत्यौ ॥ उपय
च्छति । यमउपरमे । तृच् ॥

उपयमः । पुं । विवाहे ॥ उपयमनम् ॥
यम° । यमः समुपनिविषुचेत्यप् ॥

उपयमनम् । न । विवाहे ॥

उपयाचकः । त्रि । समीपे याञ्चाकर्त्त-
रि ॥

उपयाचितः । त्रि । दिव्यदोहदे । स्वे-
ष्टार्थसिद्धये देवायदेये वस्तुनि ॥ प्रा
र्थिते ॥

उपयाचितकम् । त्रि । उपयाचिते । स्वे
ष्टलब्धये देवदेये ॥

उपयाजः । पुं । यज्ञाङ्गे ॥ एकादशोप-
याजाः । उपपूर्वाद्यजेर्घञ्प्रयाजानु
याजयोः प्रदर्शनार्थत्वात्कुत्वाभावः ॥

उपयामः । पुं । विवाहे ॥ उपयमनम् । यम० । यमःसमुपनिविषुचेतिपक्षे घञ् ॥

उपयुक्तः । त्रि । उचिते । योग्ये ॥ उपयुज्यते । युजिर० । क्तः ॥

उपयोगः । पुं । आचरणे ॥ इष्टसिद्ध्यर्थव्यापारे ॥ उपयुज्यते । युज० । घञ् ॥

उपयोगिता । स्त्री । आनुकूल्ये । प्रयोजने । फलसाधनतायाम् ॥ उपयोगिनो भावः । तल् ॥

उपयोगी । त्रि । अनुकूले । उपयुक्तद्रव्यादौ । क्रियासाधने ॥ उपयोगोऽस्ति अस्यास्मिन् वा । अतइनिठनाविति निः ॥

उपरक्तः । पुं । स्वर्भानौ । राहौ ॥ राहुग्रस्ते इन्दौ सूर्ये च । राहुकर्तृकग्रहणकर्मीभूते चन्द्रे अर्के च ॥ त्रि । व्यसनार्त्ते । दैवमानुषान्यतरपीडायुक्ते ॥ आसक्ते ॥ उपरज्यते स्म । रञ्जरागे । कर्मणिक्तः ॥

उपरचकः । त्रि । रचितरि ॥

उपरचणम् । न । रचायै सैन्यविन्यासे । सज्जने । चौकी पहरा इति च भाषा ॥

उपरतः । त्रि । सर्वैषणाविनिर्मुक्तपरिव्राजि । संन्यासिनि ॥ मृते ॥ विरते । निवृत्ते ॥

उपरतस्पृहः । त्रि । इच्छारहिते ॥ सत्यपि सत्त्वे स्वगतधनेच्छारहिते ॥

उपरतिः । स्त्री । विषयेभ्यइन्द्रियाणां परावृत्तौ । निवर्त्तितानामेषांश्रोत्रादिपञ्चेन्द्रियाणां श्रवणादिव्यतिरिक्तविषयेभ्यउपरमणे ॥ विहितानांकर्मणां विधिनापरित्यागे॥ पुमर्थः कर्मणानेति धीरेषोपरतिर्भवेदित्युक्तेः ॥ लाभप्राप्तावौदासीन्ये ॥ विरतौ ॥ उपरमणम् । रमक्रीडायाम । क्तिन् ॥

उपरत्नम् । न । गौणरत्ने ॥ तानियथा । उपरत्नानिकाचश्च कर्पूराश्मातथैवच । मुक्ताशुक्तिस्तथाशङ्खइत्यादीनिबहून्यपि ॥ गुणायथैवरत्नानामुपरत्नेषुतेतथा । किन्तुकिञ्चित्ततोहीनाविशेषोयमुदाहृत इति ॥

उपरथ्या । स्त्री । क्षुद्रवीथिकायाम् ॥

उपरन्ध्रम् । न । अश्वस्यरन्ध्रोपरिभागे ॥ यथोक्तम् । कुक्षिनाभ्यन्तरेरन्ध्रमुपरन्ध्रंतथोपरीति ॥

उपरमः । पुं । उपरतौ । वैराग्ये ॥ उपरमणम् । रम० । घञ् । यमउपरमेइति निपातनान्नवृद्धिः ॥ नाशे ॥ उपरमतेऽस्मिन्नवा ॥

उपरमणम् । न । परावृत्तौ ॥

उपरसः । पुं । गन्धकादिषु ॥ यथा ।
गन्धो हिङ्गुलमभ्रतालकशिलास्रो-
तोऽञ्जनं टङ्कणं राजावर्त्तकचुम्बकौ स्फ
टिकया शङ्खः खटी गैरिकम् । कासी
सं रसकं कपर्द्दसिकता बोलाश्च कङ्कुष्ठ
कं सौराष्ट्री च मता अमी उपरसाः सू
तस्य किञ्चिद्गुणैः ॥ अथैषां शोधनवि
धिः । सूर्य्यावर्त्तो वज्रकन्दः कदली
देवदालिका । शिग्रुः कोषातकी व-
न्ध्याकाकमाची चशालुकम् ॥ एषा
मेकरसेनैव त्रिक्षारैर्लवणैः सह ।
भावयेद्दन्तवर्गैश्च दिनमेकं प्रयत्नतः
॥ ततः पचेन्मतद्द्रावैर्दोलायन्त्रे दिनं
सुधीः । एवं शुद्ध्यन्ति ते सर्वे प्रोक्ता उ
परसा हि ये ॥ विशेषश्च । कङ्कुष्ठं गै-
रिकं शङ्खकासीसं टङ्कणं तथा । नीला
ञ्जनं शुक्तिभेदाः क्षुल्लकाः सवराटि-
काः ॥ जम्बीरवारिणा स्विन्नाः क्षालि
ताः कोष्णवारिणा । निश्चयमायान्त्य
मी योज्या भिषग्भिर्योगसिद्धये इति ॥

उपरागः । पुं । ग्रहणे । राहुग्रस्तार्कच
न्द्रयोः । राहुकर्त्तृकचन्द्रादिकर्मक
ग्रहणरूपक्रियायाम् ॥ दुर्नये ॥ग्रह
कल्लोले ॥ व्यसने ॥ विगाने । नि
न्दायाम् ॥ उपरज्यतेऽनेन सूर्य्यश्चन्द्र
श्च । रञ्ज रागे । हलश्चेति घञ् ।
घञि च भावकरणयोरिति नलोपः ॥

सम्बन्धे ॥ यथा । गुणोपरागः स्वेच्छा
तः पुरुषस्य कल्पत इति सहस्रनाम
भाष्यम् ॥

उपरामः । पुं । निवृत्तौ । विरतौ ॥
उपरमणम् । रम० । घञ् । रमे
रनुदात्तोपदेशत्वान्न वृद्धिनिषेधः ॥
निरहङ्कारत्वे ॥

उपरि । अ । ऊर्द्ध ॥ ऊर्द्धे ऊर्द्धाया-
म् ऊर्द्धात् ऊर्द्धायाः ऊर्द्ध मूर्द्धा वा
वसत्यागतो रमणीयं वा । उपर्य्युप
रिष्टादिति ऊर्द्धस्योपादेशो रिल् प्र
त्ययश्च ॥

उपरिचरः । पुं । वसुविशेषे ॥ विमाने
नोर्द्धं निरन्तरं गमनादुपरिचर इति
नामास्य । नृपतिरयं चेदिदेशाधिप
तिरासीत् ॥

उपरिबुद्धिः । त्रि । उत्तानबुद्धौ ॥ उप
र्य्युपरि बुद्धीनां चरन्ती श्वरबुद्धयः इत्य
च उपरिबुद्धीना मुत्तानबुद्धीना मु-
परि चरन्तीत्यर्थात् ॥

उपरिष्टात् । अ । ऊर्द्ध ॥ ऊर्द्धे ऊर्द्धाया
म् ऊर्द्धात् ऊर्ध्वायाः ऊर्ध्वम् ऊर्ध्वा
वा वसति आगतो रमणीयं वा । उ
परि उपरिष्टादित्यूर्द्धस्य उपादेशो-
रिष्टातिल् च प्रत्ययः॥

उपरीतकः । पुं । शृङ्गारबन्धविशेषे ॥
तल्लक्षणं यथा । एकपादमुरौ कृत्वा

द्वितीयं स्कन्धसंस्थितम् । नारीकामयते कामी बन्धः स्याद्‌ विपरीतक इति ॥ अत्र विपरीतको ऽपि पाठः ॥

उपरुद्धः । त्रि । मूत्रादिवेगवति ॥

उपरूपकम् । न । नाटकप्रभेदे । स चाष्टादशविधो यथा । नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम् स्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा ॥ संलापकं श्रीगदितं शिल्पकञ्च विलासिका । दुर्मल्लिकाप्रकरणी हल्लीशो भाणिकेति च ॥ अष्टादश प्राहुरुपरूपकाणि मनीषिणः । विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम् ॥ इति साहित्यदर्पणे ६ परिच्छेदः ॥

उपरोधः । पुं । अनुरोधे ॥ उपरोधनम् । रुधिर० । घञ् ॥

उपरोधकम् । पुं । न । गर्भागारे । वासगृहे ॥ त्रि । उपरोधकर्त्तरि ॥

उपलः । पुं । पाषाणे । प्रस्तरे ॥ मणौ । रत्ने ॥ उपलाति । लादाने । आतइतिकः ॥ उं शम्भुं पाति ओः शम्भो वा पलति । पलगतौ । पचाद्यच् ॥ ओः शम्भोः पलः बोधको वा ॥

उपलक्षकः । त्रि । लक्षयितरि ॥

उपलक्षणम् । न । अजहत्स्वार्थलक्षणायाम् । एकपदेन तदर्थान्यपदार्थकथने ॥ यथा । देशान्तरे स्थिते पत्यौ साध्वी तत्पादुकाद्वयम् । निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥ अत्र पादुकाद्वयमित्युपलक्षणम् द्रव्यान्तरस्यापि ॥ उपसमीपस्थं लक्षणमालोचनं यत्र ॥ स्वसिद्धये पराक्षेपः परार्थे स्वसमर्पणम् । उपादानं लक्षणञ्चेत्युक्ता शुद्धैव सा द्विधा ॥ यथा कुन्ताः प्रविशन्तीत्युपादानम् । गङ्गायां घोष इत्युपलक्षणमिति काव्यप्रकाशः ॥

उपलक्षणभावः । पुं । शक्यतावच्छेदकत्वे ॥

उपलक्षितः । त्रि । बोधिते ॥ ज्ञाते ॥

उपलधिप्रियः । पुं । चमराख्यवनजन्तौ ॥ इति राजनिर्घण्टः ॥

उपलब्धः । त्रि । दृष्टे ॥

उपलब्धार्थः । त्रि । अनुभूते ॥ उपलब्धः अर्थो ऽस्य ॥

उपलब्धार्था । स्त्री । आख्यायिकायाम् ॥ उपलब्धः केनापि प्रमाणेन अर्थो ऽभिधेयं यस्याः सा । भूतार्थशब्दरचनेति यावत् ॥

उपलब्धिः । स्त्री । मत्याम् ॥ प्राप्तौ ॥ ज्ञाने ॥ उपलम्भे ॥ उपलभ्यते ऽनया । डुलभष० । स्त्रियां क्तिन् प्राप्तमडं बाधित्वा बाहुलकात् क्तिन् ॥

उपलब्धा । पुं । आत्मनि ॥

उपलभेदी । पुं । पाषाणभेदिनि स्या-

वरे ॥

उपलम्भः । पुं । उपलब्धौ । अनुभवे ॥ उपलम्भनम् । डुलभष् प्राप्तौ । घञ् । उपसर्गात् खलघञोरितिनुम् ॥

उपलम्भनम् । न । उपलम्भे ॥ उपलभ्यते । डुलभष्० । कर्मणिभावेवाल्युट् ॥

उपलक्षितः । त्रि । ज्ञापिते ॥

उपलम्भ्यः । त्रि । स्तवोपयुक्ते । स्तव्ये ॥ यथा । उपलम्भ्यः साधुः । इति मुग्धबोधव्याकरणम् ॥

उपला । स्त्री । अश्मरूपायांमृदि ॥ शर्करायाम् ॥ उपलाति । लाआदाने । आतश्चोपसर्गइतिकः । उंशम्भुं प्रतिऔ शम्भौवा । पलति । पलगतौ । पचाद्यच् । टाप् ॥

उपलिङ्गम् । न । अरिष्टे । उपद्रवे ॥ इतिहेमचन्द्रः ॥

उपलेपः । पुं । उपलेपने ॥

उपलेपनम् । न । गोमयादिना आलेपे । उपाञ्जने ॥ उपलिप्यते । लिपउपदेहे । कर्मणि ल्युट् ॥

उपवटः । पुं । प्रियालवृक्षे । पियाले ॥

उपवनम् । न । आरामे । कृत्रिमेवृक्षसमूहे ॥ पुष्पप्रधाने रोपितवृक्षसमूहे ॥ उपगतं वनम् । प्रादयोगताद्यर्थे इतिसमासः ॥

उपवर्त्तनम् । न । देशे । विषये । स्थानमात्रे ॥ उपवर्त्तन्तेऽत्र । वृतु० । घञोल्युटोपवादत्वादन्यथापीतियुच् ॥

उपवर्षः । पुं । मुनिविशेषे । कृतकोटौ ॥

उपवर्हः । पुं । शिरोधाने । उपधाने ॥ उपवृह्यतेऽत्रानेनवा । वृहवृद्धौ वृहू उद्यमनेवा । घञ् ॥

उपवर्हणम् । न । उपवर्हे । उच्छीर्षके ॥ उप वृह० । ल्युट् ॥

उपवल्लिका । स्त्री । अमृतस्रवालतायाम् ॥

उपवसथः । पुं । ग्रामे ॥ उपवसन्त्यित्र । वस० । उपसर्गेवसेरित्यथः ॥

उपवस्तम् । न । उपवासे । उपवसनम् । वसुस्तम्भे । भावे क्तः । अनेकार्थत्वादभोजनेवृत्तिः ॥

उपवासः । पुं । उपवस्ते । अहोरात्रभोजनाभावे ॥ तपनोदयमारभ्य यामाष्टकमभोजनम् । उपवासः सविज्ञेयः प्रायश्चित्तेविधीयते । शास्त्रोदिते नित्ये काम्येवा अहोरात्राभोजने ॥ वैधोपवासे भोजनचतुष्टयनिवृत्तिरुक्तामहाभारते । सायमाद्यन्तयोरह्नोः सायम्प्रातश्च मध्यमे । उपवासफलं प्रेप्सोर्वर्ज्यं भक्तचतुष्टयमिति ॥ काम्योपवासाश्च महाभारते । त्रिरात्रं पञ्चरात्रंवा पक्षव्रतमथापिवा । मासोपवासान् कुर्याद्वाचान्द्रायणमथा

ऽपिवेति ॥ उपावृत्तस्य पापेभ्योयस्तु
वासोगुणैःसह । उपवासः सविज्ञे-
यःसर्वभोगविवर्जितः ॥ उपावृत्तस्य
निवृत्तस्य। पापेभ्यः पापकर्मभ्यः । गु
णाः सर्वभूतेषुदया क्षान्तिः अनसूया
शौचम् अनायासः मङ्गलम् अकार्प
ण्यम् अस्पृहाच । सर्वभोगविवर्जितः
शास्त्राननुमतन्नृत्यगीतादिसुखर
हित इत्यर्थः ॥ उपवासासामर्थ्ये-
प्रतिनिधयःस्कन्दपुराणे । पुत्रं वा वि
नयोपेतं भगिनीम्भ्रातरंतथा । एषा
मभावएवान्यं ब्राह्मणंविनियोजयेत्
॥ गरुडपुराणे । भार्याभर्तृव्रतंकु-
र्यात् भार्यायाश्चपतिस्तथा । असा-
मर्थ्ये द्वयोस्ताभ्यांव्रतभङ्गोनजायते ॥
अनुकल्पमाह वायुपुराणे । नक्तंहवि
ष्यान्नमनोदनञ्च फलंतिलाः क्षी
रमथाम्बुचाज्यम् । यत् पञ्चगव्यंय-
दिवाथवायुः प्रशस्तमत्रोत्तरमुत्तरञ्च
ति ॥ उपवासासमर्थे विशेषमाह ब्रह्म
वैवर्त्ते । उपवासासमर्थश्चेदेकं विप्र
न्तुभोजयेत् । तावद्धनानिवादद्याद्य
द्भक्ताद्द्विगुणं भवेत् ॥ सहस्रसम्मि-
तांदेवींजपेद्वा प्राणसंयमान् । कु-
र्याद्द्वादशसंख्याकान्यथा शक्तिव्रतेन
रः ॥ बौधायनस्त्वाह । अष्टौतान्यव्र
तघ्नानि आपोमूलंफलंपयः । हवि

र्ब्राह्मणकाम्याचगुरोर्वचनमौषध-
मिति ॥ अत्र श्रीसदाशिवः ॥ क
लावन्नगताः प्राणानोपवासः प्रश-
स्यते । उपवासप्रतिनिधावेकंदानंवि
धीयतेइति ॥ उपवसनम् । वसनि-
वासे । घञ् ॥ उपवासफलंनश्येद्दि
वास्वप्नाच्च मैथुनात् । स्त्रीणांसम्भव
णात्स्पर्शात् ताभिःसङ्कथनादपीत्ये
कादशीतत्त्वम् । सङ्कथनम् सम्यग्
भाषणम् ॥

उपवासी । त्रि । उपवासयुक्ते । व्रतोप
वासनिष्ठे तपस्विनि ॥ उपवासोऽस्या
स्ति । इनिः ॥

उपवाह्यः । पुं । राजवाहकहस्तिनि ।
राजवाह्ये ॥

उपविषम् । न । कृत्रिमविषे । गरे । चा
रे ॥ पुं । गौणविषे ॥ अर्कक्षीरं स्नु
हीक्षीरं तथैवकलिहारिका । करवी
रोधत्तूरः पञ्चचोपविषाः स्मृताः
॥ तत्रतत्रगुणाह्येषांद्रष्टव्याः सुवि-
चक्षणैः ॥

उपविषा । स्त्री । महौषधे । शृङ्ग्या
म् । अतीस इतिभाषा ॥ विषमुपग
ता । शुक्लकन्दाचोपविषा भङ्गुराघुण
वल्लभा ॥

उपविष्टः । त्रि । आसीने । आसनाव
स्थिते । समासीने । बैठा इतिभा

उपविशतेःक्तः ॥

उपविष्टहोमः । पुं । स्वाहाकारप्रयोगान्ते याज्यापुरोनुवाक्यारहिते होमे ॥

उपविष्टिः । स्त्री । आस्यायाम् । स्थितौ ॥

उपवीतम् । न । वामांसस्थापिते यज्ञसूत्रे । यज्ञोपवीते । त्रिगुणीकृत्य-त्रिगुणितेकार्पासादिसूत्रविशेषे ॥ तदुक्तंछन्दोगपरिशिष्टे। ऊर्द्धन्तुत्रिवृतं कार्यं तन्तुत्रय मधोवृतम् । त्रिवृतच्चोपवीतं स्यात तस्यैकोग्रन्थिरिष्यतइति॥ उपवीयतेस्म। अजगं० अजेर्व्यघञपोः। वीगत्यादिषु वा । क्तः ॥ यद्वा । उपाजतिस्म उपवेतिस्मवा । गत्यर्थेतिक्तः ॥ उपवीतं यज्ञसूत्रं-प्रोद्धृतेदक्षिणेकरे । प्रोद्धृतेवहिष्कृतेसति वामस्कन्धार्पितइत्यर्थः ॥

उपवीती । पुं । उपवीतवतिद्विजे ॥ उद्धृतेदक्षिणेपाणावुपवीत्युच्यतेद्विजः । दक्षिणेपाणौ उद्धृते वामस्कन्धस्थिते दक्षिणकक्षावलम्बे यज्ञसूत्रेवस्त्रेवा उपवीती द्विजःकथ्यतइत्यर्थः । उपवीतमस्यास्ति । अतइनिठनाविनीनिः ॥

उपवृंहितः । त्रि । वर्द्धिते ॥

उपवेदः । पुं । प्रधानवेदातिरिक्तवेदे ॥ सचतुर्विधः । आयुर्वेदोधनुर्वेदोगा-न्धर्ववेदोऽर्थशास्त्रमितिभेदात। तत्रर्ग्वेदस्यायुर्वेदउपवेदः । यजुर्वेदस्य धनुर्वेदः । सामवेदस्य गान्धर्ववेदः । अथर्ववेदस्य शस्त्रशास्त्राणीति शौनकोक्तचरणव्यूहः ॥

उपवेशनम् । न । स्थितौ ॥

उपव्याघ्रः । पुं । मृगान्तके । चित्रके । चीताइति भाषा सिद्धे ॥

उपव्याख्यानम् । न । विस्पष्टप्रकथने ॥

उपशमः । पुं । शमे । इन्द्रियाणां संयमे । तृष्णाक्षये ॥ यतेरुपशमोधर्म इति स्मृतिः ॥ अभावे । प्रतीकारे ॥ सा कल्यनाशे ॥ उपशमनम् । शम । भावेघञ् ॥ उपशाम्यत्यनेनवा । हलश्चेति घञ् ॥

उपशयः । पुं । निदानपञ्चकान्तर्गतरोगज्ञानजनके ॥ तल्लक्षणम् । हेतु-व्याधिविपर्यस्तविपर्यस्तार्थकारिणाम् । औषधान्नविहाराणामुपयोगंसुखावहम् ॥ विद्यादुपशयंव्याधेःसहि सात्म्यमितिस्मृतः ॥ इतिनिदानम् ॥व्याधिहेतुविपरीतौषधादितः सुखावहोपयोगे ॥ न । समीपशयने ॥ त्रि । शयमाने ॥ उपशयनम् । शीङ्० एरच् ॥

उपशल्यम् । न । ग्रामान्ते । ग्रामान्तभागे ॥ शल्यमुपगतम् । प्रादिसमासः॥

उपशान्तः। त्रि। बाधिते। सम्यग्बाधिते॥ यथा। उपशान्तजगज्जीवविशिष्याचार्य्येश्वरभ्रममिति॥

उपशान्तिः। स्त्री। शमे॥ उपशमनम्। शम॰। स्त्रियां क्तिन्॥

उपशायः। पुं। प्रहरिणांक्रमेणशयने। विशाये॥ उपशयनम्। शीङ्॰। व्युपयोः शेतेः पर्य्याये इति घञ्। तवाथराजोपशायः॥

उपश्रुतम्। त्रि। अङ्गीकृते। स्वीकृते॥ उपश्रूयतेस्म। श्रुश्रवणे। क्तः॥

उपश्रुतिः। स्त्री। दैवप्रश्ने॥ यथा। नक्तंनिर्गत्य्यंयत्किञ्चिच्छुभाशुभकरंवचः। श्रूयते तद्विदुर्धीरा दैवप्रश्नमुपश्रुतिमिति॥ उपश्रूयते। श्रु॰। कर्मणिस्त्रियां क्तिन्॥

उपश्लेषः। पुं। सम्बन्धविशेषे॥ यथा-आधाराधेययोरन्यत्रसिद्धयोः प्रादेशिकःसम्बन्ध उपश्लेषः। कटेआस्ते स्थाल्यांपचतीत्यत्रौपश्लेषिकाधिकरणे सप्तमी॥

उपष्टम्भकम्। न। स्थूणायाम्॥ पुं। आधिक्ये॥

उपसंयमः। पुं। उपसंहारे॥

उपसंव्यानम्। न। परिधानांशुके। अशरीये॥ उपसंवीयतेऽनेन वा। व्येञ् संवरणे। कृत्यल्युटइतिल्युट्॥

उपसंहरणम्। न। उपसंहारे॥ ल्युट्॥

उपसंहारः। पुं। समाप्तौ॥ संग्रहे॥ उपसंहरणम्। हृञ्॰। घञ्॥

उपसङ्ग्रहः। पुं। अभिवादे। पादस्पर्शपूर्वकनमस्कारे। पादग्रहणे॥ मेलने॥ उपसङ्ग्रहणम्। ग्रहउपादाने। ग्रहवृद्दनिश्चिगमश्चेत्यप्॥

उपसङ्ग्राह्यः। त्रि। अभिवाद्ये। उपसङ्ग्रहणीये॥

उपसत्तिः। स्त्री। सेवायाम्॥ सङ्गमाबे॥ प्रतिपादने॥ उपसदेर्भावेक्तिन्॥

उपसद्। पुं। प्रवर्ग्याङ्गः प्रसिद्धायामिष्टौ॥ गार्हपत्त्यादित्रयभिन्नेऽग्नौ॥ यथा। गार्हपत्त्योदक्षिणाग्निस्तथैवाहवनीयकः। एतेऽग्नयस्त्रयोमुख्याः शेषाश्चोपसदस्त्रयइतिवह्निपुराणे गणभेदनामाध्यायः॥

उपसद्व्रती। पुं। उपसत्सु इष्टिषुव्रतंपयोमात्रभक्षणंतदुपेत॥

उपसन्नः। त्रि। उपनते। उपस्थिते॥ यथा। भगवन्नुदधौ मृतिजन्मजले सुखदुःखझषे पतितंव्यथितम्। कृपयाशरणागत मुद्धरमा मनुशाध्युपसन्नमनन्यगतिन्त्विति तोटकाचार्य्याः॥ शरणागते॥ उपासदत उपसीदतिस्मावा। षद्लृ॰। गत्यर्थेतिक्तः॥

उपसमाधानम्। न। राशीकरणं॥

उपसम्पन्नः । त्रि । प्रमीते । प्रोषिते । यज्ञार्थहतपशौ ॥ प्रणीते । सुसंस्कृते । पाकेनसंस्कृते मांसादौ ॥ पर्याप्ते ॥ प्राप्ते ॥ मृते ॥ उपसम्पद्यते स्म । तौपदग । कर्त्तरि कर्मणि वा गत्यर्थेति क्तः ॥

उपसम्भाषा । स्त्री । उपसान्त्वने ॥ सम्भाषणे ॥

उपसरः । पुं । स्त्रीगव्यादिषु पुङ्गवादीनां प्रथमगर्भाधानाय मैथुनाभियोगे । प्रजने ॥ उपसरणम् । सृगतौ । प्रजनेसर्त्तेरित्यप् । यथा गवामुपसरः ॥

उपसरणम् । न । समीपगमने ॥ उपसर्त्तव्ये ॥ सृ० । ल्युट् । उपसमीपे सरणम् ॥

उपसर्गः । पुं । रोगप्रभेदे ॥ उपप्लवे । उत्पाते । उपद्रवे । शुभाशुभसूचकमहाभूतविकारे ॥ क्रियायोगे प्रपरादिषु ॥ यथा । निपाताश्चादयो ज्ञेया उपसर्गास्तु प्रादयः । द्योतकत्वात् क्रियायोगे लोकादवगता इमे ॥ स त्रिधा । धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते । तमेवविशिनष्ट्यन्यउपसर्गगतिस्त्रिधा ॥ क्रमेणोदाहरणानि यथा । आदत्ते प्रहृते प्रणमतीति ॥ अपिच । उपसर्गेण धात्वर्थो

बलादन्यत्रनीयते । प्रहाराहारसंहारविहारपरिहारवत् ॥ उपसर्ज्जनम् उपसृज्यते वा । सृज० । घञ् ॥

उपसर्ज्जनम् । न । प्रधानभिन्ने । गौणे । अप्राग्र्ये । अमुख्ये । विशेषणे ॥ त्यागे ॥ उपसृज्यते । सृज० । कर्मणि ल्युट् ॥

उपसर्त्तव्यम् । त्रि । उपगन्तव्ये ॥

उपसर्पकः । त्रि । उपासके । उपसर्पणकर्त्तरि ॥

उपसर्पणम् । न । अनुगमने । अनुवृत्तौ ॥ सृप्लृगतौ ल्युट् ॥

उपसर्य्या । स्त्री । ऋतुमत्यां गवि । काल्यायाम् । गर्भाधानार्थं वृषभेणोपगन्तुं योग्यायाम् ॥ उपस्रियते वृषेण । सृगतौ । उपसर्य्याकाल्याप्रजने इति साधुः । काल्यापसर्याप्रजने इत्यमरः ॥

उपसादितः । त्रि । प्रापिते ॥

उपसार्य्यः । त्रि । समीपगमनीये ॥ प्राप्तव्ये ॥ कर्मणि ण्यत् ॥

उपसुन्दः । पुं । रामायणप्रसिद्धे सुन्दभ्रातरि राक्षसे ॥

उपसूर्य्यकम् । न । चन्द्रार्कमण्डले । चन्द्रार्कसमीपवर्त्तिनिमण्डले ॥ उपगतंसूर्यम् उपसूर्यम् । प्रादिसमासः । ततःस्वार्थे कन् । चन्द्रपक्षे उप

सूर्यमिव । इवार्थे कन् ॥

उपसूर्यकमण्डलम् । न । परिवेषे ॥

उपसृप्यः । त्रि । गम्ये ॥

उपसृष्टम् । न । मैथुने । सुरते ॥ त्रि । उपसर्गयुक्ते । विसृष्टे ॥

उपसेकः । पुं । सेचनेन मृदुकरणे ॥

उपसेचनम् । न । घृते ॥ उपसिच्यते । सिच्यक्षरणे । ल्युट् ॥

उपस्करः । पुं । कटककुण्डलहारादौ ॥ वेसवारे । व्यञ्जनादिसंस्कारार्थं धन्याकसर्षपादिपिष्टे ॥ दृषदुपलसूर्पादौ । गृहोपकरणकुण्डसम्मार्जन्यादौ ॥ उपकरोति व्यञ्जनेन समवैति । डुकृञ्० । समवायेचेतिसुट् ॥

उपस्करणम् । न । परिकरे ॥

उपस्कृतः । त्रि । मण्डिते ॥

उपस्तरणम् । न । आस्तरणे ॥ उपस्तीर्यते । स्तृञ्० । ल्युट् ॥

उपस्थः । पुं । न । लिङ्गे । शेफसि ॥ भगे । मदनागारे ॥ क्रोडे ॥ त्रि । समीपस्थे ॥ उपतिष्ठते । ष्ठा० । सुपीतिकः । अर्द्धर्चादिः ॥

उपस्थपत्रः । पुं । भाण्डीरे । वटे ॥

उपस्थाता । त्रि । भृत्ये । सेवके ॥

उपस्थानम् । न । नमस्करणे ॥ उपेत्य स्थानम् ॥ उपस्थीयते । ष्ठा० । ल्युट् ॥ सङ्गतौ ॥

उपस्थितः । त्रि । आगते ॥ निकटस्थिते । उपसन्ने ॥ प्राप्ते ॥ उपपूर्वात्तिष्ठतेर्गत्यर्थाकर्मकेति क्तः । स्थति स्यतीतीत्त्वम् ॥

उपस्पर्शः । पुं । स्पर्शमात्रे ॥ स्नाने ॥ आचमने ॥ उपस्पर्शनम् । स्पृशस्पर्शे । घञ् ॥ उपस्पृश्यन्ते खान्यत्र । हलश्चेत्यधिकरणे घञ्वा ॥

उपस्पर्शनम् । न । उपस्पर्शे ॥ स्पृशे ल्युट् ॥

उपस्पृष्टः । त्रि । आचान्ते ॥ सन्निधिमात्रेण सेविते ॥ उपस्पृशेः क्तः ॥

उपस्वत्वम् । न । उत्पन्ने । लभ्ये । तस्मिन्ने ततएवापजाते स्वत्वास्पदीभूतभूम्यादिलब्धधनादौ ॥

उपहतः । त्रि । तिरस्कृते ॥ विघट्टिते ॥ अशुद्धद्रव्ये ॥ उत्पातग्रस्ते ॥ नष्टे ॥ यथा । कृत्वाशस्त्रविभीषिकां कतिपयग्रामेषुदीनाः प्रजा मग्नास्तोपिटजल्पितैरुपहताः चोणीभुजस्तेकिल । विद्वांसोपिवयं किल त्रिजगतां सर्गस्थितिध्यापदामीशस्तत्परिचर्ययानगणितोयैरेषनारायणः इति ॥

उपहसितम् । न । हास्यप्रभेदे ॥

उपहारः । पुं । उपायने । भेट इतिभाषा ॥ नैवेद्यादिपूजासामग्र्याम् ॥ उपह्रियते । हृञ्० । घञ् ॥

उपहारपाणिः । त्रि । उपायनहस्ते ॥ उपहारः पाणौ यस्य ॥

उपहालकः । पुं । कुन्तलाख्यदेशे ॥

उपहासः । पुं । परीहासे । निन्दार्थवाक्यादौ । हांसी ठट्ठा इति भाषा ॥ उपहासाय किं न स्यादसत्सङ्गो मनीषिणाम् ॥

उपहितः । त्रि । आहिते ॥ उपधीयते स्म । डुधाञ् ०क्तः । दधातेर्हिरिति-प्रकृतेर्हिरादेशः ॥

उपहृतः । त्रि । समर्पिते ॥

उपह्वरः । पुं । रथे ॥ न । एकान्ते । रहसि ॥ निकटे ॥ उपह्वरे गन्तव्येसमीपदेशेइतिवेदभाष्यम् ॥ उपह्वरन्त्यच । ह्वृ कौटिल्ये । पुंसीतिघः ॥

उपांशु । अ । विजने । रहसि ॥ अप्रकाशोच्चारणे ॥

उपांशुः । पुं । जपविशेषे ॥ यत्समीपस्थोपिपरोनशृणोति तदुपांशुरित्युच्यते । यत्तदोरुच्चारणमर्थः । जिह्वौष्ठौचालयेत् किञ्चिद्देवतागतमानसः । निजश्रवणयोग्यः स्यादुपांशुः सजपः स्मृतः ॥ विधियज्ञाज्जपयज्ञो विशिष्टोदशभिर्गुणैः । उपांशुः स्याच्छतगुणः ॥ उपगताः अंशवोयत्र ॥

उपाकरणम् । न । श्रुतेः संस्कारपूर्वग्रहणेस ॥ संस्कार उपनयनं पूर्वंयत्र तत् तच्चतद्ग्रहणञ्च । संस्कारपूर्वग्रहणंस्यादुपाकरणंश्रुतेरित्यमरः ॥ श्रावण्यादिविधातव्ये संस्कारविशेषे ॥ प्रारम्भे ॥ संस्कारपूर्वंपशूनां हनने ॥ उपाक्रियतेऽनेन तत् । कृञो ल्युट् ॥

उपाकर्म्म । न । उपाकरणे ॥

उपाकृतः । पुं । अध्वरे अभिमंत्र्यहतेपशौ ॥ उपद्रवे ॥ त्रि । उपद्रुते ॥ प्रारब्धे ॥ उपाक्रियतेस्म । कृञ् हिंसायाम् । क्तः ॥

उपाख्यः । त्रि । प्रत्यक्षतउपलब्धे । प्रत्यक्षे ॥ उप आख्यायते । ख्या० । आतश्चोपसर्गइत्यङ् ॥

उपाख्यानम् । न । आख्याने । पुराणादिग्रथितवार्त्तायाम् । वर्णने ॥ उपाङ्पूर्वात्ख्यातेर्ल्युट् ॥ विशेषकथने ॥

उपागमः । पुं । समीपगमने ॥ स्वीकारे ॥ उपागमनम् । गम्लृ० । ग्रहवृद्रिश्चादिना अप् ॥

उपाङ्गः । पुं । तिलके । तमालपत्रके । पत्रलेखायाम् ॥

उपाजे । अ । दुर्बलस्यसामर्थ्याधाने ॥ सप्तमीप्रतिरूपकोयं निपातः ॥

उपाजेकृत्य । अ । दुर्बलस्यबलमाधायेत्यर्थे ॥ उपाजेऽन्वाजे इतिगतिसंज्ञा । कुगतीतिसमासः ॥

उपाजेकृत्वा । अ । उपाजेशब्दार्थे ॥

उपाञ्जनम् । न । उपलेपने ॥

उपात्तः । पुं । निर्मदहस्तिनि ॥ त्रि । गृहीते । स्वीकृते ॥ प्राप्ते ॥ यथा । यत्किञ्चिदुपात्तस्य दुरितस्य प्रणश्यते ॥

उपात्ययः । पुं । प्राप्ते लोकव्यवहाराद्यतिक्रमे ॥ अतिक्रमे । क्रमोल्लङ्घने ॥ उपात्ययनम् । इण० । एरच् । उपगतस्यातिक्रम्यायनं वा ॥

उपादानम् । न । स्वस्वविषयेभ्य इन्द्रियाणां विकर्षणे । प्रत्याहारे ॥ हेतौ ॥ ग्रहणे ॥ अननुष्ठितस्यानुष्ठाने ॥ समवायिकारणे ॥ प्रवृत्तिजनकज्ञाने ॥ उत्पादके । उत्पत्तिस्थितिनाशाय-कारणे ॥ उपादानोल्युट् ॥ आरम्भे ॥

उपादानाख्या । स्त्री । तुष्टेः प्रभेदे ॥ यातुप्रकृत्यापि विवेकख्यातिः नसा प्रकृतिमात्राद्भवति मास्मभूत् सर्वस्य सर्वदा तन्मात्रस्य सर्वान् प्रत्यविशेषात् । प्रव्रज्यायास्तु सा भवति तस्मात् प्रव्रज्यामाददीथाः कृतं ते ध्यानाभ्यासेनेत्यायुष्मन्नित्युपदेशे या आध्यात्मिकातुष्टिः सा उपादानाख्या नामवृत्तौ या सलिलमुच्यते ॥ उपादानमित्याख्यायस्याः ॥

उपादिकः । पुं । कीटविशेषे । वल्मीक । देहिकायाम् ॥

उपादेयः । त्रि । उत्कृष्टे । उत्तमे । ग्राह्ये ॥

उपाधिः । पुं । धर्मचिन्तायाम् ॥ कुटुम्बव्यापृते ॥ छले ॥ विशेषणे ॥ यथा । धर्मादेवश्च विप्रस्य वर्ज्जितानाञ्च भूभुजः । भूतिदर्पस्य वैश्यस्य दासः शूद्रस्य कारयेदिति ॥ यः स्वधर्ममन्यनिष्ठतया भासयति सः । उपाधेः प्रतिबिम्बपक्षपातित्वं न बिम्बपक्षपातित्वम् । लक्षणन्तु । यावत्कार्यमवस्थायिभेदहेतौ उपाधितेति ॥ अयथार्थव्यवहृतौ ॥ साध्यव्यापकत्वे सति हेतोरव्यापके ॥ यथा । धूमवान् वह्निरित्यत्र आर्द्रकाष्ठमुपाधिः । यत्र धूमस्तत्रार्द्रेन्धनसंयोग इति साध्यव्यापकता । यत्र वह्निस्तत्रार्द्रेन्धन संयोग इति नास्ति अयोगोलके आर्द्रेन्धनाभावात् । अस्य प्रयोजनम् । व्यभिचारस्यानुमानम् ॥ समीपआधेः । उपपदआधिर्वा । आधानमाधिः । उपसर्गयोः किः । उपगत आधिम् । अत्यादय इति समासः । उपधीयतेऽनेनेति वा ॥

उपाध्यायः । पुं । अध्यापके ॥ वेदैकदेशाध्यापके ॥ यथाह मनुः । एकदेशन्तु वेदस्य वेदाङ्गान्यपि वा पुनः । योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते इति ॥ उपेत्यास्मादधीयत इति वि-

ग्रहः । इङश्चेति घञ् ॥

उपाध्याया । स्त्री । उपाध्याय्याम् । स्वयंविद्योपदेशिन्याम् ॥ उपेत्याधीयतेऽस्याः । इङश्चेतिसूत्रे अपादाने स्त्रियामुपसङ्ख्यानं तदन्ताच्चवाङी-षितिघञ् । टाप् ॥

उपाध्यायानी । स्त्री । उपाध्यायपत्न्याम् ॥ उपाध्यायस्य स्त्री । मातुलोपाध्याययोरानुग्वा

उपाध्यायी । स्त्री । उपाध्यायायाम् । स्वयंविद्योपदेशिन्याम् ॥ उपेत्य अस्या अधीयते इति विग्रहे यातु स्वयमेवाध्यापिका तत्र वा ङीष्वाच्य इति इङश्चेतिसूत्रस्य वार्त्तिकात् घञ् पक्षे ङीष् ॥ उपाध्यायान्याम् ॥ उपाध्यायस्य स्त्री । मातुलोपाध्याययोरानुग्वेत्यानुगभावः ॥

उपानत् । स्त्री । पन्नध्याम् । पादुकायाम् । चर्मादिनिर्मितेपादकोषे ॥ अस्या धारणविधिर्यथा । वर्षातपादिके छत्री दण्डी रात्र्यटवीषु च । शरीरत्राणकामो वै सोपानत्कः सदाव्रजेदिति ॥ गुणा यथा । पादूप्रधारणं वृष्यमोजस्यं चक्षुषोर्हितम् । सुखप्रचारमायुष्यं वल्यं पादरुजापहमिति ॥ पादे उपनह्यते वध्यते । पादम् उपनह्यति वा । णहबन्धने । सम्पदादि-

त्वात् क्विप्चेतिवाक्विप् । नहिवृतिवृषीतिपूर्वपदस्य दीर्घः ॥

उपान्तः । त्रि । निकटे ॥ प्रान्ते ॥

उपान्त्यम् । त्रि । अन्त्यसमीपे ॥ उत्तरभाद्रपदायाम् ॥

उपायः । पुं । राजादीनामरिवशीकरणहेतौ सामादिचतुष्टये । भेदोदण्डः साम दानमित्युपायचतुष्टयमित्युक्ते ॥ क्वचित् सप्तोपाया अप्युक्ताः । यथा । सामदानञ्चभेदश्चदण्डश्चेतिचतुष्टयम् । मायोपेक्षेन्द्रजालञ्चसप्तोपायाः प्रकीर्त्तिताइति । शृङ्गारेतुपराविद्भिरुपायौद्वौ प्रकीर्त्तितौ ॥ यथा । उपायौद्वौप्रयोक्तव्यौ कान्तासु सुविचक्षणैः । सामदानाविति प्राहुः शृङ्गाररसको विदाः ॥ भेदे प्रयुज्यमाने हि रसाभासस्तु जायते । निग्रहे रसभङ्गः स्यात्तस्मात्तौदूषितौबुधैः ॥ भेदे कपटस्यावश्यं जायमानत्वात् कपटं विना भेदासम्भवात् सतितस्मिन् कपटे रसाभास एव ॥ उपगतौ ॥ स्वार्थसम्पादके । साधने । पुरुषकारे ॥ उपायतेऽनेन । अय० । हलश्चेति घञ् ॥

उपायज्ञः । त्रि । कार्यसाधनकुशले ॥

उपायनम् । न । तोषकारिणि । उपहारे ॥ व्रतादिप्रतिष्ठायाम् ॥ उपगमने

॥ उपेयते उपाय्यतेवा। इणगतौ अयगतौवा। कर्मणि ल्युट् ॥

उपारत:। त्रि। सन्निवृत्त ॥

उपार्ज्जनम्। न। उद्योगादिना ऽर्थसङ्ग्रहे। अर्ज्जने ॥ स्वत्वहेतुभूतव्यापारे इतिस्मृति: ॥

उपार्ज्जित:। त्रि। कृतोपार्जने ॥

उपालब्ध:। त्रि। अधिक्षिप्ते ॥

उपालम्भ:। पुं। दुर्वचने। दुर्वाक्ये ॥ सत्वगुणाविष्करणेन स्तुतिपूर्वक:। यथा। महाकुलस्य भवत: किमिदमुचितमिति। निन्दापूर्वकश्च। यथा। वन्धकीसुतस्य भवत स्तदिदमुचितमिति ॥ परपक्षदूषणे ॥ उपालभ्यते। लभ०। घञ्। उपसर्गात् खल् घञोरितिनुम् ॥

उपावृत्त:। त्रि। श्रमशान्त्यर्थं मुहुर्भूमौ लुठिताश्वे। लुठिते ॥ पुनरागते ॥ निवृत्ते ॥ उपावृत्तस्य पापेभ्य: पापेभ्यो निवृत्तस्येत्त्यर्थात् ॥ उपावर्त्तेस्म। वृतु०। क्त: ॥

उपाश्रय:। पुं। आश्रये ॥ उपाश्रयणम्। श्रिञ्०। एरच् ॥

उपाश्रित:। त्रि। एकान्तप्रेमभक्त्या शरणङ्गते॥ उपाश्रयति उपाश्रीयते स्म वा। श्रिञ्०। गत्यर्थेतिकर्मणि क्त: ॥

उपासक:। पुं। स्त्री। शूद्रे। सेवके ॥ त्रि। उपासनाकर्त्तरि ॥ शाक्त: शैवो वैष्णवश्च सौरो गाणपतस्तथा। दिव्योर्वीर: पशुश्चैव तेषु भावा स्त्रयो मता: ॥ सात्त्विकादिविभेदेन पुनश्चैते विभेदिता: ॥ उपासते। उप आस०। ण्वुल् ।

उपासङ्ग:। पुं। तूणीरे ॥ उपासज्यन्ते शरा: अत्र। षञ्जसङ्गे। हलश्चेति घञ् ॥

उपासनम्। न। शराभ्यासे ॥ उप अस्तु क्षेपणे। भावे ल्युट् ॥ उपास्तौ ॥ आसने ॥ सगुणब्रह्मविषयकमानसव्यापाररूपे शाण्डिल्यविद्यादौ ॥ शुश्रूषानमस्कारादिप्रयोगेण सेवने ॥ भावनायाम् ॥ लौकिकात्माभिमानवत् यावतत्तद्देवतादिस्वरूपात्माभिमानाभिव्यक्ति स्तावल्लौकिकप्रत्यया ऽव्यवधानेन स्वेष्टदेवतादिरूपं मनसोपगम्य आसनंचिन्तनमित्त्यर्थ: ॥ नकैवल्यमुपासनात् ॥ आ:सउपवेशने। भावेल्युट् ॥

उपासना। स्त्री। वरिवस्यायाम्। शुश्रूषायाम्। परिचर्य्यायाम् ॥ देवाराधने। देवताचिन्तने ॥ अथोक्तं श्रीदेवीभागवते। न विष्णूपासना नित्त्या वेदेनोक्तातुकुत्रचित्। नविष्णुदीक्षानित्त्यास्तिशिवस्यापितथैव

च ॥ गायत्र्युपासनानित्यासर्ववेदैः
समीरिता । ययाविना त्वधः पाता-
ब्राह्मणस्यास्तिसर्वथा ॥ तावता कृत
कृत्यत्वं नान्यापेक्षाद्विजस्यहि । गा
यत्रीमात्रनिष्णातो द्विजो मोक्षम-
वाप्नुयात् ॥ कुर्यादन्यन्नवा कुर्यादि
तिप्राहमनुःस्वयम् । विहायतान्तुगा
यत्रींविष्णूपास्तिपरायणः ॥ शिवो-
पास्तिरतोविप्रोनरकंयातिसर्वथा ।
तस्मादाद्ययुगेराजन् गायत्रीजपत
त्पराः ॥ देवीपादाम्बुजरता आसन्
सर्वेद्विजोत्तमाः ॥ इति ॥ उपासना
प्रयोजनं चित्तैकाग्र्यम् सूक्ष्मार्था
वधारणसमर्थत्वम् । तत्तल्लोकप्राप्ति
रुपासनाया अवान्तरफलम् ॥ उपास
नम् । आस० । ण्यासेतियुच् । टाप् ॥

उपासितः । त्रि । वरिवसिते । सेविते ।
कृतोपासने ॥ उपास्यते स्म । आस०
। गत्यर्थेति क्तः ॥

उपासीनः । त्रि । समीपस्थे ॥ उपसमी
पे आसीनः ॥ कृतोपासने ॥

उपास्तिः । स्त्री । सेवायाम् । तात्पर्य-
वानुष्ठाने ॥ उप आस० । क्तिन् ॥

उपास्यः । त्रि । आराध्ये ॥ ध्येये ॥ उपा
सितुं योग्यः । ण्यत् ॥ उपास्यं यन्मत
युपास्तत्त्वमित्येषवितण्डिनः ॥

उपाहतम् । त्रि । ताडिते ॥ उपाहन्य
ते स्म । हन । क्तः ॥

उपाहितः । पुं । अनलोत्पाते । उल्का
पातादौ । अन्युत्पाते ॥ उप आस
न्नमाहितंफलंयस्य ॥ त्रि । आरोपि
ते ॥ संयोजिते ॥ उपाधीयते स्म । द
धातेर्हिः । क्तः ॥

उपाह्वयः । पुं । उपनामनि ॥

उपेक्षकः । त्रि । द्वयोर्विवदमानयोर्जय
पराजयासंसर्गिणि । तत्कृतहर्षविषा
दाभ्यामसंस्पृष्टे । उदासीने ॥ प्रती
काररहिते ॥

उपेक्षणम् । न । त्यजने । वर्जने ॥

उपेक्षा । स्त्री । क्षुद्रोपायभेदे । त्यागे ॥
अयन्तुयुद्धविषये ॥ औदासीन्ये । अ
नपेक्षणे ॥ यथा । अपुण्यवत्सुचौदा
सीन्यमेवभावये नानुमोदनं नचाद्वे
षम् ॥ उपेक्षणम् । ईक्ष० । गुरोश्चे
त्यः । टाप् ॥

उपेक्षिता । त्रि । उपेक्षायाः कर्त्तरि ॥

उपेक्ष्यः । त्रि । उपेक्षाबुद्धिविषये । य
थेष्टाद्वेषयोरभावस्तस्मिन् ॥

उपेतः । त्रि । युक्ते ॥ अनुगते ।

उपेता । पुं । उपायेनोपेयस्य साधके-
आत्मनि ॥

उपेन्द्रः । पुं । केशवे । विष्णौ ॥ इन्द्रमु
पगतोऽनुजत्वात् । कुगतीतिसमा
सः ॥ इन्द्रलोकादप्युपरिलोकेवर्त्त

मानस्त्वाहा । ममोपरियथेन्द्रस्त्वंस्था पितागोभिरीश्वरः । उपेन्द्र इति कृष्ण त्वां गास्यन्ति दिवि देवताः । इति हरिवंशः ॥ न । इन्द्रसन्निधौ ॥ अव्ययार्थे ॥

उपेन्द्रवज्रा । स्त्री । त्रिष्टुभ्भेदे । एकादशाक्षरावृत्तिविशेषे ॥ यथा । यदीन्द्रवज्रा चरणाद्यवर्णा नरेन्द्रसर्वे लघवो भवन्ति । उपेन्द्रतुल्यामलशीलशालिन्युपेन्द्रवज्राभिहितातदानीम् ॥ यथा । उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते । स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूलेमणिमण्डपस्थमिति ॥

उपेयः । त्रि । उपायसाध्ये । प्राप्तव्ये ॥

उपेयिवान् । त्रि । उपगते ॥ उपेयिवाननाश्वाननूचानश्चेति क्वसुप्रत्ययान्तोनिपातः ॥

उपेयुषी । स्त्री । सङ्गतायाम् ॥ क्वसुप्रत्ययान्ता दुगितश्चेति ङीप् ॥

उपोढः । पुं । बलविन्यासे । व्यूहे ॥ त्रि । निकटे ॥ ऊढे । विवाहिते ॥ वह्नेः कर्त्तरि क्तः ॥

उपोती । स्त्री । पूतिकायाम् । पोईशाक ॥

उपोत्तमम् । न । अन्त्यस्य समीपे ॥

उपोदकी । स्त्री । पूतिकायाम् ॥

उपोदिका । स्त्री । पोतक्याम् । मोहन्याम् । पोई इतिप्रसिद्धे पत्रशाके ॥ यथा । एकाहं षड्सोपेता किमन्यै र्व्यञ्जनान्तरैः । तण्डुलैरानतथ्याजैर्हसत्येषा उपोदिका ॥ वटपत्रवच्छुभपत्रिका परितप्ततैलसुपाचिता । नवहिङ्गुवाससुवासिता परिभोक्तृचित्तविकासिका ॥ सुतप्ततैलविपाचिता सुघनाम्लतक्रविपाचिता । सुपेषिकाज्यविभर्जिता भोक्तुरातुरसनाग्रनर्त्तकी ॥ पोतिका शीतलावल्या श्लेष्मला वातपित्तहा । पथ्या च दोषशमनी निद्रापुष्टिकरी मतेति ॥ उपाधिक मुदकमस्याम् । उत्तरपदस्य चेत्युदकस्योदादेशः । कप् । टाप् ॥

उपोदीका । स्त्री । पोतक्याम् ॥

उपोद्घातः । पुं । उदाहारे । प्रकृतापपादके । प्रकृत्यर्थं वर्णयितुमर्थान्तरवर्णने । प्रस्तोष्यमाणोपपादके । प्रतिपाद्यमर्थं बुद्धौ संगृह्य तदर्थमर्थान्तरवर्णने । युक्त्या सार्थनिदर्शने ॥ चिन्तां प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः ॥ उपसमीपे उद्घननं ज्ञापनम् । घञ् ॥ निर्दिष्टोपपादकत्वमुपोद्घात इतिजगदीशतर्कालङ्कारः ॥

उपोषणम् । न । उपवासे । अभोजने

॥ उषदाहे । ल्युट् ॥

उपोषितम् । न । उपवासे ॥ उपवसनम् । वसनिवासे । भावे गत्यर्थेति क्तः । वसतिक्षुधोरितीट् । शासिवसीति षः ॥ त्रि । कृतोपवासे ॥

उप्तः । त्रि । कृतवपने । वोया । इति भाषा ॥ अवकीर्णे । वखेरा । इति भाषा ॥ उप्यते । टुवप० । क्तः ॥ मुण्डिते ॥

उप्तकृष्टम् । त्रि । सवीजकृष्टक्षेत्रे । वीजवपनानन्तरं कर्षितक्षेत्रे । वीजाकृते ॥ उप्तञ्च तत् कृष्टञ्च । पूर्वकालेति समासः ॥

उप्तिः । स्त्री । वपने ॥ टुवप् । क्तिन् ॥

उभो । त्रि । द्वयोः ॥ द्वित्वविशिष्टस्य वाचको नित्यद्विवचनान्तोयं शब्दः ॥

उभयः । त्रि । द्विवचनोज्झितद्वयोः । युगले । दो इतिभाषा ॥ उभो अवयवौ अस्य तयप् । उभादुदात्तोनित्यमितितयपोऽयजादेशः । कथमुभये देवमनुष्याइति यतोवहूनामुभावयवौ नघटतः । नैषदोषः । अत्रहि द्वौ राशीसमुदायस्यावयवौ । एकोदेवानाम् अपरोमनुष्याणामिति ॥ उभादुदात्तोनित्यमितिनित्यग्रहणस्येदम्प्रयोजनम् वृत्तिविषये उभशब्दप्रयोगोमाभूत् उभयशब्दस्यैव यथा स्यादिति ॥

उभयतः । अ । पार्श्वद्वये ॥ सर्वतः ॥ उभयस्मात् । तसिल् ॥

उभयथा । अ । उभयप्रकारे ॥ उभयैः प्रकारैः । प्रकारवचनेथाल् ॥

उभयद्युः । अ । उभयदिने । उभयोरह्नोः ॥ द्युश्चोभयाद्वक्तव्यइतिसाधुः ॥

उभयेद्युः । अ । दिनद्वये । उभयोरह्नोः ॥ सद्यःपरुदिति उभया देद्युस् निपातितः ॥

उम् । अ । रोषे ॥ अङ्गीकृतो ॥ प्रश्ने ॥ अवनम् । उङ्शब्दे । डुम्प्रत्ययः ॥

उमा । स्त्री । कात्यायन्याम् । दुर्गायाम् ॥ ओार्महेशस्य मा लक्ष्मीः ॥ उमेति मात्रा तपसेनिषिद्धत्वाद्वा । आकारान्तादपिटाप् । टायामिति भाष्यप्रयोगात् । अजादित्वाद्वा ॥ उं शिवं माति । मामाने मिमीतेवा । माङ्माने शब्देच । आतोनुपसर्गे तिकः । अजादित्वाट्टाप् ॥ अवति ऊयते वा । उङ्शब्दे । विभाषातिलमाषोमेतिनिपातनान् मक् ॥ अतस्याम् ॥ हरिद्रायाम् ॥ कीर्त्तौ ॥ कान्त्याम् ॥ शान्तौ ॥

उमाकटम् । न । हरिद्रादिरजसि ॥ उमायारजः । अलावूतिलेतिकटच् ॥

उमागुरुः । पुं । हिमालयाचले ॥

उमाचतुर्थी । स्त्री । ज्येष्ठशुक्लचतुर्थ्याम् ॥ यथोक्तं ब्रह्मपुराणे । ज्येष्ठशुक्लचतुर्थ्यान्तुजाता पूर्वमुमासती । तस्मात्सातत्रसम्पूज्या स्त्रीभिः सौभाग्यहेतवे इति ॥

उमाधवः । पुं । सदाशिवे ॥ उमायाः धवः ॥

उमापतिः । पुं । शिवे ॥ उमायाःपतिः

उमावनम् । न । बाणपुर्य्याम् । शोणितपुरे । देवी कोटे

उमासुतः । पुं । ⎫ कार्त्तिकेये ॥ षष्ठी

उमासूनुः । पुं । ⎭ समासः ॥

उमेशः । पुं । ⎫ महादेवे । ईश्वरे ॥

उमेश्वरः । पुं । ⎭ षष्ठीसमासः ॥

उम्बरः । पुं । द्वारोर्द्ध्वकाष्ठे ॥ देहल्याम् ॥

उम्बी । स्त्री । उम्बीतिलोकप्रसिद्धे चर्व्वणे ॥ मञ्जरीत्वर्द्धपक्वा या यवगोधूमयोर्भवेत् । तृणानलेनसम्भृष्टा बुधैरुम्बीतिसास्मृता ॥ उम्बीकफप्रदा बल्याल्लघ्वीपित्तानिलापहा ।

उम्यम् । न । उमाक्षेत्रे । औमीने ॥ उमानां भवनंक्षेत्रम् । विभाषातिलमाषोमेतियत् ॥

उरःसूचिका । स्त्री । मुक्ताकृतहारविशेषे ॥ उरसः सूचमिव । इवेप्रतिकृताविति कन् ॥ ·

उरगः । पुं । वासुकिप्रभृतौ पन्नगे ॥ उरसागच्छति । उरसोलोपश्चेति डप्रत्ययः सकारलोपश्च ॥ सीसके ॥ खले ।

उरगस्थानम् । न । पाताले ॥

उरगाशनः । पुं । गरुडे ॥ उरगानश्नाति । अश० । ल्युः ॥ उरगा अशनमस्येतिवा ॥

उरणः । पुं । मेषे ॥ ऋच्छति अर्यते वा । ऋगतौ । अर्त्तेः क्युरुच्चेति क्युरादेशः ॥

उरणाक्षः । पुं । पमाटौषधौ । दद्रुघ्ने ॥ उरणस्य मेषस्याक्षिइवाक्षि यस्य तत्तुल्यपुष्पत्वात् । अक्ष्णोदर्शनादित्यच् ॥

उरणाख्यः । पुं । पमाटे । चक्रमर्द्दके । पवांड इतिभाषा ॥ उरणस्यमेषस्यआख्या आख्याऽस्य ॥

उरभ्रः । पुं । स्त्री । मेषे ॥ उरुभ्रमति । भ्रमुचलने । अन्येभ्योऽपीतिडः । पृ० ॥ यद्वा । उनाशब्देनारभ्यते । रभराभस्ये । बाहुलकाद्रक् ॥

उररी । अ । अङ्गीकृतौ ॥ विस्तारे ॥ वयतेर्बाहुलकात् ररीक् । सम्प्रसारणञ्च ॥

उररीकारः । पुं । अङ्गीकारे ॥

उररीकृतम् । त्रि । अङ्गीकृते । स्वीकृते ॥ विस्तृते ॥ उररीक्रियतेस्म । क्तः ॥

उरश्छदः । पुं । कवचे ॥ उरश्छाद्यते ऽनेन । छद् अपवारणे । पुंसीतिघः । छादेर्घ इतिह्रस्वः ॥

उरः । न । वक्षःस्थले । वक्षसि ॥ श्रेष्ठे ॥ इयर्त्ति । ऋगतौ । सर्व्वधातुभ्य-सुन् । उरादेशः किच्च ॥

उरसिजः । पुं । स्त्रीस्तने ॥ उरसिजायते । जनी० । सप्तम्यामितिडः । हलदन्तादित्यलुक् ॥

उरसिलः । त्रि । प्रशस्तवक्षोयुक्ते । उरस्वति ॥ प्रशस्त मतिशयितंवा उरो वक्षोयस्य । पिच्छादित्वादिलच् । उरसावलं लक्ष्यते इतिस्वामी ॥

उरस्कटः । पुं । वाससामुत्तरीयविशेषे । वामयज्ञोपवीतके । पक्षपटे । बुकपाछाड इतिगौडभाषाप्रसिद्धे । गाती इतिभाषा ॥

उरस्त्रम् । न । उरश्छदे ॥

उरस्त्राणम् । न । नागोदरे । वक्षस्त्राणकवचे ॥

उरस्यः । त्रि । औरसेपुत्रे । स्वजाते ॥ उरसानिर्मितः पुत्रः । उरसोऽयच्चेतियत् ॥ उरसा एकदिक्वा । उरसो यच्चेतियत् ॥ तसिः । उरस्तः ॥ उरइववा । शाखादिभ्योयः ॥

उरस्वान् । त्रि । उरसिले ॥ प्रशस्तमतिशयितंवा उरोयस्य विशालत्वात् । मतुप् । मादुपधायाश्च इतिवः ॥

उरी । अ । अङ्गीकारे ॥ विस्तारे ॥ वयतेरीक् । सम्प्रसारणञ्च वाहुलकात् ॥

उरीकारः । पुं । स्वीकारे ॥ विस्तारे ॥

उरीकृतः । त्रि । स्वीकृते ॥ विस्तृते ॥ उरीक्रियतेस्म । क्तः ॥

उरुः । त्रि । विशाले । विपुले । महति । बडे ॥ ऊर्णोति । ऊर्णुञ्० । महतिह्रस्वश्चेतिकुप्रत्ययो नुलोपो ह्रस्वश्च ॥

उरुकालः । पुं ।
उरुकालकः । पुं । } महाकाललतायाम् ।

उरुक्रमः । त्रि । भगवति ॥ उरुर्महान् क्रमः शक्तिर्यस्य ॥

उरुगायः । पुं । श्रीकृष्णे ॥ बहुकीर्त्तिमति ॥

उरुचक्षाः । त्रि । विस्तीर्णतेजसि ॥

उरुमानः । पुं । पूजायाम् ॥

उररी । अ । अङ्गीकारे ॥ विस्तारे ॥

उरुवुकः । पुं । रक्तैरण्डे ॥

उरुबूकः । पुं । एरण्डे ॥ रक्तैरण्डे ॥ उरुं महान्तं वायति । ओवै शोषणे । उलूकादयश्चेत्यूकः ॥ कार्येऽस्यमूलं ग्राह्यम् ॥

उरुव्यचाः । पुं । राक्षसे ॥

उरोजः । पुं । स्तने ॥

उर्जितः । त्रि । वर्द्धिते ॥

उद्रः । पुं । उद्रे । अम्बुबिडाले ॥

उर्बटः । पुं । वत्सरे ॥ इति त्रिकाण्ड शेषः ॥

उर्व्वरा । स्त्री । सर्वशस्याढ्यभूमौ ॥ भूमिमात्रे ॥ ऋच्छति । ऋ गतौ । पचाद्यच् । यद्वा ईर्य्यते । ऋदोरप् । उरूणामरा ॥ यद्वा । उर्व्यते । उर्व्वी हिंसायाम् । खनोघचेति घः । उपधायाश्चेतिदीर्घ स्तु संज्ञापूर्वकत्वान्न । उर्व्वराति । कः ॥ यद्वा । सम्पदादित्वात् क्विप् । राल्लोपः ॥ उर् चासौ वराच । ऊर्धुवरा वा ॥

उर्व्वरितः । त्रि । परिशिष्टे । अवशिष्टे । उवरा इतिभाषा ॥ शेषिते ॥

उर्व्वशी । स्त्री । स्वर्गवेश्यायाम् ॥ उरून् महतोऽश्नुते व्याप्नोति वशीकरोतीतियावत् । मू° कः । उरु अश्नातीतिवा ॥

उर्व्वशीरमणः । पुं । चन्द्रवंशीयनृपतिविशेषे । पुरूरवसि । ऐले ॥

उर्व्वशीवल्लभः । पुं । पुरूरवसि । बौधे ॥

उर्व्वारुः । पुं । कर्कट्याम् ॥ स्वादुकर्कट्याम् ॥

उर्व्वारुकः । पुं । कर्कटिकाख्येचिर्भिटिकाख्येवा फलविशेषे ॥

उर्व्वी । स्त्री । भूमौ ॥ ऊर्णोति । ऊर्णुञ्° । महतिह्रस्वश्चेतिकुर्नुलोपोह्रस्वश्च । वोतोगुणवचनादिति ङीष् ॥

उलपः । पुं । न । गुल्मिन्याम् । शाखापत्रप्रचयवत्यां लतायाम् । वीरुधि ॥ पुं । कोमले तृणविशेषे । बल्वजेषु । उलुखड इतिगौडभाषा ॥ वलति । वलसंवरणे । विटपविष्टपविशिपोलपा इतिवलेः सम्प्रसारणं कपश्च ॥ उल्यते । उल सौत्रः आवरणार्थोदाहार्थोवा । कपश्चात्कर्मणस्येतिकपो वा ॥

उलिन्दः । पुं । देशविशेषे ॥ इत्युणादिकोषः ॥

उलूकः । पुं । पेचके । घूके । दिवान्धे । कौशिके । उल्लू इति भाषा ॥ इन्द्रे ॥ शकुनिपुत्रे । भारतयोधिनि ॥ न । तृणविशेषे ॥ उचति । उच समवाये । उलूकादय इतिसाधुः ॥ यद्वा । वलते । वल° । उलूकादित्वा द्वलेः सम्प्रसारणमूकश्च ॥

उलूकी । स्त्री । ताम्रायाः सुता शुकी-तस्याः कन्यायाम् ॥ शुकी शुकान जनयत् उलूकीप्रत्युलूककानिति विष्णुपुराणे १ अंशे २१ अध्यायः ॥

उलूखलम् । न । उदूखले ॥ गुग्गुलौ ॥ ऊर्द्ध्वखमुलूखम् । पृषोदरादि । उलूखं लाति लाआदाने । आतो

मुपैति कः ॥

उलूखलकम् । न । उलूखलार्थे ॥ स्वार्थे कः ॥

उलूतः । पुं । अजगरसर्पे ॥

उलूपी । पुं । शिशुके । शोंशु इति प्रसिद्धे मत्स्यप्रभेदे ॥ चलुम्पिनि । गौडभाषायाम् उपल इति प्रसिद्धे अतिचञ्चले मत्स्यविशेषे ॥ शिशुमाराकृतौ मत्स्यविशेषे ॥ उ विस्मयजनकं रूपमस्यास्ति । अत इनिः । रलयोरैक्यम् । उः शम्भोः रूपमस्यास्तीति वा ॥

उलूपी । स्त्री । अर्जुनभार्यायाम् । कौरव्यनाम्नो नागस्य कन्यायाम् ॥

उलूलुः । पुं । उत्सवकालिके गौडादिदेशप्रसिद्धे स्त्रीभिः क्रियमाणे शब्दविशेषे ॥

उल्का । स्त्री । अग्निनिर्गतज्वालायाम् ॥ अनले ॥ तेजःपुञ्जे । रेखाकारेऽन्तरीक्षात् पतज्ज्योतिषि ॥ अस्यास्वरूपप्रदर्शनन्तु । दिविभुक्तशुभफलानां पततां रूपाणि यानि तान्युल्काः । धिष्ण्योल्काशनिविद्युत्तारा इति पञ्चधाभिन्नाः ॥ अस्यालक्षणम् । उल्का शिरसि विशाला निपतन्ती वर्द्धते प्रतनुपुच्छा । दीर्घा च भवति पुरुषं भेदा बहवो भवन्त्यस्याः ॥ काश्यपोपि । वृश्चिकश्चासदृशाग्रा रक्तानीलशिखोज्ज्वला । पौरुषीयप्रमाणेन उल्का नानाविधा स्मृता । इति ॥ ओषति । उषदाहे । अर्यते वा । ऋगतौ । शुकवल्कोल्का इति साधुः ॥

उल्कापातः । पुं । अग्निशिखावत्तेजःपाते ॥ उल्कायाःपातः ॥

उल्कामुखी । स्त्री । शिवौ । लोमाशिकायाम् । दीप्तजिह्वायाम् । लोमडी इति भाषा ॥ उल्कामुखेऽस्याः ॥

उल्मुकम् । न । अङ्गारे । अलाते ॥ ओषति । उष० । उल्मुकदर्वीतिनिपातनाद्धातोः षस्य लः मुकप्रत्ययश्च ॥

उल्लङ्घनम् । न । अतिक्रमणे ॥ अन्यथाकरणे ॥ उत् लघेर्ल्युट् ॥

उल्ललः । त्रि । रोमशे । बहुरोमयुक्ते ॥

उल्ललन् । त्रि । उत्प्लवमाने ॥

उल्ललितः । त्रि । आन्दोलिते । तरलिते ॥ चलिते ॥

उल्लसन् । त्रि । शोभमाने ॥

उल्लसनकम् । न । रोमाञ्चे ॥

उल्लसितः । त्रि । उद्गते ॥ उद्भूते ॥ विचित्रिते ॥

उल्लाघः । त्रि । शुचौ ॥ कृष्णे । मरिचे ॥ दक्षे ॥ गदान्निर्गते । नीरोगे ॥ उल्लाघते स्म । लाघृसामर्थ्ये । गत्यर्थेतिक्तः । उल्लाघ्यते स्म । अनुपसर्गा

त् फुल्लश्चीवेतिवा साधुः ॥

उल्लापः । पुं । काकुवाचि । शोकरोगादिना ध्वनेर्विकारे ॥

उल्लापनम् । न । वर्त्तिकादिकृजुकरणे ॥

उल्लासः । पुं । ग्रन्थपरिच्छेदे ॥ प्रकाशे ॥ आह्लादे ॥ वृद्धौ ॥ उल्लसनम् । लसश्लेषणक्रीडनयोः । घञ् ॥ अलङ्कारविशेषे । एकस्यगुणदोषाभ्यामुल्लासोन्यस्यतौ यदि ॥

उल्लिखितः । त्रि । उत्कीर्णे ॥ तनूकृते ॥ उपरिलिखिते ॥ चित्रिते ॥

उल्लिङ्गितः । त्रि । भङ्गिभिरेवसम्यगवगते ॥

उल्लेखः । पुं । उच्चारणे । कथने ॥ अलङ्कारविशेषे । बहुभिर्बहुधोल्लेखादेकस्योल्लेखइष्यते । एकोनबहुधोल्लेखोप्यसौविषयभेदतः ॥ स्त्रीभिः कामोऽर्थिभिःस्वर्द्रुः कालः शत्रुभिरैक्षि सः । गुरुर्वचस्यर्जुनोऽयंकीर्त्तौभीष्मः शरासने ॥ उल्लेखनम् । उत् लिखेर्घञ् ॥

उल्लेखनम् । न । वमने ॥ खनने ॥ उच्चारणे ॥ यथा । मासपञ्चतिथीनाञ्चनिमित्तानाञ्चसर्वशः । उल्लेखनमकुर्वाणोनतस्यफलभाग्भवेदिति ॥ लिख० । ल्युट् ॥

उल्लोचः । पुं । विताने । चन्द्रातपे । चंदोया इतिभाषा ॥ ऊर्द्धं लोचति । लोचृभासने । अच् ॥ ऊर्द्धं लोच्यते वा । लोचृदर्शने । घञ् ॥ कुत्वन्तु निष्ठायामनिट इतिवचनात् । अस्य तुतन्न सेट्त्वात् ॥

उल्लोलः । पुं । कल्लोले । महोर्म्मौ । वडढेउ इतिगौडभाषा ॥ उत्लोडयति । लोडृउन्मादे । णिच् । पचाद्यच् । डलयोरेकत्वम् ॥

उल्बम् । न । जरायौ । गर्भवेष्टनचर्म्मणि ॥ कलले ॥ गर्त्ते ॥ उल्लीयते । लीङ्श्लेषणे । उल्बादयश्चेतिसाधु ॥ यद्वा । ओलति उल्यतेवा । उल् सौत्रोदाहे । वल्यते वा वलप्राणने । अथवा उच्यतिउच्यते समवैत्यत्र वा । उच समवाये । प्रागवत् ॥

उल्बणः । त्रि । व्यक्ते । स्पष्टे ॥ उल्वणति वणशब्दे । पचाद्यच् । पृषोदरादिः ॥

उशन् । त्रि । कामयमाने ॥

उशत्तमः । त्रि । कमनीये ॥

उशना । पुं । भार्गवे । शुक्रे ॥ वष्टि । वशकान्तौ । वशेः कनसिः । ग्रह्यादित्वात् सम्प्रसारणम् । ऋदुशनसित्यनङ् । उशना उशनसौ । अस्य सम्बुद्धौ वा अनङ् नलोपश्च वा । ते

न । ह्रेउशनन् ह्रेउशन ह्रेउशनः॥

उशिक् । पुं । अग्नौ । घीतिहोत्रे ॥ घृते ॥ त्रि । कमनीये ॥ यथा । नयद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं प्रगृणीत कर्हिचित् । तद्वायसंतीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः इति श्रीभागवतम् ॥ वष्टि उश्यते वा । वश० । वशःकिदितीजिप्रत्ययः ॥

उशी: । स्त्री । वाञ्छाविशेषे ॥

उशीनरः । पुं । गान्धाराख्ये देशविशेषे । खन्धार इति प्रसिद्धे ॥ चन्द्रवंशोद्भवस्य शिविन्नपतेः पितरि ॥

उशीरः । पुं । न । वीरणाङ्गे । नलदे । खस् इति प्रसिद्धे ॥ उश्यते । वश० । वशः किदितीरन् अस्य गुणा यथा । उशीरं पाचनं शीतं स्तम्भनं लघुतिक्तकम् । मधुरं ज्वरहृद्वान्तिमदनुत् कफपित्तहृत् ॥ तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहमिति ॥

उशीरिकः । त्रि । उशीरविक्रेतरि ॥ उशीरं पण्यमस्य । किसरादिभ्यः ष्ठन् ॥

उशीरी । स्त्री । लघुकाशे । नीरजे ॥ उशीरी मधुरा शीता पित्तदाहक्षया नहरेत् ॥

उषः । पुं । कामिनि ॥ गुग्गुलौ ॥ रात्रिशेषे ॥ न । पांशुलवणे ॥

उषणम् । न । मरिचे ॥ पिप्पलीमूले ॥ ओषति । उष० । बाहुलकात्क्युन् । ल्युट्वा । संज्ञापूर्वकत्वात् गुणाभावः ॥

उषणा । स्त्री । कणायाम् । पिप्पल्याम् ॥ शुण्ठ्याम् ॥ टाप् ॥ चविके ॥

उषती । स्त्री । अकल्याणवचसि । निन्द्यार्थीयांवाचि ॥ उषेःशतरि आगमशासनस्यानित्यत्वात् नुमभावः ॥ त्रि । अशुभयुक्तेर्वचसि ॥ उषन् व्याहारः उषतवचः ॥

उषपः । पुं । सूर्ये ॥ अग्नौ ॥ ओषति । उष० । उषिकुटिदलिकचिखजिभ्यः कपन् ॥

उषर्बुधः । पुं । कृशानौ । पावके ॥ रक्तचित्रके ॥ उषसि सन्ध्यायां बुध्यते प्रकाशते । बुध० । इगुपधत्वात्कः । अहरादीनामित्यस्य व्यवस्थितविभाषात्वान्नित्यं रः ॥

उषस् । न । प्रत्यूषसि । अहर्मुखे ॥ एतस्य स्वरूपन्तु पञ्चपञ्चउषः काल इति । पञ्चपञ्चाशत्घटिकोत्तरमुषः काल इत्यर्थः ॥ ओषत्यन्धकारम् । उषदाहे । उषःकिदित्यसिः ॥ दशपाद्यान्तु वसः किदिति पाठः । वसति सूर्येण सहेति उषाः । अमेोभीति

सूत्रे स्ववस्स्वतवसोर्मासउषसश्च तद्दृश्यते इतिवार्त्तिकस्य समुषद्भिरित्युदाहरणं विवृण्वद्भिर्हरदत्तादिभिरयंपाठः पुरस्कृतः ॥ स्त्री । दिवोदुहितरि देवतायाम् ॥

उषसी । स्त्री । पितृप्रस्वाम् । सायंसन्ध्यायाम् ॥

उषस्तिः । पुं । ऋषिविशेषे । चाक्रायणे ॥

उषस्यम् । न । हविर्विशेषे ॥ त्रि । तद्देवताकद्रव्ये ॥ उषस् शब्दोदिवोदुहितरं देवता माचष्टे । सा देवता अस्य । वाय्वृतुपित्रुषसो यत् ॥

उषा । अ । रात्रौ ॥ रात्र्यन्ते ॥ ओषति । उष० । का प्रत्ययः ॥ सा तु नक्षत्रतेजः परिहाणिमारभ्य भानोरर्द्धोदयं यावद्भवति । यथाह वराहः । अर्द्धास्तमयात् सन्ध्या व्यक्तीभूता न तारकायावत् । तेजः परिहाणि रुषा भानोरर्द्धोदयं यावदिति ॥

उषा । स्त्री । बाणासुरसुतायाम् । अनिरुद्धस्य भार्य्यायाम् ॥ रात्रौ । धेनौ ॥ सायंसन्ध्यायाम् ॥ ओषति । उष० । इगुपधेतिकः । टाप् ॥ यात्रामुहूर्त्तान्तरे ॥ यथा । प्रभ्रष्टद्युतितारकास्फुटतटी प्राचीभवे निर्मला त्वीषद्रक्तविलोहितान्तधवलादेवैःसदा षाञ्छिता । नो वारं न तिथिं न योगकरणं लग्नञ्च नापेक्ष्यते हत्वा दोषसहस्रसञ्चयमुषा नूनं करोत्युन्नतिमिति ॥

उषाकलः । पुं । कुक्कुटे । ताम्रचूडे ॥ उषायां कलोऽस्य ॥

उषापतिः । पुं । अनिरुद्धे । कामात्मजे ॥ उषायाःपतिः ॥

उषारमणः । पुं । अनिरुद्धे । कन्दर्पतनये ॥ उषायाः रमणः ॥

उषितः । त्रि । व्युषिते । पर्य्युषिते । वसाइतिभाषा ॥ प्लुष्टे । दग्धे ॥ स्थिते । कृतनिवासे ॥ त्वरिते ॥ उष्यतेस्म । उष० । क्तः ॥ वसेर्गत्यर्थाकर्मकेतिक्तः । यजादिः । अनुदात्तत्वादिट् प्रतिषेधे प्राप्ते वसतिक्षुधोरितीट् ॥

उषेशः । पुं । अनिरुद्धे ॥

उष्ट्रः । पुं । कण्टकाशने । मरुद्विपे । क्रमेलके । लम्बोष्ठे ॥ ओषति उष्यते वा । उष० । उषिखनिभ्यां किदिति ष्ट्रन् । वाह्यरथे ॥ इतिधरणी ॥

उष्ट्रकाण्डी । स्त्री । रक्तपुष्प्याम् । कर्णपुष्प्याम् ॥ उंटाटोइतिगौडभाषा ॥

उष्ट्रगोयुगम् । न । उष्ट्रयोः ॥ द्वावुष्ट्रौ । द्वित्त्वेगोयुगच् ॥

उष्ट्रगोष्ठम् । न । उष्ट्रशालायाम् ॥ उष्ट्रा

गोस्थानम् । गोष्ठञ्च ॥

उग्रधूसरपुच्छिका । स्त्री । विछाती वि
चिटीति गौडभाषाप्रसिद्धे वृक्षवि
शेषे ॥

उग्रपादिका । स्त्री । मदनमालीतिगौ
डभाषाप्रसिद्धे वृक्षविशेषे । भूमि
मल्लायाम् ॥

उग्रशिरोधरम् । न । उष्ट्रग्रीवसंज्ञे भ
गन्दररोगविशेषे ॥ तस्य लक्षणम् ।
प्रकोपणैः पित्तमतिप्रकोपितं करो
ति रक्तां पिटकां गुदागताम् । तदाशु
पाकाद्धिमपूतिवाहिनी भगन्दरन्तू
ष्ट्रशिरोधरं वदेदिति निदानम् ॥

उष्ट्रिका । स्त्री । मृद्भाण्डप्रभेदे । सुरा
येमद्यभाण्डे ॥ करभयोषिति । ऊं
टिनीइति भाषा ॥ वृश्चिकालीवृक्षे ॥

उष्ट्री । स्त्री । मृद्भाण्डविशेषे ॥ करभ्या
म् । वाम्याम् ॥ उषेःष्ट्रन्नन्तान्ङीष् ॥

उष्णः । पुं । ग्रीष्मर्त्तौ । निदाघे ॥ आ
तपे ॥ पलाण्डौ ॥ नरकान्तरे ॥ त्रि
। अशीते ॥ ओषति । उष० । इण
षिञ्जिदीङुष्यविभ्योनगितिनक् ॥
निरालस्ये । चतुरे । दक्षे ॥ उष्णा
त्वं शीघ्रकारित्वमस्यास्ति । अर्श-
आद्यच् ॥

उष्णकः । पुं । निदाघे ॥ ज्वरे ॥ त्रि । क्षिप्र
कारिणि ॥ आतुरे ॥ उष्णमिव उष्णम्
। संकरोति । शीतोष्णाभ्यांकारि
णीतिकन् ॥ उष्णं कार्यमस्य । कालप्र
योजनाद्रोगे इतिकन् ॥ यावादिषु
कृता वुष्णशीतइतिस्वार्थेकनथा ॥

उष्णगुः । पुं । सूर्य्ये ॥ उष्णा गावोऽस्य ॥

उष्णनदी । स्त्री । वैतरिण्याम् ॥

उष्णरश्मिः । पुं । सूर्य्ये ॥ उष्णारश्म
योऽस्य ॥

उष्णवातः । पुं । मूत्राघातविशेषे ॥

उष्णवारणम् । न । आतपत्रे । छत्रे ॥

उष्णवीर्य्यः । पुं । शिशुमारे ॥ त्रि । वी
र्य्योष्णवस्तुनि ॥ उष्णं वीर्यमस्य ॥

उष्णा । स्त्री । क्षयव्याधौ ॥ सन्तापे ॥
पित्ते ॥

उष्णांशुः । पुं । सूर्य्ये ॥

उष्णागमः । पुं । निदाघकाले ॥ उष्णा
स्य आगमो यस्मिन् ॥

उष्णालुः । त्रि । उष्णपीडिते ॥ उष्णं
नसहते । शीतोष्णत्र्यालुः ॥

उष्णासहः । पुं । हेमन्तर्त्तौ ॥

उष्णिका । स्त्री । यवाग्वाम् । जाउ इ-
तिगौडभाषा ॥ अल्पमन्नमस्याम् ।
प्रागुष्णकोष्णिकेसंज्ञायामितिकन् ।
निपातनादन्नशब्दस्योष्णादेशः ॥ द
ग्धायाम् ॥

उष्णिक् । स्त्री । सप्ताक्षरायांवृत्तौ ॥ य
था । रङ्गे बाहुविस्फालात् कुम्भीन्द्रा

न्मदलेखा । समाभूत्सुरशत्रोः कस्तूरीरसचर्चा इति ॥ उत स्निह्यति । स्निह प्रीतौ । ऋत्विगित्यादिना उत्पूर्वात् स्निहेः क्विन् । निपातनादुपसर्गान्तलोपः षत्वञ्च । क्विन्नन्तत्वात् कुत्वेन हस्य घः ॥

उष्णीषः । पुं । न । शिरोवेष्टनवस्त्रे । पाग पगडीइतिभाषा ॥ अस्य गुणा यथा । उष्णीषं कान्तिकृत् केश्यं रजोवातकफापहम् । लघु चेच्छस्यते यस्माद्गुरु पित्ताक्षिरोगकृदिति भावप्रकाशः ॥ किरीटे ॥ लक्षणान्तरे ॥ उष्णमीषते हिनस्ति । ईष गतिहिंसादर्शनेषु । इगुपधेतिकः । शकन्ध्वादिः ॥

उष्णोदकम् । न । तप्तजले ॥ क्वाथ्यमानपादावशेषार्द्धावशेषपादहीनजले । अस्य गुणाः । तत्पादहीनं वातघ्नं मध्यहीनन्तु पित्तनुत् । कफघ्नं पादशेषस्थं पानीयं लघुदीपनमिति ॥ उष्णञ्चतत् उदकञ्च ॥

उष्णोपगमः । पुं । निदाघे ॥ उष्णःउपगमोऽत्र ॥

उष्मः । पुं । निदाघे ॥ आतपे ॥ वसन्तकाले ॥

उष्मकः । पुं । ग्रीष्मर्त्तौ । ऊषति रुजति । ऊषरुजायाम् । अन्येभ्योऽपीति

मनिन् । यावादित्वात् कन् ॥

उष्मपाः । पुं । पितृगणविशेषे ॥ उष्मपास्तु कवेः पुत्राः ॥ उष्माणं पिबन्ति । पापाने । क्विप् ॥ यावदुष्मं भवत्यन्नं यावदश्नन्ति वाग्यताः । पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः इति स्मृतिः ॥

उष्मागमः । पुं । आतपे । निदाघे ॥ ओषतीत्युष्मा । अन्येभ्य इति मनिन् । आगच्छतीत्यागमः । अच् । उष्मातापः आगमोऽत्र ॥

उस्रः । पुं । वृषे ॥ मयूखे । किरणे ॥ वसन्ति रसा अस्मिन् । वस० स्फायितञ्चीतिरक् । यजादित्वात् सम्प्रसारणम् । नरपरेति षत्वाभावः ॥

उस्रा । स्त्री । अर्जुन्याम् । गवि ॥ उपचित्रायाम् ॥ वसति क्षीरमस्याम् । उस्राट्टाप् ॥

उह । अ । सम्बोधनार्थ ॥ एवार्थे ॥ उ च ह चेति विग्रहः ॥

उहह । अ । सम्बोधने ॥ उहच ह च ॥

उहानः । पुं । देशविशेषे ॥

उह्यमानः । त्रि । आकृष्यमाणे ॥ वहने नप्राप्यमाणे ॥ वहेः कर्मणि शानच् ॥

उढः । पुं । अनुडुहि ॥ वहति । वह० दशपाद्यां स्फायितञ्चीति रक् वेदृम्भिवहिवसीतिपाठात् रक् ॥

ऊः

ऊ । अ । वाक्यारम्भे ॥ रक्षायाम् ॥ अनुकम्पायाम् ॥ सम्बोधने ॥

ऊः । पुं । महेश्वरे ॥ चन्द्रे ॥ शापिते ॥ अवति । अवरक्षणादौ । कर्त्तरि क्विप् । ज्वरत्वरेत्यूठ् ॥ ऊकारे ॥

ऊढः । त्रि । विवाहिते ॥ वहनकर्मणि । कृतवहने ॥ धृते ॥ उह्यतेस्म । वह । क्तः ॥

ऊढकङ्कटः । त्रि । वर्म्मिते । सन्नद्धे । वद्धसन्नाहे ॥ ऊढो धृतःकङ्कटःकवचो येन ॥

ऊढा । स्त्री । भार्य्यायाम् ॥ टाप् ॥

ऊतः : त्रि । स्यूते ॥ ऊय्यतेस्म । ऊयी तन्तुसन्ताने । क्तः ॥

ऊतिः । स्त्री । रक्षणे ॥ स्यूतौ । सिमाइ इतिभाषा ॥ लीलायाम् ॥ अवनम् । अव॰। ऊतियूतीत्यादिनाक्तिन् । ज्वरत्वरेत्यूठ् ॥

ऊधन्यम् । त्रि । ऊधसेहिते ॥ गवादिषु ऊधसोनङ्चेतियत् ॥

ऊधस् । न । आपीने । क्षीराशये ॥ वहति उनत्तिवा । वहप्रापणे उन्दीक्लेदनेवा । असुन् । ऊधसोनङ्किति नि

र्द्देशात् ऊधादेशः ॥

ऊधस्यम् । न । दुग्धे । ऊधसि भवम् । यत् ॥

ऊनः । त्रि । न्यूने । हीने । असम्पूर्णे ॥ ऊनयति । ऊनपरिहाने ॥ पचाद्यच् ॥

ऊम् । अ । रोषोक्तौ ॥ पृच्छायाम् ॥ ऊय्यते । ऊयी॰। मुक्प्रत्ययः ॥

ऊमम् । न । नगरे ॥ अवति । अव॰। अविसिवीत्यादिनामन्क्वित् ॥

ऊररी । अ । अङ्गीकारे ॥ ततौ । विस्तारे ॥ ऊयते । उयी॰। वाहुलका तररीक् ॥

ऊरव्यः । पुं । वैश्ये ॥ ब्रह्मण ऊरोर्जातः । शरीरावयवाद्यत् । गुणावादेशौ ॥ त्रि । ऊरुसमुद्भवे ॥

ऊरी । अ । अङ्गीकृतौ ॥ विस्तारे ॥ ऊयते । ऊयी॰। बाहुलकाद्रीक् ॥

ऊरीकृतः । त्रि । अङ्गीकृते ॥ तते । विस्तृते ॥ ऊरीक्रियतेस्म । क्तः ॥

ऊरुः । पुं । जानूपरिभागे । सक्थिनि ॥ ऊर्णूयते आच्छाद्यते । ऊर्णुञ्॰। ऊर्णोतेर्नुलोपश्चेति कर्मणि कुः ॥

ऊरुजः । पुं । बैश्ये ॥ ऊरोजातः । जनी॰। पञ्चम्या मजाताविति डः ॥

ऊरुपर्व्वा । पुं । न । जानुनि । अष्ठीवति । घोंटू घुटना इति भाषा ॥ ऊरोः पर्व ॥

ऊररी । अ । अङ्गीकारे ॥ विस्तारे ॥

ऊरुस्तम्भः । पुं । रोगविशेषे ॥ तस्यरूपम् । परकीया विवगुरुस्यातामतिशयव्यथा । ध्यानाङ्गमर्द्दस्तैमित्यतन्द्राछर्द्यरुचिज्वरैः ॥ संयुतौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः । तमूरुस्तम्भमित्याहुराढ्यवातमथापरेइति ॥

ऊरुस्तम्भा । स्त्री । कदलीवृक्षे ॥

ऊर्क् । न । बले ॥ अन्ने ॥ ऊर्ज्जेस्तच्छीलादिषु भ्राजभासेति क्विप् ॥ अन्नतशब्दाभिधेयोऽत्यन्तसारभूतः सूक्ष्मोन्नरस ऊर्गुच्यते इतिमीमांसकाः ॥

ऊर्ज्जः । पुं । कार्त्तिकमासे ॥ उत्साहे ॥ बले ॥ प्राणने ॥ कार्त्तिकनाम्निवर्षविशेषे ॥ न । जले । पानीये ॥ ऊर्जयति उत्साहयति जिगीषून् । ऊर्ज्जबलप्राणनयोः । णयन्तात् पचाद्यच् ॥ असुनि सान्तोप्ययम् ॥

ऊर्ज्जस्वलः । त्रि । बलाधिके । ऊर्जस्विनि ॥ अतिशयितः ऊर्जोबलमस्यास्ति । ज्योत्स्नातमिस्रेति ऊर्जसोवलच् । अदन्त ऊर्जशब्दाद्वलचि सगपिनिपात्यः ॥ अलङ्कारविशेषे ॥ रसभेदतदाभासतत्प्रशमानानिबन्धनेन रसवत् प्रापक ऊर्जस्वलालङ्कार इति सूत्रात् । तत्प्रशमानिबन्धने समाहितालङ्कारइत्यर्थः ॥

ऊर्ज्जस्वी । त्रि । बलाधिके । ऊर्जस्वले ॥ अतिशयित ऊर्जोबलमस्यास्ति । ज्योत्स्नातमिस्रेति विनिः । अदन्तात् विनिकृते सगपिनिपात्यः ॥ न । अलङ्कारविशेषे ॥ ऊर्ज्जस्विरूढाहङ्कारमिति तस्यलक्षणम् । साहङ्कारवस्त्वभिधानमित्यर्थः ॥

ऊर्ज्जितः । त्रि । बलाद्यतिशययुक्ते । बलप्रकर्षशालिनि ॥ बलार्थादूर्जशब्दात्तारकादित्वादितच् ॥ बलार्थादूर्जगत्यर्थाकर्मकेत्यादिनाकर्त्तरि क्तो वा ॥

ऊर्ज्जितशासन. । पुं । नारायणे ॥ श्रुतिस्मृतिलक्षणमूर्जितंशासनमस्य । यथा । श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्यवर्त्तते । आज्ञाच्छेदी ममद्वेषी मद्भक्तोपि न वैष्णवः ॥ इति भगवद्वचनम् ॥

ऊर्ज्जितिः । स्त्री । उत्कर्षे ॥

ऊर्णनाभः । पुं । मर्कटके । लूतायाम् । तन्तुसर्जने प्रसिद्धजीवे । मकडी इतिभाषा ॥ ऊर्णेव तन्तुर्नाभावस्य । अजितियोग विभागादच् । ङ्यापोरितिह्रस्वः ॥

ऊर्णनाभिः । पुं । लूतायाम् ॥ ऊर्णानाभावस्य ॥

ऊर्णा। स्त्री। मेषादिलोम्नि। ऊनइति भाषा॥ भ्रुवोरन्तरावर्त्ते॥ सतु भ्रुवयमध्ये महतामुन्नतशुभ्रकेशः शुभायतनक: प्रशस्तावर्त्तो महापुरुषलक्षणम्। चक्रवर्त्यादीनां महायोगिनाञ्च भवति॥ ऊर्णोति। ऊर्णुञ्०। अन्येभ्योपीतिड:। ऊर्णोतेर्ड इतिडो वा॥

ऊर्णायु:। पुं। चर्मभङ्गे। ऊर्णनाभे॥ मेषे॥ मेषलोमकम्बले। पट्टूदोवसु लोईं पश्मी इतिभाषा॥ ऊर्णा अस्यास्ति। ऊर्णायायुस्। सित्त्वात् पदत्वम्। तेनयस्येतिलोपोन॥

ऊर्द्दर:। पुं। राक्षसे॥ शूरे॥ ऊर्ज्जंमर्द्दयति। दृ०। ऊर्जिदृणातेरल-चौपूर्वपदान्त्यलोपश्च। अलचोःस्वरे भेद:॥

ऊर्द्ध:। त्रि। उच्छ्रिते॥ तुङ्गे। उपरिष्टात्। उपर्य्यर्थे॥ दण्डवत् स्थिते॥ ऊर्द्धशब्दो दीर्घादिर्न्निर्विकार: सवकारश्चदृश्यते॥

ऊर्द्ध्वक:। पुं। मृदङ्गविशेषे। यस्यध्वाकृतिरूर्द्ध्वक:॥ शब्दार्णवस्तु। ऊर्द्ध्वकोगोपुच्छवत् सवितालोऽष्टाङ्गुलो मुखे। मुखोर्द्ध्ववादने तेषामङ्गुलंङ्ग जनंनता॥ इति॥ तस्यिच हरीतक्याकृतिस्त्विर्द्धुस्तस्यालिङ्ग्योयवाकृतिः। ऊर्द्ध्वकोदण्डसदृश: स्यान्मुरजाभेदतोमता:॥ ऊर्द्ध्वःकायति। कै शब्दे। सुपीतिक:॥

ऊर्द्ध्वकाष्ठा। स्त्री। सर्व्वाशतावर्य्याम्॥

ऊर्द्ध्वक्रम:। पुं। ऊर्द्ध्वस्थे॥ इतित्रिकाण्डशेष:॥

ऊर्द्ध्वजानु:। त्रि। उपरिभागेस्थूलजानुके। ऊर्द्ध्वज्ञौ॥ उर्द्ध्वेजानुनीयस्य॥

ऊर्द्ध्वज्ञ:। त्रि। ऊर्द्ध्वजानुनि॥

ऊर्द्ध्वज्ञु:। त्रि। ऊर्द्ध्वजानुनि॥ ऊर्द्ध्वे-जानुनीयस्य। ऊर्द्ध्वाद्विभाषेतिपक्षे ज्ञु:॥

ऊर्द्ध्वदेव:। पुं। विष्णौ। हरौ॥

ऊर्द्ध्वपाद:। पुं। शरभे॥

ऊर्द्ध्वपुण्ड्र:। पुं। तिलकविशेषे॥ सतु नासाग्रललाटे पुण्ड्रवत् चन्दनादिनाकृतोर्द्ध्वरेखात्रयरूप:। यथा। ऊर्द्ध्वपुण्ड्रंत्रिपुण्ड्रंस्यात् त्रिपुण्ड्रेनोर्द्ध्वपुण्ड्रकमिति। ऊर्द्ध्वपुण्ड्रंद्विज:कुर्य्यात् गोरमृद्भस्मचन्दनैरित्यादिच वचनं:। ऊर्द्ध्वपुण्ड्रंमृदाकुर्य्यात् त्रिपुण्ड्रं भस्मनासदा। तिलकंवैद्विज:कुर्य्याच्चन्दनेनयदृच्छया॥ ऊर्द्ध्वपुण्ड्रंद्विज:कुर्य्यात् क्षत्रियस्तुत्रिपुण्ड्रकम्। अर्द्धचन्द्रन्तुवैश्यश्च वर्त्तुलंशूद्रयोनिज:॥ इतिब्रह्माण्डपुराणम्। अशुचिर्वाप्यनाचारो मनसापापमाचरे-

त् । गुर्व्विरेव भवेत्तस्य मूर्द्ध्वपुण्ड्राङ्कितो नरः ॥ ऊर्द्ध्वपुण्ड्रधरो लक्ष्म्याः प्रियदेवस्य कुत्रचित् । स्वपाकोऽपि विमानस्थो मम लोके महीयते । इति ॥ वैदिकातिरिक्तपुण्ड्रस्याधिकारी ॥ यथोक्तं देवीभागवते श्रीनारायणेन । ऊर्द्ध्वपुण्ड्रं त्रिशूलं वा वर्त्तुलं चतुरस्रकम् । अर्द्धचन्द्रादिकं लिङ्गं वेदनिष्ठो न धारयेत् ॥ जन्मना लब्धजातिस्तु वेदपन्थानमाश्रितः । पुण्ड्रान्तरं भ्रमादापि ललाटे नैव धारयेत् ॥ ख्यातिकान्त्यादिसिद्ध्यर्थं चापि विष्ण्वागमादिषु । स्थितं पुण्ड्रान्तरं नैव धारयेद्वैदिको जनः ॥ इत्यादि ॥ ऊर्द्ध्वश्चासौ पुण्ड्रश्च ॥

ऊर्द्ध्वम् । अ । ऊर्द्ध्वशब्दार्थे ।

ऊर्द्ध्वमानम् । न । उन्माने ॥ पलादिशब्दवाच्येन पाषाणादिना तुलादावारोपितेन येन सुवर्णादेर्गुरुत्वमनुमीयते तदूर्द्ध्वारोपणादूर्द्ध्वमानमिति शब्देन विवक्षितम् । यत् बाट इति च यस्य भाषा ॥ ऊर्ध्वादौ ॥ ऊर्द्ध्वावस्थितेन येन मीयते तत् । प्रथमश्च द्वितीयश्च ऊर्द्ध्वमाने मतौ ममेति महाभाष्योक्तेः । प्रथमद्वितीयौ द्वयसज्दघ्नचौ ॥

ऊर्द्ध्वमुखम् । न । नक्षत्रविशेषेषु । यथा । आर्द्रा पुष्या धनिष्ठा च शतताख्या श्रवणा तथा । रोहिणी चोत्तराश्चैव नवैवोर्द्ध्वमुखाः स्मृताः इति ॥

ऊर्द्ध्वमूलः । पुं । संसारवृक्षे ॥ ऊर्द्ध्वमुत्कृष्टं कारणञ्च कार्यापेक्षया परमव्याकृतं मूलमस्येति । अस्मिंश्च संसारस्य मूलम् । नेदममूलं भविष्यतीति श्रुतेः ॥

ऊर्द्ध्वरेताः । पुं । महादेवे । सदाशिवे ॥ मुनिविशेषे । सनकादिषु ॥ भीष्मे ॥ सन्न्यासिनि ॥ ऊर्द्ध्वं रेतो यस्य सः । न पतति वीर्यं यस्येत्यर्थः ॥

ऊर्द्ध्वलिङ्गः । पुं । महेशे । देवदेवे । शिवे ॥

ऊर्द्ध्वलोकः । पुं । दिवि । स्वर्गे ॥

ऊर्द्ध्वस्थः । त्रि । उपरिस्थिते ॥ ऊर्द्ध्वे तिष्ठति । स्था० । सुपिस्थ इति कः ॥

ऊर्द्ध्वस्थितिः । स्त्री । उपरिस्थितौ ॥ ऊर्द्ध्वनिर्त्ते ॥ स तु अश्वस्य पृष्ठस्थानम् ॥

ऊर्द्ध्वासितः । पुं । तरमुञ्जे ॥ कारवेल्ले ॥ त्रि । ऊर्द्ध्वोपवेशिते ॥ ऊर्द्ध्वमासितः आसितो वा ॥

ऊर्म्मिः । पुं । स्त्री । वीच्याम् ॥ प्रकाशे ॥ वेगे ॥ भङ्गे । स्वल्पतरङ्गे ॥ वस्त्रसङ्कोचरेखायाम् ॥ वेदनायाम् ॥ पीडायाम् ॥ उत्कण्ठायाम् ॥ बुभुक्षादिषट्सु । बुभुक्षा च पिपासा च मा-

णस्यमनसः स्मृतौ । शोकमोहौशरीरस्य जरामृत्यू षडूर्मयइत्युक्तः ॥ ऋच्छति । ऋगतौ । अर्त्तेरूच्चेति मिः । अर्त्तेरूरादेशः ॥ अश्वगतिविशेषे ॥ यथा । पङ्क्तीकृताना मश्वानां नमनोन्नमनाकृतिः । अतिवेगसमायुक्तागतिरूर्म्मिरुदाहृतेतिवैजयन्ती ॥

ऊर्म्मिका । स्त्री । अङ्गुलीये ॥ वस्त्रभङ्गे ॥ तरङ्गे ॥ उत्कण्ठायाम् ॥ भृङ्गनादे ॥ ऊर्म्मिरिव । इवेप्रतिकृताविति कन् । ऊर्म्मिं प्रकाशं कायति वा । कै० । आतोनुपेतिकः ॥

ऊर्म्मिमान् । त्रि । वक्रे । अराले । वाँकादूतिभाषा ॥ तरङ्गिणि ॥ ऊर्म्मिरस्यास्ति । मतुप् । यवादिः ॥

ऊर्म्मिमाली । पुं । समुद्रे । अकूपारे ॥ ऊर्म्मीणांमालासाअस्तिअस्य । इनिः ॥

ऊर्म्मिला । स्त्री । सरिति ॥ लक्ष्मणभार्य्यायाम् ॥ कामशालायाम् ॥ ऊर्म्मिंलाति । आतोनुपेतिकः ॥

ऊर्व्वरा । स्त्री । उर्व्वरायाम्भूमौ ॥

ऊर्व्वसी । स्त्री । नारायणोरुंनिर्भिद्यसम्भूता वरवर्णिनीतिहरिवंशप्रसिद्धायां स्वर्गवेश्यायाम् । उर्वश्याम् ॥ ऊरौउषितेति । वसनि० । ऊर्वसी दीर्घादिर्दन्त्यान्तापृषोदरादिषु व्युत्पादिता ॥

ऊर्व्वङ्गम् । न । गोमयच्छत्रिकायाम् । शिलीन्ध्रके ॥

ऊषः । पुं । क्षारमृदि ॥ प्रभाते ॥ प्रातःसन्ध्यायाम् ॥ रन्ध्रे ॥ चन्दनाद्रौ ॥ अवेविले ॥ ऊषति । ऊषरुजायाम् । इगुपधेतिकः ॥

ऊषकम् । न । ऊषे । स्वार्थेकन् ॥

ऊषणम् । न । मरिचे ॥ पिप्पलीमूले ॥ शुण्ठ्याम् ॥ पुं । चित्रके ॥ ऊषति । ऊष० बाहुलकात्क्युन् ल्युड्वा ॥

ऊषणा । स्त्री । पिप्पल्याम् ॥ चव्ये ॥ टाप् ॥

ऊषरः । पुं । क्षारभूमौ । ऊषवति ॥ यत्रबीजमुप्तंनप्ररोहति तस्मिन्नित्यर्थः ॥ ऊषोऽस्त्यस्मिन् । ऊषसुषीतिरः ॥ रेणुकादिनवतीर्थेषु ॥ यथा । रेणुका सूकरः काशी काली कालौ वटेश्वरौ । कालिञ्जरोमहाकालऊषरानवमुक्तिदा इति वराहपुराणम् ॥

ऊषरजम् । न । पांशवलवणे ॥ रोमकनामायस्कान्तभेदे ॥ इतिराजनिर्घण्टः ॥

ऊषवान् । त्रि । ऊषरे ॥ मतुप् ॥

ऊषा । स्त्री । वाणसुतायाम् ॥

ऊष्मा । पुं । निदाघे ॥ ऊष्माणः शषस

हाः । ऊष्मावायुस्तत्प्रधाना इत्यर्थः । एतच्चसोष्माणइत्यस्य वायुनासहव त्तन्त इत्यर्थ इति प्रातिशाख्यभाष्ये स्पष्टम् ॥

ऊष्मा । स्त्री । ऊष्मणि ॥ टाबन्तः । ऊष्मया सार्द्धमूष्मा पीतिद्विरूपः ॥

ऊहः । पुं । अध्याहारे । तर्के ॥ अपूर्वोत्प्रेक्षणे इतिजैमिनिः ॥ आगमाऽविरोधिना न्यायेन आगमार्थपरीक्षणे ॥ परीक्षणञ्च संशय्य पूर्वपक्षनिराकरणेनोत्तरपक्षव्यवस्थापनम् । तदिदं मननमाचक्षते आगमिनः सा तृतीया सिद्धिः तारतारमुच्यते । अन्येतुव्याचक्षते । विनोपदेशादिना प्राग्भवीयाभ्यासवशात् तत्त्वस्य स्वय मूहनं यत् सा सिद्धिरूह इति ॥ विमर्शात्मकतर्के ॥ समूहे ॥ असम

वेतार्थकपदस्यागपूर्वकसमवेतार्थकपदसमभिव्याहारकरणे ॥ साकाङ्क्षवाक्यस्य पदान्तरेणाकाङ्क्षापूरणे ॥ आरोपे ॥ ऊहनम् । ऊहवितर्के । भावे घञ् ॥

ऊहत्वम् । न । मानसत्वव्याप्ये जाति विशेषे । तर्कयामीत्यनुभवसिद्धे ॥ अन्यथाश्रुतस्यशब्दस्य अन्यथा लिङ्गवचनादिभेदेन विपरिणमनमूहस्तस्यभावे ॥

ऊहनम् । न । ऊहे ॥

ऊहनी । स्त्री । शोधन्याम् । सम्मार्जन्याम् ॥

ऊहा । स्त्री । अध्याहृतौ ॥ उहनम् । ऊह० । गुरोश्चहलइत्यप्रत्ययः । टाप् ॥

ऋः

ऋ । अ । गर्हणे ॥ वाक्ये ॥ मन्त्रस्तोभवचने ॥ ऋकारे ॥ स्त्री । देवमातायाम् ॥ पुं । स्वर्गे ॥

ऋक्थम् । न । धने ॥ स्वर्णे ॥ ऋच्यते- ऋच् शब्दे । बाहुलकात् थक् ॥

ऋक्षः । पुं । गिरिविशेषे ॥ तापीपयोष्णीनिर्विन्ध्याप्रमुखा ऋक्षसम्भवाः ॥ भल्लूके ॥ शोणके । श्योनाकप्रभेदे ॥ पुं । न । नक्षत्रे । भे ॥ मेषादिराशौ ॥ त्रि । कृतवेधने ॥ अच्छे ॥ ऋषति । ऋषीगतौ । स्नुव्रश्चिकृत्यृषिभ्यः किदिति ऋषे र्गातौ सः । षढोः कः सि ॥ यद्वा । ऋच्छणोति । ऋक्षहिंसायाम् । अच् ॥

ऋक्षगन्धा । स्त्री । ऋषिजाङ्गलिकायाम् । ऋषिजाङ्गल इति गौडभाषाप्रसिद्धायाम् ॥ क्षीरविदार्याम् । महाश्वेतायाम् ॥ वृद्धदारके । छगलान्त्र्याम् । बीरताड इति गौडभाषा ॥ ऋक्षान् गन्धयति । गन्धअर्द्दने । मूलविभुजादित्वात् कः ॥ यद्वा । ऋक्षोगन्धोऽस्याः । ऋक्षशब्दस्तद्गन्धसदृशे गौणः । ऋक्षस्येवगन्धोऽस्याः । समासान्तस्यानित्यत्वात् उपमानाच्चेतिनेकारः ॥

ऋक्षगन्धिका । स्त्री । क्षीरविदार्याम् । श्वेतभूकूष्माण्डे ॥ ऋक्षगन्धार्थे ॥ ऋक्षगन्धैव स्वार्थे कन् ॥

ऋक्षगिरिः । पुं । ऋक्षाभिधे कुलाचले ॥

ऋक्षरः । पुं । ऋत्विजि ॥ न । वारिधारायाम् ॥ ऋषति । ऋषीगतौ । तन्यृषिभ्यां क्सरन् ॥ ऋक्षरः कण्टक- इति वेदभाष्यम् ॥

ऋक्षराजः । पुं । जाम्बवति ॥ चन्द्रे ॥ ऋक्षाणां राजा । टच् ॥

ऋक्षवान् । पुं । नर्म्मदातीरस्थे पर्वतविशेषे ॥ ऋक्षाः सन्त्यस्मिन् । मतुप् ॥

ऋक्षविडम्बी । पुं । नक्षत्रसूचके ॥

ऋक्षहरीश्वरः । पुं । सुग्रीवे ॥

ऋक्षेशः । पुं । चन्द्रमसि । सोमे ॥

ऋक्षोदः । पुं । पर्वतविशेषे ॥

ऋग्वेदः । पुं । देवदैवत्ये ऋग्ब्राह्मणसमुदाये । ऋचि ॥

ऋग्वेदाधिपतिः । पुं । गुरौ । बृहस्पतौ ॥ यथा । ऋग्वेदाधिपतिर्जीवः सामवेदाधिपः कुजः । यजुर्वेदाधिपः शुक्रः शशिजोऽथर्ववेदराट् । इति ॥

ऋक् । स्त्री । नियताक्षरपादयुते देवदैवत्ये एकविंशतिशाखात्मके वेदभागे । समानाक्षरपादबन्धसमन्विते- मन्त्रविशेषे ॥ तस्य लक्षणम् । यथा

शवशेन पादव्यवस्थितिः। अस्यार्थः। यत्रार्थवशेन एकान्वयित्वेनानुष्टुवादिपादस्थितिः। इति जैमिनिः॥-ऋच्यन्ते स्तूयन्ते देवा अनया। ऋच स्तुतौ। क्विप्॥

ऋचीषम्। न। पिष्टपचनपात्रे॥ ऋचति। ऋचशब्दे। बाहुलकात् कीषन्॥

ऋच्छरा। स्त्री। वेश्यायाम्॥ ऋच्छति। ऋच्छगतीन्द्रियप्रलयमूर्त्तिभावेषु। ऋच्छेररः॥

ऋजिमा। पुं। आर्जवे॥ ऋजोर्भावः। इमनिच्॥

ऋजीकः। त्रि। दुष्टे॥ तपोधने॥ अर्जते। ऋजगतिस्थानार्जनोपार्जनेषु। ऋजेश्चेति ईकन्॥ यद्वा। ऋजेः कीकन्। ऋजीक इन्द्रो धूमश्चेति कौमदी॥

ऋजीषम्। न। कटाशिकातन्विकादौ पिष्टभर्जनपात्रे। पिष्टपचने॥ धने॥ उद्धृतरसे सोमलतायाः शेषे। एतच्च मन्त्रभाष्ये स्पष्टम्॥ नरकविशेषे॥ अपपिष्टपचन प्रक्षेपः॥ अर्ज्यते। अर्जअर्जने। अर्जे ऋजचेतिईषन्॥

ऋजु:। त्रि। अवक्रे। अजिह्मे। प्रगुणे। प्राञ्जले। सीधा इतिभाषा॥ ऋजवे। हिंसाद्यगुणा नेतरेस्वभावतः॥ अर्जति। अर्जअर्जने। अर्जिदृशीति साधुः। अर्जयति गुणान् वा॥

ऋजुकायः। पुं। कश्यपमुनौ॥ त्रि। अवक्रशरीरे॥ ऋजुः कायोऽस्य॥

ऋज्रः। त्रि। गतिमति। ऋज्राश्वइति मन्त्रे ऋज्रा गतिमन्तोऽश्वायस्येतिवेदभाष्यात्॥ नायके॥ अर्जयते अर्जयतिवा। ऋजगत्यादिषु। ऋज्रेन्द्रेतिरन्। निपातनाद्गुणाभावः॥

ऋज्रसानः। पुं। मेघे॥ ऋज्रते। ऋजिभर्जने। ऋज्रिवृधीति असानच् किन्। वेदभाष्येतु यौगिकार्थ एव पुरस्कृतः॥

ऋणम्। न। अधमर्णेनोत्तमर्णात् पुनर्देयतयास्वीकृतधनग्रहणे धने। पर्य्युदञ्चने। उद्धारे। उधार इतिभाषा॥ जले॥ दुर्गे॥ दुर्गभूमौ॥ अर्यते स्म। ऋगतौ। क्तः। ऋणमाधमर्ण्ये इति णत्वम्॥

ऋणत्रयम्। न। त्रिविधे ऋणविशेषे॥ यथा। देवानाञ्च पितॄणाञ्च ऋषीणाञ्च तथा नरः। ऋणवान् जायते यस्मात् तन्मोक्षे प्रयतेत सदा॥ तत परिशोधनन्तु। देवानामनृणो जन्तुर्यज्ञैर्भवति मानवः। अल्पवित्तस्तु पूजाभिरुपवासव्रतैस्तथा॥ श्राद्धेन प्रजया चैव पितॄणामनृणो भवेत्। ऋषीणां

ब्रह्मचर्य्येण श्रुतेन तपसा तथा ॥ इतिविष्णुधर्मोत्तरम् ॥

ऋणमत्कुणः । पुं । } प्रतिभुवि । लग्नके । जामिन्
ऋणमार्गणः । पुं । }
जमान इतिचभाषा ॥

ऋणमुक्तिः । स्त्री । विगणने । ऋणपरिशोधने ॥ ऋणस्य ऋणाद्वामुक्तिः ॥

ऋणमोक्षः । पुं । ऋणमुक्तौ ॥

ऋणहर्त्ता । पुं । भौमे ॥ ऋणस्यहर्त्ता ॥

ऋणादानम् । न । उत्तमर्णेनाधमर्णात् सलाभधनग्रहणे । व्यवहारविशेषे ॥ तत्सप्तविधम् । यथा । ईदृशमृणं देयम् १ । ईदृशम देमम् २ । अनेनाधिकारिणा देयम् ३ । अस्मिन् समये देयम् ४ । अनेनप्रकारेणा देयम् ५ । इत्यधमर्णे पञ्चविधम् । उत्तमर्णे तु दानविधिः ६ । आदानविधिश्च ७ । इतिद्विविधम् । तथाच नारदः । ऋणं देय मदेयञ्च येन यत्र यथा भवेत् । दानग्रहणधर्म्मश्च ऋणादानमितिस्मृतम् ॥ अदेयमितियदुक्तं तदाह कात्यायनः । नस्त्रीभ्योदासवालेभ्यः प्रदद्यात् किञ्चिदुद्धृतम् । दाता न लभते तत्तु तेभ्यो दत्तन्तु तद्वसु ॥ तत्रविशेषमाह वृहस्पतिः । परिपूर्णं गृहीत्वाधिं वन्धं वा साधुलग्नकम् । लेख्यारूढं साक्षिमद्वा ऋणं दं-

द्या द्वनीसदा ॥ इतिविवादार्णवसेतुः ॥

ऋणान्तकः । पुं । कुजे । मङ्गलग्रहे ॥

ऋणापनोदनम् । न । ऋणापनयने ॥

ऋणिकः । त्रि । अधमर्णे ॥

ऋणी । त्रि । ऋणवति । अधमर्णे । ऋणग्रस्ते ॥

ऋणोद्ग्राहणम् । न । अधमर्णगृहीतर्णग्रहणे ॥

ऋतम् । न । ब्राह्मणस्योत्तमवृत्तौ । उञ्छशिले ॥ ऋतमुञ्छशिलंज्ञेयमित्युक्तः ॥ जले ॥ सत्ये ॥ मोक्षे ॥ कर्मफले ॥ सूनृतायांवाचि ॥ यथाशास्त्रे यथाकर्त्तव्ये वुद्धौ सुपरिनिश्चितेर्थे ॥ अवितथस्वभावे परमार्थभूतवस्तुनि ॥ मानससत्ये ॥ त्रि । दीप्ते ॥ पूजिते ॥ अर्यतेस्म ऋच्छतिवा । ऋगतौ । निष्ठेति गत्यर्थेतिवाऽत्तेंःक्तः ॥

ऋतजित् । पुं । यक्षविशेषे ॥

ऋतधामा । पुं । विष्णौ ॥ ऋतं सत्यं धाम अस्य ॥

ऋतपः । पुं । संसारिणिजीवे ॥ ऋतंकर्मफलंपिवति । पा० । कः ॥

ऋतपर्णः । पुं । राजर्षिविशेषे ॥ यथा । कर्कोटकस्यनागस्य दमयन्त्यानलस्य च । ऋतपर्णस्यराजर्षेः कीर्त्तनं कलिनाशन मितिमहाभारतम् ॥

ऋतम् । म । सत्यमित्यर्थे ॥

ऋतम्भरा । स्त्री । प्रज्ञाविशेषे ॥ ऋतं सत्यमेव विभर्त्ति न [illegible] विपर्यासग न्धोप्यस्तीति यौगिक्येवेयं समाख्या॥ प्लक्षद्वीपस्य नदीविशेषे ॥

ऋतव्यम् । त्रि । ऋतुदेवताके हविरादौ ॥ ऋतुर्देवताऽस्य । वाय्वृतुपितृ षसोयत् । गुणावादेशौ ॥

ऋतिः । स्त्री । कल्या [illegible] ॥ वर्त्मनि॥ जुगुप्सायाम् ॥ स्पर्द्धायाम् ॥ गतौ ॥ अशुभे ॥ ऋगतौ । क्तिन् ॥

ऋतीया । स्त्री । अर्त्तने । जुगुप्सायाम् ॥ ऋतिःसौत्रः । ईयङ्पक्षे । अप्रत्य यादित्यः । टाप् ॥

ऋतुः । पुं । कालविशेषे॥ सतु शिशिरा दिभेदात् षड्विधः । यथा । मासद्वया त्मकःकालऋतुःप्रोक्तोविचक्षणैरिति । मलमासेतु मासत्रयात्मक एकोमासः तेन मासद्वयात्मकत्त्वमविरुद्धम् । षष्ट्यातुदिवसैर्मासः कथितो वाद रायणैरित्युक्तेः ॥ शिशिरः पुष्पसमयो ग्रीष्मो वर्षाशरद्धिमः । माघादिमासयुग्मैस्तु ऋतवः षट्क्रमादितः॥ उत्तरायणमाद्यैस्तैस्त्रिभिःस्याद्दक्षि णायनमिति॥ ऋतूनांव्यत्यये जाते यदुक्तंतच्चलिख्यते । यथा । शीतो ष्णताविपर्यासो ऋतूनांरिपुजं भयम्

। पुष्पेफलेचविकृते राष्ट्रोपस्त्युंतथा दिशेदिति ॥ सत्रिविधोपि । कार्त्ति काग्रहायणपौषमाघाः शीतः १ । फाल्गुनचैत्रवैशाखज्येष्ठाः ग्रीष्मः २। आषाढश्रावणभाद्राश्विनाःवर्षाः ३ ॥ द्विविधोपि । कार्त्तिकादिषण्मासाः शीतः । १ । वैशाखादिषण्मासाः ग्रीष्मः । २ । इति स्मृतिः ॥ स्त्रीपुष्पे आर्त्तवे । रजसि । शोणितदर्शनो पलक्षिते गर्भधारणयोग्ये स्त्रीणाम वस्थाविशेषे ॥ ऋतुःस्वाभाविकःस्त्री णां रात्रयःषोडशस्मृताः । चतुर्भिरि तरैःसार्द्ध मह्नोभिः सद्विगर्हितैः ॥ दीप्तौ ॥ सुवीरे ॥ मासे ॥ इयर्त्ति गच्छति असाधारणंलिङ्गम् । ऋगतौ । अर्त्तेश्चतुरितितुः । चात्कि त्त्वम् । ऋच्छति वा ॥

ऋतुमासः । त्रि । फलितरौ । फलेग्रहे । अवन्ध्यवृक्षादौ ॥ ऋतुःप्राप्तोनेन ॥

ऋतुमती । स्त्री । रजस्वलायाम् । उदक्यायाम् ॥ ऋतुरस्त्यस्याः । मतुप् । ङीप् ॥

ऋतुराजः । पुं । वसन्ते ॥ ऋतूनांराजा । राजाहःसखिभ्यष्टच ॥

ऋतुवृत्तिः । पुं । वर्षे । संवत्सरे ॥ ऋतुवृत्तिरस्य ॥

ऋतुसन्धिः । पुं । ऋतुद्वयसन्धिकाले । ऋत्वोरन्त्यादिसप्ताहयोः ॥ आहचावाग्भटः । ऋत्वोरन्त्यादिसप्ताहावृतुसन्धिरितिस्मृतः । तत्रपूर्वोविधिस्त्याज्यः सेवनीयःपरोविधिरिति ॥

ऋतुस्नानम् । न । रजस्वलायाश्चतुर्थाह्कर्त्तव्येस्नाने॥ तत्स्नानानन्तरं भर्त्तुर्मुखंद्रष्टव्यम् । नान्यस्य । भर्त्तृसन्निधाने भर्त्तारं मनसि ध्यात्वा सूर्यंविलोकयेदितिकाशीखण्डम् ॥

ऋते । अ । वर्जने । विना ॥ ऋतीयते । ऋतिःसौत्रोधातुः । ततःके प्रत्ययः ॥

ऋत्विक् । पुं । पुरोहिते । याजके ॥ ऋतैयजति ऋतुंयजति ऋतुप्रयुक्तोवायजति । रूढिरेषा यथाकथञ्चिद्व्युत्पाद्या । यजदेवपूजादौ । ऋत्विगादिनाक्विन्नन्तो निपातितः ॥ अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान्मखान् । यःकरोतिवृतोयस्य सतस्यर्त्विगिहोच्यते इतिमनुः ॥ तेचयज्ञे षोडश भवन्ति । तेषांनामानि यथा । अध्वर्युः १। प्रस्थाता २ । नेष्टा ३ । उन्नेता ४ । ब्रह्मा ५ । ब्राह्मणाच्छंसी ६ । अग्नीध्रः ७ । पोता ८। उद्गाता ९ । प्रस्तोता १० । प्रतिहर्त्ता ११ । अस्तुब्राह्मणः १२ । होता १३ । मैत्रावरुणः १४ । अच्छावाकः १५ । ग्रावस्तुत् १६ । इति ॥

ऋद्धम् । न । आवसिते धान्ये । सम्पन्नधान्ये ॥ परिपक्वमर्द्दितधान्ये ॥ सिद्धान्ते ॥ त्रि । सुसमृद्धे ॥ ऋध्यतिस्म । ऋधुवृद्धौ । क्तः ॥

ऋद्धिः । स्त्री । समृद्धौ ॥ देवताविशेषे । पार्वत्याम् ॥ अष्टवर्गान्तर्गतौषधिविशेषे । लक्ष्म्याम् । सिद्धौ ॥ अस्याःस्वरूपम् । यथा । ऋद्धिर्वृद्धिश्चकन्दौद्वौ भवतः कोषयामले । श्वेतलोमान्वितःकन्दोलताजालः सरन्ध्रकः ॥ सएवऋद्धिर्वृद्धिश्चभेदमप्येतयोर्ब्रुवे । तूलग्रन्थिसमा ऋद्धि र्वामावर्त्तफला चसा ॥ वृद्धिस्तुदक्षिणावर्त्तफलाप्रोक्तामहर्षिभिः ॥ ऋद्धिर्बल्यात्रिदोषघ्नीशुक्रलामधुरागुरुः । प्राणैश्वर्यकरीमूर्च्छारक्तपित्तविनाशिनी ॥ औषधकरणे ऋद्धिवृद्ध्योः स्थाने वाराहीकन्दो वला वा देया ॥ ऋध्नोति । ऋधुवृद्धौ । क्तिच् । यद्वा करणे क्तिन् ॥

ऋधक् । अ । सत्ये ॥ वियोगे ॥ शीघ्रे ॥ सामीप्ये ॥ लाघवे ॥

ऋनामा । स्त्री । अदितौ । देवमातरि ॥ ऋ नाम अस्याः । डाबुभाभ्याम

न्यतरस्यामितिडाप् ॥

ऋभुः । पुं । देवे । सुरे ॥ ऋशब्दवाच्यः स्वर्गः अदितिर्वा । स्वरादित्वादव्ययम् । तत्र ततो वा भवति इति ऋपूर्वाद्भवतेर्मितद्र्वादिभ्य उपसंख्यानमितिडुः । उपपदसमासः । क्विपि ऋभूरपि ॥ ब्रह्मणः पुत्रे परमहंसपरिव्राजके ॥

ऋभुक्षः । पुं । वज्रे ॥ स्वर्गे ॥ ऋभवो-देवाःक्षियन्त्यस्मिन् । क्षिनिवासगत्योः । अन्येभ्योपीतिडः ॥ इन्द्रे ॥

ऋभुक्षाः । पुं । इन्द्रे । पाकशासने ॥ ऋभवोदेवाः क्षियन्तिनिवसन्त्यत्र । क्षेर्डः । ऋभुक्षः स्वर्गः । सोऽस्यास्तीति इनिः । ऋभुक्षाः पथिवत् ॥ यद्वा । ऋच्छति इयर्त्तीति वा । अर्त्तेर्भुक्षिनक् प्रत्ययः ॥

ऋषः । पुं । मृगविशेषे ॥ ऋच्छति इयर्त्ति वा । ऋगतौ । वाहुलकात् षक् ॥

ऋषभः । पुं । वृषे ॥ कर्णरन्ध्रे ॥ कुम्भीरपुच्छे ॥ उत्तरस्थः श्रेष्ठे ॥ अद्रिविशेषे ॥ भगवदवतारविशेषे । आदिजिने ॥ अयञ्च सत्ययुगे अग्नीध्रसुतस्य नाभेः पुत्रः । अस्य पुत्रो जडभरतः ॥ भागवते । इदं शरीरं मम दुर्विभाव्यं तत्त्वं हि मे हृदयं यत्र धर्मः

। पृष्ठे कृतो मे यदधर्म आरादतो हि मामृषभं प्राहुरार्य्या इति ॥ तन्त्री समुत्थिते कण्ठोत्थिते च सप्तस्वरान्तर्गते द्वितीयस्वरे ॥ अस्योत्पत्तिः । नाभिमूलाद्यदा वायुरुत्थितः कुरुते ध्वनिम् । वृषभस्येव निर्याति हेलया ऋषभः स्मृत इति सङ्गीतदामोदरः ॥ ऋषति बलीवर्द्दकृतस्वरसादृश्यं गच्छति । ऋषी गतौ । ऋषिवृषिभ्यां किदित्यभच् । गावोनर्दन्ति चर्षभम् ॥ अष्टवर्गान्तर्गतौषधिविशेषे । शृङ्ग्याम् । विषाणयाम् । ककुभत्याम् ॥ पश्य गुणान् जीवके ॥ कोलपुच्छे ॥

ऋषभगजविलसितम् । न । अष्टिसंज्ञकषोडशाक्षरवृत्तिप्रभेदे ॥ यथा । भ्रजिनगैः ऽ। ऽ।ऽ।।।।।।।।।ऽ स्वराद्दृषभगजविलसितम् । यथा । येनहरिरुच्चखान खरतरनखशिखरैर्दुर्जयदैत्यसिंहसुविकटहृदयतटम् । किन्विह चित्रमेतदखिलमपहृतवतः कंसनिदेशदृप्यदृषभगजविलसितमिति ॥

ऋषभतरः । त्रि । मन्दशक्तौ भारस्य वोढरि ॥ तनुर्ऋषभः । वत्सोक्षाश्वर्षभेभ्यश्च तनुत्व इति ष्टरच् । ङीपि । ऋषभतरी ॥

ऋषभध्वजः । पुं । चन्द्रमौलौ । सदाशिवे ॥ ऋषभोवृषो ध्वजश्चिह्नमस्य ध्वजे अस्य वा ॥ प्रथमजिनेन्द्रे ॥

ऋषभी । स्त्री । नराकारयोषिति ॥ शूकशिम्ब्याम् ॥ शिरालायाम् ॥ विधवायाम् ॥

ऋषिः । पुं । वेदे ॥ दीधितौ । किरणे ॥ मन्त्रद्रष्टरि । शास्त्रकृदाचार्ये । सत्यवाचि । भृगुवशिष्ठादिमुनौ । गोत्रप्रवर्त्तके कश्यपभरद्वाजशाण्डिल्यादौ ॥ सप्त ब्रह्मर्षिदेवर्षिमहर्षिपरमर्षयः । काण्डर्षिश्च श्रुतर्षिश्च राजर्षिश्च क्रमावराः इति रत्नकोषः ॥ तत्र ब्रह्मर्षयो वशिष्ठाद्याः१ । देवर्षयः कणादयः२ । व्यासाद्या महर्षयः३ । भेलाद्याः परमर्षयः४ । जैमिन्याद्याः काण्डर्षयः५ । सुश्रुताद्याः श्रुतर्षयः६ । ऋतुपर्णादयो राजर्षयः७ । एते पुराणप्रसिद्धाः । इति त्रिकाण्डशेषः ॥ सूक्ष्मवस्तुविवेचनसमर्थे । सन्न्यासिनि ॥ मन्त्रे ॥ ज्ञानिनि । तत्त्वज्ञाननिष्ठे ॥ ब्रह्मपुत्रे । अवगतपरमार्थे ॥ ऋषति जानाति पश्यति सर्वान्मन्त्रान् । ऋषीगतौ । इगुपधात्किदितीन् ॥

ऋषिकः । पुं । ऋषीके ॥

ऋषिकुल्या । स्त्री । नदीमात्रे ॥ शुक्तिमत्पादोद्भवायां नद्याम् ॥ ऋषिकुलहितायाम् ॥ ऋषीणांकुल्या ॥

ऋषिजाङ्गलम् । न । ऋषिजाङ्गलिकायाम् ॥

ऋषिजाङ्गलिकी । स्त्री । ऋक्षगन्धायाम् । ऋषिजाङ्गलवृक्षे ॥

ऋषिपुत्रः । पुं । आचार्यविशेषे ॥

ऋषिप्रोक्ता । स्त्री । माषपर्ण्याम् ॥

ऋषियज्ञः । पुं । ब्रह्मयज्ञे । स्वाध्याये ॥

ऋषिसर्गः । पुं । सर्गविशेषे ॥

ऋषीकः । पुं । काव्याद्यृषिपुत्रे ॥

ऋष्टिः । पुं । असौ । खड्गे ॥ उभयतो धारे खड्गे ॥ ऋषति । ऋषीगतौ । क्तिच् ॥

ऋष्यः । पुं । मृगविशेषे ॥ ऋष्यो नीलाण्डको लोके सरोभ इति कीर्त्तितः ॥ ऋषति । ऋषी० । अघ्न्यादित्वात् साधुः ॥

ऋष्यकेतनः । पुं । अनिरुद्धे ॥

ऋष्यकेतुः । पुं । अनिरुद्धे । कामदेवपुत्रे ॥ कामदेवे ॥ ऋष्यो मृगः केतुरस्य ॥

ऋष्यगता । स्त्री । ऋष्यप्रोक्तायाम् । शतमूल्याम् ॥

ऋष्यगन्धा । स्त्री । ऋषिजाङ्गलिकायाम् ॥ वृद्धदारके ॥

ऋ

ऋष्यप्रोक्ता। स्त्री। शतावर्य्याम्॥ अतिबलायाम्॥ शूकशिम्ब्याम्॥ ऋष्यैर्मृगैः प्रोक्ता। ऋषिभिः प्रोक्ता वा॥

ऋष्यमूकः। पुं। अद्रिविशेषे॥ ऋष्यमूकस्तु पम्पायाः पुरस्तात् पुष्पितद्रुमः। सुदुःखारोहणो नाम शिशुनागाभिरक्षितः॥ अथ वालिभयात् सुग्रीवादयः पञ्च वानराः स्थिता आसन्निति रामायणम्॥

ऋष्यशृङ्गः। पुं। विभाण्डकसुते मुनिविशेषे॥ अस्य भार्या लोमपादराजकन्या शान्ता। इति रामायणम्॥

ॠः

ॠ। अ। वाक्यारम्भे॥ रक्षायाम्॥

ॠ। न। वक्षसि॥ पुं। भैरवे॥ दनुजे॥ ॠकारे॥ स्त्री। देवाम्बायाम्॥ दनौ॥ स्मृतौ॥ गतौ॥

ऌः

ऌ। अ। देवतात्मायाम्॥ देवमातरि॥ भुवि॥ कुम्भे। पर्वते॥ मन्त्रक्षोभवचने॥ ऌकारे॥

ॡः

ॡ। अ। देवनार्याम्॥ नार्यात्मनि॥ मातरि॥ पुं। महादेवे॥ ॡकारे॥ स्त्री। दैत्यभार्य्यायाम्॥ दनुजमातरि॥ कामधेनुमातरि॥ इत्येकाक्षरकोषः॥

एः

ए। अ। स्मृतौ॥ असूयायाम्॥ अनुकम्पायाम्॥ आमन्त्रणे॥ हूतौ। आह्वाने॥

एः। पुं। विष्णौ॥ एकारे॥

एकः। त्रि। प्रथमसङ्ख्यायाम्॥ सङ्ख्येये। यथैको विप्रः। न तु विप्रस्यैका॥ एकाकिनि। केवले॥ एकादाकिनिच् चासहाये। चात्कन्लुक्॥ श्रेष्ठे॥ इतरस्मिन्॥ सत्ये। अद्वितीये। सजातीयविजातीयादिभेदशून्ये। गुणगुणिभावशून्ये। अनु

पमे ॥ एकोऽन्यार्थे प्रधाने च द्वितीयेकेवले तथा । साधारणे समानेऽल्पेसङ्ख्यायाञ्च प्रयुज्यते ॥ एति । इण्गतौ । इण्भीकापाशल्यतिमर्चिभ्यःकन्निति कन् ।

एककः । त्रि । असहाये । एकाकिनि । एकला इतिभाषा ॥ एकाद्दाकिनिच्चासहाय इत्यत्र चकारात्कन् ॥

एककार्य्यः । पुं । परस्परस्मारके अन्तेवासिप्रभृतिगणे ॥ एकंकार्य्यमस्य ॥

एककार्य्यत्वम् । न । सङ्गतिविशेषे । एककार्य्यकारित्वे ॥

एककालः । त्रि । अभिन्नसमये ॥ एकःकालोयस्य ।

एककालिकः । त्रि । समानकालभवे ॥ एककालेभवः । कालाट्ठञ् ॥

एककालीनः । त्रि । एककालिके ॥

एककुण्डलः । पुं । बलरामे ॥ कुबेरे ॥ एकंकुण्डलमस्य ॥

एकगम्यः । त्रि । निर्विकल्पकज्ञानप्राप्ये ॥

एकगुरुः । पुं । सतीर्थ्ये ॥ सतीर्थ्यास्त्वेकगुरवः ॥ एकोगुरुर्येषांते परस्परमेकगुरवोभवन्ति ॥

एकचक्रम् । न । शुभपुर्य्याम् । हरिगृहे ॥ पुं । असुरविशेषे ॥

एकचक्रा । स्त्री । पुरीविशेषे ॥

एकचरः । पुं । खड्गपशुविशेषे । गण्डके ॥ त्रि । एकाकिचारिणि । सर्पादौ ॥ व्याघ्रादौ ॥ एकश्चासौ चरश्च । एक एवचरतिवा । चर०। पचाद्यच् ॥

एकचर्य्या । स्त्री । असहायगमने ॥

एकचारी । पुं । बहुसहचारिणि ॥ एकके ॥

एकचित्तः । त्रि । अनन्यमनसि ॥ एकम् अनन्यविषयं चित्तं यस्य सः ॥

एकजटा । स्त्री । उग्रतारायाम् ॥

एकजन्मा । पुं । मण्डलेशे । भयापन्हे ॥ शूद्रे ॥ एकं जन्मास्य ।

एकजातिः । पुं । शूद्रे ॥ यथा । ब्राह्मणः क्षत्रियो वैश्यस्त्रयोवर्णाद्विजातयः । चतुर्थ एकजातिस्तु शूद्रो नास्तितु पञ्चमइतिस्मृतिः ॥ एका जातिर्जन्म यस्य ॥

एकजातीयः । त्रि । तुल्यजातीये ॥ एकः प्रकारः । प्रकारवचनेजातीयर् ॥

एकजीववादी । त्रि । एकश्चैतन्यमेकयैवाविद्ययाबद्धं संसरति तदेव वादाभिन्नत्वचते नामादादीनां बन्धमोक्षौ इत्येवंवदनशीले । अयञ्च वादः श्रुतिवाक्यकृतत्त्वान्मुमुक्षुभिरनुपादेयः ॥

एकतमः । त्रि । बहूनांमध्ये एकस्मिन् ॥ एकाद्बहूनांमिति डतमच् । क

तमो भवतां साधुः ॥

एकतरः । त्रि । द्वयोर्मध्ये एकस्मिन् ॥ एकाच्च प्राचामिति डतरच् । कतरो भवतोर्देवदत्तः ॥

एकतः । अ । एकस्मात् ॥ तसिल् ॥

एकता । स्त्री । एकत्वे ॥ एकस्य भावः । तल् ।

एकतानः । त्रि । अनन्यवृत्तौ । एकविषयासक्तचित्ते । तद्गते ॥ एकं तानयति । तनु श्रद्धोपकरणयोः । कर्मण्यण् । एकस्तानो विस्तारो यस्येति वा ॥

एकतानकः । पुं । एकाग्रे । अनन्यहृदये ॥ स्वार्थे कः ॥

एकतालः । पुं । समन्वितलये । नृत्यगीतवाद्यानां यत्साम्यं तच्चेति यावत् । विच्छेदरहिते ॥ एकः समस्तो मानमस्येति ॥

एकत्र । अ । एकस्मिन् ॥ त्रल् ॥

एकत्वम् । न । एकतायाम् । अभेदे । भेदव्यावर्त्तके ॥ सायुज्यमुक्तौ ॥ एकस्य भावः । तस्य भावस्त्वतलौ इति त्वः ॥ एकवचने ॥ यथा । एकत्वं न प्रयुञ्जीत गुरावात्मनि चेश्वरे इति ॥

एकदंष्ट्रः । पुं । गणेशे । विघ्नराजे ॥ एका दंष्ट्रा अस्य ॥

एकदण्डी । पुं । विदिततत्त्वे सन्न्यासि

नि ॥ यथा । यदा तु विदितं तत्त्वं परम्ब्रह्म सनातनम् । तदैकदण्डं सङ्गृह्य सोपवीतां शिखां त्यजेत् ॥ मौनं योगासनं योगस्तितिक्षैकान्तशीलता । निःस्पृहत्वं समत्वञ्च सप्तैतान्येकदण्डिन इति ॥ एकं दण्डमस्यास्ति । इनिः ॥

एकदन्तः । पुं । विनायके । गणेशे ॥ एको दन्तोऽस्य स्कन्देनोत्पाटितदन्तत्वात् ॥

एकदा । अ । युगपत् ॥ एकस्मिन् काले । सर्वैकान्यकिंयत्तदः काले दा ॥

एकदृक् । पुं । काके ॥ शम्भौ । महादेवे ॥ त्रि । काणे ॥ एका दृक् यस्य ॥

एकदेशः । पुं । अवयवे । प्रतीके ॥ एकश्चासौ देशश्च ॥

एकदेशी । पुं । अवयविनि ॥ एकदेशशब्दोऽवयवे रूढः । सोऽस्यास्ति । अत इनिः । यद्यपीह एकगोपूर्वादिति ठञ् प्राप्तस्तथापि पूर्वापराधरोत्तरमेकदेशिनेति निर्देशादिनिः ॥

एकदेहः । पुं । चन्द्रजे । बुधग्रहे ॥

एकधा । अ । एकप्रकारे ॥ प्रकारे धा ॥

एकधुरः । त्रि । एकधुरीणे । एकभारवाहके गवादौ ॥ एका चासौ धूश्च । ऋक्पूरित्यः समासान्तः । परवल्लिङ्गात् स्त्रीत्वम् । टाप् । एकधुरां वह

ति । एकधुराल्लुक्चेतिखस्यलुक् ॥

एकधुरावहः । त्रि । एकधुरे । एकभारिके ॥ वहति इतिवहः । अच् । एकधुरायावहः ॥

एकधुरीणः । त्रि । एकधुरे ॥ एकाधूः । पूर्वकालैकेतिसमासः । ऋक्पूरित्यः । एकधुरां वहति । एकधुराल्लुक्चेति चकारेण खस्यानुकर्षणसामर्थ्यात् पक्षे श्रवणम् ॥

एकनटः । पुं । कथके । मुख्यनटे । नाटकवर्णनकर्त्तरि ॥

एकपक्षः । त्रि । अनन्यगे ॥ सहाये ॥ एकःपक्षोयस्य ॥

एकपत्नी । स्त्री । सपत्न्याम् ॥ साध्व्याम् ॥ एकः पतिर्यस्या इतिविग्रहे नित्यंसपत्न्यादिष्विति एकपतिशब्दस्य नकारान्तादेशे ऋन्नेभ्य इतिङीप् ॥

एकपत्रिका । स्त्री । गन्धपत्रायाम् ॥

एकपदम् । न । तत्काले ॥ पुं । शृङ्गारबन्धविशेषे । तल्लक्षणम् । पादमेकं हृदिस्थाप्यद्वितीयं स्कन्धसंस्थितम् । स्तनौधृत्वारमेत् कामीबन्धस्त्वेकपदःस्मृतइति ॥

एकपदी । स्त्री । पथि ॥ एकःपादोऽस्याम् । कुम्भपदीषुचेतिनिपातः ॥ यद्वा । सङ्ख्यासुपूर्वस्येति पादस्यान्त्यलोपः । पादोऽन्यतरस्यामितिङीप् । स्वाङ्गाच्चेतिङीष्वा । पादःपत् ॥

एकपदे । अ । अकस्मादित्यर्थे ॥

एकपात् । पुं । शिवे ॥ विष्णौ ॥ एकः पादोऽस्य । सङ्ख्यासुपूर्वस्येति अन्त्यलोपः । पादोऽस्येतिश्रुतिः ॥

एकपिङ्गः । पुं । कुवेरे । धनाधिपे ॥ सा स्वयं गौरीनिरीक्षणे तत्प्रभावात् वामेचक्षुषिनष्टे रुद्रानुनयात् तत् पिङ्गिमचिह्नं देव्या दत्तम् । अतएकं पिङ्ग-मस्य ॥

एकपिङ्गलः । पुं । गुह्यकेश्वरे । कुबेरे ॥ एकंपिङ्गंलाति । ला० । आतोनुपेतिकः ॥

एकभक्तव्रतम् । न । रात्रिभोजनाभावविशिष्टे दिवाभोजने ॥ तदुक्तंस्कन्दपुराणे ॥ दिनार्द्धसमयेऽतीते भुज्यते नियमेनयत् । एकभक्तमितिप्रोक्तं रात्रौतन्नकदाचनेति ॥

एकमूला । स्त्री । शालपर्ण्याम् ॥ अतस्याम् ॥

एकयष्टिका । स्त्री । हारविशेषे । एका यष्याम् । एकलडीकाहारइतिभाषा ॥

एकरजः । पुं । भृङ्गराजे । भंगरा । इतिभाषा ॥

एकराट् । पुं । चक्रवर्त्तिनि ॥

एकरूपः । त्रि । समानाकारे ॥ एकंरूपं यस्य सः ॥

एकर्षिः । पुं । सूर्य्ये ॥ एक एव ऋषति गच्छति । इन् ॥

एकलः । त्रि । एकाकिनि । अद्वितीये ॥ इतिपद्यावली ॥ अनवयवे ॥

एकलिङ्गः । पुं । कुवेरे । त्र्यम्बकसखे ॥ न । साधनस्थलविशेषे ॥ तथाचागमः । पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्ष्यते । तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमेति ॥

एकवचनम् । न । येन पदेनैकोऽर्थ उच्यते तस्मिन् । एकस्यार्थस्य वचनम् । वचेः करणे ल्युट् ॥ कर्म्मणिषष्ठ्यासमासः ॥

एकवर्णी । स्त्री । वाद्यप्रभेदे । करतालयाम् । कङ्कमालायाम् ॥

एकवर्षिका । स्त्री । एकहायन्याङ्गवि ॥ एकःवर्षोयस्याः । एकवर्षेव । कः । ह्रस्वम् ॥

एकवाद्यः । पुं । डिण्डिमवाद्ये ॥

एकविंशतिः । स्त्री । एकाधिकविंशतौ ॥ यथा । नियुक्तस्तु यथान्यायं योमांसं नात्ति मानवः । सप्रेत्य पशुतां याति सम्भवानेकविंशतिमिति मनुः ॥ नैयायिकमते एकविंशतिदुःखानियथा । षडिन्द्रियाणि षड्रूपादयोविषयाः षड्रूपादिज्ञानानि सुखम् दुःखम् शरीरञ्चेति । एकविंशतिदुःखनिवृत्तिर्मुक्तिरिति ॥

एकवीरः । पुं । वृक्षविशेषे । महावीरे । सकृद्वीरे ॥ हैहये । कृतवीर्य्यपितरि ॥

एकवृक्षः । पुं । स्थानविशेषे ॥ यथा । चतुष्क्रोशान्तरे यत्र न वृक्षान्तरमीक्ष्यते । एकवृक्षःसविज्ञेयः इत्यागमः ॥

एकशफः । पुं । अश्वे ॥ एकखुरेजन्तुमात्रे ॥ यथा । खरोऽश्वोऽश्वतरोगौरः शरभश्चमरीतथा । एतेचैकशफाः क्षत्तः शृणु पञ्चनखान्पशूनिति श्रीभागवतम् ॥

एकशृङ्गः । पुं । हरौ ॥ एकशृङ्गपशौ ॥

एकशेषः । पुं । समासप्रभेदे ॥

एकश्रुतिः । स्त्री । उदात्तानुदात्तस्वरितानामविभागेनोच्चारणे ॥ एकाचासौश्रुतिश्च ॥

एकषष्टिः । स्त्री । सङ्ख्यासङ्ख्येयविशेषे ॥ एकाधिकाषष्टिः ॥

एकसर्गः । त्रि । अनन्यमनसि । एकताने । एकाग्रे ॥ एकः एकस्मिन्वा सर्गोनिश्चयोऽस्य ॥

एकहस्तः । पुं । डमरुवाद्ये ॥

एकस्थः । त्रि । एकत्रस्थिते ॥ एकस्मिन् तिष्ठति । स्था० । कः ॥

एकहायनी । स्त्री । एकाब्दायांगवि ॥ एकःहायनोयस्याः । दामहायनान्त

श्चेति ङीप ॥

एका । स्त्री । आर्यायाम् । कोट्टव्याम् । पार्वत्याम ॥ इतित्रिकाण्डशेषः । यथा । एकैवाहंजगत्यत्रेति । एकै वशक्तिः परमेश्वरस्य भिन्ना चतुर्द्धा व्यवहारकाले । भोगे भवानी पुरुषेषु विष्णुःकोपेषु काली समरेषु दुर्गेति च ॥

एकाकी । त्रि । एकके । एकले ॥ एकादाकिनिश्चासहाये ॥

एकाक्षः । पुं । काके ॥ त्रि । काणे ॥ एकमक्षि यस्य । षच् ॥

एकाक्षरम् । न । प्रणवे ॥ एकञ्चतदक्षरञ्च ॥

एकाग्रः । त्रि । अनाकुले ॥ विषयान्तराव्याक्षिप्तचित्ते । एकताने । विक्षेपरहिते ॥ एकम् एकस्मिन्वा अग्रमस्य । अग्रंपुरोगतंज्ञेयमितिस्वामी ॥ चित्तस्य चतुर्थ्याम्भूमौ । एकाग्रचित्ते ॥ एकविषयकधारावाहिकवृत्तिसमर्थातत्त्वोद्रेकेण तमोगुणकृततन्द्रादिरूपलयाभावादात्माकारावृत्तिः साच रजोगुणकृतचाञ्चल्यरूपविक्षेपाभावादेकविषयैवेति शुद्धे सत्त्वे भवति चित्तमेकाग्रम् । अस्यां भूमौ सम्प्रज्ञातःसमाधिः तत्रध्येयाकारावृत्तिरपि भासते ॥

एकाक्ष्यम् । त्रि । एकाग्रे ॥ एकमक्ष्यमस्य॥

एकाङ्गः । पुं । बुधग्रहे ॥ न । चन्दने ॥

एकाङ्गीसुगन्धः । पुं । कर्पूरादीनाङ्गणे । सुगन्धगणे ॥

एकात्मा । पुं । परमात्मनि विष्णौ ॥ एकः केवलोऽद्वितीयश्चासावात्माचेत्येकात्मा । जीवेश्वरभेदस्य जीवानांपरस्परभेदस्य जडतद्भेदस्यच मिथ्यात्वात् ॥ ज्ञानंज्ञेयं तथाज्ञाता त्रितयं भाति मायया । विचार्यमाणे त्रितये आत्मैवैकोऽवशिष्यत इतिश्रीमहानिर्वाणतन्त्रोक्तेश्च ॥ आत्मनोऽन्यद्विजानीहिसर्वं घ्येवचागमादिष्युक्तेश्च ॥

एकादशः । त्रि । एकादशानाम्पूरणे ॥ तस्य पूरणेडट् ॥

एकादशकः । पुं । इन्द्रियाख्येगणे ॥

एकादश । त्रि । एकाधिकदशसङ्ख्यायाम् । ११ ॥ सङ्ख्येये ॥ यथा । एकादशेन्द्रियाणीति । तत्र । बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि । वाक्पाणिपादपायूपस्थान् कर्मेन्द्रियाण्याहुः ॥ उभयात्मकमत्र मनः ॥ मनोधिष्ठितानामेवहि चक्षुरादीनां वागादीनाञ्च स्वस्वविषयेषु प्रवृत्तेः । एकादशसु इन्द्रियेषु मध्ये मन उभयात्मकम् ॥

एकादशद्वारम्। न। शरीराख्येपुरे॥ एकादशद्वाराणि अस्य। सप्तशीर्षण्यानि नाभ्यासहार्वाञ्चि [illegible]णि शिरस्येकम्। तैरेकादशद्वारम्भवति शरीराख्यम्पुरम्॥

एकादशी। स्त्री। हरिदिने। हरिवासरे॥ सातु शुक्लपक्षे सूर्य्यमण्डलात् चन्द्रमण्डलस्य निर्गमरूपैकादश कलाक्रियारूपा। कृष्णपक्षे सूर्यमण्डले चन्द्रमण्डलस्यप्रवेशरूपैकादशकलाक्रियारूपा॥ तत्रजातस्यफलम्॥ क्रोधोत्कटः क्लेशसहः सुभाषी यागादिकर्त्तास्वजनैकभर्त्ता। महामतिर्देवगुरुप्रियः स्यादेकादशीजो मनुजोऽतिहृष्टः॥ एकादशानां पूरणी। डडन्तान्ङीप॥

एकाद्नविंशतिः। त्रि। एकोनविंशत्याम्॥ एकेन न विंशतिः। एकादिश्चैकस्यचादुक्॥

एकानंशा। स्त्री। पार्वत्याम्॥

एकान्तम्। न। अत्यन्ते। अतिमात्रे। निर्भरे॥ नियते॥ क्रियाविशेषणत्वेऽस्यक्लीवत्त्वम्। द्रव्यविशेषणेतु वाच्यलिङ्गत्त्वम्॥ त्रि। निर्जने। जनैरनाकीर्णे॥ एकःअन्तःनिश्चयोऽत्र। एकस्मिन्नेव अन्तःसमाप्तिर्यस्यवा॥

एकान्ततः। अ। अव्यभिचारिणि॥

एकान्तवादी। पुं। सप्तपदार्थवादिनि नास्तिकविशेषे॥

एकान्ती। त्रि। विष्णुभक्तविशेषे॥ यथा। एकान्तेनासमो विष्णुर्यस्मादेषां परायणः। तस्मादेकान्तिनः प्रोक्तास्तद्भागवत चेतसइत्यादिगारुडे १३१ अध्यायः॥

एकान्नः। त्रि। एकभक्ते॥

एकान्नविंशतिः। त्रि। एकोनविंशतौ॥ एकेन नविंशतिः। नञोविंशत्या समासेकृते एकशब्देनसह तृतीयेति योगविभागात् समासः। अनुनासिकविकल्पः॥

एकापारम्। न। तुष्टेः प्रभेदे॥ सेवादयोऽर्जनोपायाः तेचसेवकादीन् दुःखाकुर्वन्ति। दृप्यदुरीश्वरद्वारस्थदण्डिदण्डार्द्धचन्द्रजाम्। वेदनां भावयन् प्राज्ञः कः सेवासु प्रसज्यते॥ एवमन्ये प्यर्जनोपायाः दुःखा इति विषयोपरमे या वाह्यातुष्टिः सा एकापारमुच्यते॥

एकाब्दा। स्त्री। एकहायन्यांगवि॥ एकः अब्दोयस्याःसा॥

एकाम्बरम्। न। पुरुषोत्तमक्षेत्रसन्निधौ वर्त्तमाने भुवनेश्वरनाम्ना विश्रुते परब्रह्मप्रतिष्ठिते पवित्रस्थाने॥

एकायनः। त्रि। एकाश्रये॥ एकताने

॥ एकमयनमस्य ॥ न । नीतिशास्त्रे ॥

एकायनगतः । त्रि । एकाग्रे । एकताने ॥ एकञ्च तदयनञ्च । एकायनंगतः । एकस्मिन्नयने गतं ज्ञानमस्येति वा ॥

एकावली । स्त्री । एकयष्टिकाख्ये हारे ॥ एकपङ्क्त्याम् ॥ अर्थालङ्कारप्रभेदे ॥ यथा । गृहीतमुक्तरीत्यार्थश्रेणिरेकावली मता । नेत्रे कर्णान्तविश्रान्ते कर्णौ दोस्तम्भदोलिनौ ॥ दोस्तम्भौ जानुपर्य्यन्तप्रलम्बनमनोहरौ । जानुनी रत्नमुकुराकारे तस्य हि भूभुजः ॥ उत्तरोत्तरस्य पूर्वपूर्वविशेषणभावः पूर्वपूर्वस्योत्तरोत्तरविशेषणभावो वा गृहीतमुक्तरीतिः । तत्राद्यः प्रकार उदाहृतः । द्वितीयो यथा । हिङ्कालात्मसमैव यस्य विभुता यस्तत्रविद्योतते यस्यामुष्य सुधीभवन्ति किरणा राशेः स यासामभूत् । यस्तत् पित्तमुषः सुयोस्य हविषं यस्तस्य जीवातवे वोढा यद्गुणमेषमन्मथरिपोस्ताः पान्तु वो मूर्त्तयः ॥ अपिच । स्थाप्यतेऽपोह्यतेवापि यथापूर्वं परम्परम् । विशेषणतया यत्र वस्तु सैकावली द्विधा ॥ पूर्वं पूर्वं प्रतियत्रोत्तरोत्तरस्य वस्तुनो वीप्सया विशेषणभावेन यत् स्थापनं निषेधो वा सम्भवति सा द्विधा बुधै रेकावली भण्यते ।

क्रमेणोदाहरणम् । पुराणियस्यां सवराङ्गनानि वराङ्गनारूपपुरस्कृताङ्ग्यः । रूपं समुन्मीलितसद्विलासमस्त्रं विलासाः कुसुमायुधस्य ॥ न तज्जलं यन्न सुचारुपङ्कजं न पङ्कजं तद्यदलीनषट्पदम् । नषट्पदोसौ कलगुञ्जितो न यो न गुञ्जितं तन्न जहारयन्मनः ॥ पूर्वत्र पुराणां वराङ्गनानामासामङ्गविशेषणमुखेन रूपं तस्य विलासास्तेषामप्यस्त्रमित्यमुना क्रमेण विशेषणं विधीयते । उत्तरत्र प्रतिषेधेप्येवंयोज्यम् ॥ एकावावैकावलीच ॥

एकाश्रयः । त्रि । अनन्यगतौ । अनन्यगतिके ॥

एकाश्रितगुणः । पुं । एकवृत्तिधर्म्मे ॥ यथा । रूपम् १ रसः २ गन्धः ३ स्पर्शः ४ एकत्वम् ५ एकपृथक्त्वम् ६ परिमाणम् ७ परत्वम् ८ अपरत्वम् ९ बुद्धिः १० सुखम् ११ दुःखम् १२ इच्छा १३ द्वेषः १४ यत्नः १५ गुरुत्वम् १६ द्रवत्वम् १७ स्नेहः १८ संस्कारः १९ अदृष्टम् २० शब्दः २१ ॥ इतिसिद्धान्तमुक्तावली ॥

एकाष्ठीलः । पुं । वकपुष्पे । शिवमल्ल्याम् ॥ एकमस्थि लाति । ला॰ । कः । सुषमादित्वात् षत्वम् । दीर्घ[illegible]॥

एकाष्ठीला । स्त्री । पाठायाम् । वनतिक्तिकौषधौ ॥ टाप् ॥

एकाहः । पुं । एकदिने ॥

एकाहगमः । त्रि । एकाहगम्यमार्गे ॥ एकाह्नेन गम्यते । कर्त्तृकरणे कृतेतिसमासः ॥

एकाहारः । पुं । एकदिनवृत्त्येकवारभोजने ॥ यथा । एकाहारः सदा कार्य्यो न द्वितीयः कदाचन । पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिमितिस्मृतिः ॥ त्रि । तद्वति ॥

एकीभावः । त्रि । विवेकानर्हत्वेनाविशेषतां प्राप्ते ॥

एकीयः । त्रि । एकपक्षे । सहाये ॥

एकेन्द्रियसंज्ञा । स्त्री । वैराग्यविशेषे । इन्द्रियद्वयसमर्थतया पक्वानां कषायाणामौत्सुक्यमात्रेण मनसि व्यवस्थाने ॥ अथवा दृष्टानुश्रविकविषयप्रवृत्तेर्दुःखात्मकत्वबोधेन बहिरिन्द्रियप्रवृत्तिमजनयन्त्या अपि तृष्णाया औत्सुक्यमात्रेण मनस्यवस्थाने ॥

एकोद्दिष्टम् । न । प्रेतोद्देश्यकश्राद्धे ॥ एकोद्दिष्टविधिकसांवत्सरिके ॥ एक एव उद्दिश्यते यत्र तत् ॥ एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं तदुच्यते ॥

एकोशिका । स्त्री । पाठायामोषधौ ॥

एजनम् । न । कम्पने ॥ पुं । वह्निः श्वासे ॥ त्रि । कम्पके ॥

एडः । पुं । मेषे ॥ त्रि । वधिरे ॥ इलति । इलस्वप्ने । अच् । डलयोरैक्यम् ॥ यद्वा । आसर्वतः ईड्यते । ईड स्तुतौ । घञ् । अज्वा ॥

एडकः । पुं । वनच्छगले ॥ एडकस्य पलं ज्ञेयं मेषामिषसमं गुणैः ॥ पृथुशृङ्गमेषे । मेढ्रे । उरभ्रे ॥ इलति । एलयति वा । इलस्वप्नक्षेपणयोः । ण्वुल् । डलयोरेकता ॥

एडका । स्त्री । मेष्याम् ॥ अजादित्वात् टाप् । क्षिपकादित्वान्नेत्वम् ॥

एडगजः । पुं । दद्रुघ्ने । चक्रमर्द्दके ॥ एडो मेष एव गजो यस्य भञ्जकत्वात् ॥ यद्वा । एलनम् । इलक्षेपे स्वप्ने च । घञ् । डलयोरेकता । एडे स्वप्ने गजति । गजमदे शब्दे च । अच् ॥

एडमूकः । त्रि । वाक्श्रुतिवर्जिते ॥ शठे ॥ एडोवधिरश्चासौ मूकश्च ॥

एडुकम् । न । एडूके ॥

एडूकम् । न । अन्तर्न्यस्तकीकसे कुड्ये ॥ ईड्यते । ईड स्तुतौ । उलूकादयश्चेतिसाधु ॥

एडोकम् । न । एडूके ॥ इतिद्विरूपकोषः ॥

एणः । पुं । कृष्णवर्णे मृगे । हरिणजातिविशेषे ॥ अस्यमांसगुणाः । ए

णः कषायो मधुरः पित्तास्रकफवातहृत्। सङ्ग्राही रोचनो बल्यो ज्वरप्रशमनः स्मृत इति ॥ अपिच । एणो निलकफध्वंसी किञ्चित् पित्तकरो लघुः। उष्णो ग्राही रसे स्वादु र्बल्यो ज्वरहरः स्मृत इति ॥ एति । वाहुलकात् णः ॥

एणकः । पुं । एणे ॥ स्वार्थे कः ॥

एणतिलकः । पुं । चन्द्रमसि ॥ एणस्तिलकमिव यस्य ॥

एणभृत् । पुं । चन्द्रे ॥

एणी । स्त्री । मृग्याम् ॥ एणस्य स्त्री । पुंयोगादिति ङीष् ॥

एणीनयना । स्त्री । मृगाक्ष्याम् ॥ एण्याः नयने इव नयने यस्याः । एणीनयने केलीकलहे प्रेयान् वदकिं किं नो कुरुते । धन्या रमणी सर्वं सहते दुःखं सुखवत् स्वान्ते मनुते॥

एतः । पुं । कर्वुरवर्णे ॥ त्रि । आगते ॥ कर्वुरवर्णयुक्ते॥ एति वर्णान् । इण० । हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्निति एतेस्तन् ॥

एतद् । त्रि । आसन्नबुद्धिस्थे । पुरोवर्त्ति वाचके सर्वनामनि ॥ एति इण० । एतेस्तुट्चेत्यदिः ॥ नित्यापरोक्ष-आत्मनि ॥

एतनः । पुं । निश्वासे ॥

एतर्हि । अ । सम्प्रति । इदानीम् ॥ अस्मिन्काले । इदमोर्हिल् । एतेतौ रथोः ॥

एतशः । पुं । द्विजोत्तमे । ब्राह्मणे ॥ एति । इण० । इणस्तशन्तशसुनाविति तशन् ॥

एतशास् । पुं । ब्राह्मणे ॥ एति । इण० । इणस्तशन्निति तशसुन् ॥ अत्वसन्तस्येति दीर्घः । एतशसौ । एतशसः॥

एता । स्त्री । आगतायाम् ॥ कर्बुरवर्णायाम् ॥ वर्णादनुदात्तात् तोपधात् तोनेति पाक्षिको ङीब् तत् सन्नियोगशिष्टस्तकारस्य नकारादेशस्र न ॥

एतावान् । त्रि । एतत्परिमाणविशिष्टे ॥ एतत् परिमाणमस्य । यत्तदेतेभ्यः परिमाणेवतुप् । आसर्वनाम्नः॥ एतावान् साङ्ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया । जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः ॥

एधः । पुं । इन्धने । ईंधन इति भाषा ॥ इध्यतेऽनेनाग्निः । ञिइन्धीदीप्तौ । हलश्चेति करणेघञ् । अवोदैधौद्मप्रश्रथहिमश्रथा इति घञिनलोपोगुणश्चनिपातितः ॥

एधतुः । पुं । पुरुषे ॥ अग्नौ ॥ एधते । एध० । एधिवह्योश्चतुः ॥

एधस् । न । वह्निसन्दीपनार्थे काष्ठे ।

समिधि । इन्धने ॥ एधतेऽनेन । एध० । असुन् ॥

एधा । स्त्री । समृद्धौ ॥ एधनम् । एध० । गुरोश्चेत्यः । टाप् ॥

एधितः । त्रि । प्रवृद्धे । वर्द्धिते ॥ एधते र्गत्यर्थेति क्तः ॥

एनः । न । पापे ॥ अपराधे ॥ एतिगच्छति प्रायश्चित्तेन । इण आगसी त्यसुन् नुडागमश्च ॥

एनी । स्त्री । एतायाम् ॥ अनुपाच्चिको ङीप् तकारस्य नकारादेशश्च ॥

एरका । स्त्री । निर्ग्रन्थितृणविशेषे । एरकागुन्द्रमूलाच शिम्बी गुन्द्रा शरीतिचेतिनामान्तराणि । पटेला इति भाषा ॥ एरका शिशिरा वृष्या चक्षुष्या वातकोपिनी । मूत्रकृच्छ्राश्मरी दाहपित्तशोणितनाशनी ॥

एरङ्गः । पुं । अरङ्गा रङ्गा इतिगौडेषु प्रसिद्धे मत्स्यविशेषे । एरङ्गो मधुरः स्निग्धोविष्टम्भी शीतलो गुरुरिति-चास्यगुणाः ।

एरण्डः । पुं । अरण्ड इतिभाषाप्रसिद्धे वृक्षविशेषे । उरुबूके ॥ अस्यगुणा यथा । एरण्डयुग्मं मधुर मुष्णं गुरु विनाशयेत् । शूलशोथकटीवस्ति-शिरः पीडोदरज्वरान् ॥ व्रध्नश्वास कफानाहकासकुष्ठाममारुतानिति। एरण्डयुग्मम् शुक्लरक्तैरण्डौ ॥ एरण्डपत्रं वातघ्नं कफकृमिविनाशनम् । मूत्रकृच्छ्रहरञ्चापि पित्तरक्तप्रकोपणम् ॥ वाताग्रदलं गुल्मवस्तिशूलहरम्परम् । कफवातकृमीन् हन्ति वृद्धिंसप्तविधामपि ॥ एरण्डफलम-त्युष्णं गुल्मशूलानिलापहम् । यकृत्प्लीहोदरार्शोघ्नं कटुकं दीपनं परम् ॥ तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः इति ॥ क्वाथेऽस्यमूलसंग्राह्यमित्याहुरपरेजनाः ॥ आ ईरयति वायुम् । ईरगतौ कम्पनेच । बाहुलकाद्रण्डच् ॥

एरण्डकः । पुं । एरण्डे ॥ स्वार्थेकः ॥

एरण्डतैलम । न । एरण्डस्यस्नेहे ॥ स्नेहेतैलच ॥ गुणा यथा । एरण्डतैलंतीक्ष्णोष्णं दीपनं पिच्छिलंगुरु । वृष्यं त्वच्यं वयःस्थायि मेधाकान्तिबलप्रदम् ॥ कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम् । विस्रंस्वादुरसं पाके सतिक्तं कटुकं सरम्॥ विषमज्वरहृद्रोगपृष्ठगुह्यादिशूलहृत् । हन्ति वातोदरानाहगुल्माष्ठीलाकटिग्रहान् ॥ वातशोणितविड्बन्धव्रध्नशोथामविद्रधीन् ॥ आमवातगजेन्द्रस्य शरीरवनचारिणः । एकएवानिहन्तायमेरण्डस्नेहकेशरीति ॥

एरण्डपत्रिका । स्त्री । दन्तीवृक्षे ॥

एरण्डफलम् । न । रेंडी इति प्रसिद्धे एरण्डस्य फले । एरण्डे ॥ एरण्डं कोमलं ग्राह्यं फलं तक्रेण स्वेदितम् । पाचितं कटुतैलेन हिङ्गुनाति सुवासितम् ॥ कफानिलहरं हृद्यं रूक्षमुष्णञ्च पित्तलम् । अग्निसन्दीपनं रुच्यं गुरुपाकेति पिच्छिलम् ॥

एरण्डफला । स्त्री । लघुदन्त्याम् ॥

एरण्डा । स्त्री । एरण्डी । स्त्री । } पिप्पल्याम् ॥ इति शब्दचन्द्रिका ॥

एर्व्वारुः । पुं । कर्कटीप्रभेदे । लोमशायाम् । हस्तिदन्तफलायाम् ॥ आईरणम् । ईर० सम्पदादित्वात् क्विप् । एरं इरणीति वारयतिवा । वृञ्० । बाहुलकादुण् ॥

एलकः । पुं । मेषे ॥ इति राजनिर्घण्टः ॥

एलङ्गः । पुं । मत्स्यविशेषे । गौडभाषायां रायकडा रायखाँडा एलाङ्गा इति च ख्याते ॥ एलङ्गो मधुरो वृष्यः सङ्ग्राही कफवातहा । मेधाग्निपुष्टिकारीच शीतलोगुरुरेवच ॥ श्लेष्मप्रसादनः प्रोक्तो निर्घण्टे राजपूर्वके ॥

एलवालुकम् । न । सुगन्धिद्रव्यविशेषे । वालुके । एलेये । वालुका इति गौडभाषा ॥ एलति । इलप्रेरणे । पचाद्यच् । टाप् । एलाइवं वलते । वलप्राणने । बाहुलकादुण् । स्वार्थे कन् । ङ्यापोरिति ह्रस्वः ॥

एला । स्त्री । इलायचीति भाषासिद्धायां बहुलगन्धायाम् । ऐन्द्रयाम् ॥ सा द्विविधा । सूक्ष्मास्थूलेति भेदात् ॥ सूक्ष्मोपकुञ्चिका तुत्थाकोरङ्गी त्रिपुटा त्रुटि रित्यादिनामभिः प्रसिद्धा ॥ स्थूलात् । पृथ्वीका चन्द्रवालाच निष्कुटिर्बहुला तथेत्यादिभिः ख्याता ॥ अस्यागुणास्तु सूक्ष्मैलायां स्थूलैलायाञ्च द्रष्टव्याः ॥ एलयति । इलप्रेरणे । पचाद्यच् । टाप् ॥

एलापत्रः । पुं । नागविशेषे ॥

एलापर्णी । स्त्री । सुवहायाम् । रास्नायाम् । युक्तरसायाम् । काँटाआमरुला एलानी इति गौडभाषा ॥ एलायाइव पर्णान्यस्याः । पाककर्णेति ङीष् ॥

एलावालुकम् । न । एलेये । एलवालुके ॥ ह्रस्वाभावः प्रक्रियापूर्व्ववत् ॥

एलीका । स्त्री । सूक्ष्मैलायाम् ॥

एल्वालु । न । एलवालुके ॥ एल्वालु कटुकं पाके कषायं शीतलं लघु । हन्ति कण्डूव्रणच्छर्द्दि तृट्कासारुचिहृद्रुजः ॥ बलासविषपित्तास्रकुष्ठमूत्र-

गदकूर्मीन् ॥

एव । अ । औपम्ये ॥ अनवक्लृप्तौ । अ नियोगे ॥ वाक्यपूरणे ॥ अवधारणे ॥ चारनियोगे ॥ विनिग्रहे ॥ एवकारस्त्रिविधः । विशेष्यसङ्गतः विशेषणसङ्गतः क्रियासङ्गतश्चेति । तत्र विशेष्यसङ्गतस्यैवकारस्य अन्ययोगव्यवच्छेदोऽर्थः । पार्थएव धनुर्द्धर इत्यादौ विशेषणे धनुर्द्धरे पार्थान्ययोगव्यवच्छेदबोधात् । धनुर्द्धरपदस्योत्कृष्टधनुर्द्धरत्वाच्चणिकत्वात् तथैवतात्पर्यात् । पार्थान्ययोगस्तादात्म्यम् ॥ विशेषणसङ्गतस्यैवकारस्यायोगव्यवच्छेदोर्थः । शङ्खः पाण्डुर एवेत्यादौ विशेष्ये शङ्खे पाण्डुरत्वायोगव्यवच्छेदबोधात् ॥ क्रियासङ्गतस्यैवकारस्य चात्यन्तायोगव्यवच्छेदोर्थः । सम्भवाभिप्रायके नीलंसरोजं भवत्येवेत्यादावन्वयितावच्छेदकसरोजत्वसामानाधिकरण्येन सरोजनीलभवनकर्तृत्वात्यन्ताऽयोगव्यवच्छेदबोधादिति सम्प्रदायः ॥ परिभवे ॥ ईषदर्थे ॥ अयनम् । इण्शीभ्यां वन् ॥

एवः । त्रि । गन्तरि । गमनकर्त्तरि ॥ एति । इण० । इण्शीभ्यां वन् ॥

एवम् । अ । उपमायाम् । सादृश्ये । वत् । वा । यथा । तथा । इवेत्यस्य पर्यायाः ॥ यथा । अग्निरेवं विप्रः । अग्निरिवेत्यर्थः ॥ इदंप्रकारे । इत्थम् ॥ यथा । एवं वादिनि विप्रर्षौ । अवधारणे । यथा । एवमेतत् ॥ अङ्गीकारे ॥ अर्थप्रश्ने ॥ परकृतौ ॥ पृच्छायाम् ॥

एषणः । पुं । लौहमयेषाणे ॥

एषणा । स्त्री । इच्छायाम् । पुत्रलोकवित्तकाममनासु ॥ न कश्चिदन्यः संसार उक्तादस्येषणात्रयात् ॥ इषेर्ल्युट्टाप् ॥

एषणिका । स्त्री । एषण्याम् । नाराच्याम् । स्वर्णकारादीनांतुलायाम् । निक्ति इतिगौडभाषा । काँटाइति देशभाषा ॥ इष्यतेऽनया । इषगतौ । ल्युट् । स्वार्थे कः । टाबित्त्वे ॥

एषणी । स्त्री । एषणिकायाम् ॥ व्रणमार्गानुसारिण्याम् । व्रणवेधशलाकायाम् । वेलकार इतिगौडभाषाप्रसिद्धायाम् ॥ चेतनाभिदि । इष्यतेनया । इषग० । ल्युट् । गौरादिषु एषणः करणइति ङीष् ॥

एषितव्यः । त्रि । अन्वेष्टव्ये ॥ एषितुं योग्यः । तव्यः ॥

एष्टव्यः । त्रि । एषितव्ये ॥ यथा । एष्टव्या बहवः पुत्रा यद्येकोपि गयां व्रजेत् । यजेत वाश्वमेधेन नीलंवा वृष

मुत्सृतेदिति ॥

ऐः

•••

ऐ । अ । हूतौ । आह्वाने ॥ स्मृतौ ॥ आमन्त्रणे ॥ मोचने ॥ ऐकारे ॥

ऐः । पुं । महेश्वरे ॥

ऐकध्यम् । अ । एकधार्थे ॥ एकाद्धो ध्यमुञन्यतरस्यामिति धा प्रत्ययस्य ध्यमुञ् ॥

ऐकभाव्यम् । न । एकभावत्वे ॥ ब्राह्मणादित्वात् ष्यञ् ॥

ऐकरस्यम् । न । सामरस्ये ॥ एकरसस्य भावः । ष्यञ् ॥

ऐकागारिकः । त्रि । चौरे । तस्करे ॥ एकमसहायमगारं प्रयोजनमस्य । ऐकागारिकट् चौर इतिइकट् वृद्धिश्च निपातनात् ॥ स्त्रियां टित्त्वान् ङीपि । ऐकागारिकी ॥

ऐकाग्रः । त्रि । एकताने ॥ एकाग्रात् स्वार्थेऽण् ॥

ऐकात्म्यम् । न । ऐक्ये ॥ एकात्मनो भावः । ष्यञ् ॥

ऐकान्तिकः । त्रि । अव्यभिचारिणि । साधनानन्तरमवश्यम्भाविनि ॥

ऐकान्यिकः । पुं । एकापपाठच्छात्रे ॥ यस्याध्ययने प्रवृत्तस्य परीक्षाकाले

विपरीतोच्चारणरूपं स्खलितमेकं-जातं सोनेनोच्यते । एकमन्यद्वृत्तमस्य । कर्माध्ययनेवृत्तमिति ठक् । एकमन्यदिति विगृह्य तद्धितार्थ इति समासः । ततष्ठक् । एवं द्वैयन्यिकः त्रैयन्यिकः ॥

ऐकाहिकः । त्रि । एकाहनिष्पन्ने ॥ पुं । एकदिनान्तरभवे ज्वरे ॥ दिनेदिने एककालेसमागतज्वरे ॥ समुद्रस्योत्तरे तीरे द्विविदो नामवानरः । ऐकाहिकज्वरं हन्ति तस्य नामानुकीर्त्तनात् ॥ एकाहेभवः । ठक् ॥

ऐक्यम् । न । अभेदे । एकात्मभावे । एकत्वे । व्यतिरेकाभावे ॥ भावेष्यञ् ॥

ऐक्षवम् । न । मोरटे । इक्षोर्मूले ॥ इक्षोरिदम् । अण् ॥ त्रि । इक्षोर्विकारे । गुडादौ ॥ तदवयवे ॥ बिल्वाद्यण् ॥

ऐक्ष्वाकः । पुं । सूर्यवंश्यनृपे ॥ इक्ष्वाकोरपत्यम् । जनपदशब्दात्क्षत्रियादञ् । बहुत्वेलुक् । इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धय इतिप्रयोगः ॥ इक्ष्वाकुषु जनपदेषु भवः । कोपधादण् । अस्य बहुत्वेपि न लुक् । ऐक्ष्वाकेषु च मैथिलेषु च फलन्त्यस्माकमथाशिष इति मुरारिः ॥ दाण्डिनायनेत्युकारलोपः ॥

ऐङ्गुदम् । न । इङ्गुदीवृक्षस्य फले । हिंगोटा इतिभाषा ॥ इङ्गुद्या इदम् । प्लक्षादिभ्योऽण्विधेर्नाणोलुक् ॥

ऐडविडः । पुं । ऐलविले । कुवेरे ॥

ऐडूकम् । न । एडूके । सास्थिकुड्ये ॥ स्वार्थेऽण् ॥

ऐणम् । त्रि । एणस्य चर्मादौ ॥ एणस्य अवयवो विकारो वा । प्राणिरजतादिभ्योऽञ् ॥

ऐणिकः । त्रि । एणहन्तरि ॥

ऐणेयम् । त्रि । एण्यास्त्वगादौ ॥ एण्या अस्या विकारोऽवयवो वा एण्या ढञ् ॥ स्त्रीणां रतिबन्धविशेषे ॥

ऐतरेयः । पुं । ऋग्वेदोपनिषदि । तच्छाखायाम् ॥ त्रि । इतराया अपत्ये ॥

ऐतरेयी । पुं । ऋग्वेदीयशाखाविशेषाध्यायिनि ॥

ऐतिह्यम् । न । इतिह । पारम्पर्योपदेशे ॥ तत्रानिर्दिष्टप्रवक्तृकं पारम्पर्यप्रवादमात्रम् इतिह अचुर्वृद्धा इति ऐतिह्यम् । यथेह वटे यक्षः प्रतिवसतीति । इतिहेति निपातसमुदायः उपदेशपारम्पर्ये । तदेव । अनन्तावसथेतिहभेषजाञ्ञ्यः ॥ यद्वा चतुर्वर्णादित्वात् । स्वार्थे ष्यञ् ॥

ऐनसः । पुं । एनसि ॥ स्वार्थिकः प्रज्ञाद्यण् ॥

ऐन्दवम् । न । मृगशिरोनक्षत्रे ॥ त्रि । इन्दुसम्बन्धिनि ॥ इन्दोरिदम् । तस्येदमित्यण् ॥

ऐन्दवी । स्त्री । सोमराज्याम् ॥ ङीप् ॥

ऐन्द्रः । पुं । अर्जुने ॥ वालिवानरे ॥ देवसर्गान्तरे ॥ त्रि । शक्रसम्बन्धिनि ॥ इन्द्रस्यायम् । तस्येदमित्यण् ॥ न । ज्येष्ठानक्षत्रे ॥ मूलविशेषे । वनार्द्रकायाम् ॥ इन्द्रदेवताकेहविरादौ ॥ इन्द्रोदेवतास्य । सास्य देवतेत्यण् ॥

ऐन्द्रजालिकः । पुं । मायाकारके । मायाविनि ॥ इन्द्रजालेन चरति । चरतीति ठञ् ॥

ऐन्द्रलुप्तिकः । त्रि । केशघ्नरोगविशिष्टे । खल्लीटे । गञ्जा इतिभाषा ॥

ऐन्द्रिः । पुं । जयन्ते । इन्द्रपुत्रे ॥ काके ॥ अर्जुने ॥ वालिवानरे ॥ अपत्यार्थे इञ् ॥

ऐन्द्रियकम् । त्रि । प्रत्यक्षे । इन्द्रियग्राह्ये । इन्द्रियविषये ॥ इन्द्रियेणाऽनुभूयते । कुलालादित्वाद्वुञ् ॥

ऐन्द्री । स्त्री । शच्याम् ॥ दुर्गायाम् ॥ अलक्ष्म्याम् ॥ एलायाम् ॥ इन्द्रवारुण्याम् । राखालसषा इतिगौडभाषा । इन्द्रायण इतिभाषा ॥ प्राच्यान्दिशि ॥ इन्द्रस्येयम् । तस्येदमित्यण् ।

टिड्ढेतिङीप् ॥

ऐभी । स्त्री । हस्तिघोषायाम् ॥

ऐरः । पुं । मण्डे ॥ इराअन्नम् तन्मयः ॥ न । ऐरंमदीयंसर इतिश्रुतिप्रसिद्धे मण्डेन पूर्णे मदकरे ब्रह्मलोकस्थे सरसि ॥

ऐरण्डम् । न । एरण्डस्यफले ॥

ऐराकः । पुं । खुरासानमध्यस्थे देशविशेषे ॥ तन्मध्ये चोत्तरे देवि ऐराकः परिकीर्त्तितः । तन्मध्ये खुरासानमध्ये इति तन्त्रशास्त्रम् ॥

ऐरावणः । पुं । अभ्रमातङ्गे । ऐरावते । इन्द्रगजे ॥ इरया उदकेन वणति । वणशब्दे । पचाद्यच् । इरावण एव । स्वार्थे प्रज्ञाद्यण् ॥ यद्वा इरा सुरा वनमुदकं यस्मिन् । पूर्वपदादितिणत्वम् । इरावणे भवः । तत्रभव इत्यण् ॥

ऐरावतः । पुं । नारङ्गे ॥ लकुचद्रुमे ॥ नागभेदे ॥ पञ्चमाङ्गस्य प्रथमे ।ऽऽप्रभेदे ॥ शक्रद्विपे । अभ्रमुवल्लभे । चतुर्दन्तगजे ॥ इराउदकानि सन्त्यस्मिन् । मतुप् । इरावान् समुद्रः । इरावत्यब्धौ भवः तत्रभवइत्यण् ॥ इरावत्या विद्युत इवायंवा । तस्येदमित्यण् ॥ न । महेन्द्रस्य ऋजुदीर्घशरासने ॥

ऐरावती । स्त्री । वटपत्रीवृक्षे ॥ विद्युति ॥ विद्युद्भेदे ॥ इराआपः सन्त्यस्य इरावान् मेघः । तस्येयम् । तस्येदमित्यण् । ङीप् । ऐरावतेनैकदिक् । तेनैकदिगित्यण्वा ॥ उत्तरमार्गेनक्षत्रविशेषाणां संज्ञाविशेषे ॥ यथा । पुष्याश्लेषा तथादित्यावीथी चैरावतीस्मृतेति ॥

ऐरिणम् । न । पांशुलवणे ॥

ऐरेयम् । न । मद्यविशेषे ॥ त्रि । कुजे ॥ इराया अपत्यम् । स्त्रीभ्योढक् ॥

ऐलः । पुं । चन्द्रवंशीये पुरूरवसि नृपे ॥ इलाया अपत्यम् । अण् ॥

ऐलवालुकम् । न । एलेये । वालुके । हरिवालुके । गन्धद्रव्यमिदम् ॥ एलवालुकमेव । स्वार्थेऽण् ॥

ऐलविलः । पुं । कुबेरे । पुण्यजनेश्वरे ॥ इलविलायाः अपत्यम् । इडविलाया वा अपत्यमितिविग्रहे । ऐडविलोपि । अद्व्याभ्योनदीत्यण् ॥ डलयोरेकत्वस्मरणादैडविलोपि । इडविडा अस्तिमातृत्वेन अस्येतिविग्रहे ज्योत्स्नादित्वादणि ऐडविडोपि ॥

ऐलेयम् । न । एलवालुकनामगन्धद्रव्ये ॥ इलायाअपत्यम् । स्त्रीभ्योढक् ॥

ऐशानी । स्त्री । ईशदिशि । ईशानकोणे ॥ ईशानस्येयम् । अण् ङीप् ॥

ऐश्वरम्। न। अघटनघटनाचातुर्य्ये॥ त्रि॥ ईश्वरसम्बन्धिनि॥ ईश्वरस्येदम्। अण्॥

ऐश्वरी। स्त्री। ईश्वरसम्बन्धिन्यांशक्तौ॥

ऐश्वर्य्यम्। न। विभूतौ। अणिमाद्यष्टसिद्धिषु॥ सात्त्विकोबुद्धिधर्मऐश्वर्य्यम्। यतोऽणिमालघिमामहिमाप्राप्तिप्राकाम्यवशित्वेशित्वकामावसायित्वानां प्रादुर्भावः। ऐश्वर्य्या द्विविधा त इच्छाया भवति। ईश्वरोहि यदेवेच्छति तत्करोति॥ सम्पत्तौ॥ नियन्तृत्वे॥ ईश्वरस्यभावः। गुणवचनेतिष्यञ्॥

ऐषमः। अ। वर्त्तमानवत्सरे। ऐसौँइतिभाषा॥ अस्मिन् संवत्सरे। सद्यः परुत्परार्य्यैषम इति इदमइश् समसण्प्रत्ययश्च संवत्सरे निपात्यते॥

ऐषमस्तनः। त्रि। ऐषमोभवे॥ ऐषमोह्यः श्वसोन्यतरस्यामिति शैषिकेष्वर्थेषु पक्षेट्युट्युलौ॥

ऐषमस्त्यः। त्रि। ऐषमस्तने। ऐषमोभवे जाते इत्याद्यर्थेषु॥ ऐषमोह्यसितिपक्षेत्यप्॥

ऐहलौकिकम्। न। धने॥ त्रि। इहलोकोपयोगिनि॥ यथा। ऐहलौकिकमीहन्ते मांसशोणितवर्द्धनम्। पारलौकिककार्य्येषु प्रसुप्ताभृशना-

स्तिका इतिमहाभारते पावकाध्ययनम्॥ इहलोकेभवम्। अध्यात्मादेठञिष्यते॥

ऐहिकः। त्रि। इहलोकभवे प्रतिपन्नशरीरसम्बन्धिनि स्रक्चन्दनवनितागृहक्षेत्रपशुभृत्यादिविषयजन्यसुखदुःखादिस्वरूपेभोगे॥ इहभवम्। कालाट्ठञ्॥

ओ:

—▸▸।◂◂—

ओ। अ। सम्बोधने॥ आह्वाने॥ स्मरणे॥ अनुकम्पायाम्॥ ओकारे॥

ओ:। पुं। ब्रह्मणि॥ इत्येकाक्षरकोषः॥

ओकः। पुं। शकुन्ते॥ वृषले॥ उच्चैरिगुपधलक्षणोके गुणः कुत्वञ्च ओकउचः के इतिनिपात्यते॥

ओकणः। पुं। } केशकीटे। यूकायाम्।
ओकणिः। पुं। } जूं इतिभाषा॥

ओकः। न। पुं। आश्रयमात्रे॥ गृहे॥ मन्दिरे॥ उच्यते समबैत्यत्र। उचसमवाये। असुन्। गुणः। न्यङ्क्वादित्वात् कुत्वम्॥

ओघः। पुं। प्रवाहे। जलस्य वेगे॥ वृन्दे। सङ्घाते॥ परम्परायाम्॥ उपदेशे॥ कालाख्यायां तुष्टौ॥ यथा। प्रव्रज्यापि न सद्यो निर्वाणदेति सैव कालपरिपाकमपेक्ष्य सिद्धिं ते विधास्यति अलमुत्तमतया तवेत्युपदेशे या आध्यात्मिका तुष्टिः सा कालाख्या ओघ उच्यते॥ द्रुतनृत्ये॥ नृत्यद्रुत्युपलक्षणं गीतवाद्ययोः॥ ओचनम्। उच०। घञ्। पृषोदरादित्वात् घः॥ वहतिवा। वह०। पचाद्यच्। न्यङ्क्वादित्वात् साधुः॥ यद्वा। आऊह्यतेऽनेन। ऊह०। हलश्चेति घञ्॥

ओङ्कारः। पुं। प्रणवे। वेदितव्ये ब्रह्मणि वेदनसाधने॥ अवति। अव रक्षणादौ। अवतेष्टिलोपश्चेति मन्। मन्प्रत्ययस्यैवायं टिलोपो न तु प्रकृतेः। अन्यथा डिदित्येव ब्रूयात्। ज्वरत्वरेत्यूट्। गुणः। वषट्कार इति लिङ्गात् समुदायादपि कार प्रत्ययः॥ अत्राहापस्तम्बः॥ ओङ्कारः स्वर्गद्वारं तद्ब्रह्माऽध्येष्यमाण एतदादि प्रतिपद्येत विकथांचान्यां कृत्वा एवं लौकिक्या वाचा व्यावर्त्तते इति॥ लौकिक्या वा वाचा व्यावर्त्तते तयामिश्रितं न भवतीत्यर्थः॥

ओङ्कारा। स्त्री। बुद्धशक्तिविशेषे। तारायाम्॥

ओजः। पुं। विषमसङ्ख्यायाम्॥ ओजेनौजससमःपादे॥ इतिभरतादयः॥

ओजतिथिः। पुं। विषमतिथौ॥

ओजस्। न। दीप्तौ॥ अवष्टम्भे॥ प्रकाशे॥ प्राणबले। निजबले। सामर्थ्ये॥ प्रथमतृतीयपञ्चमसप्तमनवमैकादशराशिषु॥ धातुतेजसि॥ शस्त्रादिकौशले॥ ज्ञानेन्द्रियाणां पाटवे॥ काव्यगुणे गौडीरीत्याम्॥ तल्लक्षणम्। बहुसमाससंयुक्तवर्णपदाडम्बरः। यथा ओजःप्रसादमाधुर्यगुणातितयभेदतः। गौडवैदर्भपाञ्चालीरीतयः परिकीर्त्तिताः॥ ओजःसमासभूयस्त्वं मांसलं पदडम्बरम्॥ तस्योदाहरणं यथा। गङ्गोत्तुङ्गतरङ्गसङ्गतजटाजूटाग्रजाग्रत्फणिस्फूर्जत्फूत्कृतिभीतिसम्भृतचमत्कारस्फुरत्सम्भ्रमा। आनन्दामृतवापिकां विदधती चित्तं गिरीशप्रभोः स्वां पायान्नवसङ्गमे भगवती लज्जावती पार्वतीति॥ रसादिसप्तधातुसारभागजधातुविशेषे॥ यथा। हृदि तिष्ठति यच्छुद्धं रक्तमीषत्सपीतकम्। ओजश्शरीरे सञ्जातं त

नाशान्नाश·मृच्छति ॥ भ्रमरैःफल पुष्पेभ्यो यथासम्भ्रियतेमधु । तद्‌द्वोजशरीरेभ्योधातुःसम्भ्रियतेन्व णामितिवैद्यकशास्त्रम् ॥ उब्जत्यनेन । उब्जआर्जवे । उब्जेर्बलेबलो पश्चेत्यसुन् ॥

ओजिष्ठः । त्रि । ओजस्विनि ॥ सारतमे ॥ उभयत्र विन्यन्ता दोजस्विशब्दा दिष्ठन् । विन्मतोर्लुगिति लुक् टिलोपश्च ॥

ओडवः । पुं । पञ्चस्वरयुक्तरागे ॥ सत्त्वरूप वर्जितः । प ग म ध नि युक्तः । यथा मल्लारादयः ॥ इतिसङ्गीतदामोदरः ॥

ओडिका । स्त्री । उडिधान्‌इतिगौडभाषाप्रसिद्धे धान्यविशेषे । नीवारे ॥

ओडी । पुं । ओडिका धान्ये ॥

ओड्रः । पुं । जवापुष्पे ॥ जवापुष्प वृक्षे ॥ जने ॥ आईषदुनत्ति । उन्दी । स्फायितञ्चीतिरक् । बाहुलकाद्‌धस्वत्वम् ॥

ओड्राः । पुं । भूम्नि । उडीसा इति प्रसिद्धे नीवृद्विशेषे ॥

ओड्रपुष्पम् । न । ओडर गुडहर इतिप्रसिद्धायांजवायाम् । जवावृक्षे ॥ ओड्रं पुष्प मस्य । ओड्रपुष्पकुसुमप्रियेम्बिके इतिहरानन्दः ॥

ओड्राख्या । स्त्री । जवावृक्षे ॥

ओतः । त्रि । पटेदीर्घतन्तौ ॥ सन्तत्यांस्तौ ॥

ओतुः । पुं । स्त्री । विडाले ॥ अवतिविष्ठाम् आखुभ्योगृहंवा । अवरक्षणादौ । सितनीतितुन् । ज्वरत्वरेत्यूठ् । गुणः ॥

ओतुमदः । पुं । मार्जारधर्म्मे ॥

ओदनः । पुं । न । अन्ने । भक्ते । भात इति भाषा ॥ उनत्ति । उन्दी॰ । उन्देर्नलोपश्चेति युच् ॥ यद्वा ऊर्द्दते ऽनेन । ऊर्द्दक्रीडायाम् । करणे ल्युट् । पृषोदरादिः ॥

ओदनपाकी । स्त्री । ओषधिविशेषे । नीलझिण्टयाम् ॥ पाककर्णेतिङीष् ॥

ओदनाह्वा । स्त्री । महासमङ्गायाम् ॥

ओदनिका । स्त्री । महासमङ्गायाम् ॥ बलायाम् ॥

ओदनी । स्त्री । बलायाम् ॥

ओद्मः । पुं । उन्दने ॥ उन्दी॰ । औणादिके मनप्रत्यये । अवोर्दैधौद्म प्रश्रथहिमश्रथा इतिनलोपोगुणश्च निपातितः ॥

ओम् । अ । उपक्रमे ॥ प्रणवे ॥ अभ्युपगमे । अनुमतौ ॥ अपाकृतौ । अस्वीकारे ॥ मङ्गले । शुभे ॥ बेदब

ह्यग्निवेदनसाधने ॥ अवति । अव रक्षणादौ । अवतेष्टिलो पश्चेतिमन् । मनएवटिलोपः । ज्वरत्वरेत्यूठ् । गुणः ॥

ओलः । पुं । अर्शोघ्ने । शूरणे । कन्दे ॥ त्रि । आर्द्रे । गीला भीजा इतिच भाषा ॥

ओल्लः । पुं । ओले । शूरणे ॥ ग्राम्यकन्दस्तु दोषलः ॥ त्रि । आर्द्रे । आला गीला इतिचभाषा ॥

ओषः । पुं । दाहे । प्रोषे ।प्लोषे ॥ ओषणम् । उष० । घञ् ॥

ओषणः । पुं । कटुरसे । झाल इति- भाषा ॥

ओषणी । स्त्री ।पुञ्चा इतिगौडभाषा प्रसिद्धे शाकविशेषे ॥

ओषधिः । स्त्री । फलपाकान्ते कदल्यादौ । व्रीहियवादौ ॥ जातिमात्रविवक्षायामोषधिशब्दस्य प्रयोगो भवति ॥ ओषः प्लोषः दीप्तिर्वा धीयतेऽत्र । डुधाञ्० । कर्मण्यधिकरणेचेति किः ॥

ओषधिप्रस्थः । पुं । हिमालयस्य नगरविशेषे ॥

ओषधी । स्त्री । फलपाकान्ते व्रीहियवादौ ॥ किप्रत्ययान्तात् कृदिकारादितिङीष् ॥ जातिमात्रविवक्षायामस्य प्रयोगो भवति । ओषध्यः पञ्चधाख्याता लतागुल्मास्त्वशाखिनः। पादपाः प्रसराश्चेति तेषां वक्ष्यामि लक्षणम् ॥ गुडूच्याद्यालताः प्रोक्ताः गुल्माः पर्पटकादयः । आम्राद्याः शाखिनोज्ञेया वटाश्वत्थादि पादपाः ॥ कण्टकार्य्यादिकाः सर्वाः प्रसरा इति कीर्त्तिताः

ओषधीपतिः । पुं । इन्दौ । चन्द्रमसि ॥ ओषधीनांपतिः ॥

ओषधीशः । पुं । ग्लावि । चन्द्रे ॥ ओषधीना मीशः ॥ कर्पूरे ॥

ओष्ठः । पुं । दशनवाससि । रदनच्छदे । ऊपरला होठ इतिभाषा ॥ अधरे । नीचला ओठ होठ इतिच भाषा ॥ उष्यते उष्णाहारेण । उष० । उषिकुषीतिथन् ॥

ओष्ठपुष्पः । पुं । बन्धूकपुष्पवृक्षे ॥

ओष्ठरोगः । पुं । आस्यरोगान्तर्गतौष्ठभवव्याधौ ॥ विशेषोस्यनिदाने ॥

ओष्ठी । स्त्री । बिम्बफले । कँदूरी इतिभाषा ॥

ओष्ठोपमफला । स्त्री । बिम्बिकायाम् । कँदूरी इतिभाषा ॥ ओष्ठोपमानि फलानियस्याः ॥

ओष्ठ्यः । पुं । ओष्ठभवेवर्णे ॥ त्रि । ओष्ठहिते ॥ ओष्ठेभवः । शरीराव

यवाश्चेति यत् ॥ ओष्ठयोर्हितः । श
रीरावयवाद्यत् ॥

ओष्णम् । त्रि । ईषदुष्णे ॥ आउष्णम् ॥

औः

•••

औ । अ । आह्वाने ॥ सम्बोधने ॥ वि
रोधे ॥ निर्णये ॥ शूद्राणां प्रणवे ॥
यथा । चतुर्दशस्वरो यो सौ सेतुरौ
कारसंज्ञितः। सचानुस्वारनादाभ्यां
शूद्राणां सेतुरुच्यते इतिकालिका
पुराणम् ॥ औकारे ॥

औः । पुं । अनन्ते ॥ निस्वने ॥ स्त्री ।
विश्वम्भरायाम् ॥

औक्थिकः । पुं । उक्थाध्ययनकर्त्तरि ॥
उक्थमधीते वेदवा । क्रतूक्थादी
तिठक् ॥

औक्थिक्यम् । न । औक्थिकानां धर्मे
.॥ तेषामाम्नायेपि॥ छन्दोगौक्थिके
तिञ्यः ॥

औक्षम् । न । वृषसमूहे ॥ उक्ष्णां स
मूहः तस्यसमूहइत्यण् । औक्ष
मनपत्य इतिटिलोपः ॥ अपत्येतु ।
औक्ष्णः । षपूर्वहनेत्यलोपः ॥

औक्षकम् । न । उक्ष्णां समूहे । वृ

षदन्ते ॥ गोत्रोक्षोष्ट्रेति वुञ् ॥

औख्यम् । त्रि । स्थालीपक्के ऽन्नादौ ।
पिठरपक्के ॥ उख्य मेव स्वार्थे ष्यञ् ॥

औचिती । स्त्री । औचित्ये ॥ सत्ये
॥ उचितस्य भावः । ब्राह्मणादित्वा-
त्ष्यञ् । ङीष् । हलस्तद्धितस्येति
यलोपः ॥

औचित्यम् । न । उचितत्वे । योग्य
त्वे ॥ सत्ये ॥ उचितस्य भावः ।
ब्राह्मणादेराकृतिगणत्वात् ष्यञ् ॥

औजसिकः । पुं । शूरे ॥ ओजसा वर्त्त
ते । ओजस्सहोम्भसावर्त्तत इति-
ठक् ॥

औड्रः । पुं । ओड्रदेशोद्भवे आदौ
क्षत्रिये पश्चाद्ब्राह्मणादर्शनेन क्रिया
लोपादिनाच शूद्रत्वमापन्ने दस्युप-
दवाच्ये ॥ त्रि । ओड्रदेशजे ॥

औत्कर्ष्यम् । न । उत्कर्षतायाम् ॥ भा
वे ब्राह्मणादित्वात् ष्यञ् ॥

औत्तरपथिकः । त्रि । उत्तरपथेनाहृ-
ते ॥ तेनगच्छति उत्तरपथेनाहृत
ञ्चेति ठञ् ॥

औत्तरपदिकः । त्रि । उत्तरपदग्राहि
णि ॥ उत्तरपदं गृह्णाति । ठक् ॥

औत्तराहः । त्रि । उत्तरस्मिन् जातः भ
वः ततआगतोवा ॥ उत्तराद्दाहञ् ॥

औत्तरेयः । पुं । परीक्षिन्नृपतौ ॥ उत्त

रायाः अपत्यम् । स्त्रीभ्योढक् ॥

औत्तानपादिः । पुं । ध्रुवे । स्वायम्भुव मनोःपौत्रे ॥ उत्तानपादस्यापत्यम् । इञ् ॥

औत्सर्गिकः । त्रि । उत्सर्गार्हे ॥ सामान्यविधिरुत्सर्गः । उत्सर्गमर्हति । ठञ् ॥ सामान्यत्वे ॥

औत्सुक्यम् । न । उत्कण्ठायाम् ॥ उत्सुकस्य कर्मभावोवा । ष्यञ् ॥

औदनिकः । त्रि । सूपकारे ॥ ओदनं शिल्पमस्य । शिल्पमिति ठञ् ॥

औदमेयिः । पुं । उदमेयस्यापत्ये ॥ अतइञ् ॥

औदमेयी । स्त्री । उदमेयजातौ ॥ इञः जातदृतोमनुष्यजातेरिति ङीष् ॥

औदरिकः । त्रि । उदरमात्रपूरके । आद्यूने । पेटार्थी इतिभाषा ॥ अत्यन्तबुभुक्षिते । बुभुक्षयात्यन्तपीडिते ॥ उदरे प्रसितः । उदराट्ठगाद्यूने इतिठक् ॥

औदश्वितम् । न । अर्द्धजलयुक्ते घोले ॥ त्रि । उदश्विति संस्कृते ॥ उदश्वितोन्यतरस्यामिति पक्षेऽण् ॥

औदश्वित्कः । पुं । औदश्विते ॥ उदश्विति संस्कृतम् । उदश्वितोन्यतरस्यामिति ठक् । इसुसुक्तान्तात्कः ॥

औदार्य्यम् । न । उदारतायाम् ॥ उदारस्यभावः । गुणवचनेति ष्यञ् ॥

औदासीन्यम् । न । शुभाशुभयोरुपेक्षायाम् ॥ ताटस्थ्ये ॥ उदासीनस्यभावः । ष्यञ् ॥

औदास्यम् । न । अकर्तृत्वे ॥ वैराग्ये । अनुरागादिशून्यतायाम् ॥ मनोयोगाभावे ॥

औदुम्बरः । पुं । श्राद्धदेवे । यमे ॥ न । कुष्ठरोगप्रभेदे ॥ तल्लक्षणम् । रुग्दाहरागकण्डूभिः परीतं रोमपिञ्जरम् । उदुम्बरफलाभासं कुष्ठमौदुम्बरं वदेदिति ॥ ताम्रे ॥ उदुम्बरमेव । प्रज्ञाद्यण् ॥ यवाग्रप्राविमःफलादेः ॥ फलमौदुम्बरं बाल मल्लत क्रेणसाधितम् । वेसवारभृते साज्ये पाचितं सैन्धवान्वितम् ॥ शीतं कषायं मधुरं रक्तपित्तप्रणाशनम् । मूत्रकृच्छ्रहरं सम्यग् विबन्धाध्मानकारकम् ॥ उदुम्बरस्यावयवोविकारोवा । प्राणिरजतादिभ्योऽञ् ॥ त्रि । ताम्रजे पात्रादौ ॥

औद्गात्रम् । न । सामवेदविहिते उद्गातुः कर्मणि भावेच ॥

औद्दालकम् । न । वल्मीककीटसम्भृते मधुनि ॥ प्रायोवल्मीकमध्यस्थाः कपिलाः स्वल्पकीटकाः । कुर्वन्तिकपिलं स्वल्पंतत् स्यादौद्दाल-

कंमधु ॥ औद्दालकं रुचिकरं स्वर्य्यं कुष्ठविषापहम् । कषायमुष्णमम्लञ्च कटुपाकञ्चपित्तकृत् ॥

औद्दालकिः । पुं । गौतमे ॥ उद्दालकस्यापत्यम् । अतइञ् ॥ आरुणौ ॥

औद्धत्यम् । न । अविनीतभावे ॥ उद्धतस्य भावः । ष्यञ् ॥

औद्भिज्जम् । न । पांशवलवणे ॥

औद्भिदम् । न । रेह इति प्रसिद्धे पांशुलवणे ॥ औद्भिदं पांशुलवणं यज्जातंभूमितः स्वयम् । क्षारं गुरु कटु स्निग्धं श्लेष्मलंवातनाशनम् ॥ भौमस्य पानीयस्य प्रभेदे ॥ यथा । विदार्य्य भूमिं निम्नां यस्मादूर्द्ध्वाधारया स्रवेत् । ततस्तोयमौद्भिदं नाम वदन्तीति महर्षयः ॥ औद्भिदंवारि पित्तघ्नमविदाह्यतिशीतलम् । प्रीणनं मधुरं बल्यमीषद्वातकरं लघु इति ॥

औद्वाहिकम् । न । उद्वाहसम्बन्धिधनादौ ॥ भार्य्याप्राप्तिकाले लब्धे भार्य्याधने ॥ तद्भ्रातृभिरविभाज्यम् । यथाह याज्ञवल्क्यः । पितृद्रव्याविनाशेन यदन्यत् स्वयमर्ज्जयेत् । मैत्रमौद्वाहिकञ्चैव दायादानां न तद्भवेदिति ॥

औपगवः । पुं । उपग्वपत्ये ॥ उपगोरपत्यम् । तस्यापत्यमित्यण् ॥ उपसमीपे गौर्यस्य इति उपगुर्गोपः । तच्छाया ततपुरोहितोऽपि । यथाह हारीतः । यंयर्णं याजयेयस्तु सतद्वर्णत्वमाप्नुयात् । सद्योविषेण वर्षेश्चेत्येवमेवाब्रवीद्भृगुः ॥ तथाच च्छायया ब्राह्मणोऽप्युपगुपदवाच्यः । तस्या पत्यमौपगवः ॥ इति श्रीधरस्वामिनः ॥

औपगवकम् । न । औपगवानां समूहे ॥ गोत्रोच्चोष्ट्रेतिवुञ् ॥

औपचारिकः । त्रि । उपचारार्थे ॥ विनयादित्वात् स्वार्थेठक् ॥

औपच्छन्दसिकम् । न । वैतालीयच्छन्दोविशेषे ॥ तच्चैवान्तेऽधिकेगुरौ स्यादौपच्छन्दसिकं कवीन्द्रहृद्यमिति लक्षणम् ॥ यथा । आतन्वानंसुरारिकान्तास्वौपच्छन्दसिकं हृदा विनोदम् । कंसं योनिर्जघानदेवो वन्दे तं जगतां स्थितिं दधानमिति ॥ पुष्पिताग्राभिधंकेचि दौपच्छन्दसिकं विदुः ॥ अन्यच्च । विषमे ससजा गुरू समेचेत् अरयाश्छन्दसिकं तदौपपूर्वम् । यथा । स्मररागमयी वपुस्तमिस्रा परितस्ताररवेरसत्यवश्यम् । प्रियमापदि वापि कोकिले स्त्री परितस्ताररवेरसत्यवश्यमिति ॥

औपधेयम् । न । उपधौ । रथाङ्गे ॥ छदिरुपधीतिस्वार्थेढञ् ॥

औपनिधिकम् । न । उपनिधौ । प्रीत्याभोगार्थमर्पिते द्रव्ये ॥

औपनिषदः । त्रि । श्रुतिवेद्ये परमात्मनि ॥ उपनिषदा दृश्यते गृह्यते वा । उपनिषदो व्याख्यानस्तत्रभवो वा । शेषइति अण् ऋगयनादिभ्यइति वा । अण् ॥

औपनिषदम्मन्यः । पुं । भर्तृप्रपञ्चे ॥ अयंवेदान्तैकदेशी ॥ त्रि । अन्यत्र ॥

औपनीविकम् । त्रि । नीविसमीपे व्यापृते ॥ भवार्थे उपजानूपकर्णनीवेष्ठक् ।

औपमन्यवः । पुं । प्राचीनशालाख्यर्षौ ॥ उपमन्योर्गोत्रापत्यम् । विदाद्यञ् ॥

औपम्यम् । न । अनुकारे । उपमायाम् । साम्ये ॥ उपमैव । चतुर्वर्णादित्वात्ष्यञ् ॥

औपयिकः । त्रि । उपयुक्ते ॥ न्यायागतवस्तुनि । लभ्ये ॥ उपायन्त्यनेन । अयगतौ । हलश्चेति घञ् ॥ उपायएव । उपायो ह्रस्वत्वञ्चेतिठक्ह्रस्वश्च ॥

औपरोधिकः । पुं । पीलुदण्डे । पैलवे ॥ त्रि । उपरोधसम्बन्धिनि ॥

औपवस्तम् । न । उपवासे ॥ उपवस्तमेव । प्रज्ञाद्यण् ॥

औपवस्त्रम् । न । उपवासे । भोजनाऽभावे ॥ उपवसति । तृच् । उपवस्तुरिदंकर्म । तस्येदमित्यण् । माषान्मधुमसूरांश्चवर्जयेदौपवस्त्रकमितिस्मृतिः ॥

औपसर्गिकः । पुं । सन्निपातरोगविशेषे ॥ तस्यलक्षणम् । कफोनुलोमवातेन यदिपित्तानुगो भवेत् । स्वेदश्चैत्यादिभिर्जुष्टस्तदाभवतिमानवः॥ प्रतिलोमः पुनस्तेनस्वास्थ्यमायातितत्क्षणात् । औपसर्गिकएवान्यः सन्निपातउदाहृत इति ॥ त्रि । उपसर्गसम्बन्धिनि ॥

औपस्थ्यम् । न । उपस्थेन्द्रियसुखे ॥

औपानह्यः । पुं । मुञ्जे ॥ न । चर्मणि ॥ उपानहे अयम् । ऋषभोपानहोर्ञ्यः ॥

औमीनम् । त्रि । उम्ये ॥ उमानाम्भवनं क्षेत्रम् । विभाषातिलमाषोमेति पक्षेखञ् ॥

औरगम् । न । फणिभे ॥ त्रि । सर्पसम्बन्धिवस्तुनि ॥ उरगस्येदम् । अण् ॥

औरभ्रः । पुं । कम्बले । रल्लके ॥ उरभ्रस्य इदम् । अण् ॥

औरभ्रकम् । न । मेषवृन्दे ॥ उरभ्राणां समूहः । गोत्रोक्षोष्ट्रोरभ्रेतिवुञ् ॥

औरभ्रिकः । त्रि । मेषजीवने ॥

औरसः । पुं । स्त्री । उरस्ये । स्वात्मजे । ऊढसवर्णायां जनितापत्ये ॥ यथा । सवर्णायां संस्कृतायां स्वयमुत्पादयेत्तु यम् । औरसं तं विजानीयात् पुत्रंप्रथमकल्पितमिति ॥ उरसानिर्मितः । उरसोऽण् चेत्यण् ॥

औरसिकः । त्रि । उर इवेत्यर्थे ॥ अङ्गुल्यादिभ्यष्ठक् ॥

औद्ध्वदेहिकम् । त्रि । और्द्ध्वदैहिके ॥ केचिदस्यानुशतिकादिषु पाठं नेच्छन्ति ॥

और्द्ध्वदैहिकम् । त्रि । प्रेतकर्मणि । प्रेतदाने । प्रेतमुद्दिश्य मरणदिनमारभ्य सपिण्डीकरणपर्यन्तं प्रत्यहं दीयमाने जलपिण्डादौ । मृतार्थं तद्देहदानं त्रिषु स्यादौर्द्ध्वदैहिकम् ॥ देहादूर्द्ध्वः ऊर्द्ध्वदेहः । राजदन्तादिः । ऊर्द्ध्वदेहेभवम् । अध्यात्मादित्वाट्ठञ् । अनुशतिकादित्वादुभयपदवृद्धिः ॥

और्द्ध्वस्रोतसिकः । त्रि । शैवे ॥ इति त्रिकाण्डशेषः ॥

और्व्वः । पुं । वाडवानले ॥ सप्तभूगोलस्य दक्षिणसीमा । तत्र सर्वे नरकाः दैत्याश्च वसन्ति ॥ पञ्चप्रवरान्तर्गत मुनिभेदे ॥ उर्वस्य मुनेरपत्यम् । ऋष्यण् । गोत्रापत्ये विदाद्यञ् ॥ न । पांशुलवणे ॥

और्व्वरः । त्रि । भौमे । रजसि ॥

और्व्वशेयः । पुं । अगस्त्यमुनौ ॥

औलूकम् । न । पेचकसमूहे ॥ उलूकानां समूहः । खण्डिकादित्वादञ् ॥

औलूक्यः । पुं । वैशेषिके । वैशेषिकदर्शनाभिज्ञे ॥

औशनसम् । न । शास्त्रविशेषे । विषविनिर्माणप्रतिपादके शिल्पशास्त्रे ॥ उशनसा प्रोक्तम् । तेनप्रोक्तमित्यण् ॥ उपपुराणविशेषे ॥

औशिजः । पुं । उशिजि ॥ स्वार्थिकः प्रज्ञाद्यण् ॥

औशीरम् । न । शयनासने ॥ शयनं स्वापः शय्या वा । आसनम्पीठादि । स्वापपीठयोः समुदितयोरियं संज्ञा ॥ चामरे ॥ दण्डे ॥ पुं । चामरदण्डे ॥ त्रि । उशीरजे ॥ उश्यते । वशकान्तौ । वशः किदिति ईरन् । प्रज्ञादण् ॥ यद्वा । उशीरस्येदम् । तस्येदमित्यण् ॥

औषधम् । न । रोगनाशकद्रव्ये । भेषजे । जायौ । अगदे ॥ सर्वैः प्राणिभिर्भुज्यमाने औषधिप्रभवेऽन्ने ॥ रोगहृत्त्वेन द्रव्यमात्रविवक्षाया मौषधशब्दप्रयोगः । तेन घृततैलादिकमप्यौषधशब्दवाच्यमिति ज्ञेयम् ॥

ओषधेरिदम् । ओषधिरेव वा । ओषधे रजाता विष्यण् ॥ मुख्या·म् ॥

औषरम् । न । पांशवलवणे ॥

औषरकम् । न । सार्वगुणे । मृत्तिकालवणे । खारीलोन खारीनून इति च भाष

औषसः । त्रि । प्राभातिके ॥ अनुदितौषसराग इति औषसातपभयादिति च भारवि लक्ष्यम् ॥ उषसिभवः । सन्धिवेलेत्यादिनायोगविभागादण् । अन्यथा कालाट्ठञ् स्यादितिव्याख्यातारः । अपभ्रंश एवायमिति प्रामाणिकाः ॥

औष्ट्रम् । त्रि । उष्ट्रसम्बन्धिनि ॥ औष्ट्रं दुग्धं लघु स्वादु लवणं दीपनं तथा । कृमिकुष्ठकफानाहशोफोदरहरं सरम् ॥ उष्ट्रस्येदम् । अण् ॥

औष्ट्रकम् । न । उष्ट्रसमूहे ॥ तस्य समूहइत्यर्थे गोत्रोक्षोष्ट्रेतिवुञ् ॥ उष्ट्रस्य विकारोऽवयवोवा । उष्ट्राद्वुञ् ॥

औष्ठ्यः । त्रि । ओष्ठभवे ॥ शरीरावयवाच्चेति यत् ॥

अम् । न । परे ब्रह्मणि ॥ अनुस्वारे । पञ्चदशे स्वरे ॥ विन्दुमात्रानुनासिकवर्णोऽयम् । अत्राकार उच्चारणार्थः । अयं मकारमकारस्थानेपि भवति ॥

अः । पुं । महेश्वरे ॥ विसर्गे । षोडषे स्वरे ॥ द्विविन्दुमात्रः कण्ठ्यवर्णोऽयम् । अत्राकार उच्चारणार्थः । अयं रेफसकारस्थानेपि भवति ॥

इत्यादिगौडकुलोत्पन्नाडीचवालप्रधानोपनामतुलाराममिश्रात्मजश्रीधनपति मिश्रापरनाम्ना तथा श्रीसद्गुरुकुलावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेन विरचितेशब्दार्थचिन्तामणा वर्गः समाप्तिङ्गतः ॥ १ ॥

तत् सत्

कः । पुं । ब्रह्मणि ॥ समीरे ॥ आत्मनि ॥ यमे ॥ दक्षप्रजापतौ ॥ भास्करे ॥ कामग्रन्थौ ॥ वह्निणि । नारायणे ॥ पतत्रिणि । खगे ॥ पार्थिवे ।

राजनि ॥ मयूरे ॥ अग्नौ ॥ मनसि ॥ शरीरे ॥ काले ॥ धने ॥ शब्दे ॥ प्रकाशे ॥ न । सुखे ॥ शिरसि ॥ जले ॥ कायति । कचतिवा । कैशब्दे । कचदीप्तौ । अन्येभ्योपीतिड: ॥ ककारे ॥

कंवल: । पुं । कम्बलार्थेषु ॥

कंस: । पुं । उग्रसेनसुतेऽसुरविशेषे । श्रीकृष्णमातुले ॥ पुं । न । तैजसद्रव्ये । स्वर्णरजतादिनिर्मिते पात्रमात्रे ॥ ताम्ररङ्गमिश्रितधातुविशेषे । कांस्ये । काँसा काँसो इतिभाषा ॥ आढकपरिमाणे माने ॥ मद्यादिपानपात्रे । पानभाजने ॥ कम्यते । कमुकान्तौ । वृत्वदिहनिकमीतिस: ॥

कंसकम् । न । नयनौषधे । पुष्पकासीसे । हीराकसीप्रभेदे ॥

कंसकार: । पुं । कसेरा इतिप्रसिद्धे जातिविशेषे ॥ अस्योत्पत्तिर्यथा । वैश्यायां ब्राह्मणाज्जातोअम्बष्ठो गान्धिको वणिक् । कंसकारशङ्खकारौ ब्राह्मणात्सम्बभूवतु: ॥ इतिवृहद्धर्मपुराणम् ॥ अपिच । विश्वकर्मा च शूद्रायां वीर्याधानं चकारस: । ततोबभूवु:पुत्रा श्चनवैते शिल्पकारिण: । मालाकार: कर्मकार:शङ्खकार:कुविन्दक: । कुम्भकार: कंसकार: षडेते शिल्पिनोवरा

॥ इतिब्रह्मवैवर्त्तपुराणम् ॥

कंसजित् । पुं । वासुदेवे । श्रीकृष्णे ॥ कंसं जयति । जिजये । क्विप् । तुक् ॥

कंसवती । स्त्री । कंसस्य भगिन्याम् ॥

कंसहा । पुं । देवकीसुते ॥ कंसं हन्ति । हन० । क्विपचेति क्विप् ॥

कंसा । स्त्री । कंसवत्याम् । वसुदेवानुजपत्न्याम् ॥

कंसाराति: । पुं । } श्रीकृष्णे ॥ कंसस्य
कंसारि: । पुं । } अराति: अरिर्वा ॥

कंसास्थि । न । कांस्यधातौ ॥

कंसीयम् । त्रि । कंसायहिते ॥ छ: ॥

कंसोद्भवा । स्त्री । सुगन्धिमृत्तिकाविशेषे । आढक्याम् । काच्याम् । सौराष्ट्राम् ॥

ककन्द: । पुं । कनके । स्वर्णे ॥

ककुञ्जल: । पुं । स्त्री । चातकखगे ॥

ककुत्स्थ: । पुं । सूर्यवंशजे राजविशेषे । शशादतनये । इक्ष्वाको:पौत्रे ॥ ककुदि वृषांसे तिष्ठति । स्था० । क: ॥

ककुत् । स्त्री । वृषाङ्गविशेषे ॥ श्वेतच्छत्रादौ राजचिह्ने ॥ वरे ॥ श्रेष्ठशृङ्गे ॥ कं सुखं कौति । कुशब्दे । क्विप् । तुक् । पृषोदरादित्वात्तद: ॥

ककुद: । पुं । न । प्रधाने । वरे । श्रेष्ठे ॥ राजचिह्ने । श्वेतच्छत्रादौ ॥ वृषाङ्गे । वृषांसस्थस्थूलमांसपिण्डे ॥ प

र्वताग्रभागे ॥ कं सुखं कौति । कु० । क्विप् । तुक् । पृषोदरादिः ॥

ककुद्मान् । पुं । वृषे । बलीवर्द्दे ॥ ऋषभौषधौ ॥ पर्व्वते ॥ ककुदस्ति अस्य । मतुप् । यवादित्वान्न वत्वम् ॥

ककुद्मती । स्त्री । कट्याम् । पोंछा इति भाषा ॥ ककुद्वृषस्कन्धः । स इव मांसपिण्डः ककुत् । सोऽतिशयितोऽस्याम् । मतुप् । यवादित्वान्न वः ॥

ककुप् । स्त्री । प्रवेण्याम् ॥ दिशि ॥ शोभायाम् ॥ चम्पकस्रजि ॥ रागिणीविशेषे ॥ अस्या लक्षणं यथा । पीतं वसाना वसनं सुकेशी वने वदन्ती पिकनाददूना । विलोकयन्ती ककुभोऽतिभीता मूर्त्तिः प्रदिष्टा ककुभस्तथेयमिति सङ्गीतदामोदरः ॥ कं कते । ककलौल्ये । बाहुलकादुभप्रत्ययः ॥ यद्वा । कं वातं स्कुभ्नाति विस्तारयति । स्कुभ इति सौत्रः । क्विप् । पृषोदरादित्वात् सलोपः ॥

ककुभः । पुं । रागविशेषे ॥ वीणाङ्गे । प्रसेवके । वीणादण्डाधःस्थितं शब्दगाम्भीर्य्याय दारुमयं भाण्डं यच्चर्म्मणाच्छाद्यते तस्मिन् ॥ अर्ज्जुनपादपे ॥ ककुभः शीतलो भग्नक्षतक्षयविषास्रजित् । मेदोमेहव्रणान् हन्ति तुवरः कफपित्तहृत् ॥ ककुभो दिशः पर्व्वताग्रभागस्य च ...

सन्त्यस्य बहुविस्तरत्वात् । अर्शआद्यच् ॥ पर्व्वतान्तरे ॥ कश्च कुश्च ककू । ते भाति । भा० । अन्तर्भावितण्यर्थः । आतोऽनुपेति कः ॥

ककुभा । स्त्री । दिशि ॥ केन आदित्येन जलेन वा कुत्सितानि भानि नक्षत्राण्यत्रेति टाबन्तोऽपीति कश्चित् । तन्न । व्यधिकरणबहुव्रीहिप्रसङ्गात् ॥ केन कुत्सिता भाति । भादीप्तौ । सुपीति कः । भिदाद्यङ् वा ॥ रागिणी विशेषे ॥

ककुभादनी । स्त्री । नलीनामगन्धद्रव्ये ॥

ककुभः । पुं । खगान्तरे ॥

कक्कोलः । पुं । न । स्वनामख्यातसुगन्धिद्रव्यविशेषे । कोषके । काँकला इति गौडभाषा । काँकोली इति फलकपूर इति गन्धुला इति च प्रसिद्धे ॥ कक्कोलं लघु तीक्ष्णोष्णं तिक्तं हृद्यं रुचिप्रदम् । आस्यदौर्गन्ध्यहृद्रोगकफवातामयान्यहृत् ॥ ककते । कक० । सम्पदादित्वात् क्विप् । कोलति । कुलसंस्त्याने । ज्वलादित्वाण्णः । कक् च तत् कोलश्च ॥

कक्कोलकम् । न । कोषफले । कक्कोले । स्थूलमरिचे ॥ स्वार्थे कन् ॥

कक्खटः । त्रि । कठिने ॥ कक्खति ।

कक्खहसने। शकादिभ्योटन् ॥

कक्खटपत्रकः। पुं। पाट इति गौडप्रसिद्धे वृक्षविशेषे। पट्टे। राजशणे॥

कक्खटी। स्त्री। वर्णलेखायाम्। कठिन्याम्। खट्याम्। सैलखडी इति भाषा॥

कक्षः। पुं। बाहुमूले। काख इतिभाषा॥ वीरुधि। लतायाम्॥ तृणे॥ शुष्कतृणे॥ शुष्कवने॥ पापे॥ कच्छे॥ अरण्ये॥ पार्श्वे॥ कषति। कष्यते वा। कषहिंसायाम्। वृतवदिहनिकमिकषिभ्यः सः॥

कक्षरुहा। स्त्री। नागरमुस्तायाम्॥

कक्षशायः। पुं। कुक्कुरे॥

कक्षा। स्त्री। अन्तरीयवस्त्रस्य पश्चिमाञ्चले। अधोंशुकस्य पृष्ठतो निहिताञ्चले॥ स्पर्द्धास्पदे॥ इभरज्ज्वाम्। गजमध्यबन्धनरज्जौ॥ काञ्च्याम्॥ राजद्वारप्रवेशे॥ गेहप्रकोष्ठके॥ भित्तौ॥ साम्ये॥ रथभागे॥ उष्ट्रास्त्रियाम्॥ क्षुद्ररोगविशेषे॥ तल्लक्षणम्। बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम्। पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्द्दिशेदिति॥ कषति कष्यते वा। कष०। वृत्रिति सेकृते टाप्॥

कक्षापटः। पुं। कौपीने॥ इतिहलायुधः॥

कक्षावेक्षकः। पुं। शुद्धान्तपाले॥ उद्यानपाले॥ रङ्गाजीवे॥ कवौ॥ षिङ्गे॥ द्वाःस्थे॥ कक्षायाः अवेक्षकः॥

कक्षीवान्। पुं। स्फोटायने ऋषिविशेषे॥ कक्ष्या अस्ति अस्य। मतुप्। आसन्दीवदष्ठीवदिति निपातनात् कक्ष्यायाः सम्प्रसारणम्॥ कक्ष्यावान् अन्यत्र॥

कक्षोत्था। स्त्री। भद्रमुस्तायाम्॥

कक्ष्यम्। न। एषणिकापाषे। काँटेकी कटोरी इति भाषा॥ इतिमिताक्षरा॥

कक्ष्या। स्त्री। वृहतिकायाम्॥ हर्म्यादिप्रकोष्ठे। राजगृहादेर्वेष्टनावच्छिन्ने देशे। राजगृहादीनां प्रारम्भकोष्ठके॥ सप्तकक्ष्या अतिक्रम्येति यथा॥ सादृश्ये॥ कक्षरज्जौ॥ काञ्च्याम्। मेखलादामनि॥ यथा। परिधानाद्बहिः कक्ष्या निबद्धा ह्यसुरीमतेति॥ मध्येभबन्धने। गजमध्यबन्धनरज्जौ॥ यथा। हेमकक्ष्या गजा इति॥ उद्योगे॥ यथा। परार्थबद्धकक्ष्याणां तादृशामुद्भवः कुतः॥ कक्षेभवा। शरीरावयवाद्यत्॥

कङ्कः। पुं। छद्मद्विजे॥ काँक इतिगौडभाषा प्रसिद्धे पक्षिविशेषे। लोह

पृष्ठे । कंकचुडा इति भाषा ॥ यमे ॥ युधिष्ठिररूपे । अजातशत्रौ ॥ कंस भ्रातरि । उग्रसेनसुते ॥ महाराज च्युते ॥ कङ्कते । ककिगतौ । अच् ॥

कङ्कटः । पुं । कवचे । सन्नाहे ॥ कङ्कते । ककिलौल्ये । शकादिभ्योऽटन् ॥ यद्वा । कं सुखं कटति । कटे० । मू०कः ॥

कङ्कटकः । पुं । सन्नाहे । तनुत्रे । वर्मणि ॥ स्वार्थे कन् ॥

कङ्कणम् । न । करभूषणे । कडा इति भाषा ॥ हस्तसूत्रे । कङ्गणा इति भाषा ॥ मण्डने ॥ गुर्वक्षरे ऽ ॥ कंशुभं कणति । कणशब्दे । अच् । कङ्कते वा । ककिलौल्ये । बहुलमन्यत्रापीति अनुदात्तेतश्च हलादेरितिवा युच् । पृषोदरादित्वाण्णत्वम् ॥ शेखरे ॥

कङ्कणी । स्त्री । क्षुद्रघण्टिकायाम् । किङ्किण्याम् । कण्ठाभरणविशेषे ॥ कंगणीति भाषाप्रसिद्धे स्त्रीणांहस्ताभरणे ॥ कङ्कनम् । ककिगतौ । घञ् । कङ्कं गतौ अणति । अणशब्दे । अच् । गौरादित्वान् ङीष् । शकन्ध्वादिः ॥ यद्वा । कं सुखं कणति । कण० । पचाद्यच् ॥

कङ्कणीका । स्त्री । प्रतिसरायाम् । क्षुद्रघण्टिकायाम् ॥ कंगणीति प्रसिद्धे स्त्रीणांकरभूषणे ॥ चङ्कणयते । कणशब्दे । अस्मात् ण्यन्तात् चङ्किणः कङ्कणाचेति ईकन् । धातोः कङ्कणादेशश्च ॥

कङ्कतम् । न । प्रसाधन्याम् । कङ्घी इति भाषा ॥ कङ्कते । ककि० । बाहुलकात् अतच् ॥

कङ्कतिका । स्त्री । कङ्कते । प्रसाधन्याम् ॥ कङ्कते । ककिगतौ । बाहुलकादतच् । गौरादित्वान् ङीष् । स्वार्थे कन् । केण इति ह्रस्वः ॥ यद्वा । कस्य शिरसोऽङ्काः । शकन्ध्वादिः । कङ्केष्वतति । क्वुन् ॥ बलाप्रभेदे । नागबलायाम् ॥

कङ्कती । स्त्री । कङ्कतिकायाम् ॥

कङ्कचोटः । पुं । कांकिला इतिगौड-भाषा प्रसिद्धे मत्स्यविशेषे । अल्प-व्यथे ॥

कङ्कचोटिः । पुं । कङ्कचोटमत्स्ये ॥ कङ्क इव चोटिर्यस्य ॥

कङ्कपत्रः । पुं । शरविशेषे ॥ कङ्कस्य पत्राणीव पत्राणि यस्य ॥

कङ्कमाला । स्त्री । करतालीवाद्ये ॥

कङ्कमुखः । पुं । न । सन्दंशे । संडसी सड़ौंसीतिच भाषा ॥

कङ्कुरः । त्रि । कुत्सिते ॥ न । तक्रे ॥ इतिहेमचन्द्रः ॥

कङ्कोलः । पुं । निकोचकवृक्षे । अङ्कोठे । टेरा इतिभाषा ॥ काँकरोल इति गौडभाषाप्रसिद्धायां लतायाम् ॥

कङ्कशत्रुः । पुं । पृश्निपर्ण्याम् ॥

कङ्का । स्त्री । उत्पलगन्धिके । कृष्णतामे । गोशीर्षचन्दने ॥ उग्रसेनस्यकन्यायाम् । वसुदेवानुजपत्न्याम् ॥

कङ्कालः । पुं । शरीरास्थि । त्वङ्मांसरहिते शरीरारम्भकेऽस्थिपञ्जरे । करङ्के । अस्थिपञ्जरे ॥ कं सुखं शिरो वा कालयति । कलक्षेपे । चुरादिः । अच् ॥ यद्वा । कङ्कते । ककिगतौ । बाहुलकात् कालन् ॥

कङ्कालमाली । पुं । रुद्रे । विरूपाक्षे ॥ कङ्कालमाला अस्ति अस्य । व्रीह्यादित्वादिनिः ॥

कङ्कुः । स्त्री । कांगुनी इतिख्याते कङ्गुधान्ये ॥ न । कंसासुरभ्रातरि ॥

कङ्कुष्ठम् । न । पर्वतीयमृत्तिकाविशेषे । कालकुष्ठे । रङ्गदायके ॥ यथा । हिमवत्पादशिखरे कङ्कुष्ठमुपजायते । तत्रैकं नलिकाख्यं स्यात्तदन्यद्रेणुकं स्मृतम् ॥ पीतप्रभं गुरु स्निग्धं श्रेष्ठं कङ्कुष्ठमादिमम् । श्यामं पीतं लघु त्यक्तसत्त्वं नेष्टं हि रेणुकम् ॥ कङ्कुष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकम् । कृ

मिश्नोथोदराध्मानगुल्मानाहकफापहमिति ॥

कङ्केरुः । पुं । काकविशेषे । द्रारबलिभुजि ॥

कङ्केलिः । पुं । अशोकद्रुमे ॥

कङ्केल्लः । पुं । वास्तूके ॥

कङ्केल्लिः । पुं । अशोकवृक्षे । वञ्जुले ॥

कङ्क्वम् । न । भोगे ॥ पापभोगे ॥

कङ्गुः । स्त्री । काँगनीतिप्रसिद्धे धान्यविशेषे । प्रियङ्गौ ॥ स्त्रियां कङ्गुप्रियङ्गू द्वे कृष्णारक्तासितास्तथा ॥ पीता चतुर्विधा कङ्गुस्तासां पीतावरा स्मृता ॥ कङ्गुस्तु भग्नसन्धानवातकृद् बृंहणी गुरुः । रूक्षश्लेष्महरातीव वाजिमां गुणकृद्भृशम् ॥ कम् अङ्गति । अगिगतौ । अङ्गयतिवा णयन्तः । मृगय्वादित्वात् कुः । शकन्ध्वादिः ॥

कङ्गुनी । स्त्री । कांगनी इतिभाषाप्रसिद्धे धान्यविशेषे । पीततण्डुले ॥ चीनके । अत्यन्तसुकुमारे ॥

कङ्गुनीपत्रा । स्त्री । तृणविशेषे । पण्यान्धायाम् ॥

कङ्गूः । स्त्री । धान्यभेदे । प्रियङ्गौ ॥

कचः । पुं । केशे ॥ वृहस्पतेःपुत्रे ॥ वन्धे ॥ शुष्कव्रणे ॥ कच्यते । कचबन्धने । पुंसीतिघः ॥ कचत्यात्मानं वा । पचाद्यच् ॥ मेघे इतिशब्दमाला ॥

कचङ्गनम् । न । करशून्यहट्टे । निर्मुटे । पैंठ इतिभाषा ॥

कचङ्गलः । पुं । पाथोधौ । समुद्रे ॥

कचपम् । न । तृणे ॥ पत्रे ॥ शाकपत्रे ॥ कचते । कचबन्धने । उषिकुटिदलिकम्बिखजिभ्यः कपन् ॥

कचपक्षः । पुं । केशसमूहे ॥ पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥

कचपाशः । पुं । केशसमूहे ॥

कचरिपुफला । स्त्री । शमीवृक्षे ॥

कचहस्तः । पुं । केशसमूहे ॥

कचा । स्त्री । हस्तिन्याम् ॥

कचाकुः । त्रि । दुराधर्षे ॥ दुश्शीले ॥ पुं । भुजङ्गमे ॥

कचाग्रम् । न । बालाग्रे । त्रसरेणवष्टके ॥

कचाचितः । त्रि । विकीर्णकेशे ॥

कचाटुरः । पुं । दात्यूहे । शितिकण्ठे ॥

कचामोदम् । न । बाला इतिप्रसिद्धे बालके ॥

कचुः । स्त्री । कच्व्याम् । अरवी कचालु इति च भाषा ॥

कचेलम् । न । पत्रीनिबन्धने ॥

कच्चटम् । न । जलपिप्पल्याम् ॥

कच्चरः । त्रि । मलिने ॥ कुत्सितंचरति । पचाद्यच् । रथवदयोश्चेति च कारात् कोःकततत्पुरुषइतियोग-विभागमहा कोःकत् ॥ न । तक्रे ॥

कच्चित् । अ । कामप्रवेदने ॥ साभिलाषप्रश्ने । इष्टपरिप्रश्ने ॥ हर्षे ॥ मङ्गले ॥ कदिति कुशब्दादेशः । कत् चित् अनयोःसमाहारद्वन्द्वः ॥

कच्छः । पुं । अनूपे । जलप्रायदेशे ॥ नदीपर्वतादिजलाशयसमीपे । तटे ॥ तुन्नकद्रुमे ॥ नौकाङ्गे ॥ काछ इतिभाषाप्रसिद्धे परिधानाञ्चले । कच्छायाम् ॥ अत्रस्मृतिः । वामे पृष्ठे तथा नाभौ कक्षत्रय मुदाहृतम् । एभिः कक्षैःपरीधत्ते योविप्रः स शुचिः स्मृतः इति ॥ परिधानाद्बहिः कक्षा-निबद्धाह्यासुरीभवेत् । इतियाज्ञवल्क्यः ॥ पुं भूम्नि । देशविशेषे ॥ यथा । गणेश्वरात् पूर्वभागे समुद्रादुत्तरे शिवे । कच्छदेशः समाख्यातस्तन्त्रे श्रीशक्तिसङ्गमे इति ॥ कचति कचदीप्तौ । बाहुलकाच्छः ॥ यद्वा । केनछृणाति । उछृदिर्दीप्तिदेवनयोः । अन्येभ्योपीति डः । कंजलं छ्यति परिच्छिनत्ति । छोछेदने । आतोनुपेतिकः ॥ त्रि । जलप्रान्ते ॥ परिधानाञ्चले कच्छो जलप्राये त्रिलिङ्गकइत्यमरः ॥

कच्छकः । पुं । तुन्नके । तूणी इति प्रसिद्धे वृक्षे ॥

कच्छटिका । स्त्री । कच्छायाम् । कछो टी इतिभाषा ॥ इतिशब्दरत्नावली ॥

कच्छपः ।पुं । पञ्चनखे जलजन्तुविशेषे । कमठे । कूर्मे । कच्छुवा इति भाषा ॥ अस्यमांसप्रकारो गुणाश्च । तप्ततोये परिक्षिप्तं सम्यक् स्विन्नञ्च कच्छपम् । तन्मांसं खर्परान्नीत्वा खण्डितं स्वल्पखण्डकैः ॥ पाचितं सार्षपे तैले हिङ्गुसैन्धवसंयुते । वेसवारसमायुक्ते दाडिमेन सचाम्लिते ॥ कच्छपो बलदो वातपित्तनुत् पुंस्त्वकारकः इति ॥ पुनश्च । कच्छपो बलकृच्छीघ्रं वातजिच्छुक्रकारकः । स्निग्धोष्णः प्रीणनःसद्यो विपाके कटुकः स्मृतइति ॥ कुबेरस्य निधिविशेषे ॥ मल्लस्यबन्धविशेषे ॥ मद्यस्ययन्त्रविशेषे ॥ कच्छेन पिबति । पा० । सुपीतियोगविभागात्कः ॥

कच्छपिका । स्त्री । क्षुद्ररोगविशेषे ॥ तल्लक्षणम् । ग्रथिताः पञ्च वा षड्वा दारुणाः कच्छपोन्नताः । कफानिलाभ्यां पिडका ज्ञेयाः कच्छपिकाबुधैरिति ॥ प्रमेहोपेक्षयाजातदशपिडकान्तर्गतपिडकाविशेषे ॥ लक्षणन्तु । सदाहा कूर्मसंस्थाना ज्ञेया कच्छपिका बुधैरिति ॥

कच्छपी । स्त्री । वाणीवीणायाम् ॥ दुलौ । कमठ्याम् ॥ क्षुद्ररोगविशेषे । कच्छपिकायाम् ॥ कच्छं कच्छेवा पिबति । कच्छेन पातिवा । सुपीतिकः । गापोष्टक्तु न पिबतेः सुराशीध्वोरितिवचनात् । गतिकारकेतिसुप्त्यपेः प्राक् समासः । जातेरिति ङीष् ॥

कच्छरुहा । स्त्री । दूर्वायाम् ॥ कच्छेरोहति । रुह० । इगुपधेतिकः ॥

कच्छा । स्त्री । वाराह्याम् । गृष्टिभेषजे ॥ चीरिकायाम् । झिल्ली झझीरा इतिचभाषा । झिंझीपोका इतिगौडभाषा ॥ परिधानापराञ्चले । काछ इतिभाषा ॥ अदन्तत्वाट्टाप् ॥

कच्छाटिका । स्त्री । कच्छटिकायाम् ॥

कच्छुः । स्त्री । रोगविशेषे ॥ तल्लक्षणं यथा । सूक्ष्माबह्व्यः पिडकाः स्रावबत्यः पामेत्युक्ता कण्डुमत्यः सदाहाः । सैवस्फोटैस्तीव्रदाहैरुपेता ज्ञेया पाण्योः कच्छुरुग्रास्फिचेश्चेति ॥

कच्छुघ्नी । स्त्री । पटोले ॥ क्षुपाप्रभेदे ॥

कच्छुरः । पुं । पुंश्चले ॥ त्रि । पामने । पामासहिते ॥ कच्छूरस्ति अस्य । कच्छ्वा ह्रस्वत्वञ्चेतिरः ॥

कच्छुरा । स्त्री । शूकशिम्ब्याम् ॥ शट्याम् । गन्धपत्र्याम् ॥ दुस्पर्शायाम् ॥

॥ यवामे॥ पुंस्त्वव्याम्॥ कच्छूं राति । रादाने। आत इति कः । पृषोदरादित्वात् ह्रस्वः ॥

कच्छूः । स्त्री । खाज इतिप्रसिद्धेपामरोगे॥ कषति । कषहिंसायाम् । कषेश्छश्चेच्यूः ॥

कच्छूमती। स्त्री। शूकशिंब्याम्॥ त्रि। कच्छूयुक्ते॥

कच्छोटिका । स्त्री । कच्छे । परिधानाञ्चले । कछोटी इतिभाषा ॥

कच्वी। स्त्री। अरवीं घुंया इति प्रसिद्धे शाकविशेषे । वितण्डायाम्॥

कजम् । न । कमले ॥ केजातम् । जमी । डः ॥

कज्जलम् । न । काजल इति प्रसिद्धे अञ्जने। लोचके॥ पुं। मेघे॥

कज्जलध्वजः । पुं। दीपे॥ कज्जलं ध्वजं यस्य॥

कज्जलरोचकः । पुं। न । ज्योत्स्नावृचे । दीपवृचे । दीवट इति भाषा॥

कज्जला । स्त्री । मत्स्यविशेषे । कज्जल्याम्॥

कज्जली । स्त्री । मत्स्यविशेषे ॥मिश्रितरसगन्धके ॥ यथा । शुद्धं सूतं तथागन्धं खल्ले तावद्विमर्द्दयेत्। सूतं न दृश्यते यावत् किन्तु कज्जलवद्भवेत् ॥ एषा कज्जलिका ख्याता दृंहणी वीर्यवर्द्धिनी । नानानुपानयोगेन सर्वव्याधिविनाशिनीति ॥

कञ्चटम् । न । जलतण्डुलीये । लाङ्गल्याम् । काँचडादाम इतिगौडप्रसिद्धे जलजशाकविशेषे ॥ पानीयतण्डुलीयो यस्तत्कञ्चट मुदाहृतम् ।कञ्चटं तिक्तकं रक्तपित्तानिलहरं लघु ॥ चँवराई शाकस्य विशेषे ॥ इति भावप्रकाशः ॥

कञ्चडः । पुं । कञ्चटप्रभेदे । चक्रमर्द्दे । अम्बुपे ॥

कञ्चारः । पुं । सूर्य्ये ॥

कञ्चिका । स्त्री । वंशशाखायाम् । कुञ्चिकायाम् । कमची इतिभाषा ॥ चुद्रस्फोटे ॥

कञ्चुकः । पुं । वारवाणे । भटादेश्चोलकाकृतिसन्नाहे ॥ लोहवर्मणि ॥ कञ्चते । कचिदीप्ति वन्धनयोः । वाहुलकादुकन् ॥ कवचे ॥ निर्मोके । अहिनिर्ल्वयिन्याम् । सर्पत्वचि। काँचली इतिभाषा ॥ चोलके ।-कूर्पासे । अङ्गिकायाम् । अङ्गिया काँचुली चोली इतिचभाषा॥ वस्त्रे ॥ बर्द्धापकगृहीताङ्गस्थितवस्त्रे॥

कञ्चुकालुः । पुं । सर्पे ॥

कञ्चुकी । पुं । अन्तःपुराध्यक्षे । सौविदल्ले । स्थापत्ये । राज्ञांस्त्यगारेव

वीरचाधिकृते ॥ षिङ्गे ॥ अहौ । सर्पे ॥ जोङ्गकद्रुमे ॥ यवे ॥ चणके ॥ आवद्गुकवचे ॥ कञ्चुकोऽस्त्यस्य । अतइनिः ॥ न स्यात् कर्मणि कञ्चुकीति स्मृतिः ॥

कञ्चुकी । स्त्री । ओषधिप्रभेदे ॥ क्षीरीशवृक्षे ॥

कञ्चुलिका । स्त्री । कञ्चुके । स्त्रीणामङ्गरक्षिण्याम् ॥

कञ्जः । पुं । केशे ॥ विरिञ्चौ । चतुरानने ॥ न । पीयूषे ॥ पद्मे ॥ कम् जले जातम् । जनी० । डः ॥

कञ्जकः । पुं । मयना इति प्रसिद्धपक्षिविशेषे ॥ इतिशब्दचन्द्रिका ॥

कञ्जजः । पुं । ब्रह्मणि । विश्वसृजि ॥

कञ्जनः । पुं । कन्दर्पे । कामे ॥ मयना इति प्रसिद्धे पक्षिणि ॥

कञ्जयोनिः । पुं । शालूके ॥ कञ्जस्य पद्मस्य योनिरुत्पत्तिस्थानम् ॥

कञ्जलः । पुं । मयनाइ प्रसिद्धे पक्षिणि ॥

कञ्जारः । पुं । जठरे ॥ सूर्ये ॥ विरिञ्चौ ॥ वारणे ॥ मुनौ ॥ कञ्जति । कञ्जिः सौत्रः । कञ्जिमृजिभ्यांचिदित्यारन्

कञ्जिका । स्त्री । ब्राह्मणयष्टिकावृक्षे । वह्मनेटी इतिभाषा ॥

कटः । पुं । श्रोणौ ॥ कटिपार्श्वे ॥ किलिञ्जे । वीरणनडादिमये तृणासने । चटाई मांदरी इतिभाषा ॥ अतिशये ॥ समये ॥ गजगण्डे ॥ तृणे ॥ शवे ॥ शवरथे ॥ ओषधौ ॥ श्मशाने ॥ त्रिं । क्रियाकारे ॥ कटति कथ्यते वा कटे वर्षावरणयोः । पचाद्यच् । पुंसीति घः ॥

कटंवरा । स्त्री । कटुरोहिण्याम् । कटुकीतिख्यातायाम् ॥ कटं वृणोति । वृञ् व० । संज्ञायां भृतॄ इति खच् । अरुर्द्विषदिति मुम् ॥

कटकः । पुं । न । अद्रेर्नितम्बे । मेखलाख्ये पर्वतमध्यभागे ॥ वलये । बाहुभूषणे ॥ हस्तिनां दन्तमण्डले ॥ चक्रे ॥ सामुद्रलवणे ॥ राजधान्याम् ॥ नगर्याम् ॥ सेनायाम् ॥ कटति कथ्यते वा कटे० । कुन्शिल्पिसंज्ञयोः । कृञादिभ्यः संज्ञायां वुन्निति वुन् वा ॥ सानौ ॥

कटकी । पुं । नगे । पर्वते ॥ सेनाध्यक्षे ॥ कटकोऽस्यास्ति । इनिः ॥

कटकोलः । पुं । पतद्ग्रहे । निष्ठीवनपात्रे । इति त्रिकाण्डशेषः ॥

कटकृत् । त्रि । तृणासनकर्त्तरि ॥

कटखादकः । पुं । काचकलशे ॥ काके ॥ जम्बुके । त्रि । खादके । भक्षके ॥

कटङ्कटः । पुं । अग्नौ ॥

कटङ्कटेरी। स्त्री। दारुहरिद्रायाम्॥ हरिद्रायाम्॥

कटपूः। पुं। महादेवे॥ विद्याधरे॥ अक्षदेवने॥ कामरूपिणि॥ राक्षसे॥ कीटे॥ कटं प्रवते तच्छीलः। प्रुङ्गतौ। क्विब्वचिप्रच्छीति क्विपदीर्घौ॥

कटप्रोथः। पुं। स्फिचि। कट्याम्॥

कटभङ्गः। पुं। सस्यानां हस्तच्छेदे॥ नृपात्यये। राजविनाशे॥

कटभी। स्त्री। ज्योतिष्मत्याम्॥ वृक्षभेदे। स्वादुपुष्पे। कटभीतु प्रमेहार्शोनाडीव्रणविषकृमीन्। हन्त्युष्णा कफकुष्ठघ्नीकटु तष्णाप्यकीर्त्तिता॥ तत्फलं तद्गुणं प्रोयं विशेषात्कफशुक्रकृत्। श्वेताचेद्गुणसंयुक्ता॥ कटवद्भाति। अन्येभ्योपीतिडः। गौरादिः॥ काँटाशिरीष इतिगौडभाषाप्रसिद्धे वृक्षविशेषे॥ अपराजितायाम्॥

कटमालिनी। स्त्री। मदिरायाम्॥

कटम्बः। पुं। वाद्यभेदे॥ वाणे॥ कटति। कटे०। कृकदिकडिकटिभ्योम्बच॥

कटम्भरः। पुं। श्योनाकवृक्षे॥ कटभीवृक्षे॥

कटम्भरा। स्त्री। प्रसारण्याम्। गन्धभादालिया इति गौडभाषा॥ रोहिण्याम्। कटकी इतिभाषा॥ हस्तिन्याम्। हथिनी इतिभाषा॥ कलम्बिकायाम्॥ गोलायाम्॥ वर्षाभ्वि॥ मूर्वायाम्॥ कटं बिभर्त्ति। डुभृञ् धा०। संज्ञायांभृतृवृजिधारिसहितपिदमः इति खच्। मुम्॥

कटव्रणः। पुं। भीमसेने॥

कटशर्करा। स्त्री। गाङ्गेष्ठीलतायाम्। नाटा इतिगौडभाषा॥

कटाक्षः। पुं। अपाङ्गदृष्टौ॥ कटौ अतिशयितौ अक्षिणीयत्र। बहुव्रीहौसक्थ्यक्ष्णोरितिषच॥ कटं गण्डमक्षति वा। अक्षूव्याप्तौ। कर्मण्यण्॥ भक्तेषु तिर्यङ्निपाताकृपादृष्टिः कटाक्षः॥

कटायनम्। न। वीरणे॥

कटारः। पुं। नागरे। कामिनि॥

कटाहः। पुं। कूर्मकर्परे। कमठपृष्ठे॥ द्वीपप्रभेदे॥ तैलादेः पाकपात्रे॥ जायमानविषाणाग्रमहिषीशावके। महिषीशिशौ॥ खर्परे॥ नरके॥

कटिः। स्त्री। श्रोण्याम्॥ कट्यते। कटे आवरणे। सर्वधातुभ्यइन्॥

कटित्रम्। न। रसनायाम्। काञ्च्याम्। कर्धनी कैँधनी तघडी इति भाषा॥ कटिवस्त्रे॥ कटिवर्मणि॥

कटी । पुं । इभे । गजे ॥ त्रि । कटवति ॥

कटिप्रोथ: । पुं । स्फिचि । चूतड इति भाषाप्रसिद्ध कटिदेशस्थ मांसपिण्डे ॥ प्रोथति । प्रोथृपर्य्याप्तौ । पुंसीति घ: । कट्या: प्रोथो मांसपिण्ड: ॥

कटिरोहक: । पुं । हस्तिपश्चाद्भागारोहके ॥

कटिल्लक: । पुं । कारवेल्ले ॥ कटति । कटे॰ । बाहुलकादिल्ल: । स्वार्थे कन् ॥

कटिशीर्षक: । पुं । कटिदेशे ॥

कटिशूल: । पुं । कटिदेशस्थे शूलरोगे ॥ अस्यौषधं यथा । रजनीकदलीक्षारलेप: सिध्मविनाशन: । कुष्ठस्य भागमेकन्तु पथ्याभागद्वयं तथा ॥ उष्णोदकेन सम्पीत्वा कटिशूलविनाशनमिति ॥

कटिशृङ्खला । स्त्री । चित्तिकायाम् । कटिधार्य्यक्षुद्रघण्टिकायाम् ॥

कटिसूत्रम् । न । चन्द्रहार गोट इति गौडभाषाप्रसिद्धे कठ्यलङ्कारविशेषे ॥

कटी । स्त्री । पिप्पल्याम् ॥ श्रोणिदेशे ॥ कठ्यते । कटे॰ । सर्वधातुभ्य इन् । कृदिकारादिति कटाच्छ्रोणिवच नइति गौरादिषुपाठाद्वा ङीष् ॥

कटीतल: । पुं । न्युब्जखड्गे । बाँका खाँडा इति भाषा । खुर्खुडी इति खुखडी इतिचनेपालभाषा ॥

कटीर: । पुं । जघने ॥ कन्दरे ॥ न । कटौ ॥ कटति कथ्यते वा कटीगतौ कटे॰ वा । कृगृपृकटिपटिशौटिभ्य ईरन् ॥

कटीरक: । पुं । नितम्बे ॥ कटीरएव । स्वार्थे क: ॥

कटु: । पुं । रसविशेषे । चर्परा इति भाषा । झाल इति गौड भाषा ॥ कटूरूक्ष: स्तन्यमेद:श्लेष्मकण्डूविषापह: । वातपित्तकृदाग्नेय: शोषी पाचनरोचकृत् ॥ चम्पकवृक्षे ॥ चीनकर्पूरे ॥ पटोले ॥ कट्वीलता याम् ॥ स्त्री । कटुक्याम् । कटुरोहिण्याम् ॥ प्रियङ्गुवृक्षे ॥ राजिकायाम् ॥ न । अकार्ये ॥ दूषणे ॥ त्रि । कटुरसयुक्ते ॥ सुगन्धौ ॥ तीक्ष्णे ॥ मत्सरे ॥ अप्रिये ॥ कटत्यावृणोति तीक्ष्णतया मुखम् । कटे॰ । कटिवटिभ्यांचेत्यु: । वस्तुतस्तु शृस्वृ स्निहित्रपीत्यत्र चकारादु: । कटिवटिभ्यामिति स्नुवृत्तोज्ज्वलदत्तादिप्रदर्शनात् । स्त्रियां वोतोगुणोक्तिङीषि कट्वी कटु र्वा ॥ कटति । मृ॰ उर्वी ॥

कटुक: । पुं । पटोले ॥ सुगन्धितृणे ॥ अर्कवृक्षे ॥ कुटजवृक्षे ॥ राजसर्षपे ॥ न । व्योषे । त्रिकटुनि ॥ स्वार्थे क: ॥

कटुकन्दः । पुं । शिग्रुवृक्षे ॥ आर्द्रके । शृङ्गवेरे ॥ लशुने ॥ कटुः कन्दोस्य ॥

कटुकफलम् । न । कक्कोले ॥

कटुकस्नेहः । पुं । सर्षपे ॥

कटुका । स्त्री । क्षुद्रचञ्चुक्षुपे ॥ कटुरोहिण्याम् । कटम्भरायाम् । कुटकी इतिभाषा ॥ कटुका कटुका पाके तिक्ता रूक्षा हिमा लघुः । भेदिनीदीपनी हृद्या कफपित्तज्वरापहा प्रमेहश्वासकासास्रदाहकुष्ठकृमि प्रणुत् ॥ ताम्बूल्याम् ॥ राजिकायाम् ॥ तिक्तालाबुके ॥

कटुकी । स्त्री । कटुकायाम् । मत्स्यपित्तायाम् । शतपर्वायाम् ॥ कुटकी इति भाषा ॥

कटुकीटः । पुं । मशके ॥

कटुक्वाणः । पुं । टिट्टिभे ॥

कटुग्रन्थि । न । पिप्पलीमूले ॥ शुण्ठयाम् ॥

कटुचातुर्जातकम् । न । एलात्वक्पत्रकमरिचात्मकचतुष्के ॥ इतिराजनिर्घण्टः ॥

कटुच्छदः । पुं । तगरवृक्षे । टगर इति गौढभाषा ॥

कटुतिक्तकः । पुं । भूनिम्बे ॥ शणवृक्षे ॥

कटुतिक्तिका । स्त्री । कटुतुम्ब्याम् ॥

कटुतिन्दुकः । पुं । कुपीलौ । कुचला इतिभाषा ॥

कटुतुण्डी । स्त्री । लताप्रभेदे । तिक्ततुण्ड्याम् । कटुतराइ इति गौड भाषा ॥

कटुतुम्बी । स्त्री । इक्ष्वाकौ । तिक्तालाबाम् ॥ कटुतुम्बी हिमा हृद्या पित्तकासविषापहा । तिक्ता कटु र्विपाके च वातपित्तज्वरान्तकृत् ॥ कटुत्वा त्तैतुम्बीच ॥

कटुत्रयम् । न । त्रिकटुनि ॥ कटूनां त्रयम् ॥

कटुदला । स्त्री । कर्कट्याम् । ककडी इतिभाषा ॥

कटुनिष्पावः । पुं । नदीनिष्पावधान्ये ॥

कटुपत्रः । पुं । पर्पटे ॥ सितार्जके ॥

कटुपत्रिका । स्त्री । कारीवृक्षे ॥

कटुफलः । पुं । पटोले ॥ इतिराजनिर्घण्टः ॥

कटुफला । स्त्री । श्रीवल्लीवृक्षे ॥

कटुभङ्गः । पुं । }
कटुभद्रम् । न । } शुण्ठ्याम् ॥

कटुमञ्जरिका । स्त्री । अपामार्गे ॥

कटुमोदम् । न । जवादिनामसुगन्धिद्रव्ये ॥

कटुरवः । पुं । मण्डूके ॥

कटुरोहिणी । स्त्री । कटुकायाम् । अशोकरोहिण्याम् ॥ कायस्था स्वर्गा

ह्या ॥ कटुश्चासौ रोहिणीच ॥

कटुवार्त्ताकी । स्त्री । श्वेतकण्टकार्या-म् ॥

कटुबीजा । स्त्री । पिप्पल्याम् ॥

कटुशृङ्गालम् । न । गौरसुवर्णशाके ॥

कटुस्नेहः । पुं । सर्षपे ॥ गौरसर्षपे ॥

कटूत्कटम् । न । आर्द्रके ॥

कटूत्कटकम् । न । शुण्ठ्याम् ॥

कटोरम् । न । कटोरा इति प्रसिद्ध पात्रे ॥ यथोक्तं मेरुतन्त्रे ५ प्रकाशे । स्थूलकर्पटे संयुतकाचकूप्यां दत्त्वामुखं लोहपत्तोहसूत्रैः । निष्कासितो धूमरसस्तु तस्य सौगन्धिकैः काचकटोरकेय इत्यादि ॥ जैमिन्याश्वमेधिके पर्वणि ९ ऽध्यायेपिच । रत्नाढ्ये देवकीदत्तं पात्रे काञ्चननिर्मिते । कटोराणां चतुःषष्टिः पात्रस्योभयतः स्थिता इति ॥ कटति । कटे॰ । ओलच् । रलयोरैक्यम् ॥

कटोरकम् । न । कटोरा इतिप्रसिद्ध पात्रभेदे ॥ स्वार्थेकः

कटोरा । स्त्री । स्वनामख्यातपात्रे । इति ब्रह्मवैवर्त्तपुराणम् ॥

कटोलः । पुं । कटुरसे ॥ चण्डाले ॥ कटति । कटे॰ । कपिगडिगण्डिकटिपटिभ्य ओलच् ॥

कटोलकः । पुं । कटोलार्थे ॥ स्वार्थेकः ॥

कटोलवीणा । स्त्री । केन्दुडा इति गौडभाषाप्रसिद्धे यन्त्रे । चण्डालवल्लक्याम् ॥ कटोलस्य चण्डालस्य वीणा ॥

कट्टारः । पुं । कटिशस्त्रे । कटार इतिभाषा ॥

कट्फलः । पुं । कायफल इति प्रसिद्ध वृक्षे । श्रीपर्णिकायाम् । कुमुदिकायाम् ॥ कट्फलस्तुवरस्तिक्तः कटुर्वातकफज्वरान् । हन्ति श्वासप्रमेहार्शः कासकण्ठामयारुचीः ॥ कटति । कटे॰ । क्विप् । कट्फलमस्य ॥

कट्फला । स्त्री । गम्भार्य्याम् ॥ वृहत्याम् ॥ काकमाच्याम् ॥ देवदाल्याम् ॥ वार्त्ताक्याम् ॥ सुगेर्व्वारौ ॥

कड्ङ्गः । पुं । सूर्य्यवंशजे दिलीपनृपतौ ॥ श्योनाकद्रुमे । सोनापाठा इति-भाषाप्रसिद्धे ॥ कटूनि अङ्गान्यस्य ॥

कड्डरम् । न । दधिसरे ॥ व्यञ्जने ॥ तक्रे ॥ दध्नः ससारकस्यात्र तक्रं कड्डरमुच्यते ॥ कटति । कटे॰ । छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकड्डरसंयद्वरा इतिष्वरजन्तं साधु ॥

कड्डी । स्त्री । कटुकायाम् ॥ लताविशेषे । कटुकवल्ल्याम् । काष्ठवल्लिकायाम् ॥ सुकाष्ठायाम् ॥ बोतोगुणवच-

नादिति ङीष् ॥

कठः । पुं । मुनिविशेषे ॥ कठशाखाध्ययनकर्त्तरि ॥ कठशाखाभिज्ञे ॥ ऋचांप्रभेदे ॥ स्वरे ॥ यजुश्शाखाविशेषे ॥ कठेन प्रोक्तमधीते । वैशम्पायनान्तेवासित्वात् जातस्य णिनेः कठचरकाल्लुगिति लुक् ॥

कठमर्द्दः । पुं । शिवे ॥

कठरः । पुं । कठिने ॥

कठा । स्त्री । करिण्याम् ।

कठाकुः । पुं । पक्षिणि ॥ कठति । कठ कृच्छ्रजीवने । कठिकुषिभ्यां काकुः ॥

कठाहकः । पुं । दात्यूहखगे ॥

कठिञ्जरः । पुं । तुलस्याम् । पर्णासे ॥ कृष्णवर्व्वरायाम् ॥ कठिनं जरयति । जृष वयोहानौ । ण्यन्तः । कर्मण्यण् । पृषोदरादिः ॥

कठिनः । त्रि । क्रूरे । निष्ठुरे । कठोरे ॥ स्तब्धे ॥ न । स्थाल्याम् ॥ वैद्यशास्त्रप्रसिद्धेषु यवान्यजाजीचिक्कटुभूनिम्बादिद्रव्येषु ॥ कठति । कठ० । बहुलमन्यत्रापीति इनच् ॥

कठिनपृष्ठकः । पुं । कमठे । कूर्म्मे ॥

कठिना । स्त्री । गुडशर्करायाम् ॥

कठिनिका । स्त्री । कठिन्याम् ॥

कठिनी । स्त्री । वर्णलेखिकायाम् । पाकशुक्लायाम् खैलखड़ी इतिभाषा ॥ गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमा यस्य । तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी नाम ॥

कठिल्लः । पुं । कारवेल्ले ॥ कठति । कठ शोके । बाहुलकादिल्लः ॥

कठिल्लकः । पुं । कारवेल्ले ॥ तुलस्याम् ॥ पुनर्नवायाम् ॥ स्वार्थे कन् ॥

कठी । स्त्री । कठेन प्रोक्तमधीयानायाम् ब्राह्मण्याम् ॥ शाखाध्येतृवाचित्वेन जातित्वात् ङीष् ॥

कठेरः । पुं । कृच्छ्रजीविनि । दरिद्रे ॥ कठति । कठ कृ० । पतिकठिकुठीभ्य एरक् ॥

कठेरुः । पुं । चामरवाते । मन्थरौ ॥

कठोरः । त्रि । कठिने ॥ कठति । कठ० । कठिचकिभ्यामोरन् ॥ पूर्णे ॥ कठोरताराधिपलाञ्छनच्छविः । इति माघः

कडः । पुं । मूर्खे ॥ कडति । कडमदे । पचाद्यच् ॥

कडकम् । न । सामुद्रे । त्रिकूटे । करकच इति गौडभाषाप्रसिद्धे सामुद्रलवणे ॥

कडङ्करः । पुं । माषमुद्गादिकाष्ठे । बुसे ॥ कडङ्करोति । कृ० । कडङ्करदक्षिणाद्दिति निपातनात् खच् ॥

कडङ्करीयः । त्रि । }
कडङ्कर्य्यः । त्रि । } कडङ्करार्हे गवि ॥

कडङ्कर मर्हति । कडङ्करदक्षिणा च्छ्चेति छः यत्च ॥

कडङ्गः । पुं । सुराविशेषे ॥

कडङ्गरः । पुं । बुसे ॥ गृणाति गिरति वा । गृशब्दे निगरणे वा । अच् । कडस्य गरः । कडङ्करेतिनिर्देशान्मुम् ॥ यद्वा । कडति । कड० । क्विप् । कडच तत् अङ्गञ्च । कडङ्गं राति । रा० । कः ॥

कडत्रम् । न । पात्रविशेषे ॥

कडम्बः । पुं । शाकनाडिकायाम् । कलम्बे । डाँठ डंठल इतिच भाषा ॥ कोणे । प्रान्तभागे ॥ कडति । कड० । कृकादिभ्यः कडोऽम्बच् । केन. लम्बते वा लवि० । अच् । डलयोरैक्यम् ॥ अग्रभागे ॥

कडम्बकः । पुं । कलम्बे ॥ स्वार्थे कन् ॥

कडम्बी । स्त्री । कलम्बीशाके ॥

कडारः । पुं । पिङ्गलवर्णे ॥ त्रि । पिङ्गलवर्णवति ॥ कडारस्तृणवह्निशदिस्यन्ये इति भरतः ॥ दासे ॥ गडति । गड सेचने । गडेः कडचेत्यारन् ॥

कणः । पुं । अतिसूक्ष्मे । लेशे ॥ धान्यांशे । चूर्णतण्डुले ॥ सूक्ष्मस्तण्डुलावयवः कणइति व्याख्यातारः ॥ वनजीरके ॥ कणति । कण निमीलने । पचाद्यच् ॥

कणगुग्गुलुः । पुं । गुग्गुलुप्रभेदे । वंशपीते । स्वर्णकणे । गन्धराजे ॥

कणजीरः । पुं । श्वेतजीरके ॥

कणजीरकम् । न । क्षुद्रजीरके । सूक्ष्म गन्धिनि ॥

कणभः । पुं । कीटविशेषे ॥

कणभक्षकः । पुं । भारिटखगे । श्यामचटके । शैशिरे ॥

कणलाभः । पुं । आवर्त्ते । जलभ्रमे ॥

कणा । स्त्री । जीरके ॥ कुम्भीरमक्षिकायाम् ॥ पिप्पल्याम् ॥ श्वेतजीरके ॥ अस्य ॥ टाप् ॥

कणाटीनः । पुं ।
कणाटीरः । पुं । } खञ्जनपक्षिणि ॥
कणाटीरकः । पुं ।

कणादः । पुं । वैशेषिकदर्शनकर्त्तरि मुनिविशेषे । काश्यपे ॥

कणिकः । पुं । कणायाम् ॥ शत्रौ ॥ नीराजनाविधौ ॥ सूजीइतिभाषाप्रसिद्धे शुष्कगोधूमचूर्णे ॥

कणिका । स्त्री । अत्यल्पसूक्ष्मवस्तुनि ॥ अग्निमन्थे । अरणीतिख्याते ॥ कणति । कणगतौ । पचाद्यच् । स्वार्थे कन् । ह्रस्वम् ॥ यद्वा । कणति । कणशब्दे । क्कुन् ॥ कणाः सन्त्यस्य वा । अतइनिठनाविति ठन् ॥

कणितम् । न । पीडितानां शब्दे । आ

संनादे ॥ इति हेमचन्द्रः ॥

कणिशम्। न। शस्यमञ्जर्याम्। धान्यादिशीर्षे ॥ कणाय: कणाः सन्त्यस्य। लोमादित्वाच्छः ॥ यद्वा। कणिनं स्वावयवं श्यति। शोतनूकरणे। आत इति कः ॥

कणी। स्त्री। चयकण्टलतायाम्॥ कणिकायाम् ॥ न। अल्पे ॥

कणीचिः। स्त्री। कणीच्यर्थेषु ॥ कणति। कणगतौ। सृकणिभ्यामीचिः॥

कणीची। स्त्री। पुष्पितलतायाम्॥ गुञ्जायाम् ॥ कणाची इति किरांची इति च प्रसिद्धे शकटे॥ कृदिकारादितिङीष् ॥

कणे। अ। अभिलाषातिशये। समीप्रतिरूपकोऽयं निपातः ॥

कणेरः। पुं। कर्णिकारवृक्षे ॥

कणेरा। स्त्री। वेश्यायाम्॥ हस्तिन्याम्॥

कणेरुः। स्त्री। कर्णिकारे॥ करिण्याम् ॥ वेश्यायाम् ॥

कण्टकः। पुं। न। सूच्यग्रे॥ क्षुद्रशत्रौ॥ मत्स्यादिकीकसे॥ नैयायिकादिदोषोक्तौ॥ रोमाञ्चे॥ द्रुमाङ्गे। कांटा इति भाषा॥ केन्द्रे। लग्नचतुर्थसप्तमदशमस्थानेषु॥ यथा॥ लग्नाम्बुद्यूनकर्माणि केन्द्रमुक्तञ्च कण्टकम्। चतुष्टयञ्चाथ खेटोवली तत्र विशेषत इति ॥ वेणौ ॥

कण्टकद्रुमः। पुं। शाल्मलिवृक्षे॥ इति राजनिर्घण्टः॥

कण्टकप्रावृता। स्त्री। गृहकन्यायाम्। घृतकुमार्याम् ॥

कण्टकफलः। पुं। क्षुरे। गोक्षुरे॥

कण्टकवृन्ताकी। स्त्री। वार्त्ताक्याम्॥

कण्टकश्रेणी। स्त्री। कण्टकार्याम्॥ कण्टकानां श्रेणी यस्याम्॥

कण्टकागारः। पुं। सरटजन्तौ॥

कण्टकाढ्यः। पुं। कुब्जकवृक्षे ॥ त्रि। कण्टकयुक्ते॥

कण्टकारिका। स्त्री। निदिग्धिकायाम्। वृहत्याम्। भटकटैया इति भाषा॥ कण्टकान् इयर्त्ति। ऋगतौ। कर्मण्यण्। स्वार्थे कन्। कण्टकारिकाफले॥ कण्टकारिकायाः फलम्। हरीतक्यादिभ्यश्चेति विकारावयवप्रत्ययस्य लुप्। हरीतक्यादिषु लिङ्गमेव प्रकृतिवन्न सङ्ख्या॥

कण्टकारी। स्त्री। व्याघ्याम्। कण्टकारिकायाम्। भटकटैया इति भाषा॥ कण्टकारी कण्टकिनी तथा स्वादुश्च तिक्तका। चक्षुष्या चलशोथघ्नी ग्राहिणी ज्वरदाहनुत्॥ दोषघ्न यहरीलघ्वी ग्रहण्यर्शोतिसारजित्॥

सुश्रुतेतु । कण्टकारी सरा तिक्ता कटुका दीपनी लघुः । रूक्षोष्णा पाचनी कासश्वासज्वरकफानलान् ॥ निहन्ति पीनसं पार्श्वपीडाक्रिमिहृदामयान् । तयोः फलं कटुरसं पाकेच कटुकं भवेत् ॥ शुक्रस्य रेचनं भेदि तिक्तपित्ताग्निकृल्लघु । हन्यात् कफमरुत्कण्डूकासमेदक्रिमिज्वरान् ॥ कण्टकारीकृतः क्वाथः सकृष्णः सर्वकासहा ॥ तदुक्तं प्रोक्ता सिता क्षुद्राविशेषात्गर्भकारिणी ॥ शाल्मल्याम् ॥ कण्टकान् ऋच्छति । ऋगतौ । कर्मण्यण् । ङीप् ॥

कण्टकारीफलम् । न । कण्टकार्याः फले ॥ कण्टकारीफलं तिक्तं कटुकं दीपनं लघु । रूक्षोष्णं श्वासकासघ्नं ज्वरानिलकफापहम् ॥ शाकप्रकारस्तु । तोयाम्लस्विन्नवृहतीफलमार्द्रकञ्च दण्डाहतं चिरविपाचितमाज्यकेन । चूर्णेन सैन्धवभवेन विमिश्रितञ्च वह्निं प्रबोधयति कासनिषारयतीति ॥

कण्टकालुकः । पुं । यवासे । यासे ॥

कण्टकाशनः । पुं । उष्ट्रे ॥ कण्टकानि अशनं यस्य ॥

कण्टकाष्ठीलः । पुं । मत्स्यविशेषे । कुलिशे ॥

कण्टकितः । त्रि । पुलकिते ॥

कण्टकी । पुं । मत्स्ये ॥ खदिरवृक्षे ॥ विकङ्कते । मदनवृक्षे ॥ गोक्षुरे ॥ वंशे ॥ वदरवृक्षे ॥ कण्टकाः सन्त्यस्मिन् । इनिः ॥

कण्टकिनी । स्त्री । वार्त्ताक्याम् ॥ श्रोणाभिण्ट्याम् ॥ मधुखर्जूर्याम् ॥

कण्टकिफलः । पुं । कटहल इति प्रसिद्धे वृक्षविशेषे । पनसे ॥ कण्टकाः सन्त्यस्य । अत इनिठनौ इतीनिः । कण्टकि फलमस्य ॥ समष्ठिलावृक्षे ॥

कण्टकिलः । पुं । बेडुबाँश इति गौडभाषाप्रसिद्धे वंशविशेषे ॥

कण्टकिलता । स्त्री । त्रपुष्याम् । खीरा इति भाषा । कण्टकिनी चासौ लताच ॥

कण्टकी । स्त्री । वार्त्ताकीविशेषे । कण्टीलाबैंगन् इति भाषा ॥

कण्टकुरण्टः । पुं । झिण्ट्याम् ॥

कण्टतनुः । स्त्री । वृहत्याम् ॥

कण्टदला । स्त्री । केतक्याम् ॥

कण्टपत्रः । पुं । विकङ्कतवृक्षे ॥

कण्टपत्रफला । स्त्री । ब्रह्मदण्ड्याम् ॥

कण्टपादः । पुं । विकङ्कतवृक्षे ॥

कण्टफलः । पुं । क्षुद्रगोक्षुरे ॥ पनसे ॥ धुस्तूरे ॥ लताकरञ्जे ॥

कण्टफला । स्त्री । देवदालीलतायाम् ॥

कण्टलः । पुं । वावले । वबूलइति भाषा ॥ इतिशब्दचन्द्रिका ॥

कण्टवल्ली । स्त्री । श्रीवल्लीवृत्ते ॥

कण्टवृत्तः । पुं । तेजःफलवृत्ते ॥

कण्टाफलः । पुं । कण्टकिफले । कटहल इति भाषा ॥ विशेषात् पनसं वर्ज्यं गुल्मिभिर्मन्दवह्निभिः ॥

कण्टा८ गला । स्त्री । नीलझिण्ट्याम् ॥

कण्टालुः । पुं । वंशे ॥ वृहत्याम् ॥ वार्त्ताक्याम् ॥ वर्बूरे ॥

कण्ठाह्वयम् । न । पद्मकन्दे ॥

कण्ठी । पुं । कलाये ॥ अपामार्गे ॥ खदिरे ॥ गोक्षुरे ॥

कण्ठः । पुं । मदनद्रुमे ॥ होमकुण्डाद्बहिरङ्गुलिपरिमितेस्थाने ॥ यथा । खाता द्वाह्योऽङ्गुलः कण्ठः सर्वकुण्डेष्वयंविधिरिति ॥ त्रि । गले । ग्रीवाग्रभागे ॥ अत्र विशुद्धनामषोडशदलपद्ममस्ति ॥ सन्निधाने । निकटे ॥ ध्वनौ ॥ कणति । कणशब्दे कण्ठः ॥ यद्वा । कण्ठते । कठिशोके । अच् ॥

कण्टकूणिका । स्त्री । वीणायाम् ॥

कण्ठतलासिका । स्त्री । अश्वग्रीवावेष्टकरज्जुचर्म्मादौ ॥ इति शब्दमाला ॥

कण्ठनीडकः । पुं । चिल्लपक्षिणि । चीख इति भाषा ॥ इतित्रिकाण्डशेषः ॥

कण्ठनीलकः । पुं । उल्कायाम् । मसाल इतिभाषा ॥ इतिशब्दमाला ॥

कण्ठपाशकः । पुं । हस्तिकण्ठवेष्टकरज्जौ ॥

कण्ठभूषा । स्त्री । ग्रैवेयके । कण्ठी गोपसकरी इतिचभाषा ॥ भूष्यतेऽनया । भूष अलङ्कारे । गुरोश्चेत्यः । कण्ठस्यभूषा ॥

कण्ठमणिः । पुं । ग्रैवेयकमणौ । काकले ॥ कण्ठस्य मणिः ॥

कण्ठशुद्धिः । स्त्री । गलस्य कफाद्यलिप्तत्वे ॥

कण्ठसूत्रम् । न । स्तनालिङ्गने ॥ यथा । यत् कुर्वते वक्षसि वल्लभस्य स्तनाभिघातं निविडोपगूह्य । परिश्रमार्थं शनकैर्विदग्धास्तत्कण्ठसूत्रं प्रवदन्तिसन्त इति ॥

कण्ठाग्निः । पुं । पक्षिणि ॥ कण्ठे अग्निरस्य ॥ इति त्रिकाण्डशेषः ॥

कण्ठालः । पुं । शूरणे ॥ युद्धे ॥ गोणीप्रभेदे । खुर्जी इतिभाषा ॥ क्रमेलके ॥ नौकायाःखनित्रे ॥

कण्ठाला । स्त्री । जालगोणिकायाम् ॥

कण्ठिका । स्त्री । कण्ठाभरणे । एकलडीकण्ठी इति भाषा ॥ इतिहेमचन्द्रः ॥

कण्ठी । स्त्री । गले ॥ अश्वकण्ठवेष्टनर

ज्जुचर्म्मादौ ॥

कण्ठीरवः । पुं । सिंहे ॥ मत्तमातङ्गे ॥ पारावते ॥

कण्ठीरवी । स्त्री । वासकवृक्षे ॥

कण्ठेकालः । पुं । महादेवे ॥ कण्ठेकालोऽस्य । हलदन्तादित्यलुक् ॥

कण्ठ्यः । त्रि । कण्ठभवे शब्दादौ ॥ कण्ठहिते ॥ उभयत्र शरीरावयवत्वात् यत् ॥

कण्डनम् । न । निस्तुषीकृतौ । उदूखलादिना तण्डुलादेर्निर्मलीकरणे । कुटना इतिभाषा ॥

कण्डनी । स्त्री । उलूखले ॥ मुषले ॥

कण्डरा । स्त्री । महास्नायौ । महानाड्याम् ॥

कण्डिका । स्त्री । वेदैकदेशे ॥

कण्डुः । स्त्री । कण्डूयायाम् । गात्रविघर्षणे ॥ कण्डते । कडिमदे । मृगय्वादित्वात् कुप्रत्ययः ॥

कण्डुरः । पुं । कारवेल्ललतायाम् ॥ कुन्दरवृक्षे ॥

कण्डुरा । स्त्री । आत्मगुप्तायाम् । शूकशिंब्याम् ॥ अप्यन्त्यपर्य्यायम् ॥ कण्डूंराति । रादाने । आतोऽनुपसर्गे कः । पृषोदरादित्वात् ह्रस्वः ॥

कण्डूः । स्त्री । खाज इतिप्रसिद्धे रोगे । खर्ज्ज्वाम् । कण्डूयायाम् ॥ कण्डूयनम् । कण्डूञ् गात्रविघर्षणे । सम्पदादित्वात् क्विप् ॥

कण्डूकरी । स्त्री । शूकशिंब्याम् ॥

कण्डूघ्नः । पुं । आरग्वधे ॥ गौरसर्षपे ॥

कण्डूतिः । स्त्री । कण्डूयाम् । खाज इति भाषा ॥ कण्डूयतेः क्तिच् ॥

कण्डूयनम् । न । कण्डूयाम् ॥

कण्डूयमानः । त्रि । कण्डूयितरि । कषमाणे ॥

कण्डूया । स्त्री । कण्डूयने । खर्ज्ज्वाम् ॥ कण्डूयनम् । कण्डूञ्० । कण्ड्वादिभ्यो यक् । अप्रत्ययात् ॥

कण्डूयिता । त्रि । कण्डूयमाने ॥

कण्डूरा । स्त्री । प्रावृषायण्याम् । मर्कट्याम् ॥ कण्डूंराति । रा० । आत इति कः ॥

कण्डूलः । पुं । शूरणे ॥ त्रि । कण्डूयुक्ते ॥

कण्डोलः । पुं । उष्ट्रे ॥ गोणीप्रभेदे ॥ पिटे । वंशादिनिर्म्मिते धान्यादिस्थापनभाण्डे ॥ कण्डते । कडिमदे । बाहुलकादोलच् ॥ यद्वा । कपिगडिगण्डीतिरूपे कण्डेः पाठादोलच् ॥

कण्डोलकः । पुं । कण्डोले ॥

कण्डोलवीणा । स्त्री । केंद्रा इति

गौडभाषा प्रसिद्धे वाद्ययन्त्रे । चण्डालवल्लक्याम् । किङ्गरीति प्रसिद्धे वाद्ये ॥ कण्डते । कडि० । वाहुलकादोलच् । कण्डोलस्य वीणा ॥

कण्डोली । स्त्री । कण्डोलवीणायाम् ॥

कण्डुघः । पुं । शूककीटे । शूयापोका इतिगौड भाषा ॥

कण्वः । पुं । मुनिविशेषे ॥ पुरुवंशजाताप्रतिरथनामक्षत्रियपुत्रे ॥ यथा । सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः । तस्य मेधातिथिस्तस्मात् प्रस्कण्वाद्याद्विजातयः । इतिश्रीभागवतम् ॥ न । पापे ॥ कणनम् । कणशब्दे । उल्वादयश्चेतिसाधुः ॥ कणति । अशूमुषिलटिकणीत्यादिना क्वन्-वा ॥

कतः । पुं । मुनिविशेषे ॥ कतकवृक्षे ॥

कतकः । पुं । तिक्तफले । पयःप्रसादिनि । निर्मली इतिभाषा ॥ कतकस्य फलं नेत्र्यं जलनिर्मलकारकम् । वातश्लेष्महरं शीतं मधुरं तुवरं गुरु ॥

कतफलः । पुं । कतकवृक्षे ॥

कतमः । पुं । बहूनां जातिपरिप्रश्ने ॥ किमो डतमच् ॥

कतमालः । पुं । वह्नौ ॥

कति । त्रि । कियति । सङ्ख्यापरिमाणप्रश्ने ॥ का सङ्ख्यापरिमाणमेषाम् । किमः सङ्ख्यापरिमाणे डति चेति डतिः । नित्यं बहुवचनान्तोयम् ॥

कतिथः । त्रि । कतीनां पूरणे ॥ षट्कतिकतिपयचतुरां थुगिति डटि थुगागमः ॥

कतिपयः । त्रि । कतिशब्दार्थे । कितनेक इतिभाषा ॥

कतिपयथः । त्रि । कतिपयानां पूरणे । षट्कतीत्यादिना कतिपयस्याऽसङ्ख्यात्वेपि अतएवज्ञापकाड्डट् तस्मिन् थुगागमः ॥

कत्तृणम् । न । रामकर्पूर इतिगौडभाषाप्रसिद्धे सुगन्धितृणविशेषे । पौरे । सौगन्धिके । रौहिषे ॥ अस्यगुणाः । कटुत्वम् तिक्तत्वम् कफशस्त्रशल्यादिदोषवालग्रहविनाशित्वमिति राजनिर्घण्टः ॥ चाकुलिया इति गौडभाषाप्रसिद्धे पृश्नौ ॥ पृश्निकायाम् । कुम्भिकायाम् ॥ कुत्सितं तृणम् । तृणे च जाताविति कोः कत् ॥

कत्तोयम् । न । मद्ये । मैरेये ॥

कत्थनम् । न । श्लाघायाम् ॥ कत्थ० । ल्युट् ॥

कत्सवरम् । न । स्कन्धे

कथकः । त्रि । कथोपजीविनि ॥ एकनटे । नाटकवर्णनकर्त्तरि ॥ वक्तरि ॥ यथा । वाद्युक्तसाध्यनियमच्युतो

पिकथके दंदाधिरुद्ध्य इतिचिन्ता मणि: ॥ कथयति । कथवाक्यप्रबन्धे । बहुलमन्यत्रापीति कुन् ॥

कथङ्कथिक: । त्रि । प्रश्नकर्त्तरि । प्रष्टरि ॥

कथङ्कथिकता । स्त्री । पृच्छायाम् ॥ इति हेमचन्द्र: ॥

कथङ्कारम् । अ । केन प्रकारेण कृत्वेत्यर्थे । कथमित्यर्थे ॥ अनर्थकादेव करोते: कथम्पूर्वात्समुल् ॥

कथञ्चन । अ । केनाप्यंशेनेत्यर्थे ॥

कथञ्चित् । अ । अतिप्रयत्नेनेत्यर्थे ॥

कथनम् । न । कथायाम् । कहना इति भाषा ॥ इतिहलायुध: ॥

कथम् । अ । हर्षे ॥ गर्हायाम् ॥ प्रकारार्थे ॥ सम्भ्रमे ॥ प्रश्ने ॥ सम्भावनायाम् ॥ केन प्रकारेण । किमश्चेति थमु: ॥

कथमपि । अ । यत्नगौरवे ॥ बाढमित्यर्थे ॥ कथमादितथाप्यन्तंयत्नगौरव भेदयो: ॥

कथम्भूत: । त्रि । किम्प्रकारे ॥ कं प्रकारं किंवा प्रकार मापन्न: । द्वितीयान्तादपिथमु: ॥

कथा । स्त्री । प्रबन्धकल्पनायाम् ॥ प्रबन्धकल्पनां स्तोकसत्यां प्रज्ञा: कथां विदु: । परस्पराश्रया यास्यात्सामता ख्यायिका क्वचिदिति कोलाहलाचार्य: ॥ पक्षप्रतिपक्षोपन्यासेन-विचारणायाम् ॥ नैयायिकमतेहि नानावक्तृकपूर्वपक्षसिद्धान्तवान् वाक्यसन्दर्भ: कथा । तद्भेदास्त्रय: । वादो जल्पो वितण्डा चेति ॥ कथा कादम्बर्यादिस्वरूपा सैवगद्यपद्यमयी चम्पूरितिग्रन्थान्तरे ॥ कथयति । कथवाक्यप्रबन्धे । चितिपूजिकथिकुम्बिचर्चश्चेत्यङ् । टाप् ॥

कथाप्रसङ्ग: । त्रि । वातूले ॥ वार्त्तायाम् । गोष्ठीवचने ॥ विषवैद्ये ॥

कथाप्राण: । त्रि । कथके । कथोपजीविनि । नाटकवक्तरि ॥ कथायां प्राणा: यस्य ॥

कथित: । त्रि । उक्ते । कहा इतिभाषा ॥ कथ॰ । क्त: ॥

कद: । पुं । मेघे ॥ कं जलं ददाति । डुदाञ् । क: ॥

कदक: । पुं । उल्लोचे । वितानै ॥

कदध्वा । पुं । कापथे । निन्द्यमार्गे ॥ कुत्सितोऽध्वा । कुगतीतिसमास: । को: कत् तत् पुरुषेऽचीति कदादेश: ॥

कदनम् । न । मर्द्दे । युद्धे ॥ पापे ॥ बाधायाम् ॥ मारणे ॥

कदन्नम् । न । कुत्सितान्ने ॥

कदम्ब: । पुं । नीपे । प्रियके ॥ कदम्बो मधुर: शीत: कषायो लवणो गुरु: । सरो विष्टम्भकृद्रूक्ष: कफस्तन्यानिल प्रद: ॥ अन्यसाञ्च: । नीपो महाकदम्ब:स्याद्धाराकदम्बइत्यपि । द्वितीयोऽल्पप्रसरश्च हत्तपुष्प: कदम्बकद्म्यश्यभेद: । तथाऽन्येपि । हारिद्रस्तु रसीवल: । भूलीकदम्बको धाराकदम्ब: षट्पदप्रिय: ॥ हत्तपुष्प: केशराढ्य: प्रावृषेण्य: कदम्बक: । नीपोमन्हा कदम्बोपि तथा बहुफलोमत: । इत्यमरटीकायां भरत:॥ सर्षपे ॥ देवताडकतृणे ॥ न । निकुरम्बे । सङ्घे । समूहे ॥ कदति । कद: सौत्रोधातु: । कृकदिकडिकटिभ्योम्बच् ॥

कदम्बक: । पुं । हरिद्रौ ॥ कदम्बार्थेषु ॥ स्वार्थेकन् ॥ यद्वा । कदति कन्दयति वा । कद हिंसायाम् । कदि आह्वाने रोदने च । कृकदीत्यम्बच् । अनित्यत्वान्नुम् । स्वार्थेक: ॥ न । निकुरम्बे । समूहे ॥

कदम्बगोलकन्याय: । पुं । कदम्बगोलकस्य सर्वावयवेषु युगपदेव पुष्पाणामुत्पत्तिरूपे दृष्टान्तविशेषे ॥

कदम्बपुष्पा । स्त्री । मुण्डितिकायाम् । मुण्डी इतिभाषा ॥

कदम्बपुष्पी । स्त्री । महाश्रावणिकायाम् । मुण्डायाम् ॥

कदम्बी । स्त्री देवदाल्याम् ॥

कदर: । पुं । सोमवल्के श्वेतखदिरे ॥ कदरो विशदो वर्ण्यो मुखरोगकफास्रजित ॥ क्रकचे । करपत्रे । करवत करौत आरा इतिच भाषा ॥ कडाजामुडा इति गौडभाषाप्रसिद्धे व्याधिभेदे ॥ तल्लक्षणम् । शर्करोन्मथिते पादे क्षते वा कण्टकादित: । ग्रन्थि: कोलवदुत्पन्नो जायते कदरस्तु स: ॥ अङ्कुशे ॥ दृणाति । दृ विदारणे । पचाद्यच् । कस्य जलस्य दर: ॥

कदर्थित: । त्रि । विडम्बिते । दूषिते ॥ कुत्सितोर्थ: कदर्थ: । को: कत् । कदर्थ: कृत: कदर्थित: ॥

कदर्य्य: । त्रि । क्षुद्रे । कृपणे । सतिविभवे अदातरि ॥ यथा । आत्मानं धर्मकृत्यञ्च पुत्रदारांश्च पीडयन् । यो लोभात सञ्चिनोत्यर्थान् स कदर्य इतिस्मृत: ॥ कुत्सितो ऽर्य: स्वामी ॥ कुगतीतिसमास: । को: कत् तत्पुरुषे ॥

कदल: । पुं । रम्भावृक्षे ॥ पृश्नीलतायाम् ॥ कन्दते कन्द्यते वा । कदि आह्वानेरोदनेच । वृषादित्वात् कलच्

कदलक: । पुं । कदलार्थे ॥ स्वार्थे क: ॥

कदला । स्त्री । पृश्निपर्ण्याम् ॥ डिम्बिकायाम् ॥ शाल्मलीवृक्षे ॥ अजादेराकृतिगणत्वाट्टाप् ॥

कदली । स्त्री । वारणबुसायाम् । रम्भायाम् ॥ यथा । माणिक्यमर्त्त्यामृतचम्पकाद्या भेदा: कदल्या बहवोऽपि सन्ति । उक्ता गुणास्तेष्वधिका भवन्ति निर्दोषता स्याल्लघुता च तेषाम् ॥ गुणान् पश्य मोचाफले ॥ पताकायाम् ॥ करिवैजयन्त्याम् ॥ मृगविशेषे ॥ के दलति । दलविशरणे । अच् । ङीष् ॥ कन्दते कन्द्यते वा कदिश्रा° । इ षादित्वात् साधु: । गौरादि: ॥

कदलीकन्द: । पुं । रम्भामूले । केराकन्द केलाकन्द इतिच भाषा ॥ शीतल: कदलीकन्दो बल्य: केश्योऽम्लपित्तजित् । वह्निकृद्दाहहारी च मधुरो रुचिकारक: ॥ कन्द: कदल्या दलितो नितान्तं संस्वेदितो हिङ्गुघृतेन राद्ध: । उद्धूलित: सैन्धवरेणुना च मरीचसम्पर्कितएवरुच्य: ॥

कदलीकुसुमम् । न । रम्भापुष्पे ॥ कदल्या: कुसुमं स्निग्धं मधुरं तुवरं गुरु । वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत् ॥

कदलीदण्ड: । पुं । थोड इति गौडभाषाप्रसिद्धे मोचामध्यस्थदण्डे ॥ कृत्त: स्विन्न: सलिलविधृत: कृत्ततन्तु: प्रभिन्न: कम्बुभ्रष्ट्याजलविरहित: शारजम्बीरपुष्टा: । मध्ये मध्ये तनुशकलितेनार्द्रकेणातिपूर्ण: स्वादुस्त्रैणं भवतिसुतरां गर्भदण्ड: कदल्या: ॥ योनिदोषहरो दण्ड: कादल्योऽसृग्दरं जयेत् । रक्तपित्तहर: शीत: सुरुच्योऽग्निप्रवर्द्धन: ॥

कदा । अ । कस्मिन् काले । कब इति भाषा ॥ सर्वैकान्यकिंयत्तद: काले दा ॥

कदाकार: । त्रि । कुत्सितावयवे ॥ कुत्सित: आकारोऽस्य । को: कदादेश: ॥

कदाख्यम् । न । कुष्ठौषधौ ॥ त्रि । कुत्सितनामनि ॥ कुत्सिता आख्या यस्य । को: कत् तत्पुरुषेचीतिकदादेश: ॥

कदाचन । अ । कस्मिन्काले । किसी समयमे इतिभाषा ॥

कदाचार: । त्रि । कुव्यवहारे ॥ कुत्सित: आचारो यस्य । को: कत् आदेश: ॥

कदाचित् । अ । जातु । कस्मिंश्चित्काले प्रस्तावे ॥ कदाच चिच्च अनयो: समाहार: ॥

कदुष्णम् । न । कोष्णे ॥ ईषदुष्णम् । कवच्चोष्णे इतिपक्षे कदादेशः ॥ त्रि । तद्वति ॥

कद्रथः । पुं । कुत्सितरथे ॥

कद्रुः । पुं । पिङ्गलवर्णे ॥ त्रि । तद्वति । स्वर्णपिङ्गे ॥ कन्दति । कदि आह्वाने । मृगय्वादित्वात् साधुः ॥

कद्रुपुत्रः । पुं । नागे ॥ कद्र्वाःपुत्रः ॥

कद्रूः । स्त्री । नागमातरि ॥ संज्ञायामिस्यूङ् ॥

कद्वदः । त्रि । गर्ह्यवादिनि । दुर्वाचि ॥ कुत्सितंवदति । वदेः पचाद्यच् । रथवदयोश्चेति कोः कत् ॥ कुत्सितस्य वदोवा ॥

कनकम् । न । स्वर्णे । हेम्नि ॥ पुं । किंशुकवृक्षे ॥ नागकेशरवृक्षे ॥ कृष्णाधत्तूरे ॥ धूस्तूरे ॥ काञ्चनालवृक्षे ॥ कालीये । कृष्णचन्दने ॥ चम्पकवृक्षे ॥ कासमर्द्दवृक्षे ॥ कणगुग्गुलुवृक्षे ॥ लघ्वक्षे । ॥ कनति । कनीदीप्तौ । कृञादिभ्योवुन् ॥ स्वाक्षाद्रुमे ॥

कनकक्षारः । पुं । टङ्कणे सुहागा इति भाषा ॥

कनकदण्डः । पुं । राजशृङ्गे राजच्छत्रे ॥ कनकस्यदण्डोऽस्मिन् ॥

कनकदण्डकम् । न । राजशृङ्गे । राजच्छत्रे ॥ स्वार्थेकन् ॥

कनकपलः । पुं । सुवर्णादिपरिमाणक षोडशमाषके । पलपरिमाणे । कुवविस्ते ॥ इतिहारावली ॥

कनकप्रभा । स्त्री । महाज्योतिष्मत्याम् ॥

कनकप्रसवा । स्त्री । स्वर्णकेतक्याम् ॥

कनकरम्भा । स्त्री । सुवर्णकदल्याम् ॥

कनकरसः । पुं । हरिताले ॥

कनकलोद्भवः । पुं । राले ॥

कनकाचलः । पुं । सुमेरुपर्वते ॥ दानविशेषे ॥ कनकमयःअचलः ॥

कनकाध्यक्षः । पुं । भैरिके । सुवर्णाधिकृते ॥ कनकस्य अध्यक्षः ॥

कनकारकः । पुं । कोविदारवृक्षे ॥

कनकालुका । स्त्री । भृङ्गारे । सौवर्णकलशे ॥ कनकस्य आलुः । संज्ञायां कन् ॥

कनकाह्वम् । न । नागकेशरपुष्पे ॥

कनकाह्वयः । पुं । धत्तूरे ॥ कनकमाह्वयोऽस्य । भुक्तेऽस्मिन् कनकवर्णपृथ्वीदर्शनात् ॥ नागकेशरे ॥

कनखलः । पुं । उग्रादेव्याःस्थाने तीर्थविशेषे ॥ उग्राकनखलेस्मृते तिपुराणम् ॥

कननः । त्रि । काणे । एकदृशि ॥ इति हेमचन्द्रः ॥

कनिक्या । स्त्री । समितायाम् ॥

कनिष्ठः । त्रि । अतियूनि ॥ अत्यल्पे ॥

कन्तु:

जघन्यजे । अनुजे । पश्चाज्जाते ॥ अयमेषां मतिशये युवा अल्पो वा । अजादीगुणवचनादेवेति ईष्ठन् । युवाल्पयोःकनन्यतरस्यामिति कनादेशः ॥

कनिष्ठकम् । न । शृकतृणे ॥

कनिष्ठा । स्त्री । दुर्बलाङ्गुलौ ॥ पश्चाज्जातायाम् । अनुजायाम् ॥ कनिष्ठस्य भार्यायाम् ॥ कनिष्ठस्य स्त्री । पुंयोगलक्षणं ङीषं बाधित्वा अजादित्वात् टाप् ॥ नायिकाभेदे ॥

कनी । स्त्री । दुहितरि । कन्यायाम् ॥

कनीनिका । स्त्री । अक्षितारके ॥ कनिष्ठाङ्गुलौ ॥ कनति । कनीदीप्तौ । बाहुलकादीनः । स्वार्थेकन् । टाप् । इत्वम् ॥

कनीयान । त्रि । कनिष्ठार्थे ॥ अयमनयोरतिशयेन युवा अल्पोवा । द्विवचनविभज्योपपदेतरबीयसुनौ ।अजादीगुणवचनादेवेति ईयसुन् । युवाल्पयोरितिकनादेशः ॥

कनीयसम् । न । ताम्रे ॥

कन्तुः । त्रि । सुखविशिष्टे । सुखिनि ॥ कं सुखम् अस्ति अस्य ॥ कं शंभ्यां बभयुस्तितुतयसः इति तुः ॥ कामदेवे ॥ कुशूले ॥ कामयते । कमुकान्तौ । अर्जिदृशिकम्यमीतिकुःप्रत्य

कन्दः

योधातोस्तुगागमश्च ॥ कमिमनीतितुर्वा ॥ हृदये ॥

कन्था । स्त्री । मन्मथभित्तौ । काँथ इतिभाषा ॥ प्रावरणान्तरे । स्यूतजीर्णपटनिर्मिताच्छादनवस्त्रे । कथरी गुदरी इतिच भाषा ॥ यथा । भिक्षा प्राणस्य रक्षार्थं कन्था शीतनिवारणी । अथवा केशवे भक्ति र्विभवैःकिम्प्रयोजनमिति ॥ कथ्यते । कमु० । बाहुलकात थन् । टाप् ॥

कन्थारी । स्त्री । कन्थरी दुर्द्धर्षा तीक्ष्णकण्टका तीक्ष्णगन्धा दुष्प्रवेशा इत्यादिपर्यायवति वृक्षे ॥

कन्दः । पुं । न । सूरणे ॥ ग्राम्य कन्दस्तु दोषलः ॥ सस्यमूले ॥ सलगम इति प्रसिद्धे मूलविशेषे । गृञ्जने ॥ पुं । मेघे ॥ योनिरोगविशेषे । तस्य निदानलक्षणे यथा । दिवास्वापादतिक्रोधा द्व्यायामा दतिमैथुनात् । क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा । पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् । उत्पद्यते यदा योनौ नाम्ना कन्दस्तुयोनिजः इति ॥ सचतुर्विधः । लक्षणभेदात् । यथा । रूक्षंविवर्णं स्फुटितं वातिकं तंविनिर्दिशेत् । दाहरागज्वरयुतं विद्यात पित्तात्मकन्तुतम् ॥ नीलपुष्पप्र

लीकाशं कण्डूमन्तं कफात्मकम् । सर्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः ॥ सन्निपातात्मकोऽसाध्यः शेषाः कृच्छ्रप्रसाधनाः इति ॥ कन्दति कन्दयति कन्द्यते वा । कदि आह्वाने रोदने च । अच् घञ् वा ॥

कन्दगुडूची । स्त्री । गुडूचीविशेषे । कन्दामृतायाम् । पिण्डालुनि । सुथनी इति काश्यादिदेशप्रसिद्धे कन्दे ॥

कन्दटम् । न । शुक्लोत्पले । कोँओ- इति भाषा ॥

कन्दफला । स्त्री । क्षुद्रकारवेल्ल्याम् ॥

कन्दमूलम् । न । मूलके ॥

कन्दरः । पुं । अङ्कुशे ॥ पुं । स्त्री । गुहायाम् ॥ न । आर्द्रके । शृङ्गवेरे ॥ केन जलेन दीर्य्यते । दृ विदारणे । ऋदोरप् ॥

कन्दरा । स्त्री । दर्य्याम् । कृत्रिमाकृत्रिमे गुहाकारे गिरिविवरे ॥ कन्दर टाप् ॥

कन्दराकरः । पुं । शिलोच्चये । पर्वते ॥ कन्दराणामाकरः ॥

कन्दरालः । पुं । गर्द्दभाण्डवृक्षे ॥ कन्दरां लाति । ला आदाने । आत इति कः ॥ प्लक्षद्रुमे ॥ कपराले । आखोटवृक्षे ॥ कन्दरा मलति । अलभूषणादौ । कर्मण्यण् ॥ कन्दराऽस्यास्ति मा । सिध्मादित्वात् लच् ॥

कन्दरालकः । पुं । कन्दराले ॥

कन्दरी । स्त्री । गुहायाम् ॥

कन्दरोद्भवा । स्त्री । क्षुद्रपाषाणभेदिनि वृक्षे ॥

कन्दर्प्पः । पुं । कामदेवे ॥ प्रजोत्पत्त्यर्थो यः कामानां मध्ये कामः सच भगवतो विभूतिः ॥ कमित्यव्ययं कुत्सायाम् । कुत्सितो दर्पोऽस्य यस्माद्वा ॥ यद्वा । कं सुखं तच्च तेन वा दृप्यति । दृप हर्षमोहनयोः । पचाद्यच् ॥ अथवा । केषु ब्रह्मादिसवान् कं ब्रह्माणं दर्पितवान् वा । पृषोदरादिः ॥ ध्रुवकप्रभेदे ॥ यथा । एषो विंशतिवर्णाङ्घ्रिर्भुवः कन्दर्पसंज्ञकः । वीरे वा करुणे वा स्यात् खण्डताले विधीयते इति सङ्गीतदामोदरः ॥

कन्दर्पकूपः । पुं । भगे । योनौ ॥

कन्दर्पजीवः । पुं । कामवृद्धिनामवृक्षे ॥

कन्दर्पमुषलः । पुं । मेढ्रे । शिश्ने ॥ इति त्रिकाण्डशेषः ॥

कन्दर्पशृङ्खलः । पुं । शृङ्गारबन्धविशेषे ॥ तल्लक्षणम् । नारी पादद्वयं स्थाप्य कान्तस्योरुद्वयोपरि । कटिञ्चेच्चालयेद्रामुबन्धः कन्दर्पशृङ्खलः इति ॥

कन्दलम् । न । कलापे ॥ उपरागे ॥ नवाङ्कुरे ॥ करञ्जनौ ॥ कपवादे ॥ पुं ।

कनके ॥ युद्धे ॥ कपाले ॥ भूमिकन्द
ल्याःपुष्पे ॥

कन्दलता ।.स्त्री । मालाकन्दे ॥

कन्दली । स्त्री । मृगविशेषे ॥ गुल्मप्र
भेदे ॥ पताकायाम् ॥ पद्मबीजे ॥
कन्देसस्यमूले लीयते । लीङ् श्लेषणे।
अन्येष्वपीतिडः ॥ यद्वा । कन्दते ।
कदि॰ । वृषा॰कलच् । गौ॰ङीष् ॥
भूमिकन्दल्याम् ॥

कन्दलीकुसुमम् । न । शिलीन्ध्रे ॥

कन्दवर्द्धनः । पुं । शूरणे ॥

कन्दवल्ली । स्त्री । वन्ध्याकर्कोटक्याम् ॥

कन्दबहुला । स्त्री । त्रिपर्णिकायाम् ॥

कन्दशूरणः । पुं । श्वोल्ले । शूरणे ॥

कन्दसंभवम् । न । योन्यर्शसि । योनि
रक्तरोगविशेषे ॥ तस्यनिदानादि क
न्दे द्रष्टव्यम् ॥

कन्दसारम् । न । नन्दनवने ॥

कन्दाढ्यः । पुं । धरणीकन्दे ॥

कन्दार्हः । पुं । शूरणे ॥

कन्दालुः । पुं । कासालौ ॥ धरणीकन्दे
॥ त्रिपर्णिकायाम् ॥

कन्दी । पुं । शूरणे ॥

कन्दिरी । स्त्री । लज्जालुवृक्षे ॥

कन्दुः । पुं । स्त्री । कडाही इति भाषा
प्रसिद्धे भर्ज्जनपात्रे । स्वेदन्याम् ॥
स्कन्दति । स्कन्दिर गतिशोषणयोः ।
स्कन्देः सलोपश्चेत्युः ॥

कन्दुकः । पुं । गेन्दुके । गेंद इति भा
षा ॥ कन्द्यते । कदि॰ । बाहुलकादुः
। कंसुखं ददाति दयते द्यति यच्छति
वा मित॰ डुः । स्वार्थे कन् ॥ कंशि
रो दुनोति द्रवति वा । टुदु उपतापे
दुगतौ वा । प्राग्वत् ॥

कन्दुपक्वम् । न । जलोपसेकं विना कं
बलपात्रे यदग्निना पक्वं भृष्टतण्डुला
दि तस्मिन् ॥ यथा । कन्दुपक्वानि
तैलेन पायसं दधिसक्तवः । द्विजैरे-
तानि भोज्यानि शूद्रगेहकृतान्यपी
ति तिथ्यादितत्त्वे कूर्मपुराणम् ॥

कन्दोटः । पुं । शुक्लोत्पले ॥ न । नीलो
त्पले ॥

कन्दोतः । पुं । कुमुदे । निशाह्वसे ॥

कन्धः । पुं । मेघे । वारिदे ॥

कन्धरः । पुं । वारिवाहे ॥ मारिषवृक्षे ।
कम् जलस्य धरः ॥

कन्धरा । स्त्री । ग्रीवायाम् ॥ कंशिरो
धारयति । संज्ञायां भृतृवृजीति ख
च् । खचिह्रस्वः ॥ यद्वा । धरति । धृञ॰
। पचाद्यच् । कंशिरसोधरा ॥

कन्धिः । स्त्री । ग्रीवायाम् ॥ पुं । समु
द्रे ॥

कन्नम् ॥ न । पातके ॥ मूर्च्छायाम् ॥

कन्यका । स्त्री । दशवर्षीयाङ्कुमार्यां

म् ॥ अज्ञाता कन्या । अज्ञातादौ कः । क्षिपकादित्वान्नेत्वम् ॥

कन्यकाजातः । त्रि । अनूढापत्ये । कानीने ॥

कन्यकापतिः । पुं । जामातरि ॥

कन्या । स्त्री । कुमार्य्याम् ॥ दशवर्षीयां बालिकायाम् ॥ नार्य्याम् ॥ यथा दृष्टकन्यासु ॥ यथा । यक्षगन्धर्व्वसिद्धानां कन्यका नरनागयोः । विद्याधरकिम्पुरुषपिशाचाना सर्प।हतादृति ॥ अहल्याद्रौपदीताराकुन्तीमन्दोदरीष्वपि ॥*॥ कन्यायांजातमात्रायामुपहासं कुर्व्वते । नवरात्रादिपूजार्थं जातातेऽत्र कुमारिका ॥ कन्यादानप्रसिद्ध्यर्थं वंशद्वयविवृद्धये । इति तेनापि जननाद्दशमाब्दं हितं भवेत् ॥ कन्याविक्रये दोषो यथा । यः कन्यापालनं कृत्वा करोति यदि विक्रयं । विक्रेता धनलोभेन कुम्भीपाकं स गच्छति ॥ कन्यामूत्रपुरीषञ्च तत्र भक्षति पातकी । कृमिभिर्दंशितः काकैर्यावदिन्द्राश्चतुर्दश ॥ मृतश्च व्याधयोनौ च स लभेज्जन्मनिश्चितम् । विक्रीणीते मांसभारं वहत्येव दिवानिशमिति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥ अथ कन्यालक्षणम् । तत्र पादलक्षणम् । स्निग्धावुन्नताग्रतनुताम्रनखौ

कुमार्य्याः पादौ समोपचितचारुनिगूढगुल्फौ । श्लिष्टाङ्गुलीकमलकान्तितलौ च यस्यास्तामुद्वहेद्यदि भुवोऽधिपतित्वमिच्छेत् ॥ १ ॥ पादजङ्घाजानूरुगुह्यमणीनां लक्षणानि ॥ मत्स्याङ्कुशाब्जयववज्रहलासिचिह्नावस्वेदनौ मृदुतलौ चरणौ प्रशस्तौ । जङ्घे च रोमरहिते विशिरे सुवृत्ते जानुद्वयं सममनुल्बणसन्धिदेशम् ॥ २ ॥ ऊरू घनौ करिकरप्रतिमाववरोमा अश्वत्थपत्रसदृशं विपुलञ्च गुह्यम् । श्रोणीललाटमुरु कूर्म्मसमुन्नतञ्च गूढो मणिश्च विपुलां श्रियमादधाति ॥ ३ ॥ नितम्बनाभ्योर्लक्षणम् । विस्तीर्णमांसोपचितो नितम्बो गुरुश्च धत्ते रशनाकलापम् । नाभिर्गभीरा विपुलाङ्गनानां प्रदक्षिणावर्त्तगता च शस्ता ॥ ४ ॥ मध्यस्तनोरुवक्षोग्रीवाल० । मध्यं स्त्रिया स्त्रिवलिनाथमरोमशञ्च वृत्तौ घनावविषमौ कठिनावुरस्यौ । रोमप्रवर्ज्जितमुरो मृदु चाङ्गनानां ग्रीवा च कम्बुनिचितार्थसुखानि धत्ते ॥ ५ ॥ अधरदन्तयोर्ल० । बन्धुजीवकुसुमोपमोऽधरो मांसलो रुचिरबिम्बरूपभृत् । कुन्दकुड्मलनिभाः समा द्विजा योषितां पतिसुखामिता

र्षदाः ॥ ६ ॥ वचननासिकादृशां-
ल० । दाक्षिण्ययुक्तमशठं परपुष्टहं
सवल्गुप्रभाषित मदीनमनल्पसौ
ख्यम् । नासा समा समपुटा रुचिरा
प्रशस्ता दृङ्नीलनीरजदलद्युति-
हारिणीच ॥ ७ ॥ भ्रूललाटल० ।
नोसङ्गते नातिपृथूचरम्ये शस्तेभ्रु-
वौबालशशाङ्कवक्रे । अर्द्धेन्दु संस्था
नमरोमशस्तं ललाटं न नतं न
तुङ्गम् ॥ ८ ॥ कर्णकेशशिरोल० ।
कर्णयुग्ममपि युक्तमांसलं शस्यते मृ
दुसमाहितं समम् । स्निग्धनील
मृदुकुञ्चितैकशोमूर्द्धजाः सुखक-
राः समंशिरः ॥ ९ ॥ हस्तपादयो-
र्लेखाल० । भृङ्गारासनवाजिकुञ्ज-
रबश्रीवृक्षयूपेषुभिर्मालाकुण्ड-
लचामराङ्कुशयवैः शैलैर्ध्वजैस्तोर
णैः । मत्स्यस्वस्तिकवेदिकाव्यज-
नकैः शङ्खातपत्राम्बुजैः पादे पा
णितलेथवा युवतयो गच्छन्ति रा-
ज्ञीपदम् ॥ १० ॥ हस्तल० । नि-
गूढमणिबन्धनौ तरुणपद्मगर्भोप-
मौ करौन्नपतियोषित स्तनुविकृ
ष्टपर्वाङ्गुली । न निम्नमतिनोन्नतं
करतलं सुरेखान्वितं करोत्यविध
वांचिरं सुतसुखार्थं सम्भोगिनीम्
॥ ११ ॥ मध्याङ्गुलिं या मणिबन्धनो

त्था रेखा गतापाणितले ऽङ्गनायाः
। ऊर्द्ध्वस्थितापादतलेथवायां पुंसो
यथाराज्यसुखायसास्यात् ॥ १२ ॥
कनिष्ठिकामूलभवा गता या प्रदेशि
नी मध्यमिकान्तरालम् । करोति
रेखा परमायुषः सा प्रमाण मूना
तुतदूनमायुः ॥ १३ ॥ अथापत्य
ज्ञानम् । अङ्गुष्ठमूले प्रसवस्यरेखाः
पुत्रा बृहत्यः प्रमदास्तु तन्व्यः । अ
च्छिन्नमध्या बृहदायुषांताः स्वल्पा
युषां छिन्नलघुप्रमाणाः ॥ १४ ॥ शुभ
लक्षणान्युक्ता अशुभलक्षणान्याह । इ
तीदमुक्तं शुभमङ्गना नामतोविपर्य
स्तमनिष्टमुक्तम् । विशेषतो ऽनिष्ट
फलानि यानि समासत स्तान्यनुकी
र्त्तयामि ॥ १५ ॥ पादयो रनिष्ट
लक्षणम् । कनिष्ठिकावातदनन्तरा
वा महींनयस्याः स्पृशति स्त्रियाः स्यात्
। गताथवाङ्गुष्ठमतीत्ययस्याः प्रदे
शिनीसा कुलटातिपापा ॥ १६ ॥ ज
ङ्घागुल्फोदराणां ल० । उद्वद्धाभ्यां पि
ण्डिकाभ्यां सिरालेशुष्के जङ्घे लो-
मशेचातिमांसे । वामावर्त्तं निम्नमल्प
ञ्च गुह्यं कुम्भाकारं चोदरं दुःखितानां
म् ॥ १७॥ ग्रीवाल० । ह्रस्वयातिनिः
स्वतादीर्घया कुलक्षयः । ग्रीवया
पृथुलया योषितः प्रचण्डता ॥ १८

॥ नेत्रगण्डयोर्लं० । नेत्रे यस्याः केकरे पिङ्गलेवा स्यातुः शीला श्यावलोलोचनाच । कूपौ यस्या गण्डयोश्च स्मितेषु निम्नान्विधं वन्धकीं तां वदन्ति ॥ १९ ॥ अन्यदप्याह । प्रविलम्बिनि देवरं ललाटे श्वशुरं हन्त्युदरे स्फिजोः पतिञ्च । अतिलोमचयान्वितोत्तरौष्ठी न शुभा भर्त्तुरतो वयाच दीर्घा ॥ २० ॥ स्तनकर्णदन्तल० । स्तनौ सरोमौ मलिनोल्वणौ चक्रौ च दन्तौ विषमौ च कर्णौ । स्थूलाः कराला विषमाश्च दन्ताः क्लेशाय चौर्य्याय च कृष्णमांसा ॥ २१ ॥ हस्तल० । क्रव्यादरूपैर्वृककाककङ्कैः सरीसृपोलूक समानचिह्नैः । शुष्कैः सिरालैर्विषमैश्च हस्तैर्भवन्ति नार्यः सुखवित्तहीनाः ॥ २२ ॥ अन्यदप्याह । यातूत्तरोष्ठेन समुन्नतेन रूक्षाग्रकेशी कलहप्रियासा । प्रायो विरूपासु भवन्ति दोषा यत्राकृतिस्तत्र गुणा वसन्ति ॥ २३ ॥ अधुना शरीरस्यैव विभागमाह । पादौ सगुल्फौ प्रथमं प्रदिष्टं जङ्घे द्वितीयं तु सजानुचक्रे । मेढ्रोरुमुष्कञ्च ततस्तृतीयं नाभिंकटिंचैवचतुर्थमाहुः ॥ २४ ॥ उदरं कथयन्ति पञ्चमं हृदयंषष्ठमथस्तनान्वितम् । अथसप्तममंस्कन्धजत्रुणी कथयन्त्यष्टममोष्ठकन्धरे ॥ २५ ॥ नवमं नयने च सभ्रुणी सललाटं दशमं शिरस्तथा । अशुभेष्वशुभं दशाफलं चरणाद्येषु शुभेषु शोभनम् ॥ २६ ॥ इति वाराह्यां कन्यालक्षणं नामाध्यायः । ६१ ॥ * ॥ घृतकुमार्य्याम् । सहायाम् ॥ स्थूलैलायाम् ॥ वाराहीकन्दे ॥ वन्ध्याकर्कोटक्याम् ॥ षष्ठराशौ ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् । युवतिगे शशिनि प्रमदाजनप्रबलकेलिविलासकुतूहलैः । विमलशीलयुतोजननीलवैः सुविधिनाविधिना सहितः पुमान् ॥ कन्यालग्नोद्भवो मर्त्त्यो नानाशास्त्रविशारदः । सौभाग्यगुणसम्पन्नः सुन्दरः सुरतप्रियः ॥ चतुरचरावृत्तिभेदे । सगौ चेत् कन्या । भास्वत्कन्या सैकाधन्या । यस्याः कूले कृष्णोऽखेलत् ॥ कनति । कनदीप्तौ । अघ्न्यादिः । कन्यायाः कनीन चेति निर्द्देशादयसिप्रथम इति नङीप् ॥ दक्षिणार्णवसमीपे दुर्गादेव्याम् ॥

कन्याकुब्जः । पुं । कान्यकुब्जदेशे ॥ इति हेमचन्द्रः ॥

कन्याटः । पुं । वासमन्दिरे ॥ इति त्रिकाण्डशेषः ॥

कन्याधिपः । पुं । बुधग्रहे ॥

कन्यापतिः । पुं । जामातरि ॥

कन्यापालः । पुं । कनैत इतिहिमगिरिप्रसिद्धे शूद्रजातिविशेषे । पालवणिजि ॥

कन्यारामः । पुं । बुद्धभेदे ॥

कन्युषम् । न । हस्तपुच्छे । हथौँछा अं गौछा इति भाषा ॥

कपः । पुं । वरुणे ॥

कपटः । पुं । न । व्याजे । दम्भे । छद्मनि ॥ के मूर्द्धनि पटइव आच्छादकः ॥ यद्वा । पटति । पट० । अच् । कस्य ब्रह्मणोऽपि पटो व्यापकः ॥

कपटधारी । त्रि । छलाढ्ये ॥

कपटिकः । त्रि । कपटविशिष्टे । कपटिनि ॥ मत्वर्थे ठन् ॥

कपटी । त्रि । अयथार्थव्यवहारवति । दम्भविशिष्टे ॥ कपटोऽस्ति अस्यास्मिन्वा । इनिः ॥

कपटिनी । स्त्री । गौडभाषया चोडानामनि गन्धद्रव्ये ॥

कपटेश्वरी । स्त्री । श्वेतकण्टकार्याम् ॥

कपर्द्दः । पुं । शिवस्य जटाजूटे ॥ वराटके ॥ पर्द्दपूरणे । सम्पदादित्वात् भावे क्विप् । रालोपः । केन सुखेन जलेन वा परं पूर्त्तिं ददाति । सुपीति योगविभागात्कः ॥ कम्बलपरा

पूरणेन दापयतीति वा । देवबोधने । मात इति कः ॥

कपर्द्दिका । स्त्री । वराटिकायाम् ॥

कपर्द्दकः । पुं । हरजटाजूटे ॥ चराचरे । वराटके ॥ अस्याः प्रभेदाः । सुवर्णवर्णा सिंही १ । धूम्रवर्णा व्याघ्री २ । पीतपृष्ठासितोदरा मृगी ३ । श्वेतवर्णा हंसी ४ । नातिदीर्घिका विदन्ता ५ ॥ इतिराजनिर्घण्टः ॥

कपर्द्दी । पुं । शिवे । ईशे ॥ कपर्द्दोजटाजूटोऽस्यास्ति । इनिः ॥

कपाटम् । त्रि । अररे । कवाटे । किंवाड इतिभाषा ॥ कं वातम् शिरो वा पाटयति प्रविशते । पटगतौ । कर्मण्यण् ॥ अर्द्धर्चादि ॥

कपाटिका । स्त्री । क्षुद्रकपाटे । किवाँडी इतिभाषा ॥ कपाट एव । स्वार्थे कः । टाप् ॥

कपाटी । स्त्री । कपाटे ॥ अल्पत्वात् ङीप् ॥

कपालः । पुं । न । शिरोस्थिनि । कर्परे ॥ घटादेः शकले । खपरा इति भाषा ॥ व्रजे । समूहे ॥ यतीनां सम्मयकर्परादिभिक्षापात्रे ॥ यथा । कपालं वृक्षमूलानि कुचेलमसहायता समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणमिति ॥ कुष्ठरोगविशेषे ॥ मात्र

लक्षणं यथा । कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु । कापालं तोदबहुलं तत् कुष्ठं विषमं स्मृतमिति ॥ कं पालयति । कर्म्मण्यण् ॥ यद्वा । कम्पते । कपि चलने । तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन् । कपेरितिनिर्द्देशान्नलोपः । आगमशास्त्रस्यानित्यत्वं वा ॥

कपालनालिका । स्त्री । तर्कुट्याम् । तर्कौ । तकुआ इतिभाषा ॥ इतित्रिकाण्डशेषः ॥

कपालभृत् । पुं । शिवे ॥ कपालं ब्रह्मकपालं वा बिभर्त्ति । डुभृञ्० । क्विप् ॥

कपालमाली । पुं । भूतेशे । शिवे ॥ कपालानां माला विद्यतेऽस्य । व्री० इनिः ॥

कपालिका । स्त्री । भग्नमृन्मयभाजनशकले ॥ दन्तरोगविशेषे ॥ तल्लक्षणं यथा । कपालेष्विव दीर्य्यत्सु दन्तानां सैव शर्करा । कपालिकेति पठिता सदा दन्तविनाशिनीतिमाधवः ॥

कपाली । पुं । महादेवे । नृकपालशालिनि ॥ कपालोऽस्ति अस्य । अतइनिः ॥ स्वनामाख्याते जाति वि० ॥ सतु ब्राह्मणकन्यायां तीवराज्जात इति पराशरपद्धतिः ॥

कपालिनी । स्त्री । दुर्गायाम् ॥ इन्नन्तान् ङीप् ॥

कपिः । पुं । सिह्लके ॥ शाखामृगे । वानरे ॥ एकैकस्योपकाराय प्राणान् दास्यामि ते कपे । इति हनूमन्तं प्रति श्रीरामवाक्यम् ॥ मधुसूदने ॥ रक्तचन्दने ॥ कम्पते । कपि चलने । कुण्डिकम्प्योर्नलोपश्चेति इप्रत्ययः ॥ वराहे ॥ कादुदकात् भूमिं पातिस्मेति कपिर्वराहः । पातेर्बाहुलकात् किप्रत्ययः ॥

कपिकच्छुः । स्त्री । मर्कट्याम् । शूकशिम्ब्याम् । कौंच किवाँच इतिभाषा ॥ कपिकच्छुर्भृशं वृष्या मधुरा बृंहणी गुरुः । तिक्ता वातहरी बल्या कफपित्तास्रनाशिनी ॥ तद्वीजं वातशमनं स्मृतं वाजीकरं परम् ॥ कपीनां कच्छुः कण्डूहेतुत्वात् ॥

कपिकच्छुफलम् । न । शूकशिम्ब्याः फले ॥ कोमलं रोमसहितं स्विन्नमाज्ये विपाचितम् । सोपस्कारे सबाह्लीके सिन्धुजेन समन्वितम् ॥ कपिकच्छुफलं हृष्यं मधुरं बृंहणं गुरु । स्निग्धं शीतानिलहरं दुष्टव्रणविनाशनम् ॥

कपिकच्छुफलोपमा । स्त्री । जतुकालतायाम् ॥

कपिकन्दुकम् । न । शिरोऽस्थिनि ॥

कपिका । स्त्री । नीलसिन्दुवारवृक्षे ॥

कपिकेतनः । पुं । अर्जुनाख्यपाण्डवे ॥ कपिः केतनं चिह्नमस्य ॥

कपिकोलिः । पुं । कोलिविशेषे ॥

कपिचूडा । स्त्री । आम्रातकवृक्षे ॥

कपिचूतः । पुं । आम्रातके । आम्डा इतिभाषा ॥

कपिजः । पुं । तुरुष्के । सिह्लके । शिलारस इति गौडभाषा । नागौरी गूंद इति भाषा ॥

कपिजाङ्घिका । स्त्री । तैलपिपीलिकायाम् ॥

कपिञ्जलः । पुं । तित्तिरौ ॥ कपिञ्जल इतिप्राज्ञैः कथितो गौरतित्तिरः ॥ कपिञ्जल इतिख्यातो लोके कपिश तित्तिर इतिच ॥ चातकखगे ॥ ते जलेपक्षिणि ॥

कपितैलम् । न । तुरुष्कनामगन्धद्रव्ये । सिह्लके । नागौरीगूंदइतिभाषा ॥

कपित्थः । पुं । कैंथ इति प्रसिद्धेवृक्षे । कुचफले ॥ कपित्थोथदधित्थस्तु ग्राही फलसुगन्धकः । अचलस्पन्दोदधि फलश्चिरपाकी कपिप्रियः ॥ कपित्थमामं सङ्ग्राहि कषायंलघु लेखनम् । पक्वं गुरु तृषाहिक्काशमनंवातपित्तजित् ॥ स्वाद्वम्लं तुवर कण्ठशोधनं ग्राहि दुर्ज्जरम् ॥ अपिच । कपित्थमामं कण्ठघ्नं विषघ्नं ग्राहि वातलम् । मधुराम्लकषायञ्चातसौगन्ध्याच्च रुचिप्रदम् ॥ कपयस्तिष्ठन्त्यत्र । कपिरिवतिष्ठतिवा । सुपिस्थ इतिकः । पृ० ॥

कपित्थत्वक । पुं । एलवालुके ॥

कपित्थपर्णी । स्त्री । कपित्थानीति गौडभाषाप्रसिद्धे वृक्षविशेषे । विरजायाम् । चित्रपर्ण्याम् ॥

कपित्थास्यः । पुं । वानरविशेषे । गोलाङ्गूले । दधिशोणे । नगाटने ॥

कपिध्वजः । पुं । हनुमता महावीरेण ध्वजरूपतयाऽनुगृहीतेऽर्ज्जुने ॥ कपिर्हनूमान् ध्वजे यस्य ॥

कपिनामा । पुं । सिह्लके ॥ कपिर्नामास्य ॥

कपिपिप्पली । स्त्री । रक्तापामार्गे । वशिरे ॥ सूर्य्यावर्त्तवृक्षे ॥

कपिप्रभा । स्त्री । कपिकच्छाम् ॥

कपिप्रभुः । पुं । रघुनाथे । श्रीरामे ॥ कपीनां सुग्रीवादीनां प्रभुः ॥ कपिराजे ॥

कपिप्रियः । पुं । आम्रातके ॥ कपित्थे ॥ कपीनां प्रियः ॥

कपिप्रिया । स्त्री । चिञ्चायाम् । तिन्तिडीकायाम् ॥ कपीनां प्रिया ॥

कपिरथः । पुं । श्रीरामे ॥ अर्ज्जुने ॥

कपिः रथः रथे वा यस्य ॥

कपिलः । पुं । अनले ॥ वासुदेवे । सिद्धेशे भगवतो विभूतिविशेषे देवहूत्याङ्कर्द्दमप्रजापते राविर्भूते ॥ सिद्धानां कपिलो मुनिरिति भगवदुक्तेः ॥ ॥ अयञ्च ज्ञानभक्तिसेश्वरसाङ्ख्ययोगप्रचारार्थो भगवदवतारः ॥ अनीश्वरसाङ्ख्यमतप्रवर्त्तके च मुनिविशेषे ॥ कुक्कुरे ॥ दानवविशेषे ॥ पिङ्गले वर्णविशेषे ॥ नीलपीतः कपिलः इति रभसः ॥ कपिलो रोचमानछविरित्यन्ये ॥ त्रि । पिङ्गलवर्णयुक्ते ॥ कवते । कटवर्णो । कवेः पश्चेति इलच् प्रत्ययः ॥ मत्वर्थे सिध्मादित्वाल्लच् वा ॥

कपिलद्युतिः । पुं । सूर्य्ये ॥

कपिलद्राक्षा । स्त्री । गोस्तन्याम् । दारुहारायाम् ॥

कपिलद्रुमः । पुं । सुगन्धिकाष्ठविशेषे ॥

कपिलधारा । स्त्री । गङ्गायाम् । स्वर्ग्याम् ॥ तीर्थविशेषे ॥

कपिलपुराणम् । न । कापिले उपपुराणे ॥

कपिलशिंशपा । स्त्री । शिंशपाटक्षविशेषे । पीतायाम् । कुशिंशपायाम् ॥

कपिला । स्त्री । गोविशेषे । स्वर्णवर्णायाङ्गवि ॥ कपिलवर्णयोगात् । अनुदात्तत्वाभावात् वर्णादित्तिनङीप् ॥ भस्मगर्भायाम् । कपिलवर्णपुष्पायां शिंशपायाम् ॥ भस्मगन्धिन्योषधौ । रेणुकायाम् ॥ कपिलो वर्णोऽस्त्यस्याः । अर्श आद्यच् ॥ पुण्डरीकादिग्गजकरिण्याम् ॥ नदीविशेषे ॥ यथा । कज्जलाचलशैलात्तु पूर्वस्मिन् शुभ्रपर्वतः । शच्या सह पुरा रेमे यत्र शक्रः सुरेश्वरः ॥ तत्पूर्वस्यां महादेवी नदी कपिलसंज्ञिता । तस्यां स्नात्वा नरो गङ्गास्नानजं फलमाप्नुयात् इति कालिकापुराणे ८१ अध्यायः ॥

कपिलाक्षी । स्त्री । कपिलशिंशपायाम् ॥ मृगेर्वारौ ॥

कपिलाचार्य्यः । पुं । वासुदेवे ॥ कपिलस्य वै साङ्ख्यस्य शुद्धात्मतत्त्वविज्ञानस्य आचार्य्ये ॥

कपिलाश्वः । पुं । विडौजसि । इन्द्रे ॥

कपिलोमफला । स्त्री । कपिकच्छ्वाम् ॥

कपिलोमा । स्त्री । रेणुकायाम् ॥

कपिलोहम् । न । पित्तले ॥

कपिल्लिका । स्त्री । गजपिप्पल्याम् ॥

कपिवक्त्रः । पुं । नारदे ॥

कपिवल्लभः । पुं । आम्रातके ॥

कपिवल्ली । स्त्री । करिपिप्पल्याम् । कोलवल्ल्याम् ॥ कपिरिव वल्ली तस्याः लोमशत्वात् ॥

कपिशः । पुं । [illegible] ॥

श्यावे । कृष्णपीतमिश्रितवर्णे ॥ त्रि । तद्वर्णयुक्ते ॥ कपिवर्णविशेषोऽस्यास्ति । लोमादित्वात् शः ॥ विरक्तसन्ध्याकपिशमिन्त्यत्र कपिशं ताम्रमिति मल्लिनाथः ॥

कपिशा । स्त्री । माधव्याम् । माधुरीसुरायाम् ॥ नदीविशेषे ॥ टाप् ॥

कपिशाञ्जनः । पुं । शिवे ॥

कपिशापुत्रः । पुं । पिशाचे ॥

कपिशी । स्त्री । माधव्याम्मदिरायाम् ॥

कपिशीका । स्त्री । मदिरायाम् ॥ इति त्रिकाण्डशेषः ॥

कपिशीर्षम् । न । क्षयशीर्षे । प्राकाराग्रे ॥

कपिशीर्षकम् । न । हिङ्गुले ॥ खोडकशीर्षके । प्राकाराग्रे ।

कपिष्ठलः । पुं । ऋषिविशेषे ॥ कपिष्ठलोगोत्र इतिनिपातनात् षत्वम् ॥

कपीज्यः । पुं । क्षीरिकावृक्षे ॥

कपीतः । पुं । श्वेतकुब्जावृक्षे ॥

कपीतनः । पुं । गर्दभाण्डे ॥ शिरीषवृक्षे ॥ आम्रातके ॥ अश्वत्थे ॥ पूगवृक्षे ॥ मालूरवृक्षे । बिल्वे ॥ तनोति । तनुविस्तारे । पचाद्यच् । कपीनाम् कपेर्वर्णस्य वा तनः । अन्येषामपीति दीर्घः ॥ यद्वा । याः लक्ष्म्याः तनः ईतनः । कपीनां रूपे वा ईतनः ॥

कपीन्द्रः । पुं । हनूमति ॥ सुग्रीवे ॥ राघवे ॥ वराहमूर्त्तौ ॥ कपिश्चासाविन्द्रश्च । कपीनामिन्द्रो वा ॥

कपीशः । पुं । हनुमति ॥ कपीशमक्षहन्तारं वन्दे लङ्काभयङ्करम् ॥ कपीनामीशः ॥

कपीष्टः । पुं । राजादनवृक्षे ॥ कपित्थे ॥

कपूयः । त्रि । कुत्सिते ॥ कुत्सितं पूयते । पूयी विसरणे । पचाद्यच् । पृषोदरादिः ॥

कपूयचरणः । त्रि । दुष्कृतिनि । कुत्सितकर्मणि ॥ कपूयं निन्दितं चरणं कर्मास्य ॥

कपोतः । पुं । पारावते । कलरवे ॥ कपोतको गुरुः स्निग्धो रक्तपित्तानिलापहः । सङ्ग्राही शुक्रलः शीतः सुस्वादूरुचिकारकः ॥ घुघुती इति प्रसिद्धे चित्रकण्ठविहङ्गमे । धूसरे । धूम्रलोचने ॥ कस्य वायोः पोत इव । कोवायुः पोतो नौरिवास्य वा ॥ यद्वा । कवते । कवृ वर्णे । कवेरोतच्पश्च ॥ पश्चिमाचे ॥

कपोतकम् । न । सौवीराञ्जने ॥

कपोतचरणा । स्त्री । नलीनामगन्धवस्तुनि ॥

कपोतपालिका । स्त्री । स्तम्भाग्रप्रसारिते दारुविशेषे ॥ सौधादिप्रान्तकाष्ठा

दिरचिते पक्षिस्थाने । विटङ्के ॥ पालयति । पालरक्षणे । ण्वुल् । कपोतानां पालिका ॥ कपोतान् पालयति वा । कर्मण्यण् । संज्ञायां कन् इति कन् ॥

कपोतपाली । स्त्री । विटङ्के ॥ कपोतान् पालयति । कर्मण्यण् । ङीप् ॥

कपोतवङ्का । स्त्री । ब्राह्मीवृक्षे ॥

कपोतवर्णी । स्त्री । सूक्ष्मैलायाम् ॥

कपोतवाणा । स्त्री । नलीनामगन्धद्रव्ये ॥

कपोतसारम् । न । स्रोतोऽञ्जने ॥

कपोताङ्घ्रिः । पुं । कपोतपादे ॥ स्त्री । नल्याम् । गन्धद्रव्यविशेषे ॥ कपोतस्याङ्घ्रिरिव ॥

कपोताभः । पुं । कपोतवर्णे ॥

कपोतारिः । पुं । श्येनपक्षिणि ॥ कपोतानाम् अरिः ॥

कपोलः । पुं । गण्डे । गल्ले । चक्षुषी तिर्यक्सन्धिभागे । गाल इतिभाषा ॥ कम्पते । कपि चलने । कपिगडिगण्डीश्योलच् । कपीतिनिर्देशान्नलोपः ॥ कं सुखं पोलति वा । पुल महत्त्वे । कर्मण्यण् ॥

कप्यास्यः । पुं । सिल्हके ॥

कप्यासः । पुं । वानरगुदे । कपिपृष्ठान्ते ॥

कफः । पुं । शरीरस्थधातुविशेषे । श्लेष्मणि । सौम्यधातौ ॥ कफस्यकोपः कुसुमागमेभवति । अस्यप्रकोपहेतुः । गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः । तुहिनपतनकाले श्लेष्मणः सम्प्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते ॥ अपिच । गुरुपटुमधुराम्लस्निग्धमाषैस्तिलैश्च द्रवदधिदिननिद्राशीतनिश्चेष्टताभिः । प्रथमदिवसभागे रात्रिभागे पिचाद्ये भवति हि कफकोपो भुक्तमात्रे वसन्तेइति ॥ त्रिधाविभक्तस्य दिवसस्यप्रथमे भागे एवं रात्रेश्चाद्ये भागे ॥ फाल्गुनेचैत्रमासेच जन्तुपीडाकरोमतः । सर्वशास्त्रविचारज्ञैःश्लेष्मा राजाप्रकीर्त्तितः ॥ केन जलेनफलति । फलनिष्पत्तौ । अन्येष्वपीतिडः ॥ यद्वा । केशिरसिफलति वा पूर्ववत् डः ॥

कफकूर्चिका । स्त्री । लालायाम् । सृणीकायाम् । आस्यासवे । लाल थूक इत्यादिभाषा ॥

कफघ्नी । स्त्री । हपुषाप्रभेदे ॥

कफणिः । पुं । स्त्री । कफोणौ ॥ केन सुखेन फणति स्फुरति वा । फण गतौ स्फुरणचलने वा । इन् । पृषोदरादिः ॥

कफणी । स्त्री । कफोणौ ॥ कूर्दिका

राडिति पक्षेङीष् ॥

कफप्रकृतिकः । त्रि । कफःस्वभावे ॥ तल्लक्षणं यथा । गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः । स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नर इति ॥

कफवर्द्धनः । पुं । पिण्डीतगरवृक्षे ॥ त्रि । श्लेष्मवृद्धिकारके ॥

कफविरोधि । न । मरिचे ॥

कफाद् । पुं । कफनाशके ॥ कफमत्ति । अद० । क्विप् ॥

कफान्तकः । पुं । बर्बुरवृक्षे ॥ इतिराजनिर्घण्टः ॥

कफारिः । पुं । शुण्ठ्याम् ॥

कफी । पुं । गजे । हस्तिनि ॥ त्रि । श्लेष्मणे । श्लेष्मले । श्लेष्मयुक्ते ॥ कफोऽस्यास्ति । द्वन्द्वोपतापेतीनिः ॥

कफेलुः । पुं । श्लेष्मातके ॥ कफं लाति । ला आदाने । अन्दूदृन्भूजम्बूकफेलूकर्कन्धूदिधिषूरिति कूप्रत्ययो निपातनादेत्वम् ॥

कफोणिः । पुं । कूर्परे । भुजमध्यग्रन्थौ । कोणी इति भाषा ॥ कं सुखं स्फोरयति । स्फुरस्फुरणे सञ्चलने च । ण्यन्तः । अचः ॥ पृ० । यद्वा । केन सुखेन फणति स्फुरति वा । फण० । स्फुर० । इन् । पृ० ॥

कफोणी । स्त्री । कूर्परे ॥

कफोत्क्लेशः । पुं । कफस्य वमनायोपस्थितौ ॥

कबन्धः । पुं । उदरे ॥ धूमकेतौ ॥ राहौ ॥ रक्षोविशेषे ॥ न । जले । उदके ॥ पुं । न । क्रियायुक्तशिरःशून्यकलेवरे ॥ कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरम् ॥ यथा । मनुष्याणां सहस्रेषु हतेषु हतमूर्द्धसु । तदावेशात् कबन्धः स्यादेकोऽमूर्द्धा क्रियान्वितः ॥ अपिच । नागानामयुतं तुरङ्गनियुतं सार्द्धं रथानां शतं पत्तीनां दशकोटयो निपतिता एकः कबन्धो रणे । तादृक्कोटिकबन्धनर्त्तनविधौ खेलत्खलत्खे शिरस्तेषां कोटिनिपातने रघुपतेः कोदण्डघण्टारवः । इति प्राचीनाः ॥ कं सुखं बध्नाति । बन्धबन्धने । कर्मण्यण् ॥ कं बध्यते छिद्यतेऽस्मात् । घञ् ॥ केन वायुना बध्यते वा । को वायुरेव बन्धः आश्रयो वास्य वा ॥

कबन्धी । पुं । ऋषिविशेषे ॥

कवित्थः । पुं । कपित्थवृक्षे ॥ कपयः तिष्ठन्त्यत्र छा० । सुपिस्थ इतिकः । पृ० ॥

कविलः । पुं । कपिलवर्णे ॥ त्रि । कपिलवर्णाढ्ये ॥

कभम् । न । रोहिणीनक्षत्रे ॥

कम् । अ । पादपूरणे ॥ जले ॥ मस्तके ॥ सुखे ॥ मङ्गले ॥ निन्दायाम् ॥

कम्यते । कमु॰ । णिङभावे विच् ॥

कमठः । पुं । कच्छपे ॥ दैत्यविशेषे ॥ मुनिभाजने ॥ शल्लक्याम् ॥ भगवतोऽवतारविशेषे ॥ न । मुनीनां जलपात्रविशेषे । वक्ती वतकी लोट इति च भाषाप्रसिद्धे ॥ काम्यते । कमु॰ । कमेरठः ॥ के जले मठतिवा । मठमदनिवासयोः । पचाद्यच् ॥

कमठी । स्त्री । कच्छप्याम् । दुल्याम् ॥ स्वल्पकूर्मजातौ ॥ शल्लक्याम् ॥ पुंयोगादिति जातेरितिवा ङीष् ॥

कमण्डलुः । पुं । न । करके । कुण्ड्याम् । सन्न्यासिनां मृत्काष्ठादिमयेपात्रे ॥ अलाबुं दारुपात्रञ्च मृन्मयं वैदलं तथा । एतानि यतिपात्राणि मनुः स्वायम्भुवो ऽब्रवीत् ॥ पुं । प्लक्षपादपे ॥ चतुष्पाज्जातिविशेषे ॥ कस्य प्रजापतेर्जलस्य वा मण्डःसारः । तं लाति । ला॰ । मितद्र्वादित्वात् डुः ॥ यद्वा । मण्डनम् । मण्डिभूषायाम् ॥ । घञ् । कस्य मण्डंभूषां लाति । डुः ॥

कमनः । पुं । कामे ॥ अशोकवृक्षे ॥ ब्रह्मणि ॥ त्रि । कामुके ॥ कामयते कमु॰ । कर्त्तरिल्युट् ॥ अभिरूपे । कमनीये । मनोहरे ॥ अनुदात्तश्चेतिकमेर्युच् ॥

कमनच्छदः । पुं । कङ्कपक्षिणि ॥

कमनी । स्त्री । कामयित्र्याम् । ङीप् ॥

कमनीयः । त्रि । कामनायोग्ये । वल्गुनि । मनोहरे । रुचिरे । कान्ते । शोभने ॥ कमेरनीयर् ॥

कमरः । त्रि । काममोहिते । कामिनि ॥ कामयते । कमु॰ । अर्त्तिकमिभ्रमीत्यरश्चित् ॥

कमलः । पुं । मृगविशेषे । कुरङ्गे ॥ न । जले । ताम्रे ॥ क्लोमनि ॥ भेषजे ॥ सारसपक्षिणि । जलजे । पद्मे ॥ अस्यगुणाः । कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् । तृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥ विशेषतः सितंपद्मं पुण्डरीकमिति स्मृतम् । रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् ॥ धवलं कमलं शीतंमधुरं कफपित्तजित् । तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकमिति ॥ षगणाश्रयसप्तम ऽ।ऽ। प्रभेदे ॥ कामयते काम्यते वा । कमु॰ । णिङभावे वृषा॰कलच् ॥ कम्जलम् अलति । अलभूषणादौ । मू॰ कोवा ॥ ध्रुवकप्रभेदे ॥ यथा । उक्तोमलयताले न लघुमध्ये स्फुरेद्गुरुः । समदशाक्षरैर्युक्तः कमलोऽयं भयानके इति ॥

कमलखण्डम् । न । कमलानांसमूहे । कमलादिभ्यःखण्डः ॥

कमलच्छदः । पुं । पद्मदले । पद्मपत्रे ॥

कमलजः । पुं । ब्रह्मयोनौ । धातरि ॥ कमले जातः । जनी । डः ॥

कमला । स्त्री । लक्ष्म्याम् । श्रियि ॥ कमलमालयस्थायां देव्याम् ॥ वरस्त्रियाम् ॥ कालकृष्टादिपत्तने कमलानींबू इति ख्याते फलविशेषे । यथा । रम्भाफलं तिन्तिडीकं कमलानागरङ्गकम् । फलान्येतानि भोज्यानि पथ्योऽन्यानि विवर्जयेदिति तन्त्रसारे पुरश्चरणप्रकरणम् ॥ काम्यते । कमु० । वृषा० कलच् ॥ कमलम् अस्ति अस्याः । अर्शआद्यच् वा ॥ छन्दोविशेषे । यथा । द्विगुणमगणसहितःसगण इह विहितः । फणिपतिमतिविमला क्षितिपभवतिकमलेति ॥ सवैयान्तर्गता कमला यथा । वसुभिःप्रमिताः सगणा विहिताः पुनरेकमितो निहितो गुरुरन्ते । यदि सज्जनयोर्विबुधसम्मतयोऽभिधया कमलेति तदा कथयन्ते । विदधत्यमनगारमणीयतया रसनापरिलेखितया कुतुकन्ते । यथयन्नरेशविशोभितशोधि कथाभितसाविदधातुमुदन्ते इति ॥

कमलालयः । पुं । सिद्धस्थानविशेषे ॥ यथा । कमलालयेमहास्थानेकमलाख्योमहेश्वरः । कमलाप्रमहेशानी सकलार्थप्रदायिनीत्यागमोक्तिः ॥

कमलालया । स्त्री । लक्ष्म्याम् ॥ कमलमालयो यस्याः ॥

कमलासनः । पुं । धातरि ॥ कमलमासनमस्य ॥ न । आसनविशेषे ॥

कमलासनस्थः । पुं । पृथिवीपद्ममध्ये मेरुकर्णिकासनस्थे भगवन्नाभिकमलासनस्थे विधातरि ॥

कमलिनी । स्त्री । पद्मिन्याम् ॥ पद्मपत्रे । पद्माकरे ॥ कमलानि सन्त्यत्र । पुष्करादिभ्योदेशे इति इनिः ॥

कमलोत्तरम् । न । कुसुम्भपुष्पे ॥ कमलादुत्तरम् ॥

कमा । स्त्री । शोभायाम् ॥ इतिराजनिर्घण्टः ॥

कमिता । त्रि । कामुके ॥ कमेर्णिङ् भावे तृच् ॥

कम्पः । पुं । गात्रादिचलने । वेपथौ । वेपने ॥ कम्पनम् । कपिकिञ्चिच्चलने । भावे घञ् ॥

कम्पनः । पुं । शिशिरर्त्तौ ॥

कम्पनम् । त्रि । कम्प्रे । लोले । चञ्चले ॥ न । कम्पे ॥ कम्पनशीलः । कपि० चलनशब्दार्थादितियुच् ॥

कम्पलक्ष्मा । पुं वायौ ॥

कम्पाकः । पुं । वायौ ॥

कम्पितम् । न । कम्पने । वेपने । कम्पे

॥ त्रि । कम्पयुक्ते ॥ कम्प्यतेस्म । क पि॰ । क्तः ॥

कम्पिल्लः । पुं । कम्पिल्लके । रक्ताङ्गे । कंबीला कामल इतिच भाषा प्रसिद्धे वृक्षे ॥ देशविशेषे ॥

कम्पिल्लकः । पुं । कम्पिल्ले ॥

कम्प्रः । त्रि । कम्पयुक्ते । अतिचञ्चले ॥ कम्पनशीलः । नमिकम्पीतिरः ॥

कम्बरः । पुं । चित्रवर्णे । कर्बुरवर्णे ॥ त्रि । चित्रवर्णवति ॥

कम्बलः । पुं । नागराजे ॥ सास्नायाम् ॥ प्रावारे ॥ कृमौ ॥ वैकक्ष्ये ॥ स्वनामख्यातेमेषादिलोमरचिते वस्त्रासनादौ । रल्लके ॥ मृगविशेषे ॥ न । जले । सलिले ॥ कम्यते । कमु॰ । कमेर्बुक्चेतिकलः ॥ कंकुत्सितं शिरो ऽम्बु वा वलते । वलसंवरणे सञ्चरणेच । अच् ॥ कम्बति कम्ब्यते वा । कम्बगतौ । वृषादित्वात् कलच् ॥

कम्बली । पुं । वृषे ॥ त्रि । कम्बलवति ॥ कम्बलोऽस्ति अस्य । इनिः ॥

कम्बलिवाह्यकम् । न । गन्व्याम् ॥ वृषवाह्ये शकटे ॥ कम्बलः सास्ना । सा ऽस्त्येषाम् । इनिः । कम्बलिभिर्वृषैर्वह्यते । वह॰ ण्यत् । स्वार्थेकन् ॥

कम्बलीया । स्त्री । ऊर्णायाम् ॥ कम्बलायहिता । असंज्ञायांत्वाग्नयत् । तस्मैहितमिति छः ॥

कम्बल्यम् । न । ऊर्णापलशते ॥ कम्बलाच्चसंज्ञायामिति प्राक्क्रीतीयेष्वर्थेषुयत् ॥

कम्बिः । स्त्री । खजाकायाम् । दर्व्याम् ॥ वंशांशे ॥ कम्यते । कमु॰ । बाहुलकात् विन् ॥

कम्बुः । पुं । न । शङ्खे ॥ पुं । शम्बूके ॥ वलये ॥ हस्तिनि । गजे ॥ कर्चूरे ॥ ग्रीवायाम् ॥ नलके । पोलाहाड इति भाषा ॥ काम्यते । कमु॰ । जत्वादयश्चेतिनिपातितः ॥ कम्बति । कम्बगतौ । मृगय्वादिर्वा ॥

कम्बुकः । पुं । कम्बुशब्दार्थे ॥

कम्बुकण्ठी । स्त्री । कम्बुग्रीवायाम् ॥

कम्बुकाष्ठा । स्त्री । अश्वगन्धायाम् ॥

कम्बुग्रीवा । स्त्री । शङ्खाकृतित्रिरेखाढ्यग्रीवायाम् ॥ कम्बुः शङ्ख इवग्रीवातिस्रो रेखा यस्याः ॥

कम्बुपुष्पी । स्त्री । शङ्खपुष्प्याम् ॥

कम्बुमालिनी । स्त्री । शङ्खपुष्प्याम् ॥

कम्बूः । पुं । वलये ॥ शङ्खे ॥ त्रि । परद्रव्यापहारिणि ॥ अन्दूदृन्भूजम्बूकम्बूइत्युज्ज्वलदत्तोक्तपाठात् साधुः ॥

कम्बोजः । पुं । हस्तिविशेषे ॥ शङ्खविशेष ॥ देशविशेषे ॥ सयथा । पञ्चन

दं समारभ्यं मलेच्छाहक्षिणपूर्वतः। कम्बोजदेशो देवेशि ५। जिराशिपरायणः ॥ इतितन्त्रशास्त्रम् ॥

कम्बुतायी । पुं। शङ्खचिल्ले ॥

कम्भारी । स्त्री । गम्भार्य्याम् ॥ कं जलं विभर्त्ति । डुभृञ्० । कर्मण्यण् । ङीप् ॥

कम्भु । न । उशीरे ॥ इतिराजनिर्घण्टः ॥

कम्रः । त्रि । कामुके । मैथुनेच्छाविशिष्टे ॥ कमनीये ॥ कामयते । कमु० । नमिकम्पीतिरः ॥

करः । पुं । वर्षोपले ॥ रश्मौ ॥ पाणौ ॥ प्रत्याये । भागधेये । कर्षकादिद्वारा प्रत्येकस्यावरजङ्गमादादेयराजग्राह्यभागे ॥ शुण्डायाम् ॥ हस्तनक्षत्रे ॥ चतुष्कलेशेषगुरोः ॥ऽसंज्ञायाम् ॥ कीर्य्यते । क्षिप्ते । ऋदोरप् ॥ करोति वा । अच् ॥ कर्मोपपदेसति कर्तृवाचकोयंशब्दः । यथा । आनन्दकरः ॥

करकः । पुं । करकवृक्षे ॥ पक्षिविशेषे ॥ दाडिमवृक्षे ॥ करे ॥ लट्वायाम् ॥ पलाशवृक्षे ॥ कोविदारवृक्षे ॥ बकुलवृक्षे ॥ करीरवृक्षे ॥ नारिकेलास्थनि । माला इतिगौड भाषा । नरेली कपाली इतिचभाषा ॥ पुं । न । करके ॥ कमण्डलौ ॥ पुं । स्त्री । वर्षोपले ॥ कृणोति । कृञ् हिंसायाम् । करोति दोषाभावं वा । कृआदिभ्यः संज्ञायांवुन् ॥

करकङ्कणन्यायः । पुं । कङ्कणशब्देनैव करभूषणविशेषबोधसम्भवेऽपि करशब्दपूर्वकः कङ्कणशब्दः करसंलग्नकङ्कणबोधार्थक इत्यर्थपरे दृष्टान्ते ॥

करकचः । पुं । योगविशेषे ॥ यथा । शनिभार्गवजीवज्ञकुजसोमार्कवासरे । षष्ठ्यादितिथयः सप्तक्रमात् करकचाः स्मृता इति ॥

करकच्छपिका । स्त्री । कूर्ममुद्रायाम् ॥

करकण्टकः । पुं । नखे ॥

करका । स्त्री । वर्षोपले । मेघोपले । ओलाइतिभाषा ॥ कृणोतेर्वुनन्ताट्टापि क्षिपकादित्वात् प्रत्ययस्थादितीत्त्वंन ॥

करकाजलम् । न । दिव्यपानीयप्रभेदे ॥ दिव्यवाय्वग्निसंयोगात्संहताःखात्पतन्तियाः । पाषाणखण्डवच्चापस्ताःकारक्योऽमृतोपमाः ॥ करकाजंजलंरूक्षंविशदंगुरुचस्थिरम् । दारुणं शीतलं सान्द्रंपित्तहृत् कफवायुकृत् ॥

करकाम्भाः । पुं । नारिकेलवृक्षे ॥

करग्रहः । पुं । विवाहे ॥ करग्रहणे ॥

करग्रहारम्भः । पुं । नववर्षसम्बन्धिनः करस्य राज्ञा प्रजाभ्यः प्रथमादाने । पुण्याहमिति प्रसिद्धे ॥ तद्दिननिर्णयो यथा । तीक्ष्णोग्रचरशीतरश्मिषु लग्ने शीर्षोदये भानुदिने शुभाह्ने । कुर्याद्युक्तानि समीक्षितानि करग्रहारम्भमपि प्रजाभ्य इति ॥

करग्राहः । पुं । पाणिग्राहे ॥ करं गृह्णाति । ग्रह० । अण् ॥

करघर्षणः । पुं । दधिमन्थनदण्डे । तर्काटे ॥ न । हस्तघर्षणे ॥

करघर्षी । पुं । क्षुद्रमन्थानदण्डे । छोटीरयी इति भाषा ॥

करङ्कः । पुं । मस्तके ॥ अयस्थनारिकेलफलास्थनि । नारियलशाखोल इतिभाषा । पोलानारियल इति च ॥ शरीरास्थि ॥ इक्षुविशेषे ॥

करङ्कशालि । पुं । करङ्काभिधेक्षौ ॥

करच्छदः । पुं । शाखोटवृक्षे । सिहोड़ा इतिभाषा ॥

करच्छदा । स्त्री । सिन्दूरपुष्पगाम् ॥

करजः । पुं । नखे ॥ करञ्जवृक्षे ॥ न । व्याघ्रनखाख्यगन्धद्रव्ये । करजं नखं तत्रिच ॥ करेजायन्ते । जनी० । अन्येष्वपीतिडः ॥ कं सुखं जलं वा रञ्जयति । रञ्जरागे । कर्मण्यण् । न्यङ्क्वादित्वान्निर्देशात् दकृतिश्च पिनलोपः । संज्ञापूर्वकत्वान्न वृद्धिः ॥

करज्योतिः । पुं । हस्तज्योतिर्वृक्षे । हाथाजोड़ी इतिभाषा ॥ इतिराजनिर्घण्टः ॥

करञ्जः । पुं । वृक्षविशेषे । करंजुआ इतिभाषाप्रसिद्धे ॥ स षड्विधः । तत्र गौडभाषाया डहरकरञ्जस्य पर्यायाः । चिरबिल्वो नक्तमालः करजश्च करञ्जके ॥ नाटाकरञ्जस्य पर्यायाः । प्रकीर्यः पूतिकरजः पूतिकः कलिकारकः ॥ गौडभाषया काँटाकरञ्ज गाँठियाकरञ्ज इति प्रसिद्धस्य । षड्ग्रन्थः ॥ माँकड़ाकरञ्जस्य । मर्कटी ॥ विषकरञ्जस्य । अङ्गारवल्लरी ॥ इति ॥ अम्लकरञ्जस्य पर्यायास्तु । करमर्दी वनेक्षुश्चाकराम्लः करमर्दकः । इति ॥ कं सुखं जलं वा रञ्जयति । रञ्जेः कर्मण्यण् ॥

करञ्जकः । पुं । करञ्जे ॥ स्वार्थे कन् ॥ करञ्जः कटुकस्तीक्ष्णो वीर्योष्णोऽनिलदोषहृत् । कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमिकफापहः ॥ नक्तपर्णं कफवातार्शः कृमिशोथहरम्परम् । भेदनं कटुकन्धाके वीर्योष्णं पित्तलं लघु ॥ तत्फलं कफवातघ्नं मेहार्शःकृमिकुष्ठजित् । घृतपूर्णकरञ्जोऽपि करञ्जसदृशो गुणैः ॥ भृङ्गराजे ॥

करञ्जफलः । पुं । कपित्थवृक्षे ॥

करञ्जी । स्त्री । उदकीर्य्यां । महाकरञ्जे ॥ करञ्जी स्तम्भिनी तिक्ता तुवरा कटुपाकिनी । वीर्य्योष्णा वमिवातार्शःकृमिकुष्ठप्रमेहजित् ॥

करटः । पुं । गजगण्डे ॥ कुसुम्भवृक्षे ॥ निन्द्यजीवने ॥ एकादशाहादिश्राद्धे ॥ दुर्द्दुरूटे ॥ वायसे ॥ वाद्यविशेषे ॥ करोति शकुनम् । शकादिभ्योऽटन् ॥ केति रटतिवा । रटशब्दे । पचाद्यच् ॥

करटकः । पुं । करटार्थे ॥ स्वार्थेकन् ॥

करटा । स्त्री । दुःखदोह्यायाङ्गवि ॥ अजाद्यतष्टाबिति अदन्तलक्षणष्टाप् ॥

करटी । पुं । हस्तिनि ॥

करटिनी । स्त्री । हस्तिन्याम् ॥

करटुः । पुं । कर्क्करेटौ । करकटिया इति गौडभाषाप्रसिद्धपक्षिवि० ॥

करणम् । न । हेतौ । साधकतमे । क्रियासिद्धौ प्रकृष्टोपकारके ॥ यद्व्यापारानन्तर मव्यवधानेन फलोत्पत्ति स्तत्करणमित्यर्थः । तेनदात्रेण धान्यं लुनातीत्यत्र हस्तादेः कारणत्वेपि दात्रस्यैव करणत्वम् । तथाचोक्तम् । कारणाव्यवधानेपि क्रियानिष्पत्तिकारणम् । यद्विवक्षितं तेषु करणत्वं प्रकीर्त्तितमिति ॥ साधने ॥ कर्म्मणि

करण

॥ तिथ्यर्द्धपरिमितेषु बवादिकादशसु ॥ यथा । बवाख्यबालवकौलवतैतिलगरवणिजविष्टयः सप्त । जगद्दुरचेति चराणि तिथिखण्डात्मकानि करणानि ॥ अचराण्युत्तरशकलाद्मासस्य चतुर्द्दशीतश्च । शकुनिचतुष्पदनागकिंस्तुघ्नानि भवन्ति करणानि ॥ सितादेः करणं स्थेकोयात तिथ्यर्द्धसङ्ख्यः । सप्तभक्तोवशेषेण मितं स्याद्बवतोगतम् ॥ चराणि विष्टिं करणान्यृते चसा भवन्ति सौम्याखिलकर्मसिद्धये । नचैवधीराणिचपितृकर्मणो विष्टिर्विघातादिनिधौवराभवेदिति ॥ हस्तलेपे ॥ नृत्यप्रभेदे ॥ नृत्यविषयकाङ्गोत्तरशतकरणविशेषेषु ॥ यथा । करणानान्तुसर्वेषां सामान्यं लक्षणन्त्विदम् । प्रायोवामकरोवक्षः स्थितोऽन्यः पुरतोनुगः ॥ पादाभ्याङ्करणं त्रेयं तदष्टाष्टोत्तरंशतम् । निकुञ्चितंपार्श्वक्रान्तमतिक्रान्तंविवर्त्तकम् ॥ विद्युद्भ्रान्तं गजक्रीडं कान्तञ्च गरुडप्लुतमित्यादिसङ्गीतदामोदरः ॥ गीतप्रभेदे ॥ क्रियाप्रभेदे ॥ व्रतबन्धे ॥ कायस्थसंहतौ ॥ कुलादौ ॥ क्षेत्रे ॥ गात्रे । काये ॥ संवेशने ॥ कायस्थे ॥ इन्द्रिये ॥ वर्णानांस्पष्टतादौ ॥ योगिनामासनादौ ॥ न्याय

मते व्यापारवदसाधारणं कारणङ्कर
णम् । समवाय्यसमवायिनिमित्तका
रणामध्ये यदसाधारणं कारणं तदेव
करणमिति ॥ साङ्‌ख्य नये इन्द्रियेषु
॥ यथा । करणं त्रयोदशविधम् । इ
न्द्रियाण्येकादश बुद्धिरहङ्कारश्चेति
त्रयोदशप्रकारं करणम् । त्रयोदश
विधेकरणेऽवान्तरविभागंकरोति ।
अन्तः करणं त्रिविधं दशधा वाह्यं त्रय
स्यविषयाख्यम् । साम्प्रतकालं वाह्यं
त्रिकालमाभ्यन्तरङ्करणम् ॥ ३२॥ अ
स्यार्थः । अन्तः करणंत्रिधम् । बु
द्धिरहङ्कारोमनइति । शरीराभ्यन्त
रवृत्तित्वादन्तःकरणम् ॥ दशधावा
ह्यमिन्द्रियम् त्रयस्यान्तःकरण-
स्य विषयाख्यम् । विषयमाख्याती
ति विषयाख्यम् । सङ्कल्पाभिमाना-
ध्यवसायेषु कर्त्तव्येषु द्वारीभवति ।
तत्र बुद्धीन्द्रियाण्यालोचनेन कर्मे-
न्द्रियाणि यथास्वंव्यापारेण । वाह्या
भ्यन्तरयोः करणयोर्विशेषमाह । सा
म्प्रतकालमित्यादि । साम्प्रतकालं
वर्त्तमानकालंवाह्येन्द्रियम् । वर्त्तमा
नसमीपमनागतमपिवर्त्तमानम् । अ
तीतानागपिवर्त्तमानविषयाभवति ।
त्रिकालमाभ्यन्तरं करणम् । तद्यथा
। पूरभेदात्वभूतवृष्टिः अस्ति धूमाद

गिरिहनगनिकुञ्जे असत्युपघात
के पिपीलिकाण्डसञ्चरणादिहभवि
ता वृष्टिरिति तदनुरूपाश्चसङ्कल्पा
भिमानाध्यवसाया भवन्तीति ॥ श्रो
त्रादिपञ्चज्ञानेन्द्रियाणि वागादि प
ञ्चकर्म्मेन्द्रियाणि मनो बुद्धिश्चेति -
द्वादशसंख्याके ॥ करणवर्गमनोबु-
द्धिश्चेतिहस्तिविशेषौ वृत्तिमांस्त्वह
ङ्कारः कर्त्तैव । चिदाभासस्तुसर्वै-
वा ऽविशिष्टः । अनात्मा भौतिकः क
ल्पितश्च ॥ सेतिकर्त्तव्यताके साधने
॥ धात्वर्थे ॥ पुं । वैश्याच्छूद्रासु
ते । अयंलिखनवृत्तिः कायस्थइति-
ख्यातः । इति भरतः ॥ धनधान्याध्य
क्षताच राजसेवार्थमेवच । द्विजातेः
परिचर्याच दुर्गान्तः पुररक्षणम् ॥
एषा पारशवस्योक्ताऽग्रस्य करणस्यच
। प्रोक्ता उग्रमसा हस्ति वभयत्रसुख
प्रदा ॥ व्रात्यात्क्षत्रियात् सवर्णाया
मुत्पनेभल्लमल्लादिसंज्ञके ॥ यथा ।
भल्लोमल्लश्चराजन्याद्व्रात्यान्निच्छि
विरेवच । नटश्च करणश्चैव खसो-
द्रविडएवचेतिमनो १०ऽध्यायः ॥ वा
नरादौ ॥ किरति कीर्यते ऽनेनवा
। क्लो० । वहुलमन्यत्रापीतिवुच् ।
कृत्यल्युटो वहुलमिति ल्युट् ॥
करणकार्य्यम् । न । इन्द्रियाणाङ्कार्य ॥ आ

करणादिक्रियाणां सकर्मकत्वात् किं कर्म कतिविधञ्चेत्यत आह ॥ कार्य्यञ्चतस्य दशधा हार्य्यं धार्य्यं प्रकाश्यञ्च । तस्य त्रयोदशविधस्य करणस्य दशधाकार्य्यम् । आहार्य्यम् धार्य्यम् प्रकाश्यञ्च । आहार्य्यं व्याप्यम् कर्म्मेन्द्रियाणां वचनादानविहरणोत्सर्गानन्दाः ज्ञानेन्द्रियाणां शब्दस्पर्शरूपरसगन्धमया यथास्वं व्याप्याः । ते च दिव्यादिव्यतया दशधा । एवंधार्य्यमपि अन्तःकरणत्रयस्य प्राणादिलक्षणया वृत्त्या शरीरम् तच्च पार्थिवादि पाञ्चभौतिकम् शब्दादीनां पञ्चानां समूहः पृथिवीति । तेच दिव्यादिव्यतया दशधेति धार्य्यमपि दशधा । एवं बुद्धीन्द्रियाणां प्रकाश्यं दशधेति शब्दादीनां पञ्चानां दिव्यादिव्यभेदात् । करणानाञ्च कार्य्यम् ॥

करणत्राणम् । न । मस्तके ॥

करणव्यापारः । पुं । करणानां व्यापारे ॥ कारकविशेषः करणम् । नच व्यापारावेशं विना कारकत्वमिति व्यापारमाह । तदाहरणधारणप्रकाशकरम् । तत्र कर्म्मेन्द्रियाणि वागादीनि आहरन्ति स्वस्वविषयं यथा स्वमुपाददते स्वव्यापारेण व्याप्नुवन्तीतियावत् । बुद्ध्यहङ्कारमनांसितु स्ववृत्त्या प्राणादिलक्षणया धारयन्ति । बुद्धीन्द्रियाणितु प्रकाशयन्ति ॥

करणाधिपः । पुं । जीवे । हृषीकेशे ॥ श्रोत्रादिचतुर्द्दशेन्द्रियाणामधिपा यथा । श्रोत्रस्य दिक् । त्वचोवातः । चक्षुषः सूर्य्यः । रसनायाः प्रचेताः । घ्राणस्याश्विनौ ॥ वाचो वह्निः । हस्तस्य इन्द्रः । पादस्य विष्णुः । पायोर्मित्रः । उपस्थस्य प्रजापतिः ॥ मनसश्चन्द्रः । बुद्धेश्चतुर्मुखः । अहङ्कारस्य शङ्करः । चित्तस्याच्युत इति ॥

करणाधिपाधिपः । पुं । जीवस्येश्वरे ॥ करणाधिपस्य अधिपः ॥

करणी । स्त्री । वैश्यात् शूद्रायामुत्पन्नायाम् ॥ स्युडन्तात् ङीप् ॥

करणीयः । त्रि । कर्त्तव्ये । कार्य्ये ॥ कृञोऽनीयर् ॥

करण्डः । पुं । मधुकोषे ॥ असौ । खड्गे ॥ कारण्डवे खगे ॥ दलाढके ॥ वंशादिरचिते भाण्डविशेषे । करंडी-करण्डी इतिचभाषा प्रसिद्धे पुष्पादिधारणार्थे भाण्डे ॥ समुद्गे । सम्पुटे ॥ करोति । कृञ् उणा० । अण्डन्कृसृभृवृञ इत्यण्डन् ॥

करण्डा । स्त्री । काचखण्डे । यकृति ॥

करवाली । पुं । मत्स्ये ॥ इत्यमरः ॥

करतलः । पुं । हस्ततले । हथेली इतिभाषा ॥ गुर्वन्त ॥ ऽ चतुर्मात्रे ॥

करतालम् । न । वाद्यविशेषे । खड्ताल इतिभाषा ॥ यथा । शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम् । दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत् ॥ झल्लकं कांस्यनिर्मितकरतालकमिति रघुनन्दनभट्टाचार्य्येण व्याख्यातम् ॥ पुं । डगणे । ।ऽ आदिगुरुत्रिकले ॥

करताली । स्त्री । करतलध्वनौ ॥ तथाच । यथा न स्यादाली कपटकरतालीपटुरवः । इत्युद्भटः ॥ करताल खउताल इतिचभाषा प्रसिद्धे वाद्यविशेषे । करह्यीम् ॥

करतोयम् । न । वर्षोपलजले ॥

करतोया । स्त्री । कामरूपदेशप्रसिद्धनद्याम् । सदानीरायाम् ॥ कर्म्मनाशाजलस्पर्शात् करतोयाविलङ्घनात् । गण्डकीबाहुतरणाद्धर्म्मः क्षयतिकीर्त्तनात् ॥ गौरीविवाहसमये शङ्करकरगलितसम्प्रदानतोयप्रभवत्वात् करस्य तोयम् तदत्रास्ति । अर्शआद्यच् ॥ अपस्मृतिः । मघादौ कर्कटे देवी त्र्यहं गङ्गा रजस्वला । सर्व्वा रक्तवहा नद्यः करतोयाम्बुवाहिनीति ॥

करदीकृतः । त्रि । वशीकृते ॥ करम्भागं ददाति । डुदाञ्० । कः । ततश्च्विः । अकरदः करदः सम्पद्यमानः कृतः करदीकृतः । अस्य च्व्यावितीत्वम् ॥

करद्रुमः । पुं । कारस्करवृक्षे ॥

करपत्रम् । न । क्रकचे । करवत् करात इतिचभाषा ॥ अम्बुक्रीडायाम् ॥ करेण कराद्वा पतति । पतॢ० । सर्व्वधातुभ्यः ष्ट्रन् ॥

करपत्रवान् । पुं । तालतरौ ॥ त्रि । करपत्रयुते ॥ करपत्रमस्यास्ति मतुप् ॥

करपत्रिका । स्त्री । अम्बुलीलायाम् ॥

करपर्णः । पुं । भिण्डीतिप्रसिद्धफलशाकवृक्षे । भिण्डायाम् ॥ रक्तैरण्डे ॥

करपल्लवः । पुं । अङ्गुलौ ॥

करपात्रम् । न । } जलक्रीडायाम् ॥
करपात्रिका । स्त्री । }

करपालः । पुं । खड्गे ॥ करम्पालयति । पालरक्षणे । कर्म्मण्यण् ॥

करपालिका । स्त्री । ह्रस्वे गदाकारे हस्तदण्डे । सोंठा इतिप्रसिद्धे । इतिभरतः ॥ एकधाराखड्गे । इतिस्वामी ॥ ईल्याम् ॥ अण्णन्तान्ङीप् । कन् ॥

करपीडनम् । न । विवाहे ॥

करप्रचेयः । त्रि । पाणिग्राह्ये ॥ करेण

प्रत्यय: ॥

करभ: । पुं । मणिबन्धादाकनिष्ठं करस्य बहिर्भागे ॥ करिशावके ॥ उष्ट्रपुत्रे । बोताइतिभाषा ॥ उष्ट्रे ॥ नखनामगन्धद्रव्ये ॥ कृणाति किरत्यनेन कीर्यते वा । कृविक्षेपे कृञ् हिंसायां वा । कृशृशलिकलिगर्दिभ्योऽभच् ॥ करेभातिवा । भादीप्तौ । सुतिक: ॥

करभकाण्डिका । स्त्री । उष्ट्रकाण्डीवृक्षे ॥

करभञ्जिका । स्त्री । उदकीर्य्ये । करञ्ज्याम् ॥

करभप्रिया । स्त्री । क्षुद्रदुरालभायाम् ॥

करभवल्लभ: । पुं । कपित्थवृक्षे ॥ पीलुवृक्षे ॥

करभादनी । स्त्री । क्षुद्रदुरालभायाम् ॥

करभी । पुं । हस्तिनि ॥

करभी । स्त्री । उष्ट्रयोषायाम् । वाम्याम् ॥

करभीर: । पुं । सिंहे ॥ इतिशब्दरत्नावली ॥

करभूषणम् । न । कङ्कणे ॥ करंभूषयति । करो भूष्यतेऽनेनवा । भूषअलङ्कारे । ल्युट् ॥ हस्ताभरणमात्रे ॥

करभोरू: । स्त्री । उत्तमस्त्रीविशेषणे ॥ करभइव ऊरूयस्या:सा । ऊरूत्तरपदादौपम्ये इत्यूङ् ॥

करमट्ट: । पुं । गुवाकवृक्षे । तन्तुसारे ॥

करमरी । पुं । बंदुआइतिप्रसिद्धे । बन्दिनि ॥ इतित्रिकाण्डशेष: ॥

करमर्द्द: । पुं । करमर्द्दके । करौंदाइतिभाषा ॥ करंमृद्नाति । मृदक्षोदे । कर्मण्यण् ॥ लघुदीर्घफलाभ्यान्तु करमर्द्दद्वयं मतम् । करमर्द्दद्वयं त्वामम्लं गुरु तृषापहम् ॥ उष्णं रुचिकरं प्रोक्तं पित्तरक्तकफप्रदम् । तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित् ॥

करमर्द्दक: । पुं । कृष्णपाकफले । करौंदाइतिभाषा । सुषेणे । अविग्ने ॥ करमर्द्द एव । स्वार्थेकन् ॥

करमर्द्दिका । स्त्री । वनकरमर्द्दके ॥ करमर्द्दोल्लघुफला सा ज्ञेया करमर्द्दिका ॥

करमर्द्दी । पुं । करञ्जवृक्षे ॥

करमर्द्दी । स्त्री । करमर्द्दकवृक्षे ॥

करमाल: । पुं । खतमाले । धूमे ॥ इतिहेमचन्द्र: ॥

करमाला । स्त्री । करपर्वरूपमालायाम् ॥

करमुक्तम् । न । बरछी भाला इतिभाषाप्रसिद्धे अस्त्रविशेषे ॥

करम्ब: । त्रि । व्यामिश्रे । मिश्रिते ॥ करोति । डुकृञ् । कृकदिकडीभ्य म्बच् ॥

करम्बित: । त्रि । सम्पृक्ते । मिश्रिते ॥

करम्भ: । पुं । दधिमिश्रितसक्तुषु ॥ केन जलेन रभ्यते मिश्रीक्रियते । केन वायुना वा रभ्यते । रभिरनेकार्थः । अकर्त्तरिचेति घञ् । रभेरशब्लिटोरितिनुम् ॥

करम्भकम् । न । कर्कसारे । करम्भे ॥

करम्भा । स्त्री । प्रियङ्गौ ॥ शतावर्य्याम् ॥

कररुह: । पुं । नखे ॥ करेरोहति । कहेरिगुपधेति क: ॥

करर्द्धि: । स्त्री । करताल्याम् ॥ करसम्पद्धि ॥ करस्य ऋद्धि: ।

करवाल: । पुं । कृपाणे ॥ करंवलति । करेण वलति वा । वलप्राणने । कर्मण्यण् । ज्वलादिभ्योणो वा । यद्वा । वलनंवाल: । वलवेष्टने । घञ् । करेवालोस्य करेण वल्यते वा । कर्मणि घञ् ॥

करवालिका । स्त्री । ईल्याम् । करपालिकायाम् ॥ करंवलते । वलहिंसादानयो: । अण् । करेण वाल्यते वा । णिजन्तादच्च: । कन् ॥

करवी । स्त्री । हिङ्गुपत्रे ॥

करवीर: । पुं । कृपाणे । खड्गे ॥ दैत्यविशेषे ॥ ब्रह्मावर्त्ते दृषद्वतीनदीतीरे चन्द्रशेखरराजपुरे ॥ श्मशाने ॥ विषप्रभेदे । करवीरमूले ॥ कनेर इतिप्रसिद्धे वृक्षे । प्रतिहासे । हयमारके ॥ करवीरद्वयंतिक्तं कषायं कटुकञ्च तत् । व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम् ॥ वीर्योष्णं कृमिकण्डूघ्नं भक्षितं विषवन्मतम् ॥ रक्तश्वेतप्रभेदेन करवीरद्वयं मतम् ॥ करं वीरयति । वीरविक्रान्तौ । कर्मण्यण् ॥ न । अस्यपुष्पे ॥ करवीरस्य विकारो वा पुष्पम् । पुष्पमूलेषु बहुलमित्यणो लुक् ॥

करवीरक: । पुं । अर्जुनवृक्षे ॥ करवीरार्थे ॥

करवीरकन्दसंज्ञ: । पुं । तैलकन्दे ॥

करवीरभूषा । स्त्री । आढक्याम् । अरहड इतिभाषा ॥

करवीरी । स्त्री । अदितौ । देवमातरि ॥ सद्गव्याम् । श्रेष्ठगव्याम् ॥ पुत्रवत्याम् ॥

करशाखा । स्त्री । अङ्गुलौ ॥ करस्यशाखाइव ।

करशीकर: । पुं । वमथौ । हस्तिशुण्डानिर्गतेजलकणे ॥ करस्यशीकर: ॥

करशूक: । पुं । नखे ॥ इतित्रिकाण्डशेष: ॥

करसूत्रम् । न । विवाहादौ मङ्गलार्थं मृणालादिमये हस्तसूत्रे ॥ ग्रामादौमणिबन्धसूत्रंतूपचारात् ॥

करहाटः । पुं । पद्मादिमूले । शिफाकन्दे ॥ मदनद्रुमे ॥ पद्मापिण्डीतरौ ॥ देशविशेषे ॥ करंहाटयति । हट दीप्तौ । णयन्तः । कर्मण्यण् ॥

करहाटकः । पुं । मदनपादपे । मयनफल इति भाषा ॥ स्वार्थे कन् ॥ न । हस्तसम्बन्धिस्वर्णे ॥

करटः । त्रि । विकटे । भयानके ॥

करामर्दः । पुं । करमर्दे ॥

कराम्बुकः । पुं । अविघ्ने । सुषेणे ॥

कराम्लकः । पुं । करमर्दे ॥

करायिका । स्त्री । कूटपूर्य्याम् । करांची इति गुडसल इति च भाषा ॥

करारोटः । पुं । अङ्गुरीयके ॥

करालः । पुं । गर्जनतैल इति गौड-भाषाप्रसिद्धे सर्जरसयुक्ततैले । धूनतैले ॥ भल्लाततैले ॥ राक्षसविशेषे ॥ दन्तरोगविशेषे । यथा । शनैः शनैः प्रकुरुते वायुर्दन्तसमाश्रितः । करालान् विकृतान् दन्तान् करालो न स सिध्यति ॥ न । कृष्णकुठेरके । श्यामतुलसी इति भाषा ॥ वेसवारप्रभेदे ॥ यथा । तस्मिन्नेव पचेत् पूर्वं वेसवारकसंज्ञकम् । पाकप्रापितसौरभ्यं करालं सूदके मतमिति ॥ त्रि । दन्तुरे ॥ तुङ्गे । उच्चे ॥ विकृते । भीषणे ॥ करेण लाति

। ला० । आतश्चोपसर्गे इति सुपीति योगविभागाद्वा कः ॥ यद्वा । अलम्भूषणादौ । कर्मण्यण् ॥

करालकः । पुं । करालार्थे ॥

करालत्रिपुटा । स्त्री । काङ्क्षिकायाम् । लङ्काधान्ये ॥

कराला । स्त्री । शारिवायाम् ॥

करालास्यः । त्रि । दन्तुरवदने ॥ करालं दन्तुरमास्यं यस्य ॥

करालिकः । पुं । वृक्षे ॥ इति हेमचन्द्रः ॥

करालितः । त्रि । भीषिते । पीडिते ॥

कराली । स्त्री । वह्नेः सप्तजिह्वान्तर्गतजिह्वाविशेषे ॥ देवीविशेषे ॥ बह्वादिभ्यश्चेति पाक्षिको ङीष् ॥

करास्फोटः । पुं । आस्फोटिते । वक्षस्यस्य बाहो द्वितीयहस्तेनताडने ॥

करिकः । पुं । अरिमेदवृक्षे । विटखदिरे ॥

करिकणावल्ली । स्त्री । चविकावृक्षे ॥

करिका । स्त्री । नखव्रणे ॥ करिका नखरेखिकेति वैजयन्ती ॥

करिकुसुम्भः । पुं । नागकेशरचूर्णके ॥

करिगर्ज्जितम् । न । बृंहिते । हस्तिगर्जने ॥

करिणी । स्त्री । देवताभेदे ॥ धेनुकायाम् । हस्तिन्याम् ॥ इन्नन्तत्वात् ऋन्नेभ्यो ङीप् ॥

करिदारकः । पुं । सिंहे ॥

करी । पुं । हस्तिनि ॥ करः शुण्डा अस्ति अस्य । इनिः ॥ लक्ष्मीकामो युद्धादन्यत्र करिवधं न कुर्यात् इयं हि श्रीर्यत्करिणः इति चाक्षुषः ॥

करिनासिका । स्त्री । यन्त्रविशेषे ॥

करिपत्रम् । न । तालीशपत्रे ॥

करिपिप्पली । स्त्री । गजपिप्पल्याम् । चविकाफले ॥ करीव पिप्पली इव स्थूलत्वात् ॥

करिपोतः । पुं । करिशावके ॥

करिबन्धः । पुं । प्रारब्धौ । गजबन्धनस्तम्भे ॥ इति हारावली ॥

करिमाचलः । पुं । सिंहे ।

करिमुखः । पुं । गणेशे । विनायके ॥ करिणो मुखमिव मुखमस्य ॥

करिरतम् । न । रतबन्धान्तरे ॥ भुग्नस्तनभुजास्यमस्तका मुन्नतां स्वयमधोमुखीं स्त्रियम् । क्रामति स्वकरकृष्टमेहने वल्लभे करिरतं तदुच्यते ॥ करिपदमिति पाठान्तरम् ॥

करिशावकः । पुं । कलभे । हस्तिशिशौ ॥ करिणः शावकः ॥

करिष्ठः । त्रि । अतिशयेन कर्त्तरि ॥ अतिशायने इष्ठन् । तुरिष्ठेमेयस्सु ॥

करिस्कन्धः । पुं । करीणां समूहे ॥ न दकरितुरगाणां स्कन्धश्च ॥ गजांसे ॥

करीरः । पुं । घटे ॥ ककरे । ग्रन्थिले । करील इति भाषाप्रसिद्धे वृक्षे ॥ करीरः कटुकस्तिक्तः स्वेदुष्णो भेदनः स्मृतः । दुर्नामकफवातामगरशोथव्रणप्रणुत् ॥ पुं । न । वंशाङ्कुरे ॥ कृणाति किरति कीर्यते वा । कृ हिंसायाम् कृ विक्षेपे वा । कृशॄपॄकटीति ईरन् ॥ करिणमीरयति वा । ईर० । कर्मण्यण् ॥

करीरफलम् । न । कारीरे । टींट इति ख्याते ॥

करीरा । स्त्री । हस्तिदन्तमूले ॥ चीरिकायाम् । झिल्ल्याम् । झींगुर इति भाषा । बनझींगर नींदरा इति च ख्याते कीटे ॥ अजाद्यतष्टाप् ॥

करीरिका । स्त्री । } दन्तिनां दन्तमूले ॥
करीरी । स्त्री । } चीरिकायाम् ॥

करीषः । पुं । न । शुष्कगोमये । छगणे । कण्डा करसी इति भाषा ॥ कीर्यते । कृ विक्षेपे । कॄतॄभ्यामीषन् ॥

करीषङ्कषा । स्त्री । वात्यायाम् ॥ करीषं कषति । कष हिंसायाम् । सर्वकूलाभ्रकरीषेषु कषः इति कषेः खच् । मुमागमः ॥

करीषाग्निः । पुं । छागणे । गोमयानले ॥

करया: । पुं । करणा नींबू इति भाषाप्र

सिद्धे वृत्तविशेषे ॥ शृङ्गाराद्यष्टरसान्तर्गततृतीये रसे । इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ॥ बुद्धभेदे ॥ सर्वभूताभयदातरि परमहंसपरिव्राजके ॥ त्रि । दीने ॥ सदये । दुःखितेषु दया करुणा तद्वति ॥ अर्श आद्यच् ॥ करोति मनः । डुकृञ् । कृवृदारिभ्य उनन् ॥

करुणमल्ली । स्त्री । नवमल्लिकायाम् ॥

करुणविप्रलम्भः । पुं । पूर्वरागादिचतुर्भेदविप्रलम्भशृङ्गारमध्ये विप्रलम्भविशेषे ॥

करुणा । स्त्री । कृपायाम् । दयायाम् । परदुःखहानीच्छायाम् ॥ दुःखितेषु कथन्नु नामैषां दुःखनिवृत्तिः स्यादिति कृपामेव भावये नोपेक्षां न वाहर्षम् ॥ करणम् । कृवृदारिभ्य उनन् । टाप् ॥

करुणापरः । त्रि । दयालौ । महते ॥

करुणामयः । त्रि । कृपाप्राचुर्यवति ॥

करुणी । स्त्री । ग्रीष्मपुष्प्याम् । रक्तपुष्प्याम् । ककरखिरुणी इति कोकण भाषा ॥

करूषः । पुं । देशविशेषे ॥

करेटः । पुं । नखे ॥

करेटव्या । स्त्री । धनञ्चूपचिचिणि ॥

करेटुः । पुं । स्त्री । कर्करेटौ । करकटिया इति गौडभाषाप्रसिद्धे विहगे ॥ के जले वायौ वा रेटति । रेटृ भाषणे । मृ० कुः ॥

करेणुः । पुं । इभे । मतङ्गजे । गजे ॥ कर्णिकारवृक्षे ॥ स्त्री । हस्तिन्याम् ॥ करोति । कृहृभ्यामेणुः ॥ के रेणुरस्येति वा ॥

करेणुभूः । पुं । पालकाप्यमुनौ ॥

करेणुसुतः पुं । मुनिविशेषे ॥ इभशावके । कलभे ॥ करेणोः सुतः ॥

करेन्दुकः । पुं । भूतृणे ॥

करेवरः । पुं । तुरुष्के । सिह्लके ॥

करोटः । पुं, न । शिरोस्थनि ॥ कं वायुं रोटते । रुट० । अच् ॥

करोटिः । स्त्री । शिरोस्थि ॥ कं वायुं रोटते । रुट दीप्तौ प्रतिघाते च । केन रुध्यते वा । इन् ॥ रोटयति वा । रुटि चुरादिः । अच इः ॥

करोटिका । स्त्री । शिरोस्थि । कपाले ॥ करोटिरेव । स्वार्थे कन् ॥

करोटी । स्त्री । करोटौ ॥ ङीष् ॥

कर्कः । पुं । कर्केतने ॥ वह्नौ ॥ शुक्लाश्वे ॥ दर्पणे ॥ घटे ॥ चतुर्थराशौ ॥ कर्कटवृक्षे ॥ कुलीरे ॥ करोति कृणोति क्रियते वा । कृदाधारार्चिकलिभ्यः कः ॥

कर्कचिर्भिटी । स्त्री । चिर्भिटायाम् ।

कर्कटीभेदे ॥

कर्क्कटः । पुं । वृक्षविशेषे । क्षुद्रामलकसञ्ज्ञे । कर्कफले ॥ पक्षिविं० । कर्करेटौ ॥ जलजन्तुविशेषे । कुलीरे । काँकडा इतिभाषा ॥ मेषादिराश्यन्तर्गतचतुर्थराशौ ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् । श्रुतकलामलनिर्मलवृत्तयः सुकृशगन्धजलाशयकेलयः । किल नरास्तु कुलीरगते विधौ वसुमतः सुमतोऽर्थिलब्धयः ॥ कर्किलग्ने समुत्पन्नो भोगी सर्वजनप्रियः । मिष्टान्नपानभोगी च जायते स्वजनप्रियः ॥ वालुक्याम् ॥ शाल्मलीफले ॥ स्त्रीणांकरणे ॥ कृणाति । कृहिं० । अन्येभ्योपीतिविच् । कटति । कटे० । पचाद्यच् । कर् चासौकटश्च । अहरादित्वाद्रेफः ॥ कर्कइति सौत्रोधातुः । शकादिभ्योटन्वा ॥ कर्कं श्वेतवर्णं टलति । टलगतौ । डो वा ॥

कर्क्कटकः । पुं । वृक्षविशेषे ॥ कुलीरे ॥ कर्कटएव । स्वार्थे कन् ॥

कर्क्कटशृङ्गिका । स्त्री । } अजशृङ्ग्याम्
कर्क्कटशृङ्गी । स्त्री । } ॥ महाघोषायाम् । कुलीरशृङ्ग्याम् । काँकडा सीगी इतिख्यातायाम् ॥

कर्क्कटाख्या । स्त्री । कर्कटशृङ्ग्याम् ॥

कर्क्कटाधिपः । पुं । चन्द्रे ॥

कर्क्कटाह्वः । पुं । विल्ववृक्षे ॥

कर्क्कटाह्वा । स्त्री । कर्कटशृङ्ग्याम् ॥

कर्क्कटिः । स्त्री । वालुक्याम् । इर्वारौ ॥ शाल्मलीफले ॥ कर् कटति । कटे० । सर्वधातुभ्यइन् । शकन्ध्वादिषु पररूपं वाच्यम् ॥

कर्क्कटिनी । स्त्री । दारुहरिद्रायाम् ॥

कर्क्कटी । स्त्री । एर्वारौ । वालुक्याम् । ककडी इतिभाषा ॥ कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः । रुच्या पित्तहरा सामा पक्वा मन्दाग्निपित्तकृत ॥ अस्याः पाकप्रकारस्तु । त्वग्बीजरहिता प्रौढा गुलिकाकारखण्डिता । तक्रसिक्ता सुष्टते तप्तेकर्कटीषाप्रलेह्यिता ॥ विपाण्डुखण्डंघृतदुग्धसार्द्धं विभावितंवक्षजशर्कराभ्याम् । कृतैलवासञ्चकदुष्णमेतत् प्रतिच्चणां रोचनमातनोति ॥ शाल्मलीफले ॥ देवदालीलतायाम् ॥ कर्कटशृङ्गीवृक्षे ॥ घोटिकावृक्षे ॥ करङ्कटति । कटे० । इन् । पक्षेङीष् । शकन्ध्वादिः ॥

कर्क्कटुः । पुं । करेटुपक्षिणि ॥

कर्क्कन्धूः । पुं । स्त्री । कोलिपादपे । बदरीवृक्षे ॥ बदरीफले । वेर इतिभाषा । कर्कन्धूः क्षुद्रबदरं कथितम्

पूर्व्वसूरिभिः । अम्लं स्यात् चुद्रबदरं कषायं मधुरं मनाक् । स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् । शुष्कं भेदग्निकृत् सर्व्वं लघु तृष्णाक्लमास्रजित् ॥ देश्यान्तरे ॥ कर्कटकं दधाति । डुधाञ्० । अन्दूदृन्भूजम्बिति निपातितः कू प्रत्ययान्तः । कर्कं ददाति वा । निपातनान्नुम् ॥

कर्क्करः । पुं । दर्पणे । मुकुरे ॥ न । चूर्णाञ्जनकचुद्रपाषाणखण्डे । चूर्णखण्डे । कङ्कर काँकर इतिच भाषा ॥ मुद्गरे ॥ त्रि । कठिने । दृढे ॥ कर्कनम् । कर्कहासे । घञ् । कर्कं राति । रा० । आतोनुपेति कः ॥

कर्क्कराङ्गः । पुं । कालकण्ठविहङ्गमे । खञ्जने ॥

कर्क्कराटुः । पुं । कटाक्षे ॥ इतिकश्चित् जटाधरः ॥

कर्क्कराटुकः । पुं । कर्क्करेटुपक्षिणि ॥

कर्क्करान्धुकः । पुं । अन्धकूपे ॥

कर्क्करालः । पुं । चूर्णकुन्तले ॥

कर्क्करिका । स्त्री । घर्षे । नेत्रखर्ज्वाम् ॥

कर्क्करी । स्त्री । गलन्तिकायाम् । सनालजलपात्रे । झारी इति भाषा ॥ कठिनायाम् ॥ कन्दोद्धृतपक्वनिष्का समसाधने । झाँझा झारा इति च भाषा ॥ गौरादित्वात् ङीष् ।

कर्क्करीका । स्त्री । गलन्तिकायाम् । कर्क्कर्याम् ॥ फर्फरीकादित्वात् साधुः ॥

कर्क्करेटम् । न । अर्द्धचन्द्रे । अङ्गुलितोरणे । गलेहस्ताधाने ॥

कर्क्करेटुः । पुं । करेटौ । करकठिया-इति गौडभाषा प्रसिद्धे खगे ॥ कर्क्केतिरेटति । रेटृभाषणे । मृगय्वादिः ॥

कर्क्कशः । पुं । काम्पिल्लवृक्षे ॥ कासमर्द्दे ॥ इक्षौ ॥ खड्गे ॥ त्रि । साहसिके ॥ क्रूरे ॥ दृढे ॥ असमृणे । खरस्पर्शे । दुस्पर्शे ॥ निर्द्दये ॥ कृणोति । कृञ् हिंसायाम् । अन्येष्वपीतिविच् । कशति । कशशब्दे । पचाद्यच् । कर् चासौ कशश्च ॥ यद्वा । करे कशति । कशः पचाद्यच् । अन्तर्भावितण्यर्थो वा ॥ शकन्ध्वादिः । कर्कान्मत्वर्थे लोमादित्वात् शो वा ॥

कर्क्कशच्छदः । पुं । शाखोटवृक्षे ॥ पटोले ॥

कर्क्कशच्छदा । स्त्री । कोशातक्याम् । तोरञ्जी इतिभाषा ॥ दग्धरुहायाम् ॥

कर्क्कशदलः । पुं । पटोले ॥

कर्क्कशदला । स्त्री । दुग्धाह्वे ॥

कर्क्कशवाक्यम् । न । निष्ठुरवचने । परुषवाचि ॥

कर्कशा । स्त्री । वृश्चिकालीवृक्षे ॥ क्रूरायाम् ॥

कर्कसारम् । न । करम्भे । दधिसक्तुषु ॥

कर्कारुः । पुं । कुष्माण्डे ॥ स्त्री । कुष्माण्ड्याम् ॥ कर्कारुर्ग्राहिणी शीता रक्तपित्तहरा गुरुः । पक्वा तिक्ताग्निजननी सक्षारा कफवातनुत् ॥ कर्कं शुक्लवर्णम् ऋच्छति । ऋ गतौ । बाहुलकादुण् ॥

कर्कारुकः । पुं । कालिङ्गवृक्षे ॥

कर्कारूः । स्त्री । कुष्माण्ड्याम् ॥

कर्किः । पुं । कर्कटराशौ ॥

कर्की । पुं । कर्कटे ॥

कर्केतनः । पुं । न । रत्नविशेषे ॥ अस्योत्पत्त्यादिकम् गारुडे ७५ ध्याये । सूत उवाच । वायुर्नखान् दैत्यपतेर्गृहीत्वा चिक्षेप सम्यग्यवनेषु हृष्टः । ततः प्रसूतं पवनोपपन्नं कर्केतनं पूज्यतमं पृथिव्याम् ॥ वर्णेन तद्रुधिरसोममधुप्रकाशमाताम्रपीतदहनोज्ज्वलितं विभाति । नीलं पुनः खलुसितं परुषं विभिन्नं व्याध्यादिदोषकरणेन न तद् विभाति ॥ स्निग्धा विशुद्धाः समरागिणश्च आपीतवर्णा गुरवो विचित्राः । त्रासव्रणव्याधि विवर्जिताश्च कर्केतनास्ते परमाः पवित्राः ॥ पत्रेण काञ्चनमयेन तु वेष्टयित्वा हस्ते गले ऽथ धृतमेतदति प्रकाशम् । रोगप्रणाशनकरं कलिनाशनञ्च आयुष्करं कुलकरञ्च सुखप्रदञ्च ॥ एवंविधं बहुगुणं मणिमावहन्ति कर्केतनं शुभमलङ्कृतये नरा ये । ते पूजिता बहुधना बहुबान्धवाश्च नित्योज्ज्वलाः प्रमुदिता अपि ते भवन्ति ॥ एकेऽपनह्य विकृताकुलनीलभासः प्रम्लानरागखलिताः कलुषा विरूपाः । तेजोऽतिदीप्तिकुलपुष्टिविहीनवर्णाः कर्केतनस्य सदृशं वपुरुद्वहन्ति ॥ कर्केतनं यदि परीक्षित वर्णरूपं प्रत्ययप्रभास्वरदिवाकरसुप्रकाशम् । तस्योत्तमस्य मणिशास्त्रविदां महिम्ना तुल्यन्तु मूल्यमुदितं तुलितस्य कार्य्यमिति ॥

कर्कोटः । पुं । नागराजविशेषे ॥

कर्कोटकः । पुं । विल्ववृक्षे ॥ वृक्षौ ॥ काँकरोल इति गौडभाषाप्रसिद्धे फललताविशेषे । किलासघ्ने । तिक्तपत्रे ॥ काद्रवेये । कर्कोटको नाम सर्पो येऽदृष्टीविषउच्यते । तस्य सर्पस्य सर्पत्वं तस्मै सर्पनमोऽस्तु ते । इतिश्रुति प्रसिद्धे नागराजे ॥ अपिच । कर्कोटकस्य नागस्य दमयन्त्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनमिति ॥

कर्कोटकी । स्त्री । पीतघोषायाम् । महाजाल्याम् । खेखसा इति ख्याते फले ॥ कर्कोटकीफलं कुष्ठहृल्लासारुचिनाशनम् । श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम् ॥ ईषद्भिन्नमरिचैः परिपूर्णगर्भं तैलेन रन्धितमुसैन्धवपातयोगम् । वार्त्ताकयुक्तपयसा विहिताभिषेकं कर्कोटकीफलमिदं रुचिकृत्तदुक्तम् ॥

कर्कोटिका । स्त्री । ककोडा इतिभाषा प्रसिद्धे । कर्कोटके । कूष्माण्ड्याम् ॥

कर्कोटी । स्त्री । कर्कोटिकायाम् ॥

कर्चरिका । स्त्री । कचौरीतिख्याते पिष्टकप्रभेदे ॥ इतिपाकराजेश्वरः ॥

कर्चरी । स्त्री । कचरीतिख्यातेफले ॥ चीराज्यकृतसंस्कारा शुष्का सर्वविपाचिता । अरोचकादिरोगाणां कर्चरी कण्ठकर्त्तरी ॥ कर्चरी रुचिकृद्बल्या सुस्वादुरतिलेखनी । उष्णा पित्तकरी प्रोक्ताकफ कृत् सारिका स्मृता ॥

कर्चूरः । पुं । कचूर इतिभाषा प्रसिद्धे गन्धसारे । द्राविडे ॥ कर्चूरो दीपनो रुच्यः कटुकस्तिक्त एवच । सुगन्धिः कटुपाकः स्यात् कुष्ठार्शो व्रणकासनुत् ॥ उष्णो लघुर्हरेच्छ्वासगुल्मवातकफ क्रिमीन् ॥ मध्याम् ॥

न । स्वर्णे ॥ कर्जति । कर्जव्यथने । खर्जूरादित्वादूरः । पृ० ॥

कर्चूरकः । पुं । द्राविडके । कचूर इति भाषा ॥ स्वार्थे कन् ॥

कर्णः । पुं । पृथायाज्येष्ठसुते । वसुषेणे । चम्पापतौ ॥ सुवर्णालिहृक्षे ॥ श्रवणेन्द्रिये । श्रोत्रे ॥ गुरुयुगले ऽऽ ॥ अरित्रे ॥ कीर्यते शब्दग्रहणाय क्षिप्यते यद्वा कीर्यते शब्दो ऽस्मिन् किरतिशरीरे सुखं वा । कृविक्षेपे । कृवृजसीतिनन् । बाहुलकात् गुणः ॥ यद्वा । कर्णयति । कर्णभेदने । अदन्तः । अच् ॥ यद्वा । करोति शब्दज्ञानम् । डुकृञ्० । कृवृइत्यादिना नन् ॥

कर्णकण्डुः । पुं । कर्णरोगविशेषे ॥ तस्यनिदानं यथा । मारुतः कफसंयुक्तः कर्णकण्डुं करोतिचेति ॥

कर्णकीटी । स्त्री । कर्णजलौकायाम् । शतपद्याम् । कानसलाई इतिभाषा ॥

कर्णक्ष्वेडः । पुं । कर्णरोगविशेषे ॥ वायुः पित्तादिभिर्युक्तो वेणुघोषसमं स्वनम् । करोतिकर्णयोः क्ष्वेडंकर्णक्ष्वेडः सउच्यते ॥ इति माधवः ॥

कर्णगूथम् । न । कर्णमले ॥ कर्णगूथकम् ॥

कर्णगूथकः । पुं । कर्णरोगविशेषे ॥ पित्तोष्मशोषितः श्लेष्मा जायते कर्णगूथकस्त्वस्य निदानम् ॥

कर्णचापः । पुं । कालपृष्ठाख्यधनुषि ॥ कर्णस्य राधेयस्य चापः ॥

कर्णजलौकः । पुं । शतपद्याम् । गोजर कानखजूरा इतिभाषा ॥

कर्णजलौका । स्त्री । शतपद्याम् । चित्राङ्ग्याम् । कानसलाई इतिभाषा ॥

कर्णजाहम् । न । कर्णस्यमूले ॥ तस्य पाकमूलइत्यादिना जाहच् प्र० ॥

कर्णजित् । पुं । अर्जुने । गुडाकेशे ॥ कर्णं जयति । जि० । सत्सूद्विषेत्यादिनाक्विप् । तुक् ॥

कर्णदर्पणः । पुं । ताडङ्कनामनि कर्णभूषणे । कानतडङ्का इतिभाषा ॥

कर्णदुन्दुभिः । स्त्री । शतपद्याम् ॥

कर्णधारः । पुं । नाविके । काण्डारि इतिगौडभाषा । मल्लाह मांझी इति भाषा ॥ कर्णमरित्रम् धरति । धृञ् ० । कर्मण्यण् ॥

कर्णपाली । स्त्री । कर्णभूषणे । कान्वाला वाली इत्यादिभाषा प्रसिद्ध ॥ कर्णपालिप्रदेशयोः ॥

कर्णपिशाची । स्त्री । देवीविशेषे ॥

कर्णपूः । स्त्री । कर्णपुरे । चम्पायाम् ॥

कर्णपुरम् । न । चम्पानगर्याम् । मालिन्याम् ॥

कर्णपुष्पः । पुं । मोरटलतायाम् ॥

कर्णपूरः । पुं । शिरीषवृक्षे ॥ नीलोत्पले ॥ अवतंसे । कर्णाभरणे ॥ अशोकवृक्षे ॥ कर्णम्पूरयति । पूरी० । कर्मण्यण् ॥

कर्णपूरकः । पुं । कदम्बवृक्षे ॥ न । शिरीषे ॥ नीलोत्पले ॥ वतंसे ॥

कर्णप्रतिनाहः । पुं । कर्णरोगविशेषे ॥ तस्य सम्प्राप्तिरूपे यथा । सकर्णगूथो द्रवतां यदा गतो विलायितो घ्राणमुखम्प्रपद्यते । तदा स कर्णप्रतिनाहसंज्ञितो भवेद्विकारः शिरसोऽर्द्धभेद कृदिति ॥

कर्णफलः । पुं । कामखि माछ् इति गौड प्रसिद्ध मत्स्यविशेषे ॥

कर्णभूषणम् । न । कर्णाभरणे ॥

कर्णमलम् । न । कर्णगूथे ॥

कर्णमुकुरः । पुं । ताटङ्कनाम्नि कर्णभूषणे ॥

कर्णमोटिका । स्त्री । } चामुण्डादेव्याम् ॥
कर्णमोटी । स्त्री । }

कर्णरोगः । पुं । श्रोत्रव्याधौ ॥

कर्णलतिका । स्त्री । पाल्याम् । कानकापत्ता इति भाषा इतिहेमचन्द्रः ॥

कर्णवंशः । पुं । मञ्चे ॥ इतिहारावली ॥

कर्णवर्जितः । पुं । सर्पे ॥ त्रि । बधिरे ॥

कर्णवेधः । पुं । कर्णषटकदोषनिवारणार्थं कर्णयोर्वेधने ॥ सोदरभ्रातृणां संस्काराणाञ्च पौर्वापर्यक्रमः । कर्णवेधस्याऽसंस्कारत्वात् न तथा नियमः । यथा । यद्यपत्यद्वयं तिष्ठेत् सम्भवोप्यपरस्य च । कर्णषट्कं विजानीयाद्गर्हितं तत्र त्रयस्य च ॥ इत्याशङ्क्य तयोर्मध्ये शुद्धिर्यस्य च वत्सरे । कर्णवेधोचितस्तस्य नात्र ज्येष्ठविचारणा ॥ षट्कर्णोत्पत्तिमाशङ्क्य भानोः शुद्धासमेपि च । कर्णे वेध्ये न दोषः स्यादन्यथा मरणम्भवेत् ॥ इतिमाण्डव्यः ॥

कर्णवेधनी । स्त्री । हस्तिकर्णवेधनास्त्रे । कर्णारायाम् ॥ इतित्रिकाण्डशेषः ॥

कर्णवेष्टः । पुं ।
कर्णवेष्टकम् । न ।
कर्णवेष्टनम् । न । } कुण्डले ॥ कर्णस्य वेष्टनम् ॥

कर्णशष्कुली । स्त्री । वेष्टने । कर्णगोलके ॥ कर्णमध्यवर्त्त्याकाशे ॥

कर्णशूलः । पुं । कर्णरोगविशेषे ॥

कर्णसंस्रावः । पुं । कर्णरोगविशेषे ॥ तस्य निदानसम्प्राप्तिरूपाणि यथा । शिरोभिघातादथवा निमज्जतो जले प्रपाकादथवापि विद्रधेः । स्रवेद्धि पूयं श्रवणोऽनिलार्दितः स कर्णसंस्राव इति प्रकीर्त्तित इतिमाधवः ॥

कर्णस्फोटा । स्त्री । कानफाटा इति गौड भाषा प्रसिद्ध लताविशेषे । कृष्णतण्डुलायाम् ॥

कर्णाटः । पुं । देशविशेषे ॥ यथा । रामनाथं समारभ्य श्रीरङ्गान्तं विलेश्वरि । कर्णाटदेशो देवेशि साम्राज्यभोगदायकः ॥ इतिशक्तिसङ्गमतन्त्रम् ॥

कर्णाटी । स्त्री । रागिणीविशेषे । मालवरागस्य भार्याम् ॥ हंसपदीवृक्षे ॥

कर्णानुजः । पुं । युधिष्ठिरे नृपे । अजातशत्रौ । कर्णस्य अनुजः ॥

कर्णान्दुः । स्त्री । कर्णपाल्याम् । कानतड्का इति भाषा ॥ उत्तंसिकायाम् । कानकडा इतिगौडभाषा प्रसिद्ध कर्णाभरणविशेषे ॥

कर्णान्दूः । स्त्री । कर्णपाल्याम् ॥

कर्णाभरणकः । पुं । आरग्वधवृक्षे ॥

कर्णारा । स्त्री । नाल्याम् । कर्णवेधन्याम् ॥

कर्णारिः । पुं । अर्जुनपाण्डवे ॥ नदीसर्जवृक्षे ॥

कर्णास्फालः । पुं । करिणः कर्णचालने । भालम्भकशायाम् ॥

कर्णिः । पुं । कर्ण्याकारफलके बाणे ॥

कर्णिक: । त्रि । कर्णिले ॥ विवृद्धौ कर्णौ यस्य । तुन्दादिषु स्वाङ्गाद्विवृद्धावितिठन् ॥

कर्णिका । स्त्री । करिहस्ताग्रे । पुष्करे ॥ करमध्याङ्गुलौ ॥ क्रमुकादिच्छटांशे । बोँटा इतिगौड भाषा ॥ पद्मवराटे । बीजकोषे ॥ कर्णाभरणविशेषे । तालपत्रे । ढेढी इतिभा ॥ लेखन्याम् ॥ कुट्टन्याम् ॥ अग्निमन्थवृक्षे ॥ अजशृङ्गीवृक्षे ॥ कर्णस्यालङ्कार: कर्णभवो लङ्कारो वा । कर्णललाटादितिकन् ॥

कर्णिकाचल: । पुं ।
कर्णिकाद्रि: । पुं । } सुमेरुपर्वते ॥

कर्णिकार: । पुं । आरग्वधविशेषे । प्रग्रहे । कृतमालके । छोटा धनबहेडा इतिभाषा ॥ कर्णिकार: कटुस्तिक्तस्तुवर: शोधनो लघु: । रञ्जन: सुखद: शोथश्लेष्मास्रव्रणकुष्ठजित् ॥ द्रुमोत्पले । कणियार इतिगौडभाषा ॥ कर्णिकामियर्त्ति । ऋगतौ । कर्मण्यण् ॥

कर्णिकारक: । पुं । द्रुमोत्पले ॥ कृतमाले । सुवर्णके ॥ स्वार्थे क: ॥

कर्णिकी । पुं । हस्तिनि ॥ न । अम्बुजे ॥ कर्णिका अस्ति अस्य । व्री० इनि: ॥

कर्णी । पुं । वर्षपर्वतसप्तकान्तर्गतपर्वतविशेषे ॥ आरग्वधे ॥ कर्णिके ॥ विवृद्धौ कर्णौ यस्य । तुन्दादिभ्य इलच्चेति चकारादिनि: ॥

कर्णिल: । पुं । कर्णिनि । कर्णिके ॥ विवृद्धौ कर्णौ यस्य । तुन्दादित्वात् पक्षे इलच् ॥

कर्णीरथ: । पुं । स्कन्धवाह्ययाने । प्रवहणे । खर्करिया चौपाला डोला पालकी तामयान इत्यादि भाषा प्रसिद्धे ॥ कर्णसाध्या श्रवणक्रिया उपचारात् कर्ण: । कर्णोऽस्यास्ति । इनि: । कर्णी चासौ रथश्च । शब्दमात्रेणारयो भवतु तोरथ: ॥ यद्वा । सामीप्यात् कर्णशब्देन स्कन्धो लक्ष्यते । सोऽस्त्यस्य वाहकत्वेन । इनि: । कर्णी चासौ रथश्च । अन्येषामपीति दीर्घ: ॥

कर्णीवान् । पुं । आरग्वधे ॥

कर्णीसुत: । पुं । कंसासुरे । मूलदेवे ॥

कर्णेजप: । त्रि । सूचके । पिशुने । दुर्जने । खले ॥ कर्णे जपति । जप० । स्तम्बकर्णयोरित्यच् । हलदन्तादित्यलुक् ॥

कर्णेन्दु: । पुं । उत्तंसिकायाम् । अर्द्धचन्द्राकृतिकर्णाभरणे ॥ कर्णपाल्याम् ॥

कर्त्तनम् । त्रि । कर्त्तिते ॥ कर्त्तकोचित

म् । शरीरावयवाघात् ॥

कर्त्तनम् । न । छेदने ॥ [illegible]रीषात् सूत्र निर्म्मितौ । कातना इति भाषा ॥ कृती० । ल्युट् ॥

कर्त्तरी । स्त्री । कृपाणिकाम् ॥ पत्रीकृत स्वर्णादेः कर्त्तनोपाये । कात कामी इति भाषा ॥ नापितोपकरणविशेषे । कैंची इति भाषा ॥ योगविशेषे ॥ यथा । क्रूरमध्यगतश्चन्द्रो लग्नं वा क्रूरमध्यगम् । कर्त्तरी नामयोगोऽयं कन्यानिधनकारकः इति ॥ अपि च । यस्मात् पापाष्टमं चन्द्रम् व्ययार्थस्थौ यदा तदा । कर्त्तरी नाम सा ज्ञेया मृत्युदारिद्र्यशोकदेति ॥ कृन्तति । कृती छेदने । धातुसूत्रादरः । यद्वा । कर्त्तनम् । घञ् । कर्त्तं राति । रा दाने । आतोऽनुपेतिकः । गौरादित्वान्ङीष् ॥

कर्त्तव्यम् । त्रि । करणीये । करणयोग्ये । कार्य्ये ॥ यस्मिन् क्रियमाणे न दोष स्तत्कर्त्तव्यम् ॥ तव्यप्रत्ययः ॥

कर्त्ता । पुं । परमेष्ठिनि ॥ स्वरनिबन्धने दारुणि । कीर्य्यते विक्षिप्यते इतस्ततः स्थाप्यते कायो येन । कॄ विक्षेपे । तृच् ॥ त्रि । स्वतन्त्रः कर्त्तेतिनिरूपितेषट्कारकान्तर्गतकारकविशेषे ॥ अ[illegible] कर्त्तृत्वं इतीकमपि

भक्तिर्भवति । तस्य लक्षणम् । क्रियानुकूलकृतिमत्त्वं कर्तृत्वम् ॥ यः करोति सः ॥ कृत्याश्रयः कर्त्तेति तार्किकाः ॥ चेतनान्तरव्यापाराव्यवधानेन धात्वर्थनिष्पादकत्वेन कर्त्ता । कर्मकरणादिकारकचक्रप्रयोक्ता वा । इति प्रायश्चित्तविवेकः ॥ कृतिमति ॥ उत्पादके ॥ कारणानुकूलव्यापारवति । अनुष्ठातरि ॥ धात्वर्थव्यापाराश्रये ॥ क्रियायां स्वातन्त्र्येण विवक्षितेऽर्थे ॥ स तु पञ्चविधः । यथा । क्रियासु यो भवेत् कर्त्ता हेतुकर्त्ता प्रयोजकः । अनुमन्ता ग्रहीता च कर्त्ता पञ्चविधः स्मृत इति ॥ स त्रिविधोऽपि भवति । यथा । त्रिधैव ज्ञायते कर्त्ता विशेषेण प्रतिक्रियाम् । योग्यत्वप्रतिषिद्धत्वविशेषणपदान्वयैः ॥ अस्यार्थः ॥ क्रियाम्प्रति प्रकारत्रयेण कर्त्ता विधीयते तस्य विवरणम् । स्वाध्यायोऽध्येतव्य इत्यत्र योग्यत्वेन लब्धविषयत्वैवर्णिकः । १ । न चरुं दद्यात् दीक्षितो न ददातीत्यत्र प्रतिषिद्धत्वेन दीक्षितेतरपरः । २ । स्वर्गकामो यजेतेत्यत्र विशेषणपदान्वयेन स्वर्गकामः कर्त्ता ज्ञायते । ३ ॥ [illegible] ॥ [illegible]

त्वाभूतकार्यो ऽहङ्कारो ऽन्तः करणं बुद्धिविज्ञानमित्यादिपर्यायशब्दवाच्यस्तादात्म्याध्यासेनात्मनि कर्त्तृत्वादिधर्माध्यारोपहेतुः अनात्मा भौतिको मायाकल्पितश्च सः ॥ क्रियाश्रये । इतरकारकाप्रयोज्यत्वेसति सकलकारकाणां प्रयोक्तरि क्रियाया· निर्वर्त्तके चिदचिद्ग्रन्थिरूपे फलकामनावति पुरुषे ॥ सच सात्त्विकादिभेदात् त्रिविधउक्तो भगवता । तत्र सात्त्विको यथा । मुक्तसङ्गो ऽनहंवादीधृत्युत्साहसमन्वितः । सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्तासात्त्विकउच्यते इति ॥ राजसोयथा । रागी कर्मफलप्रेप्सुर्लुब्धोहिंसात्मको ऽशुचिः । हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः इति ॥ तामसोयथा । अयुक्तः प्राकृतः स्तब्धः शठोनैकृतिको ऽलसः । विषादी दीर्घसूत्रीच कर्त्ता तामसउच्यते इति ॥ अन्तः करणोपहिते चिदाभासे ॥ करणोपहितस्यकर्त्तृत्वात् ॥ करोति । डुकृञ् । तृच् तृन्वा ॥

कर्त्तृका । स्त्री । क्षुद्रखड्गे ॥

कर्त्तृत्वम् । न । कर्त्तृधर्मे ॥ भावेकर्मणिवा त्वः ॥

कर्त्री । स्त्री । कारिकायाम् ॥ करोति

। डुकृञ् । ण्वुल्तृचाविति तृच् । ऋन्नेभ्योङीप् ॥ छुरिकायाम् ॥

कर्द्दः । पुं । कर्द्दमे ॥ कर्द्दति । कर्द्द कुत्सिते शब्दे । पचाद्यच् ॥

कर्द्दटः । पुं । करहाटे ॥ पङ्के ॥ पङ्कारे ॥

कर्द्दनम् । न । कुक्षिशब्दे ॥

कर्द्दमः । पुं । ब्रह्मणश्छायाया मुत्पन्ने प्रजापतिविशेषे । कपिलमुनेर्जनके ॥ पापे ॥ पङ्के । कीचकादा इतिभाषा ॥ न । मांसे ॥ कर्द्दति । कर्द्द० । कलिकर्द्द्योरमः ॥ त्रि । कर्द्दमवति ॥ अर्श० अच् ॥

कर्द्दमकः । पुं । शालिविशेषे ॥

कर्द्दमाटकः । पुं । विष्ठादिनिक्षेपस्थाने । डलाव इ०भा० ॥ इतिशब्दरत्नावली ॥

कर्द्दमी । स्त्री । मुद्गरे । मोगरा इति भाषाप्रसिद्धे पुष्पे ॥ इतिवैद्यकम् ॥

कर्पटः । पुं । न । लक्तके । जीर्णवस्त्रे । लत्ता इतिभाषा ॥ प्रस्वेदादिमार्जनार्थं हस्तस्थवस्त्रखण्डे । द्रवद्रव्यं येन पूयते तत्रूढौ लक्तककर्पटशब्दौ तत्तुल्येवस्त्रेपिवर्त्तेते इति स्वामी । मुकुटस्तु मलिनत्वादिदुष्टजीर्णवस्त्रखण्डेवर्त्तेते इत्याह ॥ किरति कृणाति वा । कृविक्षेपे कृहिंसायां वा । करोति वा । विच् । करश्चासौ पटश्च ॥ यद्वा । करस्यपटः । शकन्ध्वादिः ॥

पर्व्वतविशेषे ॥

कर्प्पटधारी । त्रि । मलिनजीर्णवस्त्रधारिणि भिक्षुके ॥

कर्प्पटिकः । त्रि । कर्प्पटान्विते । कर्प्पटधारिणि ॥

कर्प्पटी । त्रि । कर्प्पटान्विते ॥ म० इनिः ॥

कर्प्परः । पुं । मूर्द्धास्थि । कपाले । खोपरी इति भाषा ॥ शस्त्रविशेषे ॥ कटाहे ॥ कल्पते । कृपसामर्थ्ये । बाहुलकादरो लत्वाभावश्च ॥

कर्प्परांशः । पुं । मृत्कपालखण्डे ॥

कर्प्परालः । पुं । अक्षोटे । कन्दराले ॥ कर्प्परम् अलति । अल भू० । कर्म्मण्यण् ॥

कर्प्परिकातुत्थम् । न । तुत्थविशेषे । कर्प्परीयम् ॥ गुडूचीयोगजाञ्जने ॥

कर्प्परी । स्त्री । दार्व्विकायाम् । क्वाथोद्भवतुत्थे । दारुहरिद्रायाः क्वाथस्य तुत्थे । आवर्त्तननिष्पन्ने कृत्रिमरसाञ्जने । कल्पते । कृप० । बाहुलकादरट् लत्वाभावश्च । टित्वान् ङीप् ॥

कर्प्परीतुत्थकम् । न । रसके । खपरिया थोथा इति ख्याते ॥ कर्प्परीतुत्थकं तुत्थादन्यत् तद्रसकं स्मृतम् । ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः ॥

कर्प्पासः । पुं । न । तुण्डिकेर्य्याम् । वस्त्रयोनौ ॥ क्रियते । डुकृञ् । कृञः पासः ॥

कर्प्पासफलम् । न । कार्प्पासे । बिनौला इति भाषा ॥ कर्प्पासफलमित्युक्तं कषायं मधुरं गुरु । वातश्लेष्महरं रुच्यं विशेषेणास्थिवर्जितम् ॥

कर्प्पासी । स्त्री । कार्प्पास्याम् । कपास कानुच इति भाषा ॥ कर्प्पासात् जातित्वात् गौरादित्वाद्वा ङीष् ॥

कर्प्पूरः । पुं । न । घनसारे । चन्द्रसंज्ञे । सिताभ्रे । कपूर इति भाषा ॥ कर्प्पूरः शीतलो वृष्यश्चक्षुष्यो लेखनो लघुः । सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः ॥ दाहतृष्णास्यवैरस्यमेदोदौर्गन्ध्यनाशनः ॥ कर्प्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः । पक्वात् कर्प्पूरतः प्राहुरपक्वं गुणवत्तरम् ॥ अपिच । कर्प्पूरो नूतनस्तिक्तः स्निग्धश्चोष्णास्त्रदाहदः । चिरस्थो दाहशोषघ्नः मघातः शमकृत् परः ॥ पोतासभीमसेनाद्यो ऽस्य भेदाश्च सन्ति । तेच भीमसेने द्रष्टव्याः । किरति कृणाति वा । करति करोति वा । कृ विक्षेपे हिंसायां वा । कृञ् डुकृञ् वा । विच् । पर्य्येति परी० । इगुपधेतिकः । कश्चासौ परश्च ॥ यद्वा । कर्पते । कृप० । ख० ऊरः । बाहुलकाल्लत्वाभा-

वो वा ॥

कर्पूरकः । पुं । कर्पूरे ॥ कर्च्चूरके । कर्चूरके ॥

कर्पूरतिलका । स्त्री । उमायाः सखीभेदे । जयायाम् ॥

कर्पूरतैलम् । न । कर्पूरस्नेहे । हिमतैले ॥

कर्पूरनालिका । स्त्री । कपूरनारीति ख्याते पक्वान्नविशेषे ॥ यथा । घृताढ्यया समितया कृत्वा लम्बपुटं ततः । लवङ्गोषणकर्पूरयुतया सितयान्वितम् ॥ पचेदाज्येन सिद्धैषा ज्ञेया कर्पूरनालिका । संयावसदृशी ज्ञेया गुणैः कर्पूरनालिका ॥

कर्पूरमणिः । पुं । पाषाणप्रभेदे । कर्पूराश्मनि ॥ कर्पूरमणिनामायं युक्त्या वातादिदोषनुत् ॥

कर्पूररसः । पुं । रसकर्पूरे ॥

कर्पूरहरिद्रा । स्त्री । कपूरहलदीति ख्यातायाम् । सर्वकण्डूविनाशिन्याम् ॥

कर्पूराश्मा । पुं । उपरत्नविशेषे । कपूरचीनियेति ख्याते ॥

कर्परः । पुं । दर्पणे ॥ इतिजटाधरः ॥

कर्ब्बरः । पुं । व्याघ्रे ॥ रक्षसि ॥ कृणाति । कृञ् हिं० । कॄगॄशॄवृञ्चतिभ्यः ष्वरच् ॥

कार्ब्बरी । स्त्री । शिवायाम् ॥ षित्त्वात् ङीष् ॥

कर्ब्बुदारः । पुं । कोविदारे ॥ नीलझिण्टाम् ॥ श्वेतकाञ्चने ॥

कर्ब्बुदारकः । पुं । श्लेष्मातकवृक्षे ॥

कर्ब्बुरः । पुं । पापे ॥ राक्षसे ॥ नानावर्णे । चित्रे । किर्म्मीरे ॥ नदीनिष्पावधान्ये ॥ न । जले ॥ काञ्चने ॥ धुस्तूरवृक्षे ॥ त्रि । चित्रवर्णवति ॥ कर्ब्बति । कर्ब हिं० । कर्ब्बत्यनेन वा । कर्बगतौ वा । ओष्ठ्योपधः । मद्गुरादयश्चेति उरच् ॥ कर्ब्बुरोपधेन वा । बवयोरभेदादन्तस्थमध्योपि ॥

कर्ब्बुरफलः । पुं । साकुरुण्डवृक्षे ॥

कर्ब्बुरा । स्त्री । कृष्णवृन्तायाम् । पारुल इति गौड भाषाप्रसिद्धे वृक्षे ॥ बर्बरायाम् । बाबुइतुलसी इति गौड भाषा ॥ उरजन्ता टाप् ॥

कर्ब्बुरी । स्त्री । दुर्गायाम् ॥ इतित्रिकाण्डशेषः ॥

कर्ब्बूरः । पुं । शट्याम् ॥ द्राविडके । कचोरलदी इतिभाषा ॥ राक्षसे ॥ न । स्वर्णे ॥ हरिताले ॥ त्रि । चित्रिते ॥ कर्बति । कर्बगतौ । खर्जादित्वादूरः ॥

कर्ब्बूरकः । पुं । कर्ब्बूरार्थे ॥ स्वार्थेकः ॥

कर्म्मकरः । पुं । कीनाशे । यमे ॥ त्रि ।

भृत्ये ॥ वेतनाजीविनि । भरण्यभुजि । मूल्येन कर्म्मकुर्व्वति । कमेरा इति भाषा ॥ कर्म्म करोति । कृञ० । कर्म्मणिभृताविति टः ॥

कर्म्मकरी । स्त्री । मूर्व्वालतायाम् ॥ विम्बिकालतायाम् ॥ मूल्येन कर्म्मकुर्व्वन्त्याम् । दास्याम् ॥ टित्त्वात् ङीप् ॥

कर्म्मकर्त्ता । पुं । कर्म्मात्मककर्त्तरि ॥ यथा । क्रियमाणन्तुयत् कर्म्म स्वयमेव प्रसिध्यति । सुकरैः स्वैर्गुणैः कर्त्तुः कर्म्मकर्त्तेति तद्विदुरिति ॥ त्रि । कर्म्मणः कर्त्तरि ॥

कर्म्मकाण्डः । पुं । यावज्जीवमग्निहोत्रं जुहुयादित्यादिरूपेण चित्तशोधके कर्म्मप्रतिपादके वेदभागे ॥ संसारफलके ज्योतिष्टोमादिकर्म्मकलापे ॥ कर्म्मणांसमूहः । दूर्व्वादिभ्यः काण्डः ॥

कर्म्मकारः । पुं । वर्णसङ्करजातिविशेषे । लोहकारे । लुहार इतिभाषा ॥ गोपालात्तन्त्रवाय्यां वै कर्म्मकारोह्यभूत् सुतः । ब्रह्मवैवर्त्ते तु शूद्रायां विश्वकर्म्मणोजातइत्युक्तम् ॥ वृषे ॥ त्रि । भृतिंविना भारवहनादिकर्म्मकारके । वेगारी इतिभाषा ॥ कर्म्म करोति । कर्म्मण्यण् ॥

कर्म्मकीलकः । पुं । रजके ॥ इतित्रिका ण्डशेषः ॥

कर्म्मक्षमः । पुं । अलङ्कर्म्मीणे । कर्म्मकरणसमर्थे ॥ कर्म्मसु क्षमः । सप्तमीतियोगविभागात् समासः ॥

कर्म्मक्षेत्रम् । न । भारतवर्षे ॥

कर्म्मचोदना । स्त्री । कर्म्मविषयायां प्रेरणायाम् ॥ कर्म्म क्रिया पुरुषव्यापाररूपाऽर्थभावना तद्विषयाचोदना प्रेरणा विधिरूपा शाब्दीभावनेत्यर्थः ॥

कर्म्मजः । पुं । कलियुगे ॥ स्वर्गादौ ॥ अदृष्टे ॥ वटद्रुमे ॥ त्रि । कर्म्मसम्भवे । कायिकवाचिकमानसकर्म्मोद्भवे ॥ कर्म्मणोजातः । जनी० । पञ्चम्यामजाताविति डः ॥

कर्म्मजगुणः । पुं । क्रियाजन्यगुणे ॥ स च संयोगः । विभागः । वेगः । इति भाषापरिच्छेदः ॥

कर्म्मठः । त्रि । कर्म्मशूरे । प्रयत्नेनप्रारब्धं कर्म्मसमापयति यः सतथोच्यते ॥ कर्म्मकुशले ॥ कर्म्मणि घटते । कर्म्मणिघटोऽठच् ॥

कर्म्मण्यः । त्रि । कर्म्मयोग्ये ॥ कर्म्मणि प्रवीणे ॥ कर्म्मणि साधुः । तत्रसाधुरितियत् ॥

कर्म्मण्यभुक् । त्रि । भरण्यभुजि । कर्म्मकारे । वेतनोपजीविनि ॥ कर्म्मण्यं वेतनं भुङ्क्ते । भुज० । क्विप् ॥

कर्मण्या । स्त्री । वेतने । मूल्ये ॥ क
र्मणा सम्पद्यते । कर्मवेशाद्यत् ॥ क
र्मणि साधुर्वा । तत्रसाधुरितियत् ॥

कर्म्मदेवः । पुं । यज्ञेन स्वर्गं प्राप्ते ॥ य
था । ज्योतिष्टोमादिना स्वर्गम्प्रा
प्ताःस्युःकर्मदेवताःइति॥अपिचाहुः
। अस्मिन्कल्पेऽश्वमेधादिकर्म कृत्वा
महत् पदम् । अवाप्याजानदेवैर्याः
पूज्यास्ताःकर्मदेवताः इति ॥

कर्म्मधारयः । पुं । समानाधिकरणे त
त् पुरुषे ॥

कर्म्म । न । क्रियायाम् । देहेन्द्रियादि
व्यापारे ॥ संयोगवियोगयो रसम
वायिकारणजातीयङ्कर्मेति लक्षिता
क्रिया । उत्क्षेपणापक्षेपणाकुञ्च
नप्रसारणगमनानि पञ्चकर्माणिभ
वन्ति । नित्यनैमित्तिककाम्यप्राय
श्चित्तप्रतिषिद्धभेदाच्चापिपञ्चविधं भ
वति । तच्चचत्वारिधर्म्याणिअन्त्यमध
र्म्यमितिनिश्चयः ॥ निष्फलं क्लेशव
हुलंसन्दिग्धफलमेवच । न कर्मकु
र्य्यान्मतिमान् सदा वैरानुबन्धिच ॥
सञ्चितक्रियमाणप्रारब्धभेदात् क-
र्मत्रिविधं भवति ॥ कायिकवाचिक
मानसिकभेदात् पुनस्तत् त्रिविधं
भवति ॥ विधिप्रतिषेधलक्षणं शा-
स्त्रप्रसिद्धं कर्म । तत्र नित्यनैमित्ति
कप्रायश्चित्तभेदात् त्रिविधम्भवति
॥ यागदानहोमात्मके वेदविहिते ॥
भूतभावोद्भवकरो विसर्गः कर्मसं-
ज्ञितः । भूतानां भवनधर्माणां सर्वे
षां स्थावरजङ्गमानां भाव मुत्पत्ति
म् उद्भवं वृद्धिञ्चकरोति योविसर्ग
स्त्यागः तत्तच्छास्त्रविहितो यागदा
नहोमात्मकः सएव कर्म संज्ञितः
॥ सात्त्विकादिभेदात् पुन स्ततत्त्रि
विधम् । तत्रसात्त्विकं यथा । निय
तं सङ्गरहितमरागद्वेषतः कृतम् ।
अफल प्रेप्सुना कर्म यत् तत् सात्त्वि
कमुच्यते ॥ राज संयथा । यत्तु कामे
प्सुना कर्म साहङ्कारेण वापुनः । क्रि
यते बहुलायासं तद्राजसमुदाहृत
म् ॥ तामसं यथा । अनुबन्धं क्षयं
हिंसा मनपेक्ष्यचपौरुषम् । मोहा
दारभ्यते कर्म यत् तत् तामस मुच्य
ते ॥ तत्तद्वर्णाश्रमाभिमानानिमि
त्ते ऽर्थः वरणशोधके । शास्त्रविहि
तक्रियाकलापे नित्यनैमित्तिक -
काम्यात्मके ॥ शुक्लं कृष्णंशुक्लकृष्ण
ञ्चेतित्रिविधभेदभिन्ने ॥ तच्चत्रिवि
धं जन्मप्रयच्छति । तदाहु र्विश्वरू
पाचार्याः । शुभैराप्नोति देवत्वं नि
षिद्धैर्नारकीन्तनुम् । उभाभ्यांपुण्य
पापाभ्यां मानुष्यं लभते ऽवशः ।

इति ॥ क्रियते तत्तत्फलार्थिभिरि
ति कर्म्म । तस्य चानादित्वम् आद्य
कोटेरनुपलभ्यमानत्वात् । यतः
शरीरं ततः कर्म्मकरणम् तच्छरीरं
कर्म्मारब्धम् । तान्यपि शरीरान्तरेण
कृतानि । तच्च कर्म्मजमिति सोयं तृ
तीयः पाशः ॥ जन्मनिमित्ते अदृष्ट
विशेषे ॥ उक्तञ्च वार्त्तिककारैः ।
न कर्म्मकारणं मुक्ते र्नास्मिस्तापस्य भे
षजम् । कर्म्मभ्यो जन्म नियतं जन्म
चेच्छिहतिः कुतः । इति ॥ वासना
कर्म्म विद्या च त्रयं जन्मप्रयोजकम् ।
उक्तं तत्र प्रधानत्वं कर्म्मणः श्रूयते
पुनः ॥ उत्तमाधमदेहाख्यं वैषम्यं
कर्म्मणा भवेत् । देहे विद्यावासना
भ्यां भवेद्भोगस्य कौशलम् ॥ कर्म्म
साध्वेव कर्त्तव्यमिच्छताभ्युदयञ्चि
रम् । पापन्तु सर्व्वदा हेयं दुःखेभ्यस्त्व
स्यताभृशम् ॥ पूर्व्वकाण्डपरा इत्थं
कर्म्मप्राधान्यमूचिरे । अथ वेदान्तशा
स्त्रज्ञाः प्राहुः कामप्रधानताम् ॥ पु
मानादौ काममय एव भूत्वाथ कर्म्म
कृत् । यतोयं कर्म्मणो हेतुः कामो
तोस्य प्रधानता ॥ अकामस्य क्रिया
काचिद्दृश्यते नेह कर्हिचित् । यद्य
द्धि कुरुते जन्तु स्तत्तत्कामस्य चेष्टि
तम् ॥ यथाद्रिरूपं निम्नं यमविधा

। संस्कारकं विविदिषाजनकञ्च । त
त्र विहितत्वमात्रबुद्ध्या क्रियमाणं
संस्कारकम् । ईश्वरार्पणबुद्ध्या क्रि
यमाणं विविदिषाजनकम् । यत्क
रोषीत्यादि भगवद्वचनादिति वि
वेकः ॥ षट्कारकान्तर्गतकारकवि
शेषे ॥ अत्र द्वितीया विभक्तिर्भवति
। उक्ते कर्म्मणि प्रथमा भवति । धातू
पात्तव्यापारजन्यफलाश्रयं कर्म्मेति
लक्षणम् । यत् क्रियते फलार्थि
भिस्तत् कर्म्मेति प्रसिद्धम् । करो
तेर्निखिलक्रियावाचकत्वात् कर्त्तु
र्व्यापारैर्यत् साध्यते तदित्यर्थः । अ
तएव क्रियाव्याप्यं कर्म्मेति क्रमदीश्वरः
। तच्चतुर्विधम् । निर्वर्त्त्यम् १ यथा
घटं करोति पुत्रं प्रसूते ॥ विकार्य
म् २ तच्च द्विविधम् । प्रकृतेरुच्छेद
कम् प्रकृतेर्गुणान्तराधायकञ्च । आ
द्यं यथा काष्ठं भस्म करोति । अन्त्यं
यथा । सुवर्णं कुण्डलं करोति । त
थाचोक्तं भर्त्तृहरिणा । यदसज्जायते
पूर्व्वं जन्मना यत् प्रकाशते । तन्निर्व्व
र्त्त्यं विकार्य्यञ्च कर्म्म द्वेधा व्यवस्थित
म् ॥ प्रकृत्युच्छेदसम्भूतं विकार्य्यं का
ष्ठभस्मवत् । अन्यद्गुणान्तरोत्पत्त्या
सुवर्णादिविकारवत् ॥ प्राप्यम् ३ य
था ग्रामं गच्छति चन्द्रम् पश्यति

त्यादि ॥ अनीप्सितञ्च ४ यथा पापं त्यजती त्यादि ॥ तस्मादृत्तमभवने ॥ ज्ञानसाधनविशेषे ॥ यथाहुः । कषायपक्तिः कर्म्माणि ज्ञानञ्चपरमा गतिः । कषाये कर्म्मभिः पक्के ततो ज्ञानंप्रवर्त्तते इति ॥ क्रियते फलार्थिभिः । डुकृञ् । कृञः भावे कर्म्मणिच सर्वधातुभ्योमनिन् इतिमनिन् ॥ अर्द्धर्चादिः ॥ आरभेतैव कर्म्माणि श्रान्तः श्रान्तः पुनः पुनः । कर्म्माण्यारभमाणं हि पुरुषं श्रीर्निषेवते ॥

कर्म्मन्दी । पुं । भिक्षौ । परिव्राजि ॥ कर्म्मन्देन प्रोक्तम् भिक्षुसूत्र मधीते । कर्म्मन्दकृशाश्वादिनिः ॥

कर्म्मफलम् । न । कमरङ्गफले ॥ कर्म्मविपाके ॥ संसारे ॥ सर्वकर्म्मणाम् फलं व्याकृतसंसार एवेति भाष्योक्तेः ॥ कर्म्मणः फलम् ॥

कर्म्मफलप्रेप्सुः । त्रि । कर्म्मफलार्थिनि ॥

कर्म्मफलासङ्गः । त्रि । कर्म्मणि फलेचासङ्गः कर्त्तृत्वाभिमानो भोगाभिलाषश्च यस्य तस्मिन् ॥

कर्म्मभूः । स्त्री । आर्य्यावर्त्ते ॥ कृष्टभूमौ । कर्म्मान्ते ॥

कर्म्मभूमिः । स्त्री । आर्य्यावर्त्ते । पुण्यभूमौ ॥ अथकालिकयायुक्त्या टू...नेत्र इति निर्भयौ: । सर्वभव्यानप...र्यन्ति कर्म्मभूमिमचेतसः ॥ कर्म्मणो भूमिः ॥ भारतवर्षे ॥ यथा । तत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने । यतोहिकर्म्मभूरेषा अतोन्या भोगभूमय इतिविष्णुपुराणम् ॥

कर्म्ममीमांसा । स्त्री । पूर्व्वमीमांसायाम् । कर्म्मकाण्डवेदविचारग्रन्थे जैमिनिप्रणीते ॥

कर्म्ममूलम् । न । कुशे । दर्भे ॥ कर्म्मणो हेतौ ॥ कर्म्मणो मूलम् ॥

कर्म्मयुगम् । न । कलियुगे ॥ इतित्रिकाण्डशेषः ॥

कर्म्मयोगः । पुं । ईश्वरार्पणबुद्ध्या क्रियमाणे फलाभिसन्धिरहिते तत्तद्वर्णाश्रमोचिते वेदविहिते कर्म्मकलापे मन्दानां ज्ञानसाधन भूते ॥ चित्तशुद्धिजनके वैदिके कर्म्मणि ॥

कर्म्मरङ्गः । पुं । न । कमरख इति प्रसिद्धे फलद्रुमे । पीतफले । कर्म्मारे । त्र्युणे ॥ कर्म्मरङ्गं हिमं ग्राहिस्वाद्वम्लं कफ वातहृत ॥

कर्म्मरी । स्त्री । वंशरोचनायाम् ॥

कर्म्मवज्रः । पुं । शूद्रे ॥ इतिमहाभारतम् ॥

कर्म्मवाटी । स्त्री । तिथौ ॥

कर्म्मविपाकः । पुं । कर्म्मजन्यफलपरिपाके ॥ [illegible]

रोगप्रायश्चित्तानां विवरणग्रन्थे ॥

कर्म्मव्यतिहारः । पुं । क्रियाविनिमये ॥ परस्परकरणे ॥

कर्म्मशीलः । त्रि । कार्म्मे । कर्म्मकृति ॥ कर्म्मशीलमस्य ॥

कर्म्मशूरः । त्रि । कर्म्मठे । प्रयत्नेन प्रारब्धकर्म्मपरिसमापके ॥ फलपर्यन्तकर्म्मकर्त्तरि ॥ कर्म्मणिशूरः सप्तमीसमासः ॥

कर्म्मशेषः । त्रि । उत्पाद्यविकार्य्याप्यसंस्कार्य्येषु पुरोडाशसोममन्त्रव्रीह्यादिषु ॥

कर्म्मसङ्गः । पुं । कर्म्मसुदृष्टादृष्टार्थेषु अहमिदङ्करोमि एतत् फलम्भोक्ष्ये इत्यभिनिवेशविशेषे ॥

कर्म्मसङ्गी । त्रि । श्रुतिस्मृतिविहितप्रतिषिद्धकर्म्मफलाधिकारिणि । कर्त्तृत्वाभिमानेन फलाभिसन्धिना च कर्म्मण्यभिनिविष्टे ॥

कर्म्मसङ्ग्रहः । पुं । कर्म्मसङ्गृह्यते समवैत्यनेनेति व्युत्पत्त्या कर्म्माश्रये ॥ कर्म्मणः पुंव्यापाररूपस्य अर्थभावनायाः सङ्ग्रहे सङ्क्षेपे ॥

कर्म्मसचिवः । पुं । कर्म्मोपयुक्तसचिवे । धीसचिवातिरिक्ते मन्त्रिविशेषे ॥ कर्म्मणि सचिवः सहायः ॥

कर्म्मसन्न्यासिकः । पुं । यतौ । सन्न्यासिनि ॥

कर्म्मसन्न्यासी । पुं । यतौ ॥ द्विविधः कर्म्मसन्न्यासः फलसाधनभेदतः । फलाय चानिलस्त्यागो जिज्ञासोर्ज्ञानसिद्धये ॥ फलवत् कर्म्मणोऽपि त्याज्यत्वे कर्म्मण्येवाधिकारस्ते इत्यादिस्मृतिविरोध इत्याशङ्क्य तत्याविरक्तविषयत्वान्नैवमित्याह । अविशुद्धधियः कर्म्मण्यधिकारो विशुद्धधीः । सत्यां विविदिषोत्पत्तौ तदर्थं कर्म्म सन्त्यजेत् ॥ तदर्थं मुक्त्यर्थम् ॥ कर्म्मणः सन्न्यासः कर्म्मसन्न्यासः । सोऽस्यास्ति । इनिः ॥ कर्म्मणा बध्यते जन्तुर्विद्यया च विमुच्यते । तस्मात् कर्म्म न कुर्वन्ति यतयः पारदर्शिनः ॥

कर्म्मसाक्षी । पुं । सूर्य्ये ॥ सूर्य्यादिनवसु ॥ सूर्य्यः सोमो यमः कालो महाभूतानि पञ्च च । एते शुभाशुभस्येह कर्म्मणो नव साक्षिणः ॥ कर्म्मणः साक्षी ॥

कर्म्मसिद्धिः । स्त्री । इष्टानिष्टलक्षणायां फलप्राप्तौ ॥

कर्म्माध्यक्षः । त्रि । क्रियासाक्षिणि ॥

कर्म्मान्तः । पुं । कर्म्मभुवि । कृष्टभूमौ ॥ इक्षुधान्यादिसङ्ग्रहस्थाने ॥ शुचीनाकरकर्म्मान्ते इत्युक्तः ॥ कर्म्मावसाने ॥ कर्म्मान्ते दासभृत्यान्वे स्यु

ते: ॥

कर्मारः । पुं । कर्मकारे । लौहकारे । लुहार इतिप्रसिद्धे जातिविशेषे ॥ वंशे । त्वचिसारे । बाँस इतिप्रसिद्धे वृक्षे ॥ कर्मरङ्गे । कमरख इतिभाषा ॥

कर्म्मार्हः । पुं । पुरुषे ॥ त्रि । क्रियायोग्ये ॥

कर्म्माशौचः । पुं । अनहङ्कारे ॥

कर्म्मी । पुं । दक्षिणासहितज्योतिष्टोमादिकर्मानुष्ठायिनि । यजमाने । देवानामन्ने ॥ केवलकर्मीहि चन्द्रमण्डलाधिकारी परतन्त्रो देवानामन्नभूतः इति श्रौतीप्रसिद्धिः ॥ त्रि । कर्मविशिष्टे ॥ कर्मास्ति अस्य । व्री० इनिः ॥

कर्म्मिष्ठः । त्रि । क्रियावति ॥

कर्म्मीरकः । पुं । शाखोटे ॥

कर्म्मेन्द्रियम् । न । कर्मसाधकेइन्द्रिये । पाय्वादिपञ्चके व्यस्ते समस्तेच ॥ पायूपस्थम्पाणिपादौ वाक्चैवेन्द्रियसङ्ग्रहः । उत्सर्गानन्दनादानगत्यालापाश्च तत्क्रियाः ॥ वागादीनीन्द्रियाण्याकाशादीनां रजोंशेभ्यो व्यस्तेभ्यःपृथक्पृथक् क्रमेणोत्पन्नानिभवन्ति । यथोक्तं भागवते । तेषां रजोंशेर्जातानि क्रमात् कर्मेन्द्रियाणिच । प्रत्येकमिति ॥ कर्मसाधकमिन्द्रियङ्कर्मेन्द्रियम् ॥ कर्म्मेन्द्रियदेवताः अग्नीन्द्रोपेन्द्रयमप्रजापतयः । कर्मेन्द्रियाणां वागादीनां क्रमेणाग्न्यादयो देवता भवन्ति ॥ कर्मेन्द्रियाणां विषयास्तु वचनादानगमनविसर्गानन्दाःक्रमेण वागादीनांविषयाः ॥

कर्व्वः । पुं । कामदेवे ॥ आखौ ॥ कृणाति । कृञ् हिंसायाम् । किरतिवा । कृविक्षेपे । कृगृशृदृभ्योवः ॥

कर्व्वटः । पुं । न । द्विशतग्राममध्ये मनोरमस्थाने ॥ ग्रामशतस्थजनाःक्रयविक्रयादिना सेवादिनावा येनग्रामेण जीवन्ति तस्मिन् ॥ इति केचित् ॥ चतुः समग्रामे ॥ चतुः समेगृहस्थाने ॥ चतुः शतग्रामसङ्ग्रहस्थाने ॥ न । नगरे । पुरे ॥

कर्व्वुरः । पुं । राक्षसे ॥ पापे ॥ भेषजविशेषे ॥ व्याघ्रे ॥ कृणाति । कृञ्० । कृगृशृदृवनिभ्यः क्वरच् ॥

कर्व्वुरी । पुं । उमायाम् । शिवायाम् ॥ लिङ्गपत्न्याम् ॥

कर्व्यः । पुं । कर्व्वूरे । कचूर इतिभाषा ॥ इति राजनिर्घण्टः ॥

कर्षः । पुं । न । अक्षे । माषषोडशके माने । अशीतिरक्तिकासु ॥ भिषजां व्यवहारेतु कर्षः स्यात् तोलकद्वयम् । सुवर्णे । विडालपदके ॥ राज

निर्घाटक्रमते कर्षः स्यादक्षमाषकः ॥ पुं । कर्षणे ॥ विभीतक वृक्षे ॥ कर्षति । कृषविलेखने । पचाद्यच् । भावे घञ्वा ॥

कर्षकः । त्रि । क्षेत्राजीवे । कृषीवले ॥ आकर्षणकर्त्तरि ॥ पुं । अयस्कान्ते ॥ कर्षति । कृष० । ण्वुल् ॥

कर्षणम् । न । वैश्यवृत्तिविशेषे । कृषिकर्मणि । लाङ्गलादिना भूमिखनने । खेती इतिभाषा ॥ आकर्षणे ॥ शोषणे ॥ पीडने ॥ कृषेर्ल्युट् ॥

कर्षणी । स्त्री । क्षीरिणीवृक्षे ॥

कर्षफलः । पुं । विभीतकवृक्षे । कलिद्रुमे ॥ कर्षम् फलमस्य ॥

कर्षफला । स्त्री । आमलक्याम् ॥

कर्षार्द्धम् । न । तोलकपरिमाणे ॥

कार्षिणी । स्त्री । कविकायाम् । अश्वमुखबन्धनरज्जुस्थितलौहे ॥ क्षीरिकावृक्षे ॥

कार्षितः । त्रि । पीडिते ॥ यथा । अधर्मकार्षितः वृत्तिकर्षितइति ॥

कर्षूः । पुं । करीषाग्नौ ॥ तुषाग्नौ ॥ वार्त्तायाम् । जीविकायाम् ॥ कृषिविशेषे ॥ स्त्री । कुल्यायाम् ॥ कुल्ये । कीकसे ॥ नदीमात्रे ॥ दृष्टिखाते । चतुरङ्गुलखातविशेषे ॥ कर्षणम् कृष्यते कर्षति वा कृषवि० । कृषिश्च मितनिधनिसर्जिखर्जिभ्य ऊः ॥

कर्हि । अ । कदा ॥ कस्मिन्काले । अनद्यतनेर्हिलन्यतरस्याम् ॥

कर्हिचित् । अ । कस्मिंश्चित्काले ॥ कस्याञ्चिदप्यवस्थायाम् । जातु ॥ कर्हिच चित् चेति विग्रहः ॥

कलः । पुं । मधुरध्वनौ । अव्यक्त मधुरध्वाने ॥ सालवृक्षे ॥ न । शुक्रे । रेतसि ॥ त्रि । अजीर्णे ॥ कडति माद्यति अनेन । कडमदे । हलश्चेति घञ् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । डलयोरेकत्वम् ॥

कलङ्कः । पुं । शकुलमत्स्ये ॥

कलकण्ठः । पुं । कलध्वाने ॥ हंसे ॥ पारावते ॥ पिके ॥ कलः कण्ठोऽस्य ॥

कलकलः । पुं । कोलाहले । बहुभिः कृते उच्चैः शब्दे ॥ यथा । विश्रान्ताभ्या माभ्यां किं मिह नयनाभ्यां खलुफलं न याभ्या मालीढा परमरमणीया तव तनुः । अयं हि न्यक्कारो जननिमनुजस्य श्रवणयो र्ययोर्नान्तर्यातं स्तव लहरिलीलाकलकल इति- जगन्नयविभूषणी ॥ सर्जनिर्यासे ॥ कलशब्दे । कलनम् । घञ् । संज्ञापूर्वकत्वाद्वृद्ध्यभावः । कलादपि कलः ॥

कलघोषः । पुं । कोकिले ॥ कलो घो

घो यस्य ॥

कलङ्कः । पुं । अङ्के । चिह्ने ॥ अपवादे ॥ कालायसमले । लौहकिट्टे ॥ कम् शोभां लङ्कयति हीनतां गमयति ज्ञापयति वा । लकि गतौ । कर्मण्यण् । यद्वा । कलति । कल शब्दसंख्यानयोः । क्विप् । कल् चासौ वङ्कश्च ॥

कलङ्कलेखा । स्त्री । मालिन्यरेखायाम् ॥

कलङ्कषः । पुं । सिंहे ॥

कलङ्कषा । स्त्री । करताल्याम् ॥

कलङ्की । त्रि । अपवादग्रस्ते ॥ सचिह्ने ॥ लौहमलविशिष्टे ॥ मत्वर्थीयइनिः ॥

कलङ्कुरः । पुं । आवर्त्ते । जलभ्रमे ॥ इतित्रिकाण्डशेषः ॥

कलञ्जः । पुं । सविषास्त्रेण हतयोर्मृगपक्षिणोः ॥ ताम्रकूटे । तामाकू तुरकी इति भाषा ॥ यथा । विष्णुसिद्धान्तसारावल्यां वैद्यके । अथ धूमपर्णीधूमपानगुणाः । कलञ्जसंवेष्टन धूमपानात् स्याद्दन्तशुद्धिर्मुखरोगहानिः । कफप्रणाशज्वरहानिकृच्च गान्धर्वविद्याप्रवणैः सेव्यम् ॥ संख्याविशेषे ॥ यथा । सप्ताशी प्रोच्यते गुञ्जा सातिस्त्रो रूपकं भवेत् । रूपकैर्दशभिः प्रोक्तः कलञ्जोनामनामना

मतः इतियुक्तिकल्पतरुः ॥

कलनूलिका । स्त्री । कामुकायाम् । वाञ्छिन्याम् । लम्बिकायाम् ॥

कलत्रम् । न । श्रोणौ ॥ भार्य्यायाम् ॥ नृपादीनां दुर्गस्थाने ॥ गडति गड्यते वा । गडसेचने । गडेरादेश्च क इति अत्रन् । डलयोरैक्यम् ॥ कलं त्रायते वा । त्रैङ् पालने । कः ॥ कडति कड्यते वा । कडशासने । बाहुलका त्रन् ॥

कलधूतम् । न । रूप्ये ॥ इतिराजनिर्घण्टः ॥

कलधौतम् । न । स्वर्णे । हेम्नि ॥ रजते । रूप्ये ॥ पुं । कलध्वनौ ॥ कलोऽमलो धौतोऽस्य ॥

कलध्वनिः । पुं । पारावते ॥ पिके । । कोकिले ॥ मयूरे ॥ गम्भीरशब्दे ॥ कलोध्वनिर्यस्य । कर्मधारयो वा ॥

कलध्वानः । पुं । पारावते ॥ परभृते ॥ बर्हिणि ॥ कलोध्वानोऽस्य ॥

कलनः । पुं । वेतसवृक्षे ॥ न । चिह्ने । लक्ष्मणि ॥ दोषे ॥ लङ्घने ॥ ग्रसने ॥ यथा । कलनात् सर्वभूतानां-महाकालः प्रकीर्त्तितः । महाकालस्य कलनात् त्वमाद्याकालिका परेति ॥ एकमासिकगर्भे ॥ गर्भे मिश्रिते शुक्रशोणिते । तत्तु एकरात्रे

या भवतीति श्रीभागवतम् ॥ सङ्ख्याने । गणने ॥

कलना । स्त्री । वशतायाम् ॥ गणनायाम् ॥

कलन्दरः । पुं । सङ्कीर्णजातिविशेषे । सतु लेटात तीवरकन्यायां जातः । इति ब्रह्मवैवर्त्त पुराणम् ॥

कलन्दिका । स्त्री । सर्वविद्यायाम् ॥ इति हेमचन्द्रः ॥

कलन्धुः । स्त्री । पत्रशाकविशेषे । कुवकालुकायाम् । घोलिकायाम् ॥

कलभः । पुं । पञ्चवर्षपर्यन्ते करिशावके ॥ इतिसुभूतिः ॥ त्रिंशद्वर्षस्तु कलभ इतिवैजयन्ती ॥ धत्तूरवृक्षे ॥ कलयति । कल विक्षेपे गतौ सङ्ख्याने वा । कलते वा । कलशब्दसङ्ख्यानयोः । कृशृशलिकलिगर्द्दिभ्योऽभच् । कलेभाषते वा । भाष व्यक्तायां वाचि । अन्येभ्योपीतिडः ॥

कलभवल्लभः । पुं । पीलुवृक्षे ॥

कलभी । स्त्री । चञ्चुवृक्षे ॥

कलभैरवः । त्रि । मधुरभीषणे ॥

कलमः । पुं । लेखन्याम् । वर्णतूल्याम् ॥ शालिधान्यप्रभेदे ॥ चौरे । पाटच्चरे ॥ कलते । कल श० । कलिकर्द्योरमः ॥

कलमोत्तमः । पुं । गन्धशालौ ॥

कलम्बः । पुं । नालिकाशाके ॥ पृषत्के । शरे ॥ कल्यते । कल विक्षेपे । डलयोरेकत्वात् कृकदिकडिकटिभ्योम्बजित्यम्बच् ॥ कदम्बे । नीपपादपे ॥ कडम्बे । शाकनाड्याम् ॥ कडति । कड मदे । अम्बच् ॥ केन जलेन लम्बते वा । लबि अवस्रंसने । पचाद्यच् ॥

कलम्बकः । पुं । कलम्बार्थे ॥ धाराकदम्बे ॥

कलम्बिका । स्त्री । कलम्बीशाके । नाली इतिभाषा ॥ ग्रीवापश्चान्नाड्याम् । मन्यायाम् ॥ इति हेमचन्द्रः ॥

कलम्बी । स्त्री । जलजलताशाकविशेषे । कलम्बिकायाम् । कलमीशाक इतिगौडभाषा । करेंमु इतिभाषा ॥ कडति । कड मदे । कृकटीत्यम्बच् । डलयोरेकत्वम् ॥ केजले लम्बते वा । लबि० । अच् । गौरादित्वान्ङीष् । कलम्बी स्तन्यदा प्रोक्ता मधुरा शुक्रकारिणी ॥

कलम्बुः । पुं । कलम्बिकायाम् ॥

कलम्बुटम् । न । नवनीते । हैयङ्गवीने ॥ इतिहारावली ॥

कलम्बूः । स्त्री । कलंब्याम् । करेंबू इति प्रसिद्धेशाके ॥

कलरवः । पुं । कपोते । पारावते ॥ कोकिले ॥ कलध्वनौ ॥ त्रि । कल

ध्वनिविशिष्टे ॥ कलो रवोऽस्य ॥

कललः । पुं । न । गर्भवेष्टनचर्म्मणि । जरायौ ॥ कलने । शुक्रशोणितसङ्घाते ॥ कल्यते । कलसङ्ख्याने । वृषादिभ्यश्चिदितिकलः ॥

कललजः । पुं । राले । सालनिर्य्यासे ॥

कललजोद्भवः । पुं । सालवृक्षे ॥

कलविङ्कः । पुं । चटके ॥ कलिङ्गवृक्षे । इन्द्रयवे ॥ कलं वङ्कते । वकि गतौ । अण् । पृषो० ॥

कलशः । पुं । न । घटे । कूटे । कलसा इतिभाषा ॥ कलं शयति । शु गतौ । अन्येभ्योपीतिडः ॥

कलशिः । स्त्री । पृश्निपर्ण्याम् । पिठवनीति भाषा । चाकुलिया इतिगौडभाषा ॥ गर्गर्याम् । मन्थपात्रे ॥ कलं श्यति । शोतनूकरणे । इन् । बाहुलकादाकारलोपः । कलशि मुद्धिगुर्व्वीं वल्लवा लोडयन्तीति माघः ॥

कलशी । स्त्री । पृश्निपर्ण्याम् ॥ गर्गर्याम् ॥ जाति लक्षणोङीष् ॥

कलसः । पुं । द्रोणपरिमाणे ॥ त्रि । घटे ॥ यथा । कलां कलां गृहीत्वा तु देवानांविश्वकर्मणा । निर्मितोयं सबै यस्मात् कलसस्तेन कथ्यत इति श्रीमहानिर्वाणतन्त्रम् ॥ अपि च । सागरे मथ्यमाने तु पीयूषार्थं सुरासुरैः । पीयूषधारणार्थाय निर्मितो विश्वकर्म्मणा ॥ कलाः कलास्तु देवानामसिता स्ताः पृथक् पृथक् । यतः कृतास्तु कलसा स्ततस्ते परिकीर्त्तिताः इत्यादि कालिकापुराणे ८७ अध्याये द्रष्टव्यम् ॥ केन जलेन लसति । लसश्लेषणक्रीडनयोः । पचाद्यच् ॥

कलसिः । स्त्री । } पृश्निपर्ण्याम् ॥ गर्गर्याम् ॥
कलसी । स्त्री । }

कलसीसुतः । पुं । अगस्त्यमुनौ ॥

कलसोदधिः । पुं । समुद्रे ॥ कलस इव उदधिः मन्थानाधारत्वात् ॥ इतिमहाभारतम् ॥

कलहः । पुं । खड्गकोषे ॥ भण्डने ॥ पुं । न । युद्धे । समरे । लडाई इतिभाषा ॥ पुं । राढे ॥ कलस्य मधुरध्वनेर्हननम् । अन्येभ्योपीतिडः ॥

कलहंसः । पुं । कादम्बे । वालिहाँस इतिगौडभाषाप्रसिद्धे हंसविशेषे । कलनादे ॥ राजहंसे ॥ नृपोत्तमे ॥ परात्मनि ॥ त्रयोदशाक्षरावृत्तिप्रभेदे ॥ सजसाः सगौ च कथितः कलहंसः । इति ल० । यमुनाविहारकुतुके कलहंसो व्रजकामिनीकमलिनीकृतकेलिः । जनचित्तहारिकलकण्ठनिनादः प्रमुदं तनोतु तव न

न्दतनूजः ॥ अस्य सिंहनादसंज्ञाप्यस्ति ॥ कलोमधुरवाक् हंसः ॥

कलहनाशनः । पुं । पूतिकरञ्जे ॥

कलहप्रियः । पुं । नारदे ॥ इतिमहाभारतम् ॥

कलहप्रिया । स्त्री । सारिकायाम् ॥

कलहान्तरिता । स्त्री । नायिकाभेदे ॥ अस्यालक्षणं यथा । पतिमवमन्य पश्चात् परितप्ता । यथा । कोपात् कान्तं पराणुद्य पश्चात् तापसमन्विता । कलहान्तरिताप्रोक्ता नायिका नयशालिभिरिति ॥

कला । स्त्री । मूलधनवृद्धौ । सूद इतिभाषा ॥ शिल्पादौ ॥ अंशमात्रे ॥ चन्द्रस्यषोडशांशे ॥ कालमाने । त्रिंशत् काष्ठात्मकेकाले ॥ स्त्रीरजसि ॥ नौकायाम् ॥ कपटे । छद्मनि ॥ विभूतौ ॥ शक्तौ ॥ कलनायाम् ॥ मरीचिपत्न्याम् । कर्दमात्मजायाम् ॥ राशेस्त्रिंशद्भागोंशस्तस्य षष्टिभागः कलेतिज्योतिर्विदः । यथा । विकलानां कलाषष्ट्या तत्षष्ट्याभाग उच्यते । तत्त्रिंशता भवेद्राशि र्भगणो द्वादशैवते । इति ॥ अथ शैवतन्त्रोक्तास्तु चतुःषष्टिकला लिख्यन्ते ॥ गीतम् १ । वाद्यम् २ । नृत्यम् ३ । नाट्यम् ४ । आलेख्यम् ५ । विशेषकच्छेद्यम् ६ । तण्डुलकुसुमवलिविकाराः ७ । पुष्पास्तरणम् ८ । दशनवसनाङ्गरागाः ९ । मणिभूमिकाकर्म १० । शयनरचनम् ११ । उदकवाद्यम् १२ । उदकघातः १३ । चित्रायोगाः १४ । माल्यग्रथनविकल्पाः १५ । शेखरापीडयोजनम् १६ । नेपथ्ययोगाः १७ । कर्णपत्रभङ्गाः १८ । गन्धयुक्तिः १९ । भूषणयोजनम् २० । इन्द्रजालम् २१ । कौचुमारयोगाः २२ । हस्तलाघवम् २३ । चित्रशाकापूपभक्ष्यविकारक्रिया २४ । पानकरसरागासवयोजनम् २५ । सूचीवापकर्माणि २६ । सूत्रक्रीडा २७ । प्रहेलिका २८ । प्रतिमाला २९ । दुर्वचकयोगाः ३० । पुस्तकवाचनम् ३१ । नाटिकाख्यायिकादर्शनम् ३२ । काव्यसमस्यापूरणम् ३३ । पट्टिकावेत्रवाणविकल्पाः ३४ । तर्ककर्माणि ३५ । तक्षणम् ३६ । वास्तुविद्या ३७ । रूप्यरत्नपरीक्षा ३८ । धातुवादः ३९ । मणिरागज्ञानम् ४० । आकरज्ञानम् ४१ । वृक्षायुर्वेदयोगाः ४२ । मेषकुक्कुटलावक युद्धविधिः ४३ । शुकसारिकाप्रलापनम् ४४ । उत्सादनम् ४५ । केशमार्ज्जनकौशलम् ४६ । अ

अरमुष्टिकाकथनम् ४७ । म्लेच्छितकविकल्पाः ४८ । देशभाषाज्ञानम् ४९ । पुष्पशकटिकानिमित्तज्ञानम् ५० । अत्र निमित्तज्ञानमिति पृथक् केचित् पठन्ति ॥ यन्त्रमातृका ५१ । धारणमातृका ५२ । सम्पाठ्यम् ५३ । मानसीकाव्यक्रिया ५४ । क्रिया विकल्पाः ५५ । छलितकयोगाः ५६ । अभिधानकोषच्छन्दोज्ञानम् ५७ । वस्त्रगोपनानि ५८ । द्यूतविशेषः ५९ । आकर्षक्रीडा ६० । बालकक्रीडनकानि ६१ । वैनायिकीनां विद्यानां ज्ञानम् ६२ । वैजयिकीनां विद्यानां ज्ञानम् ६३ । वैतालिकीनां विद्यानां ज्ञानम् ६४ ॥ इतिश्रीभागवतटीकायां श्रीधरस्वामिनः ॥ क्वचित् पुस्तके सूचीवापकर्मसूत्रक्रीडेत्येकं पदम् । तदुत्तरं वीणाडमरुकवाद्यानि । वैतालिकीनामित्यत्र वैयासिकीनामिति च पाठो दृश्यते ॥ कलति कलयति कलते वा । कलशब्दसङ्ख्यानयोः । पचाद्यच् ॥ कल्यते वा । पुंसीतिघः ॥ यद्वा कंलाति । आतोनुपे तिकः ॥

कलाकूलम् । न । विषे ॥ इति राजनिर्घण्टः ॥

कलाकेलिः । पुं । कामदेवे ॥ कलासु केलिर्यस्य ॥

कलाङ्कुरः । पुं । सारसे पक्षिणि ॥ कंसासुरे । मूलदेवे ॥

कलाचिका । स्त्री ।
कलची । स्त्री । } प्रकोष्ठे । कफोणेरधोमणिबन्धपर्यन्ते । कलाई इति भाषे तिकश्चित् ॥ इति हेमचन्द्रहारावल्यौ ॥

कलाजाजी । स्त्री । सुषव्याम् । कारव्याम् । कलौंजी मंगरैला इतिच ख्यातद्रव्ये ॥

कलादः । पुं । स्वर्णकारे ॥ कलामादत्ते । डुदाञ्० । मू० कः ॥

कलादकः । पुं । स्वर्णकारे ॥

कलानिधिः । पुं । चन्द्रे ॥ कला निधीयन्तेऽत्र । डुधाञ्० । कर्मण्यधिकरणे चेति किः ॥

कलानुनादी । पुं । रोलम्बे । भ्रमरे ॥ कलविङ्के ॥ कपिञ्जले ॥

कलान्तरम् । न । वृद्धौ । लाभे । सूद इतिभाषा ॥

कलापः । पुं । संहतौ । समूहे ॥ मयूरपिच्छे । बर्हे ॥ काञ्च्याम् ॥ भूषणसामान्ये ॥ तूणे ॥ चन्द्रे ॥ विदग्धे ॥ कातन्त्रव्याकरणे ॥ ग्रामविशेषे ॥ यथा ॥ देवापि र्योगमास्था

य कलापग्राममाश्रित: । सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति ॥

कलामाप्नोति । आप् + । कर्मण्यण् ॥ कला आप्यतेऽनेन वा । हलश्चेति घञ् ।

कलापक: । पुं । हस्तिकण्ठबन्धे ॥ कलापार्थे ॥ स्वार्थेक: ॥ न । ऋणविशेषे ॥ यस्मिन् काले मयूरा: कलापिनो भवन्ति तदुपचारात् कलापी कलापिनि देयमृणम् । कलाप्यश्वत्थयववुसाद्वुन् ॥

कलापी । पुं । प्लक्षवृक्षे ॥ बर्हिणि । मयूरे ॥ कोकिले ॥ कलापोऽस्यास्ति । इनि: ॥

कलापिनी । स्त्री । रात्रौ ॥ नागरमुस्तायाम् ॥

कलापूर्ण: । पुं । चन्द्रमसि ॥ कलाभि: पूर्ण: ॥

कलाभृत् । पुं । चन्द्रे ॥

कलामक: । पुं । व्रीहिविशेषे । कलमधान्ये ॥

कलाम्बिका । स्त्री । अर्थानाम्प्रयोगे । ऋणदाने ॥ इतित्रिकाण्डशेष: ॥

कलाय: । पुं । सतीनके । हरेणौ । मटर इतिभाषा ॥ कलायस्त्रिकट: प्रोक्त: । कलायो मधुर: स्वादु: पाके रूक्षश्च शीतल: । कषायो वातलो ग्राही कफपित्तहरो लघु: ॥ कलमयते । अय + । कर्मण्यण् ॥

कलायन: । पुं । नर्त्तकभावे ॥

कलायशाकम् । न । केराउ शाक इति ख्याते ॥ कलायशाकं भेदि स्याल्लघु तिक्तं त्रिदोषजित् ॥

कलाया । स्त्री । गण्डदूर्वायाम् ॥

कलालाप: । पुं । भ्रमरे । चञ्चरीके ॥

कलावान् । पुं । विधौ । चन्द्रे ॥ त्रि । कलाविशिष्टे ॥

कलावती । स्त्री । तुम्बुरोर्गन्धर्वविशेषस्य वीणायाम् ॥ श्रीराधामातरि । वृषभानुपत्न्याम् ॥ अप्सरोविशेषे ॥ आगमोक्तदीक्षाविशेषे ॥

कलाविक: । पुं । कुक्कुटे ॥

कलाविकल: । पुं । चटके ॥

कलाहक: । पुं । वाद्यविशेषे । काहलायाम् ॥

कलि: । पुं । शूरे ॥ आजौ युधि ॥ कलहे ॥ विभीतकवृक्षे ॥ अन्त्ययुगे । तिष्ये । कलियुगे ॥ यत्र कान्तागिरो वेदा यत्र धर्मोऽर्थसाधनम् । यत्र स्वप्रतिभा मानं तस्मै श्रीकलये नम इति कलिविडम्बनम् ॥ अत्र वर्ज्यानाह । । देवरेण सुतोत्पत्ति र्वानप्रस्थाश्रमग्रह: । दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ॥ समुद्रयानस्वीकार:

कमण्डलुविधारणम् । महाप्रस्थानगमनं गोपशुश्च सुराग्रहः ॥ अग्निहोत्रहवन्याश्च लेहो लीढापरिग्रहः । असवर्णासु कन्यासु विवाहश्च द्विजातिषु ॥ वृत्तस्वाध्यायसापेक्षमघसङ्कोचनं तथा । अस्थिसञ्चयनादूर्द्ध्वमङ्गस्पर्शनमेव च ॥ प्रायश्चित्तविधानञ्च विप्राणां मरणान्तिकम् । संसर्गदोषः पापेषु मधुपर्के पशोर्वधः ॥ दत्तौरसेतरेषान्तु पुत्रत्वेन परिग्रहः । शामित्रं चैव विप्राणां सोमविक्रयणं तथा ॥ दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ । कलौ युगे त्विमान् धर्मान् वर्ज्यानाहुर्मनीषिणः ॥ * ॥ तद्युगधर्मा यथा । कलौ तु धर्मपादानां तुर्य्यांशोऽधर्महेतुभिः । एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति ॥ तस्मिन् लुब्धा दुराचारा निर्दयाः शुष्कवैरिणः । दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः ॥ यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम् । शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः ॥ यस्मात् क्षुद्रदृशो मर्त्त्याः क्षुद्रभाग्या महाशनाः । कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ॥ दस्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः । राजानश्च प्रजाभक्ष्याः शिश्नोदरपरा द्विजाः ॥ अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः । तपस्विनो ग्रामवासा न्यासिनोऽत्यर्थलोलुपाः ॥ ह्रस्वकाया महाहारा बह्वपत्या गतह्रियः । शश्वत् कटुकभाषिण्यश्चौर्य्यमायोरुसाहसाः ॥ पणयिष्यन्ति वै क्षुद्राः किराटाः कूटकारिणः । अनापद्यपि मंस्यन्ते वार्त्तां साधु जुगुप्सिताम् ॥ पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् । भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ॥ पितॄन् भ्रातॄन् सुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः । ननान्दृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥ शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः । धर्मं वक्ष्यन्त्यधर्मज्ञा अधिरुह्योत्तमासनम् ॥ नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्षिताः । निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥ वासोऽन्नपानशयनव्यवायस्नानभूषणैः । हीनाः पिशाचसन्दर्शा भविष्यन्ति कलौ प्रजाः ॥ कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः । त्यक्ष्यन्ति च प्रियान् प्राणान् हनिष्यन्ति स्वकानपि ॥ न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि । पुत्रान् भार्य्याञ्च कुलजां

क्षुद्रा: शिश्नोदरम्भरा: ॥ कलौ नरा
न् जगतां परं गुरुं । लोकनाथा
नतपादपङ्कजम् । प्रायेण मर्त्त्या भ
गवन्तमच्युतं यक्ष्यन्ति पाषण्डविभि
न्नचेतस: ॥ * ॥ कलिकृतदोषवि
नाशोपायो यथा ॥ यन्नामधेयं म्रि
यमाण आतुर: पतन् स्खलन् वा विव
शो गृणन् पुमान् । विमुक्तकर्मार्ग
ल उत्तमाङ्गतिं प्राप्नोति यक्ष्यन्ति न
तं कलौ जना: ॥ पुंसां कलिकृतान्
दोषान् द्रव्यदेशात्मसम्भवान् । सर्वा
न् हरति चित्तस्थो भगवान् पुरुषो
त्तम: ॥ श्रुत: सङ्कीर्त्तितो ध्यात: पू
जितश्चादृतोऽपि वा । नृणां धुनो
ति भगवान् हृत्स्थो जन्मायुताऽशु
भम् ॥ यथा हेम्नि स्थितो वह्निर्दुर्व
र्णं हन्ति धातुजम् । एवमात्मगतो
विष्णुर्योगिनामशुभाशयम् ॥ विद्या
तप: प्राणनिरोधमैत्रीतीर्थाभिषे
कव्रतदानजप्यै: । नात्यन्तशुद्धिं ल
भतेऽन्तरात्मा यथा हृदिस्थे भगवत्य
नन्ते ॥ तस्मात् सर्वात्मना राजन् हृ
दिस्थं कुरु केशवम् । म्रियमाणो ह्य
वहित स्ततो यासि पराङ्गतिम् ॥
कलेर्दोषनिधे राजन्नस्ति ह्येको म-
हान् गुण: । कीर्त्तनादेव कृष्णस्य मु
क्तसङ्ग: परं व्रजेत् ॥ कृते यद्ध्याय

तो विष्णुं त्रेतायां यजतो मखै: । द्वाप
रे परिचर्य्यायां कलौ तद्धरिकीर्त्तना
त् ॥ * ॥ तद्युगशेषधर्म्मा: ॥ सौरा
ष्ट्रावन्त्याभीराश्च शूरा अर्व्वुदमाल
वा: । व्रात्या द्विजा भविष्यन्ति शूद्र
प्राया जनाधिपा: ॥ सिन्धोस्तटं च
न्द्रभागां कान्तीं काश्मीरमण्डलम्
। भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छा
श्चाब्रह्मवर्च्चस: ॥ तुल्यकाला इमे रा
जन् म्लेच्छप्रायाश्च भूभृत: । एतेऽध
र्म्मानृतपरा: फल्गुदास्तीव्रमन्यव:-
॥ स्त्रीबालगोद्विजघ्नाश्च परदारधना
दृता: । उदितास्तमितप्राया अल्प
सत्त्वाऽल्पकायुष: ॥ असंस्कृता: क्रि
याहीना रजसा तमसावृता: । प्रजा
स्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरू
पिण: ॥ जनतन्नाथास्तेपदा स्तच्छी
लाचारवादिन: । अन्योन्यतो राज
भिश्च क्षयं यास्यन्ति पीडिता: ॥ तत
श्चानुदिनं धर्म्म: सत्यं शौचं क्षमा द
या । कालेन बलिना राजन् नङ्
क्ष्यत्यायुर्ब्बलं स्मृति: ॥ वित्तमेव क
लौ नृणां जन्माचारगुणोदय: । धर्म्म
न्याय व्यवस्थायां कारणं बलमेव हि
॥ दाम्पत्ये भिरुचिर्हेतुर्मायैव व्या
वहारिके । स्त्रीत्वे पुंस्त्वे च हि रति
र्विप्रत्वे सूत्रमेव हि ॥ लिङ्गमेवा

कलिः

असत्यातावन्योन्यापत्तिकारणम्।
अदक्ष्यान्यायदौर्बल्यं पाण्डित्येचा
पलंवचः ॥ अनाढ्यतैवासाधुत्वे सा
धुत्वेदम्भएवहि । स्वीकार एवचोद्वा
हे स्नानमेव प्रसाधनम् ॥ दूरेवार्य्य
यनंतीर्थं लावण्ये केशधारणम् । उ
दरम्भरता स्वार्थः सत्यत्वे धार्ष्ट्यमे
वहि ॥ दाक्ष्ये कुटुम्बभरणं यशोर्थे
धर्मसेवनम् । एवंप्रजाभिर्दुष्टाभि
राकीर्णेक्षितिमण्डले ॥ ब्रह्मविट्क्ष
त्रशूद्राणांयो बली भविता नृपः। प्र
जाहिलुब्धैराजन्यैर्निर्घृणैर्दस्युधर्मि-
भिः॥आच्छिन्नदारद्रविणायास्यन्ति
गिरिकाननम् । शाकमूलामिषक्षौ
द्रफलपुष्पाष्टि भोजनाः ॥ अनावृ
ष्ट्याविनङ्क्ष्यन्ति दुर्भिक्षकरपीडि-
ताः । शीतवातातपप्रावृड्हिमैर
न्योन्यतःप्रजाः ॥ क्षुत्तृड्भ्यांव्या
धिभिश्चैव सन्तप्स्यन्ते चचिन्तया ।
त्रिंशद्विंशतिवर्षाणि परमायुःकलौ
नृणाम् ॥ क्षीयमाणेषुदेहेषुदेहि
नां कलिदोषतः । वर्णाश्रमवतां
धर्मेनष्टेवेदपथे नृणाम् ॥ पाषण्ड
प्रचुरे धर्मे दस्युप्रायेषुराजसु । चौ
र्यानृतवृथाहिंसानाना वृत्तिषुवैनृ
षु ॥ शूद्रप्रायेषुवर्णेषु छागप्रायासु
धेनुषु । गृहप्रायेष्वाश्रमेषु यौन

कलिः

प्रायेषुबन्धुषु ॥ अनुप्रायास्वोषधी
षु शमीप्रायेषुस्थाणुषु । विद्यु
त्प्रायेषुमेघेषुशून्यप्रायेषुसद्मसु ।
इत्थंकलौ गतप्राये जनेषुखरधर्मिषु
। धर्मत्राणाय सत्त्वेन भगवानवत-
रिष्यति ॥ इतिश्रीभागवतम् ॥
* ॥ अथ विशेषस्तु श्रीमहा-
निर्वाणतन्त्रे। तत्रश्रीमदाद्या प्रश्नः
। आयाते पापिनिकलौ सर्वधर्मवि
लोपिनि । दुराचारे दुष्प्रपञ्चे दुष्ट
कर्मप्रवर्त्तके ॥ न वेदाः प्रभवस्तत्र
स्मृतीनां स्मरणं कुतः । नानेतिहा
सयुक्तानां नानामार्गप्रदर्शिनाम् ॥ ब
हूनाम्पुराणानां विनाशोभविता
विभो । तदालोकाभविष्यन्ति धर्मक
र्मबहिर्मुखाः ॥ उच्छृङ्खलामदोन्म
त्ताः पापकर्मरताः सदा । कामुका
लोलुपाः क्रूरा निष्ठुरादुर्मुखाः श
ठाः ॥ स्वल्पायुर्मन्दमतयोरोगशो
कसमाकुलाः । निःश्रीका निर्बला
नीचा नीचाचारपरायणाः ॥ नीच
संसर्गनिरताः परवित्तापहारकाः ।
परनिन्दापरद्रोहपरीवादपराः ख-
लाः॥ परस्त्रीहरणे पापशङ्काभय
विवर्जिताः । निर्धनामलिनादीना
दरिद्राश्चिररोगिणः ॥ विप्राः शूद्र
समाचाराः सन्ध्यावन्दनवर्जिताः ।

कलिः

कलाव्ययाजका लुब्धा दुर्वृत्ताः पाप
कारिणः ॥ असत्यभाषिणो मूर्खा
दाम्भिका दुष्टपण्डिताः । कन्याविक्र
यिणो व्रात्या स्नेहोत्रतपराङ्मुखाः
॥लोकप्रतारणार्थाय जपपूजापराय
णाः । पाषण्डाः पण्डितम्मन्याः
श्रद्धाभक्तिविवर्जिताः ॥ कदाचाराः
कदाचारा धूर्तकाः शूद्रसेवकाः । शू
द्रान्नभोजिनः क्रूरा वृषली रतिका-
मुकाः ॥ दास्यन्ति धनलोभेन स्वदा
रान्नीचजातिषु । ब्राह्मण्यचिह्नमे
तावत् केवलं सूत्रधारणम् ॥ नैव
पानादिनियमो भक्ष्याभक्ष्यविवेच
नम् । धर्मशास्त्रे सदा निन्दा साधुद्रो
हो निरन्तरम् ॥ सत्कथालापमात्रञ्च
न तेषां मनसि क्वचित् । त्वयाकृता
नि तन्त्राणि जीवोद्धारणहेतवे ॥ नि
गमागमजातानि भुक्तिमुक्तिकरा-
णि च । देवीनां यत्र देवानां मन्त्रयन्त्रा
दिसाधनम् ॥ कथितावहवो न्यासाः
सृष्टिस्थित्यादिलक्षणाः । बद्धपद्मास
नादीनि गदितान्यपि भूरिशः ॥ पशु
वीरदिव्यभावा देवता मन्त्रसिद्धिदाः
। शवासनं चितारोहो मुण्डसाध
नमेव च ॥ लतासाधनकर्माणि त्वयो
क्तानि सहस्रशः । पशुभावदिव्यभा
वौ स्वयमेव निवारितौ ॥ कलौ न प

कलिः

शुभावोऽस्ति दिव्यभावः कुतो भवेत्
। पत्रं पुष्पं फलं तोयं स्वयमेवाहरेत्
पशुः ॥ न शूद्रदर्शनं कुर्यान्मनसा न
स्त्रियं स्मरेत् । दिव्यश्च देवताप्रायः
शुद्धान्तःकरणः सदा ॥ द्वन्द्वातीतो
वीतरागः सर्वभूतसमः क्षमी । क
लिकल्मषयुक्तानां सर्वदाऽस्थिरचे
तसाम् । निद्रालस्यप्रसक्तानां भाव
शुद्धिः कथं भवेत् ॥ वीरसाधनकर्मा
णि पञ्चतत्त्वोदितानि च । मद्यं मांसं
तथा मत्स्यं मुद्रा मैथुनमेव च । एता
नि पञ्चतत्त्वानि त्वया प्रोक्तानि शङ्क
र ॥ कलिजा मानवा लुब्धाः शिश्नो
दरपरायणाः । लोभात्तत्र पतिष्य
न्ति न करिष्यन्ति साधनम् ॥ इन्द्रिया
णां सुखार्थाय पीत्वा च बहुलं मधु ।
भविष्यन्ति मदोन्मत्ता हिताहितवि
वर्जिताः ॥ परस्त्रीधर्षकाः केचिद् द
स्यवो बहवो भुवि । न करिष्यन्ति ते
मत्ताः पापयोनिविचारणम् ॥ अ
तिपानादिदोषेण रोगिणो बहवः
क्षितौ । शक्तिहीना बुद्धिहीना भूत्वा
चविकलेन्द्रियाः ॥ ह्रदे गर्ते प्रान्तरे
च प्रासादात् पर्वतादपि । पतिष्यन्ति
मरिष्यन्ति मनुजा मदविह्वलाः ॥
केचिद्विवादयिष्यन्ति गुरुभिः स्वज
नैरपि । केचिन्मौना मृतप्राया अपरे ब

कलि:

हुजल्पका: ॥ अकार्यकारिण: क्रूराध
र्ममार्गविलोपका: ॥ हिताय यानिक
र्माणिकथितानि त्वया प्रभो । अन्यता
नि महादेवविपरीतानि मानवे ॥ के
नायोगं करिष्यन्ति न्यासजातानि के
पिवा । स्तोत्रपाठं यन्त्रलिपिं पुरश्चर्यां
जगत्पते ॥ युगधर्मप्रभावेण स्वभावे
न कलौ नरा: । भविष्यन्त्यतिदुर्वृत्ता:
सर्वथा पापकारिण: ॥ तेषामुपायं
दीनेश कृपया कथय प्रभो । आयुरा-
रोग्यवर्चस्यं बलवीर्यविवर्द्धनम् ॥ वि
द्याबुद्धिप्रदं नृणामप्रयत्नशुभंकरम् ।
येन लोका भविष्यन्ति महाबलपराक्र
मा: ॥ शुद्धचित्ता: परहिता मातापि
त्रो: प्रियङ्करा: । स्वदारनिष्ठा: पुरु
षा: परस्त्रीषु पराङ्मुखा: ॥ देवता
गुरुभक्ताश्च पुत्रस्वजनपोषका: । ब्रह्म
ज्ञा ब्रह्मविद्याश्च ब्रह्मचिन्तनमानसा:
॥ सिद्ध्यर्थं लोकयात्राया: कथयस्व हि
ताय यत् । कर्त्तव्यं यदकर्त्तव्यं वर्णा
श्रमविभेदत: । विना त्वां सर्वलोका
नां कस्त्राता भुवनत्रये ॥ इति श्रीमहा
निर्वाणतन्त्रे प्रथमोल्लासे जीवनिस्ता
रोपाय प्रश्न: ॥ इति देव्या वच: श्रुत्वा
शङ्करो लोकशङ्कर: । कथयामास त
त्त्वेन महाकारुण्यवारिधि: ॥ श्रीस
दाशिव उवाच ॥ साधु पृष्टं महाभागे

कलि:

जगतां हितकारिणि । एतादृश: शु-
भ: प्रश्नो न केनापि कृत: पुरा ॥ धन्या
सि सुकृतज्ञासि हितासि कलिजन्म
नाम् । यद्यदुक्तं त्वया भद्रे सत्यं सत्यं
यथार्थत: ॥ सर्वज्ञा त्वं त्रिकालज्ञा ध
र्मज्ञा परमेश्वरि । भूतम्भवद्भविष्यञ्च
धर्ममुक्तं त्वया प्रिये ॥ यथातत्त्वं यथा
न्यायं यथायोग्यं न संशय: । कलिक
ल्मषदीनानां द्विजादीनां सुरेश्वरि
॥ मेध्यामेध्याविचाराणां न शुद्धि:
श्रौतकर्मणा । न संहिताद्यै: स्मृति
भिरिष्टसिद्धिर्नृणां भवेत् ॥ सत्यं स
त्यं पुन: सत्यं सत्यं सत्यं मयोच्यते
। विनाह्यागममार्गेण कलौ नास्ति ग
ति: प्रिये ॥ श्रुतिस्मृतिपुराणादौ मयै
वोक्तं पुराशिवे । आगमोक्तविधाने
न कलौ देवान् यजेत् सुधी: ॥ कला
वागममुल्लङ्घ्य योऽन्यमार्गे प्रवर्त्तते
। न तस्य गतिरस्तीति सत्यं सत्यं न सं
शय: ॥ सर्वैर्वेदै: पुराणैश्च स्मृतिभि:
संहितादिभि: । प्रतिपाद्योऽस्मि ना
न्योऽस्ति प्रभुर्जगति मां विना ॥ आ
मनन्ति च ते सर्वे मत्पदं लोकपाव-
नम् । मन्मार्गविमुखा लोका: पा
षण्डा ब्रह्मघातिन: । अतो मन्म
तमुत्सृज्य यो यत्कर्म समाचरेत् ।
निष्फलं तद्भवेद्देवि कर्त्तापि नारकी-

भवेत् । मूढो मन्त्रमनुत्सृज्य योऽन्य
न्मन्त्रमुपाश्रयेत् । ब्रह्महापितृहा
स्त्रीघ्नः सभवेन्नात्र संशयः ॥ कलौ
तन्त्रोदिता मन्त्राः सिद्धास्तूर्णफल
प्रदाः। शस्ताः कर्मसु सर्वेषु जपय
ज्ञक्रियादिषु ॥ निर्वीर्याः श्रौतजा
तीया विषहीनोरगा इव । सत्या
दौ सफला आसन् कलौ ते मृतका
इव ॥ पञ्चालिका यथाभित्तौ सर्वे
न्द्रियसमन्विताः । अमूरशक्ताः का
र्येषु तथान्ये मन्त्रराशयः ॥ अन्यम
न्त्रैः कृतं कर्म वन्ध्यास्त्रीसङ्गमो यथा
। नतत्र फलसिद्धिः स्याच्छ्रम एव हि के
वलम् ॥ कलावन्योदितैर्मार्गैः सिद्धि
मिच्छति यो नरः । तृषितो जाह्नवी
तीरे कूपं खनति दुर्मतिः ॥ मदुक्ताद्
दितं धर्मं हित्वान्यद्धर्ममीहते । अ
मृतं स्वगृहे त्यक्त्वा क्षीरमार्कं स वा
ञ्छति ॥ नान्यः पन्था मुक्तिहेतुरि
हामुत्रसुखाप्तये । यथा तन्त्रोदितो
मार्गो मोक्षाय च सुखाय च ॥ तन्त्रा
णि बहुधोक्तानि नानाख्यानान्विता
नि च । सिद्धानां साधकानाञ्च
विधानानि च भूरिशः ॥ अधिकारिवि
भेदेन पशुबाहुल्यतः प्रिये । कुला
चारोदितं धर्मं गुप्त्यर्थं कथितं क्वचित्
॥ जीवप्रवृत्तिकारीणि कानिचित्क

थितान्यपि । देवानानाविधाः प्रोक्ता
देव्योऽपि बहुधाः प्रिये ॥ भैरवाश्चैव
वेतालावटुका नायिकागणाः । शा
क्ताः शैवा वैष्णवाश्च सौरा गाणपता
दयः ॥ नानामन्त्राश्च यन्त्राणि सिद्धोपा
यान्यनेकशः । भूरिप्रयाससाध्यानि
यथोक्त फलदानि च ॥ यथा यथाकृ
ताः प्रश्ना येनयेन यदायदा । तदात
स्योपकाराय तथैवोक्तं मया प्रिये ॥
सर्वलोकोपकाराय सर्वप्राणिहिताय
च । युगधर्मानुसारेण याथातथ्येन
पार्वति ॥ त्वयायादृक्कृतः प्रश्नो न
केनापि पुराकृतः । तव स्नेहेन वक्ष्या
मि सारात्सारं परात् परम् ॥ वेदा
नामागमानाञ्च तन्त्राणाञ्च विशेष
तः । सारमुद्धृत्य देवेशि तवाग्रे कथ्य
ते मया ॥ यथा नरेषु तन्त्रज्ञाः सरि
तां जाह्नवी यथा । यथाहं त्रिदिवेशा
नामागमानामिदं तथा ॥ किं वेदैः
किं पुराणैश्च किं शास्त्रैर्बहुभिः शिवे ।
विज्ञाते ऽस्मिन्महातन्त्रे सर्वसिद्धीश्व
रो भवेत् ॥ यतो जगन्मङ्गलाय त्वया
हं विनियोजितः । अतस्ते कथयि
ष्यामि यद्विश्वहितकृद्भवेत् ॥ कृते
विश्वहिते देवि विश्वेशः परमेश्वरः
। प्रीतो भवति विश्वात्मा यतो विश्वं त
दाश्रितम् ॥ स एक एव सद्रूपः सत्यो

कलिः

ऽद्वैतः परात्परः । स्वप्रकाशः सदा
पूर्णः सच्चिदानन्दलक्षणः ॥ निर्वि
कारोनिराधारोनिर्विशेषो निराकु
लः । गुणातीतः सर्वसाक्षीसर्वात्मा
सर्वदृग्विभुः ॥ गूढः सर्वेषुभूतेषुस
र्वव्यापीसनातनः । सर्वेन्द्रियगुणा
भासः सर्वेन्द्रियविवर्जितः ॥ लोका
तीतो लोकहेतु रवाङ्मनसगोच
रः । सवेत्तिविश्वंसर्वज्ञस्तं नजाना-
तिकश्चन ॥ तदधीनंजगत्सर्वं त्रैलो
क्यं सचराचरम् । तदालम्बनतस्ति
ष्ठेदवितर्क्यमिदंजगत् ॥ तत्सत्यता
मुपाश्रित्यसद्वद्भातिपृथक् पृथक् ।
तेनैवहेतुभूतेनवयंजातामहेश्वरि
॥ कारणं सर्वभूतानां सएकः परमे
श्वरः । लोकेषु सृष्टिकरणात् स्र
ष्टाब्रह्मेतिगीयते ॥ विष्णुःपालयि-
तादेविसंहर्त्ताहंतदिच्छया । इन्द्रा
द्यालोकपालाः सर्वेतद्वशवर्त्तिनः
॥ स्वेस्वेधिकारेनिरता स्तेशासतित
दाज्ञया । त्वम्पराप्रकृति स्तस्यपूज्या
सि भुवनत्रये ॥ तेनान्तर्यामिरूपे
णतत्तद्विषययोजिताः । स्वस्वंकर्म
प्रकुर्वन्तिन स्वतन्त्राः कदाचन ॥ य
द्भयाद्वाति वातोपिसूर्यस्तपतियद्भ
यात् । वर्षन्ति तोयदाः कालेपुष्प
न्तितरवोवने ॥ कालङ्कालयते का

कलिः

लेमृत्योर्मृत्युर्भियोभयम् । वेदा
न्तवेद्योभगवान् यत्तच्छब्दोपल-
क्षितः ॥ सर्वेदेवाश्चदेव्यश्चतन्मयाः
सुरवन्दिते । आब्रह्मस्तम्बपर्यन्तंत
न्मयं सकलं जगत् ॥ तस्मिंस्तुष्टे ज
गत्तुष्टंप्रीणिते प्रीणितं जगत् । तदा
राधनतोदेवि सर्वेषांप्रीणनं भवेत्॥
तरोर्मूलाभिषेकेणयथातद्भुजपल्ल-
वाः । तृप्यन्तितदनुष्ठानात्तथा सर्वे
ऽमरादयः ॥ यथातवार्चनाध्यानात्
पूजनाज्जपनात्प्रिये । भवन्तितुष्टाः
सुन्दर्यस्तथाजानीहिसुव्रते ॥ यथा
गच्छन्तिसरितो ऽवशेनापिसरित्प-
तिम् । तथार्चादीनिकर्माणितदुद्दे
श्यानिपार्वति ॥ योयोयायांयाम्य
जेद्देवानश्रद्धयायद्दाप्तये । तत्तद्द
दातिसोध्यक्षस्तैस्तैर्देवगणैःशिवे ॥ ब
हुनात्रकिमुक्तेनतवाग्रेकथ्यतेप्रिये -
। ध्येयः पूज्यः सुखाराध्यस्तंविना
नास्तिमुक्तये ॥ नायासोनोपवासश्च
कायक्लेशोनविद्यते । नैवाचारा
दिनियमोनो पचाराश्च भूरिशः ॥
नदिक्कालविचारोस्ति न मुद्रान्यास
संहतिः । यत्साधनेकुलेशानितंवि
ना कोन्यमाश्रयेत् ॥ * ॥ इतिश्री
महानिर्वाण तन्त्रे सर्वतन्त्रोत्तमोत
मे सर्वधर्मनिर्णयसारे श्रीमदाद्या

सदाशिवसंवादे जीव निस्तारोपाय प्रश्नोत्तरे परब्रह्मोपासनोपक्रमो नाम द्वितीयोल्लासः ॥ २ ॥ * ॥ तृतीयोल्लासे ब्रह्मोपदेशकथनम् ॥ कलौ पापयुगे घोरे तपोहीनेति दुस्तरे । निस्तारबीजमेतावद्ब्रह्ममन्त्रस्य साधनम् ॥ साधनानि बहूक्तानि नाना तन्त्रागमादिषु । कलौ दुर्बलजीवानामसाध्यानि महेश्वरि ॥ अल्पायुषः स्वल्पसत्वा अन्नाधीनासवः प्रिये । लुब्धा धनार्जनेव्यग्राः सदा चञ्चलमानसाः ॥ समाधावस्थिरधियो योगक्लेशासहिष्णवः । तेषां हिताय मोक्षाय ब्रह्ममार्गोयमीरितः ॥ कलौ नास्त्येव नास्त्येव सत्यं सत्यं मयोच्यते । ब्रह्मदीक्षां विना देवि कैवल्या य सुखाय चेति ॥ * ॥ श्रुत्वास्य क परब्रह्मोपासनं परमेश्वरी । परमानन्दसम्पन्ना शङ्करं परिपृच्छति ॥ श्रीदेव्युवाच ॥ कथितं यत्त्वया नाथ ब्रह्मोपासनमुत्तमम् . सर्वलोकप्रियकरं साक्षाद्ब्रह्मपदप्रदम् ॥ तेजोबुद्धिबलैश्वर्यदायकं सुखसाधनम् । तृप्तास्मि जगदीशानत ववाक्यामृतप्लुता ॥ यदुक्तं करुणासिन्धो यथा ब्रह्मनिषेवणात् । गच्छन्ति ब्रह्मसायुज्यं तथैव मम साधनात् ॥ एतद्वेदितुमिच्छामि मदीयं साधनं परम् । ब्रह्मसायुज्यजननं यत्त्वया कथितं प्रभो ॥ विधानं कीदृशं तस्य साधनं केन वर्त्मना । मन्त्रः को वा च विहितो ध्यानपूजादिकञ्च किम् ॥ सविशेषं सावशेषमामूलात्कथयसि । मम प्रीतिकरं देव लोकानां हितकारकम् ॥ कोह्यन्यस्त्वामृते शम्भो भव व्याधिभिषग्गुरुः ॥ इति देव्या वचः श्रुत्वा देवदेवो महेश्वरः । उवाच परया प्रीत्या पार्वतीं पार्वतीपतिः ॥ श्रीसदाशिव उवाच ॥ शृणु देवि महाभागे तवाराधनकारणम् । तव साधनतो येन ब्रह्मसायुज्यमश्नुते ॥ त्वं परा प्रकृतिः साक्षाद्ब्रह्मणः परमात्मनः । त्वत्तो जातं जगत्सर्वं त्वं जगज्जननी शिवे ॥ महदाद्यणुपर्यन्तं यदेतत् सचराचरम् । त्वयैवोत्पादितं भद्रे त्वदधीनमिदं जगत् ॥ त्वमाद्या सर्वविद्यानामस्माकमपि जन्मभूः । त्वं जानासि जगत्सर्वं न त्वां जानाति कश्चन ॥ त्वं काली तारिणी दुर्गा षोडशी भुवनेश्वरी । धूमावती त्वं बगला भैरवी छिन्नमस्तका ॥ त्वमन्नपूर्णा वाग्देवी त्वं देवि कमलालया । सर्वशक्तिस्वरूपा त्वं सर्वदेवमयी तनुः ॥ त्वमेव सूक्ष्मा स्थूला त्वं व्यक्ताव्यक्तस्वरूपिणी । नि

राकारापि साकारा कस्त्वांवेदितुम
र्हति॥ उपासकानां कार्यार्थंश्रेयसे
जगतामपि । दानवानां विनाशाय
धत्सेनानाविधास्तनूः ॥ चतुर्भुजा
त्वंद्विभुजाषड्भुजाष्टभुजातथा ।
त्वमेवविश्वरक्षार्थंनानाशस्त्रास्त्रधा-
रिणी ॥ तत्तद्रूपविभेदेन मन्त्रयन्त्रा
दिसाधनम् । कथितंसर्वतन्त्रेषु-
भावाश्चकथितास्त्रयः ॥ पशुभावः
कलौनास्ति दिव्यभावोऽपिदुर्लभः ।
वीरसाधनकर्म्माणिप्रत्यक्षाणि क-
लौयुगे ॥ कुलाचारं विनादेवि क-
लौसिद्धिर्नजायते । तस्मात्सर्वप्रय
त्नेनसाधयेत् कुलसाधनम् ॥ कुला
चारेणदेवेशि ब्रह्मज्ञानं प्रजायते ।
ब्रह्मज्ञानयुतो मर्त्त्योजीवन्मुक्तोन
संशयः ॥ ज्ञानेनमेध्यमखिलममे
ध्यंज्ञानतोभवेत् । ब्रह्मज्ञाने सम् -
त्पन्नेमेध्यामेध्यं नविद्यते ॥ योजा
नातिपरम्ब्रह्म सर्वव्यापिसनातनम्
। किमस्त्यमेध्यं तस्याग्रेसर्वं ब्रह्मेति
जानतः ॥ त्वंसर्वरूपिणीदेविस-
र्वेषां जननीपरा । तुष्टायांत्वयिदे
वेशि सर्वेषांतोषणम्भवेत् ॥ सृष्टेरा
दौत्वमेकासीत् तमोरूपमगोचर
म् । त्वत्तोजातंज गत्सर्वम्परब्रह्मसि
सृक्षया ॥ महत्तत्त्वादिभूतान्तंत्वयासृ

ष्टमिदंजगत् । निमित्तमात्रंतद्ब्रह्मस
र्वकारणकारणम् ॥ सद्रूपंसर्वतोव्या
पिसर्वमावृत्त्यतिष्ठति । सदैकरूपंचि
न्मात्रंनिर्लिप्तंसर्ववस्तुषु ॥ नकरोति
नचाश्नाति न गच्छति नतिष्ठति । स
त्यं ज्ञानमनाद्यन्तमवाङ्मनसगोच
रम् ॥ तस्येच्छामात्रमालम्ब्यत्वंमहा
योगिनीपरा । करोषि पासि हंस्य-
न्तेजगदेतच्चराचरम् ॥ तवरूपंमहा
कालोजगत्संहारकारकः । महासं
हारसमयेकालः सर्वंग्रसिष्यति ॥
कलनात्सर्वभूतानांमहाकालः प्रकी
र्त्तितः । महाकालस्य कलनात्त्वमा
द्याकालिकापरा ॥ कालसंग्रसनात्
कालीसर्वेषामादिरूपिणी । काल
त्वादादिभूतत्वादाद्याकालीतिगीय
ते ॥ पुनःस्वरूपमासाद्यतमोरूपंनि
राकृति । वाचातीतं मनोगम्यंत्वमे
कैवावशिष्यसे ॥ साकारापि निराका
रा मायया बहुरूपिणी । त्वंसर्वादि
रनादिस्त्वंकर्त्रीहर्त्रीचपालिका ॥ अ
तस्तेकथितंभद्रेब्रह्ममन्त्रेणदीक्षितः ।
यत्फलंसमवाप्नोतितत्फलंतवसाध-
नात् ॥ नानाचारेणभावेन देशका-
लाधिकारिणाम् । विभेदात्कथितं
भद्रेकुत्रचित्गुप्तसाधनम् ॥ येयत्राधि
कृतामर्त्त्यास्तेतत्फलभागिनः । भ

विष्यन्ति तरिष्यन्ति मानुषा गतकि
ल्बिषाः ॥ बहुजन्मार्जितैः पुण्यैः कु
लाचारे मतिर्भवेत् । कुलाचारेण पू
तात्मा साक्षाच्छिवमयो भवेत् ॥ यत्रा
स्ति भोगबाहुल्यं तत्र योगस्य का कथा
। योगेऽपि भोगविरहः कौलस्तु भयम
श्नुते ॥ एकश्चेत्कुलतत्वज्ञः पूजितो
येन सुव्रते । सर्वे देवाश्च देव्यश्च पूजि
ता नात्र संशयः ॥ पृथिवीं हेमसंपूर्णां-
दत्त्वा यत्फलमाप्नुयात् । तस्मात्को
टिगुणं पुण्यं लभते कौलिकार्चनात्
॥ श्वपचोऽपि कुलज्ञानी ब्राह्मणादति
रिच्यते । कुलाचारविहीनस्तु ब्राह्म
णः श्वपचाधमः ॥ कौलधर्मात् परो
धर्मो नास्ति ज्ञाने तु मामके । यस्या
नुष्ठानमात्रेण ब्रह्मज्ञानी नरो भवेत्
॥ सत्यं ब्रवीमि ते देवि हृदि कृत्वाव
धारय । सर्वधर्मोत्तमात् कौलात् प
रो धर्मो न विद्यते ॥ अयन्तु परमो मा
र्गो गुप्तोऽस्ति पशुसङ्कटे । व्यक्तो भविष्य
त्यचिरात् संप्राप्ते प्रबले कलौ ॥ क
लिकाले प्रवृद्धे तु सत्यं सत्यं मयोच्य
ते । नश्यन्ति विना कौलान् पशवो
मानवा भुवि ॥ यदा तु वैदिकी दीक्षा
दीक्षा पौराणिकी तथा । नश्यत्य-
तिवरारोहे तदैव प्रबलः कलिः ॥ य
दा तु पुण्यपापानां परीक्षा वेदसम्भवा

। नश्यत्यतिशिवे शास्त्रे तदैव प्रबलः
कलिः ॥ क्वचिच्छिन्ना क्वचिद्भिन्ना य
दा सुरतरङ्गिणी । भविष्यति कुले
शानि तदैव प्रबलः कलिः ॥ यदा तु-
म्लेच्छजातीया राजानो धनलोलुपाः
। भविष्यन्ति महाप्राज्ञे तदैव प्रबलः
कलिः ॥ यदा स्त्रियोऽतिदुर्दान्ताः-
कर्कशाः कलहे रताः । गर्हयिष्यन्ति
स्वभर्त्तारं तदैव प्रबलः कलिः ॥ य
दा तु मानवा भूमौ स्त्रीजिताः काम
किङ्कराः । द्रुह्यन्ति गुरुमित्रादीन्
तदैव° ॥ यदा भोगी स्वल्पफला तो
यदास्तोकवर्षिणः । असम्यक्फलि
नो वृक्षास्तदैव° ॥ भ्रातरः स्वज
नामात्यां यदा धनकाङ्क्षया । मि
थः संप्रहरिष्यन्ति तदैव° ॥ प्रक
टे मत्स्यमांसादौ निन्दादण्डविवर्जिते
। गूढपानं चरिष्यन्ति तदैव° ॥ स
त्यत्रेताद्वापरेषु यथा मद्यादिसेवन
म् । कलावपि तथा कुर्यात् कुलधर्मा
नुसारतः ॥ ये कुर्वन्ति कुलाचारं सत्य
पूता जितेन्द्रियाः । व्यक्ताचारा दया
शीलान्नहि तान् बाधते कलिः ॥ गुरु
शुश्रूषणे युक्ता भक्ता मातृपदाम्बुजे
। अनुरक्ताः स्वदारेषु नहि° ॥ सत्य
व्रताः सत्यनिष्ठाः सत्यधर्मपरायणाः
। कुलसाधनसत्याये नहि° ॥ कुलमा

गोप्यातत्त्वानि शोधितानि च योगिने। येदद्युः सत्यवचसे नहि० ॥ हिंसा मात्सर्य्यरहिता दम्भद्वेषविवर्जिताः। कुलधर्मेषु निष्ठायेनहि०॥ कौलिकैः सह संसर्गंवसतिं कुलसाधुषु । कुर्वन्ति कौलसेवांये नहि०॥ नानावेषधराःकौलाः कुलाचारेषु निश्चलाः। सेवन्तेत्वां कुलाचारैर्नहि० ॥ जीवसेकादिसंस्काराः पितृश्राद्धादिकाः क्रियाः । येकुर्वन्तिकुलाचारैर्नहि० ॥ स्नानंदानं तपस्तीर्थंव्रतं तर्पणमेवच। येकुर्वन्ति कुलाचारैर्नहि० ॥ कुलतत्त्वं कुलद्रव्यं कुलयोगिनमेवच। नमस्कुर्वन्ति ये भक्त्यानहि०॥ कौटिल्यान्मतहीनानां स्वच्छानाकुलमार्गिणाम् । परोपकारप्रतिनां साधूनां किङ्करः कलिः॥ कलेर्दोषसमूहस्य महानेकोगुणः प्रिये । सत्यमतिचकौलानांश्रेयः सङ्कल्पमात्रतः ॥ अपरेतुयुगे देविपुण्यं पापञ्चमानसम् । व्यवत्सासीत् कलौपुण्यं केवलं नतुदुष्कृतम् ॥ कुलाचारैर्विहीनाये सततासत्यभाषिणः । परद्रोहपरायेचतेनराः कलिकिङ्कराः ॥ कुलवर्त्मस्वभक्ताये परयोषित्सु कामुकाः। द्वेष्टारःकुलनिष्ठानां तेप्रियाः कलिकिङ्कराः ॥

युगाचारप्रसङ्गेन कलेः प्राबल्यलक्षणम् । सङ्क्षेपात् कथितम्भद्रेप्रीतयेतव पार्वति ॥ प्रकटेचकलौ देविसर्वे धर्मास्सुदुर्बलाः । स्थास्यत्येकं सत्यमात्रंतस्मात् सत्यमयोभवेत् ॥ सत्यधर्मं समाश्रित्ययत्कर्म कुरुतेनरः । तदेवसफलं कर्मसत्यं जानीहिसुव्रते ॥ नहि सत्यात् परोधर्मो न पापम् अनृतात्परम् । तस्मात् सर्वात्मनामर्त्यः सत्यमेकंसमाश्रयेत् ॥ सत्यहीनावृथा पूजा सत्यहीनोवृथा जपः। सत्यहीनं तपोव्यर्थमूषरेवपनं यथा ॥ सत्यरूपम्परम्ब्रह्म सत्यंहि परमन्तपः। सत्यमूलाः क्रियाः सर्वाः सत्यात् परतरंनहि ॥ अतएवमया प्रोक्तं दुष्कृते प्रबले कलौ । कुलाचारोपि सत्येनकर्त्तव्योव्यक्तभावतः ॥ गोपनाद्धीयते सत्यं नगुप्तिरनृतंविना । तस्मात्प्रकाशतः कुर्यात् कौलिकः कुलसाधनम् ॥ कुलधर्मस्यगुप्त्यर्थं मान्यतं स्याज्जुगुप्सितम् । यदुक्तं कुलतन्त्रेषु नयुक्तं प्रबलेकलौ ॥ कृते धर्मश्चतुष्पादस्त्रेतायांपादहीनकः। त्रिपादोद्वापरेदेविपादमात्रंकलौयुगे ॥ तत्रापिसत्यंबलवत्तपः स्वर्गं दयापिच । सत्यपादेकृतेलोपे

धर्मलोप: प्रजायते ॥ तस्मात् सत्त्वं
समाश्रित्य सर्वकर्माणि साधयेत् ॥
कुलाचारं विनायच नास्त्युपाय:कुले
श्वरि । तत्रान्तप्रवेशश्चेत् कुतो
नि:श्रेयसंभवेत् ॥ सर्वथा सत्त्वपू
तात्मामन्मुखेरितवर्त्मना । सर्वकर्म
नर: कुर्यात् स्वस्ववर्णाश्रमोदितम्
॥ दीक्षांपूजांजपंहोमंपुरश्चरणत
र्पणम् । व्रतोद्वाहौ पुंसवनंसीमन्तो
न्नयनं तथा ॥ जातकर्म तथा नाम
चूडाकरणमेवच । मृतक्रियां पितृ
श्राद्धं कुर्यादागमसम्मतम् ॥ तीर्थे
श्राद्धंवृषोत्सर्गंशारदोत्सवमेवच ।
यात्रागृह प्रवेशञ्च नववस्त्रादिधार
णम् ॥ वापीकूपतडागानां संस्कारं
तिथिकर्म्मच । गृहारम्भप्रतिष्ठाञ्च
देवानां स्थापनन्तथा । दिवाकृत्यं
निशाकृत्यं पर्वकृत्यमथैवच । ऋ
तुमासवर्षकृत्यं नित्यनैमित्तिक
ञ्चयत् ॥ कर्त्तव्यंयदकर्त्तव्यंत्याज्यंग्रा
ह्यञ्चयद्भवेत् । मयोक्तेनविधानेन-
ततसर्वंसाधयेन्नर: ॥ नकुर्याद्यदि-
मोहेनदुर्मत्या ऽश्रद्धयापिवा । वि
नष्ट:सर्वकर्म्मभ्योविष्ठायांसभवेत कृ
मि: ॥ यदिमन्मतमुत्सृज्यमहेशि
प्रवलेकलौ । यद्यायत् क्रियते कर्म
विपरीतायंतद्भवेत् ॥ मन्मतासम्म

कलि:

तादीक्षा साधकप्राणघातिनी ।
पूजापिविफलादेविहृतमस्मार्पणं-
यथा ॥ देवता कुपितातस्य विघ्नस्
तस्यपदेपदे ॥ कलिकाले प्रवृत्ते तु
शास्त्रामच्छास्त्रमम्बिके । योन्य
मार्गै: क्रियांकुर्यात् समहापातकी भ
वेत् ॥ व्रतोद्वाहौ प्रकुर्वाणोयोन्य
मार्गेणमानव: । सयातिनरकंघोरं
यावच्चन्द्रदिवाकरौ । व्रतेब्रह्मवध:
प्रोक्तोव्राह्येमात्मवको भवेत् । के
वलं स्त्रवधाहो ऽसौचण्डालादधमो
पिस: ॥ उद्वाहितापियानारीजानी
यान्मातुगर्हिता । उद्वोढापि भवे
त् पापीसंसर्गात्कुलनायिके ॥ दे-
व्यागमनजंपापं तस्यपुंसोदिनेदिने
। तद्धस्तादवतोयादिनैवगृह्णन्तिदे
वता: ॥ पितरोपिनचाश्नन्तियतस्त
न्मलपूयवत् । तयोरपत्यंकानीन:
सर्वधर्मवहिष्कृत: ॥ दैवेपित्र्येकुला
चारेनाधिकारोऽस्यजायते ॥ अशा
म्भवेनमार्गेण देवतास्थापनंचरेत्
। नसान्निध्यंभवेत्तत्रदेवताया: क
थञ्चन ॥ इहामुत्रफलंनाऽस्तिकायक्
लेशोधनक्षय: ॥ आगमोक्तविधिं
हित्वाय: श्राद्धंकुरुतेनर: ॥ श्राद्धंत
द्विफलंसोपिपितृभिर्नरकंव्रजेत् ॥
तत्तोयंशोणितसमं पिण्डामलमयो

भवेत् । तस्मान्मर्त्त्यः प्रयत्नेन शाङ्करं मतमाश्रयेत् ॥ बहुनात्र किमुक्तेन सत्यं सत्यं मयोच्यते । अशाम्भवं कृतं कर्म सर्व्वं देवि निरर्थकम् ॥ अस्तु तावत् परो धर्मः पूर्व्वधर्म्मोऽपि नश्यति । शाम्भवाचारहीनस्य नरकान्नैव निष्कृतिः ॥ मद्दीरितमार्गेण नित्यनैमित्तकर्मणाम् । साधनं यन्महेशानि तदेव तव साधनम् ॥ विशेषाराधनं तत्र मन्त्रयन्त्रादिसंयुतम् । भेषजं कलिरोगाणां शृयतां गदतो मम ॥ ॥ * ॥ इति श्रीमहानिर्व्वाणतन्त्रे सर्व्वतन्त्रोत्तमोत्तमे सर्व्वधर्म्मनिर्णयसारे श्रीमदाद्यासदाशिवसंवादे जीवनिस्तारोपायप्रश्ने पराप्रकृतिसाधनोपक्रमो नाम चतुर्थोल्लासः ॥ ४ ॥ * ॥ यावद्दस्रगणपूजास्ति यावद्गङ्गा धरातले । यावद्वेदमयो घोषस्तावन्नो विद्यते कलिः ॥ हरेर्नामैव नामैव नामैव मम जीवनम् । कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ एकाये । द्यूतक्रीडासाधनीभूताचस्य यस्मिन् भागे एकोऽङ्कस्तस्मिन् ॥ कलनम् । कलशब्दादौ । इन् ॥ कलयति कल्यते वा । कल गतौ संख्याने च । अदन्तः । अच् इः ॥

कलिः । स्त्री । कोरके । कलिकायाम् ॥ कलते । कल शब्दसंख्यानयोः । सर्व्वधातुभ्य इन् ॥

कलिकः । पुं । कोचवक इति गौडभाषाप्रसिद्धे पक्षिणि । क्रौञ्चे ॥

कलिका । स्त्री । अविकसितपुष्पे । कोरके ॥ वीणामूले ॥ पदसन्ततियुक्तरचनाविशेषे ॥ लक्षणन्तु । कला नाम भवेत्तालनियता पदसन्ततिः । कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः इत्यादि रूपगोस्वामिकृतगोविन्दविरुदावलीभाष्येऽवलोकनीयम् ॥ कलयति । कल गतौ संख्याने च । चुरादिः । अच् इः । स्वार्थे कन् ॥

कलिकापूर्व्वम् । न । अङ्गप्रधानान्यतरबहुकर्मसाध्यस्वर्गादिफलजनकापूर्व्वोत्पत्तौ तत्तत्प्रत्येककर्मजन्येऽदृष्टे ॥ इति स्मृतिः ॥

कलिकारः । पुं । धूम्याटपक्षिणि ॥ पीतमस्तकपक्षिणि ॥ पूतिकरञ्जे ॥ कलिं करोति । कृञ् । कर्मण्यण् ॥

कलिकारकः । पुं । नारदे ॥ पूतिकरञ्जे । लताकरञ्जे ॥ स्वार्थे कन् ॥

कलिकारी । स्त्री । उपविषप्रभेदे । लाङ्गल्याम् । गर्भपातन्याम् । अग्निमुख्याम् । विषलाङ्गलीया इति गौडभाषा ॥

कलिङ्गः । पुं । पूतिकरञ्जे ॥ धूम्याटे ॥ कुटजवृक्षे ॥ शिरीषवृक्षे ॥ प्लक्षवृक्षे ॥ कलिङ्गाः । देशविशेषे ॥ यथा । जगन्नाथात् पूर्वभागे कृष्णातीरान्तर्गशिवे । कलिङ्गदेशः सम्प्रोक्तोवाममार्गपरायणइति ॥ कलिङ्गाःक्षत्रियाः तेषांनिवासोजनपदः कलिङ्गाः । निवासेऽणोजनपदेलुप् । लुपियुक्तवद्व्यक्तिवचने ॥ न । कौटजफले । इन्द्रयवे ॥ कलिङ्गच्छति । अन्तर्भावितण्यर्थोऽस्मेर्डः । पृ० ॥ खड्गेतिमुकुटः । कलिंगायतीति स्वामी । के मूर्द्ध्नि लिङ्गंचूडास्येति वा ॥

कलिङ्गकः । पुं । कलिङ्गार्थे ॥ इन्द्रयवे ॥

कलिङ्गा । स्त्री । नितम्बिन्याम् । योषिति ॥ त्रिवृतायाम् ॥ इन्द्रयवे ॥

कलिञ्जः । पुं । कटे । चटाई सफ इतिभाषा ॥

कलितः । त्रि । विदिते ॥ आप्ते ॥ भेदिते ॥ गणिते ॥ उक्ते ॥ बद्धे ॥ धृते ॥ यथा । करकलितकपालः कुण्डलीदण्डपाणिरिति भैरवध्यानम् ॥ सङ्क्रान्ते ॥ यथा । कदाकालेमातः कथयकलिताल्लक्तकरसमिति ॥ विचारिते ॥

कलिदोषघ्नः । पुं । कुलधर्म्मे ॥ कलिमलापहे परमात्मनि वासुदेवे ॥ यथा । कलावत्राति दोषाढ्येविषयासक्तमानसः । कृत्वातुसकलंपापंगोविन्दस्मरणाच्छुचिः ॥ अतिपापप्रसक्तोपिध्यायन्निमिष मच्युतम् । भूयस्तपस्वीभवति पङ्क्तिपावनपावनः ॥ अन्येनापिनमस्कारः प्रयुक्तश्चक्रपाणये । संसारस्थूलबन्धानामुद्वेजनकरोरिपुः ॥ इत्यादिपुराणवचनम् ॥ कलेर्दोषाः विहिताऽकरणप्रतिषिद्धानुष्ठानलक्षणाः तान्स्मरणमात्रेणहन्तिनाशयतीतिव्युत्पत्तिः ॥

कलिद्रुमः । पुं । बिभीतके । बहेडा इतिभाषा ॥

कलिन्दः । पुं । अद्रिविशेषे ॥ सूर्य्ये ॥ बिभीतकद्रुमे ॥

कलिन्दकन्या । स्त्री । यमुनायाम् ॥

कलिन्दजा । स्त्री । यमुनायाम् ॥ कलिन्दाज्जाता । जनी० डः । टाप् ॥

कलिन्दनन्दिनी । स्त्री । कालिन्द्याम् ॥

कलिन्दशैलजा । स्त्री । यमुनायाम् ॥

कलिप्रियः । पुं । नारदमुनौ ॥ वानरे ॥ कलेः प्रियः । कलिःप्रियोयस्यवा ॥

कलिमलापहः । पुं । संसारदुःखोपशमने ॥

कलिमारकः । पुं । पूतिकरञ्जे । कण्टकयुतिकरञ्जे ॥ कलिंमारयति ॥

कलिमाल्यः । पुं । पूतिकरञ्जे ॥

कलियुगम् । न । कलौ । अन्त्ययुगे ॥ अस्योत्पत्त्यादिर्यथा । माघीपूर्णिमायां शुक्रवारे कलियुगोत्पत्तिः । अत्रावतारः कल्किः । पुण्यमेकपादम् । पापं त्रिपादम् । गङ्गातीर्थम् । ब्राह्मणो निरग्निः । अन्नगताः प्राणाः । सार्द्धत्रिहस्तपरिमितो मनुष्यदेहः । अष्टाधिकशतवर्षं परमायुः । भोजनपानस्य नियमो नास्ति इत्यस्य लक्षणम् ॥ अस्याब्दाः ४३२००० ॥ अत्र षट् शककर्त्तारः । यथा । युधिष्ठिरो विक्रमशालिवाहनौ नृपाधिनाथौ विजयाभिनन्दनः । इमेनु नागार्जुनमेदिनीविभुर्बलिः क्रमात् षट् शककारकाः कलाविति ॥ धर्मः सङ्कुचितस्तपो विरहितं सत्यञ्च दूरंगतं लोकाधर्मरता द्विजाश्च लुभिता नार्योव शाः मानवा इत्यस्य माहात्म्यम् ॥ अत्र निस्ताराय आगमोक्तं ब्रह्मोपासनमेव सदाशिवेनोक्तम् ॥

कलियुगालयः । पुं । विभीतके ॥

कलिलम् । त्रि । गहने ॥ मिश्रे ॥ कलते कल्यते वा । कलशब्दसङ्ख्यानयोः । सलिकलीतीलच् ॥

कलिद्रुः । पुं । विभीतके ॥

कलिहारी । स्त्री । लाङ्गल्याम् ॥ कलिहारी सरा कुष्ठशोफार्शोव्रणशूलजित् । सक्षारा श्लेष्मजित्तिक्ता कटुका तुवरापि च ॥ तीक्ष्णोष्णा कृमिहृल्लघ्वी पित्तला गर्भपातनी ॥

कली । स्त्री । कलिकायाम् ॥

कलुषः । पुं । स्त्री । महिषे ॥ न । पापे ॥ त्रि । आविले ॥ लुषति । लुष हिंसायाम् । इगुपधेति कः । कस्य जलस्य लुषो घातकः ॥ कलयति । वशीकरोति वा । कल सङ्ख्याने । पुनश्चिकलिभ्य उषच् ॥

कलेवरम् । न । शरीरे ॥ कले शुक्रे मधुराव्यक्तध्वनौ वा वरं श्रेष्ठम् । हलदन्तादित्यलुक् ॥

कलोपजीवी । त्रि । वार्द्धुषौ ॥

कल्कः । पुं । न । घृततैलादिशेषे ॥ दम्भे ॥ विभीतकवृक्षे ॥ विष्ठायाम् ॥ किट्टे ॥ तुरुष्कनामगन्धद्रव्ये ॥ घृतेन तैलेन वा त्रिफलादिद्रव्यसमवेतेन साध्ये पिष्टऔषधविशेषे ॥ घृततैलादिपाके देयऔषधद्रव्ये । तत्तु पञ्चकषायान्तर्गतदृषदि पेषितम् । यथा । द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलमिश्रितम् । तदेव सूरिभिः पूर्वैः कल्क इत्यभिधीयते इति ॥ अस्य पूर्णवीर्यं याममेकं तिष्ठति ॥ शाठ्ये ॥ पापे । यथा । तपो न कल्कोऽध्ययनं न

कल्केऽस्त्र्यादि॥ न। छद्मनि॥ पि। पापाशये। पापात्मनि॥ कल्यते। कल॰। कृदाधारार्च्चिकलिभ्यः कः इति कः॥

कल्कनम्। न। दम्भे॥ शाठ्ये॥ कथने॥ कलहे॥

कल्कफलः। पुं। दाडिमवृक्षे॥

कल्किः। पुं। विष्णोर्भविष्यति दशमावतारे। विष्णुयशःपुत्रे॥ स तु कलिशेषे पापात्मनां विनाशाय सम्भलग्रामे भविष्यति। यथा। सम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः। भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति॥ तस्य कर्म यथा। अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः। असिनाऽसाधुदमनमष्टैश्वर्य्यगुणान्वितः॥ विचरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः। नृपलिङ्गच्छदो दस्यून् कोटिशो निहनिष्यति॥ इति श्रीभागवतम्॥ विशेषः कल्किपुराणादिषु द्रष्टव्यः॥

कल्की। पुं। कल्क्यवतारे॥ यथा। मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः। रामो रामश्च रामश्च बुद्धः कल्की च ते दशेति॥

कल्पः। पुं। शास्त्रे। यागक्रियाणामुपदेशके वेदाङ्गविशेषे। यज्ञविद्यायाम्। वोधायनादिकर्म्मपद्धतिग्रन्थे। सूत्रग्रन्थे॥ अनुष्ठयक्रमः कल्पः॥ विधौ॥ कल्प्यतेऽनेन वा। कृप सामर्थ्ये। अच्। घञ् वा॥ प्रलये। संवर्त्ते॥ कल्पते समर्थो भवति। पुंसीति घः॥ ब्रह्मणो दिने॥ ब्रह्मणो दिनमेकः कल्पः। ब्रह्मणो रात्रिश्चापरः कल्पः॥ कल्पयति स्थितिं प्रलयञ्च। कृप॰। णिच्। पचाद्यच्॥ क्रमसन्दर्भे तु। त्रिंशत्कल्पैर्ब्रह्मण एको मासो भवति। तेषां क्रमतो नामानि। यथा। श्वेतवाराहः १ नीललोहितः २ वामदेवः ३ गाथान्तरः ४ रौरवः ५ प्राणः ६ बृहत्कल्पः ७ कन्दर्पः ८ सद्यः ९ ईशानः १० ध्यानः ११ सारस्वतः १२ उदानः १३ गरुडः १४ कौर्म्मः १५ अयं ब्रह्मणः पौर्णमासी। नारसिंहः १६ समाधिः १७ आग्नेयः १८ विष्णुजः १९ सौरः २० सोमकल्पः २१ भावनः २२ सुप्तमाली २३ वैकुण्ठः २४ आर्च्चिषः २५ वल्मीकल्पः २६ वैराजः २७ गौरीकल्पः २८ माहेश्वरः २९ पितृकल्पः ३० अयं ब्रह्मणोऽमावास्या। इति क्रमसन्दर्भे प्रभासखण्डम्॥ एतादृशैर्द्वादशमासैर्ब्रह्मणः संवत्सरो भवति। एवंवर्षशतं ब्रह्मण आयुः। तत्र पञ्चाशद्वर्षो व्यती

ताः। एकपञ्चाशद्दारम्भे अधुनाऽस्ये तवाराहःकल्पः। इति महाभारतम्॥ विकल्पे॥ कल्पवृक्षे॥ न्याये॥ एषोऽत्रकल्पः उचित इत्यर्थः॥ व्याकरणस्य प्रत्ययविशेषे। सचसुबन्ततिङन्तपदाभ्यामीषदूनार्थे भवति। तद्वाच्यलिङ्गः। यथा ईषदूनोविद्वान् विद्वत्कल्पः। ईषदूनं पचति पचतिकल्पम्॥ त्रि। उत्तरपदस्थः स्वसदृशे॥ यथा पितृकल्पः॥ कल्पयति मनोरथम्। अच्॥। कल्पनम्। घञ्॥

कल्पकः। पुं। नापिते॥ कचूरे॥ कल्पकारके॥ कल्पते। कृपू०। ण्वुल्॥

कल्पक्षयः। पुं। प्रलये॥

कल्पतरुः। पुं। कल्पवृक्षे॥ कल्पस्यसङ्कल्पितार्थस्यतरुः। जन्यजनकभावेऽत्रषष्ठी॥

कल्पनम्। न। कृतौ॥ छेदे। कर्त्तने॥ कल्पते। नन्द्यादिल्युः॥

कल्पना। स्त्री। करिसज्जनायाम्। नागवस्यारोहणार्थं पल्याणाद्यारोपणेन करिणः सज्जीकरणे॥ अनुमितौ॥ रचनायाम्॥ यथा प्रबन्धकल्पनाकथा॥ सम्पादनायाम्॥ कल्पनम्। कृपू०। ण्यन्तः। ण्यासश्रन्थेतियुच्। टाप्॥

कल्पनाकालः। त्रि। विद्युदादावस्थिरे कल्पनाकालभाविनिमनस्यस्त्र्वेत्तमाने॥

कल्पनी। स्त्री। कर्त्तर्याम्। कैंची इति भाषा॥ इतिहेमचन्द्रः॥

कल्पपादपः। पुं। देवतरौ॥ कल्पस्य सङ्कल्पितार्थस्य पादपः॥ अस्यदाननविधिर्दानसागरे द्रष्टव्यः॥

कल्पपालः। पुं। शौण्डिके॥

कल्पलतादानम्। न। महादानविशेषे॥

कल्पवृक्षः। पुं। सुरद्रुमे॥ कल्पः सङ्कल्पितोऽर्थः तस्य वृक्षः। जन्यजनकभावेऽत्रषष्ठी॥

कल्पान्तः। पुं। प्रलये॥ कल्पस्य ब्राह्मदिनस्य अन्तोऽवधिः॥

कल्पितः। पुं। सज्जितगजे॥ त्रि। रचिते॥ अर्पिते॥ आरोपिते॥ कल्पितंनिखिलं विश्वमिति वेदान्तडिण्डिमः। ब्रह्मणि जगतः कल्पितत्वम् आत्मनिचाहङ्कारादेः कल्पितत्त्वं तत्त्वविदां सुस्पष्टम्॥ कल्पितस्यचाधिष्ठानादनतिरेकः॥ यथोक्तंसूतसंहितायाम्। अधिष्ठानावशेषोहिनाशः कल्पितवस्तुन इति॥

कल्प्यः। त्रि। कल्पितुंयोग्ये॥

कल्मषः। पुं। नरकविशेषे॥ न। पा

पे ॥ हस्तपुच्छे ॥ त्रि । मलिने ॥ शुभंकर्म स्यति समाप्तिं करोति । षो न्तकर्मणि । आतोनुपेतिकः । पृ० ॥ लम्बपच्चे ॥

कल्माषः । पुं । राक्षसे ॥ चित्रवर्णे ॥ कृष्णवर्णे ॥ कृष्णपाण्डुरवर्णे । गन्धशालौ ॥ चि । चित्रवर्णवति ॥ कलयति । कल० । क्विप् । कल् । माषयति । अभिभवति वर्णान् माषः । मषहिंसायाम् । हन्त्यर्थाश्चेति चुरादौ पाठा स्मिच् । कल्चासौमाष श्चेति कल्माषः ।

कल्माषकण्ठः । पुं । शिवे ॥ इतिहारावली ॥

कल्माषपादः । पुं । सौदासनृपे ॥

कल्माषी । स्त्री । शवलायाम् ॥ अन्यतो ङीषिति ङीष् ॥

कल्यम् । न । प्रत्यूषे । प्रभाते ॥ मधुनि ॥ लम्ने ॥ त्रि । वाकश्रुतिवर्जिते ॥ उपायवचने ॥ सज्जे ॥ नीरोगे ॥ दत्ते ॥ कल्याणवचने ॥ कलयति चेष्टाम् । अघ्न्यादयश्चेतिकलेर्यक् ॥ यद्वा । कल्यते । कलगतौ सङ्ख्यानेच । चुरादिरदन्तः । अचोयत् ॥ कलासु साधुर्वा । तत्र साधुरितियत् ॥

कल्यजग्धिः । स्त्री । प्रातराशे । प्रातर्भोजने । कलेउ कलेवा इतिभाषा ॥

कल्यपालः । पुं । }
कल्यपालकः । पुं । } शौण्डिके ॥

कल्यवर्त्तः । पुं । प्रातराशे ॥ इतित्रिकाण्डशेषः ॥

कल्या । स्त्री । मद्ये ॥ हरीतक्याम् ॥ टाप् ॥ शुभात्मिकायां वाचि ॥

कल्याणम् । न । अक्षयस्वर्गे ॥ मङ्गले । शिवे । भद्रे । शुभे ॥ हेम्नि ॥ त्रि । शुभयुक्ते ॥ कल्येप्रातः काले अणय्यते । अण शब्दे । अकर्त्तरिचेतिघञ् ॥ स्त्री । बह्वादिभ्यश्चेति ङीषि कल्याणी ॥

कल्याणकृत् । त्रि । शास्त्रविहितकारिणि ॥ कल्याणं करोति । डुकृञ् । क्विप् । तुक् ॥

कल्याणगुणम् । न । श्रद्धावैराग्यादौ ॥

कल्याणघृतम् । न । औषधविशेषे ॥

कल्याणतमः । त्रि । अतिशोभने ॥

कल्याणवुद्धिः । त्रि । सुधियि ॥

कल्याणयोगः । पुं । यात्रायोगान्तरे ॥ यथा । गुरौ केन्द्रे त्रिकोणेवारविर्लाभे चकर्मणि । कल्याणयोगोभूपस्य यातुः कल्याणकृद्भवेदिति ॥ पुनश्च । त्रिकोणगे शुभेखेटे सवले वाद्वितीयगे । कल्याणसंज्ञोयोगोयं यायिनां मङ्गलप्रदइति ॥

कल्याणबीजः । पुं । मसूरे ॥ इतिरा

जनिर्घण्टः ॥

कल्याणिका । स्त्री । मनःशिलायाम् ॥

कल्याणी । त्रि । कल्याणविशिष्टे ॥

कल्याणिनी । स्त्री । बलायाम् ॥

कल्याणी । स्त्री । माषपर्ण्याम् ॥ गवि ॥ मङ्गलमूर्त्याम् ॥ बह्वादिभ्यश्चेति ङीष् ॥

कल्यापालः । पुं । शौण्डिके ॥ इति त्रिकाण्डशेषः ॥

कल्लः । त्रि । बधिरे । श्रवणेन्द्रियहीने । बहरा इतिभाषा ॥ इति त्रिकाण्डशेषः ॥

कल्लत्वम् । न । स्वरभेदे ॥ बाधिर्य्ये ॥

कल्लोलः । पुं । हर्षे ॥ उल्लोले । महातरङ्गे । पड़ीलहर इति भाषा । बड ढेउ इतिगौडभाषा ॥ त्रि । वैरिणि । सपत्ने ॥ कं जलम् तस्य लोलः उन्मादः । वा पदान्तस्येत्यनुस्वारस्य लकारः ॥ कल्लन्तेऽनेन नद्यः । कल्ल अव्यक्ते शब्दे । बाहुलकादोलच् ॥

कवकः । पुं । कवले । ग्रासे ॥ न । छत्राके ॥ भौमानि कवकानि चेति मनुः ॥

कवचः । पुं । गर्द्दभाण्डे । नन्दिवृक्षे ॥ पटहवाद्ये ॥ पुं । न । तनुत्राणे । वर्म्मणि । सन्नाहे ॥ मन्त्रविशेषे । लोहादिवर्म्मवदङ्गादिसंरक्षणार्थं देवतामन्त्रविग्रहे ॥ तत्तुपूजायां पाद्य-म् भूर्जे विलिख्य कण्ठादौ धार्य्यञ्च ॥ कं वातं वञ्चति । वञ्चु गतौ । अन्तर्भावितण्यर्थो वा । मू° कः ॥ कौति । कुशब्दे । कृतन्यञ्जीत्यादिना कौतेरचइत्येके ॥

कवचपत्रम् । न । भूर्जपत्रे ॥

कवटी । स्त्री । कपाटे ॥

कवयिः । स्त्री । कवय्याम् ॥

कवयी । स्त्री । कयीमाच इतिगौडभाषाप्रसिद्धे मत्स्ये । कवई इतिभाषा । क्रकचपृष्ठ्याम् ॥ कवयी मधुरा स्निग्धा कषाया रुचिकारिणी । किञ्चित्पित्तकरी वातशमनी बलवर्द्धिनी ॥

कवरः । पुं । पाठके ॥ पुं । न । लवणे ॥ अम्ले ॥ केशपाशे ॥ त्रि । शबले ॥ खचिते । सम्पृक्ते ॥ कौति कूयते वा । कुशब्दे । कोररन् ॥ कवरं लवणेऽम्ले स्त्री पुष्पीतुङ्गीकचान्तरे । कर्वुरं मायांनारच्चः पापयोर्भेषजान्तरे ॥ इतिमेदिनी ॥ कवरः कर्वुरः सारङ्ग इति हलायुधः ॥

कवरकी । स्त्री । वन्द्याम् ॥ इतिहारावली ॥

कवरा । स्त्री । वर्बरायाम् । खरपुष्पायाम् । वाबुई इतिभाषा ॥ अजाद्यतष्टाप् ॥

कवरी । स्त्री । केशविन्यासे । केशवेशे

॥ पृथ्वराम् । कारव्याम् ॥ कवरी केशानां सन्निवेशविशेषः ःा इव ॥ शाकभेदे ॥ वृणोति । वृञ् वरणे । अच् । गौरादिः । कस्यशिरसोवरी ॥ यद्वा । कूयते । कुशब्दे । कोररन् । जानपदेति ङीष् ॥ कंशिरो वृणोति आच्छादयति कंकृष्णवर्णं वृणोति वा । पूर्ववदच् ङीषौ ॥ तु ङ्याम् । वर्वरायाम् ॥

कवर्गः । पुं । कादिपञ्चसु ॥

कवर्गीयः । पुं । कवर्गभवेवर्णे ॥ भवार्थे वर्गान्ताच्चेति छः ॥

कवलः । पुं । ग्रासे ॥ चिलिचिमे । वेलेमाच इतिगौडभाषाप्रसिद्धे मत्स्ये ॥ केन वलते । वल० । अच् ॥

कवलितः । त्रि । भुक्ते ॥ व्याप्ते ॥

कवसः । पुं । उरश्छदे । कवचे ॥ कौति । कु० । ऋतन्यञ्जीत्यादिना कौतेरसः ॥

कवाटम् । न । कपाटे ॥ कं वातम् वटति । वट वेष्टने । कर्मण्यण् ॥ कुङ् शब्दे । ऋदोरप् । कवं शब्दमटति वा । अट गतौ । पचाद्यच् । कवञ्चोष्णे इत्यत्र योगविभागात् कोः कवादेशो वा ॥

कवाटवक्रम् । न । कवाटवेटु इति गौडभाषाप्रसिद्धे वृक्षविशेषे । वक्राग्रे । कपोलवक्रे ॥

कवाटी । स्त्री । क्षुद्रकपाट्याम् ॥ टिड्ढेति ङीप् ॥

कवारम् । न । पद्मे ॥ इतित्रिकाण्डशेषः ॥

कविः । पुं । वाल्मीकिमुनौ ॥ शुक्रे । दैत्यगुरौ ॥ सूरौ । भास्करे ॥ काव्यस्यकर्त्तरि ॥ सर्वपथीनाः कवयः ॥ ब्रह्मणि ॥ त्रि । क्रान्तदर्शिनि । अतीतानागताद्यशेषवस्तुदर्शिनि सर्वज्ञे । सर्वदृशि ॥ शास्त्रार्थविवेकिनि । मेधाविनि । पण्डिते ॥ स्त्री । खलीने ॥ कौति । कु० । अच इः ॥

कविकम् । न । खलीने ॥ इति हलायुधः ॥

कविका । स्त्री । खलीने । कडि याली इति लगाम इतिचख्याते ॥ केविका पुष्पे ॥ कवयीमत्स्ये ॥ यथा । कविका मधुरा स्निग्धा कषाया रुचिकारिणी । किञ्चित् पित्तकरी वातशमनी बलवर्द्धनी ॥ कवते कौति वा । कुङ् शब्दे । कुशब्दे वा । अच इः । कविः । स्वार्थे कन् । कृशादिभ्यो वुन् वा । टाप् ॥

कविज्येष्ठः । पुं । वाल्मीकिमुनौ ॥

कविता । स्त्री । कवित्वे । काव्ये ॥ कवेः कर्मभावो वा । तल् ॥ कविता वनिता वापि आयाता सुखदायिनी ॥

कविय: । पुं । न । अश्वास्यबन्धनरज्जौ । खलीने ॥

कविरामायण: । पुं । वाल्मीकिमुनौ ॥ इतिशब्दरत्नावली ॥

कविलासिका । स्त्री । वीणाविशेषे ॥

कवी । स्त्री । खलीने ॥

कवीयम् । न । खलीने ॥

कवेलम् । न । उत्पले । कुवलये ॥

कवोष्णम् । न । कोष्णे । मन्दोष्णे ॥ ईषदुष्णम् । कवञ्चोष्ण इतिकोः कवादेशः ॥ त्रि । तद्वति ॥

कव्यम् । न । मृतोद्देशेनत्यक्ते । पितृसम्प्रदानकान्ने । पित्रन्ने ॥ ॥ कूयते पितृभ्यः । कुशब्दे । अचोयत् ॥

कव्यवाल: । पुं । पितृगणविशेषे ॥

कशा । स्त्री । चर्मयष्ट्याम् । अश्वादिताडन्याम् ॥ आदिनोष्ट्रचोरादिग्रह: ॥ अथकशापातविचार: । एतेषु निमित्तेष्वश्वोऽङ्गेष्वेवंताड्य इतिविमर्श ॥ कशानामुत्तममध्यमाधमेषु यथासङ्ख्यं मृदुसमनिष्ठुरैकद्वित्रिरूपं चितयम् तस्यविचारे ॥ यथा हभोजराज: । मृदुमेकेन घातेन दण्डकालेषु ताडयेत् । तीक्ष्णं मध्यं पुनर्द्वाभ्यां जघन्यं निष्ठुरैस्त्रिभि:॥ उपवेशे ऽथनिद्रायां स्खलितेदुष्टचेष्टिते । वडवालोकनोत्सुक्ये वहुगर्ज्जितहेषिते ॥ सन्त्रासेच दुरुत्थाने विमार्गगमने भये । शिक्षात्यागस्य समये सञ्जातेचित्तविभ्रमे ॥ दण्ड: प्रयोज्यो वाहानां कालेषु द्वादशस्वपि । ग्रीवायाम्भीतमाहन्यात् वक्त्रञ्चैव चवाजिनम् ॥ विभ्रान्तचित्तमधरे त्यक्तशिक्षञ्चताडयेत् । प्रहेषिते स्कन्धवाह्वोर्वडवालोकनन्तथा ॥ उपवेशेच निन्द्रायां कटिदेशेचताडयेत् । दुश्चेष्टितंमुखेहन्यात् उन्मार्गेप्रस्थितं तथा ॥ जघनेस्खलितं हन्यान्नेत्रमार्गेदुरुत्थितम् । य: कुरुठप्रकृतिर्वाजी तं सर्वत्रैवताडयेत् ॥ इति माघे ५ सर्गे तेजोनिरोधेति १० श्लोके मल्लिनाथ: ॥ मांसरोहिण्याम् ॥ कशति । कशशब्दे । पचाद्यच ॥

कशार्हः । त्रि । कश्ये । कशाघातयोग्ये ॥ कशाया: अर्ह: ॥

कशिपुः । पुं । भक्ते । भोज्ये ॥ आच्छादने । वस्त्रे ॥ एकोक्त्या भक्ताच्छादनयोः । भोज्यवस्त्रयो: । कशिपुर्भोज्यवस्त्रयो:।एकैकस्मिन्द्वयोश्चापीतिहेमचन्द्रः॥ शय्यायाम् ॥ सत्स्वांस्तितौ किंकशिपो: प्रयासै:॥ कशति दुःखम् कश्यते वा । कशगतिशासनयो: । उ० साधु: ॥

कशेरु: । पुं । न । पृष्ठकीकसे । पृष्ठास्थिनि ॥ जलोद्भवे मूलविशेषे ॥ कशेरु द्विविधं तत्तु महद्राजकशेरुकम् । मुस्ताकृति लघु स्याद्यत्तच्चिञ्चोटमिति स्मृतम् ॥ कशेरुकद्वयं शीतं मधुरं तुवरं गुरु । पित्तशोणितदाहघ्नं नयनामयनाशनम् ॥ ग्राहि शुक्रानिलश्लेष्मरुचिस्तन्यकरम्परम् ॥ पुं । भारतवर्षान्तःपातिद्वीपविशेषे ॥ कं शृणाति । शॄ हिंसायाम् । बाहुलकादु प्रत्यये प्रकृतेरेरुङादेश: ॥ शणजातौ ॥

कशेरुकम् । न । तृणकन्दे । कशेरुणि ॥

कशेरुका । स्त्री । पृष्ठास्थि । पृष्ठवंशे ॥ कंवायुं शृणाति । शॄ० । केनशीर्यते वा । कैश्रएरुङ्चास्ये च्छू: । संज्ञायां कन् । केशहतिदम्भ: ॥ यद्वा । कश्यते कशतिवा । कशशब्दे । बाहुलकादेरु: । स्वार्थेकन् ॥

कशेरू: । स्त्री । तृणकन्दे ॥ पृष्ठकीकसे ॥ शणजातौ ॥ कंशृणाति । शॄ० । कैश्रएरुङ्चास्येच्छू: ॥

कश्चन । अ । कश्चिद ॥

कश्चित् । अ । कश्चन । अविषये । कोइ इतिभाषा ॥ अर्थान्तरभूते ॥

कश्मलम् । न । मूर्च्छने ॥ पापे ॥ मोहे ॥ त्रि । मलिने ॥ कशनम् । क

शगतौ । कुटिकशिकौतिभ्य: प्रत्ययस्यमुडिति कल: ॥

कश्मीर: । पुं । कार्श्मीराख्येदेशे ॥

कश्मीरजम् । न । कुङ्कुमे ॥ कश्मीरे जायते । सप्तम्यांजनेर्ड: ॥

कश्मीरजन्म । न । कुङ्कुमे ॥ कश्मीरे जन्मास्य ॥

कश्यम् । न । अश्वमध्ये ॥ मद्ये ॥ कश्यतेऽनेनवा । कश० । बाहुलकाद्य: ॥ त्रि । कशार्हे ॥ कशाचर्मयष्टि: । तद्घात: उपचारात् कशा । ताम् हैति । दण्डादिभ्यात् यत् ॥

कश्यप: । पुं । मुनिविशेषे । कलागभजे मरीचिमुनेरौरसे पुत्रे ॥ यथा । ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुत: । कश्यपस्तस्य पुत्रोऽभूत् कश्यपानात् स कश्यप: ॥ इतिमार्कण्डेयपुराणे विश्वकर्मकृतसूर्यस्तवाध्याय: ॥ कश्यं मद्यं पिबति पातिवा । पा० सुपीति क: ॥ मीनप्रभेदे ॥ मृगान्तरे ॥

कश्यपनन्दन: । पुं । गरुडे ॥ इतिहलायुध: ॥ कश्यपस्य नन्दन: ॥

कष: । पुं । पाषाणविशेषे । निकषे । सुवर्णपरीक्षणपाषाणे । कसौटी इतिभाषा ॥ खड्गादितीक्ष्णीकरणयन्त्रे ॥ कषति । कषहिंसायाम् । प

वाद्यच ॥

कषणः । पुं । अपक्के । शलाटौ ॥ न । घर्षणे । काषे ॥ कण्डूयने ॥

कषमाणः । त्रि । कण्डूयमाने ॥

कषाकुः । पुं । अग्नौ ॥ सूर्य्ये ॥

कषायः । पुं । श्योनाकवृक्षे ॥ रागे ॥ अन्तःकरणदोषे । कामक्रोधादिमले ॥ लयविक्षेपाभावेपि चित्तवृत्तेः रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बने ॥ रक्तपीतवर्णयोगे ॥ धववृक्षे ॥ त्रि । तुवररसवति ॥ सुरभौ ॥ लोहिते ॥ रक्तपीतमिश्रितवर्णे ॥ पुं । न । क्वाथे । निर्यासे । क्वाथरसे ॥ यथा त्रिफलाकषयः । सपञ्चविधो यथा । स्वरसश्च तथा कल्कःक्वाथश्च हिमफाण्टकौ । ज्ञेयाः कषायाः पञ्चैतेलघवःस्युर्यथोत्तरम् ॥ अङ्गरागे ॥ विलेपने ॥ कसैला इतिप्रसिद्धे रसविशेषे । पृथिव्यनिलगुणबाहुल्यात्तस्योत्पत्तिरित्याहशिवदासः । तुवरे ॥ कषायोरोपणोग्राहीस्तम्भनःशोधनोहिमः । कफशोणितपित्तघ्नो जिह्वाजाड्यकरोलघुः ॥ कषतिकण्ठम् । कष० । वा हुलकादायः ॥

कषायकृत । पुं । रक्तलोध्रे ॥

कषायजलम् । न । संस्कारोपयोगिनि पञ्चक्षीरद्रुमक्वथिततोये । प्लक्षाश्वत्थोदुम्बरशिरीषवटसम्भवैः कषायजलैरित्युक्ते ॥

कषाययावनालः । पुं । तुवरयावनालधान्ये ॥ इतिराजनिर्घण्टः ॥

कषाया । स्त्री । क्षुद्रदुरालभायाम् ॥

कषायी । पुं । सखुआ० इति प्रसिद्धे सालवृक्षे ॥ लकुचवृक्षे ॥ खर्ज्जूरीवृक्षे ॥ विषयेषु सरागे ॥

कषिः । त्रि । हिंसके । हिंस्रे ॥ कषति कष्यते वा । कष० । खनिकषीभ्यामिति इः ॥

कषीका । स्त्री । पक्षिजातौ ॥ कषति । कष० । कषिदूषिभ्यामीकन् ॥

खनिचे ॥ कषन्त्यनया । पूर्ववदीकन् ॥

कष्टम् । न । पीडामात्रे । कृच्छ्रे । व्यायाम् ॥ त्रि । गहने ॥ पीडायुक्ते ॥ जुगुप्सिते ॥ दोषविशेषे ॥ कष्टंतदर्थावगमो दुरायत्तो भवेदिति लक्षणम् ॥ कषतिस्म कष्यतेस्म वा । कष० । क्तः । कृच्छ्रगहनयोः कषइतिनेट् ॥

कष्टकारकः । पुं । संसारे ॥ त्रि । पीडाकरे ॥ कष्टस्य कारकः ॥

कष्टस्थानम् । न । पीडाकृत्स्थले । दुःखजनक स्थाने ॥ कष्टस्य स्थानम् ॥

कसनोत्पाटनः । पुं । वासकवृक्षे ॥ त्रि

। कासघ्ने ॥

कसेरुः । पुं । कशेरौ । गुण्डकन्दे । सुकन्दे । शूकरेष्टे ॥

कसेरुकः । पुं । } कशेरुणि ॥
कसेरुका । स्त्री । }

कस्तीरम् । न । रङ्गे । पिचटे । वङ्गे ॥

कस्तुरिका । स्त्री । } मृगमदे । कस्तूर्य्याम् ॥
कस्तूरिका । स्त्री । }

कस्तूरी । स्त्री । मृगमदे । मृगनाभौ । गन्धकेलिकायाम् । वेधमुख्यायाम् ॥ कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः । कफवातविषच्छर्द्दिशीतदौर्गन्ध्यशोषहृत् ॥ साचत्रिविधा । कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक् । काश्मीरीकपिलच्छाया कस्तूरी त्रिविधामता ॥ कामरूपोद्भवाश्रेष्ठा नैपालीमध्यमा भवेत् । काश्मीरदेशसम्भूता कस्तूरीह्यधमास्मृता ॥ कसति गन्धोऽस्याः । कसगतौ । ब० ऊरः । पृषोदरादिः ॥

कस्तूरीमल्लिका । स्त्री । मृगमदवासायाम् ॥

कह्लारम् । न । श्वेतोत्पले । सौगन्धिके ॥ कस्य जलस्यह्लारइव । केह्लादते वा । ह्लादी० । पचाद्यच् । पृषोदरादिः ॥

कह्वः । पुं । बकपक्षिणि ॥ क इतिशब्देन के जले वा । ह्वयति । ह्वेञस्पर्द्धायां शब्देच । मू० । कः ॥

कांसीयम् । न । कांस्ये ॥ इतिराजनिर्घण्टः ॥

कांस्यम् । न । वाद्यविशेषे ॥ पानपात्रे ॥ मानभेदे ॥ ताम्ररङ्गमिश्रितधातौ । ताम्रार्द्धे । सौराष्ट्रके । वह्निलोहके ॥ ताम्रं त्रपुज माख्यातं कांस्यं घोषञ्च कंसकम् । उपधातुर्भवेत् कांस्यंद्वयोस्तरणिरङ्गयोः ॥ कांस्यस्यतु गुणा ज्ञेयाः स्वयोनिसदृशाजनैः । संयोगजप्रभावेण तस्यान्येपिगुणाः स्मृताः ॥ कांस्यं कषायं तिक्तोष्णं लेखनं विशदं सरम् । गुरु नेत्रहितं रूक्षं कफपित्तहरं परम् ॥ * ॥ अस्यशोधनम् । पत्तलीकृत्य पत्राणि कांस्यस्याग्नौ प्रतापयेत् । निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ गोमूत्रेच कुलत्थानां कषायेच त्रिधात्रिधा । एवं कांस्यस्यरीतेश्च विशुद्धिः सम्प्रजायते ॥ * ॥ मारणविधिस्तु । अर्कक्षीरेणसम्पिष्टोगन्धकस्तेनलेपयेत् । समेन कांस्यपत्राणिशुद्धान्यम्लद्रवैर्मुहुः ॥ ततोमूषापुटे धृत्वापचेद्गजपुटेनच । एवंपुटद्वयात् कांस्यं रीतिश्चम्रियतेध्रुवम् ॥ इतिभावप्रकाशः ॥ कंसीयस्य

विकारः कंसीयपरसव्ययोरितियञ् । छस्यचलुक् ॥

कांस्यकम् । न । कांस्यशब्दार्थे ॥

कांस्यकारः । पुं । कंसकारे । कसेरा इति ख्याते जातिविशेषे । शौल्विके । ताम्रकुट्टके ॥ कांस्यं करोति । डुकृञ् अ० कर्मण्यण् ॥

कांस्यनीलः । पुं । अञ्जनविशेषे । मूषातुत्थे । हेमतारे ॥

काकः । पुं । आत्मघोषे । वायसे । करटे ॥ पीठसर्पिणि । पङ्गौ ॥ वृक्षविशेषे । शिरोऽवक्षालने ॥ परिमाणविशेषे ॥ द्वीपविशेषे ॥ अतिधृष्टे ॥ तिलके ॥ न । सुरतबन्धे ॥ काकानां संहतौ ॥ काकानां समूहः । तस्य समूह इत्यण् ॥ कायति । कै शब्दे । इणभीकापाशल्यतिमर्चिभ्यः कन् ॥

काककङ्गुः । पुं । चीनके । चीणा इति प्रसिद्धे धान्ये ॥ इतिहेमचन्द्रः ॥

काककर्कटी । स्त्री । खर्जूर्य्याम् ॥

काककला । स्त्री । काकजङ्घावृक्षे ॥

काककुष्ठम् । न । कङ्कुष्ठे ॥

काकघ्नी । स्त्री । महाकरञ्जे ॥

काकचिञ्चा । स्त्री । } गुञ्जायाम् ॥ का
काकचिञ्चिः । स्त्री । } कवर्णा चिञ्चा ।
काकचिञ्ची । स्त्री । } गौरादिः ॥

काकच्छदः । पुं । }
काकच्छदिः । पुं । } खञ्जनपक्षिणि ॥

काकजङ्घा । स्त्री । स्वनामख्याते वृक्षविशेषे । काकनासिकायाम् । मही कान्तौषधौ ॥ काकजङ्घा हिमा तिक्ता कषाया कफपित्तजित् । निहन्ति ज्वरपित्तास्रज्वरकण्डुविषक्रिमीन् ॥ काकजङ्घायाम् ॥

काकजम्बुः । स्त्री । भूमिजम्ब्वाम् ॥

काकजम्बूः । स्त्री । काकफलायाम् । काकनीलायाम् ॥

काकणम् । न । कुष्ठविशेषे ॥ तल्लक्षणं यथा । यत्काकणन्तिकावर्णमपाकं तीव्रवेदनम् । त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यतीति ॥

काकणन्तिका । स्त्री । गुञ्जायाम् ॥

काकतालीयम् । न । अवितर्कितसम्भवे ॥ यादृच्छिकन्याये ॥ समासाच्च तद्विषयादिति छः । अस्मादेव ज्ञापकाद् इवार्थे समासः । सह सुपेति वा । द्वाविवार्थौ । काकागमनमिव तालपतनमिव । काकतालम् । काकतालमिव काकतालीयम् । वृत्तिविषये काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ । तत्र काकागमनं देवदत्तागमनस्योपमानम् । तालपतनं दस्यूपनिपातस्य । तालेन तु यः काक

स्यवधः स देवदत्तस्य दस्युना वधस्तोपमानम् । इति वधादिः । काकतालीयादि शब्दवाच्यः सम्पद्यते ॥ काकतालसमागमसदृश श्चोरसमागम इति समासार्थः । तत्प्रयुक्तः काकमरणसदृशस्तु प्रत्ययार्थः ॥

काकतिक्ता । स्त्री । काकचिञ्चायाम् ॥

काकतिन्दुकः । पुं । काकेन्दौ । कारपीलुके । माकडाकेन्दु माकडामाख काकतेंदु इतिच गौडभाषा ॥ काकानाम् काकवर्णो वा तिन्दुकः ॥

काकतुण्डः । पुं । कालागुरुणि ॥

काकतुण्डफला । स्त्री । काकनासायाम् ॥

काकतुण्डिका । स्त्री । काकचिञ्चायाम् ॥

काकतुण्डी । स्त्री । राजरीत्याम् । राजपीतल इति भाषा ॥ कौआडोडी इति भाषाप्रसिद्धे वृक्षविशेषे । काकादन्याम् ॥

काकध्वजः । पुं । वाडवाग्नौ ॥

काकध्वजा । स्त्री । धूमावत्याम् ॥

काकनामा । पुं । वकवृक्षे ॥ इति रत्नमाला ॥

काकनासः । पुं । विकङ्कतवृक्षे ॥

काकनासा । स्त्री । काकजङ्घावृक्षे ॥ काकस्य नासेव फलमस्याः । काकनासा कषायोष्णा कटुका रसपाकयोः । कफघ्नी वामनी तिक्ता शोथार्शश्वित्रकुष्ठनुत् ॥

काकनासिका । स्त्री । काकजङ्घायाम् । कौआठोंठीतिख्यातौषधौ ॥ रत्नाश्वि वृति ॥

काकपक्षः । पुं । शिरश्चूडके । मस्तकपार्श्वद्वये केशरचनाविशेषे । पट्टे इति भाषा ॥ यथा । बालानान्तु शिखा प्रोक्ता काकपक्षःशिखण्डकः इतिहलायुधः । काकस्य गच्छति ॥

काकपदः । पुं । रतिबन्धविशेषे ॥ यथा । पादौ द्वौ स्कन्धयुग्मस्थौ चिबुकाङ्कितं भगेलघु । कामयेत् कामुकीं कामी बन्धःकाकपदोमत इति ॥

काकपर्णी । स्त्री । मुद्गपर्ण्याम् ॥

काकपीलुः । पुं । काकतिन्दुके । कुचला इति भाषा ॥ श्वेतगुञ्जायाम् ॥ काकतुण्ड्याम् ॥ काकैःपील्यते । पीलप्रतिष्टम्भे । बाहुलकादुः ॥

काकपीलुकः । पुं । काकपीलौ ॥ काकानाम् पीलुरिव । इवेप्रतिकृताविति कन् ॥

काकपुच्छः । पुं । पिके ॥

काकपुष्टः । पुं । कोकिले ॥ काकेन-पुष्टः ॥

काकपुष्पम् । न । ग्रन्थिपर्णे ॥

काकफलः । पुं । निम्बवृक्षे ॥ इतिराजनिर्घण्टः ॥

काकबलिः । पुं । काकसम्प्रदानकान्नादौ ॥

काकभाण्डी । स्त्री । महाकरञ्जे ॥

काकभीरुः । पुं । पेचके ॥

काकमद्गुः । पुं । दात्यूहे ॥

काकमर्द्दः । पुं । महाकाललतायाम् ॥

काकमर्द्दकः । पुं । किम्पाके ॥

काकमाचिका । स्त्री । वायस्याम् ॥

काकमाची । स्त्री । वायस्याम् । बहुफलायाम् । सर्वतिक्तायाम् । मकोय इतिभाषा ॥ काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा । तिक्ता रसायनी शोथकुष्ठार्शोज्वरमेहजित् । कटुर्नेत्रहिता हिक्काच्छर्द्दिहृद्रोगनाशिनी ॥ काकमाचिजनितं मृदु शाकं वेसवारमिलितेन सुवासम् । तप्ततैलतलनेन सुपाकं कैरवाप्य न कृतं सुखवासम् ॥ काकान् मच्यते । मचिधारणोच्छ्रायपूजनेषु । कर्मण्यण् । आगमशासनस्यानित्यत्वान्नुम् ॥

काकमाता । स्त्री । काकमाच्याम् ॥

काकमुद्गा । स्त्री । मुद्गपर्ण्याम् । मुगाणी इतिगौडभाषा ॥ ईषत् कम् । ईषदर्थे चेति कोः कादेशः । काकेन ईषज्जलेन मुदं गच्छति । गमश्चेति डः ॥ यद्वा । काकाः मुद्गाः हर्षं प्राप्ता यस्याम् ॥

काकयवः । पुं । आगडा इतिगौडभाषाप्रसिद्धे तण्डुलशून्यधान्ये ॥ इतिमहाभारतम् ॥

काकरिपुः । पुं । उलूके ॥

काकरुहा । स्त्री । वन्दायाम् ॥

काकरूकः । पुं । स्त्रीजिते ॥ उलूके ॥ दम्भे ॥ त्रि । नग्ने ॥ भीरुके ॥ निर्द्धने ॥

काकलम् । न । कण्ठमणौ ॥ पुं । द्रोणकाके ॥

काकलकः । पुं । कण्ठमणौ । ग्रीवाया मुन्नतप्रदेशे ॥

काकलिः । स्त्री । काकल्याम् ॥

काकली । स्त्री । सूक्ष्ममधुरास्फुटध्वनौ ॥ ईषत्कलः काकली । ईषदर्थे चेति कोः कादेशः । गौरादित्वान्ङीष् ॥

काकलीद्राक्षा । स्त्री । निर्वीजायाम् । रसाधिकायाम् । सुवृत्तायाम् । किसमिस् इति भाषा ॥ इति राजनिर्घण्टः ॥

काकस्वरः । पुं । कोकिले ॥

काकवल्लरी । स्त्री । स्वर्णवल्ल्याम् ॥

काकविष्ठा । स्त्री । काकमले ॥ कर्म

शयनुपादेयत्वेन वैराग्यास्पदे ॥

काकशीर्षः । पुं । बकवृक्षे ॥

काकस्फूर्जः । पुं । काकतिन्दुके ॥

काका । स्त्री । काकनासायाम् ॥ काकोल्याम् ॥ काकजङ्घायाम् ॥ रक्तिकायाम् ॥ काकमाच्याम् ॥ काकोदुम्बरिकायाम् ॥ टाप् ॥

काकाक्षिगोलकन्यायः । पुं । एकमेव चक्षुर्गोलकमुभयचक्षुःसम्बन्धिसदुभयचक्षुःकार्यकारकमित्यर्थनिष्ठदृष्टान्ते ॥

काकाङ्गी । स्त्री । काकजङ्घायाम् ॥ काकस्येवाङ्गं नासारूपं फलमस्याः । जातेरिति गौरादित्वाद्वा ङीष् ॥

काकाण्डः । पुं । महानिम्बे ॥ काकतिन्दुके ॥

काकाण्डा । स्त्री । कोलशिम्ब्याम् ॥

काकाण्डी । स्त्री । महाज्योतिष्मत्याम् ॥

काकाण्डोला । स्त्री । कोलशिम्ब्याम् ॥

काकादनी । स्त्री । गुञ्जायाम् ॥ श्वेतगुञ्जायाम् ॥ वृक्षविशेषे । चिंचायाम् । गृञ्जनस्याम् ॥ गौरादित्वान्ङीष् ॥

काकायुः । पुं । स्वर्णवल्ल्याम् ॥

काकारः । त्रि । अलक्ष्मीविशिष्टे ॥ कंजलम् आकिरति । कॄ० । आङ् पूर्वः । कर्मण्यण् ॥

काकारिः । पुं । पेचके ।

काकालः । पुं । द्रोणकाके ॥ काका इतिरवं लाति । ला० । कः ॥

काकिणी । स्त्री । पणस्य तुर्यांशे । वराटकानां दशकद्वये ॥ काठा इति गौडभाषाप्रसिद्धे मानदण्डस्य तुरीयांशे ॥ इति हेमचन्द्रः ॥ कृष्णलायाम् । रक्तिकायाम् ॥ एकवराट्याम् । एककौडी इतिभाषा ॥ उन्मानांशे ॥ उद्मानचतुर्थभागे ॥ ककनम् । ककति लौल्ये । घञ् । काकमणति । अण् शब्दे । अण् । पृ० ॥

काकिनी । स्त्री । पणपादे । पञ्चगण्डके ॥ मानपादे ॥ वराटके ॥ उद्मानतुर्यांशे ॥ ककनम् । कक० । घञ् । काकमनिति । अन प्राणने । अण् । पृ० ॥

काकी । स्त्री । वायस्याम् ॥ काकोल्याम् ॥

काकुः । स्त्री । शोकभीत्यादिभिः कामक्रोधादिभिर्वा ध्वनेर्विकारे ॥ जिह्वायाम् ॥ कक्यते । ककलौल्योपतापयोः ॥ बाहुलकादुण् ।

काकुत्स्थः । पुं । सूर्यवंशजे पुरञ्जयाख्ये राजनि ॥ पुरा किल पुरञ्जयो नाम साक्षाद्भगवतो विष्णोरंशावतारः

कश्चिदैक्ष्वाकोराजा देवैः सह सम-
यबन्धेन देवासुरयुद्धे महोक्षरूपधा
रिणो महेन्द्रस्य ककुदि स्थित्वापिना-
किलीलया निखिलमसुरकुलं निह
त्य ककुत्स्थसंज्ञां लेभे इति पौराणि
की कथात्रानुसन्धेया ॥ यथाहरघु-
वंशे कालिदासः । महेन्द्रमास्थाय म
होक्षरूपं यः संयति प्राप्तपिनाकिली
लः । चकार बाणैरसुराङ्गनानां गण्ड
स्थलीः प्रोषितपत्रलेखा इति ॥ श्री
रामचन्द्रे ॥ ककुत्स्थस्य गोत्रापत्य-
म् ॥ शिवादिभ्योऽ

काकुदम् । न । तालुनि । जिह्वेन्द्रिया
धिष्ठाने । तालुआ इतिभाषा ॥ का
कुर्जिह्वा सा उद्यतेऽस्मिन् । अने-
कार्थत्वाद्वदि रुतच्चेपणेवर्त्तते । घ-
ञर्थे कः । पृषोदरादित्वादेकस्योका
रस्यलोपः । शकन्धुवत् पररूपंवा ।
नुदेर्षोऽधिकरणे कः । पृषोदरादित्वा
न्नुलोपः ॥ ईषत् कवते वा । कुङ्श
ब्दे । अब्दादित्वात् साधु ॥ यद्वा ।
निश्चेष्टं ककुदं शिरः । ककुदे भवम्
। अण् ॥

काकुरुतम् । न । विकृतशब्दे ॥ काकु
श्च तद्रुतञ्च ॥

काकेक्षुः । पुं । खग्गडे । इक्षुगन्धाख्येतृ
णे । खागडा इतिगौडभाषा ॥

काणे ॥

काकेन्दुः । पुं । काकतिन्दुके । कटुति
न्दुके । कुचला इतिभाषा ॥ काका
नां काकवर्णोवा तिन्दुः । पृ° ॥

काकेष्टः । पुं । निम्बवृक्षे ॥

काकोचिकः । पुं । काउची इतिगौडभा
षाप्रसिद्धमत्स्यविशेषे । काकोच्याम् ॥

काकोची । स्त्री । काकोचिके मत्स्ये ॥

काकोदरः । पुं । सर्पे । चक्षुश्रवसि ॥
काकस्येव उदरमस्य ॥ यद्वा । ईष
त् अकति । अक° । ईषदर्थे चेतिकोः
कादेशः । काकमीषत्कुटिलगतिम
त् उदरमस्य ॥

काकोदुम्बरः । पुं । मलपवाम् । जघ
नेफलायाम् । काकडुमुर इतिगौड
भाषा । फेगडा फेगुडा इतिपर्वती
य भाषा ॥

काकोदुम्बरिका । स्त्री । काकोदुम्बरे
। कडम्बरी काष्ठोडुम्बर इतिचख्या
ते ॥ काकप्रिया उदुम्बरी । संज्ञा
यां कन् ॥

काकोलः । पुं । कुलाले ॥ द्रोणकाके
॥ काकयति । ककलौल्ये । स्वार्थेण्य
न्तः । बाहुलकादोलच् ॥ सर्पे ॥ शू
करविशेषे ॥ काकोली नामख्यातौ
षधिविशेषे ॥ न । नरकविशेषे ॥ पुं
। न । कृष्णवर्णस्थावरविषविशेषे ॥

काकोलमुग्रतेजःस्यात् कृष्णच्छविम हाविषम् ॥ ईषत् कोलति । कुल संस्याने । अच् । ईषदर्थे चेति कोः कादेशः ॥

काकोली । स्त्री । अष्टवर्गीयौषधिवि शेषे । वायसोल्याम् । स्वादुमांस्या म् ॥ जायते क्षीरकाकोली महाभे दोङ्गवस्थले । यत्र स्यात् क्षीरकाको ली काकोलीतत्रजायते ॥ पीवरी सदृशः कन्दः सक्षीरः प्रियगन्धवान् । साप्रोक्ता क्षीरकाकोली काकोली लिङ्गमुच्यते ॥ यथास्यात् क्षीरका कोली काकोल्यपितथाभवेत् । ए षा किञ्चिद्भवेत् कृष्णा भेदोयमुभ योरपि ॥ काकोलीयुगलं शीतं शुक्र लं मधुरं गुरु । बृंहणं वातदाहास्रपि त्तशोषज्वरापहम् ॥ काकानश्वोल गडयति । श्वोलडिउत्क्षेपणे । अन्ये भ्योपीतिडः । शकंध्वादिः ॥ अस्याः स्थाने अश्वगन्धामूलम् ॥

काकोलूकिका । स्त्री । काकोलूकयोर्वै रभावे ॥

काचः । पुं । कटाक्षे ॥ कुत्सितोऽक्षः कुत्सितोक्षोस्य वा । कापथ्यक्षयोरि ति कादेशः ॥

काक्षसेनिः । पुं । अभिप्रतारिनामनि नृपविशेषे ॥ कक्षसेनस्यापत्यम् । अतइञ् ॥

काक्षी । स्त्री । तुवरिकायाम् । अरह ड इति भाषा ॥ सौराष्ट्रमृत्तिकाया म् ॥ कक्षेभवा । तत्रभवइत्यण् । ङीप् ॥

काक्षीवः । पुं ।
काक्षीवकः । पुं । } शोभाञ्जनवृक्षे ॥

कागः । पुं । काके ॥ इति जटाधरः ॥

कागदः । पुं । न । कागजइत्याख्यो भाषाप्रसिद्धे शणपत्रे ॥ यथोक्तं म न्त्रकल्पद्रुमोक्त हनुमत्कवचे । भू र्जेवा वसने रक्ते क्षौमे वा तालपत्रके । कागदेवाष्टगन्धेन पञ्चगन्धेनवा पुनः ॥ चिगन्धेनाथ वैकेन विलिख्य धारयेन्नर इति ॥

काङ्क्षा । स्त्री । इच्छायाम् ॥ काङ्क्षइ च्छायाम् । गुरोश्चेत्यः । टाप् ॥

काङ्गा । स्त्री । वचायाम् ॥ इतिशब्दच न्द्रिका ॥

काचः । पुं । शिक्ये । छींका इतिभाषा ॥ मणौ ॥ नेत्ररोगविशेषे ॥ तस्यल क्षणम् । अस्मिन्नपितमोभूतनाति रूढेमहागदे । चन्द्रादित्यौ सनक्ष त्रावन्तरीक्षेचविद्युतः ॥ निर्मलानि च तेजांसिभ्राजिष्णूनीव पश्यति । सएवलिङ्गनाशस्तुमीलिका काचसं ज्ञित इति ॥ क्षारे । मृत्तिकाविशे

षे । काच इतिभाषा ॥ न । सिक्थके । सीसा मैन मोम इतिच भाषा ॥ काचलवणे ॥ कचते कच्यते ऽनेनाऽत्र वा । कचवन्धने दीप्तौच । घञ् । नक्कादेरितिकुत्वं न ॥ त्रिज स्तात् पचाद्यच्वा ॥ कचते । अच् । प्रज्ञाद्यण् वा ॥

काचकः । पुं । काचप्रज्ञाद्यर्थे ॥

काचकूपी । स्त्री । सीसी इति ख्याते काचपात्रे ॥

काचकोषः । पुं । लालटेमास्थे अपव रकविशेषे ॥

काचनम् । न । पत्रनिवन्धने ॥ इतित्रि काण्डशेषः ॥

काचनकम् । न । पत्रनिबन्धने ॥ लेखो निबध्यते येन तत्र काचनकाभिधे तिहारावली ॥

काचनकी । पुं । तालिके । लेखे । लिपौ इतिजटाधरः ॥

काचनी । स्त्री । लिखितस्य निबन्धने । तालिके ॥

काचभाजनम् । न । काचपात्रे । शिशुके ॥ काचस्यभाजनम् ॥

काचमलम् । न । काचलवणे ॥

काचलवणम् । न । कालालूण इति प्रसिद्धे लवणविशेषे । नीले । काचे । कृष्णलवणे ॥

काचसम्भवम् । न । काच लवणे ॥

काचसौवर्चलम् । न । काचलवणे ॥

काचस्थाली । स्त्री । पारुलगाछ इति गौडभाषा प्रसिद्धे वृक्षे । पाटलायाम् । फलेरुहायाम् ॥ काचपात्रे ॥ काचस्य चारस्य स्थाली पात्रम् ॥

काचाक्षः । पुं । कपर्द्द काचे । वृहद्बके ॥

काजिघः । पुं । काञ्चने । शातकुम्भे ॥ छिमडा इति गौडभाषा प्रसिद्धे कमण्डे ॥ मूषिके ॥

काचित् । अ । काचन । कापिस्त्रीइत्यर्थे ॥

काचितः । त्रि । शिक्यारोपिते पदार्थे । शिक्यिते ॥ काचेधृतम् । प्रातिपदिकाद्धात्वर्थे इति णिच् । क्तः ॥

काचिमः । पुं । देवकुलोद्भववृक्षे । भञ्ज रै । इतित्रिकाण्डशेषः ॥

काच्छः । त्रि । कच्छदेशोद्भवे ॥ कच्छेषु भवः । अण् ॥

काञ्चनः । पुं । कचनार इति प्रसिद्धे रक्तश्वेतभेदेन द्विविधे वृक्षविशेषे । तत्राद्यस्य पर्य्याया: । रक्तपुष्पः । कोविदारः । युग्मपत्रः । कुण्डलः ॥ द्वितीयस्य । काञ्चनालः । कर्वुदारः । पाकारि रिति ॥ चम्पके ॥ नागकेशरे ॥ उदुम्बरे ॥ धुस्तूरे ॥ न । स्वर्णे । हेम्नि ॥ किञ्जल्के । अलकेशरे

॥ धने ॥ नागकेशरपुष्पे ॥ काञ्चति । काचिदीप्तौ । नन्द्यादिल्युः ॥

काञ्चनकः । पुं । शालेर्जातिविशेषे ॥ कोविदारवृक्षे ॥ न । हरिताले ॥

काञ्चनकदली । स्त्री । स्वर्णकदल्याम् । चाँपाकेला इति गौडभाषा ॥

काञ्चनकारिणी । स्त्री । शतमूल्याम् ॥

काञ्चनक्षीरी । स्त्री । क्षीरिणीलतायाम् ॥

काञ्चनगिरिः । पुं । सुमेरुपर्वते ॥

काञ्चनपुष्पकम् । न । आहुल्यवृक्षे । तरवराख्ये । सुपुष्पे ॥

काञ्चनपुष्पी । स्त्री । गणिकारीवृक्षे ॥

काञ्चनारः । पुं । कोविदारे । युगपत्रके ॥ काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत् । कृमिकुष्ठगुदभ्रंसगण्डमालाव्रणापहः ॥ कोविदारोऽपि तद्वत् स्यात् तस्य पुष्पं लघु स्मृतम् । रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासजित् ॥

काञ्चनालः । पुं । कोविदारे ॥

काञ्चनाह्वयः । पुं । चाम्पेये । नागकेशरे ॥ काञ्चनस्याह्वया आह्वयो यस्य ॥

काञ्चनी । स्त्री । हरिद्रायाम् ॥ गोरोचनायाम् ॥ स्वर्णक्षीरीवृक्षे ॥ काञ्चतेऽनया । काचिदीप्त्यादौ । करणेतिल्युट् । टिड्ढेतिङीप् ॥

काञ्चनीया । स्त्री । गोरोचनायाम् ॥

काञ्चिः । स्त्री । काञ्च्याम् ॥ काञ्चते । काचिदीप्तिबन्धनयोः ॥ सर्वधातुभ्य इन् ॥

काञ्चिकम् । न । काञ्जिके । आरनाले ॥ इवन्तात् संज्ञायां कन् ॥

काञ्ची । स्त्री । सप्तपुर्यन्तर्गतपुरीविशेषे ॥ यथा । शिवकाञ्ची विष्णुकाञ्ची काञ्चीयुग्मं समन्ततम् । एतास्तु पृथिवीमध्ये न गण्यन्ते कदाचन ॥ एताः सप्तपुर्यः ॥ काशी शिवत्रिशूलस्था काञ्ची हरिहरात्मिका । वामदक्षिणचक्राभ्यां दधार द्विजपुङ्गवा इति भूतशुद्धितन्त्रम् ॥ चन्द्रहार गोट इति गौडभाषाप्रसिद्धे स्त्रीकट्याभरणे । मेखलायाम् । तत् पर्यायाः । सप्तकी । रसना । सारसनमिति ॥ केचित्तु एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका । रसना षोडशज्ञेया कलापः पञ्चविंशकः ॥ इति भेदं पठन्ति । इहत्वभेदात् पर्यायता ॥ गुञ्जायाम् ॥ कृदिकारादिति वा ङीष् ॥

काञ्चीपदम् । न । जघने ॥ इति हलायुधकोषः ॥

काञ्जिकम् । न । आरनाले । अवन्तिसोमे । धान्याम्ले । काँजी इति भा-

षा ॥ काञ्जिकं रोचनं रुच्यं पाचनंव
ह्निदीपनम् । शूलाजीर्णविबन्धघ्नं
कोष्ठशुद्धिकरम् परम् ॥ नभवेत्का
ञ्जिकं यत्र तत्र भ्रान्तिः प्रदीयते ॥ सं
हितं धान्यमण्डादिकाञ्जिकं कथ्यते
जनैः ॥ काञ्जिकम्भेदि तीक्ष्णोष्णं रो
चनं पाचनं लघु । दाहज्वरहरं स्प
र्शात् पानाद्वातकफापहम् ॥ माषा
दिवटकैर्यत्तु क्रियते तद्गुणाधिकम् ।
लघुवातहरं तत्तु रोचनं पाचनम्परम्
॥ शूलाजीर्णविबन्धामनाशनं वस्ति
शोधनम् ॥ धान्याम्लमच्छतरयाम
निशारिद्वारिशुण्ठीरजोलवणजीर-
कसंस्कृतं यत् । आवासितं सुरभिहि
ङ्गुकणेन यत्नात् तेनाशुशुष्कणिकणो
ऽधिकतां प्रयाति ॥ एलामरीचौषधवि
भावितमाणिमन्थं संसिद्धमामकरम
दकाञ्जिकं यत् । मन्दं विवर्द्धयति
जाठरवीतिहोत्रं निर्वाणदीपमिव ग
न्धकचूर्णयोगः ॥ काञ्जिकं रुचिदं हृ
द्यं स्वच्छमग्निकरं परम् । वातघ्नं बल
दं श्रेष्ठं गुर्वाहारस्य पाचकम् ॥ अपिच
। काञ्जिकं दधितैलञ्च सर्वोपलितना
शनम् । दाहकं गात्रशैथिल्यं वल्यं स-
न्तर्पणं परम् ॥ मर्द्दनाच्च भक्षणात्
॥ अपिच । कुल्माषधान्यमण्डोम-
वामृतं काञ्जिकम्भवेत् ॥ यन्मस्त्वा-

दिंशुचौभाण्डे सगुडं शौद्रकाञ्जिकम्
। धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं तदु
च्यते ॥ अन्नूष्णयादौ । संज्ञायामि
तिभावेण्वुल् । धात्वर्थनिर्देशे वा ।
केअञ्जिका अस्य ॥

काञ्जिकवटकः । पुं । काँजीवरा इति
लोके ॥ तस्य पाकप्रकारो यथा । म
न्यनीमूतनाधार्या कटुतैलेन लेपि-
ता । निर्मलेमांबुना पूर्यं तस्यां चू
र्णविभिः क्षिपेत् ॥ राजिकाजीरल
वणहिङ्गुशुण्ठीनिशाकृतम् । निः
क्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्र
येत् ॥ ततो दिनत्रयादूर्द्ध्वमम्लाः स्यु
र्वटका ध्रुवम् ॥ काञ्जिकवटको रुच्यो
वातहरः श्लेष्मकारकः शीतः । दाहं
शूलमजीर्णं हरते नेत्रामयेष्वहितः
॥ इति ॥

काञ्जिका । स्त्री । जीवन्तीलतायाम् ॥
पलाशीलतायाम् ॥ सार्षपदण्डैः
कृते व्यञ्जनान्तरे ॥ सार्षपीकन्दली
सूक्ष्माखण्डिता स्निग्धभाजने । स्था
पिता मण्डसहिता त्वथवा तण्डुलोद
के ॥ सप्तरात्रात् परं शुक्तं ततः सम्य
क् प्रजायते । तस्मादेव समाकृष्य
तलयेद्वा प्रलेहयेत् ॥ काञ्जिकेति स
माख्याता शूद्रधर्मोपजीवकैः । सार्ष
पस्य गुणा ये हि ते चास्या अपि कीर्त्ति

ना: ॥

काञ्ची । स्त्री । महाद्रोणवृक्षे ॥

काठ: । पुं । पाषाणे । अश्मनि ॥

काठकम् । न । कठानान्धर्मे आम्नाये समूहे । चरणेभ्योधर्मवदिति गोत्र चरणाद्वुञ् ॥

काठिन्यम् । न । कठिनतायाम् ॥ यथा । वाच्यतां समयोतीत: स्पष्टमग्रे भविष्यति । इतिपाठयतांग्रन्थे काठिन्यंकुचवर्णत इतिकलिविडम्बनम् ॥

काठिन्यफल: । पुं । कपित्थवृक्षे ॥

काण: । पुं । काके । वायसे ॥ त्रि । एकचक्षुषि । काणा इति भाषा ॥ योगविशेषे । यथा । रवौज्येष्ठा सोमे ऽभिजित् भौमे पूर्वाभाद्रपदा बुधे ऽश्विनी भरणीच गुरावार्द्रा शुक्रे मघा शनौचित्राचेत् काणयोगो भवति ॥ कणनिमीलने । अस्मात् घञ् ॥

काणूक: । पुं । करटे । वायसे ॥ कणति । कण० । सूकणिभ्यामूकोकणाविष्ठ्य् काणः ॥

काण्ड: । पुं । न । स्तम्बे । तृणादिगुच्छे ॥ तरुस्कन्धे । गुद्दा इतिभाषा ॥ वाणे । शरे ॥ अवसरे । प्रस्तावे । प्रकरणे ॥ कुत्सिते ॥ वृत्तविशेषे । अस्थ्नोठे ॥ नाडीदण्डे । नाले ॥ वर्गे । परिच्छेदे ॥ वृन्दे । समूहे ॥ रहसि । निर्जनस्थाने ॥ पीतशतकाण्डप्रमाणे दण्डे ॥ श्लाघायाम् ॥ पापीयसि ॥ कनति । कनीदीप्तौ । अमनसाटड: । कादिभ्य:कित् । अनुनासिकस्येतिदीर्घ: ॥ कणति कण्यते वा । कणशब्दे । ड: । वाहुलकाद्दीर्घ: ॥ न । सन्धिविच्छिन्नेकाण्डवल्लयास्थिनि ॥

काण्डकटुक: । पुं । कारवेल्ले ॥

काण्डकाण्डक: । पुं । काशतृणे ॥

काण्डकीलक: । पुं । लोध्रे ॥

काण्डगण्ड: । पुं । दीर्घकाण्डे । काशतृणे ॥ गण्डनामतृणे ॥

काण्डगोचर: । पुं । नाराचे । लोहमयेवाणे ॥

काण्डतिक्त: । पुं । भूनिम्बे । चिरायता इतिभाषा ॥

काण्डनील: । पुं । लोभे ॥

काण्डपट: । पुं । तिरस्करिण्याम् ॥ दृष्याभोगवित्ति वायुसञ्चारार्थे पटविशेषे । चिक सिर्की इतिचभाषा ॥ कनात इतिच ॥

काण्डपुङ्खा । स्त्री । शरपुङ्खायाम् ॥

काण्डपुष्पम् । न । दौना इति भाषा प्रसिद्धे च सुगन्धिपुष्पविशेषे ॥

काण्डपृष्ठ: । पुं । वेश्यापतौ ॥ सुतान्तरे ॥ स्वकुलं पृष्ठत: कृत्वा यो वैप

रत्नलंप्रजेत् । तेनदुष्पवरितेनाग्नौ । काण्डपृष्ठ इतिस्मृतः ॥ न । कार्मुधनुषि ॥ काण्डानि शस्त्राणि पृष्ठे यस्य ॥ ॥ त्रि । शस्त्राजीवे ॥

काण्डफला । स्त्री । कटुक्याम् ॥

काण्डर्षिः । पुं । वेदकाण्डविशेषाध्यापके जैमिन्यादौमुनिविशेषे ॥ इति त्रिकाण्डशेषः ॥

काण्डवान् । त्रि । काण्डीरे । वाणधारके । तीरन्दाज इतीतरभाषा ॥ काण्डोवाणो ऽस्यास्ति । मतुप् ॥

काण्डवारिणी । स्त्री । दुर्गायाम् ॥ यथा । महागजघटाटोपसंयुगे नरवाजिनाम् । स्मरणाद् वारते वाणान् तेनसा काण्डवारिणीति देवीपुराणे देवीनिरुक्ति नामा ४५ ऽध्यायः ॥

काण्डसन्धिः । पुं । ग्रन्थौ ॥

काण्डस्पृष्टः । पुं । काण्डपृष्ठे । शस्त्राजीवे ॥ स्पृष्टं गृहीतं काण्डं शस्त्रंयेन । वाहिताग्न्यादिष्विति परनिपातः ॥

काण्डहीनम् । न । भद्रमुस्तके ॥

काण्डका । स्त्री । लङ्कायाम् । करालत्रिपुटायाम् ॥ वालुकीनामकर्कट्याम् ॥

काण्डीरः । त्रि । काण्डवति ॥ काण्डो वाणोऽस्यास्ति । काण्डाण्डादीरन्नी

रचौ ॥ पुं । अपामार्गे ॥ काण्डवेल इति गौडभाषा प्रसिद्धे लताप्रभेदे । कारवल्याम् ॥

काण्डीरा । स्त्री । } मञ्जिष्ठायाम् ॥
काण्डीरी । स्त्री । }

काण्डेक्षुः । पुं । कोकिलाक्षे । तालमखाना इतिभाषा ॥ काशतृणे ॥ काण्डे इक्षुरिव ॥

काण्डोलः । पुं । पिटे । कण्डोले ॥ स्वार्थिकः प्रत्ययः ॥

काण्वः । पुं । यजुर्वेदीयशाखाविशेषे ॥ कण्वस्य गोत्रापत्यम् । काण्व्यः । ग॰यञ् ॥ काण्व्यस्य छात्रः । कण्वादिभ्योगोत्रइत्यण् । कण्वोदेवताऽस्यवा ॥

कातरः । त्रि । अधीरे । व्यसनाकुले । रोगादिनाऽऽकुलमनसि ॥ भीते ॥ विवशे ॥ ईषत्तरति । पचाद्यच् । ईषदर्थेचेति कोःकादेशः ॥ पुं । कातलामाच इतिगौडभाषाप्रसिद्धे मत्स्ये ॥

कातराक्षी । स्त्री । चकितनेत्रायाम् । मृगलोचनायाम् ॥

कातर्य्यम् । न । अधीरतायाम् । केवलायांनीतौ ॥ यथा । कातर्य्यं केवलानीतिः शौर्य्यं श्वापदचेष्टितम् । अतः सिद्धिंसमेताभ्यामुभाभ्यामन्वियेष

ष सः ॥ भांवेष्यण् ॥

कातलः । पुं । मत्स्यविशेषे । कातला इ
तिभाषा ॥ कातलोमधुरस्त्रोष्णो
गुरुपाकीत्रिदोषकृत् ॥

कात्तृणम् । न । रोहिषतृणे ॥

कात्यः । पुं । कात्यायनमुनौ ॥ कत
स्यापत्यम् । गर्गादित्वात् यञ् ॥

कात्यायनः । पुं । धर्मशास्त्रकर्त्तृमुनि
विशेषे ॥ व्याकरणवार्त्तिककारे । व
ररुचौ ॥ कात्यस्यापत्यम् । फक् ॥

कात्यायनी । स्त्री । उमायाम् । दुर्गा
याम् ॥ काषायवस्त्रार्द्धवृद्धविधवाया
म् ॥ कात्यायन्यर्द्धवृद्धायाकाषायव
सनाऽधवेत्युक्तेः ॥ कतस्यापत्यम् ।
ग० यञ् । सर्वत्रलोहितादिकतन्तेभ्य
इतिष्फः । षित्वान्ङीष् ॥

कार्थञ्चित्कः । त्रि । कथञ्चिदर्थे ॥ वि
नयादित्वात्स्वार्थेठक् ॥

काथिकः । पुं । कथायांसाधौ ॥ कथा
दिभ्यष्ठक् ॥

कादम्बः । पुं । वालिहाँस इतिगौड
प्रसिद्धे कलहंसपक्षिणि । नीलहं
सोयमितिरघुव्याख्यानेमल्लिनाथः ॥
वाणे । इषौ ॥ कदति । कदिःसौत्रः
। कदेर्णित् पक्षिणीत्यम्बच् ॥ कद
म्बेसमूहेभवः । अण् ॥

कादम्बकः । पुं । वाणे । सायके ॥

कादम्बरः । पुं । दध्यग्रे । दधिसरे ॥
न । कदम्बपुष्पोद्भवेमद्ये ॥ कादम्बं
कदम्बजातंरसंराति । रा० । आत
इतिकः ॥ मल्लिनाथस्तु दधाङ्गिरभि
तस्तटाविति माघ श्लोकव्याख्यावसरे
कादम्बरञ्चः । कादम्बः कलहंसे
स्वोरितिविश्वः । कादम्बं राति र
लयोरभेदाल्लाति प्रकृतिस्त्वेनादत्ते
इतिकादम्बरमैक्षवम् । पानसज्ञाश्च
माधूकं खार्जूरन्तालमैक्षवम् इति
स्मरणात् । आत इतिकः इत्याह ॥

कादम्बरी । स्त्री । कोकिलायाम् ॥ भा
रत्याम् । सरस्वत्याम् ॥ शारिका
पक्षिणि ॥ मदिरायाम् । हलिप्रिया
याम् ॥ कुत्सितमम्बरम् । कुगती
तिसमासः । कोःकत्तत्पुरुषेचि ।
कदम्बरंनीलाम्बरमस्यास्ति । अर्श
आद्यच् । तस्येयम् । तस्येदमित्यण् ।
ङीप् ॥ यद्वा । कदम्बेजातोरसःकाद
म्बः । तत्रजातइत्यण् । कादम्बंरा
ति । रादाने । आतोनुपेतिकः ।
गौरादित्वान् ङीप् ॥

कादम्बर्य्यः । पुं । कदम्बद्रुमे ॥

कादम्बा । स्त्री । मुण्डीतिख्यातायाङ्क
दम्बपुष्प्याम् ॥

कादम्बिनी । स्त्री । मेघमालायाम् ॥
कादम्बाः कलहंसाः वलाकाश्चमेघ

मनुधावन्ति ते सन्त्यस्याः । इनिः ॥ कदम्बस्य विकारः कादम्बः । सोऽस्त्यस्याः . कार्यत्वेनेति वा ॥

कादाचित्कम् । त्रि । कदाचिद्भवे ॥

काद्रवेयः । पुं । नागे । नराकारे फणालाङ्गूलवति सर्पेभ्योऽन्यस्मिन् देवयोनौ ॥ कद्र्वाः अपत्यम् । स्त्रीभ्योढक् । ढलोपेऽकद्र्वाः ॥ शुभ्रादित्वाड्ढक् ॥

काननकम् । न । जयपालबीजे ॥

काननम् । न । वने ॥ गृहे ॥ ब्रह्मणो मुखे ॥ कानयति । कनीदीप्त्यादौ । युच्प्युट् ॥ कस्य जलस्य आननं जीवनमस्येति वा ॥

काननारिः । पुं । शमीवृक्षे ॥ इतिशब्दचं० ॥

कानीनः । पुं । पाराशर्ये । वेदव्यासे ॥ कर्णे । कुन्तीज्येष्ठपुत्रे ॥ त्रि । कन्यकाजाते ॥ कन्यायामूढा तदा वोढुरेव पुत्रः । यथाह मनुः । पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः । तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवमिति ॥ कन्यायामनूढा पितृगृह एव तिष्ठति तदा तत्पुत्रो मातामहस्यैव । यथाह याज्ञवल्क्यः । कानीनः कन्यकाजातो मातामहसुतो मत- इति ॥ कन्याया अपत्यम् । कन्यायाः कनीनश्चेत्यण् ॥

कानीयसः । त्रि । कनीयसि ॥ स्वार्थेऽण् ॥

कान्तः । पुं । पत्यौ ॥ लोहे ॥ चन्द्रसूर्य्यायः पर्यायान्तः कान्तः शिलायाम् । यथा । चन्द्रकान्तः सूर्यकान्तः अयस्कान्त इति ॥ वसन्तर्त्तौ ॥ हिज्जलवृक्षे ॥ कदाचिदाबालललितापुंरूपाकृष्णविग्रहा । वंशीनादविनोदेन करोति विवशं जगदित्यादि पुराणवाक्यात् त्रिपुरसुन्दर्यवतारत्वेनातिसुन्दरे श्रीकृष्णचन्द्रे । वासुदेवे ॥ अभिरूपतमदेहधारित्वात द्विपरार्द्धान्ते कस्य ब्रह्मणोऽन्तायस्मादिति वा । द्विपरार्द्धावसानेकं ब्रह्माणमन्तयति नाशयतीति वा ॥ न । कुङ्कुमे ॥ लौहविशेषे ॥ तस्य ल० । यथा । स्वादुर्यत्र भवेन्निम्बकल्को रात्रिन्दिवोषितः । कान्तं तदुत्तमं यद्रूप्येणावर्त्तितं मिलेत् ॥ तस्य परीक्षा यथा । पात्रे यस्मिन् नसरति जले तैलबिन्दुर्निषिक्तो हिङ्गु गन्धं विसृजति निजं रूषितं निम्बकल्कैः । पाके दुग्धं भजति शिखराकारतां नैति भूमौ कान्तं लोहं तदिदमुदितं लक्षणोक्तं नचान्यदिति सुखबोधः ॥ त्रि । मनोरमे । शोभने ॥ अभीष्टे

॥ गृहविशेषे ॥ काम्यतेस्म । कमु कान्तौ । क्तः । यस्यविभाषेतिनेट् । अनुनासिकस्येतिदीर्घः ॥ कनति स्म वा । कनीदीप्तिकान्तिगतिषु । गत्यर्थेति क्तः ॥

कान्तपक्षी । पुं । मयूरे ॥

कान्तपुष्पः । पुं । कोविदारवृक्षे ॥

कान्तलकः । पुं । नन्दीवृक्षे । तोंद इति गौडभाषा प्रसिद्धे । तुन्ने ॥ काम्यते । कमु० । मतिबुद्धि पूजार्थेभ्यश्चेतिक्तः । लकति । लकआस्वादने । अच् । कान्तश्चासौलकश्च ॥

कान्तलोहः । पुं । न । अयस्कान्ते । कान्तीसार इति प्रसिद्धे लोहे ॥ अस्य परीक्षा । यत्पात्रे नप्रसरतिजले तैलबिन्दुः प्रतप्ते हिङ्गुर्गन्धंत्यजतिच निजंतिक्ततां निम्बकल्कः । तप्तंदुग्धं भवति शिखराकारकं नैतिभूमिं कृष्णाङ्गःस्यात् सजलचणकः कान्तलोहंतदुक्तमिति ॥ अस्यगुणाः । गुल्मोदरार्शः शूलाममामवात भगन्दरम् । कामलाशोथकुष्ठानि क्षयं कान्तमयोहरेत् ॥ प्लीहानमम्लपित्तञ्चयकृच्चापिशिरोरुजम् । सर्वान् रोगान् विजयते कान्तलोहंनसंशयः ॥ बलवीर्य्यंवपुःपुष्टिंकुरुते ऽग्निंविवर्द्धयेदिति ॥

कान्ता । स्त्री । नार्य्याम् ॥ स्त्रीविशेषे । सर्वाङ्गसुन्दर्य्याम् ॥ भोगेवोर्मिधनं पूर्वमनः कुटिलभाषणैः । कान्ता हरति सर्बस्वं कः स्तेनस्तादृशोऽपरः ॥ प्रियङ्गुवृक्षे । फलिन्याम् ॥ नागरमुस्तायाम् ॥ रेणुकायाम् ॥ बृहदेलायाम् ॥ काम्यतेस्म । कमु० । णिङ् । भावे क्तः । टाप् ॥

कान्ताङ्घ्रिदोहदः । पुं । कान्ताचरणदोहदे । अशोकवृक्षे ॥

कान्तायसम् । न । अयस्कान्ते ॥

कान्तारः । पुं । कोविदारवृक्षे ॥ इक्षुविशेषे । कनारा इतिभाषा ॥ कान्तारेक्षुर्गुरुर्वृष्यः श्लेष्मलोबृंहणःसरः ॥ न । उपसर्गादौ ॥ कानने ॥ अजविशेषे ॥ पुं । न । महारण्ये ॥ दुर्गमवर्त्मनि ॥ बिले ॥ कान्ताअरायस्य ॥ यद्वा । कस्य जलस्य सुखस्य वा । अन्तः । कान्तं मनोज्ञम् ऋच्छति इयर्त्ति वा । कर्मण्यण् ॥

कान्तारकः । पुं । काजलि आकु इति गौड भाषा प्रसिद्धे इक्षुविशेषे ॥ कान्तंरसमृच्छति । ऋगतौ । कर्मण्यण् ॥ स्वार्थे कन् ण्वुल्वा ॥

कान्तारी । स्त्री । कान्तारके ॥

कान्तिः । स्त्री । शोभायाम् । दीप्तौ ॥ अभिलाषे । इच्छायाम् ॥ स्त्रीणांशृङ्गार

जेगुणविशेषे । सौन्दर्ये ॥ काम्यते अनयां वा। कमनं वा। कमु०। क्तिन्। अनुनासिकेति दीर्घइति केनचिदुक्तं तन्न। काम्यतीति तेनविग्रहणीतत्त्वात्। तत्राङ्गत्वाणिङ्निमित्त वृद्धेः सम्भवात्। आयादयइतिणिङ् भावेवाबोध्यम् ॥

कान्तिदम्। न। पित्ते ॥ त्रि। कान्त्युत्पादके। शोभादायके ॥

कान्तिदा। स्त्री। वाकुच्याम्। सोमराज्याम् ॥

कान्तिदायकम्। न। कालीयकवृक्षे ॥ त्रि। कान्तिप्रदे ॥

कान्यिकः। त्रि। कन्यायाम्भवे ॥ शैषिकः कन्यायाष्ठक् ॥

कान्दर्पिकम्। न वाजीकरणे ॥ यथा। रक्तेऽधिके स्त्री पुरुषस्तु शुक्रे न पुंसकं शोणितशुक्रसाम्ये। यस्मादतः शुक्रविवृद्धिदानि निषेवितव्यानि रसायनानि ॥ हर्म्यपृष्ठमुडुनाथरश्मयः सोत्पलं मधु मदालसा प्रिया। वल्लकी स्मरकथारहः स्रजो वर्ग एष मदनस्य वागुरा ॥ माक्षीकधातुमधुपारदलोहचूर्णपथ्याशिलाजतुविडङ्गघृतानि योऽद्यात्। सैकानि विंशतिरहानि जरान्वितोऽपि साशीतिकोऽपि रमयत्यबलां युवेव ॥ क्षीरं श्रितं यः कपिकच्छुमूलैः पिबेत् क्षयं स्त्रीषु न सोऽभ्युपैति। माषान् पयः सर्पिषि वा विपक्वान् षड्ग्रासमात्रांश्च पयोऽनुपानात् ॥ विदारिकायाः स्वरसेन चूर्णं मुहुर्मुहुर्भावितशोषितञ्च। घृतेन दुग्धेन सशर्करेण पिबेत् स यस्य प्रमदाः प्रभूताः ॥ धात्रीफलानां स्वरसेन चूर्णं सुभावितं क्षौद्रसिताज्ययुक्तम्। लीढ्वानुपीत्वा च पयोऽग्निशक्त्या कामाग्निकामः पुरुषो निषेवेत् ॥ क्षीरेण वस्ताण्डयुजाश्रितेन सम्प्राप्यकामी बहुशस्तिलान् यः। सुशोषितानत्ति पिबेत् पयश्च तस्याग्रतः किंचटकः करोति ॥ माषसूपसहितेन सर्पिषा षष्टिकौदनमदन्ति ये नराः। क्षीरमप्यनुपिबन्ति तास्तु ते शर्वरीषु मदनेन शेरते ॥ तिलाश्वगन्धाकपिकच्छुमूलैर्विदारिकाषष्टिकपिष्टयोगाः। आजेन पिष्टाः पयसा घृतेन पक्वा भवेच्छष्कुलिकातिवृष्या ॥ क्षीरेण वा गोक्षुरकोपयोगं विदारिकाकन्दकभक्षणं वा। कुर्वन्न सीदेद्यदि जीर्यतेऽस्य मन्दाग्निना चेदिदमत्र चूर्णम् ॥ साजमोदलवणाहरीतकी शृङ्गबेरसहिता च पिप्पली। मद्यतक्रतरलोष्णवारिभिश्चूर्णपानमुदराग्निदीपनम् ॥

अत्यन्ततिक्तलवणानि कटूनि यानि य: स्वादयाकवहुलानि च भोजनानि । इक्षुकशीर्यरचित: स करोत्यनेकव्याजान् जरन्निव युवाप्यवलाम वाप्येति ॥

कान्दवम् । न । मिठाई पकवान इति प्रसिद्धभक्ष्ये ॥ कन्दौ संस्कृतम् । संस्कृतम्भक्ष्याइत्यण् ॥

कान्दविक: । त्रि । आपूपिके । पूपविक्रयकर्त्तरि । भक्ष्यकारे ॥ कान्दवं पण्यमस्य । तदस्यपण्यमितिठक् ।

कान्दिग्भूत: । त्रि । कान्दिशीके ॥

कान्दिशीक: । त्रि । भयद्रुते । भीत्या पलायिते । कान्दिशंयामीत्याह । तदाहेतिमाशब्दादिभ्यउपसङ्ख्यानमितिठक् । पृ° ॥

कान्यकुब्जम् । न । पुरविशेषे । गाधिपुरे । कुशस्थले । महोदये । कनौज इति भाषा ॥

कान्यजा । स्त्री । नलीनामगन्धद्रव्ये ॥

कापटिक: । त्रि । शठे ॥ पुं । छात्रे ॥ परमर्मज्ञे । पञ्चवर्गेषु प्रथमे ॥ तत्र परमर्मज्ञ: प्रगल्भच्छात्र: कापटव्यवहारित्वात् कापटिक: । तंदृष्ट्वार्थेन मर्थमानाभ्या मुपगृह्य रहसि राजाब्रूयात् यस्यदुर्वृत्तं पश्यसि तत्तदानीमेव मयि वक्तव्यमिति ॥ कपटे

नचरति । ठक् ॥

कापथ्यम् । न । कपटभावे ॥

कापथम् । न । उशीरे ॥ पुं । कथे । निन्द्यवर्त्मनि ॥ कुत्सित: पथ: । कुगतीतिसमास: । ईषदर्थेचेति को: कादेश: । कुमार्गोपीषन्मार्गो भवति । इत्यमदन्तपथशब्देन समासेन पुंस्त्वं निर्वाह्य पथिन् शब्देन समासे कापथ्यचयोरितिकादेशे पथ: सङ्ख्याव्ययादेरितिक्लीवत्वं भवति॥

कापाल: । पुं । कालियाकडा इतिगौडभाषा प्रसिद्धकर्कटायाम् ॥ न । अष्टादशकुष्ठान्तर्गतवातिककुष्ठे । पश्यकपालम् ॥

कापालिक: । पुं । कपालि इतिगौडभाषाप्रसिद्धवर्णसङ्करजातौ । अन्त्यजविशेषोयम् ॥ सिद्धान्ताचारविशेषे ॥ यथा । अथतीर्थकराग्रणी:प्रतस्थे कापालिकजालकंविजेतुमितिशङ्करविजय: ॥ अस्यस्वरूपं यथा । नराष्टिमालाकृतभूरिभूषण: श्मशानवासी न्वकपालभोजन: । पश्यामि योगाञ्जनशुद्धदर्शनो जगन्मिथोभिन्नमभिन्नमीश्वरादिति ॥ अस्यधर्मोयथा । मस्तिष्कान्त्रवसाभिघारितमहामांसाहुती र्जुह्वतां वन्हौ ब्रह्मकपाल कल्पितसुरापाने

न नः पारणा । सद्यः कृत्तकठोरकण्ठविगलत्कीलालधारोल्बणै रर्च्योनः पुरुषो पहारबलिभिर्देवो महाभैरवः इति प्रबोधचन्द्रोदयः॥ कपालिकेव । शर्करादिभ्योऽण् ॥

कापाक्षी । स्त्री । विडङ्गायाम् ॥

कापित्थम् । न । दाधित्थे ॥ कपित्थस्यावयवोविकारोवा । अनुदात्तादेश्चेत्यञ् ॥

कापिलः । पुं । साङ्ख्यशास्त्रज्ञे ॥ पिङ्गलवर्णे ॥ त्रि । पिङ्गलवर्णवति ॥ । न । उपपुराणविशेषे ॥

कापिशम् । न । मद्ये ॥

कापिशायनम् । न । मद्ये । मधुनि ॥ देवतायाम् ॥ कापिश्यांजातादि । कापिश्याःष्फक् ॥

कापिशायनी । स्त्री । द्राक्षायाम् ॥ षित्त्वान् ङीष् ॥

कापिशेयः । पुं । पिशाचे ॥

कापुरुषः । पुं । कुपुरुषे ॥ कुत्सितः पुरुषः । विभाषापुरुषइतिकादेशः ॥ ईषत् पुरुषोवा ॥

कापेयः । पुं । शौनकर्षौ । कपिगोत्रापत्ये ॥ इतश्चानिञ इतिढक् ॥ त्रि । कपिसम्बन्धिनि ॥ न । कपित्वे ॥ कपेः कर्मभावोवा । कपिज्ञात्योर्ढक् ॥

कापोतम् । न । कपोतसमूहे ॥ कपोतानांसमूहः । अनुदात्तादेरञ् ॥ सौवीराञ्जने ॥ कपोतस्येदम् । कपोतवर्णत्वात् । तस्येदमित्यण् ॥ पुं । रुचके ॥ कपोताभवर्णे ॥ सर्जिकाक्षारे ॥ कपोतवर्णोऽस्यास्ति । ज्यो° अण् ॥ त्रि । कपोताभवर्णवति ॥ कपोतस्यावयवोविकारोवा । प्राणिरजतादिभ्योञ् ॥

कापोताञ्जनम् । न । सौवीराञ्जने । स्रोतोञ्जने ॥ कापोतञ्च तदञ्जनञ्च ॥

काप्यकरः । पुं । काप्यकारे ॥

काप्यकारः । पुं । स्वयंकृतं पापं चित्ते आधाय यः कथयति तस्मिन् । स्वपापवक्तरि ॥

काफलः । पुं । कट्फले ॥

काम । अ । अभ्यनुज्ञायाम् ॥

कामम् । न । रेतसि ॥ इष्टानतिक्रमे । निकामे ॥ काम्ये ॥ वाढे ॥ अनुमतौ ॥ पुं । इच्छायाम् ॥ अनुरागे ॥ फलतृष्णायाम् ॥ तत्तद्दृष्टविषयाभिलाषे ॥ पुंसोयाविषयापेक्षा स कामइतिभण्यते । पुमानादौकाममय एवभूत्वाथकर्मकृत् । यतोयंकर्मणो हेतुः कामोतोस्यप्रधानता ॥ अकामस्यक्रियाकाचिद्दृश्यते नेहकर्हिचित् । यद्यद्धिकुरुतेकिञ्चित्तत्का

मत्स्यचेष्टितम् ॥ वाह्यादिभेदात् कामस्त्रिविधः । वाह्योग[illegible]स्रचादिः १ आन्तरो मनोराज्यरूपः २ वासनामात्ररूपस्तृतीयः ३ ॥ इन्द्रियाधिष्ठाने ॥ अत्तैः काम्यमानत्वाच्छब्दादिविषयेषु ॥ विषयभोगे ॥ स्त्रीपुंसयोः परस्परव्यतिकराभिलाषेऽत्यन्तनिरूढः कामशब्दः ॥ स्त्रीसङ्गे ॥ अस्मात् सङ्कल्पादिदं मे स्यादित्येवंरूपे ॥ अप्राप्तेऽपि विषयः प्राप्तिकारणाभावेऽपि प्राप्यतामित्याकारे चित्तवृत्तिविशेषे ॥ रतिमात्रहेतुः कामः ॥ शास्त्रानुमतजायापुत्रवित्तादिविषयोऽभिलाषः ॥ मोहनस्तम्भनाकर्षणवशीकरणमारणोच्चाटनादिः ॥ दिव्यमानुषभेदात् द्विविधः कामः ॥ कर्मफले ॥ कामयितव्ये ॥ रिरंसायाम् ॥ रतौ ॥ त्रयोदशाङ्के ॥ कामस्तु ब्रह्मणो हृदयाज्जातः । यथा । हृदि कामो भ्रुवोः क्रोधो लोभश्चाधरदच्छदादिति श्रीभागवतम् ॥ महाराजवृते ॥ कामदेवे । स्मरे ॥ अस्य स्थानानि यथा । पादाङ्गुष्ठे प्रतिपदि द्वितीयायाञ्च गुल्फके । ऊरुदेशे तृतीयायां चतुर्थ्यां भगदेशतः ॥ नाभिस्थाने च पञ्चम्यां षष्ठ्यान्तु कुचमण्डले । सप्तम्यां हृदये चैव चाष्टम्यां कण्ठदेशतः

॥ नवम्यां कण्ठदेशे च दशम्यां चोष्ठदेशतः । एकादश्यां गण्डदेशे द्वादश्यां नयने तथा ॥ श्रवणे च त्रयोदश्यां चतुर्दश्यां ललाटके । पौर्णमास्यां शिखायाञ्च ज्ञातव्यञ्च इति क्रमात् ॥ दक्षे पुंसां स्त्रियां वामे शुक्ले कृष्णे विपर्ययः ॥ यत्र स्थाने वसेत् कामस्तत्रैव नखचुम्बनम् । मन्त्रेणानेन कर्त्तव्यं ज्ञातव्यं रतिकोविदैः ॥ काम्यतेऽनेन । कमु० । पुंसि संज्ञायामिति घः । यद्वा । कामयते । पचाद्यच् ॥ कमनम् । कमेर्घञ् वा ॥

कामकला । स्त्री । रतौ । कामदेवपत्न्याम् ॥ मुखं बिन्दुं कुचौ कृत्स्वेति ध्यानोक्तशक्तिप्रभेदे ॥ चन्द्रस्य याः षोडशकलास्ता एव कामस्य कलाः ॥

कामकामी । त्रि । अन्ते । आत्मान् विषयान् कामयितुं शीले ॥

कामकारः । पुं । कामतःप्रवृत्तौ । स्वेच्छायाम् ॥ कामं करोतीति । कृञ्० । कर्म्मण्यण् ॥

कामकारतः । अ । स्वेच्छाकारेणेत्यर्थे ॥

कामकूटः । पुं । वेश्याप्रिये ॥ वेश्याया विभ्रमे ॥

कामकृत् । त्रि । कामकारके ॥ कामान् करोति । डुकृञ्० । क्विप् ॥

कामकेलिः । पुं । सुरते ॥ त्रि । षिङ्गे ॥

कामक्रोधपरायणः । त्रि । कामक्रोधाभ्यां सदापरिगृहीते ॥ कामक्रोधौ परमयनमाश्रयो यस्य ॥

कामखड्गदला । स्त्री । स्वर्णकेतक्याम् ॥

कामगामी । त्रि । कामगामिनि ॥

कामगिरिः । पुं । भारतवर्षस्य पर्व्वतविशेषे ॥ सतु कामरूपदेशे वर्त्तते ॥

कामगुणः । पुं । रागे ॥ विषये ॥ आभोगे ॥

कामङ्गामी । त्रि । कामचरे । अनुकामीने ॥ कामं यथेच्छं गमनशीलः । काममिच्छव्ययम् । सुपीतिणिनिः ॥

कामचारः । पुं । कामाचारे ॥ स्वतन्त्रतायाम् ॥

कामचारी । त्रि । कामुके ॥ स्वच्छन्दे । स्वेच्छाचारिणि ॥ कलविङ्के ॥ पुं । गरुडे ॥

कामचारिपुरम् । न । देवपुरविशेषे ॥

कामजानः । पुं । कोकिले । पिके ॥

कामतालः । पुं । कोकिले । वनप्रिये ॥

कामतिथिः । स्त्री । त्रयोदश्याम् ॥

कामदः । त्रि । कामिके । अभीष्टदे ॥ न । दक्षिणस्यां दिशि विख्याते वनविशेषे ॥ कामान् ददाति । डुदाञ्० । आत इति कः ॥

कामदा । स्त्री । कामधेनौ । टाप् ॥

कामदुघा । स्त्री । कामधेनौ ॥ कामान् दुग्धे दोग्धि वा । दुहः कप् घश्चेति दुहेः कप् प्रत्ययो घश्चान्तादेशः ॥

कामधरः । पुं । कामरूपस्य मत्स्यध्वज पर्वतस्थे सरोवरे ॥

कामधुक् । स्त्री । समुद्रमथनोद्भवायां वसिष्ठमुनेः कामधेनौ ॥ धेनूनामस्मि भगवतो विभूतिः । कामान् दोग्धि । दुह० क्विप् ॥ त्रि । काम्यप्रदे ॥ यथा । एकः शब्दः सुज्ञातः सुप्रयुक्तः स्वर्गेलोके कामधुग् भवतीति श्रुतिः ॥

कामदूतिः । पुं । कामदूतिकायाम् ॥

कामदूतिका । स्त्री । नागदन्त्याम् ॥ पाटलायाम् ॥

कामदूती । स्त्री । पाटलावृक्षे ॥ कामदूतिकार्थे ॥

कामधेनुः । स्त्री । कामदुघि । स्वर्गवि ॥ वशिष्ठधेनौ ॥

कामध्वंसी । पुं । शिवे ॥ कामं ध्वंसयति । ध्वंसु० सुपीतिणिनिः ॥

कामनः । त्रि । कामुके ॥ अनुदात्तादेश्चेति णिङन्तात्कमेर्युच् ॥

कामना । स्त्री । इच्छायाम् ॥ टाप् ॥

कामन्धमी । पुं । कांस्यकारे ॥

कामपत्नी । स्त्री । रतौ ॥ कामस्य पत्नी ॥

कामपरीत: । त्रि । कामातुरतया विपरीतबुद्धौ ॥

कामपाल: । पुं । बलदेवे ॥ कामान् पालयति । पालरक्षणे । कर्मण्यण् ॥

कामप्रद: । पुं । भगवति । वासुदेवे ॥ कामानां पुरुषार्थानांप्रद: ॥ रतिबन्धविशेषे । यथा । द्वौ पादौ स्कन्धसंलग्नौ चिप्त्वा लिङ्गं भगे तथा । कामयेत कामुक: प्रीत्या बन्ध: कामप्रदो हि स: इति ॥

कामप्रवेदनम् । न । स्वाभिप्रायाविष्करणे ॥

कामफल: । पुं । महाराजाम्रवृक्षे ॥

कामभाव: । त्रि । कामार्त्ते ॥

कामम् । अ । अनुमतौ ॥ प्रकामे ॥ पर्य्याप्ते ॥ असूयायाम् ॥ अनुगमने ॥ अकामानुमतौ । स्वच्छन्दार्थे । आदावनिच्छायां पश्चादङ्गीकारे ॥ काम्यते । कर्म्मणिकन्तादम् ॥

काममह: । पुं । चैत्र्यां पूर्णिमायाम् ॥

कामयमान: । त्रि । उशति । वाञ्छति ॥

कामयान: । त्रि । अभिकाने ॥ कामुके ॥

कामयाना । स्त्री । गर्भिण्याम् ॥

कामयिता । त्रि । कामुके ॥ कामयते । कमु० । णिजन्तात् तृन् ॥

कामरूप: । पुं । कांवरू इतिप्रसिद्धे देशे । प्राग्ज्योतिषे ॥ कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्वतम् । कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि ॥ तत्र कामगिरौ योनिपीठे कामाख्या देव्यस्ति । यथा । योनिपीठं कामगिरौ कामाख्या तत्र देवता । त्र्यधिकम्य सर्वत्र विरला चार्ह कामरूपे गृहे गृहे इतितन्त्रचूडामणौ पीठमाला ॥ त्रि । मनोज्ञरूपे ॥ स्वेच्छारूपे ॥

कामरूपिणी । स्त्री । अश्वगन्धावृक्षे ॥

कामरूपी । पुं । विद्याधरे ॥ जाहकजन्तौ ॥ त्रि । मनोज्ञरूपिणि ॥ स्वेच्छारूपिणि ॥ सर्वं मासु विचेतव्यं हरिभि: कामरूपिभिरितिरामायणम् ॥ कामतोरूपमस्य । इनि: ॥

कामरेखा । स्त्री । वेश्यायाम् ॥

कामल: । पुं । वसन्तकाले ॥ मरुभूमौ ॥ त्रि । कामुके ॥ पुं । स्त्री । रोगविशेषे ॥ तस्यनिदानसम्प्राप्तिलक्षणानियथा । पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते । तस्य पित्तमसृङ्मांसंदग्ध्वारोगाय कल्पते ॥ । हारिद्रनेत्र: स भृशंहारिद्रत्वङ्नखानन: । रक्तपीतशकृन्मूत्रोभेकवर्णोहतेन्द्रिय: ॥ दाहाविपाकदौर्बल्यसदनारुचिकर्षित: । कामला बहुपित्तैषाकोष्ठशाखाश्रयामता ॥

मध्वौषधं यथा । फलत्रिकामृतावासातिक्ताभूनिम्बनिम्बजः । क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलमिति । कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला ॥ तस्या रिष्टलक्षणम् । छर्द्यरोचकहृल्लासज्वरक्लमनिपीडितः । नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली ॥ कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः । सरक्ताक्षिमुखच्छर्द्दिविण्मूत्रो यश्च ताम्यति ॥ दाहारुचितृडानाहतन्द्रामोहसमन्वितः । नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान् विपद्यते इति ॥ मरीचतिलपुष्पाभ्यामञ्जनं कामलापहमिति गारुडे १८७ अध्यायः ॥

कामलता । स्त्री । शिश्ने ॥ इति हेमचन्द्रः ॥

कामला । स्त्री । कामले रोगे ॥

कामलायनः । पुं । उपकोसलाख्यमुनौ ॥ कमलस्यापत्यम् । नडादित्वात् फक् ॥

कामलिका । स्त्री । कङ्गुधान्ये ॥

कामवती । स्त्री । दारुहरिद्रायाम् ॥

कामवल्लभः । पुं । आम्रे ॥

कामवल्लभा । स्त्री । ज्योत्स्नायाम् ॥

कामवृक्षः । पुं । वन्दाके ॥

कामवृद्धिः । पुं । कामज इति कर्णाटदेशप्रसिद्धे क्षुपविशेषे । मदनायुधे । कन्दर्पजीवे ॥

कामवृन्ता । स्त्री । पाटलायाम् ॥

कामशरः । पुं । आम्रे ॥

कामसखः । पुं । वसन्तकाले ॥

कामसुतः । पुं । अनिरुद्धे ॥

कामसूत्रम् । न । वात्स्यायनादिकामतन्त्रप्रतिपादकशास्त्रे ॥

कामहैतुकम् । न । कामातिरिक्तकारणशून्ये ॥

कामाख्या । स्त्री । कामरूपदेशे देवीस्थाने ॥ सतीदेहेनावतीर्णाया महादेव्या यत्र योनिमण्डलं पतितम् कालिकापुराणे च यस्य महत्त्वं मतं तत् त्रिपुरभैरव्याः स्थानम् । यथोक्तं देवीगीतायाम् । श्रीमत्त्रिपुरभैरव्याः कामाख्यायोनिमण्डलम् । भूमण्डले क्षेत्ररत्नं महामायाधिवासितम् ॥ नातः परतरं स्थानं क्वचिदस्ति धरातले । प्रतिमासं भवेद्देवी यत्र साक्षाद्रजस्वला ॥ तत्रस्था देवताः सर्वाः पर्वतात्मकतां गताः । पर्वतेषु वसन्त्येव महत्यो देवता अपि ॥ तत्रस्था पृथिवी सर्वा देवीरूपा स्मृता बुधैः । नातः परतरं स्थानं कामाख्यायोनिमण्डलादिति ॥ नामकारणं

यथा । श्रीभगवानुवाच । कामार्थमागता यस्मान् मया सार्द्धं महागिरौ । कामाख्या प्रोच्यते देवी नीलकूटे रहोगता ॥ कामदा कामिनी कामा कान्ता कामाङ्गदायिनी ॥ कामाङ्गनाशिनी यस्मात्कामाख्या तेनचोच्यतइति कालिकापुराणम् ॥

कामाङ्कुशः । पुं । नखे ॥ शिश्ने ॥ व्याघ्रनखद्वययुक्ते बालानाम्भूषणे ॥

कामाङ्गः । पुं । आम्रवृक्षे ॥

कामातुरः । त्रि । कामार्त्ते ॥

कामात्मजः । पुं । अनिरुद्धे ॥

कामात्मता । स्त्री । फलाभिलाषशीलत्वे ॥ कामात्मनो भावः । तल् ॥

कामात्मा । पुं । कामस्वभावे । कामाकुलचित्ते ॥ काम्यमानविषयशताकुलचित्तत्वेन काममये ॥ कामे फलतृष्णायामात्मा यस्य सः ॥

कामाधिष्ठानम् । न । इन्द्रियमनोबुद्धिषु ॥ इन्द्रियाणि मनोबुद्धिरस्याधिष्ठानमुच्यते ॥

कामानशनम् । न । अनाशके । तपसि ॥ तपोनानशनात् परम् । कामानामनशनम् । रागद्वेषरहितैरिन्द्रियैर्विषयाणां सेवनं यदृच्छालाभसन्तुष्टत्वमितियावत् ॥

कामान

कामान्धः । पुं । कोकिले ॥ त्रि । कामेनविवेकहीने ॥

कामान्धा । स्त्री । कस्तूर्य्याम् ॥

कामायुधः । पुं । महाराजाम्रवृक्षे ॥ न । कामदेवास्त्रे ॥

कामायुः । पुं । गरुडे ॥

कामारिः । पुं । विटमाक्षिकधातौ ॥ श्रीसदाशिवे । महादेवे ॥

कामार्त्तः । त्रि । कामपीडिते । कामातुरे ॥

कामालुः । पुं । रक्तकाञ्चनवृक्षे ॥

कामावशायिता । स्त्री । शिवस्याणिमाद्यष्टधैश्वर्य्यान्तर्गते ऐश्वर्य्यविशेषे । सत्यसङ्कल्पतायाम् ॥ कामान् अवशेते । शीङ्णिनिः । कामावशायिनो भावः । तल् प्रत्ययः ॥

कामावसायिता । स्त्री । कामावशायितायाम् ॥ कामान् अवस्यति तिष्ठतीत्यर्थे स्यतेर्णिनिः । भावेतल् ॥

कामावसायित्वम् । न । अष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषे । सत्यसङ्कल्पतायाम् ॥ यथास्यसङ्कल्पो भवति भूतेषु तथैवभूतानि भवन्ति । अन्येषां निश्चया निश्चेतव्यमनुविधीयन्ते योगिनस्तु निश्चेतव्याः पदार्था निश्चयमिति । कामान् स्वेच्छया अवसाययितुं निश्चेतुं शीलमस्य । स्यतेर्णिनिः

। भावे त्वः ॥

कामाङ्कः । पुं । राजाम्रे

कामिः । पुं । कामुके ॥ स्त्री । रत्याम् ॥

कामिकः । पुं । कारण्डवेखगे ॥ न । काम्ये । काम्यमानभोगमोक्षप्रयोजने विधिपूर्वके कर्मणि ॥ त्रि । कामदे । अभीष्टफलप्रदे ॥

कामितः । त्रि । इच्छिते । वाञ्छिते ॥ कामः सञ्जातोस्य । ता° इतच् ॥

कामी । पुं । परमात्मनि ॥ पूर्णकामत्वात् न कामोऽस्यास्ति । इनिः ॥ कामुके ॥ चक्रवाके ॥ पारावते ॥ चटके ॥ संसारिणि ॥ चन्द्रे ॥ ऋषभौषधौ ॥ सारसखगे ॥ अवश्यङ् काम्यते । कमङ्कान्तौ । आवश्यकेति ग्रह्यादित्वाद्‌णिनिः ॥

कामिनी । स्त्री । अतिशयकामयुक्तायांनार्याम् । सवर्णासवर्णयो रतायाम् ॥ भीरुस्त्रियाम् ॥ स्त्रीसामान्ये ॥ वन्दायाम् ॥ दारुहरिद्रायाम् ॥ मदिरायाम् ॥ अवश्यं काम्यते । कमेः पूर्ववण्णिनिः ॥ भूयान् कामोऽस्यस्याः । अतद्गुनिर्वा ॥

कामिनीपुष्पः । पुं । वृक्षविशेषे ॥ न । आर्त्तवे ॥ कामिन्याः पुष्पम् ॥

कामिनीशः । पुं । शोभाञ्जनवृक्षे ॥ विदग्धनायके ॥

कामिमहः । पुं । स्मरोत्सवे ॥

कामीनः । पुं । रामपूगे । सुरेवटे ॥ त्रि । कामानुरूपिणि ॥

कामुकः । पुं । अशोकपादपे ॥ अतिमुक्तके । माधवीलतायाम् ॥ चटके ॥ त्रि । कमने । कामयितरि । कामिनि । स्त्रीसुखासक्ते ॥ कामयते तच्छीलः । लषपतपदेत्यादिनाकमेरुकञ् प्रत्ययः ॥

कामुककान्ता । स्त्री । अतिमुक्तकलतायाम् ॥

कामुका । स्त्री । इच्छावत्याम् । धनादीच्छायुक्तायाम् ॥ कामयते तच्छीला । उकञन्तात्टाप् ॥

कामुकी । स्त्री । मैथुनेच्छायुक्तायाम् । वृषस्यन्त्याम् ॥ जानपदकुण्डगोणेत्यादिनाङीष् ॥

कामेषुः । पुं । फलकामे । सकामे ॥ काममात्मनमिच्छतीति तथा ॥

कामेश्वरी । स्त्री । कामाख्यापञ्चमूर्त्यन्तर्गतमूर्त्तिविशेषे ॥

कामोदकम् । न । मृताद्देशेनस्वेच्छया दत्तोदके ॥

कामोदा । स्त्री । रागिणी विशेषे ॥

काम्पिल्यः । पुं । गुण्डारोचनिकायाम् । कंबीला इति भाषा ॥ उत्तरदेशविशेषे ॥ काम्पिलाया अदूरभवः ।

सङ्ख्यादिश्रवणात् यथा: ॥

काम्पिल्ल: । पुं । काम्पिल्ल ये ॥ काम्पिल्ल: कफपित्तास्रकृमिगुल्मोदरव्रणान् । हन्ति रेची कटुष्णश्च मेहानाहविषाश्मजित् ॥

काम्पिल्लक: । पुं । काम्पिल्लार्थे ॥

काम्पिल्लका । स्त्री । उत्तरजनपदविशेषे ॥

काम्पील: । पुं । काम्पीलक: । पुं । काम्पिल्लार्थे ॥

काम्बल: । पुं । कम्बलावृतरथे ॥ कम्बलेन परिवृतो रथ: । परिवृतो रथ इत्यण् ॥

काम्बविक: । पुं । शङ्खवलयादिकर्त्तरि । शाङ्खिके । शङ्खकारे ॥ कम्बुशिल्पमस्य । शिल्पमितिठक् । शाम्बतिक इतिनिर्देशात् कादेशोऽनित्य: ॥ कम्बोर्विकारो ऽस्यास्तीतिठन्वा ॥

काम्बुका । स्त्री । अश्वगन्धायाम् ॥

काम्बोज: । पुं । कम्बोजदेशजे ऽश्वे ॥ सोमवल्के ॥ पुन्नागवृक्षे ॥ कम्बोजदेशोद्भवे प्रथमत: क्षत्रिये पश्चाद्विहितक्रियालोपादिना शूद्रत्वमापन्ने दस्युपदवाच्ये । सतुयवनतुल्यो म्लेच्छजातिविशेष: । अस्य सगरराजेन सर्वशिरोमुण्डनङ्कृतम् । यथा । अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्ज यत् । यवनानां शिर: सर्वं काम्बोजानां तथैवचेति ह० ॥ पुं । न । वल्कश्वदिरे । पपरियाखैर इति भाषा ॥ कम्बोजेषु देशेषु भव: । तत्र भवइत्यर्थे । कच्छाद्यण् । कम्बोजो ऽभिजनो ऽस्यवा । सिन्ध्वाद्यण् ॥

काम्बोजी । स्त्री । माषपर्ण्याम् । श्वेतगुञ्जायाम् ॥ दुष्खदिरे ॥ गुञ्जायाम् ॥ वाकुच्याम् ॥ कम्बोजेषुभवा । अण् । ङीप् ॥

काम्यम् । न । अन्त:करणशुद्ध्यनुपयोगिनि कर्म्मविशेषे । फलकामनया चोदिते ॥ यथा । यत्किञ्चित्फलमुद्दिश्य यज्ञदानजपादिकम् । क्रियते कायिकं यच्च तत्काम्यं परिकीर्त्तितमिति ॥ त्रि । कमनीये । सुन्दरे ॥ कामनाविषयेस्वर्गादौ ॥ कामोऽस्तियत्र । अन्यत्रापीति यप् ॥ यद्वा । काम्यते । कमु० । अचोयत् ॥

काम्यकर्म्म । न । स्वर्गादीष्ट साधने ज्योतिष्टोमादौ । फलोद्देशेनविधीयमाने कर्म्मणि ॥ काम्यञ्च तत्कर्म चेतिविग्रह: ॥

काम्यदानम् । न । प्रवारणा ॥ फलकामनयादाने ॥ यथा । अपत्यविजयैश्वर्यस्वर्गार्थं यत्प्रदीयते । दानंतत्काम्यमाख्यात मृषिभिर्धर्मचिन्तकैरि

ति गरुडपुराणम् ॥ काम्येनेच्छया काम्यस्य सुहृदादीष्टस्य वरस्त्रीहस्त्यश्वादेर्वा दानम् ॥

काम्यफलम् । न । आर्थिक्यां शुद्धौ ॥ प्राधान्येन फलं शुद्धिरार्थिकी काम्यकर्मणः । आर्थिकी शुद्धिः काम्यकर्मणः प्राधान्येन फलम् ॥

कायः । पुं । कदैवते । ब्राह्मतीर्थे ॥ मूर्त्तौ । देहे ॥ सङ्घे ॥ लक्ष्ये ॥ स्वभावे ॥ मूलधने ॥ प्राजापत्यविवाहे । सहनौ धर्म्मञ्चरतामितिनियमनङ्कृत्वा कन्यादाने ॥ न । मनुष्यतीर्थे । प्रजापतितीर्थे ॥ तत्तु स्वल्पाङ्गुल्योर्मूलेकनिष्ठानामिकयोरधोभागे प्रसिद्धम् । कायमङ्गुलिमूल इति वचनात् ॥ प्रजापतिर्देवताऽस्य । कस्येदित्यण् इदन्तादेशश्च । यस्येतिलोपात् परत्वादादिवृद्धिः ॥ चीयतेऽन्नादिभिः चीयतेऽस्मिन्नस्थ्यादिकमिति वा । चिञ् चयने । निवासचितीत्यादिना घञ् ।

कायचिकित्सा । स्त्री । वैद्यविद्याङ्गविशेषे ॥ यथाह सुश्रुतः । कायचिकित्सानाम सर्वाङ्गसंसृतानां व्याधीनां ज्वरातीसाररक्तपित्तशोषोन्मादापस्मारकुष्ठमेहादीनामुपशमनार्थमिति ॥

कायबलनम् । न । कवचे । तनुत्रे ॥ इति हारावली ॥

कायमानम् । न । तृणकुट्याम् ॥ शरीरपरिमाणे ॥

कायस्थः । पुं । परमात्मनि ॥ नरेषु धूर्त्ते कृपाहीने नरजातिविशेषे । अक्षरजीविके । कूटकृति । पञ्जीकरे । कायथ इति भाषा ॥ यथोक्तं ब्रह्मवैवर्त्ते कृष्णजन्मखण्डे ८५ऽध्याये । विश्वैकलिपिकर्त्तीच भक्षदातु हूनं हरेत् । कायस्थेनोदरस्थेन मातुर्मांसंनखादितम् । तत्रनास्तिकृपा तस्यदन्ताभावोहि केवलमिति ॥ वह्निपुराणेपि । चाटचारणचौरेभ्योवधबन्धभयादिभिः । पीड्यमानाः प्रजारक्षेत् कायस्थेभ्योविशेषतइति ॥ काये तिष्ठति । स्था । सुपिस्थ इति कः ।

कायस्था । स्त्री । हरीतक्याम् ॥ आमलक्याम् ॥ कायस्तिष्ठत्यनया । घञर्थेकः ॥ एलाद्वये ॥ तुलस्याम् ॥ कायस्थभार्यायाम् ॥

कायिकः । त्रि । शारीरिके । कायनिष्पन्ने ॥

कायिका । स्त्री । } गवादिबलीवर्द्दा

कायिकावृद्धिः । स्त्री । } द्विकर्मयुतायां वृद्धौ ॥ यथा । दोह्यवाह्यकर्मयुता का

यिकासमुद्धाहृतेतिव्यासः ॥ मूलधनाऽविरोधिन्यां प्रकृत्युदयपणात् दृश्यादिरूपायांवृद्धौ ॥ यथा । कायाविरोधिनी शश्वत् पणार्द्धाद्यातु कायिकेति नारदः ॥ हलायुधस्तु पणार्द्धाद्या इत्यत्र पणवाह्येतिपठित्वा पणस्यमूलधनस्य यावदवस्थानं तावत् शश्वतवर्षसहस्रमपि उत्तमर्णेन यावाह्यते प्राप्यते सा कायिकेति व्याख्यातवान् । तन्नाद्या भोगलाभान्तर्गता अपराच तद्भिन्ना । इतिमिश्राः ॥

कारः । पुं । वधे ॥ निश्चये ॥ बलौ ॥ यत्ने ॥ यतौ ॥ तुषारशैले । हिमाद्रौ ॥ क्रियायाम् ॥ यथा । स्वाहाकारवषट्कारनमस्कारा दिवौकसाम् । हन्तकारो मनुष्याणां स्वधाकारः स्वधाभुजामिति ॥ करणम् कारः ॥ कर्मोपपदेकर्तृवाचकः । यथा । कर्मकारः स्वर्णकारः इत्यादि ॥ विक्षिप्ते धान्यादिराशौ ॥ यथा । द्वौ कारौ ॥ करञ्च । प्रत्याहाम ॥ कृ विक्षेपे । परिमाणाख्यायांसर्वेभ्यइतिकर्मणि घञ् । सर्वेभ्यइतिपञ्चमीनिर्द्देशात् प्रकृत्याश्रयण एव कृदारविविप्रासोऽप बाध्यते नत्वर्थाश्रयाः स्त्रीप्रत्ययाः ॥

कारकः । त्रि । कर्त्तरि । क्रियाजनके

॥ भाष्ये करोति क्रियांनिर्वर्त्तयतीतिव्युत्पत्तिदर्शनात् । ण्वुल् ॥ न । क्रियोपाधिके ॥ साक्षात् क्रियानिमित्ते । कर्मोद्यन्यतमे । तानितु । कर्त्ता कर्म्म च करणञ्च सम्प्रदानं तथैव च । अपादानाधिकरणोरत्याहुः कारकाणिषट् ॥ कर्त्ता १ यथा पुरुषैः शिवोदृष्टः । कर्म २ यथा रामं प्रणमति । करणं ३ यथा नेत्रैः शिवोदृष्टः । सम्प्रदानम् ४ यथा हरिः सद्भ्यः सुखं ददात् । अपादानम् ५ यथा बिभीषणाः पदाक्रष्टः । अधिकरणम् ६ यथा रेमे शरदि गोविन्दः ॥ सर्वत्र सर्वकारकशक्तिसम्भवः । उक्तञ्च । अनेकशक्तियुक्तस्य विश्वस्यानेककर्मणः । सर्वदासर्वथाभावात् क्वचित् किञ्चिद्विवक्ष्यतइति । यथा । सर्वप्रयत्नेनच भूमिपालास्तस्मिन् प्रजग्मुर्युधिसर्वएवं त्यक्तकर्मणाधिकरणविवक्षायांसप्तमीति ॥ करकोद्भवजले ॥

कारकदीपकम् । न । अलङ्कारविशेषे । यथा । क्रमिकैकगतानान्तुगुम्फः कारकदीपकम् । गच्छत्यागच्छतिपुनः पान्थः पश्यति पृच्छति ॥ यथावा । निद्राति स्नाति भुङ्क्ते चलति कचभरान् शोषयत्यन्तरास्ते दी

व्यत्ययश्चैनेचायं गदितुमवसरो भूय
आयाहियाहि । इत्युदश्चैः प्रभुणा
मसकृदधि कृतैर्वारितान् द्वारि दी
नान् पश्यास्मानब्धिकन्ये सरसि रुहरु
चामन्तरङ्गैरपाङ्गैः ॥ आद्योदाहरणे
श्रुतस्य पान्थस्य कर्त्तृकारकस्य गमना
दिष्वन्वयः ॥ द्वितीयेत्त्वध्याहृतस्य
प्रभोः कर्त्तृकारकस्य निद्रादिष्वन्वयः
इत्येकस्यानेकवाक्यान्वयेन दीपक-
त्वाच्छायापत्त्याकारकदीपकम् ॥

कारुकुच्चीयः । पुं । साल्वदेशे ॥ तद्दे
शीयजने बहुवचनान्तः ॥

कारणम् । न । करणे ॥ साधने ॥ वधे
॥ इन्द्रिये ॥ देहे ॥ कर्म्मणि ॥ का
यस्थे ॥ वाद्यप्रभेदे ॥ गीतप्रभेदे ॥
अव्यक्ते । वीजभावे ॥ ईश्वरे । अ
भिन्ननिमित्तोपादाने ॥ वेदान्ति
नोमुखादीश्वरस्या भिन्ननिमित्तोपा
दानकारणतां श्रुत्वा पातञ्जलीयः-
सक्रोधमाह । आः पाप कथमीश्वर
मेवविकारिणं कृत्वा विनाशधर्म्मि
णमुपपादयसि । अस्यायम्भावः वेदा
न्तोहि भगवतः सकलकार्योपादान
त्वं मन्यते तच्चमृदइवविकारितया
सङ्गच्छते । यथाहिमृत् स्वयं विकुर्वा
णाघटशरावाद्युपादानं भवति तथा
स्वयंविकुर्वन्नीश्वरो जगदुपादानंमि
त्यभ्युपगन्तव्यम् । तथांच भगवतो
मृदइवविकारित्वाद्विनाशित्वं सिद्ध्य
तीति ॥ साङ्ख्यस्त्वाह ननुरे प्रकृते
र्विश्वोत्पत्तिः पुरुषस्तूदासीन इति
। एतच्छ्रुत्वा वेदान्ती सखेदमाह ।
दुर्बुद्धौ हौ एतदपिनजानीतः य
त् सर्वंप्रमेयजातं घटादिवत् कार्य
मिति प्रधानोपादानकारणमप्यपेक्ष
णीयमेवेति अतइयंविकारशङ्का मु
ग्धवधूविकल्पविलसितमिव । तथाहि
। शान्तं ज्योतिः कथ मनुदितानस्त
निच्चयमकाशं विश्वोत्पत्तौ व्रजतिवि
कृतिं निष्कलं निर्म्मलञ्च । शश्वन्नी
लोत्पलदलरुचा मम्बुवाहावलीनां-
प्रादुर्भावे भवति नभसः कीदृशोवा
विकारइति॥ हेतौ । वीजे । येनविना
यन्नभवति तस्मिन् ॥ तच्च निमित्तो
पादानभेदाद्द्विविधम् । कारणत्व
माह । अन्यथासिद्धिशून्यत्वेसतिनि
यतपूर्ववर्त्तित्वम् । तच्चसमवाय्यस
मवायिनिमित्तभेदात् त्रिविधम् ।
परमाणुपरिमाणभिन्नानां कारण
त्वमितिभाषापच्छेद॥: अणुपरिमा
णन्तुनकस्यापि कारणमिति सिद्धान्त
मुक्तावली ॥ कार्यते ऽनेन । णयन्ता
त् कृञोल्युट् ॥

कारणकारणम् । न । प्रकृतेरधिष्ठानभू

ते ब्रह्मणि ॥

कारणगुणोद्भवगुणः । पुं । कारणगुणपूर्व्वकगुणे ॥ तद्यथा । रूपम् १ रसः २ गन्धः ३ अपाकजस्पर्शः ४ द्रवत्वम् ५ स्नेहः ६ वेगः ७ गुरुत्वम् ८ एकत्वम् ९ पृथक्त्वम् १० परिमाणम् ११ स्थितिस्थापकसंस्कारः १२ । इति भाषापरिच्छेदः ॥

कारणता । स्त्री । }
कारणत्वम् । न । } हेतुत्वे । पश्य कारणे कारणत्वम् ॥ सततत्त्वादिरूपायां सर्व्वविकाराधिष्ठानतायाम् ॥

कारणमाला । स्त्री । अलङ्कारविशेषे । यथोत्तरञ्चेत् पूर्व्वस्य पूर्व्वस्यार्थस्य हेतुता । तदा कारणमाला स्यात् ॥ उत्तरमुत्तरमनति यथोत्तरम् । उदाहरणम् । जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते । गुणप्रकर्षेण जनोऽनुरज्यते जनानुरागप्रभवा हि सम्पदः ॥ अपिच । गुम्फः कारणमालास्याद्यथा प्राक्तनकारणैः । नयेन श्रीः श्रियात्यागस्त्यागेन विपुलं यशः ॥ उत्तरोत्तरकारणभूतपूर्व्वपूर्व्वैः पूर्व्वपूर्व्वकारणभूतैरुत्तरोत्तरैर्वा वस्तुभिः कृतो गुम्फः कारणमाला । आद्योदाहृता द्वितीया यथा । भवन्ति नरकाः पापात् पापं दारिद्र्यसम्भवम् । दारिद्र्यमप्रदानेन तस्माद्दानपरो भव ॥

कारणशरीरम् । न । सत्त्वप्रधानेऽज्ञाने । आनन्दमयकोषे । सुषुप्तौ ॥ अनाद्यविद्यानिर्व्वचनीयं शरीरद्वयकारणमात्रं सत्स्वरूपाऽज्ञानं यदस्ति तत्कारणशरीरमित्याहुः ॥

कारणा । स्त्री । यातनायाम् । गाढवेदनायाम् ॥ नरकरुजा यमयातनेति केचित् ॥ णिजन्तात् कृञो ण्यासश्रन्थोतियुच् । टाप् ॥

कारणिकः । त्रि । परीक्षके ॥ करणे चरति । चरतीतिठक् ॥

कारणोत्तरम् । न । प्रत्यवस्कन्दने ॥ सत्यत्वेनाङ्गीकृत्य तत्प्रतिकूलरूपकारणं ब्रूयात् तदा तदुत्तरं कारणोत्तरम् । तत् त्रिविधम् । सबलम् १ तुल्यबलम् २ दुर्ब्बलम् ३ । आद्यं यथा । मयास्य त्वत्तः शतङ्गृहीतमिति सत्यम् किन्तु तत् परिशोधितम् । द्वितीयं यथा । मदीयेयम्भूमिः क्रमागतत्वादिति वाद्युक्ते प्रतिवादिनोपि तथोत्तरम् । तृतीयं यथा । ममेयम्भूमिः क्रमागतत्वात् इति वाद्युक्ते ममेयम्भूमिः दशवर्षोपभुज्यमानत्वात् इति प्रत्युत्त

रम् ॥

कारण्डवः । पुं । खड्हांस इति गौडे षु प्रसिद्धे हंसविशेषे ॥ समन्ताडड इति रमेडेः । ईषत् रण्डः । ईषदर्थे चेति कोः कादेशः । कारण्डंवाति । वा॰ । आतोनुपेतिकः ॥

कारण्डव्यूहः । पुं । बुद्धभेदे ॥

कारन्धमी । पुं । कांस्यकारे । शौल्विके । धातुवादरते ॥

कारमिहिका । स्त्री । कर्पूरे ॥

कारम्भा । स्त्री । प्रियङ्गुवृक्षे ॥ ईषत् रम्भा । ईषदर्थे चेति कोः कादेशः ॥

कारवः । पुं । काके ॥ का इतिरवो ऽस्यास्ः ॥

कारवल्ली । स्त्री । कारवेल्ले ॥ काण्डीरे ॥

कारवी । स्त्री । शतपुष्पायाम् । मधुरायाम् ॥ रुद्रजटा इति गौडभाषा प्रसिद्धे दीप्ये । मयूरशिखायाम् ॥ सुषव्याम् । कलजीरी इति भाषा ॥ त्वक्पत्र्याम् ॥ कृष्णजीरके ॥ चुद्रकारवेल्ल्याम् ॥ केनजलेनरौति । रुशब्दे । पचाद्यच् करषस्य मयूरस्येयम् । तस्येदमित्यण् ॥ कारंवाति वा । वागतिगन्धनयोः । आतोनुपेतिकः । गौरादिङीष् ॥ यद्वा । कारणम् । कृञि॰ । णयन्तः । सं॰ क्विप् । कारमवति । अव रचणादौ । कर्मण्यण् । ङीप् ॥

कारवेल्लः । पुं । करेला इतिप्रसिद्धे शाके । कठिल्लके । सुषव्याम् ॥ कारवेल्लं हिमं भेदि लघु तिक्तमवातलम् । ज्वरपित्तकफास्रघ्नं पाण्डुमेह कृमीन् हरेत् ॥ कारंवेल्लति वेल्लचलने । कर्मण्यण् ॥

कारवेल्लकः । पुं । कारवेल्ले ॥ स्वार्थेकः ॥

कारवेल्ली । स्त्री । चुद्रकारवेल्ले ॥ तद्गुणा कारवेल्लीस्या द्विशेषाद्दीपनी लघुः । तद्गुणाकारवेल्ल गुणा ॥ कारवेल्ली फलंतकेस्वेदितंहिङ्गुमर्दितम् । भर्जितंनवनीतेन सैन्धवेन समन्वितम् ॥ विदलितमुखमीषत्कारवेल्लीकठोरं पुलकितमिवतैलेसाधितंरामठेन । रचितमरिचचूर्णं सैन्धवेनातिपूर्णं सुललितरसनाग्रं लोलतामातनोति ॥ कारवेल्ली फलम्भेदिलघुतिक्तंसुशीतलम् । पित्ताऽस्रक्कामलापाण्डुकफमेदः कृमीन् चयेत् ॥

कारस्करः । पुं । किम्पाकद्रुमे । विषतिन्दौ ॥ कारङ्करोति । डुकृञ्॰ । कृञोहेतुताच्छील्यानुलोम्येषु इति टः । कारस्करोवृक्ष इति निपातनात्सुट् ॥

कारस्करटिका । स्त्री । कर्णजलौकायाम् ॥

कारा । स्त्री । बन्धनालये । कारागारे ॥ दूत्याम् । प्रसेवके । वीणाधःकाष्ठभाण्डे ॥ सुवर्णकारिकायाम् ॥ बन्धने ॥ पीडायाम् ॥ कीर्यते । कॄ वि० । भि० अङ् । ऋदृशोऽङीतिगुणे दीर्घत्वं निपात्यते ॥

कारागारम् । न । बन्धनशालायाम् ॥ कारैव आगारम् । कारायै बन्धाय वा आगारम् ॥

कारागुप्तः । त्रि । बन्धनागारस्थे ॥ कारायां गुप्तः ॥

कारापथः । पुं । देशविशेषे । लक्ष्मणात्मजयोरङ्गदचन्द्रकेत्वोर्विषये ॥

कारावरः । पुं । पारशवाद्वैदेह्यामुत्पन्ने । चर्मकारे ॥ कारावरो निषादात्तु चर्मकारः प्रसूयते ॥

कारावेश्म । न । बन्धनालये । वधाङ्के ॥ कारैव कारायै वा वेश्म ॥

कारिः । स्त्री । क्रियायाम् ॥ त्रि । शिल्पिनि ॥ करोति । डुकृञ्० । कृञ उदीच्यां कारकर्षिवति इञ् ॥

कारिका । स्त्री । नटयोषिति ॥ कृतौ ॥ स्वल्पाक्षरसूत्रस्य बह्वर्थज्ञापिकायां कवितायाम् । विवरणश्लोके ॥ शिल्पे ॥ यातनायाम् ॥ नापितादिकर्मणि ॥ करणम् । धात्वर्थनिर्देशे करोतेर्ण्वुल् । णित्त्वाद्वृद्धिः ॥ यद्वा । करोति । ण्वुल् । प्रत्ययस्थादितीत्त्वम् ॥

कारितः । त्रि । कुर्वन् प्रेरितः कारित इत्युच्यते । कराया इति भाषा ॥

कारिता । स्त्री । कारिकायाम् । कारिताख्यौ । अधिकसूद इति भाषा ॥ यथा । ऋणिकेन तु या वृद्धिरधिका सम्प्रकीर्त्तिता । आपत्कालकृता नित्यं दातव्या सा तु कारिता ॥ इति कात्यायनः ॥

कारी । स्त्री । कारिकायाम् । कटुपत्रिकायाम् ॥ करटकारी आकर्षकारीत्येषा द्विधा ॥

कारीरम् । न । भस्मनि ॥ करीरस्यावयवे । काण्डे ॥ टींट इति प्रसिद्धे करीरफले । तत्पुष्पे ॥ फलं करीरस्य हि बीजवर्जितं संस्कारितं सोदकभाजनेषु । सुचिक्कणं वस्त्रदिनं सुसन्धितं सन्धानरीत्या सुधिया विपाचितम् ॥ कारीरं कटुकं ग्राहि फलमुष्णं रुचिप्रदम् । कफपित्तकरं किञ्चित्कषायं वातहृद्दरम् ॥ अस्य कुसुमशाकन्तु । कारीरं कुसुमं सुघर्मनिहितं सद्दारिणा संयुतं समाहेन विपाचितं सलवणं हिङ्ग्वाज्यतैलेभृ

शम् । चिरन्तनकृतरम्युकाञ्जिकमथो सर्व्वसंभारान्वितं भोक्ता केनसमर्च्चितः प्रतिदिनं श्रीपार्व्वतीशः स्वयम् ॥ कारीरकुसुमम्भेदि कटुकं कफनाशनम् । पित्तकृद्रुचिरं भव्यं कषायंपथ्यदम्भृशम् ॥ कारीरकुसुमंवश्यंशीतलकुल्मनाशनम् ॥ करीरस्यावयवोविकारोवा । अण् । पलाशाद्यञ्वा ॥

कारीरी । स्त्री । वृष्ट्यादिफले यागविशेषे ॥

कारीषम् । न । शुष्कगोमयसमूहे । बिटौरा उपलौँकाढेर इतिभाषा ॥ करीषाणां समूहः । भि० अण् ॥

कारुः । त्रि । शिल्पिनि ॥ कारयित्वातु कर्म्माणि कारुं पश्चान्नवञ्चयेदिति कूर्म्मपुराणम् ॥ कारके ॥ पुं । विश्वकर्म्मणि ॥ शिल्पे ॥ करोति । डुकृञ्० । कृवापेत्युण् ॥

कारुकः । त्रि । सूपकारादिशिल्पिनि ॥ स्वार्थेकः ॥

कारुककर्म्म । न । सूपकारादीनाङ्कर्म्मणि ॥ यैः कर्म्मभिः प्रचरितैः शुश्रूष्यन्तेद्विजातयः । तानिकारुककर्म्माणि शिल्पानिविविधानिच ॥

कारुचौरः । पुं । सन्धिचौरे ॥

कारुजः । पुं । करभे । गजार्भके ॥ फेने ॥ वल्मीके ॥ नागकेशरे ॥ गैरिके ॥ शिल्पिनां चित्रे ॥ स्वयञ्जाततिले ॥

कारुणिकः । त्रि । दयालौ ॥ करुणाशीलमस्य । शीलमिति ठक् । करुणाप्रयोजन मस्यवा । प्रयोजनमिति ठक् ॥

कारुण्डी । स्त्री । जलौकायाम् ॥

कारुण्यम् । न । परदुःखदुःखित्वे । करुणायाम् ॥ करुणः करुणावान् तस्य भावः । ब्रा० ष्यञ् ॥

कारुषः । पुं । सुधन्वाचार्य्ये । विजन्मनि ॥

कारूषाः । पुं । करूषदेशवासिषु । वृहद्गृहेषु ॥ बहुवचनान्तोयम् ॥

कारोत्तरः । पुं । सुराग्रभागे । सुरामण्डे ॥ कूपे ॥ त्रि । कार्य्यक्षमे ॥ कारेण क्रियया उत्तरः ॥

कार्कन्धवम् । न । कर्कन्ध्वाविकारे ॥ तदवयवे ॥ विल्वाद्यण् ॥

कार्कश्यम् । न । कठोरतायाम् ॥ कर्कशस्यभावः । ष्यञ् ॥

कार्णाटः । पुं । कर्णाटदेशे ॥ स्वा० अण् ॥

कार्त्तवीर्य्यः । पुं । चन्द्रवंशीयकृतवीर्य्यराजपुत्रे । अर्जुने । हैहये । हरेश्चक्रावतारे ॥ अस्यध्यानम् । उद्यत्सूर्य्यसहस्रकान्तिरखिलक्षोणीधवैर्म्म-

न्द्रितोहस्तामांशतपञ्चकेन तु दधत्यापाणिपूंस्तावता । कर्काटकमात्त्यापरिवृतश्चक्रावतारोहरेः पायात्तस्यन्दनगोत्रणाभवसनः श्रीकार्त्तवीर्य्योन्नृपः इति ॥ जैनराजचक्रवर्त्तिविशेषे । सुभूमे ॥ कृतवीर्य्यस्यापत्यम् । अण् ॥

कार्त्तस्वरम् । न । स्वर्णे । हेमनि ॥ कृतस्वरे आकारविशेषे भवम् । अण् ॥ कृताः पठिताः स्वरा येन तस्यैवा इदम् । शेषइत्यण् ॥ धुस्तूरे ॥

कार्त्तान्तिकः । पुं । दैवज्ञे । मौहूर्त्तिके । ज्योतिर्विदि ॥ कृतान्तं वेत्ति । क्रतूक्थादिसूत्रान्ताट्ठक् ॥

कार्त्तिकः । पुं । स्कन्दे । कार्त्तिकेये ॥ ऊर्ज्जे । शरदृतोर्द्वितीयेमासे । बाहुले ॥ क्षत्रजातस्यफलम् । दक्षः क्रये विक्रयणे धनाढ्यः स्याद्वावदूको ऽखिलकोशलज्ञः । यः कार्त्तिके कार्त्तिकरूपधारी जातो भवेद् युद्धविशारदश्चेति ॥ वर्षविशेषे । सप्तकृत्तिकारोहिण्योरेकतरस्मिन् वृहस्पतेरस्तोदयैकतरसम्बन्धे भवतीति मलमासतत्त्वम् ॥ कार्त्तिकी पौर्णमास्यस्मिन् । विभाषा फाल्गुनीति पाञ्चिकोण ॥

कार्त्तिकिकः । पुं । कार्त्तिकमासे ॥ कार्त्तिकी पौर्णमास्यस्मिन् । विभाषा-फल्गुनी श्रवणा कार्त्तिकी चैत्रीभ्यः । इति ठक् ॥

कार्त्तिकी । स्त्री । कार्त्तिकपौर्णमास्याम् ॥ कृत्तिकया युक्ता पौर्णमासी । नक्षत्रेण युक्तः कालः इत्यण् । ततो ङीप् ॥

कार्त्तिकेयः । पुं । कुमारे । महासेने ॥ कृत्तिकानामपत्यम् । तत् पालितत्वात् । स्त्रीभ्यो ढक् ॥ अस्य ध्यानं यथा । कार्त्तिकेयं महाभागं मयूरोपरि संस्थितम् । तप्तकाञ्चनवर्णाभं शक्तिहस्तं वरप्रदम् ॥ द्विभुजं शत्रुहन्तारं नानालङ्कारभूषितम् । प्रसन्नवदनं देवं सर्वसेनासमावृतमिति ॥

कार्त्तिकेयप्रसूः । स्त्री । दुर्गायाम् ॥

कार्त्तिकेयवनम् । न । शरवणे ॥

कार्त्तिकोत्सवः । पुं । कौमुद्याम् । कार्त्तिक्यां पूर्णिमायाम् ॥ दीपोत्सवतिथौ ॥

कार्त्स्न्यम् । न । साकल्ये ॥ कृत्स्नस्य भावः । ष्यञ् ॥

कार्प्पटः । पुं । जतुनि । लाक्षायाम् ॥ कार्य्यिणि । कार्यार्थिनि । उमेदवार दरवारी इति पारस्यभाषा ॥ इति हेमचन्द्रः ॥ वस्त्रे ॥ स्वा० षष्ठ ॥

कार्प्पटगुप्तिका । स्त्री । झोला झोली वटुया इत्यादिभाषा प्रसिद्धे ॥

कार्पटिकः । पुं । मर्मज्ञे ॥ तीर्थसेविनि ॥

कार्प्पण्यम् । न । कृपणतायाम् । दैन्ये । उचितव्ययाकरणेनापि धनरक्षणेच्छारूपे ॥ अनात्माध्यासवत्त्वे ॥ कृपणस्य भावः । ष्यञ् ॥

कार्प्पासम् । न । कार्पासीफले ॥ तूले ॥ त्रि । कार्पासीवस्त्रादौ । बादरे ॥ कार्पास्याः विकारः फलम् । अवयवे चेत्यण् । तस्य फले लुक् ॥ कर्पासस्य विकारः । तस्य विकार इत्यण् । बिल्वाद्यण्वा ॥

कार्प्पासकः । पुं । कार्पासिकायाम् । तुण्डिकेर्याम् ॥ कार्पसको लघुः कोष्णो मधुरो वातनाशनः । तत् पलाशं समीरघ्नं रक्तकृन्मूत्रवर्द्धनम् ॥ तत्कर्णपिडकानादपूयस्रावविनाशकृत् । तद्बीजं स्तन्यदं वृष्यं स्निग्धं कफकरं गुरु ॥

कार्प्पासधेनुः । स्त्री । दानार्थं कर्पासनिर्मितायां धेनौ ॥

कार्प्पासनासिका । स्त्री । तर्कौ । तकुया इतिभाषा ॥

कार्प्पासिका । स्त्री । तुण्डिकेर्य्याम् ॥

कार्प्पासी । स्त्री । कार्पासवृक्षे । बदरायाम् । समुद्रान्तायाम् ॥ करोति क्रियते वा । कृञः पासः । पृ० । जातित्वात् गौरादित्वाद्वा ङीष् ॥ यद्वा । कर्पासोऽस्त्यस्याः प्रज्ञाद्यण् । ङीप् ॥

कार्म्मः । त्रि । कर्मशीले । कर्मसुफलमनपेक्ष्य प्रवृत्ते ॥ कर्मशीलः । छत्रादित्वाण्णः । कार्मस्ताच्छील्य इति टिलोपः । स्त्रियां कार्मी ॥

कार्म्मणः । त्रि । कर्मठे । कर्मकुशले ॥ न । कामण इतिप्रसिद्धे मूलकर्मणि । औषध्यादिमूलेनवशसनोच्चाटनस्तम्भनवशीकरणादिकर्मणि ॥ मन्त्रतन्त्रादियोजने ॥ वाचिकं श्रुत्वा क्रियमाणे कर्मणि ॥ योगविद्यायाम् ॥ कर्मैव कार्मणम् । तद्युक्तात्कर्मणोऽण् ॥

कार्म्मिकः । त्रि । विचित्रवस्त्रादौ ॥ इतिमिताक्षरा ॥

कार्म्मुकः । पुं । वंशे । वेणौ ॥ श्वेतखदिरे ॥ विज्जले ॥ महानिम्बे ॥ न । इष्वासे । धनुषि ॥ त्रि । कर्मठे । कर्मक्षमे ॥ कर्मणे प्रभवति । कर्मण उकञ् ॥

कार्य्यम् । न । हेतौ ॥ प्रयोजने ॥ यथा । कार्यार्थिनः कुतो गर्व इति ॥ वैयाकरणानामादेशप्रत्ययागमेषु ॥ सन्निवेशविशेषवति विनश्वरे शरीरे ॥

तार्किकमते प्रागभावप्रतियोगिनि घटपटादिरूपे विकारे ॥ कार्य्यमति कार्य्यं त्रिविधम्। समवायिकारणम् १ यथा घटकार्य्यप्रति कपालम्। असमवायिकारणम् २ यथा घटकार्य्यप्रति कपालसंयोगादि। निमित्तकारणम् ३ यथा घटंप्रति दण्डचक्रादीति ॥ कार्य्याणां नियोगविकल्पसमुच्चया भवन्ति। अनेनैवोपायेन नान्येनेति नियोगः। अनेन वाऽनेन वेति विकल्पः। अनेन चेति समुच्चयः ॥ विवादे ॥ यथा। यस्मात् कार्य्यसमारम्भश्चिरात्तेन विनिश्चितः। तस्मान्न लभते कालमभियुक्तस्तु काचभाक् ॥ इति कात्यायनः ॥ अपूर्वे ॥ यथा। विधिप्रत्ययस्य कार्य्यमपूर्वमिति मीमांसकाः ॥ त्रि। सम्पादनीये। कर्त्तव्ये ॥ क्रियते इति। डुकृञ०। विभाषा कृवृषोरिति क्यप्। भावे कृत्यल्युटो बहुलमिति ण्यत्। वृद्धिः ॥

कार्य्यकुशलः। त्रि। कर्मक्षमे। कर्मठ ॥

कार्य्यता। स्त्री। कार्य्यत्वसङ्गतौ ॥ भावे तल् ॥

कार्य्यत्वम्। न। कार्य्यतासङ्गतौ ॥ अभूत्वाभावित्वे ॥ भावे त्वः ॥

कार्य्यपुटः। पुं। चपणे ॥ उन्मत्ते ॥ अनर्थकरे ॥

कार्य्यप्रद्वेषः। पुं। आलस्ये ॥

कार्य्या। स्त्री। कार्यौषधे ॥

कार्य्यार्थी। त्रि। यस्य निर्दिश्यते कार्य्यं तस्मिन् ॥ कर्मार्थिनि ॥

कार्गानेयः। त्रि। आग्नेये ॥ कृशानोरिदम्। अण् ॥

कार्म्मरी। स्त्री। काश्मरीवृक्षे। गम्भारीम् ॥

कार्य्यः। पुं। कार्य्ये। सालवृक्षे ॥ कर्त्रे ॥ सकुचे ॥ न। कृशत्वे ॥ कृशस्य भावः। वर्णदृढादिभ्यः ष्यञ्चेति ष्यञ् ॥

कार्षः। पुं। कर्षके ॥ कृषिः शीलमस्य। छत्रादिभ्यो णः ॥

कार्षकः। पुं। कर्षके ॥ कर्षति। कृष०। कृषेर्वृद्धिश्चोदीचामिति कुन् ॥

कार्षापणः। पुं। न। कार्षिके। रजतरूप्ये ॥ षोडशपणे ॥ ताम्रिकेपणे ॥ कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः। इति मनूक्तेः ॥ कार्षस्याय म्। तस्येदमित्यण्। आपणनम्। पण०। नित्यंपणः परिमाणे इत्यप्। गोचरसञ्चरेतिघो वा कार्षस्य कार्षेण वा आपणः ॥

कार्षिः। स्त्री। कृषिकर्म्मणि ॥ कृषति। कष० कृषेर्वृद्धिश्चेति इञ् ॥

कार्षिकः। पुं। कार्षापणे। रूप्यमाने

॥ कृषके । इतिहेमचन्द्रः ॥ कर्षस्य अयम् । अध्या० ठञ् ॥ शाल्मलीयप लचतुर्थभागे ॥

कार्ष्णाजिनिः । पुं । ऋष्यन्तरे ॥

कार्ष्णायसम् । न । कृष्णायसो विकारे ॥ अण् ॥

कार्ष्णिः । पुं । प्रद्युम्ने । मकरध्वजे ॥ कृष्णस्यापत्यम् । अतइञ् ॥

कार्ष्णी । स्त्री । शतावर्याम् ॥

कार्ष्यः । पुं । सखुआ इति प्रसिद्धे सालवृक्षे ॥ कृषति । कृष० । इगुपधेतिकः । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ॥

कालम् । न । लोहे ॥ कक्कोलके ॥ कालीयके ॥ त्रि । कृष्णगुणवति ॥

कालः । पुं । यमे । दण्डधरे ॥ कृष्णवर्णे ॥ मृत्यौ । यथा । सर्वस्वदं बलिमधो नयसि च्छलेन प्राणप्रियां जनकजां विपिने जहासि । संवर्द्ध्य यादवकुलं स्वयमेव हंसि कस्त्वां भजेद्यदिह कालभयं नहि स्यादिति ॥ महाकालशिवे ॥ शनौ ॥ कासमर्द्दे ॥ रक्तचित्रके ॥ राले ॥ कोकिले ॥ गुणचोभके ॥ कालदण्डयोगे ॥ निमेषाद्यभिमानिन्यां देवतायाम् ॥ क्षणदण्डमुहूर्त्तप्रहरदिनरात्रिपक्षमासायनवत्सरादौ । दिष्टे । अनेहसि । समये ॥ यथा । प्रत्यर्थी लभते कालं व्यहं सप्ताहमेव च । अर्थी तु प्रार्थयन्कालं तत्क्षणादेव हीयते ॥ क्वचित् प्रत्यर्थी कालं न लभते । यथा याज्ञवल्क्यः । साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियाम् । विवादयेत् सद्य एव कालोऽन्यत्रेच्छया स्मृत इति ॥ स च सर्वाधारः सर्वकार्यनिमित्तकारणमादित्यादिक्रियाप्रचयरूपः ॥ अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः । कलनात् सर्वभूतानां स कालः परिकीर्त्तितः ॥ अतीतादिव्यवहारहेतुः कालः स चैको नित्यो विभुश्च । जन्यानां जनकः कालो जगतामाश्रयो मतः । परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः ॥ अस्य गुणाः । सङ्ख्या १ परिमितिः २ पृथक्त्वम् ३ संयोगः ४ विभागः ५ । इतिभाषा प० ॥ कालश्च वैशेषिकाभिमत एकः स न अनागतादिव्यवहारभेदं प्रवर्त्तयितुमर्हतीति तस्मादयं यैरुपाधिभेदैरनागतादिभावं प्रतिपद्यते सन्तु त एवोपाधयोऽनागतादिव्यवहारहेतवः कृतमन्तर्गडुना कालेनेति साङ्ख्याचार्याः । तस्मान्न कालरूपतत्त्वान्तराभ्युपगम इति ॥ लिङ्गादिविषया

भूतभविष्यद्वर्त्तमानात्मय:कालाइति वैयाकरणा: ॥ कालेऽस्मि भगवद्विभूति: । काल: कलयतामहम् । कलयतां सङ्ख्यानं कुर्वतां मध्ये । क्रियाशक्त्युपहित: सर्वस्य संहर्त्ता परमेश्वर: काल: ॥ अहमेवाक्षय:काल: । अक्षयकालाभिमान्यक्षय: परमेश्वराख्य:काल: ॥ कलनात् सर्वभूतानां ब्रह्मादीनानिमेषत: । कालशब्देन निर्दिष्टो ह्यखण्डानन्दमद्वय: ॥ कलयत्यायु: । कलसङ्ख्याने । पचाद्यजन्तात् प्रज्ञाद्यण् ॥ कल्यते । कलसङ्ख्याने शब्दे च । कर्मणिघञ् ॥ कालयति सर्वमिति वा । कलप्रेरणे । ण्यन्तात्पचाद्यच् ॥ यद्वा । काल्यते । कालउपदेशे । घञ् ॥ यस्याऽह:प्रथमं रूपमरूपस्य तथा निशा । सन्ध्याच परमेशस्य तस्मै कालात्मनेनम: ॥

कालक: । पुं । जटुले । जतुके । पिप्रा । देहस्य चिह्नविशेषे । लसून इति भाषा ॥ अलगर्द्दे ॥ न । कालशाके ॥ यकृति ॥ अनित्ये वर्णे रक्तेचार्थे कालाच्चे तिकन् ॥ कालक: पट: कालिकाशाटी कालकम्मुखम् ॥ कालयति । कलक्षेपे । ण्वु० । ण्वुल् ॥

कालककटङ्कट: । पुं । शिवे ॥

कालकण्ठ: । पुं । शिवे ॥ पीतसारे ॥ मयूरे ॥ खञ्जने ॥ कलविङ्के ॥ दात्यूहे ॥ काल:कृष्णवर्ण: कण्ठो यस्य स: ॥ काले प्रावृषिकण्ठोध्वनिरस्यवा ॥

कालकण्ठक: । पुं । दात्यूहपक्षिणि ॥ कालकण्ठ ॥ काल:कण्ठोऽस्य । कप ॥ स्वार्थे कन्वा ॥

कालकन्दक: । पुं । जलसर्पे ॥

कालकन्या । स्त्री । जरायाम् ॥ कालस्यकन्या ॥

कालकर्णिका । स्त्री । अलक्ष्म्याम् ॥ कालस्यकर्णिका ॥

कालका । स्त्री । कालकेयनाम्नोऽसुरगणस्यजनन्याम् ॥

कालकाल: । पुं । सदाशिवे । देवदेवे ॥

कालकील: । पुं । } कोलाहले ॥
कालकीलक: । पुं ॥ }

कालकुष्ठम् । न । पर्वतीयमृत्तिकाविशेषे । कङ्कुष्ठे । विरङ्गे ॥

कालकूटम् । न । विषे ॥ वाले ॥ पुं । न । स्थावरेतीव्रविषविशेषे ॥ देवासुररणे देवैर्हतस्यपृथुमालिन: । दैत्यस्यरुधिराज्जातस्तरुरश्वत्थसन्निभ: ॥ निर्यास:कालकूटाख्यमुनिभि: परिकीर्त्तित: । सोऽहिक्षेत्रेशृङ्गवेरे कोङ्कणे मलये भवेत् ॥ कालमपि

कूटयति । कूटपरिदाहे । चु० । कर्मण्यण् ॥ कालस्यकर्मणो मृत्योर्वाकूटेरागिरिवेति वा ॥

कालकृत् । पुं । सूर्ये ॥ कालंकरोति । डुकृञ० । क्विप् । तुक् ॥

कालकृतः । पुं । सूर्ये ॥ त्रि । कालजाते ॥ यथा । सर्वज्ञकालकृतमन्ये कालोहि वलवत्तरः । इतिपु ॥

कालकेशी । स्त्री । नील्याम् ॥

कालखञ्जनम् । न । यकृति ॥ इतिहेमचन्द्रः ॥

कालखञ्जः । पुं । महानरकविशेषे ॥

कालखण्डम् । न । दक्षिणकुक्षिस्थेमांसखण्डे । यकृति ॥ कालश्चतत्खण्डञ्च ॥

कालग्रन्थिः । पुं । वत्सरे ॥

कालघण्टः । पुं । योगविशेषे ॥ यथा । षष्ठींशीतांशुवारे परिहर दशमीं सप्तमीम्भार्गवेपि अष्टम्यांदेवपूज्यं बुधदिननवमीं सौरिवारे दशम्याम् । एकादश्याञ्चभौमे दशशतकिरणेव जयेद्द्वादशीञ्च सर्वारम्भं न कुर्याज्जयतित्रिपदं कालघण्टोक्तियोगः इति ॥

कालकृतः । पुं । कालकासुन्दे इतिगौडभाषाप्रसिद्धे कासमर्दे । कसौंदी इतिभाषा ॥

कालचक्रम् । न । कालस्वरूपे चक्रे ॥ यथा । कालोद्विविधे ऽवसर्पिण्युत्सर्पिणीषुभेदतः । सागरकोटिकोटीनांविंशत्याससमाप्यते ॥ अवसर्पिण्यांषडरा उत्सर्पिण्यांतएवविपरीताः । एवंद्वादशभिररैर्विवर्त्ततेकालचक्रमिदम् ॥ इतिहेमचन्द्रः ॥ वत्सरस्वरूपे ॥

कालचिन्तकः । पुं । ज्योतिर्विदि । दैवज्ञे ॥

कालज्ञः । पुं । कुक्कुटे ॥ त्रि । अस्यायङ्कालइतिविदुषि ॥ वृहेदमिर्चस्कन्धेनयावत्कालविपर्ययः । तमेवचागते काले भिन्द्याद्घटमिवाश्मना ॥ कालं जानाति । ज्ञा० । कः ॥

कालञ्जरः । पुं । योगिचक्रस्यमेलके ॥ भैरवे । शिवे ॥ पर्वतविशेषे ॥ देशविशेषे ॥ काल्याःस्थाने सिद्धपीठे ॥

कालञ्जरा । स्त्री । } चण्डाम् ॥
कालञ्जरी । स्त्री । }

कालतालः । पुं । तमालवृक्षे ॥

कालतिन्दुकः । पुं । काकेन्दौ । कुपीलुके ॥

कालदण्डः । पुं । योगविशेषे ॥ कालदण्डे ॥

कालधर्म्मः । पुं । मृत्यौ ॥ समयस्वभावे ॥ कालस्य धर्मः ॥

कालनियोगः । पुं । दैवाज्ञायाम् ॥ कालस्य नियोगः । कालकृतोवा नियोगः ॥

कालनिर्य्यासः । पुं । गुग्गुलौ ॥

कालनेमिः । पुं । राक्षसविशेषे ॥ हिरण्यकशिपुपुत्रे । दैत्यविशेषे ॥

कालनेमी । पुं । कालनेमौ ॥

कालनेमिनिहा । पुं । श्रीपतौ । विष्णौ ॥ कालनेमिंनिजघानेति ॥

कालनेमिरिपुः । पुं । }
कालनेमिहा । पुं । } विष्णौ ॥
कालनेम्यरिः । पुं । }

कालपर्णः । पुं । तगरवृक्षे ॥

कालपालकम् । न । कङ्कुष्ठमृदि ॥

कालपाशः । पुं । यात्रायां वर्जनीयविशेषे ॥ उत्तरादिषु पूर्वान्तदिक्षु सूर्यादितः क्रमात् । काल स्तत्सम्मुखे पाशो निशायान्तु विपर्ययः ॥ सम्मुखस्थो कालपाशौ यात्रायाञ्चविवर्जयेत् ॥

कालपीलुकः । पुं । कुपीलौ ॥

कालपुच्छः । पुं । मृगविशेषे ॥ गुणै रेणसमः कालपुच्छो मुनिभि रीरितः ॥

कालपुरुषः । पुं । यमसहाये ॥ ज्योतिश्शास्त्रे ॥ यथा । किन्त्वस्य कालपुरुषाख्यमहार्णवस्य गच्छेत् कदाचि दल्पधिषणैर्मनसापि पारम् । इति ॥ नराणां शुभाशुभज्ञानार्थं जन्मलग्नादिद्वादशराशिकल्पिते ज्योतिश्शास्त्रप्रसिद्धे पुरुषाकारे ॥

कालपृष्ठः । पुं । मृगविशेषे ॥ कङ्कपक्षिणि ॥ न । कोदण्डमात्रे । धनुर्मात्रे ॥ कर्णचापे । कर्णस्य धृत्रासनयस्य धन्वनि ॥ कालो यम इव पृष्ठ मस्य । कालवर्णं वा पृष्ठ मस्य ॥

कालपेषी । स्त्री । श्यामलतायाम् ॥

कालप्रभातम् । न । शरदृतौ ॥ इति त्रिकाण्डशेषः ॥

कालभाण्डिका । स्त्री । मञ्जिष्ठायाम् ॥

कालमानः । पुं । कृष्णार्जके । कृष्णतुलस्याम् ॥ राजनिर्घण्टे कालमाल इति पाठः ॥

कालमुष्कः । पुं । घण्टापाटलिवृक्षे ॥

कालमूलः । पुं । रक्तचित्रके ॥

कालमेघः । पुं । श्यामलेसघनेवने ॥

कालमेशिका । स्त्री । कालमेष्याम् ॥ काले मिश्यते । मिशशब्दे । कर्मणिघञ् । गौ० ङीष् । स्वार्थे कन् ॥

कालमेषी । स्त्री । कालमेषिकायाम् । मञ्जिष्ठायाम् ॥ चिवृति ॥ सोमराज्याम् ॥ कालंवर्णं मिषति । मिष स्पर्द्धायाम् । कर्मण्यण् । गौरा

इत्वात् ङीष् ॥

कालयुक्तः । पुं । वत्सरे ॥ यथा । गोम
 हिष्योविनश्यन्तियेचान्येनटनर्त्तकाः
 । वासवोवर्षते देवि शस्यच्च नष्टिजा
 यते ॥ तिलसर्षपमाषादिकार्पासा
 नां महार्घता । गोमहिष्यः सुवर्णा
 नि कांस्यताम्रादयोषतः ॥ तत्सर्व-
 देवि विक्रीय कर्त्तव्योधान्यसञ्चयः ।
 तेन धान्येन लोकोऽयं निस्तरिष्यति
 दुर्द्दिनम् ॥ पार्थिवामोषकाद्दीनाः
 कालयुक्ते प्रपीडिताः ॥ इति ॥

कालरात्रिः । स्त्री । सर्वभूतापहारिण्यां
 मृत्युदेव्याम् ॥ सर्वमारकस्थापिका
 कालरात्रिर्नाशिका । प्रलयेकाल
 स्यापिनाशात् ॥ कालरात्रियमभगि
 नीतिभावप्रकाशः ॥ कल्पान्तरात्रौ
 ॥ भीमरथ्याम् ॥ निशाविशेषे । दी
 पान्वयाम् ॥ दीपान्वीतुयाप्रोक्ता
 कालरात्रिश्च सामतेत्यागम वचना
 त् ॥ दुर्गायाः शक्तिविशेषे ॥ दैनन्दि
 नप्रलयेऽपीतिकश्चित् ॥ कालः सं
 हारोमरणं तदुपलक्षिता रात्रिः ॥

कालवृन्तः । पुं । कालाग्निचक्रे ॥

कालवर्णम् । न । विड्लवणे ॥

काललोहम् । न । तिला इति गौड
 भाषाप्रसिद्ध कृष्णावर्णे । वर्षाले । मी
 नधे ॥

कालवित् । पुं । ज्योतिर्विद् ॥ ज्योति
 र्विद् कालः परमार्थ इत्याह । त
 न । कालैक्ये मुहूर्त्तादिव्यवहारा
 योगात् । तन्नानात्वेपि न स्यात्तत्व
 म् । अन्यविषयत्वेन प्रतीतेः । उदय
 कालत्वादिनाक्रियाधर्मत्वेन प्रती
 तेः स्फुटत्वात् । नचक्रियाधर्मत्वं
 कालेपितदुत्पत्तिदर्शनात् । अन्य
 थाकाशानवच्छिन्नत्वेन क्रियानित्य
 त्वापातात् ॥ त्रि । अवसरज्ञे ॥

कालविभक्तिः । स्त्री । मासर्त्त्वयनादौ ॥

कालवृन्तः । पुं । कृष्णमुद्गे ॥

कालवृन्ती । स्त्री । पाटलावृक्षे ॥

कालवेला । स्त्री । क्रियानर्हकालवि
 शेषे ॥ यथा । पञ्चद्विसत्तुर्ग्निनगेन्दु
 वेददिग्दन्तिनश्चापिदिवा ऽपरात्रौ
 । षट्तूर्यरामाश्विशराग्निचन्द्रनागा
 स्तुर्थ्यादिषु कालवेला इति ॥ का
 लस्यशनेस्तनयामार्द्धरूपा वेला ॥
 इतिदीपिका ॥

कालशाकम् । न । नाडिकम् शाकशा
 कम् कालकमितिपर्यायप्रसिद्धं शाक
 विशेषे । नरिका नरचा इतिगौड
 भाषा ॥ कालशाकंसरंरुच्यं वातकृ
 त्कफशोफहृत् । बल्यंरुचिकरंमेध्यं
 रक्तपित्तहरंहिमम् ॥

कालशालिः । पुं । कृष्णशालौ ॥

कालशेयम् । न । गोरसे । घोले ॥ कलश्याम् मन्थनपात्रे भवम् । इति कुक्षिकलशिवस्त्यस्त्यहेढञ् ॥

कालसंरोधः । पुं । चिरकालावस्थाने ॥

कालसर्पः । पुं । कृष्णसर्पे । महाविषे ॥

कालसारः । पुं । कृष्णसारे मृगे ॥ न । पीतचन्दने । कालानुसार्ये । कालिया इतिगौडभाषा ॥

कालसूत्रम् । न । अयुतयोजनपरिमण्डले ताम्रमयेतप्तसमदेशे उपर्यधस्तादग्न्यर्काभ्यामतितप्यमाने नरके ॥ कृतान्तचक्रस्फुच्छेदनरूपेन रके ॥

कालसेयम् । न । घोले ॥

कालस्कन्धः । पुं । तमालवृक्षे ॥ तिन्दुकवृक्षे ॥ जीवकद्रुमे ॥ दुष्खदिरे ॥ उदुम्बरे ॥ कालः स्कन्धो यस्य ॥

कालहानिः । स्त्री । विलम्बे ॥

कालहीनः । पुं । लोभे ॥

काला । स्त्री । कृष्णत्रिवृतायाम् ॥ कालयति । कलविक्षेपणे । णिच् । पचाद्यच् ॥ मञ्जिष्ठायाम् ॥ नीलिकायाम् ॥ कल्यते । कलक्षेपे । कर्मणि घञ् ॥ कृष्णजीरके ॥ अश्वगन्धायाम् ॥ पाटलावृक्षे ॥ कालियाकडा इतिगौडभाषाप्रसिद्धे कुलिकवृक्षे ॥ कालोवर्णोऽस्यास्ति । अर्शआद्यच् ॥

गौर्याम् ॥ वर्णस्याविवक्षायां जानपदेतिन ङीष् ॥

कालाक्षरिकः । त्रि । शिक्षिताक्षरे ॥

कालाख्या । स्त्री । नवविधासु तुष्टिषु तृतीयायाम् ॥ यथा । प्रव्रज्यापि न सद्योनिर्वाणदेति सैवकालपरिपाकमपेक्ष्यसिद्धिंतेविधास्यति अलमुत्तप्ततयेत्युपदेशे यातुष्टिः साकालाख्या ओघ उच्यते ॥

कालागुरु । न । कृष्णागुरुणि ॥ कालञ्चतत् अगुरुच ॥ अयंप्राग्ज्योतिषे भवतीतिप्रसिद्धिः ॥

कालाग्निरुद्रः । पुं । संहारकारिरुद्रे ॥

कालाग्निः । । पञ्चमुखे रुद्राक्षे ॥

कालाङ्गः । पुं । कारवेल्लप्रभेदे ॥

कालाङ्गम् । न । कालपुरुषस्याङ्ग ॥ यथा मेषः शिरो वृषोवक्त्रं मिथुनं बाहुयुग्मकम् । कर्कटोहृदयञ्चैव सिंहस्तूदरमेवच ॥ कन्याकटिस्तुलावस्तिर्वृश्चिकोगुह्यमेवच । धनुरूरूमृगोजानुकुम्भोजङ्घप्रकीर्त्तिते ॥ मीनः पादद्वयञ्चैव कालाङ्गानि यथाक्रमम् ॥ इतिकालनरस्याङ्गसदसद्भवयोगतः । पुंसामसितदङ्गेषु शुभाशुभफलंवदेदिति ॥

कालाञ्जनी । स्त्री । नीलाञ्जन्याम् । रेचन्याम् ॥

कालातीतः । पुं । कालात्ययापदिष्टे ॥ कालातिक्रमणे ॥ कालस्यअतीतम् ॥ त्रि । अतीतकाले ॥

कालात्ययापदिष्टः । पुं । कालातीते । वाधितहेतौ । कालस्यसाधनकालस्य अत्ययेअभावे अपदिष्टः प्रयुक्तोहेतुः । एतेनयस्यहेतोः साध्याभावःप्रमाणान्तरेण सिद्धःसकालात्ययापदिष्टः । यथा । वह्निरनुष्णः कृतकत्वात् । अत्रानुष्णत्वंसाध्यंतदभावउष्णत्वम् ततस्पर्शेन प्रत्यक्षेणगृह्यते इति ।

कालानलः । पुं । प्रलयाग्नौ ॥

कालानुनादी । पुं । भ्रमरे । रोलम्बे ॥ कलविङ्के ॥ कपिञ्जले ॥

कालानुसारिवा । स्त्री । तगरपादिके । तगरमूल इति भाषा ॥ शीतल्याम् । शिउलीछोप इति गौडभाषा ॥

कालानुसारकम् । न । तगरे ॥ पीतचन्दने ॥

कालानुसारिः । पुं । शैलेये । शैलजनामगन्धद्रव्ये ॥

कालानुसार्य्यः । पुं । न । शैलेये ॥ कालीयके । गौडभाषया कालियानाम पीतवर्णसुगन्धिकाष्ठे ॥ शिंशपावृक्षे ॥ तगरे ॥ कालेनअनुस्रियते । इण्गतौ । कृत्ल्योर्ण्यत् ॥

कालानुसार्य्यकम् । न । शैलेये ॥

कालान्तरविषः । पुं । मूषिकादौ ॥

कालापः । पुं । सर्पभोगि ॥ राक्षसे ॥ त्रि । कलापव्याकरणज्ञे ॥

कालापकम् । न । चतुर्णां श्लोकानां समन्वये ॥

कालायसम् । न । लोहे ॥ कालश्चतत् अयश्च । अनोश्मायः सरसोजातिसंज्ञयोरितिटच् ॥

कालायीनम् । न । कलायानांक्षेत्रे ॥ कलायानाम् भवनंक्षेत्रम् । धान्यानाम्भवनेक्षेत्रेखञ् ॥

कालाशुद्धिः । स्त्री । शुभकर्मानर्हसमये ॥ सायथा । वक्राऽतिचारदृष्टास्तगास्थत्वेगुरुशुक्रयोः । गुरौमकरसिंहस्थे क्षयमासाधिमासयोः ॥ त्रयोदशदिनेपक्षेगुर्वादित्यस्तथैवच । लुप्ताब्देत्रिविधोत्पाते कालाशुद्धिरुदाहृतेति ॥

कालिकः । पुं । क्रौञ्चविहगे ॥ न । कालीये । कृष्णचन्दने ॥ न । वैरे ॥ प्रकृष्टोदीर्घः कालोऽस्य । प्रकृष्टेठञ् ॥ त्रि । कालसम्बन्धिनि ॥ सामयिके ॥ कालेननिर्वृत्तः । निर्वृत्तेऽक्षद्यूतादिभ्य इतिठक् ॥ कालेभवोवा । कालाट्ठञ् ॥

कालिका । स्त्री । गौर्याम् ॥ चण्डिकाभेदे ॥ कार्ष्णे ॥ वृश्चिकपत्रवृक्षे ॥ क्रमदेयवस्तु मूल्ये ॥ धूसर्याम् ॥ नवमेघे ॥ पटोलशाखायाम् ॥ रोमाल्याम् ॥ मांस्याम् ॥ काक्याम् ॥ शिवायाम् ॥ मेघावली ॥ स्वर्णादिदोषे ॥ सुरायाम् ॥ क्षीरकीटे ॥ काकोल्याम् ॥ श्यामाख्यविहगे ॥ प्रतिमासीयवृद्धौ ॥ यथा । प्रतिमासंस्रवतिया वृद्धिः साकालिकामतेतिनारदः ॥ कुज्झटिकायाम् ॥ हिमाचलभवायां त्रिशिरायां हरीतक्याम् । सागन्धयोगकरणे प्रशस्ता भवति ॥ कालोवर्णः समयश्चास्त्यस्याः । अत इनिठनाविति ठन् ॥ स्वा० कन्वा । केण इति ह्रस्वः ॥

कालिकापुराणम् । न । उपपुराणविशेषे ॥

कालिकाव्रतम् । न । अमावास्यायां स्त्रीकर्त्तव्ये भविष्यपुराणोक्ते व्रतविशेषे ॥

कालिङ्गः । पुं । भूमिकर्कारौ ॥ हस्तिनि । द्विपे ॥ सर्पे ॥ लोहविशेषे ॥ अस्यलक्षणं यथा । कालिङ्गालिङ्गवान् यःस्यात् घनःसूक्ष्माङ्गकोमत इति ॥ कलिङ्गानां राजनि ॥ स्यजम गधकालिङ्गसूरमसाट्त्व ॥ न । कर्णीदातरवृक्ष इतिख्यातेफलविशेषे । सुवर्त्तुले । कालिन्दके ॥ गुणा यथा । कालिङ्गं ग्राहिहृत्पित्तशुक्रघ्नं शीतलं गुरु । पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित् ॥ कालिङ्गाः पुं भूम्नि । नीवृति ॥ कलिङ्गदेशमारभ्यपश्चाद्दयोजनं शिवे । दक्षिणस्याम् देशानि कालिङ्गाः परिकीर्त्तिताः ॥

कालिङ्गिका । स्त्री । त्रिवृति ॥

कालिङ्गी । स्त्री । राजकर्कट्याम्

कालिदासः । पुं । विक्रमादित्यसभायां नवरत्नमध्यगणिते प्रसिद्धकविविशेषे । मेधारुद्रे ॥ काल्याःदासः । ङ्याप्रोः संज्ञाछन्दसोर्बहुलमिति ह्रस्वः ॥

कालिनी । स्त्री । आर्द्रानक्षत्रे ॥ इति हेमचन्द्रः ॥

कालिन्दम् । न । } कालिन्दकम् । न । } कर्णीदा इति प्रसिद्धे फलविशेषे । कालिङ्गे ॥

कालिन्दी । स्त्री । यमुनायाम् ॥ कलिन्दस्येयम् । तस्येदमित्यण् । ङीप् ॥ रक्तत्रिवृति ॥

कालिन्दीभेदनः । पुं । कालिन्दीकर्षणे । बलदेवे ॥ कालिन्द्याः भेदनः ॥

कालिन्दीसूः । स्त्री । सूर्यपत्न्याम् । यमुनामातरि ॥

कालिन्दीसोदरः । पुं । यमे ॥ कालि

न्याःषोदरः ॥

कालिमा । पुं । कार्ष्ण्ये ॥

कालियः । पुं । कृष्णसर्पविशेषे ॥

काली । स्त्री । शान्तनुराजपत्न्याम् । सत्यवत्याम् ॥ कालिकायाम् ॥ अम्बिकाललाटाविर्भूतायां देव्याम् । चीरकीटे ॥ मातृभेदे । उमायाम् । काल सङ्कलनात् कालीत्यागमः ॥ कालकारस्यायां देव्याम् ॥ नव्यमेघौघे ॥ परिवादे ॥ कालान्याम् ॥ तुवर्याम् ॥ त्रिवृति ॥ रात्रौ ॥ वृश्चिकाल्याम् । विछाटी इति गौड भाषा ॥ वह्निजिह्वाविशेषे ॥ कालोवर्णोऽस्त्यस्याः । कालाज्जानपदकुण्डगोणस्थलभाजनागकालनीलेत्यादिनाङीष् ॥

कालीकः । पुं । क्रौञ्चे ॥

कालीची । स्त्री । यमस्य विचारभूमौ ॥ इति त्रिकाण्डशेषः ॥

कालीतनयः । पुं । महिषे ॥ इति हेमचन्द्रः ॥

कालीयम् । न । कृष्णचन्दने । हरिचन्दने ॥ कुङ्कुमे ॥ पुं । सर्पविशेषे ॥

कालीयकः । पुं । दारुहरिद्रायाम् ॥ न । गौडभाषया कालिया इति प्रसिद्धे पीतवर्णे सुगन्धिकाष्ठे । जायके । कालानुसार्ये ॥ कृष्णचन्दने ॥ कालीयकं रक्तगुणं विशेषाद्यङ्गनाशनम् ॥ कालस्य वर्णस्यायम् । वृद्धाच्छः । स्वार्थे कन् ॥

कालीयकचोदः । कुङ्कुमे ॥

कालुष्यम् । न । मालिन्ये ॥

कालेयः । पुं । दैत्यभेदे ॥ न । कालखण्डे । यकृति ॥ गौडभाषया कालिनामपीतवर्णसुगन्धिकाष्ठे ॥ प्राग्दीव्यतीयेषु अग्निकलिभ्यां ढग्वक्तव्यः इति ढक् ॥

कालेयकः । पुं । दारुहरिद्रायाम् ॥ कुक्कुरे ॥ न । कालीयके । पीतवर्णे सुगन्धिकाष्ठे ॥ कलेरयम् । सर्वत्राग्निकलिभ्यां ढक् । स्वा० कन् ॥

काल्पः । पुं । कर्चीहलदी इति प्रसिद्धे द्राविडके । कर्चूरे ॥

काल्पकः । पुं । वेधमुख्ये । कर्चूरके । काल्पे ॥ कल्पविधौ भवः । तत्र भव इत्यण् तस्मात् कन् ॥

काल्पनिकः । त्रि । आरोपिते । कल्पिते । कल्पनाभवे ॥ कल्पनाया आगतः । ठक् ॥

काल्पिकः । त्रि । कल्पो वेदाङ्गम् तदुक्तविधौ ॥

काल्यम् । न । प्रत्यूषे । प्रभाते ॥ कलयति चेष्टाम् । अघ्न्यादयश्चेति कलेर्यक् । ततः प्रज्ञाद्यण् ॥ । स्त्री ते

॥ त्रि। मासकाले ॥ कालःप्राप्तोऽस्य। कालाद्यत ॥

काल्यकः। पुं। कर्चूरे। द्राविडके ॥ काले साधुः। तत्रसाधुरितियत्। स्वा० कन् ॥

काल्यमानः। त्रि। विचाल्यमाने ॥

काल्या। स्त्री। उपसर्यायाम्। गर्भग्रहणप्राप्तकालायाङ्गवि ॥ कालःप्राप्तोऽस्याः। तदस्यप्राप्तमिति वर्णमाने कालाद् यत् ॥

कावचिकम्। न। सनुचित्राङ्गे ॥ कवचिनांसमूहः। ठञ्कवचिनश्च ॥

कावाटः। पुं। वाक्कलहे ॥ ईषद्वादः ईषदर्थेचेतिकोः कादेशः ॥

कावारम्। न। शैवले ॥ आसमन्तात् वार्यते आच्छाद्यतेऽनेन। इत्यप्चु रादेः पुंसीतिघः। यद्वाआवारयति व्रियते वा। इत्य०। अच्। घञ्वा। कस्यजलस्य आवारम् ॥

कावारी। स्त्री। छत्रादिच्छत्रके। भ मल्कुव्याम्। वारित्रायाम् ॥ छत्रारति भाषा ॥

कावृकः। पुं। कुक्कुटे ॥ चक्रवाके ॥ पीतमुण्डखगे ॥

कावेरम्। न। कुङ्कुमे ॥

कावेरी। स्त्री। वेश्यायाम् ॥ हरिद्रायाम् ॥ सरिद्विशेषे ॥ कस्य जलस्य वेरं शरीरम्। तस्येवम्। मत्स्येत्सि-च्यश्च। ङीप्। ईषद्वेरमस्या वा ॥

काव्यः। पुं। शुक्रे। दैत्यगुरौ ॥ न। ग्रन्थे। कविकृतौ ॥ अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यमितिवामनः ॥ तत्त्रिविधं यथा। सव्यङ्ग्य मुत्तमं काव्यं मध्यङ्ग्यमधमं स्मृतम्। किञ्चिद्व्यङ्ग्यसमायुक्तं मध्यमं परिकीर्त्तितमितिकाव्यचन्द्रिका ॥ कवेरपत्यम्। कुर्वादिभ्योण्यः ॥ कवेरिदङ्कर्मभावो वा। ब्रा०। ष्यञ् ॥ कु धातोःश्रोरावश्यके इति ण्यद्वा ॥

काव्यचौरः। पुं। चन्द्रे ॥

काव्यलिङ्गम्। न। अर्थालङ्कारप्रभेदे ॥ अस्यलक्षणं यथा। हेतोर्वाच्य पदार्थत्वे काव्यलिङ्गमुदाहृतमिति ॥ काव्यलिङ्गं हेतोर्वाच्यपदार्थतेति च ॥ यथा। वपुःप्रादुर्भावा दनुमितमिदं जन्मनि पुरा पुरारे न प्रायः क्वचिदपि भवन्तं प्रणतवान्। नमन्मुक्तः संप्रत्यऽह मतनु रग्रेप्यनति भाग् महेश क्षन्तव्यं त दिदमपराधद्वयमपि ॥ अनेक पदार्थता यथा। प्रण यिसखीसलीलपरिहासरसाधिगतै र्ललितशिरीषपुष्पहननैरपि ताम्यति यत्। वपुषि वधाय तत्र तव शस्त्र मुपक्षिपतः प

तत् शिरस्यकाण्डयमदण्ड इवैष
भुजः ॥ एक पदार्थता यथा । भस्मो
द्धूलनभद्रमस्तु भवते रुद्राक्षमाले
शुभं. हा सोपानपरम्पराङ्गिरिसु
ताकान्तालयालङ्कृतिम् । अद्याराध
नतोषितेन विभुना युष्मत्स पर्यासु
खालोको च्छेदिनि मोक्षनामनि
महामोहे निधीयामहे ॥ एषु अ
पराधद्वये पूर्वापरजन्मनोरनमनम्
भुजपाते शस्त्रोपक्षेपो महामोहे-
सुखालोको च्छेदित्वञ्च यथाक्रम-
मुक्तरूपो हेतुः ॥

काव्या । स्त्री । पूतनायाम् ॥ बुद्धौ ॥

काव्यार्थापत्तिः । स्त्री । अर्थालङ्कारप्र
भेदे ॥ कैमुत्येनार्थ संसिद्धिः काव्या
र्थापत्तिरिष्यते । स जित स्त्वन्मुखे
नेन्दुः का वार्ता सरसीरुहाम् ॥
अत्र सरस्त्वनेन पद्मानि येन जिता
नि इति निर्वर्णितम् । तथाच सो-
पियेनजित स्तेन पद्मानिजितानी
ति किमुवक्तव्यमितिदण्डा पूपिका
न्यायेन पद्मजयरूपस्यार्थस्य संसिद्धिः
काव्यार्थापत्तिः ॥ तान्त्रिकार्थापत्ति
व्यावर्त्तनाय काव्यविशेषणम् । यथा
वा । अधरोयमधीराक्ष्या बन्धुजीव
प्रभाहरः । अन्यजीवप्रभांहन्तहर
तीति किमद्भुतम् ॥ स्वकीयहृदयं
भित्त्वा निर्गतौ यौ पयोधरौ । हृ
दयस्यान्यदीयस्य भेदने का कृपात
योः ॥

काशः । पुं । रोगविशेषे ॥ क्षुते ॥ पुं ।
कण्ठकण्डूयने ॥ काँस इति प्रसिद्धे
तृणविशेषे । इक्षुगन्धायाम् ॥ काशः
स्यान्मधुरस्तिक्तः स्वादुपाकोहिमः-
सरः । मूत्रकृच्छ्राश्मदाहास्रक्षयपि
त्तजरोगजित् ॥ न । काशपुष्पे ॥
काशते । काशृदीप्तौ । पचाद्यच् ॥

काशकः । पुं । काशे । काँस इतिभा
षा ॥

काशाल्मलिः । स्त्री । कूटशाल्मलिवृक्षे ॥

काशिः । स्त्री । देशविशेषे । काश्या
म् ॥ काशते । काशृ० । सर्वधातुभ्य
इन् ॥

काशिका । स्त्री । काश्याम् । महाश्म
शाने ॥ प्रकाशिकायाम् ॥ काश्येव ।
। स्वार्थे कन् ॥ काशिक्याम् ॥ का
श्यादिभ्यष्ठञ्ञिठः । इकारउच्चारणार्थः ॥

काशिकाप्रियः । पुं । दिवोदासे । धन्व
न्तरौ ॥

काशिकी । स्त्री । काश्याञ्जातायाम् ॥
काश्यांजाता तत्रभवा तत आगता
दिर्वा । काश्यादिभ्यष्ठञ्ञिठाविति
ञ् । ङीप् ॥

काशिराजः । पुं । नृपतिविशेषे । धन्व

न्तरौ । सुधोद्भवे ॥ काश्याः राजा
। राजाहः सखिभ्यष्टच् ॥
काशी । स्त्री । वाराणस्याम् । तपःस्थ
ल्याम् । अविमुक्ते । आनन्दवने ॥
मुने प्रलयकालेऽपि न तत् क्षेत्रं क
दाचन । विमुक्तं न शिवाभ्यां यद्
विमुक्तं ततोविदुः ॥ न यदाभूमिव
लयं न यदापां समुद्भवः । तदा वि
हर्त्तुं मीशेन क्षेत्र मेत द्विनिर्मित
म् ॥ इत्यगस्त्यम्प्रतिस्कन्दवचनम् ॥
अयोध्या मथुरा माया काशी का
ञ्ची अवन्तिका । पुरीद्वारावती चै
व सप्तैता मोक्षदायिकाः ॥ एता-
स्तु पृथवीमध्ये न गण्यन्ते कदाचन
। पुरीद्वारावतीविष्णोः पाञ्चजन्यो
परिस्थिता ॥ एताश्च मुक्तिदाः सर्वा
एकचगणिताःसुरैः । यानि यानिच
क्षेत्राणि काशीप्राप्तिकराणिषट् ॥प्रा
णिना मिह मोक्षार्थं महाकारुणि
कः शिवः । तारोपदेशं कुरुते इ-
त्याहुः शास्त्रकोविदाः । यथोक्तंरु
द्रयामले । काशीपुरीपरिसरे सुर
सिन्धुतीरं कर्णे जपत्यनुदिनंकिल
देहभाजाम् । मोक्षार्थमेव दयया
शशिखण्डमौलिः श्रीशक्तिबीजम
नघं सुरसंघसेव्यमिति ॥ तत्र वैष्ण
वेभ्योराममन्त्रश्शैवेभ्यःपञ्चाक्षरस्य

वृहज्जामालोक्या शाक्तेभ्यःशक्तिवी
जस्यभुवनेश्वरीमन्त्रस्य यतिभ्यः प्रण
वस्येतिव्यवस्था ॥ सदा कृतयुगञ्चास्तु
सदा चास्तूत्तरायणम् । सदा म-
होदयश्चास्तु काश्यां निवसतां स
ताम् ॥ लोलार्ककेशवौ कोटौ गङ्गा
ज्या नगरंधनुः । कलि र्लक्ष्यः शरो
धर्म्मः शिवो धन्वी पुनातु माम् ॥ अ
यथा सर्वक्षेत्राणि काश्यां सन्ति नगो
त्तम । तत्र नित्यं वसेन् नित्यं देवी
भक्तिपरायणः ॥ तानि स्थानानि स
म्पश्यन् जपन् देवीं निरन्तरम् ।
ध्यायं स्तच्चरणाम्भोजं मुक्तोभवति व
न्धनादितिदेवीगीता देवीभागव-
ते ॥ काशते । काशृदीप्तौ । पचा
द्यच् । गौरादित्वान् ङीष् ॥
काशीनाथः । पुं । विश्वेश्वरे । शिवे ॥
काशीराजः । पुं । शिवे ॥ धन्वन्तरौ ॥
काश्याः राजा । टच् ॥
काशीशम् । न । धातुकाशीशे । काशी
कसीति प्र० उपधातुविशेषे ॥ तद्वि
विधम् । हरिद्वर्णं लोहितञ्च धातु
काशीशमिष्यते । शुक्लवर्णं तथाकृ-
ष्णम्पुष्पकाशीशमुच्यते ॥
काशूकारः । पुं । गुवाके ॥
काश्मरी । स्त्री । गम्भार्याम् ॥ काशते
। काशृ० । अन्येभ्योपोतिमनिन् । व

नोरश्चेति ङीब्रौ ॥

काश्मर्य्यः । पुं । काश्मरीवृक्षे । गम्भार्याम् ॥ काश्मरीशब्दोऽस्त्यस्य । अन्येभ्योपीतियप् ॥

काश्मीरम् । न । पुष्करमूले ॥ कुङ्कुमे ॥ टङ्के ॥ पुंभूम्नि । देशविशेषे । शास्त्रशिल्पिषु ॥ संप्रदायविशेषे ॥ यथा । शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम् । तावत्काश्मीरदेशः स्यात्पञ्चाशद्योजनात्मकः ॥ कश्मीरेषु भवम् । तत्रभवइत्यर्थे कच्छादिभ्य इत्यण् ॥ स्वार्थेणवा ॥

काश्मीरजम् । न । कुष्ठे । पारिभाव्ये ॥ कुङ्कुमे ॥ पुष्करमूले ॥ काश्मीरे जायते । जनी० । सप्तम्यांजनेर्डः ॥

काश्मीरजन्म । न । कुङ्कुमे ॥ कुष्ठे । पारिभाव्ये ॥ काश्मीरे जन्मास्य ॥

काश्मीरजा । स्त्री । अतिविषायाम् । महौषधे ॥

काश्मीरा । स्त्री । अतिविषायाम् ॥ कपिलद्राक्षायाम् ॥ पृथिव्याम् ॥

काश्मीरी । स्त्री । गम्भार्याम् ॥ गुणा यथा । काश्मीरीतुवरातिक्ताषीर्य्योष्णामधुरागुरुः । दीपनी पाचनी मेध्याभेदिनीभ्रमशोषजित् ॥ दोषतृष्णामशूलार्शोविषदाहज्वरापहा । तत्फलंबृंहणंवृष्यंगुरुकेश्यंरसायनम् । वातपित्ततृषारक्तक्षयमूत्रविवन्धहृत् ॥ स्वादुपाकेहिमंस्निग्धं तुवराम्लंविशुद्धिकृत् । हन्याद्दाहतृषावातरक्तपित्तक्षतक्षयानिति ॥

काश्यः । पुं । काशिराजे ॥ न । मद्ये ॥

काश्यपः । पुं । मुनिविशेषे ॥ कणादमुनौ ॥ मृगविशेषे० ॥ मीनवि० ॥ गोत्रवि० ॥ तत्प्रवरान्तर्गतमुनिवि० ॥ कश्यपस्यात्मजमात्रे ॥ कश्यपस्यगोत्रापत्यम् । विदाद्यञ् ॥ न । मांसे ॥ इतिहेमचन्द्रः ॥

काश्यपिः । पुं । अरुणे । गरुडाग्रजे ॥ गरुडे ॥ कश्यपस्यापत्यम् । बा० इञ् ॥

काश्यपी । स्त्री । पृथिव्याम् । भूमौ ॥ कश्यपस्येयम् । तस्येदमित्यण् । ङीप् ॥ अम्बिकायाम् ॥

काश्यपेयः । पुं । सूर्य्ये ॥

काश्वरी । स्त्री । काश्मर्याम् । गम्भार्याम् ॥ काशते । काशृ० । अन्येभ्योपीतिवनिप् । वनोरचेतिङीब्रौ ॥

काषः । पुं । कषणे ॥ कषणपाषाणे ॥ कष्यतेऽनेन । कष० । घञ् ॥

काषायम् । त्रि । कषायेणरक्ते वस्त्रादौ ॥ तेनरक्तंरागादित्यण् ॥

काषायी । त्रि । कषायरक्तवस्त्रवति ॥

काष्ठम् । न । दारुणि । इन्धने ॥ अर्कनिष्कास नार्थेकाष्ठे ॥ यथा । सप्ता

रमति शुष्कं यत् मुष्टिमध्येऽममेष्यति। तत् काष्ठकाष्ठमिति प्राहुः खदिरादिसमुद्भवम्॥ काशते। काशृ॰। हनिकुषीण्यादिना क्थन्। ब्रश्चेति षत्वम्। तितुत्रेतिनेट्॥

काष्ठकम्। न। अगुरुणि॥

काष्ठकदली। स्त्री। वनकदल्याम्। शिलारम्भायाम्। काठकेला इति भाषा॥

काष्ठकीटः। पुं। घुणे॥

काष्ठकुट्टः। पुं। शतच्छदखगे। खुटकबढैया इति भाषा॥

काष्ठकुद्दालः। पुं। अभ्र्याम्। नौकादेर्मलापनयनार्थे काष्ठघटितकुद्दाले॥ कमुद्दालयति। दलविदारणे। कर्मण्यण्। शकन्ध्वादिः। काष्ठस्य कुद्दालः॥

काष्ठजम्बूः। स्त्री। भूमिजम्ब्वाम्॥

काष्ठतट्। पुं। वर्णसङ्करजातिविशेषे। रथकारे। वर्द्धकौ। बढइ इति भाषा॥ काष्ठं तक्षति। तक्षूतनूकरणे क्विप्। काष्ठतक्षौ। काष्ठतड्भ्यामित्यादिरूपाणि॥

काष्ठतक्षकः। पुं। रथकारे। तक्षणि॥ काष्ठं तक्षति। तक्ष्॰। ण्वुल्॥

काष्ठतन्तुः। पुं। कोषकारे। काष्ठकृमौ॥

काष्ठदारुः। पुं। देवकाष्ठे॥

काष्ठद्रुः। पुं। पलाशवृक्षे॥

काष्ठधात्रीफलम्। न। आमलके॥

काष्ठपाटला। स्त्री। सितपाटलिकायाम्॥

काष्ठमठी। स्त्री। चितायाम्॥ इति त्रिकाण्डशेषः॥

काष्ठमल्लः। पुं। शवयाने। अर्थी इति भाषा॥

काष्ठमौनम्। न। इङ्गितेनापि स्वाभिप्रायाऽप्रकाशने॥

काष्ठलेखकः। पुं। घुणे॥

काष्ठलोही। पुं। काष्ठलोहयुक्तप्राचे। वातड्डौ॥

काष्ठवल्लिका। स्त्री। कटुकायाम्॥

काष्ठशारिवा। स्त्री। शारिवायाम्। अनन्तमूल इति गौडभाषा॥

काष्ठा। स्त्री। दारुहरिद्रायाम्॥ स्थितौ। स्थानमात्रे॥ दिशि। आशायाम्॥ उत्कर्षे। प्रकर्षे॥ मर्यादायाम्। सीमनि॥ निष्ठायाम्॥ पर्यवसानभूमौ॥ अष्टादशनिमेषात्मके काले॥ दशपञ्चगणपरिमितेकाले॥ काशते। काशृ॰। हनिकुषिनीरमिकाशिभ्यः क्थन्। ब्रश्चेति षत्वम्। टाप्॥

काष्ठाम्बुवाहिनी। स्त्री। द्रोण्याम्। काष्ठादिकृतच्छिन्नाशयनौकाकृतिजलसेचन्याम्॥ पुनःपुनरम्बु वहति। व

हुताशाग्नीन्द्रमूर्त्तिशिखिः । काष्ठस्य सम्मुखागिनी । काष्ठेत्युपलक्षणम् । शिलामय्या अपि द्रोणीत्वात् ॥

काष्ठालुकम् । न । काठिन्ययुक्ते कन्दविशेषे ॥

काष्ठीलः । पुं । राजार्के ॥

काष्ठीला । स्त्री । कदल्याम् ॥ काष्ठिना इष्यते । इलास्वप्नक्षेपणयोः । अच् ॥ काईषत् अष्ठीलमस्या वा ॥

काष्ठोदुम्बरिका । स्त्री । काकोदुम्बरिकायाम् ॥

कासः । पुं । खाँसीति प्रसिद्धे रोगे । क्षवथौ ॥ पञ्चकासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः । क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम् ॥ कासते शब्देन । कासृ शब्दकुत्सनयोः । हलश्चेति घञ् ॥

कासकन्दः । पुं । कोकणदेश प्रसिद्धे । कासालै । विषाक्षपके ॥

कासघ्नः । पुं । मोदकविशेषे ॥ यथा । हरीतकीकणाशुण्ठीमरिचंगुडसंयुतम् । कासघ्नो मोदकः प्रोक्तस्तृष्णारोचकनाशन इति ॥

कासघ्नी । स्त्री । कण्टकार्य्याम् ॥

कासजित् । स्त्री । भार्ग्याम् ॥

कासनाशिनी । स्त्री । कर्कटशृङ्ग्याम् ॥

कासन्दीवटिका । स्त्री । वेसवारविशेषे ॥

कासमर्द्दः । पुं । कालकासुन्दा इति गौडभाषाप्रसिद्धे गुल्मप्रभेदे । अरिमर्द्दे । जरणे ॥ पुं । न । कासुन्दी इति गौडभाषाप्रसिद्धे वेसवारे ॥ पेषितजलमिश्रितवस्त्रगलितवेसवार इति पाकराजेश्वरः ॥

कासमर्द्ददलम् । न । कसौन्दी इति ख्यातशाके ॥ कासमर्द्ददलं रुच्यं वृष्यं कासविषास्रनुत् । मधुरं कफवातघ्नं पाचनं कण्ठशोधनम् ॥ विशेषतः कासहरं पित्तघ्नं ग्राहकं लघु ॥

कासमर्द्दनः । पुं । पटोले ॥

कासरः । पुं । महिषे ॥ के जले सरति सृगतौ । अच् ॥ यद्वा ॥ कु ईषत् सरति । स्थूलकायत्वात् । ईषदर्थे चेति कोः कादेशः ॥

कासहा । पुं । क्वाथविशेषे ॥ यथा । कण्टकारीकृतः क्वाथः सकृष्णः सर्व्वकासहेति ॥

कासारः । पुं । सरोवरे । सपद्म निष्पद्मो वा महाजलाशये ॥ कृत्रिमे पद्माकरे ॥ कासते । कासृ शब्दे । तुषारादयश्चेत्यारन् ॥ यद्वा ॥ कु ईषत् सारोऽस्य । ईषदर्थे चेति कोः कादेशः । अर्शआद्यच् ॥ यद्वा । केन जले

नसारः । अन्येषामपीति दीर्घः । आकु प्रश्लेषोवा ॥ क जलम्च्छति । ऋगतौ । कर्म्मण्यण् वा ॥

कासारम् । न । कसार इतिख्याते प काद्मविशेषे ॥ तत् प्रकारो यथा । घृतेतप्ते विनिः क्षिप्य कणिकां पाच येत्ततः । ततस्तत्रविनिः क्षिप्य ख ण्डंभागसमं पचेत् ॥ ततस्वाकृष्यत त् पात्रे क्षिप्ता सम्यक् सुचिक्कणे । च तुरस्त्रीकृतंह्येतत् भवेत् कासार संज्ञकम् ॥ कासारं रुचिदं श्रेष्ठंमाति स्त्रूचंनपिच्छिलम् । क्ष्वासकफपित्त घ्नं विवचौषविकारकम् ॥ प्रक्षिप्य माषशृङ्गाटकगोधूमां पृथक् पृथक् । शाल्यूकस्तचकर्त्तव्यं कासारं स्वरूस विधा ॥

कासारिः । पुं । कासमर्दे ॥ आलुके ॥

कासालुः । पुं । काकमाद्रेशप्रसिद्धे आ लुविशेषे । कासकन्दे ॥

कासीसम् । न । हीराकसी इतिगौड भाषा प्रसिद्धे उपधातु विशेषे । भस्म वत्मृत्तिकाकाकासीसमितिपरीचि ते धातुकासीसे । खेचरे । धातुशेख रे ॥ कासीसं धातुकासीसं पांशुका सीसमित्यपि । तदेवकिञ्चित्पीत न्तुपुष्पकासीसमुच्यते ॥ कासीस म ल मुष्णञ्च तिक्तञ्च तुवर तथा ।

वातश्लेष्महरं केश्यं नेत्र्य कण्डूविषप्र णुत । मूत्र कृच्छ्राश्मरीश्वित्र नाशनंप रिकीर्त्तितम् ॥

काहः । स्त्री । विकलवाचि ॥ अव्यक्ते ॥ वृद्धौ ॥ रुजि ॥ कसति । कसग तौ । खितकासिपद्यर्त्तेरिष्णूः ॥

काहूतरी । स्त्री । मत्स्याख्ये आयुधे ॥ ह्रस्वाकाहूः ॥ काहूगोणीभ्यांष्टरच् । ङीष् ॥

काहिका । स्त्री । काहलावाद्ये ॥

काहलः । पुं । कुक्कुटे ॥ शब्दमात्रे ॥ ए षमुक्तानाम् । मत्तमादौ ॥ बिडाले ॥ न । अव्यक्तवाक्ये ॥ त्रि । शुष्के ॥ भृशे ॥ खले ॥

काहला । स्त्री । वाद्यभाण्डविशेषे । काहली इति हिमगिरौप्रसिद्धा यां ध्वनिमालायाम् ॥ अप्सरसांप्रभे दे ॥

काहलापुष्पः । पुं । धुस्तूरे ॥ काहली वपुष्पाद्यन्न ॥

काहली । स्त्री । तरुण्याम् । दिक्कर्य्याम् ॥

काहारकः । पुं । कहार इति प्रसिद्धे शिविकावाहकजातिविशेषे ॥ यथा । तथा गारुडिका वीराः क्षुरकर्मोप जीविकाः । व्याधाः काहारकाः पुष्टाः कृष्णं संवाहयन्ति ये इति जैमिनि भारते आश्वमेधिके पर्व्वणि १० अध्या

य: ॥

किंवदन्ति: । स्त्री । जनश्रुतौ ॥ कोऽपि वाद: । किम्पूर्व्वाद्वदे: भुवोझिच् । बाहुलकाद्वदेरपि । ततोङीष्विकल्प: ॥

किंवदन्ती । स्त्री । जनश्रुत्याम् । सत्ये असत्येवा लोकवादे ॥ कोऽपिवाद: । किम्पूर्व्वाद्वदे: तृभूवहिवसीति बाहुलकाज् झच् । झोऽन्त: । गौ० ङीष् ॥

किंवा । अ । विकल्पे । अथवा ॥

किंशारु: । पुं । सस्यशूके । धान्याग्रभागे ॥ बाणे ॥ कङ्कपक्षिणि ॥ किञ्चित् कुत्सितंवा । शृणाति । शृहिंसायाम् । किम्शरयो: श्रिणा इतिजुण् ॥

किंशुक: । पुं । पलाशवृक्षे ॥ नन्दीवृक्षे ॥ किञ्चित् शुकइव । शुकतुण्डाभपुष्पत्वात् ॥

किंशुलुक: । पुं । पलाशवृक्षविशेषे ॥

किंसखा । पुं । कुत्सिते सख्यौ । दुर्म्मन्त्रिणि ॥ कुत्सित: सखा । किम: क्षेपइ समासान्तप्रतिषेध: ॥

किकि: । पुं । किकिदिवे । चाषे ॥ नारिकेले ॥

किकिदिव: । पुं । }
किकिदिवि: । पुं । } चाषखगे ॥

किकिदीव: । पुं । चाषविहगे ॥ नीलकण्ठे ॥

किकिदीवि: । पुं । सोनाचडा इतिगौड भाषाप्रसिद्धे स्वर्णचातके । चाषपतत्रिणि ॥ बाहुलकाद्ध्रस्वदीर्घयोर्विनिमय: ॥

किकीदिव: । पुं । किकिदिवौ ॥ किकिदीविकिकीदिवावितिद्विरूपकोषादकारान्तोपि ॥

किकीदिवि: । पुं । चाषे ॥ किकोतिदिव्यति वासते । दिवुक्रीडादौ । कृविघृष्विच्छविस्थवि किकीदिविरिति साधु: ॥

किकीदीव: । पुं । }
किकीदीवि: । पुं । } चाषपक्षिणि ॥

किखि: । पुं । वानरे । कपौ ॥ स्त्री । फेरौ । लघुशृगाले । लोमडी इति भाषा ॥

किङ्कर: । त्रि । दासे । सेवके ॥ विप्रस्यकिङ्करोभूपो वैश्यो भूपस्यभूमिप । सर्वेषांकिङ्करारा: शूद्रा ब्राह्मणस्यविशेषत: ॥ किञ्चित् कुत्सितंवाकरोति । दिवाविभेत्यत्रकिंयत्तद्बहुष्विष्यच ॥

किङ्करा । स्त्री । दास्याम् ॥ अजन्ताट् टाप् ॥

किङ्करी । स्त्री । दास्याम् ॥ किङ्करस्य ॥ स्त्री । पुंयोगादाख्यायामितिङीष् ॥

किङ्किणी । स्त्री । क्षुद्रघण्टिकायाम् । घाघर इति गौडभाषा प्रसिद्ध क्ष्वाभरण विशेषे । कर्धनी कोंधनी इति भाषा ॥ किञ्चित् किणाङ्क करोति । किणशब्दात् तत् करोतीति णयन्तात् अच । गौ० ङीष् ॥ विकङ्कतद्रुमे ॥

किङ्किणीका । स्त्री । क्षुद्रघण्टिकायाम् ॥ चक्रगहने । कणशब्दे । अस्मात् यङ्लुगन्तात् चङ्कणः किङ्कणाचेत ईकन् । धातोः किङ्कणादेशश्च ॥

किङ्किरः । पुं । कोकिले । भ्रमरे ॥ हये ॥ कामदेवे ॥ न । गजकुम्भे ॥

किङ्किरा । स्त्री । रक्ते । रुधिरे ॥

किङ्किरातः । पुं । अशोकद्रुमे ॥ कामदेवे ॥ रक्ताम्लाने ॥ शुके ॥ पिके ॥ पुष्पविशेषे ॥ हेमगौरे । पीताम्लाने ॥ अस्य गुणाः । किङ्किरातो हिमस्निग्धः कषायश्च वरेदसौ । कफपित्तपिपासास्त्रदाहशोषवमिक्रमीनिति ॥

किङ्किरालः । पुं । वर्वुरवृक्षे ॥

किङ्किरी । पुं । विकङ्कते । स्रुवावृक्षे । वुंइचि इतिगौडभाषा ॥

किञ्च । अ । आरम्भे ॥ साकल्ये ॥ सम्भावनायाम् ॥ किम् च चयेति विग्रहः ॥

किञ्चन । अ । अकात्स्न्यें । असाकल्ये । अल्पे ॥

किञ्चनः । पुं । हस्तिकर्णपलाशे ॥

किञ्चित् । अ । स्वल्पे । ईषत् । अनाक ॥ इदमव्ययानिर्देश्ये ॥ किञ्चिच्च अनयोः समाहारः ॥

किञ्चिलिकः । पुं । } किञ्चुलुके ॥
किञ्चुलिका । स्त्री । }

किञ्चुलुकः । पुं । केंचुआख्ये कीटविशेषे । गण्डूपदे ॥ किञ्चित्लुम्पति । कास्यनेकाजग्रहणं चलुम्पादावर्थमितिवार्त्तिकनिर्द्दिष्टञ्चलुम्पधातुः । अन्येभ्योपीति डः । टेरिति ऋकार मकारपकाराणां लोपः । ततः संज्ञायां कन् ॥

किञ्जम् । न । } किञ्जल्के ॥
किञ्जलः । पुं । }

किञ्जल्कः । पुं । केसरे । पुष्परेणौ ॥ किञ्जल्कः शीतलो रूक्षः कषायो ग्राहकोपि सः । कफपित्ततृषादाहरक्तार्शोविषशोथजित् ॥ पद्मकिञ्जल्क इतिशेषः ॥ किञ्चिज्जलति । जलअपवारणे । पाकुलकातकः ॥ न । नागकेशरपुष्पे ॥ पद्माभ्यन्तरस्थकेशाकारे वरवाटकवेष्टने केसर इतिख्याते । पीतपरागे ॥

किञ्जल्कविशेदः । पुं । केसरापगमे ॥

किटिः । पुं । पोषे । शूकरे ॥ केटति । । किटगतौ । इगुपधात्कित् ॥

किटिभः । पुं । केशकीटे । जूं लीख इति भाषा ॥ इतिहेमचन्द्रः ॥

किट्टम् । न । मले । तैजसधातुभाग से ॥ शिङ्घाणकादौ ॥ यथा । धाय मानस्य लोहस्य मलं मण्डूरमुच्यते । यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणमिति ॥ केटतिस्म । किट० । गत्यर्थेतिक्तः । आगमशास्त्रस्या नि त्यत्वादिट् ॥

किट्टवर्जितम् । न । शुक्रे ॥ इतिहेम चन्द्रः ॥

किट्टालः । पुं । ताम्रकलशे ॥ लोह- गूथे ॥

किणः । पुं । शुष्कव्रणे । मांसग्रन्थौ ॥ नि घर्षणजव्रणचिह्ने । घट्टा इति भा षा ॥ घुणे ॥

किणिः । स्त्री । अपामार्गे ॥

किणिही । स्त्री । इरमन्यर्याम् । अपा मार्गे ॥ किणिनो व्रणान् विहीते । ओहाङ्गतौ । आतोनुपेतिकः । गौरादित्वान्ङीष् ॥

किण्वः । पुं । न । सुराबीजे । कल्के ॥ न । पापे ॥ कणनम् । कण शब्दे । उल्वादयश्चेति साधुः । कर्णभिन्ना ॥ भवति वा । यथा मुखिकठीति कण्

। बाहुलकादिल्त्वम् ॥

कितवः । पुं । धूतकृति । अक्षदेविनि ॥ धूतसमाह्वयदेविनि ॥ मत्ते ॥ वञ्चके ॥ खले ॥ चोरनामगन्धद्र व्ये ॥ कितवाने । भावेक्तः । कितंवा यति कितेमवातिवा । ओवैशोष- ये वागन्धनेवा । आतोनुपेतिकः ॥ कनकाह्वये । धत्तूरे ॥ कितवात्स मन्यस्य प्रायकाः । मर्त्यवाचक् ॥ किता न् वञ्चतिवा । अन्येभ्योपीतिडः ॥

किमाटम् । न । इक्षस्यत्वचोभ्यन्तरेका ष्ठसंलग्नेवल्कलरूपे ॥ वेदेप्रसिद्धम् ॥

किन्तनुः । पुं । अष्टपादे । मकडामक डी इति भाषा

किन्तमाम् । अ । पृष्टेकतमे ॥ बहूने- षां मतिशयेन किमित्यर्थे अतिशा यनेतमप् । किमेत्तिङव्ययेघ्वा- मुः ॥

किन्तराम् । अ । पृष्टेकतरे ॥ द्वयमन योरतिशयेनकिम् । द्विवचनविभज्ये त्यादिनातरप् । किमेत्तिङव्यये- घ्वामुः ॥

किन्ता । स्त्री । कुत्सितत्वे ॥ कस्य केषां वा भावः । तल् ॥

किन्तु । अ । किम्पुनः । पूर्ववाक्यार्था पवादके । प्रागुक्तिविरुद्धार्थे ॥ यथा । भूयस्याभावे भवति मरणं किन्तुस

न्धादिनानाम् । इति प्राचीनाः ॥

किन्तुघ्नः । पुं । बवाद्येकादशकरणान्तर्गतचतुर्थकरणे ॥ तज्जातस्य फलम् । किन्तुघ्नजे नैव किञ्चिद्विशेषो धर्मे धर्मे तु चला मानवस्य । लोके चाहं सर्वदाप्नोतियुक्तः किन्तुघ्नाख्ये यस्य जन्मं जनिः स्यादिति कोष्ठीप्रदीपः ॥

किन्नी । पुं । } घोटके । अश्वे ॥ ना
किन्धी । पुं । } भावेतौ ॥

किन्नरः । पुं । किम्पुरुषे । मयौ । अश्वमुखदेवयोनिनरविग्रहे देवगायने ॥ किञ्चिन्नरः अश्वमुखत्वात् । कुत्सितो वा नरः किन्नरः । किंक्षेप इति समासः । कुत्साच कस्यचिन्नरमुखाश्वकायत्वात् कस्यचिदश्वमुखनरशरीरत्वात् ॥ अर्हदुपासकविशेषे इति हेमचन्द्रः ॥

किन्नरेशः । पुं । वैश्रवणे । कुबेरे ॥ किन्नराणामीशः ॥

किन्नरेश्वरः । पुं । कुबेरे । नरवाहने ॥

किन्नु । अ । प्रश्ने ॥ वितर्के ॥ स्थाने ॥

किम् । अ । कुत्सायाम् । गर्हणे ॥ वितर्के ॥ निषेधे ॥ प्रश्ने ॥ प्रकारे । कूयते असमंवा । कुशब्दे । बाहुलकात् डिम् । कायतेर्डिमिर्वा ॥ ईषदर्थे ॥ अतिशये ॥

क । त्रि । क्षेपे ॥ वितर्के ॥ जिज्ञासायाम् ॥ परिप्रश्ने ॥ कामम् कायतिवा । कै शब्दे । कायतेर्डिमिः ॥ स्त्री । का । न । किम् ॥

किमिच्छकः । पुं । मार्कण्डेयपुराणोक्तव्रतविशेषे ॥

किमु । अ । सम्भावनायाम् ॥ विमर्शे ॥ किमुच उच ॥

किमुत् । अ । किमुतार्थे ॥

किमुत । अ । प्रश्ने ॥ वितर्के ॥ विकल्पे अतिशये ॥ किञ्च तदुत च । समाहारोवा ॥

किमूत । अ । वितर्के ॥ किमूत उतश्च अनयोः समाहारः ॥

किम्पचः । त्रि । किम्पचाने ॥ किम्पचति । पचाद्यच् । किंक्षेप इतिसमासः ॥

किम्पचानः । त्रि । कृपणे ॥ किञ्चित् पचति । शौचादिकमानजितिस्त्री ॥ किमपचति । ताच्छील्येति चानश्यानच्चा । अनित्यमागमशासनमितिमनुक् । किंक्षेपइतिसमासः ॥

किम्पाकः । पुं । माकाल इतिगौडभाषाप्रसिद्धमहाकालफलतायाम् ॥ तत्फले ॥ त्रि । अज्ञे ॥ मातृभाषिते ॥

किम्पुरुषः । पुं । किन्नरे ॥ किञ्चित् कुत्सितो वा पुरुषः । किंक्षेपइतिसमा

सः। कुत्साचकिन्नर शब्देऽवलोकनीया ॥ लोकभेदे। जम्बूद्वीपस्थनववर्षान्तर्गते हिमाचलहेमकूटयोर्मध्यवर्त्तिनि वर्षे ॥

किम्पुरुषार्थता। स्त्री। कुत्सितपुरुषार्थत्वे ॥ प्रपञ्चस्य पुरुषार्थत्वेन सत्यत्वप्रतिपादने भयमित्रत्यभावात् कुत्सितत्वम् ॥

किम्पुरुषेशः। पुं।
किम्पुरुषेश्वरः। पुं। } कुबेरे ॥ किम्पुरुषाणामीशः ईश्वरोवा ॥

किम्पूरुषः। पुं। किन्नरे ॥ न। वर्षभेदे ॥

किम्प्रभुः। पुं। कुत्सितेप्रभौ। आप्तजनाहिताश्रवणकारिणि ॥ कुत्सितः प्रभुः। किंक्षेपइति समासः ॥

किम्भरा। स्त्री। नलीनामगन्धद्रव्ये ॥

कियान्। त्रि। किम्परिमाणविशिष्टे ॥ किम्परिमाणमस्य। किमिदंभ्यांवोघइति वतुप्। वस्यघः। इदङ्किमोरीश्की। यस्येतिलोपः ॥ कासङ्ख्या परिमाणमस्यवा। किमः सङ्ख्यापरिमाणे डतिचेतिवतुप् वा। वस्य घः ॥ स्त्री। कियती ॥ न। कियत् ॥

कियदेतिका। स्त्री। उत्साहे। उद्योगे ॥

कियाहः। पुं। रक्तवर्णोश्वे ॥ इतिहेमचन्द्रः ॥

किरः। पुं। वराहे। शूकरे ॥ किरति। कृविक्षेपे। इगुपधज्ञाप्रीकिरःकः ॥

किरकः। पुं। लेखके ॥ बालशूकरे ॥

किरणः। पुं। सूर्य्ये ॥ अर्केन्दुदीधितौ ॥ कीर्य्यते। कृविक्षेपे। कृपृवृजिमन्दिनिधाञः क्युरितिक्युः ॥

किरणमाली। पुं। सूर्य्ये ॥ किरणानां माला सा अस्ति अस्य। व्री० इनिः ॥

किराटिका। स्त्री। किराञ्चो इतिख्याते सारिकाखगे ॥

किरातः। पुं। अरण्यचरेम्लेच्छजातिप्रभेदे। किरातदेशोद्भवे पूर्वक्षत्रिये पश्चाद्विहितक्रियालोपाद्ब्राह्मणादर्शनेनच शूद्रतामापन्नेदस्युपदवाच्ये ॥ देशविशेषे ॥ तप्तकुण्डंसमारभ्य रामक्षेत्रान्तकं शिवे। किरातदेशो देवेशि विन्ध्यशैलेऽवतिष्ठति ॥ घोटकरक्षके ॥ अल्पतनौ ॥ भूनिम्बे ॥ यथा। किरातः सारकोरूक्षः शीतलस्तिक्तकोलघुः। सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ॥ कासशोषतृषाकुष्ठज्वरव्रणकृमिप्रणुदिति ॥ किरति। कृवि०। इगुपधेतिकः। अतति। अतसा०। अच। किरस्सावतस्य ॥

किरातकः। पुं। भूनिम्बे ॥ किरातको

ऽन्योनैपाकः सोऽर्हतिकोऽम्बराभ्तकः ॥ किरातएव । स्वार्थेक ॥

किराततिक्तः । पुं । चिरायता इतिप्र सिद्धे वृक्षे । भूनिम्बे । अनार्यतिक्ते ॥ किरातदेशे अस्ति जन्मस्थानम स्य । अर्शआद्यच् । किरातश्चासौति क्तश्च ॥

किराताशी । पुं । गरुडे ॥

किरातिः । स्त्री । गङ्गायाम् ॥ इतिज टाधरः ॥

किराततिनी । स्त्री । जटामांस्याम् ॥

किराती । स्त्री । दुर्गायाम् ॥ गङ्गाया म् ॥ कुट्टन्याम् ॥ चामरधारि-ण्याम् ॥

किरिः । पुं । भूदारे । शूकरे ॥ किर ति । कृविक्षेपे । कृगृशृपृकुटिभिदि च्छिदिभ्यश्चेति इप्रत्ययः ॥ इकृकृ ष्यादिभ्यः इति भावे इग्वा ॥

किरिटि । न । हिन्तालफले ॥

किरीटः । पुं । न । मुकुटे ॥ किरति कीर्यतेऽनेनवा । कृ० । कृतृकृ षिभ्यः कीटन् । शिरोवेष्टने ॥

किरीटी । पुं । अर्जुनपाण्डवे ॥ त्रि । किरीटवति ॥ किरीटोऽस्यास्ति । इ निः ॥

किरीटमाली । पुं । अर्जुने ॥

किर्म्मी । स्त्री । पलाशे । मालायाम् ॥ हेमपुत्त्याम् । स्वर्णपुत्तलिकायाम् ॥ लोहपुत्तलिकायाम् ॥

किर्म्मीरः । पुं । नागरङ्गवृक्षे ॥ राक्षस विशेषे ॥ कर्बुरे ॥ त्रि । कर्बुरवर्णव ति ॥ कीर्यते । कृवि० । बाहुल काल कृगृशृपृकटिपटिशौटिभ्यईरन्नि ति ईरन् मुडागमश्च ॥

किर्म्मीरजित् । पुं । भीमसेने ॥

किर्म्मीरत्वक् । स्त्री । नारङ्गवृक्षे ॥

किर्म्मीरभित् । पुं । भीमसेने ॥ कि र्म्मीरम् भिनत्ति । भिदिर० । कि प ॥

किर्म्मीरसूदनः । पुं । भीमसेने ॥ कि र्मीरं सूदयति सूदितवान् वा । सूदचरणे । नन्द्यादित्वात् ल्युः ॥

किल । अ । वार्त्तायाम् ॥ सम्भाव्ये ॥ अनुनयार्थे ॥ निश्चये ॥ प्रसिद्धाव माद्योतके ॥ सत्ये ॥ हेतौ ॥ अरुचौ ॥ अलीके ॥ व्यक्तरणे ॥ किलति । किलश्वैत्ये । इगुपधेत्किः ॥

किलकिञ्चितम् । न । स्त्रीणांविला-सविशेषे । इष्टजनदर्शनस्पर्शनात् शुष्करुदितहसितत्रसितक्रोधश्रमा-भिलापानां सङ्करकारणरूपे भावे । शृङ्गारभावजायांक्रियायाम् ॥ तल्लक्ष णं यथा । हर्षादुदितगीतादिभ्यामि श्रंकिलकिञ्चितमिति ॥ क्रोधाश्रु-

र्षभीत्यादेः सङ्करः किलकिञ्चित-मितिच ॥ अपिच । गर्वाभिलाषरुदितस्मितासूयाभयक्रुधाम् । सङ्करीकरणं यत् स्यादुच्यते किलकिञ्चितमित्यलङ्कारकौस्तुभः ॥

किलकिला । स्त्री । हर्षध्वने । सिंहनादे ॥ वानराणां शब्दानुकरणे ॥

किलाटः । पुं । क्षीरविकृतौ ॥ नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः ॥ दधिकूर्च्चिकातक्रकूर्च्चिकयोः पिण्डे ॥

किलाटी । पुं । वंशे । बाँस इति भाषा ॥ इति शब्दमाला ॥

किलाटी । स्त्री । क्षीरविकृतौ । कूर्च्चिकायाम् ॥

किलासम् । न । सेहुवाँ इति ख्याते सिध्मरोगे । त्वक्पुष्पे ॥ किलति । किल श्वैत्यक्रीडनयोः । इगुपधेति कः । अस्यति । असु क्षे° । अच् । किलञ्च तदसञ्च ॥ यद्वा । केलनम् । भि° अङ् । किलमस्यति । अण् । किलेन श्वैत्येन असति वा । अस दीप्तौ । अच् ॥

किलासघ्नः । पुं । काँकरोल इति गौड भाषा प्रसिद्धे वृक्षविशेषे । कर्कोटके । तिक्तपत्रे । सुगन्धके ॥

किलासी । त्रि । सिध्मले । किलासरोगवति ॥ किलासमस्यास्ति । इन्द्रोपतापेति इनि प्रत्ययः ॥

किलि । अ । कण्ठकूजिते ॥

किलिकिला । स्त्री । सिंहनादे ॥ जितशात्रवदर्पस्य प्रतिज्ञापूरणीकृतः । वीरस्य गर्जितं सिंहनादः किलि किलात्मक इति विश्वः ॥

किलिकिलितम् । न । शौर्यगर्ज्जिते ॥

किलिञ्जः । पुं । किलिञ्जके । कटे ॥ किल्यतेऽनेन । किल° । इगुपधादिति इन् । वेत्रवीरणादेः किलेर्गातः । जमी° । पञ्चम्यामजाता विति डः । पृ° ॥ सूक्ष्मदारुणि ॥

किलिञ्जकः । पुं । वीरणादिकटे ॥ किलिञ्जात् स्वार्थे । कन् ॥

किलिमम् । न । देवदारुणि ॥ इति राजनिर्घण्टः शब्दरत्नावली च ॥ इकिलिमम् किलिमम् । भीमसेनो भीम इतिवत् ॥

किल्बिषम् । न । अपराधे ॥ पापे ॥ रोगे ॥ धर्माधर्मफलभूते अनिष्टे संसारे ॥ पापवत् पुण्यस्याप्य निष्टफलत्वेन किल्बिषत्वमेव । स्रोष्ठाम ध्यमदः ॥ केलनम् । किल्यते वा । किल श्वैत्ये । किलेर्बुक्चेतिटिषच् प्रत्ययः ॥

किल्वी । पुं । घोटके ॥ किलीतिपाठा

णरम् ॥

किशल: । पुं । न । पल्लवे ॥

किशलय: । पुं । न । पल्लवे ॥ किञ्चित् शलति । शलचलने । वा० कयन् । पृ० ॥

किशोर: । पुं । अश्वशिशौ ॥ तैलपर्णौषधौ ॥ सूर्ये ॥ तरुणावस्थे । दशवर्षोर्द्ध्वमापञ्चदशवर्षके ॥ यथा । किञ्चिच्छूर: किशोर:स्यात्ततो विंशमात् परम् । शूरस्त्वं दृश्यते किञ्चिदनुवृद्धं दिने दिने इति ॥ त्रि । कैशोरावस्थायुक्ते ॥ कशति । कशशब्दे किञ्चित् शवतिवा शुगतौ अवगतौवा किञ्चित् शृणातिवा । शृ हिंसायाम् । किशोरादयश्चेति साधु: ॥

किशोरी । स्त्री । किशोरावस्थायुक्तायाम् ॥ तरुण्याम् ॥ किशोरात् वयसिप्रथम इतिङीप् ॥

किष्कन्द: । पुं । ओड्रदेशस्थशैलविशेषे । स्त्री । तत्रस्थगुहायाम् ॥

किष्किन्धा । स्त्री । गन्धमादनगुहायाम् ॥ पुरीविशेषे ॥ सा पूर्वं वालिवानरस्य राजधान्यासीत् । श्रीरामो वालिनं हत्वा तां सुग्रीवायदत्तवान् ॥ किष्किन्धाति । डुधाञ्० । धात इति क: । पारस्करादित्वात् पूर्वस्य किमो मलोप: । सुट् षत्वञ्च निपात्यते ॥

किष्किन्धाधिप: । पुं । वालिवानरे ॥

किष्कु: । पुं । स्त्री । वितस्तौ । । द्वादशाङ्गुलपरिमाणे ॥ प्रकोष्ठे । कफोणेरधोमणिबन्धपर्यन्ते ॥ करे । हस्ते ॥ चतुर्विंशत्यङ्गुलेमाने ॥ त्रि । कुत्सिते ॥ कायतेऽनेन । कैशब्दे । मृगय्वादित्वात् कु: । पारस्करादित्वात् साधु: ॥

किष्कुपर्वा । पुं । इक्षौ ॥ वंशे ॥ पोटगले ॥

किसरम् । न । सुगन्धिद्रव्यविशेषे ॥

किसरिक: । त्रि । वणिग्विशेषे । किसरपण्याजि ॥ किसरं पण्यमस्य । किसरादिभ्य:ष्ठन् । षित्वात् ङीष् । किसरिकी ॥

किसलय: । पुं । न । पल्लवे । नवीनपत्रे ॥ नवपत्रादियुक्तशाखाग्रपर्वणि नवपत्रस्तवके ॥ किञ्चित् सलति । षलगतौ । वा० कयन् । पृ० ॥

की । अ । कुत्सायाम् ॥

कीकट: । पुं । अश्वे । घोटके ॥ कीकटा: । गयाप्रदेशे ॥ यथा । चरणाद्रिं समारभ्य गृध्रकूटान्तकं शिवे । तावत्कीकटदेश:स्यात् तदन्तर्मागधोभवेत् ॥ पश्यमगधम् । विहारनाम्ना प्रसिद्धे देशे इति केचित् ॥ त्रि । कृपणे ॥ निर्धने । नि:स्वे ॥

कीकशः । पुं । चण्डाले ॥ कीं इति कशति कशशब्दे ॥ पचाद्यच् ॥

कीकसः । पुं । कृमिजातौ ॥ न । अस्थिनि ॥ त्रि । कर्कशे ॥ कीतिकसति कसगतौ ॥ पचाद्यच् ।

कीकसास्यः । पुं । पक्षिणि ॥ इतिशारावली ॥

कीचकः । पुं । दैत्यविशेषे ॥ राक्षसविशेषे ॥ द्रुभेदे ॥ नले ॥ केकयनृपात्मजे । विराटराजश्याले ॥ विपुलान्तरालगर्भे वेणुजातौ ॥ अनिलयोगात् शब्दायमानवंशे ॥ चीकति शब्दायते । चीकमर्षणे । चु० । चीकयते रायन्तविपर्ययश्चेति वुन् ॥ यद्वा । कीत्यव्यक्तं शब्दं चकति । चकतृप्त्यादौ । अच् ॥ कीचेत्यव्यक्तं कायति वा । । मू० कः । अन्येभ्योपीति डोवा ॥

कीचकजित् । पुं । भीमसेने ॥ कीचकमजैषीत् । जी० । क्विप् । तुक् ॥

कीचकभित् । पुं । वृकोदरे । भीमसेने ॥ कीचकम् भिनत्ति । भिदिर्० । सत्सूद्विषेति क्विप । तुक् ॥

कीटः । पुं । कृमिभ्यः किञ्चित्स्थूले क्षुद्रजन्तुमात्रे ॥ कीटति । कीट० । अच् ॥

कीटकः । पुं । कृमिजातौ ॥ मागधजातौ ॥ त्रि । निष्ठुरे ॥ स्वा० कः कन्वा ॥

कीटघ्नः । पुं । गन्धके ॥ कीटंहन्ति । हन् ० । अमनुष्यकर्तृकेचेतिटक् ॥

कीटजा । स्त्री । जतुनि । लाक्षायाम् ॥ कीटेभ्योजाता । जनी० । डः ॥

कीटपादिका । स्त्री । हंसपदीवृक्षे ॥

कीटमणिः । पुं । खद्योते ॥ कीटेषु मणिरिव ॥

कीटमाता । स्त्री । हंसपदीवृक्षे ॥

कीटमारी । स्त्री । हंसपदीवृक्षे ॥

कीटमेषः । पुं । स्वर्गच्छिदा इतिप्रसिद्धे कीटे । अयंनदीतीरेसिकतामध्येतिष्ठति ॥

कीटसंज्ञकः । पुं । राशिविशेषस्य संज्ञायाम् । मकरान्ताद्दुँ कर्कटमीन वृश्चिकाश्च कीटाख्याः ॥

कीडेरः । पुं । तण्डुलीयशाके ॥

कीदृक् । त्रि । } किम्प्रकारे ॥
कीदृशः । त्रि । }

कीनाशः । पुं । यमे । कृतान्ते ॥ यथा । किङ्कीनाश पाशधर गर्जसि मामुपगम्यहासभर मर्जसि । हरिचरणं शरणं नहि पश्यसि यन्मामस्मरणादपिनश्यसीति ॥ वानरविशेषे ॥ त्रि । कर्षके ॥ क्षुद्रे ॥ पशुघातिनि ॥ कीत्यव्ययक् कुत्सायाम् । की कुत्सितं नाशयति । पचाद्यच् ॥ यद्वा । क्लिश्नाति क्लिश्यते वा । क्लिशू विबाधने क्लि

अवधेवा। क्लिशेरीश्चोपधायाः कन् लोपश्चलोमाम् चेतिम् उपधाया ईत्वम् चलोपोनामागमश्च ॥

कीर:। पुं। शुके। मेधाविनि। फलाशने॥ कीराः। पुंभूम्नि। काश्मीरदेशे॥ न। मांसे॥ कीति ईरयति। ईर०। णिजन्तः। अच्॥

कीरकः। पुं। वृक्षविशेषे॥ चपचके॥ प्रापणे॥ शुकशावके॥

कीरवर्णकम्। न। स्थौणेयकनामनि सुगन्धिद्रव्ये॥

कीरेष्टः। पुं। अक्षोटवृक्षे॥ आम्रद्रुमे॥ अजमधूकवृक्षे॥ कीराणामिष्टः॥

कीर्णः। त्रि। दत्ते॥ आच्छन्ने॥ विक्षिप्ते॥ हते। हिंसिते॥ कीर्यतेस्म। कॄ०। क्तः। नत्वणत्वे॥

कीर्त्तनम्। न। उक्तौ। कथने॥ कालापास्तुयुचमपोच्छन्तीति उतियूतीत्यत्रप्रसादकारः॥

कीर्त्तना। स्त्री। यशसि॥

कीर्त्तयन्। त्रि। कथयति॥ हलेशदष्टः शत्रादेशः॥

कीर्त्तिः। स्त्री। प्रसादे॥ विस्तारे॥ कर्दमे॥ शब्दे॥ दीप्तौ॥ मातृकाविशेषे॥ यशसि। समज्ञायाम्॥ धार्मिकत्वनिमित्तायां प्रशस्तत्वेन नामादिग्देशीयलोकज्ञानविषयताद्रूपायांख्यातौ॥ पराक्रमख्यातौ। सुतख्यातौ॥ यस्य कीर्त्तिर्हता लोके धिक् तस्यैव कुजीवितम्। दानादिप्रभवा कीर्त्तिः शौर्यादिप्रभवं यशः॥ कीर्त्तिं स्वर्गफलामाहुरासंसारं विपश्चितः। अकीर्त्तिन्तु निरालोकनरकोद्देशदूतिकाम्॥ तस्मात्कीर्त्तिमुपादद्यादकीर्त्तिञ्च व्यपोहयेत॥ सुकर्मपत्नी संसिद्धा कीर्त्तिर्धन्यैश्चपूजिता। ययाविना जगत्सर्वंयशोहीनंमृतंयथा॥ कीर्त्त्यते। कृतसंशब्दने। ऊतियूतीतिनिपातनात् साधुः। कीर्त्तनम्। कीर्त्तिः सेव्यः। कृपिशिकचीत्यादिनेतिः॥

कीर्त्तितः। त्रि। कथिते॥

कीर्त्तिभाक्। पुं। द्रोणाचार्ये॥ त्रि। कीर्त्तियुक्ते॥

कीर्त्तिमान्। पुं। वसुदेवस्य ज्येष्ठपुत्रे॥ त्रि। कीर्त्तिसंयुक्ते॥

कीर्त्तिशेषः। पुं। मरणे॥ यशसोऽवशेषः॥

कीलः। पुं। स्त्री। अग्निशिखायाम्। ज्वालायाम्॥ शङ्कौ॥ शस्त्रे॥ कफोणौ॥ कफोणिकाघाते॥ स्तम्भे॥ लेशे॥ कीलति बध्नाति। कील बन्धने। इगुपधेतिकः॥ कील्यते

अज्ञानेन वा । कर्मणिघञ् पुंसीति घोषा ॥

कीलकः । पुं । शिवके । गवांस्तम्भे । यत्रबद्धागौर्दुह्यते तस्मिन् । खूंटा इति भाषा ॥ गवां गात्रकण्डूयनार्थं गोष्ठे निखातस्तम्भे ॥ कीलशब्दार्थे ॥ वत्सरविशेषे । यथा । आयन्ते सर्वसस्यानि सुभिक्षं निरुपद्रवम् । सौम्यदृष्टिर्भवेद्राजा कीलकेच शुभं वदेदिति ॥ कील्यते । कील० । ह लश्चेति घञ् । स्वा० कन् ॥

कीलसंस्पर्शः । पुं । गाव इति गौड भाषा प्रसिद्धे वृक्षविशेषे ॥

कीला । स्त्री । पुं । कीले ॥ स्त्री । रतहतौ । रतौ प्रतिहतिविशेषे ॥ यदाह वात्स्यायनः । कीला उरसि कर्त्तरी शिरसि विद्धाकपोलयोरिति ॥ कीलति । कील० । इगुपधेतिकः । टाप् ॥

कीलालम् । न । रुधिरे ॥ जले ॥ अमृते ॥ मधुनि ॥ कीलां वह्निज्वाला मलति वारयति । अलभूषणादौ । कर्मण्यण् ॥ शौर्वाग्नेः कीलां लाति वा । कीलेन प्रतिबन्धेन अल्यते वार्यते । अल० । घञ् । कीलम्प्रतिबन्धम् अलति वा । कर्मण्यण् ॥ पुं । पशौ ॥ कीलसंबन्धनम् असंयोग्यमस्येति ॥

कीलालधिः । पुं । समुद्रे ॥ कीलाला निधीयन्तेऽस्मिन् । डुधाञ्० । अधिकरणेकिः ॥

कीलालपः । पुं । राक्षसे ॥ कीलालं पिबति । पा० । आतोऽनुपसर्गे इति कः ॥

कीलितः । त्रि । बद्धे ॥ निखातकीले ॥ कील्यतेस्म । कील० । क्तः ॥

कीशः । पुं । कपौ । वानरे ॥ सूर्ये ॥ पक्षिणि ॥ त्रि । दिगम्बरे । नग्ने ॥ की इति शब्दमीष्टे । ईश० । मू० कः ॥ यद्वा । कस्य वायो रपत्यम् । अतइञ् । किः हनूमान् ईशो यस्यसः ॥

कीशपर्णः । पुं । अपामार्गे ॥

कीशपर्णी । स्त्री । अपामार्गे ॥ कपिलोमतुल्यानि लोमशानि पर्णान्यस्याः । पाककर्णेतिङीष् ॥

कीशफलम् । न । कक्कोले । गन्धद्रव्यविशेषे ॥

कु । अ । पापे ॥ कुत्सायाम् ॥ ईषदर्थे ॥ निवारणे ॥ कवते । कूयते वा । कुङ् शब्दे । मित० डुः ॥

कुः । स्त्री । अवन्यायाम् । धरायाम् । भूमौ ॥ प्रथमाङ्के १ ॥ कवते । कुङ्० । मित० डुः ॥

कुकः । त्रि । समर्थे ॥ कोकते आदत्ते

। कुक० । इगुपधेतिकः ॥

कुकभम् । न । मद्ये ॥ इति शब्दचन्द्रिका ॥

कुकरः । त्रि । रोगकुणितकरे । कुणौ ॥

कुकीलः । पुं । पर्वते । शिलोच्चये ॥

कुकुटः । पुं । स्वस्तिके । सितावरे । सुनिषण्णशाके ॥

कुकुदः । पुं । कूकुदे । सत्कृत्यकन्यादातरि ॥

कुकुन्दरः । पुं । कुक्कुरद्रुमे ॥ न । कूपके । नितम्बस्थकूपकद्वये । स्त्रियाः पृष्ठवंशादधोगर्त्ते ॥ कुम्भूमिं दरयति । दृ भये । णयन्तः । कर्मण्यण् । खिलोपश्च । निपातनादृद्धिः । तत्पुरुषे कृतीति बाहुलकादलुक् । कुत्सितं कुन्दरम् ईषत्कुन्दरमथवा इति वा ॥ यद्वा । स्कुन्द्यते कामिना । स्कुदि आप्रवणे । मद्गुरादयश्चेति साधु ॥

कुकुभा । स्त्री । रागिणीविशेषे ॥

कुकुरः । पुं । यदुवंशीयान्धकराजस्य तनये ॥ कुक्कुरे ॥ न । ग्रन्थिपर्णीवृक्षे ॥ कोकते । कुक आदाने । कोकतेर्वा कुगिच्चुरच् ॥

कुकुराः । पुंभूम्नि । देशविशेषे । यदुषु । दाशार्हेषु । सात्त्वतेषु ॥ नित्यं बहुवचनान्तः ॥

कुकूटी । पुं । शाल्मलीपादपे ॥

कुकूलः । पुं । तुषानले ॥ शिरीषादपि मृद्वङ्गी केयमायतलोचना । अयं क्व च कुकूलाग्निकर्कशो मदनानलः ॥ न । शङ्कुभिः सङ्कीर्णे श्वभ्रे ॥ तनुत्रे । दंशने ॥ कोर्भूमेः कूलम् । कुत्सितं वा कूलम् ॥ यद्वा । कवते । कुङ् शब्दे । पिञ्जादित्वादूलच् । धातोः कुगागमः ॥

कुकोलम् । न । कोलिवृक्षे ॥

कुक्कुटः । पुं । कालज्ञे । ताम्रचूडे । चरणायुधे । कुक्कुड इति भाषा ॥ अस्य मांसगुणा यथा । कुक्कुटो बृंहणः स्निग्धो वीर्योष्णोऽनिलहृद्गुरुः । चक्षुष्यः शुक्रकफकृद्बल्यो वृष्यः कषायकः इति ॥ कुक्कुटलक्षणं यथा । कुक्कुटस्त्वृजुतनूरुहाङ्गुलिस्ताम्रवक्त्रनखचूलिकः सितः । रौति सुस्वरमुषात्यये च यो वृद्धिदः स नृपराष्ट्रवाजिनाम् ॥ यवग्रीवो यो वा बदरसदृशो वापि विहगो बृहन्मूर्द्धा वर्णैर्भवति बहुभिर्यश्च रुचिरः । स शस्तः सङ्ग्रामे मधुमधुपवर्णश्च जयकृन्न शस्तो योऽतोऽन्यः कृशतररवः खञ्जचरणः ॥ इति वाराहीसंहिता ॥ निषादपुत्रे ॥ शूद्रपुत्रे ॥ तृणोल्कायाम् ॥ कुक्कुभपक्षिणि ॥ व

शिखके । स्फुलिङ्गे ॥ वनकुक्कुटे ॥ यथा । सुरासमण्डपानाय भोजने चरणायुधाः । तित्तिराविष्किराः पथ्याः कुक्कुटाविषमज्वरे इत्यग्निवेशः ॥ अत्र चरणायुधो गृहकुक्कुटः । कुक्कुटो वनकुक्कुट इति व्याख्यानात् ॥ कोकनम् । कुकआ० । सं० क्विप् । कुटति । कुटकौ० । इगुपधेति कः । कुक्कुटः । कर्त्तृकरणयोरिति समासः ॥ कुत्सितः कुटः कोः पृथिव्याः कुटो वा । पृ० ॥

कुक्कटमण्डपः । पुं । काश्यां प्रसिद्धे मुक्तिमण्डपे ॥

कुक्कुटकः । पुं । कुक्कटार्थे ॥ शूद्राज्जातो निषाद्यान्तु स वै कुक्कुटकः स्मृतः । इति मनुः ॥

कुक्कुटमस्तकम् । न । चव्ये । चैं इ इति गौडभाषा ॥

कुक्कटव्रतम् । न । सन्तानार्थं स्त्रीकर्त्तव्ये व्रतविशेषे । ललितासप्तमीव्रते ॥ भाद्रेमासि सिते पक्षे सप्तम्यां नियमेन या । स्नात्वा शिवं लेखयित्वा मण्डलेषु सहाम्बिकम् । पूजयेच्च तदा तस्याः दुष्प्रापं नैव विद्यते ॥

कुक्कटशिखः । पुं । कुसुम्भवृक्षे ॥

कुक्कटाभः । पुं । } कुक्कुटतुल्यवर्णसर्पविशेषे ॥
कुक्कुटाहिः । पुं । }

कुक्कुटिः । स्त्री । दम्भचर्य्यायाम् ॥

कुक्कुटी । स्त्री । अनृतचर्यायाम् ॥ ज्येष्ठ्याम् । छिपकली इति भाषा ॥ शाल्मलीवृक्षे ॥ कुक्कुटयोषिति ॥ अश्वाल० । कुक्कुटी च मृदुवाक्यभाषिणी स्निग्धमूर्त्तिं रुचिराननेक्षणा । सा ददाति सुचिरं महीक्षितां श्रीयशोविजयवीर्यसम्पदः ॥ जातेरस्त्रीविषयादिति ङीष् ॥

कुक्कुटीव्रतम् । न । भाद्रशुक्लासप्तम्यां कर्त्तव्ये नियमविशेषे । ललितासप्तम्याम् ॥

कुक्कुभः । पुं । पातकुका इति गौडभाषाप्रसिद्धे पक्षिणि ॥ वनकुक्कुटे ॥ कुत्सितमव्यक्तं शब्दं कौति । बाहुलकात् भक् ॥ कुकुशब्दं भाषते वा । भाषव्य० । अन्येष्वपीति डः ॥

कुक्कुरः । पुं । कूकर इतिभाषाप्रसिद्धे कौलेयके । सारमेये ॥ कोकते । कुक आदाने । क्विप् । कुरति । कुर शब्दे । इगुपधेति कः । कुक् चासौ कुरश्च ॥ न । ग्रन्थिपर्णे । कुकुरौंदा इति ख्यातौषधौ ॥ कुक्कुरोऽस्यास्ति । कुक्कुरशब्दस्तद्गन्धे लाक्षणिकः । अर्शआद्यच् । यथा । कोकते । कुक० । कोकतेर्वा कुगिच्छुरच् । कुगागमश्च ॥

कुक्कुरद्रुः । पुं । मृदुच्छदे । हृष्यापचे

। कुकुरमुत्ता कुकुरौंदा इतिच भाषा ॥ कुक्कुरद्रुः कटुस्तिक्तो ज्वररक्तकफापहः । तन्मूलमार्द्रं निःक्षिप्तं वदने मुखशोषहृत् ॥

कुक्कुरी । स्त्री । शुन्याम् । सारमेय्याम् । कूकरी कुत्ती इतिच भाषा ॥ जातेरिति ङीष् ॥

कुक्कुवाक् । पुं । सारङ्गमृगे ॥

कुक्षः । पुं । कुक्षौ । जठरे ॥ गर्भे ॥ कुष्णाति । कुषनिष्कर्षे । उन्दिगुधिकुषिभ्यश्चेति सः कित् ॥

कुक्षिः । पुं । उदरे ॥ कुष्यते निष्कास्यते मलोऽस्मात् । कुष० । प्लुषिकुषिशुषिभ्यः क्सिः ॥ केतुमालवर्षस्थ देशविशेषे ॥ समुद्रमध्यप्रदेशे ॥ कुक्षिपार्श्वोदरकटीपृष्ठत्वक् पर्वभेदनमित्यत्र कुक्षिशब्द उदरस्य वामदक्षिणभागद्वयवाचीति भावप्रकाशः । कूख इतिभाषा ॥

कुक्षिम्भरिः । त्रि । आत्मम्भरौ । स्वोदरमात्रपूरके ॥ कुक्षिं बिभर्त्ति इति विग्रहे कुक्षेर्मुमागमो भृञ इन्प्रत्ययश्च निपातसिद्धः ॥

कुक्षिरन्ध्रः । पुं । नले ॥

कुङ्कुमम् । न । कुमकुम् केसर इति च नाम्ना विख्याते गन्धद्रव्ये । काश्मीरजन्मनि ॥ काश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेत्तिलम् । सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम् ॥ वाह्लीकदेशसंजातं कुङ्कुमं पाण्डुरं भवेत् । केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेशरम् ॥ कुङ्कुमं पारसीके यन्मधुगन्धि तदीरितम् । ईषत्पाण्डुरवर्णं तदधमं स्थूलकेशरम् ॥ कुङ्कुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित् । तिक्तं वमिहरं वर्ण्यं व्यङ्गदोषत्रयापहम् ॥ कुनकुम् इतिशब्दोऽस्ति वाचकत्वेनास्य । अर्शआद्यच् ॥ यद्वा । कुक्यते । कुक० । वा० उमक्प्रत्ययः । आच्छीनद्योर्नुमिति योगविभागान्नुम् ॥

कुङ्कुमाद्रिः । पुं । पर्वतविशेषे ॥

कुङ्गनी । स्त्री । महाज्योतिष्मत्याम् ॥

कुचः । पुं । स्तने ॥ कुचति । कुच सङ्कोचे । इगुपधेति कः ॥

कुचण्डिका । स्त्री । मूर्वालतायाम् ॥

कुचण्डी । स्त्री । मूर्वायाम् ॥

कुचन्दनम् । न । रक्तचन्दने ॥ बकम् इति भाषाप्रसिद्धे पत्राङ्गे ॥ द्रुमविशेषे ॥ निर्गन्धत्वात् कुत्सितं चन्दनम् । कोश्चन्दनमिव वा । कुत्सितान्यचन्दनान्यस्मादा ॥

कुचफलः । पुं । दाडिमद्रुमे ॥

कुचरः । त्रि । कुवादे । परदोषकथन

शोले ॥ कुत्सितं चरति । पचाद्यच् ॥

कुचाग्रम् । न । चूचुके । स्तनाग्रभागे ॥ कुचस्य अग्रम् ॥

कुचाङ्केरी । स्त्री । चुक्रिकायाम् । चूकापाक इति भाषा ॥

कुचिकः । पुं । } कुंचिया इति गौ
कुचिका । स्त्री । } डभाषा प्रसिद्धे- मत्स्ये ॥

कुचितः । त्रि । परिमिते ॥ कुचति । कुचसङ्कोचे । इगुपधज्ञाप्रीकिरः कः इति कः । भावे । कर्तरिक्तः इति वा ॥ कुचितं । सौ । परिम्यां विषाः । कुचिति किं तच् ॥

कुचेलः । त्रि । कुवाससि ॥ कुत्सितं चेलमस्य ॥

कुचेला । स्त्री विद्धकर्ण्याम् ॥

कुचेली । स्त्री । अम्बष्ठायाम् । आकनादि इति गौडभाषा ॥

कुच्छम् । न । कुमुदे ॥ इतिशब्दचन्द्रिका ॥

कुजः । पुं । आरे । भौमग्रहे ॥ नरकासुरे ॥ द्रुमे ॥ कोः पृथिव्याः जातः । पञ्चम्यामितिडः ॥

कुजम्भलः । त्रि । सन्धिचौरे ॥ इति- हारावली ॥

कुजम्भिलः । त्रि । कुजम्भले ॥ इतिशब्दरत्नावली ॥

कुजा । स्त्री । कात्यायन्यादेव्याम् ॥ सीतादेव्याम् ॥

कुजाष्टमः । पुं । दोषविशेषे ॥ सर्वान् गुणान्निहन्त्याशु विवाहाष्टमः कुजः । अस्यापवादः । अजगे नोचगे भौमे शत्रुक्षेत्रगतेपि वा । कुजाष्टमोद्भवो दोषोन किञ्चिदपिविद्यतेइति ॥

कुज्जिमः । पुं । मत्स्यविशेषे ॥

कुज्झटिः । स्त्री । धूममहिष्याम् । कुहेलिकायाम् ॥

कुज्झटिका । स्त्री । रताम्ध्याम् । नभोरेणौ ॥

कुज्झटी । स्त्री । कुहेलिकायाम् ॥

कुञ्चनम् । न । नेत्ररोगविशेषे ॥ तल्लक्षणम् । वाताद्या वर्त्मसङ्कोचं जनयन्ति यदा मलाः । तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुरिति ॥

कुञ्चफला । स्त्री । कुष्माण्ड्याम् ॥

कुञ्चिः । पुं । अष्टमुष्टिमिते धान्यमानभेदे ॥ यथा । अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ चपुष्कलमिति ॥

कुञ्चिका । स्त्री । कृष्णजीरके ॥ कुंचे इति गौड प्रसिद्धे मत्स्यविशेषे ॥ यथा । कुञ्चिकयैनं विस्मापयति भाययति ॥ कमची इतिभाषा प्रसिद्धायां वंशशाखायाम् ॥ कुञ्जी ताली इतिच भाषा प्रसिद्धायां कूर्चिकायाम् ॥ मेथिकायाम् ॥

कुञ्चितम् । न । तगरपुष्पे ॥ त्रि । व

के ॥ सङ्कोचिते । कुञ्चतिस्म । कुञ्च कौटिल्ये । क्तः । वा ऽनुस्वारात् संश्चापूर्वकत्वाद्वा नलोपाभावः ॥

कुञ्जः । पुं । न । हस्तिहनौ ॥ हस्तिदन्ते ॥ निकुञ्जे । समन्ताल्लतादिभिराच्छादिते स्थानविशेषे ॥ कौ जायते । कावजनि वा । जनीप्रा० । सप्तम्यांजनेर्डः । पृ० ॥

कुञ्जरः । पुं । अनेकपे । हस्तिनि ॥ अतिशयितः कुञ्जोहनुरस्यास्य । रप्रकरणेऽस्मनुखकुञ्जेभ्य उपसङ्ख्यानमितिरः ॥ देशविशेषे ॥ केशे ॥ उत्तरपदस्थितस्य श्रेष्ठार्थे ॥ पञ्चमात्रस्यप्रथमे । ऽऽ प्रभेदे ॥

कुञ्जरक्षारमूलम् । न । मूलके ॥ इति राजनिर्घण्टः ॥

कुञ्जरच्छाया । स्त्री । गजच्छायायाम् ॥ यथा । योगो मघात्रयोदश्याः कुञ्जरच्छायसंज्ञकः । भवेन्मघायां संस्थे च शशिन्यर्के करस्थिते इति ॥

कुञ्जरपर्य्यायः । पुं । पञ्चमात्रस्यप्रथम ।ऽऽपर्याये ॥

कुञ्जरपिप्पली । स्त्री । गजपिप्पल्याम् ॥

कुञ्जरा । स्त्री । धातकीद्रुमे ॥ पाटलायाम् ॥ हस्तिन्याम् ॥

कुञ्जरारातिः । पुं । शरभे ॥ सिंहे ॥ कुञ्जरस्य अरातिः ॥

कुञ्जरालुकम् । न । हस्त्यालुनि ॥ इति शब्दचन्द्रिका ॥

कुञ्जराशनः । पुं । अश्वत्थे । पिप्पले ॥ कुञ्जरेणाश्यते । अशभोजने । कर्मणिल्युट् ॥

कुञ्जरी । स्त्री । करेणौ । हस्तिन्याम् ॥

कुञ्जलम् । न । काञ्जिके ॥ कुत्सितंजलम् । पृषोदरादिः ॥

कुञ्जवल्लरी । स्त्री । निकुञ्जिकाम्ला-वृक्षे ॥

कुञ्जिका । स्त्री । कृष्णजीरके ॥ निकुञ्जिकाम्लावृक्षे । कुञ्जवल्लर्याम् ॥

कुटः । पुं । कोटे । गढ इति भाषा ॥ शिलाकुट्टे । पत्थर फोडनेका हथौडा इतिभाषा॥ पर्वते ॥ वृक्षे । अनोकहे॥ टवर्गप्रथमोपध इति प्रामाणिकाः ॥ पुं । न । कलशे । घटे ॥ पुं । स्त्री । गृहे । वेश्मनि ॥ कुटति । कुटिलो भवति । कुटकौटिल्ये । इगुपधेतिकः ॥

कुटकम् । न । फाले ॥ कुटति । कुट० । क्वुन् ॥

कुटकाचलः । पुं । पर्वतविशेषे ॥

कुटङ्कः । पुं । गृहाच्छादने । छप्पर छान इतिच भाषा ॥

कुटचः । पुं । कुटजवृक्षे ॥

कुटजः । पुं । कोरिया कोरय्या इतिभ

सिद्धे वृक्षविशेषे । गिरिमल्लिकायाम् । वत्सके ॥ अस्य फलमिन्द्रयवः ॥ कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः । अर्शोतीसारपित्तास्रकफतृष्णामकुष्ठनुत् ॥ अगस्त्यमुनौ ॥ द्रोणाचार्य्ये ॥ कूटे शृङ्गे जायते स्म । सप्तम्यां जनेर्डः । पृषोदरादिः ॥

कुटजबीजम् । न । इन्द्रयवे

कुटजा । स्त्री । कलहंसच्छन्दसि ॥ सजसा भवेदिह सगौ कुटजाख्यमिति लक्षणात् ॥

कुटन्नटः । पुं । श्योनाकवृक्षे । शोणके ॥ न । कैवर्त्तीमुस्तके । मोथा इति भाषा ॥ कुटन् वक्रीभवन् नटति । नटस्पन्दने पचाद्यच् ॥

कुटपः । पुं । मुनौ ॥ निष्कुटे । गृहसमीपोपवने ॥ कुडवपरिमाणे मानभाण्डे ॥ न । कमले ॥ कुटति । कुट० । उषिकुटिदलीत्यादिना कुटेः कपन् प्रत्ययः ॥

कुटरः । पुं । न । कुठरे । मन्थानदण्डबन्धनस्तम्भे ॥ वा० कुटेः करन् ॥

कुटरुः । पुं । अंशुकगृहे । छोटा तम्बू तम्बूटी इति च भाषा ॥ कुटति । कुट० । कुटः किच्चेत्यरुः ॥

कुटरुणा । स्त्री । त्रिवृतायाम् ॥

कुटलम् । न । पटले । छान छप्पर इति भाषा ॥ इति हारावली ॥

कुटहारिका । स्त्री । दास्याम् ॥

कुटिः । पुं । महीरुहे ॥ शरीरे ॥ स्त्री । स्वल्पगृहे ॥ शालायाम् ॥ कुटति । कुट० । इगुपधात् किदिति इन् प्रत्ययः ॥ यद्वा । क्षगृशृपृकुटिभिदिच्छिदिभ्यश्चेति इः स च कित् ॥

कुटिचरः । पुं । वारिशूकरे । सूंस इति भाषा ॥

कुटितम् । त्रि । कुटिले ॥ कुटति । कुट० । रुचिवचिकुचिकुटिभ्यः कितच् ॥

कुटिलः । त्रि । अनृजौ । अराले ॥ भङ्गुरे ॥ न । तगरपुष्पे ॥ कुटिं कौटिल्यं लाति । ला० । आतोऽनुपेति कः ॥ कुटति वा । कुट० । मिथिलादित्वाद्वाहुलकाद्वा इलच् ॥

कुटिलकः । पुं । नागविशेषे ॥

कुटिलगः । पुं । सर्पे ॥

कुटिलगा । स्त्री । नद्याम् ॥

कुटिला । स्त्री । नदीविशेषे ॥ राधिकासखीविशेषे ॥ तगरपादाम् ॥ स्पृक्कानामगन्धद्रव्ये ॥

कुटिलिका । स्त्री । व्याधानाकृतिविशेषे ॥ कर्मारोपकरणभूते लौहे ॥ वक्राग्रा लौहयष्टिर्या प्रोक्ता कुटिलिका हि सेत्युक्तेः ॥

कुटी । स्त्री । कुम्भदास्याम् । कुटनी

इति भाषा ॥ मुरानामगन्धद्रव्ये ॥ चि
त्रगुच्छे ॥ स्वल्पनिलये । कुटिकाग
इत्यमरटीका ङीष् ॥

कुटीचकः । पुं । पुत्रादौ । पुत्रार्जी
विभि विरक्ते ॥

कुटीचरः । पुं । } यतिविशेषे ॥ कुट्यां
कुटीचरकः । पुं । } चरति । अच् ॥ स्वार्थे
कः ॥

कुटीरः । पुं । कुद्रगृहे । भौंपडी झूं
पडी कुटिया इति भाषा ॥ ह्रस्वा कु
टी । कुटीशमीशुण्डाभ्यो रः ॥ न ।
केवले ॥ रते ॥ इति हेमचन्द्रः ॥
कुटति । कुट० । बा० ईरन् ॥

कुटुङ्गकः । पुं । कृष्णलतागच्छे ॥ छ
दिसि ॥

कुटुम्बः । पुं । न । पोष्यवर्गे ॥ बान्धवे
॥ सन्ततौ ॥ द्वितीयगृहे ॥

कुटुम्बव्यापृतः । त्रि । अभ्यागारिके ।
उपाधौ । पुत्रदारादिपोषणव्यग्रे ॥
कुटुम्बे कुटुम्बपोषणे व्यापृतः सम
। पृष्ठे वाचसि । अशर्मकत्वात् क
र्त्तरि क्तः ॥

कुटुम्बहारकः । पुं । ग्रहयोगविशेषे
॥ सप्तमे चन्द्रमाः तस्मात् सप्तमे
नीचखेचरः । कुटुम्बहारकोयोगो
यामुः प्रियतमां हरेत् ॥

कुटुम्बी । पुं । गृहमेधिनि । गृहस्थे ।
गार्हस्थ्याश्रमविशिष्टे ॥ त्रि । कृष
के ॥ कुटुम्बविशिष्टे ॥ कुटुम्बः पो
ष्यवर्गोऽस्त्यस्य । अतइनिः ॥

कुटुम्बिनी । स्त्री । पतिपुत्रदुहित्रादि
युतायां प्रतिष्ठितायां स्त्रियाम् । पु
रन्ध्राम् ॥ इन्नन्तात् ङीप् ॥ कुटु
म्बोपासमूहे ॥ खलादिभ्य इनिर्वक्त
व्य इति इनिः ॥ क्षुद्रक्षुपविशेषे । पय
स्यायाम् । बकाकल्यायाम् ॥

कुटुम्बौकः । न । कुटुम्बवासस्थाने ॥

कुट्टकः । पुं । गणकानां अङ्कविशेषे ॥

कुट्टनम् । न । छेदने । कूटना इति भा
षा ॥

कुट्टनी । स्त्री । नार्याः सहान्यपतिसंयो
गकारिण्याम् । शम्भल्याम् । कुटनी
इति भाषा ॥ कुट्टयति । कुट्ट छेदन
भर्त्सनयोः । ल्युट् । ङीप् ॥

कुट्टाकः । त्रि । कुट्टनशीले ॥ कुट्टयति
। तच्छीलः । कुट्ट० । जल्पभिक्षकुट्ट
लुण्टवृङः षाकन् इति षाकनप्रत्य
यः ॥ स्त्री । कुट्टाकी ॥

कुट्टारः । पुं । पर्वते ॥ न । केवले ॥ रते
॥ कुट्टारं केवले रते इति मेदिनी ॥

कुट्टिममांसम् । न । मांसव्यञ्जनभेदे
॥ मांसमकास्थि मकृत्य सूक्ष्मं कृत्वा
सुकुट्टितम् । वेसवारगुणान्वितं स्वेदि
त स्थापितमम्बेन ॥ कुट्टितं मा चि

तं मांसं सुस्वादु लघु दीपनम् । तथापि जाङ्गलं श्रेष्ठं आनूपेष्वपि पक्षिणाम् ॥

कुट्टिमः । पुं । न । स्वल्पगृहे । कुटीरे ॥ गर्भागारे ॥ मणिभूमौ । रत्नखनौ ॥ सुधाघटितभूतले ॥ बद्धभूमौ । नींव इति कुरसी इति च भाषा ॥ दाडिमद्रुमे ॥

कुट्टिमितम् । न । हावभेदे । स्त्रीणां दशधा शृङ्गारचेष्टान्तर्गतचेष्टाविशेषे । स्त्रीणां स्वाभाविकदशावस्था रागचेष्टाविलासभेदे ॥ तल्लक्षणं यथा । केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् । प्राहुः कुट्टिमितं नाम शिरःकरविधूननम् ॥ अपि च । केशाधरादिग्रहणे मोदमानेऽपि मानसे । दुःखितेव बहिः कुप्येद्यत्र कुट्टिमितं हि तदिति ॥ स्त्रीणामेष स्वभावो यदिष्टमप्यनिष्टतया निवारयन्त्य एव सुरतसुखमुपभुञ्जते इति ॥ अपि च । दुःखोपचारः सौख्येऽपि हर्षात् कुट्टिमितं मतम् ॥ सुरतेषु गाढपरिपीडने केशस्तनादिग्रहणे च हर्षात् सुखेऽपि दुःखाभिव्यक्त्या दुःखेऽपि सुखाभिव्यक्त्या कुट्टिमितम् । कुट्टनम् । कुट्ट॰ घञ् । कुट्टेन निर्वृत्तम् । भावप्रत्ययान्तादिमप्रत्ययस्य इतीमप् । ततो

मत्वर्थीयस्यान्तावेशः । तारकादित्वादितच्वा ॥

कुट्टिहारिका । स्त्री । दास्याम् ॥ इति हलायुधः ॥

कुट्टीरः । पुं । क्षुद्रपर्वते ॥ इति शब्दरत्नावली ॥

कुड्मलः । पुं । मुकुले । विकासोन्मुखप्रोढकलिकायाम् ॥ न । नरकान्तरे ॥ यत्र रज्जुभिः पीडनम् ॥ कुटति । कुट कौटिल्ये । वृषादित्वात् कलच् तस्य मुट् च ॥ यद्वा । कुड्यते कुटतिवा । कुट॰ । कुटिकुडिभ्यां मलच ॥

कुठः । पुं । द्रुमे । शाले ॥ कुठति । कुठ॰ । पचाद्यच् ॥

कुठरः । पुं । दधिविष्कम्भे । मन्थानाकर्षरज्जुमि बुक्ते स्तम्भे ॥ कुठति कुठ गतिप्रतिघाते । बाहुलकात् करन् ॥

कुठाकुः । पुं । खुठखुठेया इति भाषा प्रसिद्धे पक्षिविशेषे ॥

कुठाटङ्कः । पुं । स्त्री । कुठारे ॥

कुठारः । पुं । द्रुमे ॥

कुठारः । पुं । स्त्री । सुधितौ । परशौ । कुडाली इति भाषा । पर्शा इति च ॥

कुठारी । स्त्री । कुठारे । कुडाली इति भाषा ॥ जातित्वात् ङीष् ॥

कुठाकः । पुं । वृक्षे ॥ कीशे । वानरे ॥ मल्लाकारे ॥

कुठिः । पुं । क्ष्माभृति ॥ महीध्रे ॥

कुठिकः । पुं । कुष्ठौषधौ । कूठ इति भाषा ॥

कुठेरः । पुं । वह्नौ ॥ तुलस्याम् ॥ पर्णासे । बाबुइ इति बर्बरी इति च प्रसिद्धे पर्याये ॥ कुठ्यति । कुठ गतिघाते कुठि च । पतिकठिकुठीभ्य एरक् । बा नमयाम्बा निव्यस्यावनुम् ॥

कुठेरकः । पुं । पर्णासे । तुलस्याम् ॥ श्वेततुलस्याम् । बबुइ तुलसी इति गौडभाषा ॥ कृष्णार्जके ॥ मरुबके ॥

कुठेरजः । पुं । श्वेततुलस्याम् । कुठेरके । बर्बरायाम् ॥

कुठेरुः । पुं । चामरवाते । चौरकीपवन इतिभाषा । मन्थरे ॥

कुडवः । पुं । धान्यमानभेदे । मुष्टिचतुष्टये ॥ प्रस्थचतुर्थांशे ॥ वैद्यकमते द्विप्रसृतपरिमाणे । द्वात्रिंशत्तोलके । अञ्जलौ ॥ कुड्यते कुडतेवा । कुड दाहे । वा० कव प्र० । आगमशास्त्रानित्यत्वान्ननुम् ॥

कुडिः । पुं । देहे । शरीरे ॥ कुडते । कुडि० । कुडिकम्प्योर्नलोपश्चेति इः कित् ॥

कुडिशः । पुं । कुडिश माछ इतिगौड भाषाप्रसिद्धे मत्स्यविशेषे ॥

कुडुहुञ्ची । स्त्री । क्षुद्रकारवेल्लयाम् ॥

कुड्मलः । पुं । कुट्मले । न । नरकविशेषे ॥ कुड्यते । कुडतिवा । कुडदाहे इति कौटिल्येवा । कुडिकुषिभ्यां कलन् । पृ० । कुलति । कुल संस्त्याने । बाहुलकात् कुडेरपि कलच ॥

कुड्यम् । न । भित्तौ । भीत बाध इतिभाषा ॥ विलेपने ॥ कुड्यते दाहे । तपसाधुरितियत् । पृ० ॥ कुड्यछेद्या । कुडकार्षण्ये । यत् ॥ कौतेन्द्रवर्णात् यकारश्चायोऽगमश्च कुडु क्षपदन्ताद्यः ॥ कौतूहले ॥

कुड्यकम् । न । कुड्यार्थे ॥

कुड्यच्छेदी । पुं । सन्धिचौरे ॥ छेदनं छेदः । कुड्यस्य छेदः । सोऽस्यास्तीति इनिः ॥

कुड्यच्छेद्यम् । न । खानिके । भीतकाटा इतिभाषा ॥

कुड्यमत्सी । स्त्री । गृहगोधिकायाम् ॥

कुड्यमत्स्यः । पुं । म । छिपकली ॥

कुणकः । पुं । बालके ॥

कुणञ्जः । पुं । करञ्जाकारकृमौ । व

कुणञ्जरः । पुं । मयकुबा करञ्जुवाइ तिचभाषा ॥

कुणपा । स्त्री । कुणपे ॥

कुणपः । पुं । न । शवगन्धे । शवे ॥

रुष्टा इति प्रसिद्धे वस्तुविशेषे ॥ पूति गन्धे ॥ त्रि । पूतिगन्धौ ॥ क्वणति । क्वणशब्दे । क्वथेः सम्प्रसारणञ्चेति रूपम् ॥

कुणपी । स्त्री । किटसारिकायाम् ॥

कुणालः । पुं । देशविशेषे ॥ क्वणति । क्वण० । पीयुक्षणिभ्यांकालन् । बाहुलकात् सम्प्रसारणम् ॥

कुणिः । पुं । तूणी इति ख्याते तुन्नवृक्षे । नूद इति गौडभाषा ॥ त्रि । कुकरे ॥ कुणति कुण्यते वा । कुणशब्दो पकरणयोः । इगुपधात्किरितीन् ॥

कुणिन्दः । पुं । शब्दे ॥ कुणति । कुण० । कुणिपुल्योः किन्दच् ॥

कुण्ठकः । त्रि । स्थूले । मोटा इति भाषा ॥

कुण्ठः । त्रि । क्रियासुमन्दे । अकर्मण्ये ॥ कुण्ठो मन्दः क्रियासु यः ॥ मूर्खे ॥ कुण्ठति । कुठि प्रतिघाते आलस्ये च । पचाद्यच् ॥

कुण्ठकः । त्रि । कुण्ठे ॥ स्वार्थे कः ॥

कुण्ठा । स्त्री । गतिप्रतिहतौ ॥ कुण्ठनम् । कुठि प्रतीघाते । षिद्भिदादिभ्योऽङ् । टाप् ॥

कुण्ठितः । त्रि । कुण्ठीकृते । सङ्कुचिते ॥

कुण्ठीकृतः । त्रि । [illegible] विकुण्ठिते ॥

कुण्डः । पुं । अमृते भर्तरि जारजे । जीवत्पतिवत्नीसुते ॥ कुण्ड्यते कुण्डनेन । कुडि दाहे । घञ् ॥ न । आग्नेये ॥ देवजलाशये ॥ चौवच्चा इति प्रसिद्धे जलाधारविशेषे ॥ होमार्थाग्न्यालये ॥ न । स्त्री । पिठरे । स्थाल्याम् ॥ कुण्डयति । कुडि रक्षणे । चु० । अच् । कुणति वा । कुण० । [illegible] किदिति डः ॥

कुण्डकीटः । पुं । पतितब्राह्मणीपुत्रे । जारतो ब्राह्मणीपुत्रे ॥ दासीकामुके ॥ चार्वाकमताभिज्ञपुरुषे ॥ चार्वाके ॥ अतिभिक्षारते ॥

कुण्डगोलकम् । न । काञ्जिके ॥

कुण्डकः । पुं । कुतुपे । घृताद्याधारस्थाने ॥ इति हेमचन्द्रः ॥

कुण्डपाय्यः । पुं । क्रतौ ॥ कुण्डेन पीयतेऽस्मिन् सोम इति । क्रतौ कुण्डपाय्यसञ्चाय्याविति पिबतेरधिकरणे यत् प्रत्ययो युगागमश्च निपात्यते ॥

कुण्डलम् । न । स्वनामख्यातकर्णभूषणे । कर्णवेष्टने ॥ पाशे ॥ वलये ॥ गुर्वक्षरे ॥ कुण्डते कुण्ड्यति वा । कुडि दाहे कुडि रक्षायां वा । वृषादित्वात् कलच् ॥ कुण्डं कुण्डाकारं लाति वा । आतोऽनुपसर्गे कः ॥ सिध्मादित्वाल्लज् वा ॥

कुण्डलिका । स्त्री । मात्रावृत्तभेदे ॥
यथा । कुण्डलिका सा कथ्यते प्रथमं
दोहा यत्र । रोलाचरणचतुष्टयं प्र
भवति विमलं तत्र ॥ प्रभवति विम
लं तत्र पदस्मिति सुललितयमक
म् अष्टपदी सा भवति विमलकवि
कौशलगमकम् । अष्टपदी सा भव
ति सुखितपण्डितमण्डलिका कुण्ड
लिनायकभणितविबुधकण्ठे कुण्डलि
केति ॥ जलेबी इति प्रसिद्धे पक्वान्ने ॥

कुण्डली । पुं । फणिनि । सर्पे ॥ वरुणे
॥ मयूरे ॥ चित्रमृगे । चित्तल इति
भाषा ॥ त्रि । कुण्डलयुक्ते ॥ कुण्डल
म् कुण्डलाकारो वा सोऽस्यास्ति । अ
तइनिः ॥

कुण्डलिनायकः । पुं । पिङ्गलसर्पे ॥

कुण्डलिनी । स्त्री । मूलाधारनिवासि
न्याम् कुलकुण्डलिनीशक्तौ ॥ उर
ग्याम् ॥ गुडूच्याम् ॥ कुण्डलानांम
ण्डले ॥ खलादित्वादिनिः ॥ जले
बीतिख्यातेपक्वान्नविशेषे ॥ तस्याःपा
कप्रकारो यथा । नूतनं घट मानीय
तस्यान्त कुशलो जनः । प्रस्थार्द्धपरि
माणेन दध्नाऽम्लेन प्रलेपयेत् ॥ द्वि
प्रस्थांशमितां तत्र दध्यम्लं प्रस्थसम्मि
तम् । घृतमर्द्धशरावञ्च घोलयित्वा
घटे क्षिपेत् ॥ आतपे स्थापयेत्ता
वत् यावद्याति तदम्लताम् । ततस्त
त् प्रक्षिपेत् पात्रे सच्छिद्रे भाजनञ्च
तत् ॥ परिभ्राम्य परिभ्राम्य तत्तस्त
प्ते घृते क्षिपेत् । पुनः पुनस्तां तां कृ
त्वा विदध्यात् मण्डलाकृतिम् ॥ तां
सुपक्वां घृतात् नीत्वा सितापाके त
मुद्रवे । कर्पूरादिसुगन्धे च स्नपयि
त्वो द्धरेत्ततः ॥ एषा कुण्डलिनी ना
म्ना पुष्टिकान्तिबलप्रदा । धातुवृद्धि
करी वृष्या रुच्या चेन्द्रियतर्पणीति
॥ कुण्डलिनो ङीप् ॥

कुण्डली । स्त्री । गुडूच्याम् ॥ काञ्चनद्रु
मे ॥ कपिकच्छ्वाम् ॥ सर्पिणीवृक्षे ॥ ज
लेबीति प्रसिद्धे मिष्टान्नविशेषे । कु
ण्डलिन्याम् ॥ इति पाकराजेश्वरः ॥
कुलकुण्डलिन्यांशक्तौ ॥

कुण्डाशी । त्रि । कुण्डस्य सङ्करविशे
षस्यान्नभोजिनि ॥ अमृते जार
जः कुण्डो मृते भर्त्तरि गोलकः ।
य स्तयोरन्नमश्नाति स कुण्डाशी
ति कथ्यते ॥ इति देवलः ॥ कुटना
इति प्रसिद्धे भगभक्षके ॥ महाभा
रते दानधर्मे तथा दर्शनात् ॥

कुण्डिका । स्त्री । कमण्डलौ ॥ पिठरे ।
स्थाल्याम् ॥ कूंड कूंडा इति च प्रसिद्धे
पात्रविशेषे ॥ स्वार्थे कः ॥

कुण्डिनः । पुं । ऋषिविशेषे ॥ न । वि

दर्भनगरे ॥ यथा । अथ भीमसुतावलोकनैः सफलं कर्त्तुमहः स देवसः । क्षितिमण्डलमण्डनायितं नगरं कुण्डिनमण्डजोययाविति पूर्वं नैषधे २ सर्गः ॥ कुण्डते । कुण्डिदाहे । बहुलमन्यत्रापीति इनच् प्र० ॥

कुण्डी । स्त्री । अमत्रविशेषे । कमण्डलौ ॥ कुण्डी कम्बुकपालानि मधुपूर्णानि बिभ्रतः । किं न पश्यति लोकोऽयं ब्रह्मविष्णुमहेश्वरान् ॥ जानपदकुण्डेत्यादिना अमत्रे ङीष् ॥ भर्त्तर्यमृते जारजातायाम् ॥ अमम नुष्यजातित्वात् जातिलक्षणो ङीष् ॥ कुणति वा । कुणशब्दोपकरणयोः । अमन्ताड्डः ॥

कुण्डीरः । पुं । मनुष्ये ॥ त्रि । बलवति ॥ इति धरणी ॥

कुतनुः । पुं । कुवेरे ॥ त्रि । कुत्सितशरीरे ॥

कुतपः । पुं । सूर्ये ॥ वैश्वानरे ॥ द्विजन्मनि ॥ अतिथौ ॥ गवि ॥ भागिनेये ॥ पुं । न । दौहित्रे ॥ वाद्ये ॥ छागलकम्बले । नेपालकम्बले । थारचा इति पर्वतीय भाषा ॥ कुशतृणे ॥ दिनस्याष्टमांशे । अह्नोऽष्टमे मुहूर्त्ते । त्रिंशद्दण्डदिनमाने द्वितीयप्रहरशेषदण्डावधितृतीयप्रहरप्रथमदण्डपर्यन्ते काले । अयञ्चैकोद्दिष्टश्राद्धारम्भकालः । यथा । आरभ्य कुतपे श्राद्धं कुर्यादारौहिणं बुधः । विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेदिति ॥ दिवसस्याष्टमे भागे मन्दीभवति भास्करः । स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम् ॥ अपि च । अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्वदा । तत्राष्टमो मुहूर्त्तो यः स कालः पुतपः स्मृत इति मत्स्यपुराणम् ॥ * ॥ पारिभाषिककुतपास्तु । मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलः । रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः ॥ पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः । अष्टावेतेयतस्तस्मात् कुतपा इति विश्रुताः ॥ इति मिताक्षरायामाचाराध्यायः ॥ कुत्सितं तपति । तप० । संज्ञायाम्भृतॄवृजीति खच् । अनव्ययस्येति न मुम् । यद्वा । कुम्भुवं तपति । आगमशास्त्रस्यानित्यत्वान्न मुम् ॥

कुतः । अ । प्रश्ने ॥ पञ्चम्यर्थे । कस्मादर्थे ॥ निह्नवे ॥ कस्मात् किमस्तसिल् । कुतिहोः ॥

कुतकम् । न । कौतुके । फलनिरपेक्षतया चिकीर्षिते ॥ कुतं चर्म नि

मितस्नेहपात्रं कायति । कै० । आ-
तोऽनुपसर्गे कः । उपपदसमासः । इ
को ह्रस्वोऽङ्यो गालवस्येति ह्रस्वः ॥ य
द्वा । कुत्वाम्भसम् । अध्या० ठक् । इ
सुसुगिति कः । केण इति ह्रस्वः । सं
ज्ञापूर्वकत्वात् पक्षे वृद्ध्यभावः ॥

कुतुपः । पुं । चर्ममये ऽल्पे स्नेहपात्रे । कुप्पी इतिभाषा ॥ ह्रस्वा कुतूः । कुत्वा डुपच् ॥

कुतुम्बुरु । न । कुत्सिततिन्दुकीफले ॥

कुतूः । स्त्री । चर्मनिर्मिते स्नेहपात्रे । कुप्पा इतिभाषा ॥ कुत्सितं तन्यते । तनु० । बा० कूः टिलोपश्च ॥ कौ तिर्वा । कुशब्दे । बा० कूस्तुकश्च । कुत्वा डुपजिति निर्देशाद्वा ॥

कुतूणकः । पुं । कतुया इति गौडभाषाप्रसिद्धे बालानां नेत्ररोगे ॥ तस्य ल० । यथा । कुतूणकः क्षीरदोषाच्छिशूनामेव वर्त्मनि । जायते तेन तन्नेत्रं कण्डूरञ्च स्रवेन्मुहुः ॥ शिशुः कुर्याल्ललाटाक्षि कूटनासावघर्षणम् । शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः इति ॥

कुतूहलम् । न । अपूर्ववस्तुदिदृक्षाद्यतिशये चेष्टाविशेषे । कौतुके । कौतूहले ॥ कुतूहलं रम्यदृष्टौ चापल्यं परिकीर्त्तितम् ॥ बलनिरपेक्षचिकीर्षिते ॥ त्रि । प्रशस्ते ॥ अद्भुते ॥ कुतूहलति । हलविलेखने । मू० कः ॥ यद्वा । हलति । पचाद्यच् । कुत्याः हलम् ॥

कुतूहली । त्रि । विनोदार्थिनि ॥

कुतृणम् । न । कुम्भिकायाम् । वारिपर्ण्याम् । जलपत्नी काई इति च भाषा । पामा इति गौडभाषा ॥

कुत्र । अ । देशप्रश्ने ॥ कस्मिन् । सप्तम्यास्त्रल् ॥

कुत्रचित् । अ । कुत्र । किसीठिकाने इति भाषा ॥

कुत्सनम् । न । निन्दने ॥ कुत्स० । ल्युट् ॥

कुत्सला । स्त्री । नीलीवृक्षे ॥

कुत्सा । स्त्री । निन्दायाम् ॥ कुत्सनम् । कुत्स अवक्षेपणे । गुरोश्च हल इति स्त्रियाम् अः । टाप् ॥

कुत्सितम् । न । कुष्ठनामौषधे ॥ त्रि । निन्दिते । निकृष्टे । प्रतिकृष्टे । रेफे ॥ कुत्सा सञ्जातास्य । ता० इतच् ॥

कुथः । पुं । बर्हिषि । दर्भे ॥ पुं । स्त्री । आस्तरणकम्बले । गजपृष्ठस्थितचित्रकम्बले । प्रवेण्याम् । वर्णे । हाथीकीझूल इति भाषा ॥ कुथ्नाति । कुन्थसंश्लेषणे । अच् । इदृदशेति निर्देशात् क्वचिदकित्यपि नलोपः ॥

यथा । कुन्थस्य शोभा । कुथिर्हिंसासंक्लेशनयोः । आगमशास्त्रस्यानित्यत्वान्नुम् । इगुपधेतिकपि अस्या ॥ कुथ्यति वा । कुथ पूतीभावे । इगुपधेतिकः ॥ कुथा कन्था समाख्याता कुथः स्यात्करिकम्बलम् । कुथः कुशः कुथः कीटः प्रातःस्नायीद्विजः कुथस्तथापरकश्चित् ॥

कुथा । स्त्री । आस्तरणे ॥ टाप् ॥

कुथोदरी । स्त्री । कल्किपुराणप्रसिद्धायां कुम्भकर्णपौत्र्यां निकुम्भदुहितरि ॥ साकल्किनाहतेति पुराणे प्रसिद्धिः ॥

कुदृष्टिः । स्त्री । वेदबाह्यतार्किककल्पनायाम् ॥ यावेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः । इतिमनुः ॥

कुद्दालः । पुं । कोविदारे । काञ्चनारे ॥ भूमिदारणास्त्रे । कुदाल इति भाषा ॥ कुम् भूमिमुद्दालयति । दलविदारणे । कर्मण्यण् । शकन्ध्वादिः ॥

कुद्दङ्कः । पुं । गृहविशेषे । मञ्चोपरिमण्डपे । उद्घाटे । पिठरे ॥ इतिचिकाण्डशेषः ॥

कुद्दङ्गः । पुं । पिठरे । कुद्दङ्के ॥

कुद्दवः । पुं । कोद्रवे ॥

कुद्दवनः । पुं । कोद्रवे ॥

कुधान्यम् । न । क्षुद्रधान्ये ॥

कुधीः । त्रि । विपरीतबुद्धिमति ॥

कुध्रः । पुं । पर्वते ॥ कुंधरति । धृञ् । मूलविभुजादित्वात्कः ॥

कुनखः । पुं । क्षुद्ररोगविशेषे ॥ तल्ल० यथा । नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम् । कुर्वीते दाहपाकौ च तं व्याधिं चिप्य मादिशेत् ॥ तदेवाल्पतरैर्दोषैः परुषं कुनखं वदेदिति ॥ त्रि । कुत्सितनखयुक्ते ॥

कुनखी । त्रि । कुनखरोगयुक्ते ॥ सङ्कुचितनखे ॥

कुनटः । पुं । श्योनाकभेदे ॥ कुत्सितनटे ॥

कुनटी । स्त्री । नैपाल्याम् । मनःशिलायाम ॥ धन्याके ॥ कौ नटति । नट अवस्यन्दने । अच् । गौरादित्वान् ङीष् ॥ कुत्सिता नटी इव वा ॥

कुनली । पुं । वकवृक्षे ॥

कुनाभिः । पुं । निधौ ॥ वातमण्डल्याम् । ववूला ववण्डर इतिच भाषा ॥

कुनाशकः । पुं । दुरालभायाम् । यवासे ॥ कुं नाशयति । णश० । णयन्तः । अच् । स्वा० कन् ॥

कुन्तः । पुं । गवेधुकायाम् ॥ प्रासायुधे । भल्ले । भाला इति भाषा ॥ प्रायोहस्तक्षेप्ये शल्ये इति स्वामी ॥ कुशरीरमुनत्ति । उन्दी० । वाहुलका

न्तः । शकन्ध्वादिः ॥

कुन्तलः । पुं । केशे । चिकुरे । वाले ॥ ह्रीवेरे ॥ चषके ॥ जवे ॥ हले ॥ कुन्तं कुन्ताग्राकारं लाति । ला० । आतोनुपेतिकः ॥ कुन्तलाः । पुंभूम्नि । जनपदविशेषे ॥ यथा । कामगिरिं समारभ्य द्वारकान्तं महेश्वरि । श्रीकुन्तलाभिधो देशो वर्त्तितः शक्तिसङ्गमे इति ।

कुन्तलवर्द्धनः । पुं । भृङ्गराजे । भंगरा इति भाषा ॥

कुन्तलिका । स्त्री । दध्यादिच्छेदन्याम् । पालिकायाम् । दही काटनेकी छुरी वा कटोरी इति भाषा ॥

कुन्तलोशीरम् । न । बालके । बाला इति भाषा ॥

कुन्तिः । स्त्री । युधिष्ठिरादिपाण्डवानां मातरि ॥ वा० कमेर्झिच् । प्रत्यया दिलोपे कुगुन्धादेशः ॥ देशविशेषे ॥

कुन्ती । स्त्री । युधिष्ठिरादीनां जनन्याम् । शूरसेनसुतायाम् । पृथायाम् ॥ गुग्गुलुद्रुमे ॥ शल्लक्याम् ॥ इतो मनुष्यजातेरिति ङीष् ॥

कुन्तीपुत्रः । पुं । युधिष्ठिरादिषु ॥ कुन्तीच शूरसेनराजस्य कन्या पृथानाम्नाख्याता । तत्पिता तां कुन्तिभोजराजायदत्तवान् । अतः कुन्तीति विश्रुता । साच मृगीभूतस्य मुनेः शापान्मैथुनरहितस्य स्वामिन आज्ञया धर्मात् युधिष्ठिरं पवनाद्भीमं शक्रात् दर्जुनं मश्विनीकुमाराभ्यां नकुलसहदेवौ जनयामास ॥ साच कन्यावस्थायां मादित्यात् कर्णञ्च जनयामास । अतः । कर्णोपि कुन्त्याः पुत्रः ॥

कुन्थुः । पुं । बौद्धविशेषे ॥ जिनचक्रवर्त्तिविशेषे ॥

कुन्दः । पुं । अच्युते । मुकुन्दे ॥ सर्वपार्थिवनाशाय वाजिमेधेन चेष्टवान् । तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः । मारीचाय ददौ प्रीतः कश्यपाय वसुन्धरामिति हरिवंशोक्तेः ॥ कुंधरां कश्यपाय ददाति । कुदाञ्० । आतोऽनुपसर्ग इतिकः । पृषोदरादित्वान्नुमागमः । कुंद इति गौड भाषाप्रसिद्धे भ्रमियन्त्रे । चक्रभ्रमौ ॥ कुबेरस्य निधिविशेषे ॥ कुन्दुरुनामगन्धद्रव्ये ॥ करवीरवृक्षे ॥ पाषाणकञ्चशाके ॥ पुं । न । पुष्पविशेषे । माघ्ये ॥ कुन्दं शीतं लघु श्लेष्मशिरोरुग्विषपित्तनुत् ॥ कुम्मुदं दायति ञ्चति वा । दैप् शोधने दो अवखण्डने वा । आत इतिकः । तत्पुरुषे इतिद्वितीयायाअलुक् ॥ अ-

द्वा । कुम् भूमिम् उनत्ति : उन्दी० । कर्मण्यण् । श० ॥ यद्वा । कौति । कुशब्दे । अब्दादित्वात् कौतेर्नुमि तिदन् ॥

कुन्दकः । पुं । कुन्दुरुके ॥

कुन्दमः । पुं । मार्जारे ॥ इति त्रिकाण्डशेषः ॥

कुन्दरः । पुं । कुन्दरा इति कलिङ्गेषु ख्याते तृणविशेषे दीर्घपत्रे । खरच्छदे ॥ कुन्दंराति । रा० । आतोनुपसर्गे इतिकः ॥

कुन्दिनी । स्त्री । पद्मसमूहे । पद्मिन्याम् ॥

कुन्दुः । पुं । मूषिके ॥ स्त्री । कुन्दुरुनामगन्धद्रव्ये ॥

कुन्दुरुः । पुं । स्त्री । स्वनामख्यातेसुगन्धिद्रव्ये । यस्य निर्यासे कुन्दुरुखोटि इतिगौडानांख्यातिः । पालङ्क्याम् । सौराष्ट्रे । बहुगन्धे ॥ कुन्दुरुर्मधुर स्तिक्त स्तीक्ष्ण स्त्वच्यः कटु र्हरेत् । ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान् ॥ कुम्भूमि मुनत्ति उदयति वा । अपवादयश्चेति साधुः ॥ पालङ्क्याक्षेपीतिकश्चित् ॥

कुन्दुरुकः । पुं । कुन्दुरुनाम्नि सुगन्धिद्रव्ये ॥

कुन्दुरुकी । स्त्री । शल्लकीवृक्षे ॥ कुन्दुरुस्वरप्रतिकृतिः । इवेप्रतिकृताविति कन् । गौरादित्वात् ङीष् ॥

कुपथः । पुं । कदध्वनि । कापथे ॥

कुपाणिः । त्रि । कुकरे । वक्रहस्ते । टुण्डा इतभाषा ॥

कुपितः । त्रि । रुषिते । रुष्टे ॥

कुपिनी । पुं । कैवर्त्ते । जालिया मछुवा इतिचभाषा ॥

कुपिनी । स्त्री । खालुइ इतिगौडभाषाप्रसिद्धायां स्वल्पमत्स्यधान्याम् ॥

कुपिन्दः । पुं । तन्तुवाये ॥ कुप्यति । कुप० । कुपेर्वाश्चेतिकिन्दच् ॥

कुपीलुः । पुं । कारस्करवृक्षे । काकेन्दौ । कुचला इतिभाषा ॥ कुपीलुः शीतल स्तिक्तो वातलो मदकृल्लघुः । परं व्यथाहरो ग्राही कफपित्तास्त्रनाशनः ॥

कुपुरुषः । पुं । कुत्सितनरे ॥ कुत्सितःपुरुषः । कुगतीति समासः ॥

कुपूयः । त्रि । कुत्सिते । जात्याचारादिनिन्दिते ॥ कुत्सितंपूयते । पूयी विसरणे । पचाद्यच् ॥

कुप्यम् । न । स्वर्णरूप्याभ्या मन्यस्मिन् तैजसे ताम्रादिधातौ ॥ अष्टधातुमध्यदस्ता इतिख्याते धातौ ॥ गुप्यते । गुपूरक्षणे । राजसूयसूर्येमृषोद्यरुच्यकुप्यकृष्ट पच्याऽव्यथ्या इतिक्यप

त्वेनिपातितःकुप्यशब्दः। तत्रगुपे राद्रेःकत्वमसंज्ञायाम॥

कुप्यशाला। स्त्री। स्वर्णरजतभिन्नतैजसपात्रादिनिर्माणगृहे। सन्धान्याम्। ठठेरहट्टा इतिभाषा॥

कुप्रियः। त्रि। अधन्ये॥

कुप्लवः। पुं। तृणादिनिर्मिते कुत्सितो डुपादौ॥

कुबेरः। पुं। धनदे। यक्षराजि॥ नन्दीवृक्षे॥ अर्हदुपासकविशेषे॥ त्रि। कुदेहे॥ मन्दे॥ कुत्सितं बेरं शरीर मस्य कुत्सितत्वात्। यथाहुः। कुत्सायां क्वितिशब्दोयं शरीरं बेर मुच्यते। कुबेरःकुशरीरत्वान्नाम्ना तेनैवसोङ्कितः॥ इतिवायु पुराणम्॥ यद्वा। कुम्बति धनम्। कुबिश्रा च्छादने। कुम्बेर्नलोपश्चेत्यरक। औषध्यमध्यः॥

कुबेरकः। पुं। नन्दिवृक्षे॥ कुबेर॥ स्वार्थेकः॥

कुबेराची। स्त्री। पाटलावृक्षे॥ लता करञ्जे। सितपाटलिकावृक्षे॥ कुबेरस्येशाचियस्याः। अक्ष्णोदर्शनादित्यच्। गौरादित्वान् ङीष्॥

कुबेराचलः। पुं। } कैलासपर्वते॥
कुबेराद्रिः। पुं। }

कुजः। पुं। भौमे॥ अपामार्गे॥ त्रि। ग

डुले। कुवडा इतिभाषा॥ अस्यलक्ष णं। यथा। हृदयं यदि वा पृष्ठ मुन्न तं क्रमशः सरुक्। क्रुद्धो वायु र्यदा कुर्यात्तदा तं कुब्जमादिशेत्। इति॥ कुत्सितम् उब्जमार्जवमस्य। श०॥

कुब्जकः। पुं। पुष्पविशेषे। भद्रपुष्पे॥ महासहे। कण्टकाढ्ये। कुब्ज कूजा कूजे इतिचभाषाप्रसिद्धे सेवतीप्रभेदे। यथा। चम्पकात् पुष्पशतका दशोकंपुष्प मुत्तमम्। अशोकात् पुष्पसाहस्रात् सेवतीपुष्प मुत्तमम्। सेवतीपुष्पसाहस्रात् कुब्जकं पुष्पमुत्तममितिनारसिंह पुराणम्॥ अस्यगुणा यथा॥ कुब्जकः सुरभिः स्वादुःकषायानुरसःसरः। त्रिदोष शमनो वृष्यः शीतवर्णोप्रसादकृत्तइति॥ कौ उब्जति। उब्जआर्जवे। अच्। यद्वा। कुत्सितम् उब्जमार्जव मस्य। श०। स्वार्थेकः॥

कुब्जकण्टकः। पुं। श्वेतखदिरे॥

कुभ्रम्। न। वने॥ कुम्भति। कुबिश्रा च्छादने। कृभ्रेन्द्रेतिरन्॥

कुभ्रेखिकः। पुं। सप्तशलाकाचक्रे॥

कुमनीषः। त्रि। कुत्सितबुद्धिमति॥ कुत्सिता मनीषाऽस्य॥

कुमारः। पुं। शुके॥ कार्त्तिकेये। स्कन्दे॥ शालग्रामवराजि॥ अश्ववार

के ॥ पञ्चवर्षीयबालके ॥ षण्मुखे ॥ अर्हदुपासकविशेषे ॥ सिन्धुनदे ॥ न । जात्यश्वाश्वे । उत्तमस्वर्णे ॥ कुमारयति क्रीडति । कुमारक्रीडायाम् । पचाद्यच् ॥ कुत्सितोमारोऽस्येतिवा ॥ कौमारयति दुष्टान् । अच् ॥ सदाबालत्वाद्वाकुमारः ॥ यद्वा । कामयते । कम० । कमेःकिदुच्चोपधायाइत्यारन् प्रत्ययः ॥

कुमारकः । पुं । बालके ॥ कुमारश्चिरतवणत्वात् ॥ कुमारयति । पचाद्यच् । कुमारएव । इवेप्रतिकृतावितिकन् ॥ बालके ॥ आतः कुं पृथिवीं पक्षौ मारयेत् तत् कुमारकः ॥

कुमारपालः । पुं । शालिवाहननृपे ॥ इतिहेमचन्द्रः ॥

कुमारभृत्या । स्त्री । गर्भिण्याःपरिचर्यायाम् । बालतन्त्रे ॥

कुमारयुः । पुं । युवराजे ॥

कुमारवः । त्रि । कुमार वत्ति ॥ कुमारोऽस्त्यस्य । अन्येभ्योपिदृश्यते इति वः ॥

कुमारवाही । पुं । मयूरे ॥

कुमारसूः । स्त्री । गङ्गायाम् ॥ दुर्गायाम् ॥ कुमारंसूते । सूङ० । क्विप् ॥

कुमारहा । त्रि । बालघातिनि ॥

कुमारिकः । त्रि । कुमारीमति ॥ कुमार्यस्त्यस्य । व्री० ठन् ॥

कुमारिका । स्त्री । कुमार्यर्थे ॥ नवमल्लिकायाम् ॥ भारतवर्षस्यखण्डविशेषे । भरतखण्डे ॥ यथा । वर्णव्यवस्थितिरिहैव कुमारिकाख्ये शेषेषु चान्त्यजजनानिवसन्ति सर्वेइति ॥ स्थूलैलायाम् ॥

कुमारिणी । स्त्री । चण्डाम् ॥ कुत्सितान् दैत्यान् मारयति सच्छीला ॥

कुमारी । स्त्री । मेचतनयायाम् । पार्वत्याम् ॥ नवमल्लिकायाम् ॥ नदीप्रभेदे । शुक्तिमत् पादोद्भवायांसरिति ॥ सहायाम् । घृतकुमार्याम् ॥ यथा । कुमारी भेदिनी शीता तिक्ता नेत्र्या रसायनी । मधुरा बृंहणी वल्या वृष्या वातविषप्रणुत् ॥ गुल्मप्लीहयकृद्वृद्धिकफज्वरहरी हरेत् । ग्रन्थ्यग्निदग्धविस्फोटपित्तरक्तत्वगामयानिति ॥ अपराजितायाम् ॥ जम्बुद्वीपविभागे ॥ रामतरुण्याम् ॥ वन्ध्याकर्कोटक्याम् ॥ स्थूलैलायाम् ॥ मेहिनीपुष्पे ॥ तरणीपुष्पे ॥ श्यामापक्षिणि ॥ कन्यायाम् ॥ द्वादशवर्षीयायांकन्यायाम् ॥ यथा । अष्टवर्षा भवेद्गौरी दशवर्षा च कन्यका । सम्प्राप्तेद्वादशेवर्षे कुमारीत्यभिधीयते । स्मृतौभेदः ।

कन्याकुमारीत्यमरे नृपचाराद्-भेदः॥ आगमेतु कुमारीपूजने च जातपुष्पान्वेत् तद्वा षोडशवर्षपर्यन्त वयस्कापि कुमारीत्युच्यते। तस्याः व योभेदेन नामभेदाः। यथा। एक वर्षा भवेत् सन्ध्या द्विवर्षा च सर स्वती। त्रिवर्षातु त्रिधामूर्त्ति श्चतु र्वर्षातु कालिका॥ सुभगा पञ्चवर्षा च षड्वर्षा च उमा भवेत्। सप्तभिर्मा लिनी साक्षात् अष्टवर्षा च कुब्जिका॥ नवभिः कालसङ्कर्षा दशभिश्चा पराजिता। एकादशेतु रुद्राणी द्वा दशाब्देतु भैरवी॥ त्रयोदशेमहाल क्ष्मी द्विसप्तापीठनायिका॥ क्षेत्र ज्ञापञ्चदशभिः षोडशेचान्नदामता॥ एवङ्क्रमेण सम्पूज्या यावत् पुष्पं न जायते। पुष्पितापिच सम्पूज्या तत् पुष्पादानकर्मणीति॥ कुमारयति। कुमारक्रीडायाम्। पच्। गौरा दिः॥ यद्वा। कामयते। क, मु०। कमेऽकिदुच्चोपधाया उत्त्यारत्। वय सिप्रथम इतिङीप्॥ काम्यतेवा॥ कुत्सितो मारो ऽस्यावा॥

कुमांसकः। पुं। सौवीरदेशे॥

कुमुत्। न। कैरवे। कुमुदे॥ रक्तो त्पले॥ त्रि। कृपणे॥ अप्रीते॥

कारे। इन्दुकमले। कोंइ इतिभा षा॥ कुमुदं पिच्छलं स्निग्धं मधुरं ह्लादि शीतलम्॥ कृष्णे॥ रक्तप द्मे॥ पुं। नैर्ऋतकोणस्थदिग्गजे नि॥ रक्तोत्पलतुल्यवर्णत्वात्॥ ना गविशेषे। तच्चकस्य पुत्रे पुत्रे॥ य स्य नाम्ना बहुनामा दीर्घबाहुक्तमा श्रिताः। ताम्राः पीताः सिताश्चैव अकीर्णाः केसरकर्णैश्च इतिरामायणोक्त वानरविशेषे॥ दैत्यविशेषे॥ विष्णोः पार्षदे॥ कर्पूरे॥ कौमोदके। मुद्गरे। इत्युपचेतिकः॥ पर्वतवि शेषे॥ भुजगविशेषे॥

कुमुदखण्डम्। न। कुमुदानां समूहे॥ कमलादिभ्यः खण्डः॥

कुमुदबान्धवः। पुं। चन्द्रे। शशिनि॥ कुमुदानां बान्धवः॥ कर्पूरे॥

कुमुद्वती। स्त्री। कुमुदवत्याम्॥

कुमुदबीजम्। न। कुमुदतीबीजे।

कुमुदा। स्त्री। कुम्भिकायाम्। वारि-पर्ण्याम्। काइ इति भाषा। पाना इति गौडभाषा॥ गम्भारीवृक्षे॥ शालपर्णीवृक्षे॥ धातकीवृक्षे॥ क-टफले॥ अजाद्यतष्टाप्॥

कुमुदाभिख्यम्। न। रूप्ये॥ कुमुदमि व अभिख्या शोभायस्य॥

कुमुदम्। न। कुमुदि। कैरवे। क कुमुदाभासः। पुं। कुमुदाख्यदेशे॥ कु

मुदाना मावासो यस्मिन् ॥

कुमुदिका । स्त्री । कट्फले ॥ कैामोदते । मुदीहर्षे । इगुपधेतिकः । स्वार्थे कन् ॥

कुमुदिनी । स्त्री । कुमुदयुक्तपुष्करिण्यादैा ॥ कुमुदलतायाम् ॥ उत्पलिन्याम् । छोटी कोंभी इतिभाषा ॥ कुमुदान्यत्रदेशे सन्ति । पु० इनिः ॥ कुमुदखण्डे ॥ कुमुदानांसमूहः । खला० इनिः ॥ पद्मिन्यां ये गुणाः प्रोक्ताः कुमुदिन्याञ्चते स्मृताः । सातु मूलादिसर्वैश्च रक्तासमुदिताबुधैः ॥

कुमुदिनीनायकः । पुं ।
कुमुदिनीपतिः । पुं । } चन्द्रमसि ॥

कुमुदी । स्त्री । कट्फले ॥

कुमुदेशः । पुं । चन्द्रे । इन्दैा ॥

कुमुद्वान् । त्रि । कुमुदप्रायदेशे ॥ कुमुदानि प्रायाण्यत्र । कुमुदनडवेतसेभ्योड्मतुप् । झयइ वः ॥

कुमुद्वती । स्त्री । कुमुदिन्याम् ॥ उगितश्चेति ङीप् ॥ रामपुत्रस्य कुशस्य पत्न्याम् ॥ कुमुदनागस्य कनिष्ठायाम् ॥

कुमुद्वतीबीजम् । न । बेरा इतिप्रसिद्धे कैरविणीफले ॥ भवेत् कुमुद्वतीबीजं स्वादुरूक्षंहिमंगुरु ॥

कुमोदकः । पुं । विष्णैा ॥ इतिहेमचन्द्रः ॥ कोः पृथिव्यामोदकः पालकस्वात् ॥

कुम्प्रः । त्रि । बाहुकुण्ठे । दोर्गडैा । टुण्डा । इति भाषा ॥

कुम्बा । स्त्री । सुगहनायामावृतैा । हविडवेष्टने । अस्पृश्यादिदर्शनवारणायवेष्टने ॥ कुम्बति अनयावा । कुबि आच्छादने । चितिपूजिकथिकुम्बिचर्चश्चेत्यङ् । टाप् ॥

कुम्भः । पुं । एकादशे राशैा । हृद्रोगे ॥ जन्मकालिकचन्द्राश्रितैतद्राशिफलम् । यथा । अलसतासहितोऽन्यशुभप्रियः कुशलता कलितोऽतिविचक्षणः । कलशगामिनि शीतकरेमरः सदसि सज्जनमान सुरोचनः इति ॥ तल्लग्नेजातस्यफलन्तु । कुम्भलग्ने समुद्भूतश्चलचित्तोतिसैाहृदः । परदारतो नित्यं सत्त्वकायोमहासुखी ॥ हस्तिमूर्द्धांसे । गजशिरसः पिण्डद्वये ॥ यथा । ते क्षत्रियाः कुण्डलिनो युवानः परस्परं सायकविक्षताङ्गाः । कुम्भेषु लग्नाः सुषुपु र्गजानां कुचेषु लग्ना इवकामिनीनामिति ॥ राक्षसान्तरे । कुम्भकर्णस्य पुत्रे ॥ वेश्यापतैा ॥ प्राणायामाङ्गकुम्भके ॥ परिमाणान्तरे ॥ सच द्विपलशतं द्रोणो विंशतिद्रोणा

स्वकुम्भ: इति धान्यं दशाढ्य: कुम्भिन्य इत्यत्राह कुल्लूकभट्ट: । अन्यच्च । द शद्रोणोभवेत् खारी कुम्भ स्तु द्रोण विंशतिरिति प्रायश्चित्ततत्त्वेकात्या यनवाक्यम् ॥ वैद्यक परिभाषयातु द्रोणद्वयपरिमाणे । ६४ सेर इति भाषा ॥ कलशे । घटे ॥ अस्य परि माणं । यथा । षट्‌त्रिंशदङ्गुलायाम षोडशाङ्गुलमुखकैः । चतुरङ्गुल कं कण्ठं मुखं तस्य षडङ्गुलम् ॥ प- ञ्चाङ्गुलिमितं मूलंविधानं घटनिर्मि ताविति ॥ कलावतीदीपोक्तमानं यथा । पञ्चाशदङ्गुलव्याम उत्सेध: षोडशाङ्गुल: । कलसानां प्रमाणन्तु मुखमष्टाङ्गुलं स्मृतम् ॥ षट्‌त्रिंशद ङ्गुलं कुम्भं विस्तारोन्नतिशालिनम् । षोडशं द्वादशं वा पि ततोन्यूनं न कारयेदिति ॥ न । गुग्गुलौ ॥ त्रिवृति ॥ कुम्भूमिं कुत्सितं वा उ म्भति । उम्भपूरणे । कर्मण्यण् । पचा द्यच्वा । शकंध्वादि: ॥

कुम्भक: । पुं । दक्षिणहस्तेन नासापु टद्वयंधृत्वा प्राणायामाङ्गे वायुस्तम्भ ने । पूरकेण पूरितस्य वायोरन्तरेव निरोधे ॥ कुम्भको निश्चलश्वास इतिं याज्ञवल्क्य: ॥ सद्वृत्तिनैश्चल्ये ॥ आ ख्यासन्ध्यानदार्ढ्ये ॥ त्यागसङ्ग्रहणे हित्वा निरोध: कुम्भक: स्मृत: । रो धशक्ति स्तदभ्यासा द्यक्ति मेत्यनि वारिता ॥

कुम्भकर्ण: । पुं । रावणानुजे ॥

कुम्भकार: । पुं । शूद्रागर्भे विश्वकर्मौर सजाते जातिविशेषे । कुलाले । च क्रिणि ॥ कुम्भं करोति । डुकृञ्० । कर्मण्यण् । उपपदसमास: ॥ कुक्कु भपक्षिणि ॥

कुम्भकारिका । स्त्री । कुलत्थायाम् ॥

कुम्भकारी । स्त्री । कुलत्थिकायाम् ॥ मनश्शिलायाम् ॥ कुलत्थाञ्जने ॥ कुम्भकारस्य योषिति ॥ जात्यन्तात् टिड्ढेति ङीप् ॥

कुम्भतुम्बी । स्त्री । अलाबूभेदे । गो रक्षतुम्ब्याम् । गोरखतुंबी गोल तूंबी इतिभाषा ॥

कुम्भदासी । स्त्री । कुट्टन्याम् ॥

कुम्भयोनि: । पुं । अगस्त्यमुनौ ॥ वशि ष्ठमुनौ ॥ द्रोणाचार्ये । कुम्भोयो निरस्य ॥ द्रोण पुष्प्याम् ॥

कुम्भला । स्त्री । मुण्डितिकायाम् । मु ण्डी इति भाषा ॥

कुम्भवीजक: । पुं । रीठाकरञ्जे ॥

कुम्भशाला । स्त्री । कुम्भनिर्माणादिगृ हे । पाकपुट्याम् ॥ इतिहेमचन्द्र: ॥

कुम्भसन्धि: । पुं । आरघे । हस्तिकुम्भ

घयमध्यस्थाने ॥

कुम्भसम्भवः । पुं । अगस्त्यमुनौ ॥ कुम्भात् कलशात् सम्भव उत्पत्तिर्यस्य सः ॥

कुम्भा । स्त्री । वेश्यायाम् ॥ नागकुम्भीतिप्रसिद्ध भेषजे । नागदन्त्याम् ॥

कुम्भाण्डः । पुं । बाणासुरस्य मन्त्रिविशेषे ॥ कुष्माण्डे ॥

कुम्भाण्डी । स्त्री । कुष्माण्ड्याम् ॥

कुम्भाभिषः । पुं । शनिग्रहे ॥

कुम्भालाबुः । स्त्री । कुम्भतुम्ब्याम् ॥

कुम्भिका । स्त्री । पाना इति गौडभाषा प्रसिद्ध जलजद्रव्यविशेषे । काश्यादिदेशेषु कुम्भीति ख्याते पानीयपृष्ठजे । वारिपर्ण्याम् ॥ वारिपर्णी वृक्षत्प्रथा कुम्भिकेति प्रकीर्त्तिता ॥ पाटलावृक्षे ॥ शोणपुष्प्याम् ॥ नेत्ररोगवि० ॥ यथा । वर्त्मान्ते पिडका ध्माता भिद्यन्ते च स्रवन्ति च । कुम्भीकबीजसदृशाः कुम्भिकाः सन्निपातजाः इतिमाधवः ॥ कुम्भोल्यस्याः । अतइनिठनाविति ठन् ॥

कुम्भी । पुं । हस्तिनि ॥ कुम्भीरे ॥ गुग्गुलौ ॥

कुम्भिनीबीजम् । न । जयपाले ॥

कुम्भिपाकी । स्त्री । कटफले ॥

कुम्भिमदः । पुं । हस्तिमदे ॥

कुम्भिलः । पुं । चौरे ॥ श्यालके ॥ श्लोकार्थचौरे ॥ श्याले ॥ इति हेमचन्द्रः ।

कुम्भी । स्त्री । उखायाम् ॥ पाठावृक्षे ॥ वारिपर्ण्याम् ॥ कट्फले ॥ कुम्भीपुष्प इति कोकणदेश प्रसिद्ध वृक्षविशेषे । रोमालुविटपिनि ॥ दुन्दुभ्याम् ॥ गर्गर्याम् ॥ कुम्भीव कुम्भी रसाधारत्वात् ॥

कुम्भीकः । पुं । देववल्लभे । पुन्नागवृक्षे ॥ कुम्भिकायाम् ॥ नपुंसकभेदे ॥ तस्य लक्षणं यथा । स्वे गुदे ऽब्रह्मचर्याद्यः स्त्रीषु पुंवत् प्रवर्त्तते । स कुम्भीकइति ज्ञेयो गुदयोनिः स उच्यत इति ॥

कुम्भीका । स्त्री । कच्छदेशे कुम्भिका कारफलायां लतायाम् ॥

कुम्भीधान्यः । पुं ।
कुम्भीधान्यकः । पुं । } वर्षनिर्वाहोचितधान्यादिधने गृहस्थब्राह्मणे ॥

कुम्भीनसः । पुं । क्रूरसर्पे ॥

कुम्भीनसी । स्त्री । लवणासुरमातरि । रावणभगिन्याम् ॥

कुम्भीपाकः । पुं । नरकविशेषे । सम्प्रतापने ॥ य इह वा उग्रः पशून् पक्षिणो वा प्राणत उपरन्धयति तं अपकरुणं पुरुषादैरपि विगर्हितममुत्र यमानुचराः कुम्भीपाके तप्ततैले उपरन्धयन्ति ...

सीपाकइति श्रीभागवतम् ॥

कुम्भीरः । पुं । कुम्भीर इति नाँका इतिच भाषा प्रसिद्धे मारके जलजन्तुवि० । नक्रे । गिलग्राहे ॥ कुम्भिनं हस्तिनमीरयति । कर्म्मण्यण् । उपपदसमासः ॥

कुम्भीरमक्षिका । स्त्री । कुमीरापोका इति गौड भाषा प्रसिद्धे मक्षिका विशेषे । कणायाम् ॥ इतिहारावली ॥

कुम्भीबीजम् । पुं । जयपाले ॥

कुम्भोलूः । न । गुग्गुलौ ॥

कुम्भोलूखलकम् । न । गुग्गुलौ ॥ कुम्भोलूखलकाकारावृक्षकोशाक्षियोतम् ॥

कुरका । स्त्री । सल्लकीवृक्षे ॥

कुरङ्करः । पुं । } सारसपक्षिणि । पुष्कराह्वे ॥
कुरङ्कुरः । पुं । }

कुरङ्गः । पुं । हरिणविशेषे ॥ कुरङ्ग ईषत्ताम्रः स्याद्धरिणाकृतिको महान् ॥ कुरङ्गोऽहंहणो बल्यः शीतलः पित्तहृद्गुरुः । मधुरो वातहृद्ग्राही किञ्चित् कफकरो मतः इति । हरिणस्यगुणैस्तुल्यः कुरङ्गः कथितोबुधैरितिचभावप्रकाशः ॥ मृगे । वातायौ ॥ कौ रङ्गति । रगि० अच् ॥ कैरङ्गौ स्यस्यवा । अर्शआद्यच् ॥ यद्वा । किरति । कृवि० । भिदादिभ्यः किदिच्य

ङ्च प्र० । बाहुलकात् उत्वम् । कुरशब्देवाऽस्तु ॥

कुरङ्गनयना । स्त्री । मृगनयनतावाना र्याम् । कुरङ्गाक्ष्याम् ॥

कुरङ्गनाभिः । पुं । कस्तूर्याम् ॥

कुरङ्गमः । पुं । एणे । ऋष्ये ॥ हरिणविशेषोयम् ॥

कुरङ्गाक्षी । स्त्री । एणीनयनायाम् ॥

कुरङ्गिका । स्त्री । मुद्गपर्ण्याम् ॥

कुरङ्गी । स्त्री । कुरङ्गयोषायाम् । मृग्याम् ॥

कुरचिल्लः । पुं । कर्कटे ॥

कुरटः । पुं । चर्म्मकारे ॥

कुरण्टः । पुं । } पीतायां झिण्ट्याम् । पीताम्लाने ॥ कुर्य्यते । कुरशब्दे । बाहुलकात् अटः । स्वार्थे कन् ॥
कुरण्टकः । पुं । }

कुरण्डः । पुं । मुष्कवृद्धिरोगे । अण्डवर्द्धने ॥ साकरुण्डवृक्षे ॥

कुरण्डकः । पुं । त्रिसन्ध्यादेव्याःस्थाने ॥

कुररः । पुं । उत्क्रोशखगे ॥ कवते । कुङ्शब्दे । कुवःक्ररन् ॥

कुरराङ्घ्रिः । पुं । देवसर्षपे । रक्तमूलके । सूक्ष्मदले ॥

कुररी । स्त्री । मेष्याम् ॥ कुररस्त्रियाम् ॥

कुररीहता । स्त्री । छन्दोविशेषे ॥ कुर

रीवृत्ता ननभजैर्लगयुक्। यथा। स्मरतिविरोज्झितस्य भवदेव चिरस्थितवन्धुबुद्बुदस्य पयसोनुकृतिम्। विरलविकीर्णवज्रशकलासकला मिह विदधाति धौतकलधौतमहीति॥

कुरलः। पुं। उत्क्रोशे। कुररे॥ चूर्णकुन्तले॥ इति धरणी॥

कुरवः। पुं। पीतझिण्ट्याम्॥ कुरवके। रक्तझिण्ट्याम्॥ सितमन्दारे॥ कुत्सितशब्दे॥ त्रि। कुत्सितशब्दयुक्ते॥

कुरवकः। पुं। रक्ताम्लाने। रक्तसहायाम्। रक्तझिण्ट्याम्॥ पीतझिण्ट्याम्॥ त्रि। कुत्सितरवे॥ कुत्सितः ईषद्वा अलीनां मत्तमकरन्दत्वात् रवोऽस्य। बहुव्रीहित्वात्कादेशः॥

कुरसः। पुं। मद्यभेदे॥ कुत्सितरसे॥ त्रि। कुत्सितरसयुक्ते॥ कुत्सितो रसोऽस्य॥

कुरसा। स्त्री। गोजिह्वालतायाम्॥

कुराहः। पुं। कुलाहे। ईषत्पाण्डीकृष्णजङ्घे घोटके॥ इति हेमचन्द्रः॥

कुरी। स्त्री। तृणधान्यप्रभेदे॥

कुरीरः। पुं। कम्बले॥ न। मैथुने॥ क्रियते। डुकृञ्०। कृञ उच्चेति ईरन्प्रत्ययः। उदन्तादेशश्च॥

कुरुः। पुं। आग्नीध्रराजपुत्रे। प्रियव्रतस्य पौत्रे॥ चन्द्रवंशीयराजविशेषे। सम्वरणराजभार्यायां सूर्यकन्यायां तपत्यां जाते॥ ओदने। भक्ते॥ श्रीकण्ठजाङ्गले॥ कण्टकारिकायाम्॥ कर्त्तरि॥ करोति। डुकृञ्०। कृग्रोरुश्चेति कुः॥ जम्बूद्वीपस्य नववर्षान्तर्गते वर्षविशेषे॥ कुरवः क्षत्रियाः। तेषां निवासो जनपदः कुरवः। निवासेऽर्थो जनपदे लुप्। लुपि युक्तवद्व्यक्तिवचने॥ पुं भू। नीवृद्विशेषे॥ हस्तिनापुरमारभ्या कुरुक्षेत्रा द्दक्षिणे। पञ्चालपूर्वभागे तु कुरुदेशः प्रकीर्त्तितः॥

कुरुकन्दकम्। न। मूलके॥

कुरुक्षेत्रम्। न। देवयजने। देशविशेषे। धर्मक्षेत्रे। कुरुपाण्डवानां युद्धभूमौ॥ तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानाञ्च मचक्रुकस्य च। एतत् कुरुक्षेत्रसमन्तपञ्चकं प्रजापतेरुत्तरवेदिरुच्यते॥ त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते। अर्द्धं तत्तु कुरुक्षेत्रमर्द्धं तत्तु पृथूदकम्॥ कुत्सितं रौतीति कुरु पापंकर्म तस्य क्षेपणात् गमनकारणत्वात् क्षेत्रम्॥ यद्वा। कुः पृथिवी तस्यां रौति शब्दं करोति यः प्राणस्तस्य निवासभूतम्॥ स्थाणु

प्रियादेव्याःस्थानमेतत् ॥

कुरुक्षेत्रयोगः । पुं । एकस्मिन् सावन दिने तिथित्रयनक्षत्रत्रययोगत्रयाणां स्पर्शे ॥ कुरुक्षेत्रे मरणयोगे ॥ ॥ यथा । पञ्चग्रहयुते मन्दौ कन्यसंस्थे बृहस्पतौ । सौम्यक्षेत्रगते चन्द्रे कुरुक्षेत्रे गतिर्भवेदिति जातकामृतसङ्ग्रहे योगाध्यायः ॥

कुरुटः । पुं । सितावरशाके ॥

कुरुण्टः । पुं । पीतभिण्टिकायाम् ॥ पीताम्लाने ॥

कुरुण्टकः । पुं । पीतपुष्पाम्लाने ॥ पीतभिण्टिकायाम् । सहचर्याम् ॥ कुरण्टति कटिस्तेयकरणे । ण्वुल् कुनचा । कुत्सितः कौवा कुरुण्टकः । कुगतीति समासः ॥

कुरुण्टी । स्त्री । दारुपुत्तलिकायाम् ॥

कुरुपतिः । पुं । युधिष्ठिरे ॥

कुरुम्बम् । न । कुलपालके । कमला नेबू इति गौडभाषाप्रसिद्धे । नारङ्ग विशेषे ॥

कुरुम्बा । स्त्री । } द्रोणपुष्प्याम् ॥
कुरुम्बिका । स्त्री । }

कुरुम्बिका । स्त्री । सैंहलीवृक्षे ॥

कुरुराट् । न । दुर्योधने ॥

कुरुराजः । पुं । दुर्योधने ॥ कुरूणां देशविशेषाणां राजा । टच् ॥

कुरुलः । पुं । भालस्थितचूर्णकुन्तले । भ्रमरके । भ्रमरालके ॥

कुरुवकः । पुं । शोणाम्लाने । रक्ताम्लाने । रक्तभिण्ट्याम् ॥ पीतभिण्ट्याम् ॥ ईषद्रौति । रु शब्दे । संज्ञायां कुन् । उवङ् ॥

कुरुवर्षः । पुं । कुरुसंज्ञके वर्षे ॥

कुरुविन्दः । पुं । मेघनामनि । मुस्तायाम् ॥ कुल्माषे ॥ व्रीहिभेदे ॥ मुकुरे ॥ हिङ्गुले ॥ न । पद्मरागमणौ । मानक इति भाषा ॥ काचलवणे ॥ कुरून् विन्दति । विद्लृ लाभे । अनुपसर्गाल्लिम्पविन्दधारिपारि वेद्युदेजिचेतिसातिसाहिभ्यश्चेति शः ॥

कुरुविल्वः । पुं । पद्मरागमणौ ॥

कुरुविस्तः । पुं । स्वर्णपले । ४ तोला सोना इतिभाषा ॥ कुरुषु विस्तः ॥

कुरुवृद्धः । पुं । भीष्मपितामहे ॥ कुरुषु कुरुवंशजेषु वृद्धः ॥

कुरूद्वहः । पुं । युधिष्ठिरे ॥

कुरूप्यम् । न । रङ्गे ॥

कुर्मञ्जः । पुं । कुलञ्जनवृक्षे । गन्धमूले ॥

कुर्परः । पुं । कफोणौ ॥ जानुनि ॥ कुरति । कुर शब्दे । क्विप् ॥ कोरणम् । संपदादित्वात् । पिपर्त्ति । पॄ० अच् । कुरश्चासौपरश्च ॥ कुरा शब्देन परो वा ॥

कुर्प्पासः। पुं। अर्द्धोरुके॥

कुर्प्पासकः। पुं। कञ्चुलिकायाम्। आँगी काँचुली चोली इतिचभाषा॥

कुर्वत्। त्रि। कर्मकारे। भृत्ये॥ करोति। डुकृञ्०। शतृ॥ तनादिकृञभ्यउः। अतउत्सार्वधातुके। यण्॥

कुर्व्वाणः। त्रि। भृत्ये॥ कारके॥ कुरुते। डुकृञ्०। शानच्॥

कुलम्। न। जनपदे॥ मध्यमजलद येन यावती भूमिर्वोह्यते तावत्यां भूमौ॥ दशी कुलन्तु भुक्तीतेतिमनुः॥ गोत्रे॥ सजातीयगणे॥ यथा। विप्रकुलम्॥ आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम्। निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम्॥ भवने॥ तनौ। देहे॥ सब इति भाषा प्रसिद्धेषु जीवादिषु यथा। जीवः प्रकृतितत्त्वञ्च दिक्कालाकाशमेवच। क्षित्यप्तेजो वायवश्च कुलमित्यभिधीयतेइति॥ पुं। कुलिके। शिल्पिकुलप्रधाने॥ कोलति। कुलसंस्त्यानेबन्धुषुच। इगुपधेतिकः॥ यद्वा। कूयते। कुङ् शब्दे। वा० लक्॥ कुम् भूमिंलातिवा। कोलीयते वा। लीङ् श्लेषणे। अन्येभ्योपीतिडः॥

कुलकः। पुं। वल्मीके॥ काकतिन्दुके॥ कुलश्रेष्ठे॥ मरुबकवृक्षे॥ हरितसर्पे॥ न। पटोले॥ पद्यादिसम्बन्धो कसमूहे॥ त्रि। शिल्पिकुलप्रधाने। कुलश्रेष्ठिनि॥ कुलस्य गृहस्य प्रतिकृतिरिव। इवेप्रतिकृतावितिकन्॥ यद्वा कोलति। कुलसंस्त्याने। इगुपधेतिकः। स्वार्थे कन् वा॥

कुलकर्क्कटी। स्त्री। चीनाकर्कव्याम्॥

कुलकुण्डलिनी। स्त्री। }
कुलकुण्डली। स्त्री। } मूलाधारपद्मस्थितशिवशक्तिविशेषे॥

कुलकः। पुं। करताल्याम्। तालमर्द्दले॥ इतिहारावली॥

कुलचया। स्त्री। शूकशिम्ब्याम्॥

कुलजः। पुं। कुलीने। सत्कुलप्रसूते॥ कुले जातः। सप्तम्यांजनेर्डः॥

कुलजा। स्त्री। कुलपालिकायाम्॥ डान्ताट्टाप्॥

कुलञ्जः। पुं। कुलञ्जनवृक्षे॥

कुलञ्जनः। पुं। स्वनामख्याते वृक्षे। गन्धमूले॥ कुलञ्जनस्य स्वरकृत् कफवातप्रबोधनः। अर्क इतिशेषः॥

कुलटा। स्त्री। असत्याम्। पुंश्चल्या

म् । वल्कलयाम् ॥ अभिचारार्थं कुलानि चटति । चट० पचाद्यच् । शकंध्वादिः ॥ भिक्षुक्याम् । सच्छाम् ॥ भिक्षार्थं कुलानि चटति । पूर्व्ववत् प्रक्रिया ॥ परकीयान्तर्गतनायिकाविशेषे ॥

कुलतिथिः । पुं । स्त्री । चतुर्थ्यष्टमीद्वादशीचतुर्द्दशीषु ॥ यथा । द्वितीया दशमी षष्ठी कुलाकुल मुदाहृतम् । विषमास्त्वऽकुलाः सर्व्वाः शेषास्तु तिथयः कुलाः ॥ इति तन्त्रशास्त्रम् ।

कुलत्थः । पुं । स्वनामख्याते ऽन्नविशेषे । ताम्रबीजे । कुलथ कुलथी इति च भाषा ॥ कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत् । लघुर्विदाही वीर्य्योष्णः कासश्वासकफानिलान् ॥ हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान् । स्वेदसङ्ग्राहको मेदःकफज्वरकृमीन् हरेत् ॥

कुलत्था । स्त्री । कुलत्थिकायाम् । दृक्प्रसादायाम् । वनकुलत्थे ॥ अस्या गुणा यथा । कटुत्वम् । तिक्तत्वम् । अर्शःशूलनाशित्वम् । विबन्धाध्मानशमनत्वम् । चक्षुर्हितत्वम् । व्रणरोपणत्वञ्चेति ॥ कुलत्थाञ्जने ॥

कुलत्थाञ्जनम् । न । कुलत्थिकायाम् । प्रसादायाम् ॥

कुलत्थिका । स्त्री । कुलत्थाकाराश्मप्रस्तरविशेषे । चक्षुष्यायाम् । खापरिया इति भाषा ॥ वनकुलत्थे ॥ कुलत्थप्रतिकृतिः । इवेप्रतिकृताविति कन् ॥ यद्वा । कुले तिष्ठति । ष्ठा० । सुपीतिकः । स्वार्थे कन् । पृ० ॥

कुलधर्म्मः । पुं । असाधारणकुलोचितधर्म्मे । स्वजातीयधर्म्मे । कुलाचारे ॥ यथा । उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन । नरके नियतं वासो भवतीत्यनुशुश्रुमेति भगवद्गीता ॥ दिव्यवीरपशुभावान्तर्गतदिव्यधर्म्मे । यथा । कुलधर्म्मात् परो धर्म्मो नास्ति माने ऽत्र मामके । यस्यानुष्ठानमात्रेण ब्रह्मज्ञानी नरो भवेदिति ॥ कुलस्य धर्म्मः ॥

कुलधारकः । पुं । औरसात्मजे । पुत्रे ॥ कुलस्य वंशस्य धारकः ॥

कुलनक्षत्रम् । न । भरण्यार्द्राश्लेषापुष्यमघोत्तरफल्गुनीचित्राविशाखाज्येष्ठाश्रवणोत्तरभाद्रपदः ॥ यथा । वारुणार्द्राभिजिन्मूलं कुलाकुल मुदाहृतम् । कुलानि समधिष्ण्यानि शेषाणि चाकुलानि चेति तन्त्रशास्त्रम् ॥

कुलनाथः । पुं । कुलपतौ ॥

कुलनाशः । पुं । उष्ट्रे ॥ कुलध्वंसे ॥

स्वकारणंयथा। कूर्मोपविभागे १५ ऽध्याये। अन्ततात् पारदार्याच्च तथाऽभक्ष्यस्य भक्षणात्। अश्रौतधर्माचरणात् क्षिप्रंनश्यतिवैकुलम्॥ अश्रोत्रियेवेददानात् वृषलेषु तथैव च। विहिताचारहीनेषु क्षिप्रंनश्यतिवैकुलमिति॥ तदभावस्य कारणम्। यावच्च वेदधर्माःस्यु र्यावत्स्याच्छङ्करार्चनम्। यावत्स्याच्छुचिकृत्यंच तावत्त्वाप्नोभवेत्सहीति॥

कुलपतिः। पुं। मुनिविशेषे॥ यथा। मुनीनां दशसाहस्रं यो ब्रदानादिपोषणात्। अध्यापयति विप्रर्षिरसौ कुलपतिः स्मृतः। इतिपुराणोक्तलक्षणलक्षिते॥ गणमुख्ये। जमादार हौलदार इत्यादि यवनभाषा प्रसिद्धे॥ यथा। शिविकावाहानां कुलपतिः॥ कुलस्यपतिः॥

कुलपथः। पुं। दमनकवृक्षे॥

कुलपर्वतः। पुं। महेन्द्रादिसप्तशैलेषु॥ यथा। महेन्द्रो मलयः। सह्यः शुक्तिमा नृक्षपर्वतः। विन्ध्य श्चपारिपात्र श्चसप्तात्र कुलपर्वताः इति। अत्र भारतेवर्षे। इतिविष्णुपुराणम्॥

कुलपालकम्। न। कुदम्वे। कमलानेवु इति गौड भाषा प्रसिद्धे नारं

ङ्गविशेषे॥ त्रि। वंशप्रतिपालके॥

कुलपालिः। स्त्री। कुलवध्वाम्॥

कुलपालिका। स्त्री। कुलस्त्रियाम्। साध्व्याम्। अभिचारवारणेन कृतकुलरक्षायाम्॥ यथा। एकत्र कौलव्रतभङ्गशङ्का विदग्धता भङ्गभयं परत्र। इत्याकुलानां कुलपालिकानां गतागतै रेव गताशिया मेति॥ अपिच। सुखयतितरां न रमयति परिचयलेशं गताङ्गने व श्रीः। कुलकामिनीव नोज्झति वाग्देवी जन्मजन्मापीति॥ कुलम्. पालयति। पालरक्षणे। कर्मण्यण्। स्वा० कन्॥

कुलम्भरः। पुं। कुलम्भले। सन्धिचौरे॥

कुलवान्। त्रि। कुलिनि॥ कुलमस्यास्ति। तदस्यास्त्यस्मिन्निति मतुप्॥

कुलवर्णा। स्त्री। रक्तत्रिवृति॥

कुलवारः। पुं। भौमशुक्रयोः॥ यथा। रवि श्चन्द्रो गुरुः सौरि-श्चत्वारश्चाकुला इमे। भौमशुक्रौ कुलाख्यौच बुधवारः कुलाकुलः॥ इति तन्त्रशास्त्रम्॥

कुलविप्रः। पुं। कुलपुरोहिते॥

कुलश्रेष्ठी। त्रि। शिल्पिकुलप्रधाने। कुलिके॥ कुलश्रेष्ठत्वमस्यास्ति। इनिः॥

कुलसंज्ञक: । पुं । तिथिवारनक्षत्रविशेषे ॥ यथा । अर्काष्टे वेदतिथिषु । कुजशुक्रयो: । पूर्वाश्विश्रमघेन्दुचर्मादृ चनदीशेन्द्रवियासु ॥

कुलसत्तम: । त्रि । कुलश्रेष्ठिनि ॥

कुलसम्भव: । पुं । बीज्ये ॥ कुलेसम्भवति । अच् ॥ कुलेसम्भवोऽस्य वा ॥ यद्वा । सम्भवत्यस्मात् । अपादाने अप् । कुलस्य सम्भव: ॥

कुलसौरभम् । न । मरुवकवृक्षे ॥

कुलस्त्री । स्त्री । कुलपालिकायाम् । नान्यगामिन्यां कुलरक्षिकायाम् ॥ कुलस्य पालिका स्त्री । शा° ॥

कुलहण्डक: । पुं । आरणी । आवर्त्ते ॥

कुलाकुलतिथि: । पुं स्त्री । द्वितीयाषष्ठी दशमीषु ॥ यथा । द्वितीयादशमीषष्ठी कुलाकुल मुदाहृतमिति तन्त्रशास्त्रम् ॥

कुलाकुलनक्षत्रम् । न । आर्द्रामूलाऽभिजिच्छतभिषासु ॥ यथा । वारुणाद्रीभिजिन्मूलं कुलाकुल मुदाहृतमिति ॥

कुलाकुलवार: । पुं । बुधवारे ॥ यथा । भौमशुक्रौकुलाख्यौ हि बुधवार: कुलाकुल इति ॥

कुलाकुलसंज्ञक: । त्रि । तिथिवारनक्षत्रविशेषे ॥ यथा । द्वितीयाषष्ठीदशमीषु ॥ बुधे ॥ मूलाशतभिषाद्रीभिजित्सु ॥

कुलाचल: । पुं । कुलपर्वते ॥

कुलाचार: । पुं । कुलधर्म्मे ॥ धर्मकामार्थमोक्षप्रदे आगमोक्ताचारविशेषे ॥ यथा । जीव: प्रकृतितत्त्वञ्च दिक्कालाकाशमेवच । क्षित्यप्तेजोवायवश्चकुलमित्यभिधीयते ॥ ब्रह्मबुद्ध्या निर्विकल्पमेतेष्वाचरणञ्च यत् । कुलाचार: सएवाद्येधर्मकामार्थमोक्षद इति ॥ त्रि । कुलाचारविशिष्टे ॥ कुलेआचार: ॥ कुलाचारोऽस्ति अस्य । अर्श आद्यच् ॥

कुलाचार्य्य: । पुं । कुलाचाराभिज्ञे ॥

कुलाट: । पुं । क्षुद्रमत्स्यप्रभेदे ॥

कुलाद्रि: । पुं । कुलाचले । कुलपर्वते ॥

कुलाधारक: । पुं । पुत्रे ॥ कुलस्य आसमन्तात् धारक: ॥

कुलाय: । पुं । यन्त्रविशेषे ॥ स्थानमात्रे ॥ नीडे । पक्षिनिलये । घोंसला कोता इति भाषा ॥ न । शरीरे ॥ कुल: पक्षिसङ्घातोऽयतेऽत्र । अय गतौ । हलश्चेतिघञ् ॥ यद्वा । कौ लायोगति रस्मात् ॥

कुलायस्थ: । पुं । पक्षिणि ॥ कुलाये तिष्ठति स्था° । सुपिस्थ इतिक: ॥

कुलायिका । स्त्री । पक्षिशालायाम् ॥

कुलालः । पुं । कुक्कुभेखगे ॥ घूकपक्षिणि ॥ कुम्हार इति भाषा प्रसिद्धे कुम्भकारे ॥ अस्योत्पत्तिर्यथा । मालाकारात् कर्मकार्यान्तु कुम्भकारोव्यजायत इति प० सं० ॥ पट्टिकारात्तैलिकायां कुम्भकारोबभूवह । इति प० प० ॥ कुंभूमिं लाडयति । लडविलासे । कर्मण्यण् । डलयोरैक्यम् । कुलमालयति वा । आतोनुपेतिकः । कुलमलति वा । अल० । अण् ॥ कुलं लुनाति वा । लूञ् छेदने । डः ॥ कोलति वा । कुल संस्त्याने । तमिविशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन् । इति कालन प्रत्ययः ॥

कुलाली । स्त्री । नीलोत्पलभेदे । अञ्जनाकारे । चक्षुष्यायाम् । कुलत्याकाराञ्जनप्रस्तरविशेषे ॥ अरण्यकुलत्थिकायाम् ॥ कुलालभार्यायाम् ॥ कुलमलति । अल० अण् । ङीप् ॥

कुलाहः । पुं । ईषत् पीतवर्णे कृष्णजानौ घोटके ॥ इतिहेमचन्द्रः ॥

कुलाहकः । पुं । कृकलासे ॥ राङ्गाकुले खाडा इतिगौडभाषाप्रसिद्धे वृक्षविशेषे ॥

कुलाहलः । पुं । कोकसीमा इतिगौडभाषाप्रसिद्धे क्षुद्रवृक्षविशेषे । भूकदम्बे ॥

कुलिः । पुं । हस्ते । भुजादले ॥ स्त्री । कण्टकार्याम् ॥

कुलिकः । पुं । अष्टमहानागान्तर्गतमहानागविशेषे ॥ कात्याकडा इतिगौड प्रसिद्धे द्रुमविशेषे ॥ वेलाविशेषे ॥ यथा । शक्रार्कद्विगवसुरसाब्ध्यश्विन्यः कुलिकारवेः । रात्रौनिरेकास्तिथ्यंशाः शनैश्चान्त्योपिनिन्दितइति ॥ त्रि । कुलश्रेष्ठे । कुलसत्तमे । शिल्पिकुलप्रधाने ॥ कुलमधीनत्वेनास्त्यस्ति । अतइनिठनाविति ठन् ॥

कुलिङ्गः । पुं । फिङ्गा इतिगौडभाषाप्रसिद्धे पक्षिविशेषे । धूम्याटे । फिङ्गके ॥ भूप्रस्थासवगमनचारिणि धान्यजीविनिखगे । चटके । गौरय्याचिडी इतिभाषा ॥ कुलिङ्गः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः । सन्निपातहरोवेश्म चटकस्त्वतिशुक्रलः ॥ त्रि । कुत्सितलिङ्गधारिणि ॥ कुत्सितंलिङ्गमस्य ॥

कुलिङ्गकः । पुं । कलविङ्के । चटके ॥

कुलिङ्गाक्षी । स्त्री । पेटारी इतिगौडभाषाप्रसिद्धे पेटिकावृक्षे ॥

कुलिङ्गी । स्त्री । कर्कटशृङ्गीवृक्षे ॥

कुली । त्रि । कुलवति ॥ कुलमस्यास्य । बलादित्वात् पक्षे इनिः ॥

कुलिरः । पुं । कुलीरे । कर्कटे ॥

कुलिशः । पुं । न । दम्भोलौ । वज्रे ॥ कुलौ हस्ते शेते अन्येभ्योपीतिडः ॥ कुलिनः पर्वतान् श्यति वा । शोत० । आतोनुपेतिकः ॥ कुत्सितम् ईषद्वा लिशति । लिश अल्पीभावे । इगुपधेतिकः ॥ अस्थिसंहारवृक्षे ॥ पुं । मत्स्यविशेषे । कण्ठकाष्ठोले ॥

कुलशिद्रुमः । पुं । स्नुहीवृक्षे । थूहर इति भाषा ॥

कुलिशनायकः । पुं । शृङ्गारबन्धविशेषे ॥ यथा । स्त्रीपादद्वय माकृष्य विमुमुक्षितलिङ्गकः । योनिश्च पीडयेत् कामी बन्धः कुलिशनायकइति ॥

कुलिशपाणिः । पुं । इन्द्रे ॥

कुलिशाङ्कुशा । स्त्री । बौद्धानां विद्यादेवीविशेषे ॥

कुलिशासनः । पुं । शाक्यमुनौ ॥

कुली । स्त्री । कण्टकार्याम् ॥ पत्न्याः ज्येष्ठभगिन्याम् ॥ गौ० ङीष् ॥

कुलीनः । पुं । आजानेये । श्रेष्ठहये ॥ त्रि । कुलाचारस्थिते । कौले ॥ वीरे ॥ कुलोद्भवे । महाकुले । आर्ये ॥ कुलस्यापत्यम् । कुलात्खः ॥ उत्कर्षविशेषविशिष्टवंशजकुलीनइति गौडाः ॥ सच्चवङ्गजकुलाचार्यग्रन्थे कुलदीपिकायामाधुनिककुलीनत्वे न वर्णितो द्रष्टव्यः ॥

कुलीनकः । पुं । वनमुद्गे ॥

कुलीनसम् । न० जले ॥ इतिहेमः ॥

कुलीरः । पुं । काँकडा इतिप्रसिद्धे जलचरे । कर्कटे ॥ कर्कटराशौ ॥ कोलति । कुलसं० । गम्भीरादयश्चेति ईरन् ॥ कोलीयते । लीङ् श्लेषणे । बा० रक् ॥ यद्वा । कुलमस्त्यस्य इति । असदृग्भिः । तमीरयति । कर्मण्यण् । जनकभक्षकत्वात् ॥ लयमंली: । सं० क्विप् । कुत्सितालीः । तां राति वा ॥ कुरीरशब्दस्य कपिलकादित्वाल्लत्वेपि कुलीरः ॥

कुलीरविषाणी । स्त्री । शृङ्ग्याम् ॥

कुलीरशृङ्गी । स्त्री । कर्कटशृङ्गीवृक्षे ॥

कुलीरात् । पुं । कर्कटशिशौ । स्यगवौ ॥ इतिचिकाण्डशेषः ॥

कुलुकम् । न । जिह्वामले ॥ इतिहेमचन्द्रः ॥

कुलुक्कगुञ्जा । स्त्री । उल्कायाम् ॥

कुलेशः । पुं । सदाशिवे ॥ कुलपतौ ॥

कुलेशानी । स्त्री । उमायाम् । पार्वत्याम् ॥

कुलेश्वरः । पुं । सदाशिवे ॥ कुलस्य धर्मविशेषस्य ईश्वरः ॥ गोत्रपतौ ॥

कुलेश्वरी । स्त्री । पार्वत्याम् । शिवायाम् ॥ कुलस्य ईश्वरी ॥

कुलोत्कटः। पुं। कुलीनाश्वे॥

कुलोन्नतः। त्रि। कुलाद्दुन्नतियमिते॥

कुलोद्भवः। त्रि। कुलीने॥ कुलेउद्भवोयस्य॥

कुल्फः। पुं। रोगे॥ शरीरावयवे। गुल्फे॥ कलते। कलशब्दसंख्यानयोः। कलिगलिभ्यामफगस्योश्च॥

कुल्मलम्। न। पापे॥ कुष्णाति। कुषनिष्कर्षे। कुटिकुषिभ्यांक्मलन् कुषेर्लश्च॥

कुल्माषः। पुं। यावके॥ अर्द्धस्विन्नधान्ये। घुंघुनी कोंअरी इतिभाषा॥ अर्द्धस्विन्नास्तु गोधूमा अन्येपि च चणकादयः। कुल्माष इतिकथ्यन्ते शब्दशास्त्रेषुपण्डितैः॥ कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः॥ रुगभेदे॥ चणकांशोः पारिपार्श्विके॥ कीटइष्टमाषे॥ कुत्सितमाषे॥ शूकशून्येयवादौ॥ न। काञ्जिके॥ कुलंमस्यति। मसीपरिणामे। कर्मण्यण्। पृ०॥ यद्वा। कोलति। कुल०। क्विप्। कुल् अर्द्धस्विन्नोमाषोस्मिन्॥ कुल् वन्धुर्माषोस्यवा॥

कुल्माषाभिषुतम्। न। काञ्जिके॥ कुल्माषैर्यवादिभिरर्द्धस्विन्नैरभिषूयतेस्म। षुञः क्तः। षत्वम्॥

कुल्मासः। पुं। कुल्माषार्थेषु॥

कुल्यम्। न। अस्थि। कीकसे॥ अष्टद्रोण्याम्॥ शूर्पे॥ आमिषे॥ मान्ये॥ त्रि। कुलजे। कुलोद्भवे॥ कुलहिते॥ कुलस्यापत्यम्। अपूर्वपदादन्यतरस्यामितियत्॥ कुलेभवम् साधुवा। दिगादिभ्योयत् तत्र साधुरिति वा॥ यद्वा। कोलति कुल्यते वा। कुलसं०। अघ्०यक्॥

कुल्या। स्त्री। सरिन्मात्रे॥ कूल वर्हा इतिभाषाप्रसिद्धायां पयःप्रणाल्याम्। सारणी॥ कुल्याऽल्पाकृत्रिमासरित्॥ जीवन्तिकौषधौ॥ कुलस्त्रियाम्॥ अष्टद्रोणमितेमाने॥ कुले प्राणिगणे कुटुम्बेदाम्पत्ये वा साधुः। तत्रसाधुरितियत्॥

कुवम्। न। उत्पले। जलजपुष्पमात्रे॥ कौवलते। वलसंवरणे। अन्येभ्योपीतिडः॥ यद्वा। कुवते। कूङ् शब्दे कुटादिः। पचाद्यच्युवङ्॥

कुवकालुका। स्त्री। घोलीशाके॥

कुवङ्गम्। न। सीसके॥

कुवज्रकम्। न। वैक्रान्तमणौ॥

कुवलम्। न। उत्पले॥ मुक्ताफले॥ वदरीफले॥ चितेः संवलनाज्जले॥ कौवलते। वल०। पचाद्यच्॥ कुवल्याःफलम्। अणलुकौ। लुक्तद्धितलुकीतिङीषोलुक्॥

कुवलयम्। नं। उत्पले। चन्द्रविकाशिनि। कमोदिनी कें मी इतिभाषा॥ श्वेतं कुवलयम्प्रोक्तं कुमुदं कैरवन्तथा॥ नीलोत्पले॥ इतिराजनिर्घण्टः॥ यथा। कुवलयदलनीलंवर्वरीस्निग्धकेशमिति॥ कमलकुमुदादिसामान्ये जलज पुष्पे॥ कौ र्वलयमिव शोभाकरत्वात्॥ भूमण्डले। भूमिवलये॥

कुवलयापीडः। पुं। कंसस्य हस्तिरूपे दैत्यविशेषे॥

कुवलयिनी। स्त्री। उत्पलिन्याम्॥

कुवलाश्वः। पुं। धुन्धुमारनृपे॥

कुवली। स्त्री। कोलिवृक्षे॥ कौ वलति। वल प्राणने। पचाद्यच्। गौ० ङीष्॥

कुवलेशयः। पुं। विष्णौ॥ कुं भूमिं वलते संवृणोतीति कुवलं तोयम्। वल संवरणे। पचाद्यच्। कुवले जले-शेते। शीङो ऽधिकरणे शेतेरित्यच्। शयवासेष्वलुक्॥

कुवादः। पुं। कुत्सितवादे॥ त्रि। कुचरे। परदोषकथनशीले॥ कुत्सितो वादो ऽस्य। अर्० अच्॥

कुवित्। अ। भूर्यर्थे॥ प्रशंसायाम्॥

कुविन्दः। पुं। शूद्रागर्भे विश्वकर्मणोजाते। तन्तुवाये॥ कुम् भुवं विन्दति कु

त्सितं वा विन्दति। विद्लृ लाभे। गवादिषु विन्देः संज्ञायामिति शः॥ यद्वा। कुप्यति कुप क्रोधे। कुपेर्वाग्वश्चेति किन्दच्॥

कुशृत्तिकम्। पुं। काँटाकरञ्ज इतिगौडभाषाप्रसिद्धे करञ्जभेदे। पूतिके॥ त्रि। कुशृत्तिकर्त्तरि॥

कुवेणिः। स्त्री। मत्स्याधान्याम्॥

कुवेणी। स्त्री। खालुइ इतिगौडभाषाप्रसिद्धे मत्स्यस्थापनपात्रे। मत्स्याधान्याम्॥ कुत्सितं वेणन्ते मत्स्या अस्याम्। वेणृ गतौ। हलश्चेति घञ्। गौरादित्वात् ङीष्॥

कुवेलम्। न। कुवलये॥ इति हेमचन्द्रः॥

कुशः। पुं। रामसुते॥ कुशोन्मृष्टः कुशः। वाल्मीकिना कुशैः सम्मृष्टो गर्भक्लेदोऽस्य॥ योक्त्रे॥ घृतसमुद्रेणावृते द्वीपविशेषे॥ कुशाभून् काश्मनः कौशम्वयम्भुवियि...ति। अयमेवास्य कुशसंज्ञायां कारणम्॥ न। जले॥ पुं। न। कुशा इतिभाषा प्रसिद्धतृणे। दर्भे॥ अस्योत्पत्तिर्यथा। बर्हिष्मतीनामपुरी सर्वसम्पत्समन्विता। न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः॥ कुशकाशा त एवासन् शश्वद्धरितवर्चसः।

ऋषयो ये : पराभाव्य यत्प्राप्तम् य
त्र मोजिरे ॥ इतिश्रीविष्णुभागवत
म् ॥ अस्यगुणा यथा । ह्रस्वदीर्घपत्र
भेदात् कुशस्तु द्विविधो मतः । दर्भ
द्वयं त्रिदोषघ्नं मधुरंतुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रद
रास्रजिदिति ॥ अथ कुशधारणवि
धिस्तत्प्रतिनिषिध्य । पूजाकाले सर्व
दैवकुशहस्तोभवेच्छुचिः । तर्जन्या
रजतंधार्यंस्वर्णं धार्यमनामया ॥ कु
शकार्यकरं यस्मानतुवन्याः कुशाः
कुशाः । कुशेन रहितापूजा विफला
कथिता मया ॥ नान्यस्य रजतस्य
चधार्यं हि निजमङ्गले । इतिवरदा
तन्त्रे १ पटलः ॥ नस्पृशेत् तिलदर्भां
श्च सधवातु कथञ्चनेति ब्राह्मणा सर्व
स्वम् ॥ त्रि । पापिष्ठे ॥ मत्ते ॥ कौ
शेते तिष्ठति । अन्येष्वपीति डः ॥
कुश्यतिवा । कुशश्लेषणे । इगुपधेति
कः ॥ कुपापंश्यति वा । शोऽन्त
कर्मणीति योगविभागात्कः

कुशध्वजः । पुं । राजाजनकस्यानुजे ॥

कुशपः । पुं । पानपात्रे ॥

कुशपुष्पम् । न । ग्रन्थिपर्णे । गांठिया
ला इतिभाषा ॥

कुशलम् । न । कल्याणे । क्षेमे ॥ पुण्ये
। सुकृते ॥ पर्याप्ते ॥ त्रि । शि

क्षिते ॥ नहि कुशलो दृश्यां कालंयापय
यति ॥ मोक्षे ॥ कुतस्तितम् अशुभ
रूपं शलते ऽनेन । शलचलने । प-
चाद्यच् ॥ कुशान् लाति वा । आदा
ने । आतइति कः ॥ यद्वा । कौ पृथि
व्यां शलति । शलचलने । अच् । शि
क्षणेऽयं लक्षणा वा । कौशलति चालय
ति राजकार्याणि ॥ यद्वा । कु पापेष
दुर्थयोः । पापात् शलति बुद्धिवैभ
वात् ॥ यद्वा । कुशयति । कुशसंश्लेष
णे । चौरो धातुर्वा । इषा० कलः ॥
मत्वर्थे सिध्मादित्वात् लज्वा ॥

कुशलप्रश्नः । पुं । कौशल्याम् । कुशल
जिज्ञासायाम् ॥ कुशलस्यप्रश्नः ॥

कुशलवौ । पुं । द्विवचनान्तः । एकयो
क्त्या रामपुत्रयोः ॥

कुशलानुशिष्टः । त्रि । निपुणाचार्यशि
क्षिते ॥ कुशलेन अनुशिष्टः ॥

कुशली । त्रि । कुशलयुक्ते ॥ इनिः ॥

कुशली । स्त्री । अश्मन्तकवृक्षे ॥ चुक्रा
म्लिकायाम् ॥

कुशस्थलम् । न । कान्यकुब्जदेशे ॥

कुशस्थली । स्त्री । द्वारकायाम् ॥

कुशा । स्त्री । रज्ज्वाम् । वल्गायाम् ॥
मधुकर्कट्याम् ॥ छन्दोगाःस्तोत्रीयाग
णनार्थमौदुम्बरान् शङ्कून् कुशा
इति व्यवहरन्ति ॥

कुशाकर: । पुं । वह्नौ ॥

कुशाग्रीय: । त्रि । कुशाग्रतुल्ये ॥ कुशाग्रमिव । कुशाग्राच्छ: ॥

कुशाग्रीयमति: । त्रि । तीक्ष्णबुद्धौ । प्रत्युत्पन्नमतौ । सूक्ष्मदर्शिनि ॥ स्त्री । सूक्ष्मायांबुद्धौ ॥ कुशाग्रीयामतिर्यस्य ॥ कर्मधारयोऽन्यत्र ॥

कुशाग्रीया । स्त्री । तीक्ष्णायां बुद्धौ ॥

कुशारणि: । पुं । दुर्वासोमुनौ ॥

कुशाल्मलि: । पुं । रोहितकवृक्षे ॥

कुशावती । स्त्री । रामात्मजस्य कुशस्य राजधान्याम् ॥ अस्त्यर्थेमतुप् ॥

कुशिंशपा । स्त्री । कपिलशिंशपायाम् ॥

कुशिक: । पुं । मुनिविशेषे । जमदग्ने: पितरि ॥ फाले ॥ सर्जवृक्षे ॥ विभीतकवृ० ॥ अश्वकर्णवृ० ॥ तैलशेषे ॥ त्रि । केकरे ॥ विश्वामित्रस्य पितरि ॥

कुशित: । त्रि । जलमिश्रिते ॥

कुशी । पुं । वाल्मीकिमुनौ ॥

कुशी । स्त्री । फाले । लौहविकारे ॥ कुश शब्दादयोविकारे जानपदेतिङीष् ॥

कुशीदम् । न । रक्तचन्दने ॥ वृद्धिजीविकायाम् । वृद्ध्यै धनप्रयोगे ॥

कुशीलव: । पुं । वाल्मीकौ । प्राचेतसे ॥ कीर्तिसञ्चारकनटे । चारणे ॥ याचके ॥ कुत्सितं शीलमस्य । कुगतीतिसमास: । अन्येभ्यापिदृश्यतेइति व: ॥ कुशीलं वाति वा । वागन्धनयो: । क: ॥ नर्त्तनहते ॥

कुशीलवौ । पुं । एकयोश्चारामात्मजयो: ॥

कुशीवश: । पुं वाल्मीकिमुनौ ॥

कुशूल: । पुं । तुषाग्नौ ॥ अन्नकोष्ठके । इष्टकादिनिर्मिते धान्यस्थापनार्थस्थाने । कोष्ठागारे ॥ इतित्रिकाण्डशेष: ॥

कुशूलधान्यक: । पुं । ब्राह्मणविशेषे । नित्यनैमित्तिकधर्मकृत्यपोष्यवर्गसहितस्य गृहिणो यावता धान्यादिधनेन वर्षत्रयं समधिकंवा निर्वाहो भवति तावद्धने विप्रे । कुशूलं कुशूलपरिमितं धान्यं यस्यस: ॥

कुशेशय: । पुं । कर्णिकारवृक्षे ॥ न । पद्मे ॥ सारसपक्षिणि ॥ कुशेजलेशेते । अधिकरणेशेतेरित्यच् । शयवासेष्वादिनाऽलुक् ॥

कुशेशयकर: । पुं । रवौ ॥ त्रि । अन्यत्र ॥ कुशेशयंकरे यस्य ॥

कुषाकु: । पुं । वानरे ॥ वह्नौ ॥ सूर्ये ॥ त्रि । परोत्तापिनि ॥ कुष्णाति । कुषनिष्कर्षे । कठि कुषिभ्याङ्काकु: ॥

कुषित: । त्रि । जलमिश्रिते ॥

कुषीदम् । न । कुसीदे ॥

कुष्ठ: । पुं । न । पुष्करभेषजे । कूष्ठ

इति गौ०भाषा ॥ पारिभाव्ये ॥ कुष्ठमुत्पाकं कटुस्वादुशुक्रलं तिक्तकं लघु ।· हन्तिवातास्रवीसर्पकासकुष्ठमरुत्कफान् ॥ कोढ इतिप्रसिद्धे पापरोगे । श्वित्रे ॥ म्रियतेयदि कुष्ठेन पुनर्जातस्य तद्भवेत् । नातो निन्द्यतरो रोगो यथा कुष्ठं प्रकीर्त्तितम् ॥ विषभेदे ॥ कुष्णाति रोगम् । कुष० । इतिकुषिनीरमिकाशिभ्यः क्थन् ॥

कुष्ठकेतुः । पुं । भूम्याहुल्ये । मार्कण्डिकायाम् । भुजिलखत्ता इतिभाषा ॥

कुष्ठगन्धि । नं । एलवालुके ॥

कुष्ठगन्धिनी । स्त्री । अश्वगन्धायाम् ॥

कुष्ठघ्नः । पुं । हितावल्याम् ॥

कुष्ठघ्नी । स्त्री । काकोदुम्बरिकायाम् ॥ बाकुच्याम् ॥

कुष्ठनाशनः । पुं । वाराहीकन्दे ॥ गौरसर्षपे ॥ क्षीरीशवृक्षे ॥

कुष्ठनाशिनी । स्त्री । बाकुच्याम् । सोमराज्याम् ॥

कुष्ठलम् । न । कुत्सितस्थले ॥

कुष्ठसूदनः । पुं । आरग्वधे ॥

कुष्ठहन्ता । पुं । हस्तिकन्दे ॥

कुष्ठहन्त्री । स्त्री । बाकुच्याम् ॥

कुष्ठहृत । पुं । खदिरे ॥

कुष्ठारिः । पुं । विट्खदिरे ॥ पटोले ॥ आदित्यपत्रे ॥ खदिरे ॥ गन्धके ॥

कुष्ठितः । त्रि । कुष्ठरोगवति ॥ कुष्ठं सञ्जातमस्य । ता० इतच् ॥

कुष्ठी । त्रि । कुष्ठरोगयुक्ते ॥ वन्द्योपमापेति इनिः ॥

कुष्माण्डम् । न । छेदने ॥ छादने ॥ विकसिते ॥ कुष्णाति । कुष० । कुटिकुषिभ्याक्मक्लन् ॥

कुष्माण्डः । पुं । कुंहडा इतिप्रसिद्ध फलशाके । कर्कारौ ॥ कुष्माण्डं बृंहणं वृष्यं गुरु पित्तास्रवातनुत् । बालं पित्तापहं शीतं मध्यमं कफकारकम् ॥ वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु । बस्तिशुद्धिकरं चेतोरोगहृत् सर्वदोषजित् ॥ अस्य प्रकाराः । यथा । घृते तप्तेविनिःक्षिप्य खण्डान् कुष्माण्डसंभवान् । वार्त्ताकविधिना कुर्यात् प्रलेहतलनादिकम् ॥ सुस्वादुसुन्दरम् ॥ यथा । वेसवारान्वितञ्चा घृतेतलनपूर्वकम् । कुष्माण्डकं फलं सिद्धं विदुः सुस्वादुसुन्दरम् ॥ गुटिका । घृतेन गुडयुक्तेन गोलककुष्माण्डखण्डकान् । रन्धितान् क्षीरमरिचै रिमान् सुगुलिकां विदुः ॥ * ॥ खण्डकुष्माण्डकम् । कटुरम्लायतान् कूलान् स्विन्नान् क्षीरेण चोदितान् । सुपाच्यान ख

तैलसर्पिर्भ्यां मरिचैलादिवासितान् ॥ * ॥ भर्जितामकूष्माण्डम्। कूष्माण्डखण्डानि सचैत्रयाति तर्णानि सम्यक् हिंगतपिण्डितानि। जम्बीरनीराश्रितमृङ्गवेरैर्भवन्ति वक्त्रे रुचितो पचाय ॥ * ॥ वटिका। कूष्माण्डसम्भवाः खण्डाः सुस्विन्ना स्वपाकान्विताः। वेसवारयुते तैले तलये द्वाप्रलेपनेन ॥ * ॥ राजिकाकस्तूरी। खण्डं कनिष्ठिकाकारं कौष्माण्डं स्वेदपिष्टकम्। राजिकादधिसिन्धूत्थैर्मिश्रितं कास्तुरीयकम् ॥ एवं बहुविधाः कार्याः कौष्माण्डाद्विविधव्यञ्जनाः। प्रलेहनतनस्वादुक्षारसन्धानराजिकाः ॥ ईषत् पित्तत्वात् ऊष्मा अण्डेषु बीजेषु यस्य। पृ° ॥ शिवस्य गणदेवताविशेषे ॥ भूतविशेषे ॥

कूष्माण्डकः। पुं। कूष्माण्डे ॥

कूष्माण्डी। स्त्री। उमायाम्। अम्बिकायाम् ॥ ओषधौ ॥ कर्कारौ ॥ यागक्रियाविशेषे ॥

कुसितः। पुं। जनपदे ॥ कुस्यति। कुस संश्लेषणे। कुसेरुम्भोमेदेता इति इत प्रत्ययः ॥

कुसितायी। स्त्री। } कुसिदाय्याम्।
कुसिदायी। स्त्री। } वृद्धिजीविपत्न्याम् ॥ कुसितस्य कुसिदस्य वा स्त्रीत्यर्थे वृषाकप्यग्नि कुसितकुसिदानामुदात्तः इति प्रकृतेरैकारादेशो ङीप् च प्रत्ययः ॥

कुसिम्बी। स्त्री। शिम्ब्याम् ॥

कुसीदम्। न। अर्थप्रयोगे। वृद्धिजीविकायाम्। वृद्ध्याजीवने। सूदकी जीविका इति भाषा ॥ पुनर्देयत्वेन स्वीकृत्य गृहीते ऋणविशेषे ॥ ॥ यथा। स्थानलाभनिमित्तं यद्दानग्रहणमिष्यते। तत् कुसीदमिति प्रोक्तं तेन वृद्धिः कुसीदिनाम् ॥ इति नारदः। अस्यार्थः। स्थानं मूलधनावस्थानम्। लाभो वृद्धिः। दानग्रहणपदे कर्मणि ल्युट्। साध्ये तेन मूलधनाऽवस्थानेनाप्यव्ययोलाभ लाभार्थं यद्दानं धनिकेन क्रियमाणं मूलधनम् अधमर्णेन च यद्दत्तं तदास्वीक्रियमाणं यत् तद्ग्रहणमिति ॥ कथामृत्ये तु अवश्या-पाकरणीयत्वरूपगुणयोगात् गौण प्रयोगः। अतएव वाणिज्यार्थप्रयुक्तस्य न कुसीदत्वम् इति मिश्राः ॥ अपिच। कुत्सितात् सीदतश्चैव निर्विशङ्कैः प्रगृह्यते। चतुर्गुणं वाष्टगुणं कुसीदाख्यं अतः स्मृतः। इति वृहस्पतिः। अस्यार्थः। कुत्सितात् सीदतश्चाधमर्णात् सकाशात् यत्

गृह्यते निर्विशङ्कैर्बणिग्वर्ग्यैः चतुर्गुणं चेतिवाकारोऽनास्थायाम् तेनद्वैगुण्यादिलाभः इति ॥ कुसीदे विशेषो गारुडे २१५ अध्याये उक्तः सयथा । कुसीदकृषिवाणिज्यं प्रकुर्वीतास्वयंकृतम् । आपत्काले स्वयं कुर्व्वन् नैनसा युज्यते द्विजः ॥ वृत्त्येवार्त्तैनोपाया ऋषिभिः परिकीर्त्तिताः । सर्व्वेषामपि चैवैषां कुसीदमधिकं विदुः ॥ अनावृष्ट्याराजभयान्मूसिकाद्यैरुपद्रवैः । कृष्यादिके भवेद्बाधा साकुसीदे न विद्यते ॥ शुक्लपक्षे यथा कृष्णे रजन्यांदिवसेऽपि वा । उष्णेवर्षतिशीते वा वर्द्धनं न निवर्त्तते ॥ देशान्तरगतानां या वृद्धिर्नानापण्योपजीविनाम् । कुसीदंसर्व्वतः सम्यक् संस्थितस्यैवजायते ॥ लब्धलाभः पितॄन् देवान् ब्राह्मणांश्चैव पूजयेत् । तेतुष्टास्तस्य तद्दोषं शमयन्ति न संशयः ॥ वणिक्कुसीदीदद्यात्तुवस्त्रंगां काञ्चनादिकम् । कृषीवलोऽन्नपानानि यानशय्यासनानि च ॥ पण्येभ्योविंशतिंदत्त्वा पशुस्वर्णादिकंशतम् । पादेनायस्यपारक्यंकुर्यात् सञ्चय मात्मवान् ॥ अर्द्धेनचात्मभरणं नित्यनैमित्तिकान्वितम् । पादञ्च प्राप्यमानस्य मूलभूतं विवर्द्धयेत् ॥ शिलोञ्छमितं भृतिः सेवा गोरक्ष्यंविपणिः कृषिः । वृत्तिर्भैक्ष्यं कुसीदञ्च दशजीवनहेतवः इति ॥ त्रि । कुसीदिके ॥ कुस्यते । कुससंश्लेषणे । कुसेरुम्भोमेदेताइ-सीदः । इत्युणादौ तृतीयेऽङ्कस्यादि दीर्घादिश्चतन्त्रेणोपात्तः । इषाकप्यमीतिसूत्रे ह्रस्व एवेतिदृत्तिकारहरदत्तादिग्रन्थो पष्टम्भेननिर्णीतम् ॥

कुसीदिकः । त्रि । वार्द्धुषिके । इत्याजीवे ॥ कुसीदंवृद्धिस्तदर्थं द्रव्यं कुसीदम् । तत् प्रयच्छति । कुसीददशैकादशात् ष्ठन् ष्ठचाविति ष्ठन् ॥ स्त्रियां । षित्त्वात् ङीषि कुसीदिकी ॥

कुसुमम् । न । स्त्रीरजसि ॥ नेत्ररोगविशेषे ॥ फले ॥ पुष्पे ॥ मात्रामात्रे पञ्चमात्रिकस्य । ऽ॥ षष्ठप्रभेदे ॥ कुस्यति कुस० । कुसेरुम्भोमेदेता इत्युमः ॥ तत्रकुसुमलताध्यायो यथा । फलकुसुमसम्पद्वृद्धिं वनस्पतीनां विलोक्य विज्ञेयम् । सुलभत्वं द्रव्याणां निष्पत्तिः सर्व्वसस्यानाम् ॥ केनकस्यवृद्धिर्भवेयातदाह । शालेन कलमशालीरक्ता शोकेनरक्तशालिश्च ॥ पाण्डूकः क्षीरिकया नीलाशोकेनसूकरकः ॥ न्यग्रोधेनचयव

च तिन्दुकवृद्ध्या च षष्टिको भवति । अश्वत्थेन ज्ञेया निष्पत्तिः सर्वसस्यानाम् ॥ जम्बूभिस्तिलमाषाः शिरीषवृद्ध्या च कङ्गु निष्पत्तिः । गोधूमाश्च मधूकैर्यववृद्धिः सप्तपर्णेन ॥ अतिमुक्तककुन्दाभ्यां कर्पासं सर्षपान् वदेदसनैः । बदरीभिश्च कुलत्थांश्चिरबिल्वेनादिशेन्मुद्गान् ॥ अतसी वेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः । तिलकेन शङ्खमौक्तिकरजतान्यथ चेङ्गुदेन शणाः ॥ करिणश्च हस्तिकर्णैरादेश्या वाजिनोऽश्वकर्णेन । गावश्च पाटलाभिः कदलीभिरजाविकं भवति ॥ चम्पककुसुमैः कनकं विद्रुमसम्पच्च बन्धुजीवेन । कुरुवकवृद्ध्या वज्रं वैदूर्यं नन्दिकावर्त्तैः ॥ विन्द्याच्च सिन्धुवारेण मौक्तिकं कुङ्कुमं कुसुम्भेन । रक्तोत्पलेन राजा मन्त्री नीलोत्पलेनोक्तः ॥ श्रेष्ठी सुवर्णपुष्पात् पद्मैर्विप्राः पुरोहिताः कुमुदैः । सौगन्धिकेन बलपतिरर्केण हिरण्यपरिवृद्धिः ॥ आम्रैः क्षेमं भल्लातकैर्भयं पीलुभिस्तथारोग्यम् । खदिरशमीभ्यां दुर्भिक्षमर्जुनैः शोभना वृष्टिः ॥ पिचुमन्दनागकुसुमैः सुभिक्षमथ मारुतः कपित्थेन । निचुलेनावृष्टिभयं व्याधिभयं भवति कुटजेन ॥ दूर्वाकुशकुसुमाभ्यामिक्षुर्वह्निश्च कोविदारेण । श्यामालताभिवृद्ध्या बन्धक्यो वृद्धिमायान्ति ॥ अथैताभिर्वृष्टिं लक्षयन्नाह । यस्मिन्काले स्निग्धनिश्छिद्रपत्राः संदृश्यन्ते वृक्षगुल्मा लताश्च । तस्मिन् वृष्टिः शोभना सम्प्रदिष्टा रूक्षैश्छिद्रैरल्पमम्भः प्रदिष्टम् ॥ इति वाराह्यां २७ अध्यायः ॥

कुसुमकार्मुकः । पुं । कामदेवे ॥

कुसुमपुरम् । । पटना इति प्रसिद्धपुरे । पाटलिपुत्रे ॥

कुसुममध्यम् । न । चालितागाछ इति गौडभाषा प्रसिद्धे वृक्षविशेषे । भव्यफले ॥

कुसुमशरः । पुं । कामदेवे ॥

कुसुमाकरः । पुं । वसन्तर्त्तौ ॥

कुसुमाढ्यः । त्रि । पुष्पयुक्तेऽत्य-ति ॥

कुसुमागमः । पुं । वसन्ते ॥

कुसुमाञ्जनम् । न । पुष्पाकाररीतिमलसम्भवेऽञ्जने । पौष्पके । रीतिपुष्पे ॥

कुसुमाञ्जलिः । पुं । पुष्पाञ्जलौ ॥ उदयनाचार्यकृतग्रन्थविशेषे ॥

कुसुमात्मकम् । न । कुङ्कुमे । कुसुये ॥

कुसुमाधिपः । पुं ।
कुसुमाधिराट् । पुं । } चम्पकवृक्षे । हेमपुष्पके ॥

कुसुमायुधः । पुं । कामदेवे ॥

कुसुमास्त्रः । पुं । चौरे । तस्करे ॥

कुसुमासवम् । न । मधुनि ॥

कुसुमेषुः । पुं । पुष्पबाणे । कामदेवे ॥ कुसुमानि इषवो यस्य ॥

कुसुमोच्चयः । पुं । गुच्छे । स्तवके ॥

कुसुम्भः । पुं । कमण्डलौ ॥ महारजनवृक्षे ॥ न । शातकुम्भे । स्वर्णे ॥ कसूंभा इति प्रसिद्धे महारजनपुष्पे । कमलोत्तरे । वह्निशिखे ॥ अस्य गुणा यथा । कुसुम्भं वातलं कृच्छ्ररक्तपित्तकफापहमिति ॥ कुषुम्भ इत्यनेन वा ॥ कुषुभ क्षेपे । कण्ड्वादिः । पचाद्यच् । हलश्चेति घञ् वा । पृ० ॥ कुस्यति वा । कुस० । कुसेरुम्भोमेदेता इति उम्भ प्रत्ययः । वा हुलकाद्गुणः ॥

कुसुम्भतैलम् । न । कुसुम्भस्नेहे ॥ स्नेहे तैलञ्च ॥ कुसुम्भतैलमुष्णं स्याद्गुरु विदाहि च । चक्षुर्भ्यामहितं बल्यं रक्तपित्तकफप्रदम् ॥

कुसुम्भवीजम् । न । वरटायाम् । बरडकरड इतिच भाभाषा ॥

कुसूः । पुं । किञ्चुलुके । गण्डूपदे ॥

कुसृतिः । स्त्री । शाठ्ये ॥ इन्द्रजाले ॥ कुत्सिता सृतिः । सृ गतौ । क्तिन् । कुगतीति समासः ॥

कुस्तुभः । पुं । समुद्रे ॥ कु ईषत् कुम्भुवं वा । स्तुभ्नोति । स्तुम्भुःरोधः । मू० कः । अचि नलोपेनस्तास्त् ॥ विष्णौ ॥

कुस्तुम्बरी । स्त्री । धन्याके ॥ इत्यमरटीकायांभरतः ॥

कुस्तुम्बुरु । न । धन्याके ॥ कुत्सितं तुम्बति । तुबि अर्द्दने । बाहुलकात् कुस्तुम्बुरुरित्यत्र जातिरिति निर्देशाद्वा उरुप्रत्ययः सुट्च ॥

कुह । अ । कुत्रार्थे ॥ कुच इच ॥

कुहः । पुं । कुवेरे । यक्षराजि ॥

कुहकम् । न । इन्द्रजाले । मायायाम् ॥ त्रि । दाण्डाजिनिके । ध्वंसके । मायिनि । धूर्त्ते ॥ कुहयते । कुह विस्मापने । वा० कुन् ॥

कुहकजीवी । त्रि । मायाजीविनि । बाजीगर इतिभाषा ॥

कुहकस्वनः । पुं ।
कुहकस्वरः । पुं । } कुक्कुटे । ताम्रचूडे ॥

कुहक्कः । पुं । तालप्रभेदे ॥ यथा । द्रुतद्वन्द्वं लघुद्वन्द्वं ताले कुहक्कसंज्ञकेइति ॥

कुहनः । पुं । मूषिके ॥ सर्पे ॥ न । स्वल्पभाण्डवि० ॥ काचभाजने ॥ त्रि । ईर्ष्यालौ ॥

कुहना । स्त्री । दम्भचर्यायाम् । दम्भे

नकृतध्यामस्मैामादे ॥ मर्थलिप्स यामिथ्याधर्माश्रयणे कुहवि०पु० अदन्तः । पृषासत्प्रोयुच् ॥

कुहनिका । स्त्री । कुहनायाम् ॥

कुहरः । पुं । नागविशेषे ॥ न । गह्वरे ॥ सुषिरे । छिद्रे ॥ कर्णे ॥ कण्ठे ॥ कण्ठशब्दे ॥ समीपे ॥ कुंहरति । हरतेरनुद्यमनेऽच् ॥ यद्वा । कुहवि स्मापने । इगुपधत्वात्कः । कुहं राति । रा० । आतइतिकः ॥

कुहरितम् । न । पिकालापे ॥ रतध्वनौ ॥ रटिते ॥ त्रि । कृतच्छिद्रे ॥

कुहलिः । पुं । पूगपुष्पिकायाम् । पान इतिभाषा ॥

कुहा । स्त्री । कुज्झटिकायाम् ॥ कटुक्याम् ॥

कुहुः । स्त्री । कुहूम् ॥ कुहयति । कुहविस्मापने । म०कुः ॥

कुहूः । स्त्री । नष्टेन्दुकलायाममायाम् । उदयेऽमायोगान्नष्टचन्द्रकलाऽमा कुहूपदवाच्या ॥ अदृष्टादृष्टितरि ॥ कुहयति । कुहवि० ॥ न्वतिगृध्योः कूरिति कूप्रत्ययो वाहुलकादिहापि ॥

कुहूकण्ठः । पुं ।
कुहूमुखः । पुं ।
कुहूरवः । पुं ।
कोकिले । पिके ॥ कोयल इतिभाषा ।

कुहूलम् । न । सशस्त्रोर्ध्वरन्ध्रे ॥

कुहेडिका । स्त्री ।
कुहेडी । स्त्री ।
कुज्झटिकायाम् ॥

कुहेलिका । स्त्री । कुज्झट्याम् । धूमिकायाम् । नभोरेणौ ॥

कुह्वानः । पुं । कुमसितशब्दे ॥

कूः । स्त्री । पिशाच्याम् ॥

कूकुदः । त्रि । सत्कृत्यालङ्कृतकन्याप्रदातरि ॥ सत्कृत्यालङ्कृताङ्कन्यां यो ददाति स कूकुदः ॥ कोकति । कुकआदाने । इगुपधेतिकः । पृ०॥ यद्वा । कथनं कूः । कूङ्शब्दे । तु० । सं० । कुत्सःशब्दस्य कुः भूः कीर्त्तिर्भूमिरितियावत् । कूकुंददाति । आतोनुपेति सुपीति योगविभागाद्वा कः ॥

कूचः । पुं । कुचे । स्तने ॥ कवते । कुङ० । कुवश्चट्दीर्घश्च ॥

कूचिका । स्त्री ।
कूची । स्त्री ।
तूलिकायाम् । चित्रलेखनिकायाम् ॥ टिस्वानङी ॥

कूजनम् । न । कूजने ॥

कूजितम् । न । रुते । पक्षिध्वनौ ।

कूटः । पुं । अगस्त्यमुनौ ॥ पुं । स्त्री । गृहे ॥ पुं । न । निश्चले ॥ राशौ । धान्यादिपुञ्जे ॥ अयोघने ॥ लोहमुद्गरे ॥ दम्भे ॥ मायायाम् । विपरीतदर्शने । यथार्थवस्त्वाच्छादनेनाऽ

अयसाचंघनलुघनायसे ॥ अद्रिशृङ्गे ॥ तुच्छे ॥ सीरावयवे । फालाधारे ॥ यन्त्रे । मृगबन्धनार्थे ॥ अनृते ॥ अभ्रकृष्णखण्डे ॥ पुर्द्वारि । कूटयते । कूटआप्रदाने । घञर्थेच ॥ कूटयति मा० । कूटदाहे । अच् ॥ कूटयते वा । अच् ॥

कूटकः । पुं । गन्धकुब्याम् । मुरानाम गन्धद्रव्ये ॥ कथर्याम् । पर्वत विशेषे ॥ न । फाले ॥ कूटयति । कूटच्छेदने । घञर्थेच । स्वा० कन् ॥

कूटकारकः । पुं । साक्षिवादे मृषावादकवञ्चरि ॥

कूटकार्षापणः : पुं । मिथ्याभूतरौप्यादिमुद्रायाम् । कृत्रिमरौप्यादौ ॥

कूटकृत् । पुं । शिवे ॥ कायस्थे ॥ त्रि । वितथे ॥

कूटजः । पुं । कुटजवृक्षे ॥

कूटपाककः । पुं । पित्तज्वरे ॥ कुत्सितपवने ॥

कूटपूरी । स्त्री । करार्यिकायाम् ॥

कूटपूर्वः । पुं । हस्तिमस्तिदोषजेज्वरे ॥ ज्वरायिनि ॥

कूटयन्त्रम् । न । उन्माथे । आमिषन्यस्यामग पक्षिवन्धनार्थं छलपातितयन्त्रे । फन्दाफाँद इतिभाषा इतिच भाषा ॥ कूटस्वरूपं यन्त्रम् ।

कूटशाल्मलिः । पुं । शाल्मलिविशेषे । कृष्णशाल्मल्याम् । रोचने ॥ कूटशाल्मलिकस्तिक्तः कटुकः कफवातनुत् । भेदुष्णःप्लीहजठरयकृद्गुल्मविषापहः ॥ भूतानाहविबन्धास्रमेदःशूलकफापहः ॥ कूटस्थाशैरावमस्थिस्व ॥

कूटसङ्क्रान्तिः । स्त्री । अर्द्धरात्रातीते सूर्यस्यराश्यन्तरगमने ॥ यथा । अर्द्धरात्रेव्यतीतेतु यदासङ्क्रमते रविः । सायेया कूटसंक्रान्ति र्मुनिभिः परिकीर्त्तिता इति ॥

कूटसाक्षी । त्रि । मिथ्यासाक्षिणि । साक्ष्ये मिथ्याभिधायिनि ॥

कूटस्थः । त्रि । कालमभिव्याप्यस्थिते । एकरूपतयाकालव्यापिनि । एकेनैव स्वभावेननिरवधिकालस्य व्यापके आकाशादौ ॥ प्रधानसत्कार्याधिष्ठाने ॥ विषयसन्निधावपि विकारशून्ये ॥ अधिष्ठानतया देहद्वयावच्छिन्नचेतनः कूटवन्निर्विकारेणस्थितः कूटस्थ उच्यते ॥ न । व्याघ्रनखि । परियामरक्षिते ॥ कूटोनिश्चलस्तिष्ठति । यद्वा । कूटमयोघनस्तद्वत्तिष्ठति । संसर्गिणामपिस्वयमसङ्ग इत्यर्थः । छा० ॥ सुपिस्थ इति कः ॥ व्याघ्रनखनामगन्धद्रव्ये ॥

कूटागारम् । न । चन्द्रशालिकायाम् । वडभ्याम् ॥ मृषागारे ॥ स्त्रीणां क्रीड़ागृहे ॥

कूटायुधम् । न । वहिः काष्ठादिमये ऽन्तर्गुप्तनिशितशस्त्रे ॥ अधर्मप्रधानप्राणिभिः कृतव्यवहाराणि तानिव हुप्रकाणि सन्ति ॥

कूटार्थभाषिता । स्त्री । प्रबन्धकल्पनायाम् । कथायाम् । रूपकथा इति गौडभाषा ॥ प्रहेलिकायाम् ॥

कूणिः । त्रि । रोगादिनाकुञ्चितकरे । कुकरे ॥

कूणिका । स्त्री । शृङ्गे ॥ कलिकायाम् । वीणामूलस्थवंशशलाकायाम् ॥

कूणितः । त्रि । मुद्रिते । सङ्कुचिते ॥

कूदरः । पुं । जातिविशेषे ॥ यथा ब्राह्मण्यां ऋषिवीर्य्येण ऋतोः प्रथमवासरे । कुत्सिते चोदरे जातः कूदरस्तेनकीर्त्तितः ॥ तदशौचं विप्रतुल्यं पतितो ऋतुदोषतः । सद्यः कोटकसंसर्गादधमो जगतीतले ॥ इति ब्रह्मवैवर्त्तपुराणम् ॥

कूपः । पुं । स्वनाम्नाख्याते जलाधारे । उदपाने ॥ अस्यलक्षणम् । यथा । भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः । बद्धोऽबद्धः स कूपः स्यात् तदम्भः कौपमुच्यते ॥ गर्त्ते ॥ गुणवृक्षे ॥ मृन्माने ॥ कूपके । कुप्पा इ भाषा ॥ कुवन्तिमण्डूका यस्मिन् कु शब्दे । कुपुभ्यां च इति पोदीर्घश्च ॥ कुत्सिताः ईषद्वा आपोऽत्र । ऋक्पूरिति अः । ऊदनोरित्यत्रदीर्घनिर्देशादन्यत्रापि ऊदिति वा ॥

कूपकः । पुं । गुणवृक्षे । नौमध्यस्थरज्जुबन्धनकाष्ठे । गुणधरा मास्तूल इ तिभाषा ॥ कुप्पा इतिभाषा प्रसिद्धे तैलादिपात्रे ॥ कुकुन्दरे ॥ उदपाने ॥ नद्यादौ स्रोतोवेधकारिणि तरुशिलादौ ॥ विदारके । शुष्कनद्यादौ वार्य्यर्थं कृतगर्त्ते ॥ कुत्सितः कूपः । कुत्सिते इति कः । कूपस्य प्रतिकृतिरिति वा । इवे प्रतिकृताविति कन् ॥ कूपे कायति वा । कै० । सुपीति कः ॥

कूपखानकः । पुं । कूपस्य खननकर्त्तरि ॥

कूपत् । अ । प्रश्ने ॥ प्रशंसायाम् ॥

कूपाङ्कः । पुं ।
कूपाङ्गः । पुं । } रोमाञ्चे ॥

कूपारः । पुं । अकूपारे ॥

कूपिका । स्त्री । अम्भोगतोपले । जलमध्यस्थितेपर्वतादौ ॥

कूपी । स्त्री । पात्रविशेषे ॥

कूसम् । न । सरोवरे ॥

कूरः । पुं । न । अन्ने । भक्ते ॥

कूर्च्चः । पुं । न । भ्रुवोर्मध्ये ॥ कत्थने ॥ श्मश्रुणि ॥ कैतवे । दम्भे ॥ मयूरपुच्छमुष्टौ । मुट्टा इति भाषा ॥ कुशमुष्ट्याम् ॥ अङ्गुष्ठाङ्गुलिमध्यस्योपरिभागे ॥ पुं । शीर्षे ॥ आसनविशेषे ॥ न । मलापकर्षणाद्यर्थं मुशीरादिनिर्म्मिते मुष्टिमाने ॥ तथाच नरसिंहपुराणम् । ततः समर्पयेत् कूर्च्चमुशीरादिविनिर्म्मितम् । मलापकर्षणाद्यर्थं श्रीमन्मूर्त्त्यङ्गसन्धितः इति ॥ विष्णुधर्म्मोत्तरेऽपि । उशीरकूर्च्चकं दत्त्वा सर्व्वपापैः प्रमुच्यते । दत्त्वा गोवालजं कूर्च्चं सर्व्वांस्तापान् व्यपोहति ॥ दत्त्वा चामरजं कूर्च्चं श्रियमाप्नोत्यनुत्तमामिति हरिभक्तिविलासस्य ६ विलासे ४८ श्लोकः ॥ कुरति । कूर्य्यते वा । कुरशब्दे । वा० चट् प्रत्ययः ॥

कूर्च्चशिरः । न । अङ्घ्रिस्कन्धे । गुडमुडा इति गौड भाषा ॥

कूर्च्चशीर्षः । पुं । अष्टवर्गमध्यपठिते जीवकौषधौ । मधुरके ॥ नालिकेरे ॥ कूर्च्चं श्मश्रुतद्वच्छीर्षमस्य ॥

कूर्च्चशीर्षकः । पुं । जीवके ॥ नालिकेरे ॥

कूर्च्चशेखरः । पुं । नालिकेरे ॥

कूर्च्चिका । स्त्री । चीरविकृतौ । चीरसा इति गौडभाषा ॥ सा द्विधा । यथा । दध्नासह च यत् पक्वं चीरं सा दधिकूर्च्चिका । तक्रेण पक्वं यत् चीरं सा भवेत्तक्रकूर्च्चिका ॥ सूचिकायाम् ॥ तूलिकायाम् । आलेख्यकूर्च्चिकायाम् । तुली इति गौडभाषा ॥ कुड्मले ॥ कुञ्चिकायाम् । कपाटोद्घट्टने ॥ द्रव्यमार्जनसाधने । तृणगुच्छे ॥ कूर्च्चति । कूर्च्चविकारे भ्वादेराकृतिगणत्वाद्बोध्यः । संज्ञायांण्वुल् ॥ कूर्च्चः श्मश्र्वादिरस्त्यस्या वा । अतइनिठनाविति ठन् ॥

कूर्द्दनम् । न । क्रीडायाम् । खेलायाम् ॥ कुर्द्दक्रीडायाम् । ल्युट् । वोरुपधायादीर्घ इकः ॥

कूर्द्दनी । स्त्री । चैत्रावल्याम् । मधूत्सवे ॥

कूर्प्पम् । न । भ्रुवोर्मध्ये ॥ इति हेम० ॥

कूर्प्परः । पुं । कुर्परे ॥

कूर्प्पासः । पुं । अर्द्धचोलके ॥ कुर्परः कफोणि र्जानुर्वा स्यते ऽत्र । कुर्परे आस्ते वा । असुक्षेपणे आसउपवेशने वा । घञ् । पृ० ॥

कूर्प्पासकः । पुं । चोले । स्त्रीणामाप्रपदीनकञ्चुके । स्त्रीणां कञ्चुलिकायाम् ॥ स्वार्थे कन् ॥

कूर्म्मः । पुं । उन्मीलननिमीलनकरे शरीरस्थवायुविशेषे ॥ उन्मीलने स्मृतः कूर्म्मो भिन्नाञ्जनसमप्रभः इत्यु

तेः ॥ कछुआ इति प्रसिद्धे जलजन्तुविशेषे । कच्छपे । पञ्चगुप्ते । कमठे ॥ अस्य लक्षणं यथा । स्फटिकरजतवर्णो नीलराजीविचित्रः कलशसदृशमूर्त्ति स्थावर्णस्य कूर्मः । अरुणसमवपुर्वा सर्षपाकारचित्रः सकलनृपमहत्त्वं मन्दिरस्थः करोति ॥ अञ्जनभृङ्गश्यामतनुर्वा बिन्दुविचित्रोऽव्यङ्गशरीरः । सर्पशिरो वा स्थूलगलो यः सोपि नृपाणां राष्ट्रविवृद्ध्यै ॥ वैदूर्यत्विट् स्थूलकण्ठस्त्रिकोणो गूढच्छिद्रश्चारुवंशश्च शस्तः । क्रीडावाप्यां तोयपूर्णे मणौ वा कार्यः कूर्मो मङ्गलार्थं नरेन्द्रैरिति ॥ वंशः पृष्ठास्थि । मणिः कूपाधोभागः ॥ विष्णोरवतारविं० । सत्ययुगे समुद्रमन्थनकाले मन्दराचलधारणार्थं कच्छपरूपे भगवदवतारे ॥ यथा ॥ विलोक्य विघ्नेशविधिं तदेश्वरो दुरन्तवीर्योऽवितथाभिसन्धिः । कृत्वा वपुः काच्छपमद्भुतं महत् प्रविश्य तोयं गिरिमुज्जहार ॥ सुरासुरेन्द्रैर्भुजवीर्यवेपितं परिभ्रमन्तं गिरिमङ्ग पृष्ठतः । बिभ्रत्तदा वर्त्तनमादिकच्छपो मेनेऽङ्गकण्डूयनमप्रमेय इति ॥ कुः कुत्सितः कौ भुवि वा ऊर्मिर्वेगोऽस्य । अत्र प्रत्यस्य वेत्य

स्य ज्ञाजिनियोगविभागादत्र समासान्तः ॥ मुद्राविशेषे ॥

कूर्म्मचक्रम् । न । ज्योतिषप्रसिद्धे कृषिकर्माङ्गे कच्छपाकारचक्रे ॥ तस्याकारो यथा । प्राङ्मुखो भगवान् देवः कूर्मरूपी व्यवस्थितः । आक्रम्य भारतं वर्षं नवभेदं यथाक्रमम् ॥ * ॥ तत्र नक्षत्रन्यासक्रमः । मध्यप्रागग्नियाम्यादिकृत्तिकादित्रयत्रयैः । क्रूरवेधयुतैस्तैस्तु पीड्यन्ते तन्निवासिनः ॥ * ॥ तत्र वेधो यथा । पर्वापरे भवेद्वेधो वेधश्चोत्तरदक्षिणे । ईशानैर्ऋत्यवेधो वेधश्चाग्नेयमारुते । ताराव्रयान्वितं तत्र सौरियत्नेन चिन्तयेत् ॥ * ॥ तद्वेधादिजन्यदोषाः । अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः । स्वचक्रं परचक्रञ्च सप्तैते सम्भवन्ति च ॥ * ॥ एवं देशगृहग्रामक्षेत्रनामर्क्षतो वदेत् । तथा च यवनस्चवेदि व्यपार्थिवनाभसाः ॥ दृश्यन्ते सुमहोत्पाताः स्वांदिशं तत्र पीडयेत् । सौरिर्बलाधिको दुष्टः स्वल्पवीर्यः शुभावहः ॥ एकदापीडयेच्च भभानुजः कूर्मपञ्चके । तत्स्यानेऽस्म हाविघ्नोजायते नात्र संशयः ॥ दुष्टस्थाने गते चन्द्रे कर्त्तव्यं शान्तिपौष्टिकम् ॥ * ॥ तत्र क्रमध्यस्यादेशाः ।

मध्येसारस्वता मत्स्याः शूरसेनाः समाथुराः । पञ्चालसाल्वमाण्डव्य कुरुक्षेत्रगजाह्वयाः ॥ मरुनैमिषवि न्ध्याद्रिपाञ्चालघोषाः सयामुनाः । का श्ययोध्याप्रयागश्चगया वैदेहकादयः ॥ * ॥ तत्रपूर्व्वस्थदेशाः । प्राच्यां मा गधशोणौच वारेन्द्री गौडराढकाः । वर्द्धमानतमोलिप्तप्राग्ज्योतिषोद् याद्रयः ॥ * ॥ तत्राग्निकोणस्थदेशाः । आग्नेय्या मङ्गवङ्गोपवङ्गत्रैपुरकोशलाः । कलिङ्गोड्राध्रकिष्किन्ध्यावि दर्भशवरादयः ॥ * ॥ तत्रदक्षिणस्थ देशाः । दक्षिणे ऽवन्तिमाहेन्द्रमलया ऋष्यमूकाः । चित्रकूटमहार ण्यकाञ्ची सिंहलकोङ्कणाः ॥ कावे रीताम्रपर्णीचलङ्कात्रिकूटकादयः ॥ * ॥ तत्रनैरृत कोणस्थदेशाः । नै रृते द्रविडानर्त्तमहाराष्ट्राश्चरैव- ताः । यवनः पह्लवः सिन्धुः पारसी कादयोमताः ॥ * ॥ तत्रपश्चिमस्थ देशाः । पश्चिमेहैहयास्ताद्रिम्लेच्छ वासशकादयः ॥ * ॥ तत्रवायुकोण स्थदेशाः । वायव्ये गुज्जराटश्चनाट जालन्धरादयः ॥ * ॥ तत्रोत्तरस्थदे शाः । उत्तरे चीननेपालहूणकैकेयमन्दराः । गान्धारहिमवत्क्रौञ्च गन्धमादनमालवाः ॥ कैलासमद्र काश्मीरम्लेच्छदेशाः खसादयः ॥ * ॥ तत्रैशानकोणस्थदेशाः । ऐशाने स्वर्ण भौमश्चगङ्गाद्वारश्चटङ्कणाः । वा ह्लीकब्रह्मपुरककिरातादरदादयः ॥ इति ज्योतिस्तत्त्वम् ॥ * ॥ जपय त्रकर्म्मोक्ते कमठाकारचक्रे ॥ कूर्म्म चक्र मविज्ञाययः कुर्य्याज्जपयन्त्रकम् । तस्ययत्रफलं नास्तिसर्व्वानर्थाय कल्पते ॥ इतितन्त्रशास्त्रम् ॥

कूर्म्मपुराणम् । न । कौर्म्मे । सप्तदश सहस्रश्लोकात्मके महापुराणे ॥ यथा । सप्तदशसहस्रञ्चपुराणं कूर्म्मे भाषितमिति ॥

कूर्म्मपृष्ठः । पुं । अम्लानवृक्षे ॥ कमठ पृष्ठदेशे ॥ न । शरावे ॥

कूर्म्मपृष्ठकम् । न । शरावे । सकोरा इति भाषा ॥

कूर्म्मराजः । पुं । कच्छपराजे । अकू पारे । आदिकच्छपेविष्णोरवतारे ॥ यथा । पृथ्वि स्थिरा भव भुजङ्गम धारयैनां त्वं कूर्म्मराज तदिदं द्वित यं दधीथाः । दिक्कुञ्जराः कुरुत त त्त्रितये दिधीर्षां मार्य्यः करोतु हरकार्म्मुक माततज्यमिति महान टकम् ॥

कूलम् । न । रोधसि । तीरे । तटे । नद्याजलसमीपस्थाने ॥ स्तूपे सै

न्यपृष्ठे ॥ तडागे ॥ कूलयति । कूल आवरणे । पचाद्यच् ॥

कूलकः । पुं । कृमिशैले ॥ पुं । न । स्तूपे ॥ तीरे ॥

कूलङ्कषः । पुं । समुद्रे ॥ कूलङ्कषति । कषहिंसायाम् । सर्वकूलाभ्रकरीषेषुकषः इतिखच् । अरुर्द्विषदिति मुमागमः ॥

कूलङ्कषा । स्त्री । नद्याम् ॥

कूलभूः । स्त्री । तीरभूमौ ॥

कूलवती । स्त्री । नद्याम् ॥

कूलचण्डकः । पुं । जलावर्त्ते ॥ कूलभङ्गे ॥

कूलेचरः । पुं । लुलापादिपशुषु ॥ यथा । लुलापगण्डवाराहचमरीवारणादयः । एते कूलेचराः प्रोक्ता यतः कूलेचरन्त्यपाम् ॥ कूलेचरा मरुत्पित्तहरा दृष्या बलावहाः । मधुराः शीतलाः स्निग्धा मूत्रलाः श्लेष्मवर्द्धनाइति ॥

कूवरः । पुं । कुब्जके । कूंजा इतिभाषाप्रसिद्धे पुष्पे ॥ पुं । न । युगन्धरे । यत्ररथस्ययुगकाष्ठमासज्यते तत्र ॥ त्रि । रम्ये । चारौ ॥ कवते । कूङ् शब्दे । कुटादिः । वा०वरच् ॥

कूबरी । पुं । रथे ॥ कूबरोयुगन्धरःसोस्यास्ति । इनिः ।

कूबरी । स्त्री । कम्बलाच्छन्दितरथे ॥ इतिहलायुधः ॥

कूष्माण्डः । पुं । कर्कारौ ॥ गणदेवताविशेषे ॥ द्वात्रिंशन्निरयाधिपतौ ॥

कूष्माण्डकः । पुं । कुष्माण्डे ॥

कूष्माण्डवटिका । स्त्री । कुम्हडौरीइतिख्याते वटीविशेषे ॥ कूष्माण्डवटिका ज्ञेया पूर्वोक्तवटिकागुणा । विशेषात् पित्तरक्तघ्नी लघ्वी च कथिता बुधैः ॥ पूर्वोक्तवटिका माषवटी ॥

कूष्माण्डी । स्त्री । अम्बिकायाम् ॥ ओषधौ ॥ कर्कारुम् ॥ कूष्माण्डी तु भृशं लघ्वी कर्कारु रपिकीर्त्तिता ॥

कूहा । स्त्री । कुज्झटिकायाम् । कुहासा इतिभाषा ॥

कृकः । पुं । गले ॥ इति हेमचन्द्रः ॥

कृकणः । पुं । कयार इति भाषाप्रसिद्धे क्रकरपक्षिणि ॥ कीटविशेषे ॥ कृ इति कणति । कणशब्दे अच् ॥ कृकेणकण्ठेन अणति वा । अणशब्दे । अच् । श० ॥

कृकरः । पुं । शिवे ॥ देहानिलविशेषे । क्षुत्कारेवायौ ॥ कृकरस्तु क्षुतेचैव जपाकुसुमसन्निभः ॥ करवीरवृक्षे ॥ चक्षे ॥

कृकलः । पुं । क्षुत्कारेदेहस्थेवायुविशेषे ॥

कृकला । स्त्री । पिप्पल्याम् ॥

कृकलासः । पुं । सरटे । क्रकचपादि ।

प्रतिरूप्ये। कृमाश्रये॥ कूकं शिरोग्रीवा कण्ठञ्च लासयति। लसश्लिष्य योगे। चु०। कर्मण्यण्॥

कृकवाकुः। पुं। कुक्कुटे॥ मयूरे॥ सरटे॥ कृकेन गलेनवक्ति। वचपरिभाषणे। कृकेवच: कश्चेतिञुण्॥

कृकवाकुध्वजः। पुं। कार्त्तिकेये। स्कन्दे॥ कृकवाकुर्ध्वजेऽस्य॥

कृकाटिका। स्त्री। घाटायाम्। ग्रीवायामुन्नतभागे॥ ग्रीवापश्चाद्भागे॥ कृकम् कण्ठम् अटति। अटगतौ। ण्वुल्। स्वा० कन्॥

कृच्छ्रम्। न। आभीले। कष्टे। दुःखतत्कारणयोः॥ अंहसि। पापे॥ सान्तपनादिव्रते॥ मूत्रकृच्छ्ररोगे॥ त्रि। तद्वति॥ स्मृतौ व्रतेपुंल्लिङ्गोप्ययम्॥ कृन्तति अनेनवा। कृतीछेदने। कृतेश्छक्रूचेतिरक् प्रत्ययः छश्चान्त्यस्यादेशः॥

कृच्छ्रसान्तपनम्। न। व्रतविशेषे॥ यथा गोमूत्रं गोमयं क्षीरं दधि सर्पिःकुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतमिति॥ गोमूत्रादीन्येकीकृत्य एकस्मिन् दिने भक्षयेत् तद्दिनेनान्यत्किञ्चिदद्यात्। अपरदिने चोपवास इत्यर्थः॥ सम्यक् तपमनेन। महाप्रयण् यद्वा। सन्तप

ति। ल्युः। तस्येदम् कर्म। अण्। कृच्छ्रञ्चतत्सान्तपनञ्च॥

कृच्छ्रातिकृच्छ्रः। पुं। व्रतविशेषे॥ यथा हवशिष्ठः। अबभक्षस्तृतीयः कृच्छ्रातिकृच्छ्रोयावत् सकृदादीत। यावदेकवारमुदकं हस्तेन ग्रहीतुंशक्नोति तावन्नवसुदिवसेषुभक्षयित्वा व्यहमुपवासः कृच्छ्रातिकृच्छ्रः॥ सुमन्तुर्यथा। द्वादशरात्रंनिराहारःस कृच्छ्रातिकृच्छ्रः। एतत् कृच्छ्रातिकृच्छ्रद्वयं द्वादशाहसाध्यमशक्तविषयम्॥ ब्रह्मपुराणम्। चरेत् कृच्छ्रातिकृच्छ्रञ्च पिवेत्तोयञ्चशीतलम्। एकविंशति रात्रन्तुकाले ष्वेतेषु संयतः॥ कालेषु प्रातःसायंमध्याह्नेष्वित्यर्थः। इति प्रायश्चित्तविवेकः॥

कृच्छ्रारिः। पुं। विल्वाम्लरक्षे॥

कृच्छ्रार्द्धः। पुं। दिनषट्कसाध्येव्रतविशेषे॥ यथापस्तम्बः। सायम्प्रातस्तथैकैकंदिनद्वयमयाचितम्। दिनद्वयञ्चनाश्नीयात् कृच्छ्रार्द्धःसोभिधीयते॥ इति प्रायश्चित्तविवेकः॥

कृणुः। पुं। चित्रकरजातौ। चितेरा इतिभाषा॥ इति त्रिकाण्डशेषः॥

कृतम्। न। सत्ययुगे॥ यथा। दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितमिति। मनुश्च। चत्वार्याहुःसहस्राणि

वर्षाणान्तु कृतं युगम् । तस्य तावच्छती सन्ध्यासन्ध्यांशश्च तथाविधः ॥ सन्ध्यासन्ध्यांशयो रन्त र्यः कालोमुनिसत्तम । युगाख्यः स तु विज्ञेयः कृतत्रेतादिसंज्ञक इति ॥ पर्य्याप्ते । अलमर्थे ॥ फले ॥ त्रि । विहिते ॥ हिंसिते ॥ अकारि । डुकृञ्० । क्तः ॥ निष्पादिते ॥ पुं । कृताये ॥

कृतकम् । न । विड्लवणे ॥ त्रि । कृत्रिमे ॥ कृन्तति । कृती छेदने । कृणत्ति वा । कृती वेष्टने । वा० कुन् ॥

कृतकर्म्मा । त्रि । निपुणे । प्रवीणे । शिक्षिते ॥ पुण्यवति ॥ कृतङ्कर्म तत्तद्वर्णाश्रमाभिमाननिमित्त मन्तःकरणशोधकं येन ॥

कृतकृत्यः । त्रि । कृतार्थे । निष्पन्नकर्म्मणि । समाप्तकार्य्ये । धन्ये ॥ विदुषि ॥ कृतं कृत्यंवर्णाश्रमोचितमन्तःकरणशोधकं कर्त्तव्यं येन नपुनः कृत्यान्तरंयस्यास्तिसः । कृतकृत्य स्तु सन्न्यस्य त्वात्ममात्ररति र्भवेत् ॥ कृत्यात् यादिमुक्ते ॥ ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः । नैवास्ति किञ्चित्कर्त्तव्यमस्तिचेन्नस तत्त्ववित् ॥ अकृतकृत्योविभ्रस्यर्थोर्बिभेति । यंथाहुः ॥ प्रायेणाकृतकृत्यत्वान् मृत्योरुद्विजतेजन इति ॥

कृतकोटिः । पुं । काश्यपमुनौ ॥ उपवर्षमुनौ ॥ इतित्रिकाण्डशेषः ॥

कृतक्रियः । त्रि । कृतकार्य्ये ॥

कृतक्षणः । त्रि । लब्धावकाशे ॥

कृतघ्नः । त्रि । कृतघ्नारि । कृतोपकारस्यापकारे प्रवर्त्तमाने ॥ कृतमुपकार मपकाराचरणेन यो विनाशयति स कृतघ्नइत्यर्थः । सचानेकविधःप्रोक्तः पुराणे कृतघ्नसंज्ञके । यथा । भर्त्तृपिण्डापहर्त्ता च पितृपिण्डापहारकः । यस्मात् गृहीत्वा विद्याञ्च दक्षिणां न प्रयच्छति ॥ पुमान्स्त्रिय श्च योद्वेष्टि यश्चतान् घातयेन्नरः । कृतस्य दोषंवदति सकामान् नकरोतियः ॥ नस्मरेच्च कृतं यस्तु आश्रमान् यस्तु दूषयेत् । सर्वांस्तानृषिभिः सार्द्धं कृतघ्नानब्रवीन्मनु रिति ॥ तस्य प्रायश्चित्तमपिनास्ति । यथा । ब्रह्मघ्ने च सुरापे च चौरेच गुरुतल्पगे । निष्कृतिर्विहिता सद्भिः कृतघ्नेनास्तिनिष्कृतिरिति ॥

कृतच्छिद्रा । स्त्री । कोषातकीलतायाम् ॥

कृतज्ञः । पुं । हरौ ॥ कृतं कार्य्यंजगद्रूपम् । जानातीति ज्ञः आत्मा । कृतंचासौज्ञश्चेतितथा । यद्वा । कृतंजगत् ज्ञः आत्मायस्य । प्राणिनांपुण्यपाप

रूपंकृतंकर्म्मजानाति फलदानाये ति वा ॥ शुनि । कुक्कुरे ॥ त्रि । मर्य्यादिनि । प्रत्युपकारेसयत्ने ॥ येन केनचित् स्वस्मै किञ्चिदपि कृतमुपकारं बहुतया जानाति । चाश्वघो धने । आतद्धितकः ॥

कृतज्ञता । स्त्री । उपकारित्वे ॥ भावे तल् । तलन्तंस्त्रियाम् ॥

कृतत्रा । स्त्री । त्रायमाणायांलतायाम् ॥

कृतदासः । पुं । नारदोक्तपञ्चदशदासान्तर्गते दासविशेषे । सतुकेनचिन्निमित्तेन एतावत्कालपर्यन्तं तवाहंदास इतिकृतसमयः ॥ इतिक्रमसन्दर्भः ॥

कृतधीः । त्रि । पण्डितोत्तमे । निर्मलान्तःकरणे । अभ्याससंस्कृतान्तःकरणे ॥

कृतनाशः । पुं । दोषविशेषे ॥ कृतयोः पुण्यपापयोर्भोगमन्तरेण नाशः ॥

कृतपुङ्खः । त्रि । सम्यक्कृतशराभ्यासे । सुप्रयोगविशिखे ॥ कृतोऽभ्यस्तःपुङ्खयुक्तः शरोयेन ॥

कृतपूर्वी । त्रि । पूर्वनिष्पन्नकर्मणि ॥ कृतंपूर्वमनेनेत्यर्थे इष्टादिभ्यश्चेति कर्त्तरि इनिः ॥

कृतफलम् । न । कक्कोले ॥

कृतफला । स्त्री । कोलशिम्ब्याम् ॥

कृतम् । अ । अलमर्थे ॥ निषेधे ॥

कृतमालः । पुं । आरग्वधे । नृपद्रुमे ॥ कर्णिकारे । लघ्वारग्वधे ॥ कृतामालाऽस्य ॥

कृतमाला । स्त्री । सरिदन्तरे ॥ कृतमाला नाम नदी यस्यां मत्स्योऽभूद्धरिः ॥

कृतमुखः । त्रि । प्रवीणे । विज्ञे ॥ कृतंमुखमस्य । सर्वस्यकृतमुखत्वात् अत्रकृतशब्दस्यसंस्कृतपरत्वम् ॥

कृतयुगम् । न । तिष्ये । सत्ययुगे । सन्ध्यासन्ध्यांशयुक्तेषुचतुर्षु दिव्यसहस्रवर्षेषु ॥

कृतरुचिः । त्रि । अलङ्कृते ॥

कृतलक्षणः । त्रि । गुणैः प्रतीते । शौर्य्यादिगुणैर्विख्याते ॥ कृतमुच्चारितं लक्षणं नामास्य ॥ श्रीधरः ॥ कृतानि लक्षणानि शास्त्राध्ययनेन । वेदाः शास्त्राणि विज्ञानमेतत् सर्वंजनार्द्दनादितिस्मृतेः ॥

कृतवर्म्मा । पुं । हृदीकसुतेक्षत्रियविशेषे ॥

कृतविद्यः । त्रि । अभ्यस्तविद्ये ॥

कृतवीर्य्यः । पुं । एकवीरनृपात्मजे । चन्द्रवंशीयकार्त्तवीर्य्यस्यजनके ॥

कृतवेतनः । त्रि । वेतनेन नियुक्ते दासादौ ॥

कृतवेदी । त्रि । कृतज्ञे ॥

कृतवेधः । पुं ।) श्वेतघोषा इति गौ
कृतवेधकः । पुं । } ड भाषा प्रसिद्धायां
कोशातक्याम् ॥
कृतवेधना । स्त्री । राजकोशातक्याम् ॥
कृतश्रमः । त्रि । मद्दोद्यमे । महोत्साहे ॥ श्रान्ते ॥ कृतः श्रमो येन ॥
कृतसापत्निका । स्त्री । अधिविन्नायाम् । अध्यूढायाम् । अनेकभार्यस्य प्रथमोढायाम् ॥ सपत्न्याः भावः । ष्यञ् ङीष्यलोपाः । स्वार्थे कन् । ह्रस्वः । कृतं सापत्निकं यया ॥
कृतस्वरः । पुं । आकरविशेषे । वस्तीकरे ॥
कृतहस्तः । त्रि । सुशिक्षितशरमोक्षे । कृतपुङ्खे ॥ कृतो ऽभ्यस्तो हस्तो येन ॥
कृताकृतम् । न । कार्यकारणयोः ॥ कृतञ्च अकृतञ्च अनयोः समाहारः ॥ घटिताघटिते ॥ कृतञ्च तदकृतञ्च । केवलम् विशिष्टे नामभिरिति समासः ॥ पुं । परमेश्वरे ॥ कृतः कार्यात्मकः अकृतः कारणात्मकः । कृतश्चासावकृतश्च पूर्ववत् समासः ॥
कृतागमः । पुं । विष्णौ ॥ कृतः आगमः श्रुतिस्मृत्यादिलक्षणो येन सः ॥
कृताञ्जलिः । पुं । लज्जालूषधौ ॥ त्रि । सम्पुटीकृतकरे ॥ कृतः अञ्जलिर्येन ॥
कृतात्मा । त्रि । कृतकृत्ये ॥ शिक्षितान्तःकरणे ॥ योगिनि ॥
कृतात्ययः । पुं । कर्मनाशे ॥ कृतस्य अत्ययः ॥
कृतान्तः । पुं । यमे ॥ सिद्धान्ते ॥ दैवे ॥ अकुशलकर्मणि । अशेषकर्मणि ॥ कृतः अन्तो विनाशो येन ॥ कृतः अन्तः निश्चयो येन यस्य वा । वेदान्तशास्त्रे ॥ कृतङ् कर्म तस्यान्तः परिसमाप्तिर्यस्मात् इत्यादयः ॥ शनौ ॥
कृतान्तजनकः । पुं । सूर्ये ॥ इति हेमचन्द्रः ॥
कृतान्ता । स्त्री । रेणुकानामगन्धद्रव्ये ॥
कृतान्नम् । नं । लड्डुकादौ ॥ कृतञ्च तत् अन्नञ्च ॥
कृतायः । पुं । द्यूतक्रीडासाधनीभूताऽक्षविशेषस्य चतुरङ्कभागे ॥
कृतार्थः । त्रि । कृतप्रयोजने । कृतकार्ये ॥ कृतः अर्थः प्रयोजनं येन ॥
कृतार्थता । स्त्री । साफल्ये ॥ भावेतल् ॥
कृतालयः । पुं । भेके । मण्डूके ॥ त्रि । कृतवासे ॥ कृतः आलयो येन ॥
कृतावदानः । त्रि । कृतकर्मणि ॥ कृतमवदानं शुद्धकर्म येन ॥
कृतापराधकः । त्रि । कृताद्यागस्कृत

पृष्ठआनुजङ्घादिबन्धे ॥

कृतास्त्रः । त्रि । शिक्षितास्त्रे ॥

कृतिः । स्त्री । करणे ॥ पुरुषप्रयत्ने ॥ हिंसायाम् ॥ विंशत्यक्षरायांवृत्तौ ॥ क्रियायाम् ॥ कृतिरिन्द्रियसंयमश्चित्तैकाग्रताकरणञ्चेति छान्दोग्य भाष्यम् ॥ करणम् । डुकृञ्० । स्त्रियां क्तिन् । क्रियतेनया वा ॥

कृतकरः । पुं । रावणे । दशवदने ॥ इतिशब्दमाला ॥

कृती । त्रि । पण्डिते । वुधे ॥ योग्ये । अभिज्ञे ॥ पुण्यवति ॥ साधौ ॥ कृतार्थे ॥ कृतङ्कर्म प्रशस्तमस्याऽस्ति । अतइनिः । कृतमनेन वा । इष्टदित्वादिनिः ॥

कृत्तः । त्रि । छिन्ने । चेष्टिते ॥ कृत्यतेस्म । कृतीछेदने क्तः ॥

कृत्तिः । स्त्री । कृष्णसारादिचर्मणि ॥ त्वचि ॥ भूर्जे ॥ कृत्तिकानक्षत्रे ॥ कृत्यते । कृती । स्त्रियांक्तिन् ॥

कृत्तिका । स्त्री । तृतीयनक्षत्रे । वहुलायाम् ॥ तत्रजातस्य फलम् । क्षुधाधिकः सत्यधनै र्विहीनोवृथाटनोत्पन्नमतिः कृतघ्नः । कठोरवाक् चाहितकर्मकृत् स्यात् चेत् कृत्तिकायां मनुजः प्रसूतइति ॥ कृन्तति । कृती० । कृतिभिदिलतिभ्यः कित्

इति तिकन् ॥

कृत्तिकाभवः । पुं । चन्द्रमसि ॥ कृत्तिकायाः भवोऽस्य ॥

कृत्तिकासुतः । पुं । स्कन्दे ॥ स्कन्दे । कार्त्तिकेये ॥ कृत्तिकायाः सुतः ॥

कृत्तिवासः । पुं । शिवे ॥ इति द्विरू० ॥

कृत्तिवासाः । पुं । शिवे ॥ कृत्तिश्चर्म वासोऽस्य ॥

कृत्नुः । त्रि । कारौ । शिल्पिनि ॥ कर्त्तरि ॥ करोति कृणोति वा । डुकृञ् कृञ् हिंसायां वा । कृहनिभ्यांक्त्नुः ॥

कृत्यम् । न । कर्त्तव्ये । कार्ये । प्रयोजने ॥ पुं । तव्यादिप्रत्ययेषु ॥ यथा । कृत्याः षट् ते समाख्याताः क्यप्ण्यतौभावकर्मणोः । तव्यानीयावनन्तादृयत् केलिमः कर्मकर्त्तरि इति सुपद्मसम्मताकारिका ॥ कर्त्तरि कर्मणि चार्थे विहिताः कृत्याः वाच्यलिङ्गा भवन्ति ॥ त्रि । विद्विष्टे ॥ कार्ये ॥ क्रियते । डुकृञ्० । विभाषाकृवृषोरिति क्यप् ॥ कृत्यते वा । कृतीछेदने । ऋदुपधाच्चाकॢपिचृतेरिति क्यप् ॥ धनादिभिर्भेद्ये शत्रौ ॥ क्रुद्धलुब्धभीतावमानिताः परेकृत्या इति नीतिः ॥

कृत्यवित् । त्रि । कार्यज्ञे ॥ विधिज्ञे ॥

कृत्या । स्त्री । क्रियायाम् ॥ यथा । कां कृत्यामकार्षीः ॥ अभिचारदैवते ॥ यज्ञदेवताविº ॥ ॥ अभिचारक्रियायाम् ॥ करणम् । कृञः शचेतिचात्क्यप् । तुक् । टाप् ॥ कृत्यते वा । कृतीº । ऋदुपधादितिक्यप्॥

कृत्रिमः । पुं । सिल्हके । तुरुष्कनाम्नि गन्धद्रव्ये ॥ द्वादशपुत्रान्तर्गतपुत्रविº॥ यथा । सदृशन्तु प्रकुर्य्याद्यं गुणदोषविचक्षणम् । पुत्रं पुत्रगुणैर्युक्तं सविज्ञेयश्चकृत्रिम इतिमनुः ॥ न । विड्लवणे ॥ काचलवणे ॥ जवादिनामगन्धद्रव्ये ॥ रसाञ्जने ॥ त्रि । कृतिसम्भवे । रचिते ॥ डुकृञ्º । भावे क्त्रितःक्तिः । कृत्या क्रियया निर्वृत्तम् । त्रेर्मम्नित्यम् इति मप् ॥

कृत्रिमकः । पुं । तुरुष्कनामनि गन्धद्रव्यविशेषे ॥

कृत्रिमधूपः । पुं । } इष्टकधूपे । नानासुगन्धिद्रव्यकृतदशाङ्गादिधूपे ॥ कृत्रिमश्चासौधूपश्च ॥ स्वार्थे कन् ॥
कृत्रिमधूपकः । पुं । }

कृत्रिमपुत्रकः । पुं । कृत्रिमेपुत्रे ॥ त्रि । पुत्तलिकायाम् । गुडिया इति भाषा ॥

कृत्रिममित्रः । पुं । रचितवन्धौ ॥

कृत्वा । अ । विधायेत्यर्थे ॥

कृत्सम् । न । उदके । जले ॥ समुदाये ॥ पुं । पापे ॥ कृन्तति कृणत्ति वा । कृतीच्छेदने वेष्टने वा । स्नुव्रश्चिकृत्यृषिभ्यः किदितिसः ॥

कृत्स्नम् । न । जले ॥ सर्वस्मिन् ॥ कुक्षौ ॥ त्रि । पूर्णे । समग्रे । सोपकरणे । सफले ॥ कृत्यते । कृतीº । कृत्यशूभ्यांक्स्नः ॥

कृत्स्नधर्म्मः । पुं । निष्कामकर्मानुष्ठाने ॥

कृत्स्नवित् । त्रि । परिपूर्णात्मविदि ॥

कृदरः । पुं । कुसूले । अन्नकोष्ठे । धान्यादिगृहे । गञ्ज गोला इतिचभाषा ॥ कुर्वन्ति तस्मिन् । डुकृञ्º । कृदराद्यश्चेतिसाधुः ॥ ॥

कृन्तत्रम् । न । लाङ्गले ॥ कृन्तति । कृतीº । कृतेर्नुम्चेतिकत्रप्रत्ययः ॥ कृन्तत्रङ् कर्त्तनीयमिति वेदभाष्यम् ॥

कृन्तनम् । न । छेदने ॥ यथा । कृन्तनं नखकेशानां छेदनञ्च वनस्पतेः । शावाशौचे न कर्त्तव्यं पाठनं पठनं तथा ॥ इति नारदः ॥

कृपः । पुं । द्रोणाचार्यस्य श्यालके । अश्वत्थाममातुले । कृपाचार्ये ॥ व्यासे ॥

कृपणः । पुं । कृमौ ॥ त्रि । मन्दे । क्षुद्रे । किम्पचाने ॥ कुत्सिते ॥ महाव्यसनप्राप्ते । दीने ॥ यथा । महद्धाव्यसनं प्राप्तो दीनः कृपणउच्यते । कुलेप्यकृपणो राम सम्भूतःसर्वकामदे ॥ इति

रामायणम् ॥ अश्वमेधे । फल हेतौ । सकामे ॥ योऽस्यस्वधाम पि विरचयति गच्छते सकृपणः त द्विधस्त्वाद्विलो ऽ नात्मवित् अप्रा सपुरुषार्थतया कृपणो भवति ॥ क ल्पते अस्मर्दानुम् । कृपू सामर्थ्ये । बाहुलकात् क्युन् । अकारवगल त्वम् ॥

कृपा । स्त्री । दयायाम् । अनुकम्पायाम् । प्रत्युपकारनिरपेक्षतया हीनजना भिषृत्यायाम् ॥ अमैतेरितिश्यामो ऽ भिभिनोत्स्त्रिविशेषे ॥ अपयाम् । अपकृपायाम् । कृपेः सम्प्रसारणञ्चे तिभिदादिपाठादङ् । टाप् ॥

कृपाणः । पुं । खड्गे ॥ कृपाणधारामम माह व्याघ्रकर्णाव्ययनात् । भुज कृपाणया नून ममक्यं मुखवर्त्तनम् ॥ कृपानुदति । नुदप्रेरणे । अन्येभ्यो पीतिड: । पूर्वपदादितियात्वम् ॥

कृपाणकः । पुं । खड्गे । निस्त्रिंशे ॥ स्वार्थे कन् ॥

कृपाणिका । स्त्री । कृपाण्याम् ॥ स्वा॰ कः । प्रत्ययस्थादितीत्वम् ॥

कृपाणी । स्त्री । कर्त्तर्याम् ॥ छुरिका याम् ॥ असिलतायाम् ॥ कृपामया ति । अणाशब्दे । कर्मण्यण् । ङीप् ॥

कृपाधीन: । पुं । कुरुकेशा-

कृपालुः । त्रि । कृपायुक्ते । दयालौ ॥ कृपांलाति । लाआदाने । मित॰डुः ॥

कृपावान् । त्रि । कृपालौ ॥ कृपा अस्ति अस्यास्मिन् वा मतुप् ॥

कृपी । स्त्री । द्रोणाचार्यपत्न्याम् ॥

कृपीटम् । न । उदरे ॥ तोये ॥ कल्प ते । कृपू॰ । कृतॄकृपिभ्यःकीटन् ॥ किपिने ॥ इन्धने ॥

कृपीटपाल: । पुं । केनिपाते ॥ समुद्रे ॥

कृपीटयोनिः । पुं । अग्नौ ॥ कृपीटस्य जलस्य योनिः कूमजन्मकारणकाम् । अग्नेरापइतिश्रुतेश्च ॥ कृपीटं ज लं योनि रुत्पत्तिस्थानं यस्येतिवा । अग्नौ प्रास्ता हुतिः सम्यगादित्य मुपतिष्ठत इति मनु स्मृतेः ॥

कृपीपतिः । पुं । द्रोणाचार्ये ॥

कृपीपुत्र: । पुं । }
कृपीसुत: । पुं । } अश्वत्थाम्नि ॥

कृमि: । पुं । कीटात्मकजन्तौ । कीटके गौ ॥ लाक्षायाम् ॥ कृमिले ॥ खरे ॥ उदरजातकीटरोगे ॥ तदौषधं यथा । वदरीकारवीमूलंगुडाढ्येन समन्वितम् । अग्निनासाधितं च गुष्वा कृमीन् सर्वान् चरेच्छिद्येति गारुडे १९४ अध्यायः ॥ क्रामति॰ क्रमुपा॰ । क्रमितामिपतिक्रम्भामः सुक्षेतिहनिःसम्प्रसारणञ्च । अजो

सम्प्रसारणमिष्यतः सम्प्रसारणानुवृत्तेः ॥

कृमिकण्टकम् । न । चित्राङ्गे ॥ विडङ्गे ॥ उदुम्बरे ॥ चित्रायाम् ॥

कृमिकोशोत्थम् । त्रि । कौशेये । रेशमि कपडा इतिभाषा ॥

कृमिघ्नः । पुं । पलाण्डौ ॥ कोलकन्दे ॥ पारिभद्रे ॥ भल्लातके ॥ विडङ्गे ॥ कृमीन् हन्ति । अमनुष्यकर्त्तृके चेति टक् । अत्पूर्वस्येतिनियमाभावात् ॥

कृमिघ्ना । स्त्री । हरिद्रायाम् ॥

कृमिघ्नी । स्त्री । धूमपत्रायाम् ॥ विडङ्गे ॥

कृमिजम् । न । अगुरुणि ॥ त्रि । कृमिजाते । कृमिभिर्जन्यते । जनी० । अन्येभ्योपीतिडः ॥

कृमिजग्धम् । न । अगुरुणि । जोङ्गके ॥

कृमिजा । स्त्री । लाक्षायाम् ॥

कृमिदन्तकः । पुं । दन्तरोगविशेषे ॥ कृष्णच्छिद्र श्चलः स्रावी ससंरम्भो महारुजः । अनिमित्तरुजोवातात् सज्ञेयः कृमिदन्तकः ॥

कृमिफलः । पुं । उदुम्बरे ॥ कृमयः फलेऽस्य ॥

कृमिरिपुः । पुं । विडङ्गे ॥ कृमीणां रिपुः ॥

कृमिला । स्त्री । अनेकप्रस्वाम् । बहुसन्तानप्रसवायाम् ॥ त्रि । कृमियुक्ते ॥ कृमीन् लाति । ला० । कः ॥

कृमिवृक्षः । पुं । कोषाम्रे ॥

कृमिशङ्खः । पुं । न । कृमिजलजे । जीवशङ्खे ॥

कृमिशत्रुः । पुं । विडङ्गे ॥

कृमिशुक्तिः । स्त्री । जलशुक्तौ ॥

कृमिशैलः । पुं । ⎫ वल्मीके । बाँबी
कृमिशैलकः । पुं । ⎭ इति भाषा ॥

कृमीलकः । पुं । वनमुद्गे ॥

कृविः । पुं । तन्तुवायद्रव्ये । वापयन्त्रे । तांत इतिभाषा ॥ करोति क्रियतेऽनेनवा । डुकृञ्० । कृविघृष्विच्छविस्थविकिकीदिविरितिसाधुः ॥

कृशः । त्रि । अल्पे । सूक्ष्मे ॥ कृश्यते स्म । कृशतनूकरणे । अनुपसर्गात् फुल्लक्षीबेतिसाधुः ॥ कृशधने ॥

कृशरः । पुं । कृसरे ॥ कृशंराति । रा दाने । आतइतिकः ॥

कृशरा । स्त्री । कृसरायाम् ॥ टाप् ॥

कृशशाखः । पुं । पर्पटे ॥

कृशाङ्गः । त्रि । सूक्ष्माङ्गविशिष्टे ॥

कृशाङ्गी । स्त्री । प्रियङ्गुवृक्षे ॥ तन्वङ्ग्याम् ॥ कृशान्यङ्गान्यस्याः ॥

कृशानुः । पुं । पावके । अनले ॥ चित्रकवृक्षे ॥ कृश्यति तनू करोति । कृशतनूकरणे । ऋतन्यञ्जीतिकृश

रानुक् ॥

कृशानुरेताः । पुं । सर्वज्ञे । धूर्जटौ । शिवे ॥ कृशानौ रेतोऽस्य । देव्याः सोढुमशक्यत्वादग्नौ प्रक्षिप्तं रेतः । इति पुराणम् । अतोऽग्निभूः कुमारः ॥

कृशाश्वी । पुं । नटे ॥ कृशाश्वेन प्रोक्तं नटसूत्रमधीते । कर्मन्दकृशाश्वादिनिः ॥

कृशिका । स्त्री । आखुकर्णीलतायाम् ॥

कृषकः । पुं । फाले ॥ वृषे ॥ त्रि । कर्षके ॥ कृषति । कृषविलेखने । कृषेर्वृद्धिश्चोदीचामितिक्वुन् ॥

कृषिः । स्त्री । वैश्यवृत्तिवि० । अन्नते । खेती इति भाषा ॥ अन्नोत्पत्त्यर्थं भूमेर्विलेखनं कृषिः ॥ कर्षणम् । कृष० । इक् कृष्यादिभ्यः । इगुपधात् किदितीन् वा ॥

कृषिकः । पुं । फाले ॥ त्रि । कर्षके ॥ कृषति । कृष० । वृश्चिकृषोः किकन् ॥

कृषिका । स्त्री । फाले ॥ टाप् ॥

कृषिजीवी । पुं । कृषिवृत्तौ । स्वयङ्कृतया ऽस्वयङ्कृतया वा कृष्या जीवति इति तथा ॥

कृषीवलः । त्रि । कर्षके । कृषिजीविनि ॥ कृषिरस्यास्ति । रजः कृष्या

सुतिपरिषदोवलच् । वले इति दीर्घः ॥

कृष्करः । पुं । शिवे ॥ इति त्रिकाण्डशेषः

कृष्टम् । त्रि । कृष्टिमत् क्षेत्रे । सीत्ये । जोता खेत इति भाषा ॥ कृष्यते स्म । कृष० । क्तः ॥ आकृष्टे ॥

कृष्टपच्यः । त्रि । धान्ये ॥ शालिषु ॥ कृष्टे स्वयमेव पच्यन्ते इत्यर्थे राजसूयसूर्य मृषोद्यरुच्यकुप्य कृष्टपच्याव्यथ्याः इति क्यबन्तो निपातितः ॥ कृष्टेन पच्यते वा ॥

कृष्टपाक्यः । त्रि । कृष्टपच्ये ॥ शुद्धे कर्मणि ण्यत् ॥

कृष्टिः । पुं । पण्डिते । बुधे ॥ स्त्री । आकर्षे । कर्षणे ॥ कर्षति । कृष० । क्तिच् ॥ वा० तिर्वा । संज्ञापूर्वकत्वान्नगुणः ॥

कृष्णः । पुं । भगवतोऽवतारविशेषे । केशवे । वासुदेवे । देवकीनन्दने । भक्तदुःखकर्षिणि ॥ भक्तानां पापादिदोषान् सर्वथा निवारयितुमशक्यानपि कृषति निवारयति तेषामेवसर्वथा प्राप्तुमशक्यानपि पुरुषार्थान् आकर्षति प्रापयतीति वा ॥ यथा । स्मरणादेवकृष्णस्य सिद्ध्यन्ति सर्वसिद्धयः । स्मृते

सकलकल्याणभाजनं यत्र जायते। पु
रुषं तमजं नित्यं व्रजामि शरणं हरि
म्। स्मरणादेव कृष्णस्य पापसङ्घा
तपञ्जरम्। शतधा भेदमाप्नोति गि
रिर्वज्रहतो यथेति कृष्णस्मरण मा
हात्म्यम् ॥ अस्य जन्मसमय उक्तो य
माणिक्यनामनि ज्योतिर्ग्रन्थे। उच्च
स्थाः शशिभौमचान्द्रिशनयो लग्नं
वृषो लाभगो जीवः सिंहतुलालि
षु क्रमवशात् पूषोशनोराहवः। नै
शीथः समयोऽष्टमी बुधदिनं ब्रह्म
र्क्षमत्र क्षणे श्रीकृष्णाभिधमम्बु जे
क्षणमभूदाविः परम्ब्रह्म तदिति॥
जनं जनेन जनिता जनं पाति ज
नेन यः। जनं जनेन हरति तं कृ
ष्णं भजसाम्प्रतम्॥ परब्रह्मणि॥य
था। कृषि र्भूवाचकः शब्दो णश्च
निर्वृतिवाचकः। तयोरैक्यं परम्ब्र
ह्म कृष्ण इत्यभिधीयते॥ पाराशर्ये
। वेदव्यासे॥ अर्जुनपाण्डवे॥ वाय
से। काके॥ कोकिले॥ करमर्द्दके
॥ वर्णविशेषे। नीले। श्यामे। मे
चके॥ न। मरिचे॥ लोहे॥ नी
लाञ्जने॥ कालागुरुणि॥ अशुभक
र्मणि॥ त्रि। मेचकवर्णवति॥ क
र्षति मनः। कृष०। कृषेर्वर्णे इति न
क्॥ यद्वा। कर्षत्यरीन्। बाहुल

कात् वर्णं विनापि नक्॥ कृष्णो वर्णोऽ
स्यास्ति वा कृष्णः। न गन्तात् गुणवच
नेभ्यो मतुपो लुगिति लुक्॥
कृष्णकन्दम्। न। कैरवे। निशाह्वसे॥
इति त्रिकाण्डशेषः॥ कृष्णः कन्दोस्य॥
कृष्णकर्म्मा। त्रि। दुराचारे। पापाचा
रयुक्ते॥ कृष्णङ्कर्मास्य॥ कृष्णार्पि
तकर्मणि॥
कृष्णकलिः। स्त्री। गुलालफूल इति
प्रसिद्धे कृष्णकेलौ इति गौडाः॥
कृष्णकायः। पुं। महिषे॥ त्रि। श्याम
तनौ॥ कृष्णः कायोस्य॥
कृष्णकाष्ठम्। न। कालागुरुणि॥
कृष्णकोहलः। पुं। द्यूतकृति। अक्षदे
विनि॥ कृष्णोऽशुभः कोहलोस्य॥
कृष्णगन्धा। स्त्री। शोभाञ्जने॥
कृष्णगर्भः। पुं। कट्फले॥
कृष्णचञ्चुकः। पुं। चणके॥
कृष्णचतुर्द्दशी। स्त्री। कृष्णपक्षीयच
तुर्द्दश्याम्। भूते॥ कृष्णा चासौ चतु
र्द्दशी च॥
कृष्णचन्दनम्। न। हरिचन्दने। पीत
चन्दने॥ कृष्णञ्च चन्दनम्॥
कृष्णचरः। त्रि। कृष्णस्य भूतपूर्व्वः गवादौ।
भूतपूर्व्वे चरट्॥
कृष्णचूडा। स्त्री। स्वनाम्ना गौडेषु प्र
सिद्धे पुष्पवृक्षे। गुलतुरा इति यव

नेषु प्रसिद्धे ॥

कृष्णचूडिका । स्त्री । गुञ्जायाम् ॥

कृष्णचूर्णम् । न । लौहमले ॥

कृष्णजटा । स्त्री । जटामांस्याम् ॥

कृष्णजीरकः । पुं । सुषव्याम । कारव्याम् । कालाजीरा इति भाषा ॥ कृष्णश्चासौ जीरकश्च ॥

कृष्णतण्डुला । स्त्री । कर्णस्फोटायांलतायाम् ॥

कृष्णताम्रम् । न । गोशीर्षचन्दने ॥

कृष्णतारः । पुं । हरिणे ॥

कृष्णत्रिवृता । स्त्री । त्रिवृताभेदे । पालिन्द्याम् । श्यामायाम् । कालतेउडी इति गौडभाषा ॥ कृष्णाचासौ त्रिवृताच ॥

कृष्णदन्ता । स्त्री । काश्मरीवृक्षे ॥

कृष्णदेहः । पुं । भ्रमरे ॥ त्रि । कृष्णवर्णशरीरे ॥ कृष्णोदेहोऽस्य ॥

कृष्णद्वैपायनः । पुं । वेदव्यासे ॥ यथा । कृष्णद्वैपायनं व्यासं विद्धि नारायणं विभुम् । कोह्यन्यः । पुण्डरीकाक्षान्महाभारत कृद्भवेदिति विष्णुपुराणम् ॥ द्वीपमयनं जन्मभूमिर्यस्यसः । द्वैपायनएव । प्रज्ञादण् । द्वीपंयमुनाद्वीप मित्यर्थः ॥ कृष्णः कृष्णवर्णत्वात् कृष्णश्चासौ द्वैपायनश्च ॥

कृष्णधत्तूरकः । पुं । कालाधतूरा इति भाषाप्रसिद्धे कृष्णपुष्पे । विषारार्त्तौ । क्रूरधूर्त्ते । शिवे । सिद्धे ॥ सितनीलकृष्णलोहितपीतप्रसवाश्चसन्ति - धत्तूराः । सामान्यगुणोपेता स्तेषुगुणाढ्यस्तु कृष्णकुसुमः स्यादितिराजनिर्घण्टः ॥

कृष्णपक्षः । पुं । सितेतरपक्षे । असितपक्षे ॥ सतु प्रतिपदाद्य मावास्यान्तपञ्चदशदिनात्मकः । यथा । तत्र पक्षाबुभौ मासि शुक्लकृष्णौ क्रमेणहि । चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः ॥ पक्षद्वयोस्तु तिथयः क्रमात् पञ्चदशस्मृताः । दर्शान्ताः कृष्णपक्षेताः पूर्णिमान्ताश्चशुक्लके ॥ इति तिथ्यादितत्त्वम् ॥

कृष्णपर्णी । स्त्री । कालतुलस्याम् ॥

कृष्णपाकः । पुं । करमर्द्दके ॥ कृष्णःपाकोऽस्य ॥

कृष्णपाकफलः । पुं । करमर्द्दे ॥ कृष्णपाकंफलमस्य ॥

कृष्णपिङ्गला । स्त्री । चण्ड्याम् । दुर्गायाम् ॥

कृष्णपिण्डीतकः । पुं । कृष्णपिण्डीरवृक्षे । वराहे ॥

कृष्णपिण्डीरः । पुं । कृष्णपिण्डीतके ॥

कृष्णपिपीली । स्त्री । कृष्णवर्णायाम्पिपीलिकायाम् । हचरुहायाम् । स्थू

कायाम् ॥

कृष्णपुच्छः । पुं । लोमडी इतिभाषा प्रसिद्धे वन्यजन्तुविशेषे । किखौ ॥

कृष्णपुष्पः । पुं । कृष्णधत्तूरके ॥

कृष्णपुष्पी । स्त्री । प्रियङ्गुवृक्षे ॥

कृष्णफलः । पुं । करमर्दके ॥ कृष्णानि फलान्यस्य ॥

कृष्णफलपाकः । पुं । करमर्दके । करौंदा इतिभाषा ॥

कृष्णफला । स्त्री । सोमराज्याम् ॥ कृष्णानि फलान्यस्याः ॥ कोलशिंब्याम् ॥ अजादित्वाट्टाप् ॥

कृष्णभूकुष्माण्डः । पुं । विदार्याम् ॥

कृष्णभूमः । त्रि । कृष्णवर्णमृत्तिकायुक्ते देशे ॥ कृष्णोदगित्यच् ।

कृष्णभूमिजा । स्त्री । गोमूत्रिकातृणे ॥

कृष्णभेदा । स्त्री । कटुकायाम् ॥ कृष्णो वर्णेन भेदः स्फोटोऽस्याः ॥

कृष्णभेदी । स्त्री । कटुकायाम् । कटुरोहिण्याम् ॥ कृष्णं मलम्भिनत्ति । कर्मण्यण् । ङीप् ॥

कृष्णमन्त्री । पुं । पवनव्याधौ । उद्धवे ॥

कृष्णमल्ली । स्त्री । कृष्णमल्लिकायाम् । वनवर्वरे । वर्वर्याम् । काली तुलसी इतिभाषा ॥

कृष्णमुद्गः । पुं । काला मूंग इतिप्रसिद्धे मुद्गे । वासन्ते । सुराष्ट्रजे ॥

कृष्णमूली । स्त्री । शारिवाविशेषे ॥

कृष्णमृत्तिकः । पुं । कृष्णभूमे ॥

कृष्णमृत् । स्त्री । काली मिट्टी इतिप्रसिद्ध कृष्णवर्णायां मृदि । कृष्णभूमौ ॥ कृष्णमृत् मधुरा दाहास्रप्रदर श्लेष्मपित्तनुत् ॥

कृष्णरुहा । स्त्री । जतुकालतायाम् ॥

कृष्णरूप्यः । त्रि । कृष्णचरे ॥

कृष्णलम् । न । रक्तिकायाम् । रत्ती घुंघची चिरमठी इतिभाषा ॥ त्रिभिर्यवैःपरिमितेमाने ॥ सर्षपाः षट् यवो मध्य स्त्रियवन्त्येककृष्णलम् ॥

कृष्णलकः । पुं । गुञ्जायाम् ॥

कृष्णलवणम् । न । सौवर्चललवणे । कालालूण इति भाष ॥ काचलवणे ॥

कृष्णला । स्त्री । रक्तिकायाम् । गुञ्जायाम् ॥ कृष्णं वर्णं लाति । ला दाने । आतोनुपेतिकः ॥ यद्वा । कृष्णो वर्णोस्त्यस्याः । सि० लच् ॥

कृष्णलोहम् । न । अयस्कान्ते ॥

कृष्णलोहितः । पुं । धूम्रवर्णे । कृष्णरक्तमिश्रवर्णे ॥ त्रि । धूम्रवर्णवति ॥ कृष्णमिश्रोलोहितः । शा० ॥

कृष्णवक्त्रः । पुं । वानरे ॥ इति हलायुधः ॥ त्रि । श्याममुखे ॥

कृष्णवर्णः । पुं । शूद्रे ॥ विधुन्तुदे ॥ कृष्णो वर्णोऽस्य ॥

कृष्णवर्त्मा । पुं । अग्नौ । आश्रयाशे ॥ कृष्णधूमोवर्त्मास्य ॥ दुराचारे ॥ विधुन्तुदे ॥ चित्रकवृक्षे ॥

कृष्णवर्वरकः । पुं । वर्वरवृक्षे ॥

कृष्णवल्लिका । स्त्री । जतुकालतायाम् ॥

कृष्णवल्ली । स्त्री । कृष्णार्जके ॥ सारिवा विशेषे ॥

कृष्णवानरः । पुं । कपौ । गोलाङ्गूले ॥

कृष्णवीजः । पुं । रक्तशिग्रौ ॥ न । कालिङ्गे । कलौंदा इति भाषा प्रसिद्ध फले ॥

कृष्णवृन्ता । स्त्री । पाटलावृक्षे ॥ माषपर्ण्याम् ॥ कृष्णं वृन्तमस्याः ॥

कृष्णवृन्तिका । स्त्री । गम्भार्याम् ॥ कृष्णवृन्तायाम् ॥

कृष्णवेणा । स्त्री । सरिद्विशेषे ॥

कृष्णशारः । पुं । कालसारमृगे । कृष्णसारे ॥ कृष्णश्चासौ शारःशवलश्च । वर्णोवर्णेनेतिसमासः ॥

कृष्णशालिः । पुं । कालधान इति गौड भाषा प्रसिद्ध धान्य विशेषे । यथा मशालौ ॥ कृष्णशालिस्त्रिदोषघ्नोमधुरः पुष्टिकृद्धितः । पुष्टिवीर्यवर्द्धमश्च वर्णकान्तिवलप्रद इत्यस्यगुणाः ॥

कृष्णशिंबिका । स्त्री । काकाण्ड्याम् ॥ कृष्णवर्णा शिम्बिका ॥

कृष्णशिग्रुः । पुं । शोभाञ्जने ॥

कृष्णशृङ्गः । पुं । महिषे । लुलापे ॥

कृष्णसखः । पुं । अर्जुनवृक्षे ॥ अर्जुने ॥ कृष्णस्य सखा । टच् ॥

कृष्णसखी । स्त्री । जीरके ॥ इति शब्द चन्द्रिका ॥

कृष्णसर्षपः । पुं । राजसर्षपे । राजिकायाम् ॥

कृष्णसारः । पुं । कुष्ठाम् ॥ मृगविशेषे । कालसारे ॥ कृष्णसारस्तु चरति मृगोयत्रस्वभावतः ॥ खदिरे ॥ कृष्णोनसारः शवलः । तृतीयेतियोगविभागात् समासः ॥

कृष्णसारथिः । पुं । पार्थे । धनञ्जये ॥ अर्जुनवृक्षे ॥

कृष्णसारा । स्त्री । शिंशपावृक्षे ॥ कृष्णः सारो ऽस्याः ॥

कृष्णस्कन्धः । पुं । कालस्कन्धे । तमालवृक्षे ॥

कृष्णा । स्त्री । द्रौपद्याम् ॥ नीलीवृक्षे ॥ कणायाम् ॥ द्राक्षायाम् ॥ नीलपुनर्नवायाम् ॥ कृष्णजीरके ॥ श्यामायाम् ॥ कटुकायाम् ॥ सारिवाविशेषे ॥ राजसर्षपे ॥ पर्पट्याम् ॥ काकोल्याम् ॥ सोमराज्याम् ॥ नदीविशेषे ॥ निर्ऋतेः पुर्याम् ॥ कृष्णा दैत्यपते र्दक्षिणोर्धामवद्दैत्यसेविता । नीलरत्नप्रभाजालविताणवरभूषणा ॥ धू

मादिगतौ । श्मशानत्वेन तमोमयत्वात् दक्षिणमार्गत्वेन च प्रसिद्धे पितृयाणमार्गे ॥ कृष्णवर्णायाम् त्रि । अनुदात्तत्वाभावान्ङीप् । कृष्णवर्णो ऽस्यस्याः । अर्शआद्यच् ॥

कृष्णागुरु । न । अगुरुणि । कालागुरुणि । कृष्णकाष्ठे । धूपार्हे ॥ कृष्णागुरुसाधिकं तत्तु लोहवद्वारि मज्जति ॥ अगुरुप्रभवः स्नेहः कृष्णागुरुसमः स्मृतः ॥

कृष्णाचलः । पुं । रैवताद्रौ ॥ कृष्णस्याचलस्य ॥

कृष्णाजिनम् । न । कृष्णसारचर्मणि ॥

कृष्णाञ्जनी । स्त्री । कालाञ्जनीवृक्षे ॥

कृष्णानदी । स्त्री । कृष्णसमुद्भवायाम् । कृष्णगङ्गायाम् ॥ स्वच्छमस्याश्च जलं पावनं दोषवर्जितम् ॥

कृष्णाभा । स्त्री । कालाञ्जन्याम् ॥

कृष्णामिषम् । न । कृष्णलोहे ॥ इ० हे० ॥

कृष्णायसम् । न । कृष्णवर्णलोहे । काललोहे ॥

कृष्णार्चिः । पुं । अग्नौ ॥

कृष्णार्जकः । पुं । कालीतुलसी इति भाषा प्रसिद्धे । गरघ्ने । वनबर्बरे ॥

कृष्णाशुः । पुं । नीवारेषु ॥

कृष्णावासः । पुं । अश्वत्थवृक्षे ॥ कृष्णस्यावासो ऽस्मिन् ॥

कृष्णिका । स्त्री । राजिकायाम् । राइ इति भाषा ॥ कृष्णैव । संज्ञायां कन् ॥

कृष्णेक्षुः । न । कालाखी ईख इति प्रसिद्धे कोशकारे । श्यामेक्षौ ॥

कृष्णेतरः । पुं । शुक्लपक्षे ॥

कृष्णोदुम्बरिका । स्त्री । काकोदुम्बरिकायाम् ॥

कृष्या । स्त्री । कर्षणार्हायाम् ॥

कृसरः । पुं । तुल्यतिलाक्षे ॥ तिलतण्डुलसम्पक्वः कृसरः सोऽभिधीयते ॥ क्रियते । डुकृञ् । कृधूमदिभ्यः कित् इति सरः । बा० नपत्वम् ॥

कृसरा । स्त्री । खिचरीति लोकप्रसिद्धे द्विदलमिश्रितौदने ॥ तण्डुला दालिसम्मिश्रा लवणार्द्रकहिङ्गुभिः । संयुक्ताः सलिले सिद्धाः कृसरा कथिता बुधैः ॥ कृसरा शुक्रला बल्या गुरुः पित्तकफप्रदा । दुर्जरा बुद्धिविष्टम्भमलमूत्रकरी स्मृता ॥

कॢप्तः । त्रि । रचिते । कृतकल्पने ॥ नियते ॥

कॢप्तकीला । स्त्री । पट्टोलिकायाम् । व्यवस्थापत्रे ॥ इति त्रिकाण्डशेषः ॥

कॢप्तधूपः । पुं । सिह्लके ॥

कॢप्तिकः । त्रि । क्रीते ॥ इति हलायुधः ॥

केकयः । पुं । सूर्यवंशीयराजविशेषे ॥

कावस इति ख्याते देशविशेषे ॥

केकयी । स्त्री । भरतमातरि । दशरथ राजपत्न्याम् ॥ केकयस्य दुहिता । सङ्कोचेमानाभावा ज्जन्यजनकभावोपि पुंयोग इति पुंयोगादाख्यायामितिङीष् ॥

केकर: । त्रि । वलिरे । ऐंचातानाइति भाषा प्रसिद्धे निम्नोन्नताक्षिपुरुषे । टेरके ॥ केमूर्द्धिकर्त्तुं शीलमस्य । कृञो हेतुताच्छील्यानुलोम्येष्विति टः ॥ हलदन्तादित्यलुक् ॥

केका । स्त्री । मयूरस्यवाक्याम् ॥ के मूर्द्धिकायते । कैशब्दे । अन्येभ्योपीतिडः । हलदन्तात् सप्तम्याः संज्ञायामित्यलुक् ॥

केकावल: । पुं । मयूरे ॥

केकिक: । पुं । केकावति । मयूरे ॥ व्रीह्यादिभ्यश्चेति ठन् ॥

केकी । पुं । मयूरे ॥ केकाऽस्त्यस्य । व्रीह्यादिभ्यश्चेति पक्षे इनि: ॥

केचन । अ । केचिदित्यर्थे ॥

केचित् । अ । केचनेत्यर्थे ॥

केचुकम् । न । शाकविशेषे । नाडीचे । विम्बरोचने ॥

केणिका । स्त्री । पटकुट्याम् । तंबूटी इतिभाषा ॥

केत: । पुं । अभिनवमन्दिरे ॥ केतनम् । कित० । घञ् ॥

केतक: । पुं । केवडा इतिख्याते केतकीवृक्षे ॥ केतक: सूचिकापुष्पो जम्बुक: क्रकचच्छद: । सुवर्णकेतकीत्वन्यालघुपुष्पासुगन्धिनी ॥ केतक: कटुक: स्वादुर्लघु स्तिक्त: कफापह: ॥ न । केतक्या: पुष्पे ॥ केतक्या: पुष्पम् केतकम् । पुष्पमूलेषुबहुलमित्यणोलुक् । नादि वृद्धि: । लुक् तद्धितलुकीतिस्त्रीप्रत्ययस्यलुक् ॥

केतकी । स्त्री । तृणद्रुमाम्लरे । सूची पुष्पे । धूलिपुष्पिकायाम् ॥ केतयति । कितनिवासादो । कुन् । ण्वुल्वा ॥ गैारादित्वात् ङीष् ॥

केतनम् । न । सदने । गृहे ॥ निमन्त्रणे ॥ केतो । ध्वजे । चिह्ने ॥ कृत्ये ॥ केत्यते ज्ञायते ऽनेन । कित० । भावकर्मकरणाधिकरणेषुल्युट् ॥ स्थाने ॥

केतित: । त्रि । निमन्त्रिते ॥ केतितस्तु यथान्यायं हव्यकव्येष्वतन्द्रित: । कथंचिदप्यतिक्रामन्पाप: शूकरतांव्रजेत् ॥

केतु: । पुं । रुजि । द्युतो ॥ पताकायाम् ॥ लक्ष्मणि । चिह्ने ॥ रिपो ॥ नवमग्रहे । राहो: शरीरे । शिखिनि ॥ सचोत्पातरूप: ॥ यथा । ना

केतुः

नाहूपधरोऽथक्षो रविश्चा नरस श्च
यः । नोत्पत्तिर्ज्ञायते तस्य नाऽऽदेयःप
श्चितैरपि ॥ एकचूडो द्विचूडश्च
त्रिशिखः पञ्चचूडकः । सहस्र शिख
रूपश्च इन्द्रकेतुरिवस्थितः ॥ सूर्य
पुत्रोऽग्निपुत्रश्च ब्रह्मविष्णुशिवात्मजः
। अनेकशिखरः केतुर्ग्रहपीडां व्य-
पोहतु ॥ अथकेतुरित्येकवचनंजा
त्यभिप्रायम् । धूम्रा द्विवाहवः सर्वे
गदिनो विकृताननाः । गृध्रासनग
ता नित्यंकेतवःस्युर्वरप्रदाः॥ सर्वेकि
रीटिनःकार्या ग्रहालोकहितावहाः
। स्वाकृतेनोच्छ्रिताः सर्वे शतमष्टोत्त
रंसदा ॥ इत्यादिषु बहुत्वदर्शनात्
॥*॥ अत्र केतुचारोवाराहीतो लि
ख्यते।तद्यथा। तत्रादावागमप्रदर्शना
र्थमाह । गार्गीयं शिखिचारं पारा
शर मसितदेवलकृतञ्च । अन्यांश्च
बहून् दृष्ट्वा क्रियतेऽयमनाकुलश्चारः
॥ अथोदयास्तमयलक्षणमाह । दर्श
न मस्तमयो वा न गणितविधिना
ऽस्य शक्यते ज्ञातुम् । दिव्यान्तरिक्ष
भौमास्त्रिविधाःस्युः केतवोयस्मात् ॥
अथकेतूनां दिव्यवर्जितानामन्येषां
स्वरूपमाह ॥ अहुताशेऽनलरू
पंयस्मिंस्तत् केतुरूपमेवोक्तम् ।
खद्योतपिशाचालयमणिरत्नादीन्

केतुः

परित्यज्य ॥ दिव्यान्तरीक्ष भौमा
नां केतूनां ल०। ध्वजशस्त्रभवनतरु
तुरगकुञ्जराद्येष्वथान्तरीक्षास्ते ।
दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्य
थाशिखिनः ॥ केतूनां संख्यां मता
न्तरेणाह । शत मेकाधिक मेके
सहस्र मपरे वदन्ति केतूनाम् ।
बहुरूपमेकमेव प्राह मुनिर्नारदः
केतुम् ॥ मतान्तराण्युक्त्वास्वसिद्धा
न्तमाह । यद्येको यदिवबहवः किम
नेन फलन्तु सर्वथा वाच्यम् । उद-
यास्तमयैः स्थानैः स्पर्शैरा धूपनै
र्वर्णैः ॥ तेषां फलपाकनियमार्थ
माह ॥ यावन्त्यहानि दृश्यो मासा
स्तावन्त एवफलपाकः । मासैरब्दां
श्च वदेत् प्रथमात् पक्षत्रयात् पर
तः ॥ शुभस्य केतो र्ल०। ह्रस्व
स्तनुः प्रसन्नः स्निग्ध ऋजु रचिरसं
स्थितः शुक्लः । उदितोवाप्यभिदृष्टः
सुभिक्षसौख्यावहः केतुः ॥ अशुभ
स्य केतो र्ल०। उक्तविपरीतरूपो
न शुभकरो धूमकेतुरुत्पन्नः । इन्द्रा
युधानुकारी विशेषतो द्वित्रिचूलो
वा ॥ अधुना केतुसहस्रस्य लक्षणं
सफलं विवक्षु स्तत्रादावेव रविजाः
पञ्चविंशतिः केतवो भवन्ति तेषां
लक्षणमाह ॥ हारमणिहेमरूपः

किरणाख्याः पञ्चविंशतिः सशिखाः ।
प्रागपरदिशो दृश्यास्त्वपति विरोधा
वहा रविजाः ॥ अग्निपुत्रा स्तावन्त
दृश्याह । शुकदहनबन्धुजीवकला
क्षाचतजोपमा हुताशसुताः । आ
ग्नेय्यां दृश्यन्ते तावन्त स्तेऽपि शि
खिभयदाः ॥ मृत्युसुता स्तावन्त आ
ह वक्रशिखा मृत्युसुता रूक्षाः कृ
ष्णाश्च तेऽपि तावन्तः । दृश्यन्ते याम्या
यां जनमरकावेदिन स्ते च ॥ भूमि
पुत्रा द्वाविंशतिरेवाह । दर्पणवृत्ता
कारा विशिखाः किरणान्विता धरा
तनयाः । चन्द्रयदा द्वाविंशति रैशा
न्या मम्बुतैलनिभाः ॥ चन्द्रसुता स्त्र
यः । शशिकिरणरजतहिमकुमुद
कुन्दकुसुमोपमः सुताः शशिनः ।
उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः
शिखिनः ॥ ब्रह्मदण्डस्यस्य ल° ॥
ब्रह्मसुत एक एव त्रिशिखो वर्णै
स्त्रिभि र्युगान्तकरः । अनियतदिक्
सम्भवो विज्ञेयो ब्रह्मदण्डाख्यः ॥
एकाधिकं शतं कथित मन्यानि नव
शतान्येकेनानि कथनीयानीत्याह
। शत मभिहित मेकाधिक मेकेन
विरहिता न्यस्मात् । कथयिष्ये
केतूनां शतानि नवचषचैः स्प-
ष्टैः ॥ शुक्रपुत्रा श्चतुरशीतिसङ्-

केतुः

ख्या स्तानाह । सौम्यैशान्यौ बदर्यं
शुक्रसुता यान्ति चतुरशीत्या ख्याः ।
विपुलसिततारका स्ते स्निग्धाश्च भ
वन्तितीव्रफलाः ॥ षष्टिः शनैश्चर
पुत्राः । स्निग्धाः प्रभासमेता द्विशि
खाः षष्टिः शनैश्चराङ्गजाः । अति
कष्टफला दृश्याः सर्वे चैते कनकसं
ज्ञाः ॥ गुरुपुत्राः पञ्चषष्टिः । विक
चा नाम गुरुसुताः सितैकताराः
शिखापरित्यक्ताः । षष्टिः पञ्चभिर
धिका स्निग्धा याम्याश्रिताः पापाः ॥
एकपञ्चाश बुधपुत्राः । नातिव्यक्ताः
सूक्ष्मा दीर्घाः शुक्ला यथेष्टदिक्प्र
भवाः । बुधजा स्तस्करसंज्ञाः पापफ
ला स्त्वेकपञ्चाशत् ॥ भौमपुत्राः ष
ष्टिः । चतजानलाऽनुरूपा स्त्रिचूल
ताराः कुजात्मजाः षष्टिः । नाम्ना च
कौङ्कुमा स्ते सौम्याशासंस्थिताः पा
पाः ॥ चयस्त्रिंशद्राहुपुत्राः । त्रिंशत्
त्र्यधिका राहो स्तेतामसकीलकाइ
तिख्याताः । रविशशिगा दृश्यन्ते
तेषां फलमकचारोक्तम् ॥ अर्कचा
रोक्तं तामसकीलकसंज्ञा राहुसुताः
केतवदृश्याद्दिनेत्यर्थः । विंशत्यधि
कं शत मग्निपुत्राणाम् । विंशत्य
धिक मन्य च्छत मग्ने र्विश्वरूपसं
ज्ञानाम् । तीव्रानलभयदानां ज्वा

चामाराभिरा कुलतनूनाम् । सप्त सप्तति वायुपुत्राः । श्यामारुणा विताराः चामररूपा विकीर्णदीधितयः । अरुणाख्यास्ते वायोः सप्त च सप्ततिः पापदाःपरुषाः ॥ प्रजापतिसुतान् ब्रह्मणःपुत्रांश्चाह । तारापुञ्जनिकाशाः गणका नाम प्रजापतेरष्टौ । द्वे च शते चतुरधिके चतुरस्रा ब्रह्मसन्तानाः ॥ द्वात्रिंशद्वरुणपुत्रा नाह । कङ्का नाम वरुणजा द्वात्रिंशद्वंशगुल्मसंस्थानाः । शशिवत् प्रभासमेता स्तीव्रफलाः केतवः प्रोक्ताः ॥ षण्णवतिःकालपुत्राः । षण्णवतिः कालपुत्राः कबन्धसंज्ञाः कबन्धसंस्थानाः । पुण्ड्रा भयप्रदाः स्युर्विरूपताराश्च ते शिखिनः ॥ नव विदिक्पुत्राः सर्वेषां च संख्या मन्येषाञ्च विशेषं वक्ष्यामीत्याह । शुक्लविपुलैकतारा नव विदिशां केतवः समुत्पन्नाः । एवं केतुसहस्रं विशेष मेषां मतो वक्ष्ये ॥ तत्र ये दृश्यन्ते तेषां लक्षणं वक्तुकाम स्तत्रादा वेव वसाकेते र्लक्षणमाह । उदगायतो महान् स्निग्धमूर्त्ति रपरोदयी वसाकेतुः । सद्यः करोति मरकं सुभिक्ष मप्युत्तमं कुरुते ॥ अस्थिकेतोः शस्त्राख्यस्य ल० । तल्लक्ष

णो ऽस्थिकेतुः सतु रूक्षः क्षुद्भयावहः प्रोक्तः । स्निग्ध स्तादृक् प्राच्यां शस्त्राख्यो डमरमरकाय ॥ कपालकेतो र्ल० । दृश्यो ऽमावास्यायां कपालकेतुः स धूम्ररश्मिशिखः । प्राङ्नभसो ऽर्द्धविचारी क्षुन्मरकावृष्टिरोगकरः ॥ रौद्रकेतोर्ल० । प्राग् वैश्वानरमार्गे शूलाग्रःश्यावरूक्षताम्रार्च्चिः । नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफलः ॥ चलकेतोर्ल० । अपरस्यां चलकेतुः शिखया याम्याग्रयाङ्गुलोच्छ्रितया । गच्छेद्यथायथोदक् तथा तथा दैर्घ्य मायाति ॥ सप्त मुनीन् संस्पृश्य ध्रुव मभिजित मेवच प्रतिनिवृत्तः । नभसो ऽर्द्धं भाग मित्वा याम्येनास्तं समुपयाति ॥ हन्यात् प्रयागकूलाद् यावदवन्तीञ्च पुष्करारण्यम् । उदगपि च देविका मपि भूयिष्ठं मध्यदेशाख्यम् ॥ अन्यानपि च स देशान् क्वचित् क्वचिद्धन्ति रोगदुर्भिक्षैः । दश मासान् फलपाको ऽस्यकैश्चिदष्टादश प्रोक्तः ॥ श्वेतकेतो र्ल० । प्रागर्द्धरात्रदृश्यो याम्याग्रः श्वेतकेतु रन्यश्च । कइति युगाकृति रपरे युगपत्तौ सप्तदिनदृश्यौ ॥ स्निग्धौ सुभिक्षशिवदौ तथाधिकं दृश्यते कनामा यः ।

केतुः

स्य वर्षाण्युपतापं जनयति शस्त्र
कोपकृतम् ॥ श्वेतस्य लक्षणम् । श्वे
त इति जटाकारो रूक्षः श्यावो वि
यत्त्रिभागगतः । विनिवर्त्तते ऽपस
व्यं त्रिभागशेषाः प्रजाः कुरुते ॥ रश्मि
केतोर्ल° । धूम्रया ऽति शिखया
दर्शन माप्नाति कृत्तिकासंस्थः । ज्ञेयः
स रश्मिकेतुः श्वेतसमानं फलं धत्ते
॥ ध्रुवकेतोर्ल° । ध्रुवकेतु रनियत
गतिप्रमाणवर्णाकृति र्भवति विष्वक्
। दिव्यान्तरीक्षभौमो भवत्ययं स्नि
ग्धं इष्टफलः ॥ सेनाङ्गेषु नृपाणां गृ
हशैलेष्वपि देशानाम् । गृहि
णा मुपस्करेषु च विना शिनां दर्शनं
याति ॥ कुमुदकेतोर्ल° । कुमुद
इति कुमुदकान्ति र्वारुण्यां प्राक्शि
खो निशामेकाम् । दृष्टः सुभिक्ष
मतुलं दश किल वर्षाणि स करोति
॥ मणिकेतोर्ल° । सकृदेकयाम दृ
श्यः सुसूक्ष्मतारो ऽपरेण मणिकेतुः ।
ऋज्वी शिखा ऽस्य शुक्ला स्तनोद्गता
क्षीरधारेव ॥ उदयन्नेव सुभिक्षं च
तुरोमासान् करो त्यर्द्ध सार्द्धान् ।
प्रादुर्भावं प्रायः करोति च क्षुद्र ज
न्तूनाम् ॥ जलकेतो र्ल° जलकेतुः ।
जलकेतु रपि च पश्चात् स्निग्धः । शिख
या ऽपरेणोन्नतया । नव मासान् स

केतुः

सुभिक्षं करोति शान्तिञ्च लोकस्य ॥
भवकेतोर्ल° । भवकेतु रेकरात्रं दृ
श्यः प्राक् सूक्ष्मतारकः स्निग्धः । ह
रिलाङ्गूलोपमया प्रदक्षिणा वर्त्तया
शिखया ॥ यावत एव मुहूर्त्तान् द
र्शन माप्नाति निर्दिष्टमासान् । ताव
दतुलं सुभिक्षं रूक्षः प्राणान्तिकान्
रोगान् ॥ पद्मकेतो र्ल° । पश्चादेव
पद्मकेतु र्मृणालगौरो भवे न्निशा
मेकाम् । सप्त करोति सुभिक्षं वर्षा
ण्यतिहर्षयुक्तानि ॥ आवर्त्तकेतो
र्ल° । आवर्त्त इति निशार्द्धे सव्य
शिखो ऽरुणनिभो ऽपरे स्निग्धः ।
यावत् क्षणान् स दृश्य स्ताव न्मासा
न् सुभिक्षकरः ॥ संवर्त्तकेतो र्ल° ।
पश्चात् सन्ध्याकाले संवर्त्तो नाम
धूम्रताम्रशिखः । आक्रम्य वियत्त्र्यं
शं शूलाग्रावस्थितो रौद्रः ॥ यावत
एव मुहूर्त्तान् दृश्यो वर्षाणि हन्ति
तावन्ति । भूपान् शस्त्रनिपाते रुद-
यर्क्षञ्चापि पीडयति ॥ अशुभान्
केतून् वर्णयित्वा ऽशुभानां नक्षत्रस्य
र्शना भूपता दुष्टफलं नक्षत्रमीप्स्यां
च । ये नक्षत्रा स्तान् शिखा केतुभिरा
धूपिते ऽथवा स्पृष्टे । तस्य पश्चात्तिर्व
धो येषां राज्ञां प्रवक्ष्ये तान् ॥ अश्वि
न्यां नयजकं अश्मकेषु [illegible]

पिवं हन्यात्। बहुलासु कलिङ्गेशं रोहिण्यां शूरसेनपतिम्॥ औशीनरमपि सौम्ये जलजाजीवाधिपं तथार्द्रासु। आदित्येऽश्मकनाथं पुष्ये मगधाधिपं हन्ति॥ असिकेशं भौजङ्गे पित्र्येऽङ्गं पाण्ड्यनाथमपि भाग्ये। औज्जयनिकमार्य्यम्णे सावित्रे दण्डकाधिपतिम्॥ चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत्तज्ज्ञः॥ काश्मीरककाम्बोजौ नृपती प्राभञ्जने न स्तः॥ इक्ष्वाकुरलकनाथश्च हन्यते यदि भवेद्विशाखासु। मैत्रे पुण्ड्राधिपतिं ज्यैष्ठासु च सार्वभौमवधः॥ मूले न्ध्रमद्रकपती जलदैवे काशिपो मरणमेति। यौधेयकार्ज्जुनायनशिविचैद्यान् वैश्वदेवे च॥ हन्यात् कैकयनाथं पाञ्चनदं सिंहलाधिपं वाङ्गम्। नैमिषनृपं किरातं श्रवणादिषु षट्स्विमान् क्रमशः॥ केतोर्विशेषमाह। उल्काभिताडितशिखः शिखी शिवः शिवतरोऽभिदृष्टो यः। अशुभः स एव चोलावगाणसितहूणचीनानाम्॥ विशेषान्तरमाह। नम्रायतः शिखिशिखाभिहतो यतो वा कच्चं स यत् स्पृशति तत्कथितांश्च देशान्। हिमप्रमाथमिहता न स यथागतस्तमान् भुङ्क्ते गतो नरपतिः परभोगिभोगान्॥ इति वाराहीसंहितायां केतुचाराध्याय एकादशः॥ चाय्यतेऽनेन वा। चायृ पूजादौ। चायः किरितितुः॥

केतुगृहम्। न। मीनराशौ॥

केतुग्रहवल्लभम्। न। वैदूर्य्यमणौ॥

केतुभः। पुं। मेघे॥

केतुमालम्। न। जम्बुद्वीपस्य नवखण्डान्तर्गते खण्डविशेषे॥ सुकेतनं केतुमालं प्रतीच्यां गन्धमादनात्॥

केतुरत्नम्। न। वैदूर्य्यमणौ॥

केदरः। पुं। वृक्षविशेषे॥ त्रि। टेरके॥

केदारः। पुं। अद्रिविशेषे॥ बदर्य्याः समीपे क्षेत्रविशेषे॥ यथा। केदाराख्ये महाक्षेत्रे देवी सामार्गदायिनीति देवीगीता॥ शिवे॥ भूमिप्रभेदे॥ आलवाले॥ खेत इति प्रसिद्धक्षेत्रे। क्यार इति भाषा॥ कैदारं वारि मधुरं विपाके गुरु दोषलम्। तदेव बद्धमुक्तन्तु विशेषाद्दोषदं भवेत्॥ के जले शिरसि वा दारोऽस्य। हलदन्तादित्यलुक्॥ केन जलेन दीर्य्यते वा। दृ विदारणे। कर्म्मणि घञ्। केदाराद्यञ्चेति निर्द्देशादेत्वम्॥

केदारकटुका। स्त्री। कटुकायाम्॥

केदारजम् । न । पद्मकाष्ठे ॥

केदारेशः । पुं । केदारेश्वरे । काशि-
स्थशिवविशेषे ॥

केनती । स्त्री । स्मरदारेषु । रतौ ॥

केनाटः । पुं । कुलिशनरके ॥ शिरः क
पोलसन्धिषु ॥

केनिपातः । पुं । अरित्रे । कर्णे । नौ
कापृष्ठस्थचालनकाष्ठे । हालि इति
गौड भाषा । पतवार इति देशभा
षा ॥ केनिपातिका । वहदन्ता
हिण्डुक ॥

केनिपातकः । पुं । केनिपाते ॥ केचादि
त्विकप् । संज्ञायामिति कन्वा ॥

केन्दुः । पुं । तिन्दुकवृक्षे ॥

केन्दुकः । पुं । गाव इति गौडभाषा
प्रसिद्धे मालव वृक्षे ॥ तालविशे
षे ॥ यथा । लघुद्वयं विरामान्तं
ताले केन्दुकसंज्ञके इति दामोदरः ॥

केन्द्रम् । न । कण्टके । लग्नचतुर्थसप्त
मदशमस्थानेषु ॥ यथा । लग्नाम्बु
द्यूनकर्माणि केन्द्रमुक्तञ्च कण्टक
म् । चतुष्टयञ्चाथ खेटा बली त
त्र विशेषतइति ॥ स्पष्टग्रहानयना
र्थं शीघ्रमन्दसंज्ञकाङ्कद्वये ॥ गोल
स्य मध्यस्थाने ॥ यथा । हन्तास्य मध्यं
किल केन्द्रमुक्तं केन्द्रं ग्रहोच्चान्तर
मुच्यते ऽतः । यतो ऽन्तरे तावति
तुङ्गदेशा श्रीचोच्चवृत्तस्य मध्येऽर्क
न्द्रमिति ॥ यात्रा योगविशेषे ॥ य-
था । चार्के क्रमगते चन्द्रे केन्द्रस्थे
सुरपूजिते । योगः केन्द्र इति ख्या
तोयात्रार्थ सिद्धिदइति ॥

केन्द्रभवनम् । न । लग्नचतुर्थसप्तमद
शमभवनेषु ॥

केमद्रुमः । पुं । जन्मकालिके योगविशे
षे ॥ यथा । रविवर्जं द्वादशगै रन
फा चन्द्रात् द्वितीयगैः सुनफा ।
उभयस्थितै र्दुरधरा केमद्रुमसंज्ञि
तोऽतो ऽन्यथेति ॥ भृतकं दुःखिनम
धमं जातं केमद्रुमे विवदन्तितथक
लम् ॥

केमुकः । पुं । केउ इतिगौडभाषा
प्रसिद्धे वृक्षविशेषे । मेचके । इत्य
सारिपाल ॥ न । कन्दशाकवि० ॥
केमुकं कटुकं पाके शीतं ग्राहि हिमं
लघु । दीपनं पाचनं हृद्यं कफपित्त
ज्वरापहम् ॥ कुष्ठकासप्रमेहास्त्रना
शनं वातलं लघु ॥ इति ॥

केयूरम् । न । प्रगण्डभूषणे । अङ्गदे ।
बाजूबन्द इतिभाषा ॥ केवाहुशिर
सि यौति । युमिश्रणे । खर्जूरपिञ्जा
दिभ्यऊरोलच्वाविति ऊरः । बलद
र्शनादित्वाल्लुक् ॥ पुं । रतिबन्धवि०
॥ यथा । लोलङ्के वैनसन्धीय दे।

र्के मालिङ्ग्य सुन्दरीम् । कामये
त् स्थापनं कामी बन्धः केयूरसंज्ञ
क इति ॥ अपिच । स्त्रीणां जङ्घा
महाविष्टो गाढमालिङ्ग्य सुन्दरी
म्। कामये द्विपुलंकामी बन्धः के
यूरसंज्ञक इति ॥

केरलः । पुं । मलेवार इति प्रसिद्धे दे
शवि० ॥ यथा । उग्राः केरलपर्याया
इतिहेमचन्द्रः ॥ सुब्रह्मण्यं समार
भ्य यावद्देशो जनार्दनः । तावत् के
रलदेशः स्यात् तन्मध्ये सिद्धकेरल
॥ रामेश्वरात् वह्निभा तुसकेरल
नामकः । अनन्तशैल मारभ्य याव
त् स्यात् दध्यंकरे ॥ तावत् सर्वजना
नां केरलः परिकीर्तित इति ॥ वेद
यागाध्ययनाधिकारभ्रष्टक्षत्रियवि०
। पुरैते क्षत्रिया आसन् सगरेणैषां
धर्मोन्मादितः वेशान्यत्वं च कृतम् ।
यथा । निःस्वाध्यायवषट्काराः
कृता स्तेन महात्मना । शका यवन
काम्बोजाः पारदाः पह्लवाः खशाः ॥
कोलिसर्पा माहिषका दर्वाश्चोलाः
सकेरलाः । सर्वे ते क्षत्रियास्तात धर्म
स्तेषां निराकृतः ॥ इति हरिवंशः
॥ सम्प्रदाय विशेषे ॥ ग्रन्थग्रन्थवि
शेषे ॥

केरली । स्त्री । ज्योतिर्ग्रन्थविशेषे ॥

होरायाम् ॥

केलकः । पुं । खड्गधारादिनर्त्तके । प्ल
वके ॥

केलासः । पुं । स्फटिके ॥

केलिः । पुं । स्त्री । परीहासे । द्रवे ।
क्रीडायाम् ॥ केलनम् । किलक्रीडा
याम् । केलृचलने वा । इन् ॥ स्त्री
। पृथिव्याम् ॥

केलिकः । पुं । अशोकवृक्षे ॥

केलिकला । स्त्री । सरस्वत्या वीणायाम् ॥

केलिकालः । पुं । क्रीडासमये ॥

केलिकिलः । पुं । कूष्माण्डकसंज्ञकेशि
वस्यानुचरे ॥ नाट्ये नायकवयस्ये ।
विदूषके । वैहासिके ॥

केलिकिला । स्त्री । कामदेवपत्न्याम्
। रतौ ॥

केलिकिलावती । स्त्री । स्मरभार्या
याम् ॥

केलिकीर्णः । पुं । उष्ट्रे ॥

केलिकुञ्चिका । स्त्री । पत्नीभगिन्याम्
। श्यालिकायाम् । साली इति
भाषा ॥

केलिकोषः । पुं । नटे ॥

केलिनागरः । पुं । बहुभोगिनि । ब
भोगवति ॥

केलिमुखः । पुं । परीहासे ॥

केलिवृक्षः । पुं । केलिकदम्ब इतिगौ

उभाषाप्रसिद्धे कदम्बविशेषे ॥

केलिशुषिः । स्त्री । धरित्र्याम् ॥

केलिसचिवः । पुं । क्रीडाविषयकमन्त्रिणि । नर्मदे । नर्मसचिवे ॥

केवर्त्तः । पुं । कैवर्त्तजातौ ॥ इतिद्विरू० ॥

केवलः । पुं । कुहने ॥ न । ज्ञानभेदे ॥ शुद्धे ॥ निर्णीते ॥ त्रि । अद्वितीये । एकस्मिन् । असहाये ॥ कृत्स्ने ॥ केवते । केवसेवने । वृषा० कलः ॥ के शिरसि वलयति वा । वलप्राणने । पचाद्यच् ॥

केवलज्ञानी । पुं । भूतार्हद्विशेषे ॥

केवलद्रव्यम् । न । मरिचे ॥

केवलव्यतिरेकि । न । व्यतिरेकमात्रव्याप्तिकानुमाने ॥ यथा । पृथिवीतरेभ्योभिद्यते गन्धवत्त्वात् यदितरेभ्यो न भिद्यते न तद् गन्धवत् यथा जलम् नचेयं तथा तस्मात् तथेति । अत्र यद्गन्धवत् तदितरभिन्न मित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् ॥

केवला । स्त्री । एकस्याम् ॥ कृत् साया म् ॥ केवलात् टाप् ॥

केवलान्वयि । न । अन्वयमात्रव्याप्तिकानुमाने ॥ यथा । घटोऽभिधेयः प्रमेयत्वात् पटवत् इत्यत्र प्रमेयत्वाभिधेयत्वयो र्व्यतिरेकव्याप्ति र्नास्ति सर्वस्याप्यभिधेयत्वात् प्रमेयत्वाच्च ॥

केवली । पुं । जैनविशेषे ॥

केवली । स्त्री । ज्ञानविशेषे ॥ ग्रन्थविशेषे ॥ केवलमस्त्यस्या इति संज्ञाछन्दसोर्ङीप् ॥

केविका । स्त्री । केवेर इतिकोकणभाषाप्रसिद्धे पुष्पविशेषे । भृङ्गारौ । महागन्धायाम् ॥

केशः । पुं । वरुणे ॥ ह्रीवेरे ॥ दैत्यवि० ॥ विष्णौ ॥ चिकुरे । कुन्तले । वाले ॥ मज्जजातोपधातुविशेषोयम् । केशसमूहार्थवाचकाः शब्दाः यथा । पाशाः पक्षः हस्तः पराः पाशोरचना भार उच्चयः । हस्तः पक्षः कलापश्च केशभूयस्त्ववाचका इतिहेमचन्द्रः ॥ क्लिश्यते । क्लिश बन्धे क्लिशु उपतापे वा । क्लिश्नातिवा । क्लिशू विबाधायाम् । क्लिशेरन् लोलोपश्च ॥ के शेते । शीङ्० । अन्येभ्योपीतिडः । हलदन्तादित्यलुक्वा ॥ कस्य शिरसः ईशो वा ॥

केशकः । पुं । केशेषु प्रसिते ॥ स्वाङ्गेभ्यः प्रसिते इतिकन् ॥

केशकलापः । पुं । केशपाशे । केशसमूहे ॥

केशकारः । पुं । करिया कुशियार इति भाषा प्रसिद्धे इक्षुभेदे ॥ केशकारा

गुरुः शीतले रक्तपित्तश्वासापहः ॥

केशघ्नी । स्त्री । धूस्तूरायाम् ॥

केशगर्भः । पुं । } कबर्य्याम् ॥
केशगर्भकः । पुं । }

केशघ्नम् । न । इन्द्रलुप्तके ॥

केशटः । पुं । हरौ । विष्णौ ॥ अजे । छागे ॥ उत्कटे ॥ भ्रातरि ॥ शोष याख्ये मदनस्य वाणे ॥ शोणकवृक्षे ॥

केशधृत् । पुं । भूतकेशे ॥

केशनाम । न । वाले । ह्रीवेरे । वाला इतिभाषा ॥

केशपक्षः । पुं । कचौघे । केशकलापे ॥

केशपर्णी । स्त्री । अपामार्गे ॥

केशपाशः । पुं । केशपक्षे ॥ पाशः पक्ष श्च हस्तश्च कलापार्थाः कचात् परे ॥

केशपाशी । स्त्री । शिखायाम् । शि रोमध्यस्थचूडायाम् ॥ केशानांपा शः । गौरादिः ॥

केशभूः । पुं । शिरसि ॥

केशमथनी । स्त्री । शमीवृक्षे ॥

केशमार्ज्जकम् । न । कङ्कतिकायाम् । कङ्घा कङ्घी इतिचभाषा ॥

केशमार्ज्जनम् । न । कङ्कतिकायाम् ॥

केशमुष्टिः । पुं । विषमुष्टिवृक्षे ॥ महा निम्बे ॥

केशरः । पुं । सिंहस्कन्धजटायाम् ॥ तु रङ्गस्कन्धकेशेषु ॥ पुन्नागवृक्षे ॥ ब कुलवृक्षे ॥ —— गन्धे ॥ न । हिङ्गुनि ॥ पुं । न । कि ञ्जल्के ॥ के जले शीर्य्यते । शॄहिंसा याम् । ऋदोरप् । हलदन्तादित्यलुक् ॥

केशरञ्जनः । पुं । भृङ्गराजवृक्षे ॥

केशराजः । पुं । नागमारे । भृङ्गराजे । भंगरा इतिभाषा ॥

केशराम्लः । पुं । मातुलुङ्गकवृक्षे ॥

केशरी । पुं । सिंहे ॥ तुरगे ॥ केश राः स्कन्धबालाः सन्त्यस्य । इनिः ॥ बीजपूरकवृक्षे ॥ पुन्नागे ॥ नाग केसरे ॥

केशरुहा । स्त्री । भद्रदन्तिकावृक्षे ॥

केशरूपा । स्त्री । बन्दाकवृक्षे ॥

केशवः । पुं । पुन्नागवृक्षे ॥ वासुदेवे । विष्णौ ॥ केशौ ब्रह्मरुद्रौ सर्वेश्वरा वपि अनुकंप्यतया वाति गच्छ तीति व्युत्पत्तिमाश्रित्य निरतिश यैश्वर्य्यप्रतिपादनात् सर्वेश्वरे ॥ कश्च ईशश्च केशौ पुत्रपौत्रौ तौ ऽस्य । के शाद्व इति वः । केशौवातिवा । वा गतौ । आतइतिकः । शक्भोः पितामहो ब्रह्मपिता शक्रादयधी श्वर इति पद्मोक्तः ॥ यद्वा । केशिनं दैत्यविशेषं वाति गच्छति मारणा र्थं वाते र्गमनार्थादन्येभ्योपिदृश्यते

इति रः । पृषोदरादित्वात् इकारस्यकारः । [illegible] हतः केशी जनार्दन । तस्मात् केशवनाम्ना त्वं लोकेख्यातो भविष्यसीति हरिवंशोक्तेः ॥ यद्वा । केशसंज्ञिताः । सूर्यादिसंक्रान्ता अंशवः तद्वत्तया केशवः । अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः । सर्वज्ञाः केशवं तस्मात् प्राहुर्मां द्विजसत्तमाः ॥ इति भारतम् ॥ ब्रह्मविष्णुशिवाख्याः शक्तयः केशसंज्ञिताः तद्वत्तया श्रुतयः केशिन इति श्रुतेः ॥ कश्च अश्च ईशश्च केशाः ब्रह्मविष्णुरुद्राः ते अस्य वश्यतया सन्तीति केशवः । केशशब्दात् प्राशस्त्यार्थे केशाद्वोऽन्यतरस्यामिति वप्रत्ययः ॥ यद्वा । केशान् ब्रह्मविष्णुरुद्रान् वष्टि इच्छति सर्गादिकार्यायेति । वश कान्तौ । अन्येभ्योऽपि दृश्यत इति डप्रत्ययः ॥ यद्वा । केशान् ब्रह्मविष्णुरुद्रान् वाति गच्छति नियामकत्वेनेति केशवः । वा गतिगन्धनयोः । आतोऽनुपसर्गे इति कः ॥ को ब्रह्मेति समाख्यात ईशोऽहं सर्वदेहिनाम् । आवां तवांशसम्भूतौ तस्मात् केशवनामवान् ॥ इति ह० वं ॥ त्रि । प्रशस्तकेशवति ॥ प्रशस्ताः केशाः सन्त्यस्य । प्रशंसायाम् केशाद्वोऽन्यतरस्यामिति वः ॥ [illegible] स्य । मतुप् ॥

केशवर्द्धिनी । स्त्री । सहदेवीलतायाम् ॥

केशवायुधः । पुं । आम्रवृक्षे ॥ न । विष्णोरस्त्रे ॥

केशवालयः । पुं । अश्वत्थवृक्षे ॥ विष्णोर्मन्दिरे ॥ केशवस्य आलयः ॥

केशवावासः । पुं । अश्वत्थद्रुमे ॥

केशवेशः । पुं । कबरीम् ॥ केशानां वेशः मार्जनाबन्धनादिना कृतशोभाविशेषः ॥

केशहन्तृफला । स्त्री । शमीवृक्षे ॥

केशहन्त्री । स्त्री । सक्तुफलायाम् । शमीवृक्षे ॥

केशहस्तः । पुं । केशसमूहे ॥

केशाकेशि । अ । केशेषु केशेषु गृहीत्वा प्रवृत्ते युद्धे ॥ तत्रतेनेदमिति सरूपे इति कर्मव्यतिहारे बहुव्रीहिः । अन्येषामपि दृश्यते इति पूर्वपदान्तस्य दीर्घः । इच् कर्मव्यतिहारे इति इच्समासान्तः । तिष्ठद्गुप्रभृतिषु इच्प्रत्ययस्य पाठादव्ययीभावत्वमव्ययत्वञ्च ॥

केशान्तः । पुं । गृह्योक्तसंस्कारविशेषे ॥ ब्राह्मणादीनां षोडशादिवर्षेषु कर्त्तव्ये गोदानाख्यव्रतविशेषे ॥ यथाह

मनुः । केशान्तः षोडशे वर्षे ब्राह्मणस्य विधीयते । राजन्यबन्धोर्द्वाविंशे वैश्यस्य द्व्यधिके ततः इति ॥

केशाम्बा । स्त्री । सहदेव्याम् ॥

केशार्हा । स्त्री । महानीलाम् ॥

केशिकः । त्रि । प्रशस्तकेशविशिष्टे । केशिनि ॥ प्रशस्ताः केशाः सन्त्यस्य । केशाद्वोऽन्यतरस्यामितिपक्षे ठन् ।

केशिका । स्त्री । शतावर्याम् ॥

केशी । पुं । विष्णौ ॥ दैत्यविशेषे ॥ सिंहे ॥ त्रि । केशिके ॥ ठनोऽभावपक्षे इनिः ॥

केशिनिषूदनः । पुं । श्रीकृष्णे ॥

केशिनी । स्त्री । सांख्याकृत्यौ इति ख्यातायां चोरपुष्प्याम् ॥ रावणस्य मातरि ॥ जटामांस्याम् ॥ प्रशस्तकेशवत्याम् ॥ इन्नन्तात् ङीप् ॥

केशिसूदनः । पुं । श्रीकृष्णे ॥ केशिनामानमसुरं सूदितवान् सूदयति वा सूदचरणे । नं॰ ल्युः ॥

केशिहा । पुं । केशवे । श्रीकृष्णे ॥ केशिनामानमसुरं हन्ति हतवान्वा । हन॰ क्विप् ॥

केशी । स्त्री । नील्याम् ॥ भूतकेश्याम् ॥ अजलोमा वृषे ॥

केशोच्चयः । पुं । केशपाशे ॥

केश्यम् । न । कृष्णागुरुणि ॥ भृङ्गराजे ॥

केसरः । पुं । सिंहस्कन्धजटायाम् । सिंहच्छटायाम् ॥ तुरगस्कन्धकेशेषु ॥ पुन्नागतरौ ॥ बकुलवृक्षे ॥ नागकेसरद्रुमे ॥ न । हिङ्गुनि ॥ नागकेसरपुष्पे ॥ कासीसे ॥ स्वर्णे ॥ पुं । न । किञ्जल्के ॥ रभसस्तु हिङ्गुनि द्वयोरित्याह ॥ केजले सरति । सृगतौ । पचाद्यच् । हलदन्तादिल्यलुक् । प्रशस्ताः केसराः अस्य । अर्शआद्यच्वा ॥

केसरवरम् । न । कुङ्कुमे ॥

केसराम्लः । पु । बीजपूरे ॥

केसरिका । स्त्री । सहदेवीलतायाम् ॥

केसरी । पुं । तुरगे ॥ सिंहे ॥ पुन्नागे ॥ नागकेसरे ॥ रक्तशिग्रौ ॥ बीजपूरे ॥ वानराणां यूथपते विशेषे । हनूमतः पितरि ॥ केसराः स्कन्धबालाः सन्त्यस्य । अतइनिः ॥

केसरिसुतः । पुं । हनूमति ॥ इतिहेमचन्द्रः ॥

कैकयः । पुं । देशविशेषे । ब्रह्मपुत्रात्मानमरूपान्मध्यभागे तु कैकयः ॥

कैकेयः । पुं । अश्वपतिनृपे ॥ केकयस्याऽपत्यम् । जनपदशब्दात् क्षत्रियादञ् । केकयमित्रयुप्रलयानां यादेरिय इति इयादेशः । वृद्धिः ॥

कैकेयी । स्त्री । भरतमातरि ॥ केक

यस्यापत्यं स्त्री । जनपदशब्दादित्य पत्यप्रत्ययः । अतश्चेति तद्राजस्या कारस्य लुकतुन । नप्राच्यभर्गादि यौधेयादिभ्य इति प्रतिषेधात् । पूर्ब वत्या देरियादेशः । अजन्तत्वान् ङीप् ॥

कैङ्कर्य्यम् । न । किङ्करत्वे । दासत्वे ॥

कैटजः । पुं । कुटजवृक्षे ॥

कैटभः । पुं । दैत्यविशेषे ॥

कैटभजित् । पुं । विष्णौ ॥ कैटभ मसु रविशेष मजैषीत् । जिजये । सत् सूद्विषद्रुहदुहयुजविदभिदच्छिद- जिनीराजामुपसर्गेपिक्विप् इति - क्विप् ॥

कैटभहा । पुं । विष्णौ ॥

कैटभा । स्त्री । दुर्गायाम् ॥

कैटभारिः । पुं । विष्णौ ॥

कैटभी । स्त्री । कात्यायन्याम् ॥

कैटभेश्वरी । स्त्री । दुर्गायाम् ॥ तथा चदेवीपुराणम् । कैटभस्तु वशं कृ त्वागृहीता तत् पुरीयथा । तेन सा गीयते देवी पुराणे कैटभेश्व रीति ॥

कैटर्य्यः । पुं । कट्फले । पूतिकरञ्जे । कायफल इतिभाषा ॥ मदनवृक्षे ॥ केटनम् । किट्त्रासे । वञ् । कैटं राति भातितिकत्वात् । रा० । का

तद्दृतिकः । वतु० ष्यञ् ॥ निम्बे ॥ महानिम्बे ॥

कैडर्य्यः । पुं । कट्फले ॥ कटभीवृक्षे ॥

कैतकम् । न । केतकीपुष्पे ॥ केवडा भिधेगन्धजले ॥ चि । केतकी सम्ब न्धिनि ॥

कैतवम् । न । कपटे ॥ द्यूते ॥ वैदूर्य मणौ ॥ धत्तूरफलपुष्पादौ ॥ खल तायाम् ॥ कितवस्यकर्म्म । यु० अण्॥

कैदारः । पुं । शालिधान्ये ॥ न । के दारसमूहे ॥ केदारजले ॥ केदारं च तु मुदिष्टं कैदारं तज्जलं स्मृतम् । कैदारं वार्य्यभिष्यन्दि मधुरं गुरुदो षकृत् ॥ केदारस्येदम् । अण् ॥

कैदारकम् । न । केदारसमूहे । चैचे ॥ केदाराणांसमूहः । केदाराद्यञ्चेति वुञ् ॥

कैदारिकम् । न । कैदारके ॥ केदारा णांसमूहः । ठञ् कवचिनश्च । चा त्केदारादपि ॥

कैदार्य्यम् । न । चैचे । कैदारिके ॥ के दाराणां समूहः । केदाराद्यञ्चेति यञ् ॥

कैरवः । पुं । कितवे ॥ रिपौ ॥ न । कु मुदे । शुक्लोत्पले ॥ के जले रौति । रुशब्दे । पचाद्यच् । तत्पुरुषेकृ तीत्यलुक् । कैरवस्य हंसस्येदंप्रिय

म् । तस्येदमित्यण् ॥

कैरविणी । स्त्री । कुमुदिन्याम् । कुमुदयुक्तपुष्करिण्यादौ ॥ कैरवाणिसन्त्यस्याम् । पु० इनि: ॥

कैरविणीखण्डम् । न । कैरविणीनां समूहे ॥ कमलादिभ्य:खण्ड: ॥

कैरविणीफलम् । न । वेरा इतिप्रसिद्धे कुमुदबीजे ॥

कैरवी । पुं । चन्द्रे ॥

कैरवी । स्त्री । चन्द्रिकायाम् ॥ मेथिकायाम् ॥

कैराट: । पुं ।
कैराटक: । पुं । } स्थावरविषविशेषे ॥

कैरात: । पुं । बलवत्पुरुषे । दैर्घ्येहे ॥ न । शम्बरचन्दने ॥ पुं । न । भूनिम्बे ॥

कैरालम् । न । विडङ्गे ॥

कैराली । स्त्री । विडङ्गायाम् ॥

कैलास: । पुं । शिवकुबेरयो: स्थाने । कुबेराचले । गणपर्वते ॥ केजले लासो लसन मस्य केलास: स्फटिक: । हलदन्तादित्यलुक् । तस्यायम् । कैलास: । अण् ॥ यद्वा । केलीनां समूह: कैलम् । तस्यसमूहइत्यण् । तेनास्यतेऽत्र । आसउपवेशने । हलश्चेतिघञ् ॥ आवाचकादूर्द्धं ॥ कैलासात्संतदूर्द्धंतु वेधिनीकुसदूर्द्धत

इत्यस्क: ॥

कैलासनिकेतन: । पुं । शिवे । पार्वतीपतौ ॥

कैलासौका: । पुं । कुबेरे ॥ शिवे ॥

कैवर्त्त: । पुं । धीवर इतिप्रसिद्धे वेश्यागर्भे चत्रियैारसजाते । धीवरे । दासे । जालिके ॥ केजलेवर्त्तन्ते । इत० । पचाद्यच् । कैवर्त्तानां मत्स्यानामयं घातक: । तस्येदमित्यण् ॥

कैवर्त्तमुस्तम् । न । ⎫
कैवर्त्तमुस्तकम् । न । ⎭ कैवर्त्तीमुस्तके । कुटन्नटे ॥

कैवर्त्तिका । स्त्री । मालवप्रसिद्धेलताविशेषे । बल्लरञ्जायाम् । सुरञ्जायाम् । सुभगायाम् ॥

कैवर्त्तिमुस्तकम् । न । कैवर्त्तीमुस्तके ॥

कैवर्त्ती । स्त्री । परिपेलवे ॥ कैवर्त्तभार्यायाम् ॥

कैवर्त्तीमुस्तकम् । न । कुटन्नटे । वानेये । परिपेलवे । मोथा इतिभाषा ॥ इदन्तु वितुन्नकनाम्नो वृक्षस्य मुस्ताकृतिस्त्वगिति भावप्रकाश: ॥ कैवर्त्तानां जाति: कैवर्त्ती । कैवर्त्त्या मुस्तकम् ॥

कैवल्यम् । न । निर्वाणे । अत्यन्तदु:खत्रयप्रशमनलक्षणायाम् मुक्तौ ॥ आत्यन्तिकोहि दु:खत्रयाभाव:कैवल्यम् । तत्र पुरुषस्य स्वाभाविका

देवाऽवैगुण्यात् सुखदुःखमोहरहितत्वात् सिद्धम् ॥ केवलस्य भावः । ब्राह्मणादित्वात् ष्यञ् ॥

कैशिकम् । न । कैश्ये । केशसमूहे ॥ केशानां समूहः । अचित्तहस्तिधेनोष्ठक् ॥ पुं । शृङ्गाररसे ॥

कैशिकी । स्त्री । नाटकवृत्तिविशेषे ॥ यथा । भारती सात्त्वती कैशिक्यारभट्यौ च वृत्तयइति ॥

कैशोरम् । न । किशोरावस्थायाम् । दशवर्षानन्तर मापञ्चदशाब्दपर्यन्तावस्थायाम् ॥ कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोर मापञ्चदशादित्युक्तेः ॥ किशोरस्य कर्म भावो वा । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योञ् ॥

कैश्यम् । न । कैशिके । केशवृन्दे ॥ केशानां समूहः । केशाश्वाभ्यां यञ्छा वन्यतरस्याम् ॥

कोकः । पुं । चक्रवाके ॥ वृके ॥ ज्येष्ठ्याम् ॥ खर्ज्जूरीवृक्षे ॥ दर्दुरे ॥ विष्णौ ॥ कोकते । कुकआदाने । पचाद्यच् ॥

कोकडः । पुं । विलेशये मृगविशेषे । चमरपुच्छे । लोमशे । धूम्रवर्णके ॥ तन्मांसंश्वासानिलकासहरम् पित्तदाहकरञ्चेतिराजनिर्घण्टः ॥

कोकदेवः । पुं । कपोते ॥

कोकनदम् । न । रक्तकुमुदे ॥ रक्तपङ्कजे ॥ कोकान् स्वकान् नदति । णद अव्यक्तेशब्दे । अन्तर्भावितण्यर्थः । मूलविभुजादित्वात् कः ॥

कोकनदच्छविः । पुं । शोणे । ईषद्रक्ते । रक्तोत्पलाभे ॥ त्रि । तद्वति ॥ कोकनदं रक्तोत्पलम् तद्दिव छविर्यस्य ॥

कोकबन्धुः । पुं । सूर्ये ॥ कोकस्य बन्धुरिव ॥

कोकाशः । पुं । समच्छिले क्षुपविशेषे ॥

कोकाहः । पुं । श्वेताश्वे । कर्के ॥ काकाह इतिक्वचित्पाठः ॥

कोकिलः । पुं । पिके । वनप्रिये । ताम्राक्षे । मधुगायने ॥ अङ्गारे ॥ इति त्रिकाण्डशेषः । कोकते । कुकआदाने । सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्यइलच् ॥

कोकिला । स्त्री । पिकभार्यायाम् ॥ अजादित्वाट्टाप् ॥

कोकिलाक्षः । पुं । तालमखाना इति प्रसिद्धे वस्तुनि । इक्षुगन्धायाम् ॥ कोकिलोऽक्षियस्य । कोकिलशब्दः कोकिलाक्षसदृशे लाक्षणिकः । अक्ष्णोदर्शनादित्यच् ॥

कोकिलावासः । पुं । आम्रवृक्षे ॥

कोकिलेक्षुः । पुं । कृष्णवर्णेक्षौ ॥

कोकिलेष्टा । स्त्री । महाजम्ब्वाम् ॥

कोकिलोत्सवः । पुं । आम्रवृक्षे ॥

कोङ्कः । पुं । देशविशेषे ॥

कोङ्कणः । पुं । कोकन इतिप्रसिद्धे देशे ॥ अथाभ्यङ्गं समारभ्य कोटिदेशस्य मध्यगे । समुद्रप्रान्तदेशोऽपि कोङ्कणः परिकीर्त्तितः ॥ न । शस्त्रप्रभेदे ॥

कोङ्कणासुतः । पुं । परशुरामे ॥

कोचः । पुं । सङ्करजातिविशेषे ॥ स तु मांसच्छेदिगर्भे तीवरस्यौरसजातः । इतिब्रह्मवैवर्त्तपुराणम् ॥

कोजागरः । पुं । आश्विनपौर्णमास्याम् । द्यूतपूर्णिमायाम् । कौमुद्याम् ॥

कोटः । पुं । दुर्गे । कुटे । गढ इति भाषा ॥ कुटनम् । कुट० । भावे घञ् ॥

कोटकः । पुं । घरामि राज इति भाषा प्रसिद्धे गृहकारके ॥ सतु कुवकार्य्यां गर्भे अट्टालिकाकारस्यौरसजातः ॥ इति ब्रह्मवैवर्त्तपुराणम् ॥

कोटरः । पुं । न । वृक्षस्थितगह्वरे । निष्कुहे ॥ कोटंराति । रा० । आत इतिकः ॥

कोटवी । स्त्री । चण्डिकायाम् । दुर्गायाम् ॥ नग्निकाम् । विवसनायांस्त्रियाम् ॥ कोटं वाति । वा० । आतोनुपेतिकः ॥ गौ० ङीष् ॥

कोटिः । स्त्री । धनुषोऽग्रभागे ॥ अस्त्रादेरग्रभागे ॥ परीक्षकपरिकल्पितनिर्णयनिरूपणीये । प्रावादुकशास्त्रनिर्णयान्ते ॥ उत्कर्षे । प्रकर्षे ॥ दशप्रयुते । शतलक्षसङ्ख्यायाम् । १०००००० ॥ पिडङ्गशाक इति गौड प्रसिद्ध शाके । पृक्कायाम् ॥ कूटयते ऽनया वा । कूटआप्रदाने । चु० । अचरः ॥ कोटयति कोट्यते वा । कुटकौटिल्ये । इः ॥ कुट्यते वा । इनजादिभ्यइतीञ् । सर्वधातुभ्यइतीन् वा । वा० गुणः ॥

कोटिकः । पुं । शक्रगोपकीटे ॥

कोटिजित् । पुं । कालिदासे । मेधारुद्रे ॥

कोटिपात्रः । पुं । केनिपातके । अरित्रे इति हेमचन्द्रः ॥

कोटिरः । पुं । नकुले ॥ शक्रे । इन्द्रे ॥ इन्द्रगोपकीटे ॥

कोटिवर्षम् । न । वाणासुरपुरे ॥

कोटिवर्षा । स्त्री । पिडिङ्गशाक इति गौडप्रसिद्ध पृक्कायाम् । आसारक इतिभाषा ॥ कोटिभिरग्रैर्वर्षति । मधु । वृष सेचने । अच् ॥

कोटिशः । पुं । लोष्टभेदने । हेंगा इति भाषा ॥ कोटिना अग्रेण श्यति । शो तनूकरणे । सुपीतिकः ॥ कोटिर

स्यान्नीति वा । लोमादित्वात् शः ॥

कोटिश४ । म । कोटाको टौ ॥

कोटीरः । पुं । किरीटे ॥ जटायाम् ॥

कोटीवर्षम् । न । वाणासुरपुरे ॥

कोटीशः । पुं । कोटिशे ॥ ०

कोट्टः । पुं । पुरस्य दुर्गे । राजधान्याम् ॥ न । दुर्गे । किल्ला गड इतिभाषा ॥ कुट्टच्छेदनभर्त्सनयोः अच् ॥

कोट्टवी । स्त्री । मुक्तकेश्याम् नग्नायां स्त्रियि ॥ यात्ववासामुक्तकेशी कोट्टवीनग्निकाचसेतिजटाधरः ॥ दुर्गायाम् ॥ वाणासुरमातरि ॥ कुट्टनम् । कुट्ट° । घञ् । वा० गुणाभावः । कोट्टंवाति । वा०। आत इति कः । गौरादित्वात् ङीष् ॥

कोट्टवीपुरम् । न । वाणासुरपुरे ॥ कोट्टव्याःपुरम् ॥

कोट्टारः । पुं । नागरे ॥ कूपे ॥ पुष्करिण्याः पाटके ॥ कुट्यते । कुट्टच्छेदने प्रतापनेवा । वा° आरन् गुणश्च ॥

कोठः । पुं । चक्राकारे कुष्ठरोगे । मण्डलके । त्वग्दोषे ॥ अस्यलक्षणम् । असम्यग्वमनोदीर्णपित्त श्लेष्मविनिग्रहैः । मण्डलानि सकण्डूनि रागवन्ति बहूनि च ॥ उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयतेइति ॥ अन्यच्च । वरटीदष्टनिकाशः कण्डूमान् लो

हितोऽसकफपित्तात् । क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैरिति ॥ कुण्ठति । कुठिप्रतिघाते । अच् । आगमशास्त्रस्यानित्यत्वान्नुम् ॥

कोठरः । पुं । अङ्कोठवृक्षे ॥

कोठरपुष्पी । स्त्री । वृद्धदारके ॥

कोणः । पुं । वाद्यप्रभेदे ॥ वीणादीनां वादने । येन धनुषाकृतिना वीणादिर्वाद्यते तस्मिन् । नेपालभाषया गञ्जा इति ख्याते वाद्यवादनकाष्ठे । बाजानेकीलकडी इति भाषा ॥ गृहादीनामेकदेशे । कोना इतिभाषा ॥ अस्रौ । अस्त्रादीनामग्रभागे । पाल्याम् ॥ लगुडे ॥ मङ्गलग्रहे भौमे ॥ द्वयोर्दिशोर्मध्यभागे । विदिशि ॥ लग्नात्नवमपञ्चमयोः ॥ शनौ ॥ कुण्यते ऽनेन । कुणशब्दोपकरणयोः । हलश्चेति घञ् । कुणत्यनेनवा । कर्त्तर्यच् ॥

कोणकुणः । पुं । उत्कुणे । उद्दंशे । उडुस खटमल मङ्कुण इत्यादिभाषाप्रसिद्धे मत्कुणे

कोथः । पुं । कथो इति गौडभाषा प्रसिद्धे नेत्ररोगविशेषे ॥ त्रि । मथिते ॥ शटिते ॥ यथा । मांसकोथः मांसं मांसगलनमिति ॥

कोदण्डः । पुं । भ्रुवि । भ्रूलतायाम् ॥ न । चापे । धनुषि ॥ पुं । न । नीहृद्विशेषे ॥ कोटति । कुटकौटिल्ये अभाषणे । वा० अण्डन् । पृषोदरादिः ॥ कोतेर्विच् । कोर्दण्डोऽस्यवा ॥

कोद्रवः । पुं । धान्यप्रभेदे । कोरदूषे । कोदो इति भाषा ॥ कोद्रवो वातलो ग्राही हिमःपित्तकफापहः ॥ कौतिकवतेवा । कुशब्दे कुङ्शब्दे वा । विच् । द्रवति । द्रुगतौ । अच् । कोश्चाऽसौ द्रवश्च ॥ केन वायुना द्रवतीति वा । पृ० ॥

कोपः । पुं । क्रोधे ॥ अपकारिकृतेऽपाय उक्तः शास्त्रे । यथा । अपकारिणि चेत् कोपः कोपःकोपेकथंनहि । धर्मार्थकाममोक्षाणां प्रसह्य परिपन्थिनीति ॥ अपिच । रिपौबन्धौ स्वदेहे च समैकात्म्यं प्रपश्यतः । विवेकिनः कुतःकोपः स्वदेहावयवेष्विवेति ॥ कोपनम् । कुपक्रोधे । घञ् ॥

कोपनः । त्रि । कोपविशिष्टे । क्रोधिनि ॥ कुप्यति तच्छीलः । क्रुधमण्डार्थेभ्यश्चेतियुच् ॥

कोपनकः । पुं । चोरनामगन्धद्रव्ये ॥

कोपना । स्त्री । कोपवत्यांस्त्रियाम् । भामिन्याम् ॥ कुप्यतितच्छीला । युजन्ताट्टाप् ॥

कोपलता । स्त्री । कर्णस्फोटायांलतायाम् । चित्रपर्ण्याम् । त्रिपुटायाम् ॥

कोपितः । त्रि । क्रोपमापिते । सञ्जातकोपे ॥ ता० इतच् ॥

कोपी । पुं । जलपारावते ॥ त्रि । क्रोधने ॥ अवश्यङ्कुप्यति । कुप क्रोधे । आवश्यकेतिणिनिः ॥

कोपोपायः । पुं । इषत्के ॥ कोपजन्यउपायः ॥

कोमलम् । न । जले ॥ त्रि । अकठिने । मृदौ । मृदुले ॥ मनोज्ञे ॥ काम्यते । कमुकान्तौ । बा० कलच् । अतउत्त्वम् ॥ कौतिवा । कुशब्दे । इ षा० कलः तस्यमुट् । वा० गुणः ॥

कोमलकम् । न । कोमलार्थे ॥ मृणाले ॥

कोमलवल्कली । स्त्री । लवल्याम् ॥

कोमला । स्त्री । चीरिकायाम् ॥ वृत्त्यनुप्रासघटकवृत्तिभेदे ॥

कोमासिका । स्त्री । जालिकायाम् । फलकोजाली इतिभाषा ॥

कोयष्टिः । पुं । जलकुक्कुभे खगे ॥ कं जलं यष्टिरिवास्य । पृ० ॥

कोयष्टिकः । पुं । कोंडापाखी इतिगौडभाषाप्रसिद्धे टिट्टिभखगे ॥ स्वार्थे कन् ॥

कोरकः । पुं । न । कलिकायाम् । कुड्मले ॥ विकारकोरकाणीतिमाघः

। कोरकोऽस्त्री कुड्मले स्यात् कक्कोलकमृणालयोरिति मेदिनीकरः । कोरकन्तु कुड्मले स्यादिति हेमोऽनेकार्थे । तथाच कलिकाकोरकः पुमानित्यमरस्य प्रमादः । प्रायिकाभिप्रायो वा ॥ कक्कोलके ॥ मृणाले ॥ चोरनामगन्धद्रव्ये ॥ कुर्यते । कुर शब्देतारे । कृ ऽवुन् ॥ यद्वा । कोलति । कुलसंस्त्याने । ण्वुल् । रलयोरैक्यम् ॥

कोरङ्गी । स्त्री । सूक्ष्मैलायाम् ॥ पिप्पल्याम् ॥ कुरति । कुर० । बाहुलकादङ्गच् । गौरादि ङीष् ॥

कोरदूषः । पुं । कोद्रवे ॥ कोरं दूषयति । दुष वैकृत्ये । ण्यन्तः । कर्मण्यण् ॥

कोलः । पुं । अङ्कपाल्याम् ॥ शनौ ॥ चित्रे । चीता इति भाषा ॥ वराहे । शूकरे ॥ उत्सङ्गे । क्रोडे । भुजान्तरे ॥ डोंगा डोंगो इति च भाषाप्रसिद्धे । प्लवे । भेलके । अल्पनौकायाम् । उडुपे ॥ अस्त्रविशेषे । टङ्कदयमाने ॥ वर्णसङ्करजातिविशेषे । स तु लेटात् तीवरकन्यायां जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ श्मश्रुधारिणि म्लेच्छजातिविशेषे ॥ स च पूर्वं क्षत्रिय आसीत् सगरेणास्य वेद यागादावनधिकारीकृतः ॥ इति हलायुधः ॥ देशविशेषे ॥ न । चव्ये ॥ मरिचे ॥ तोलकपरिमाणे ॥ बदरे । कोलफले ॥ कोल्याः फलम् । अस्य लुकि । लुक् तद्धितलुकीति ङीषो लुक् ॥ सौवीराम्लघु सम्पक्वं मधुरं कोलमुच्यते । कोलन्तु बदरं दाहि रुच्यमुष्णञ्च वातहृत् । कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥ कोलति । कुलसंस्त्याने । ज्वलितीति णः ॥ यद्वा । कोलति पीनत्वात् । अच् ॥ यद्वा । कोलन्त्यङ्गान्यत्र । हलश्चेति घञ् ॥

कोलकः । पुं । अङ्कोठवृक्षे ॥ बहुवारवृक्षे ॥ न । कांकला इति गौडभाषाप्रसिद्धे गन्धद्रव्यविशेषे । कक्कोले ॥ मरिचे ॥ कोलति । कुल० । ण्वुल् । कृञादिभ्यो वुन् वा ॥

कोलकन्दः । पुं । महाकन्दविशेषे । क्रमिघ्ने । पुटकन्दे ॥

कोलकर्क्कटिका । स्त्री । मधुखर्ज्जूरिकायाम् ॥

कोलदलम् । न । नखीनामगन्धद्रव्ये ॥ कोलस्य बदर्या इव दलम् ॥

कोलनासिका । स्त्री । वह्निणीवृक्षे ॥

कोलपुच्छः । पुं । कङ्कपक्षिणि ॥

कोलमूलम् । न । पिप्पलीमूले ॥

कोलम्बकः । पुं । वीणायः काये । तन्त्रीहीने अलाबूदण्डककुभसमुदाये ॥ कोलति । कुल० । बाहुलकादम्बच् । ततः संज्ञायां कन् । ओष्ठ्यमध्यः ॥

कोलवल्ली । स्त्री । वशिरे । करिपिप्पल्याम् । कोलइववल्ली तत्तुल्यरोमत्वात् ॥

कोलवालुकम् । न । कक्कुष्ठे ॥

कोलशिम्बिः । स्त्री । आलकुशीति गौडभाषाप्रसिद्धे लताविशेषे । शूकरपादिकायाम् । कोलशिम्बिः समीरघ्नीगुर्व्युष्णा कफपित्तकृत् । शुक्राग्निसादकृद्बल्या रुचिकृद्बद्धविट् गुरुः ॥

कोला । स्त्री । पिप्पल्याम् ॥ चव्यभेषजे ॥ कोलिद्रुमे ॥ सुरथस्य राजधान्यन्तरे ॥ अस्त्रविशेषे ॥ कोलति । कुल० । ज्वलितीतिणः । पचाद्यच्वा । टाप् ॥

कोलाञ्चः । पुं । देशविशेषे ॥

कोलापुरम् । न । दक्षिणदेशप्रसिद्धे लक्ष्मीदेव्याः स्थानविशेषे ॥

कोलाविध्वंसी । पुं । कोलावासिनि ॥ कोलां विध्वंसितुं शीलमस्य । विशब्देन धातोरन्यार्थ करणम् ॥ पर्वतवासिनिम्लेच्छविशेषे ॥ एवंपालयतकाससम्लेच्छाः पर्वतवासिनः । कोलाविध्वंसिनः प्रांशाः पृथ्वीशस्य तत्पराइति देवीभागवतोक्तेः । अत्र नामैकदेशेनाप्यग्रहणमितिन्यायात् कोलाशब्दः कोलाहलवाचकः । तथाचकोलाहलेनान्यायेनैव शत्रुराज्यविध्वंसनशीलाः नतुयुद्धनीत्यवलम्बिनइत्यर्थइति भागवतव्याख्यानेनीलकण्ठशैवः ॥ यद्वा । कोलां काञ्चित् सुरथस्य राजधानीं विध्वंसितुमुपमर्द्दितुं शीलमस्य णिनिः ॥

कोलाहलः । पुं । कलकले । बहुविधदूरगाव्यक्तध्वनौ ॥ कुल० । कोलनं कोलः एकीभावः तमाहलति । हल विलेखने । अच् ॥ गिरिबि० ॥

कोलिः । पुं । स्त्री बदर्याम् ॥ कोलति । कुल० । इन् ॥

कोली । स्त्री । बदर्य्याम् । बेर इति प्रसिद्धे वृक्षे ॥ कोलति घनीभवति । कुल० । अच् । गौ० ङीष् ॥

कोविदः । पुं । धीरे । पण्डिते । विदुषि ॥ विवेकरि ॥ कौति धर्मादि । कुशब्दे । कवते वा । कुङ्शब्दे । विच् । गुणः । कोर्वेदस्य विदो वेत्ता । इगुपधेतिकः ॥ कवि बेदे विदा यस्य वा ॥

कोविदारः । पुं । रक्तकाञ्चनारे । चमरिके । कचनार इति भाषा ॥ को

विदारकलिकातिकोमला लक्षित
तिलतैलपाचिता । हिङ्गुवासबसु
वासवासिता केशवारवुषिताऽति
लोभदा ॥ कोशनार: कषाय:स्वा
दुश्च: शीतलरो लघु: । रूक्ष: पि
त्तास्रजित् प्रदरश्वासकासनुत् ॥
कुम् भूमिं विदृणाति । दृ विदारणे ।
कर्मण्यण् । पृषोदरादि: ॥

कोश: । पुं । न । कुड्मले ॥ चषके ।
पानपात्रे ॥ दिव्ये ॥ खड्गपिधाने ॥
जातिकोषे । जायफल इति भाषा ॥
अर्थसङ्घाते । अर्थचये ॥ पेश्याम् ।
अण्डे ॥ अण्डकोषे ॥ शब्दादिसङ्ग्रहे
॥ योनौ ॥ शिम्बायाम् ॥ गोपनगृ
हे । गुप्तिस्थाने ॥ हिरण्यादिनि:
क्षेपाधारे । मञ्जूषायाम् ॥ आच्छा
दके ॥ अन्नमयप्राणमयमनोमयवि
ज्ञानमयानन्दमयेष्वात्मन: शरीरे
षु ॥ पनसादिफलस्याभ्यन्तरावय
वे । कोया इति भाषा ॥ शब्दान्तर
संयोगे गोलकश्चाच कोषं यथा नेत्र
कोश: नेत्रकोश: इति ॥ कुश्यते ।
कुशसंश्लेषणे । अकर्त्तरि चेति घञ् ॥
अकुप्ये । हिरण्ये । कृताकृतयोर्हे
मरूप्ययो: ॥

कोशकार: । पुं । कुशिआर इति प्रसि
द्धे इक्षुविशेषे पश्याद्यगुणाम् मूर्द्ध
न्यमध्ये ॥ कोशं करोति । कर्म्म
ण्यण् ॥

कोशकृत् । पुं । कोषकाराख्ये इक्षु
भेदे ॥

कोशफलम् । न । कक्कोले ॥ कोशे फल
मस्य ॥

कोशफला । स्त्री । त्रपुष्याम् ॥ महाको
शातक्याम् ॥

कोशल: । पुं । अयोध्यायाम् । स
रयूकूले निविष्टे जनपदविशेषे ॥
कुश्यति । कुशसंश्लेषणे । बोपदेव
मते तालव्यान्त: । वृषादित्वात्
कल: । बाहुलकात् गुण: ॥

कोशला । स्त्री । अयोध्यानगर्याम् ।
साकेते ॥ टाप् ॥

कोशलात्मजा । स्त्री । श्रीरामचन्द्रस्य
मातरि । कौसल्यायाम् ॥ इति शब्द
रत्नावली ॥

कोशलिकम् । न । घूस इति प्रसिद्धे उत्
कोचे ॥ इति हेमचन्द्र: ॥

कोशस्थित: । पुं । कोशस्थे जलचराख्ये
गणे ॥

कोशाङ्गम् । न । वृक्षविशेषे । बहुमूले
। इत्कटे ॥ इति धारावली ॥

कोशातक: । पुं । कचे ॥ कोशमतति ।
अत० । कुन् ॥

कोशातकी । पुं । वाणिज्ये ॥ वणिजि ॥

कोषाबी

कावकाबीना इति ख्यातः ॥
कोषातकी । स्त्री । पटोलिकाम् ॥ घोष
की । ता ऽ[illegible] इति प्रसिद्धे शाके ॥
तत्पर्यायाः प्रकारस्तु । कोषातकी
वह्निभवा ऽमपस्मरा सर्वसौख्युताः सु
इतेन संस्कृताः । सम्मार्जिताः [illegible]
[illegible] तिक्ता वातपित्तहृत्
दायका इति ॥ तत्काले ॥ [illegible]
[illegible] पिप्पलि मत्स्यरथ्युक्ता ।
[illegible] ॥
कोषाम्रः । पुं । कोषाम इति गौड
प्रसिद्धे वृक्षविशेषे । सु
[illegible] । [illegible] ॥ को
[illegible] कुष्ठमेदोऽर्शोविनाशकः क्रफा
[illegible] पातम [illegible]
[illegible] गुरुविष्टम्भि [illegible]
[illegible] कफपित्तलम् ॥
कोषिका । स्त्री । कुम्भपात्रम् ॥
कोषी । स्त्री । पञ्चदुश्याम् । पादरक्षायाम् ।
कोषः । पुं । [illegible] कुड्मले ॥ पानपात्रे
॥ दिव्ये । शपथे ॥ खड्गपिधाने ॥ आ
धारविशेषे ॥ [illegible] समूहे ॥ यथा । कु
ताञ्जनकराख्यः पितृपैतामहो
चितः । धर्मार्जितो [illegible] कोषः
[illegible] ॥ धर्मे हेतो तथा
[illegible] ॥ कोषदण्ड
[illegible] ॥

कोषस्थ

भिषावरा [illegible]
हते । अजभक्ष धनं [illegible]
नयीयति ॥ पेश्याम् । पक्षिणाम् [illegible]
॥ कुषति निष्कासयति [illegible]
वकुयते वा । कुषनिष्कर्षे । [illegible]
रिधेति घञ् ॥ मव्याहितमुष्टि ॥
योनौ ॥ कृताकृतस्वर्णरूप्ययोः ।
मनुष्ये । [illegible] ॥ [illegible] ॥
भाण्डागारे ॥ पनसादिफलानां
वयवे ॥ अजमर्यादिपञ्चसु ॥ [illegible]
[illegible] ॥ शब्दान्तरसंयोगे [illegible]
[illegible] कोषम् । यथा । [illegible]
[illegible] ॥
कोषकः । पुं । [illegible] ॥ [illegible]
कोषकारः । पुं । कुषारि इति गौड
भाषा प्रसिद्धे इक्षुविशेषे ॥ कोषका
रे कृमुकः । [illegible] रक्तपित्तक्षयापहः
॥ गुटिपोका इति गौ० प्रसिद्धे त
न्तुकीटे ॥ कोषकारस्थानं
[illegible] ऽनुबन्धे ॥ अभिधानक
र्तरि ॥ कोषं करोति । कर्म
[illegible] ॥
कोषफलः । पुं । [illegible] ॥
कोषपानम् । न । [illegible]
[illegible]
[illegible] ॥
कोषकाकः । पुं । [illegible] ॥

न । कर्पूरतुल्यगन्धद्रव्यविशेषे । कक्कोले ॥ कोषे फलमस्य ॥

कोषफला । स्त्री । पीतघोषायाम् ॥

कोषवृद्धिः । स्त्री । अर्थवृद्धौ ॥ कुरण्डे ॥

कोषशायिका । स्त्री । छुरिकायाम् ॥

कोषस्थः । पुं । जलचरजीवविशेषाणाङ्गणे ॥ यथा । शङ्खः शङ्खनकश्चापि शुक्तिशम्बूककर्कटाः । जीवा एवंविधाश्चान्ये कोषस्थाः परिकीर्त्तिता इति ॥ कोषस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः । बृंहणा बहुवर्चस्का वृष्याश्च बलवर्द्धना इति ॥

कोषातकः । पुं । वृक्षे । केशे ॥ कोषमतति । अत० । कुन् ॥

कोषातकी । स्त्री । श्वेतघोषे । घोषके ॥ ज्योत्स्निकायाम् । पटोल्याम् ॥ कोषमतति । अत० । कुन् । गौरादित्वान् ङीष् ॥

कोषाम्रम् । न । केओड़ा इतिगौड भाषाप्रसिद्धे फलविशेषे ॥ अस्यगुणाः । कफवायुनाशित्वम् अग्निदीपनत्वम् मलवद्धताकारित्वञ्चेति ॥

कोषी । पुं । आम्रवृक्षे ॥

कोषी । स्त्री । पादुकायाम् ॥

कोष्ठः । पुं । कुशूले ॥ गृहमध्ये ॥ कुक्षेर्मध्ये ॥ यथा । स्थानान्यामाग्नि

पक्वानां मूत्रस्य रुधिरस्य च । हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते इति ॥ त्रि । आत्मीये । निजे ॥ कुष्यते । कुष० । उषिकुषिगार्त्तिभ्यस्थन्निति थन् ॥

कोष्ठाकः । पुं । पर्वतान्तरे ॥

कोष्ठागारम् । न । धान्यादिकोष्ठके । कोठार इतिभाषा ॥

कोष्णम् । न । ईषदुष्णे । मन्दोष्णे ॥ त्रि । तद्वति ॥ ईषदुष्णञ्च कोष्णम् । ईषदर्थइतिकादेशः ॥

कोसलः । पुं । सरयूतीरनिविष्टे जनपदविशेषे । अयोध्यानगर्याम् ॥ कुस्यति । कुससंश्लेषणे । हन्त्याणोर्निर्विबादः । बाहुलकात् कलप्रत्ययोगुणश्च ॥ यद्वा । कौ पृथिव्यां सलति गच्छति । सलगतौ । पचाद्यच् । पृषोदरादित्वात् कुशब्दस्यगुणः ॥

कोहलः । पुं । वाद्यप्रभेदे ॥ नाट्यशास्त्रप्रवक्तरिमुनिविशेषे ॥ मद्ये इति हेमचन्द्रः ॥

कौकृत्यम् । न । अनुतापे ॥ अयुक्तकरणे ॥

कौक्कुटिकः । पुं । दाम्भिके ॥ अदूरप्रेरितचक्षुषि । भिक्षौ ॥ कुक्कुटीमाया पादपातस्य । तांपश्यति । संज्ञायां ललाटकुक्कुट्यौपश्यतीतिठक् । कु

कुटीशब्देन तत्पातार्हः स्वल्पदेशो लक्ष्यते । सव्यासोऽपि कीटादिवध भीत्या पादविक्षेपपर्य्याप्तदेशपर्यन्त मेव चक्षुः संयम्य गच्छति ॥

कौकुटिकन्दलः । पुं । बोडासाँप इति गौडप्रसिद्धे सर्पविशेषे । भाण्डपुष्पे ॥ इतित्रिकाण्डशेषः ॥

कौक्षः । त्रि । कुक्षौ भवे ॥ तत्रभवः इ त्यण् ॥

कौक्षेयकः । पुं । असौ । खड्गे ॥ कुक्षौ भ वः । कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्का रेष्विति ढकञ् ॥

कौङ्कः । पुं ।
कौङ्कणः । पुं । } कोंकन इति प्रसिद्धे को
कौङ्किणः । पुं । ङ्कणदेशे ॥

कौटः । पुं । कुटजवृक्षे ॥ स्वतन्त्रे ॥

कौटजः । पुं । कुरैया इति प्रसिद्धे वृक्षे । कुटजे ॥ कूटोऽद्रिशृङ्गः स एव कौटः कौटे जायते स्म । सप्तम्यां जनेर्डः । न । कुटजफले ॥ कौटजन्तु लघु स्वादु मृदु ग्राहि च पित्तलम् । ज्व रहृद्रोगपित्तासृक्कुदावर्त्तस्यपूजाज त् ॥ कुटजकुसुमे ॥ तच्छाकप्रका रो यथा । काञ्जिकेन मधुरेण मुहू र्त्तं स्वेदितः कुटजपुष्पगुलुच्छः । पा चितः सलवणं तिलतैले याति हि कृसुरभीवषिमत्वम् ॥ कौटजं कु

सुमं ग्राहि सुस्वादु मृदुशीतलम् । लघु हृद्रोगपित्तासृग्गुदावर्त्तज्वरं ह रेत् ॥

कौटतक्षः । पुं । स्वकर्मजीविनि स्वा धीने निजालयस्थे तक्षणि ॥ कुट्या म्भवः कौटः स्वतन्त्रः स चासौ तक्षा च । ग्रामकौटाभ्यांतक्ष्ण इतिटच् समासान्तः ॥

कौटल्यः । पुं । वात्स्यायनमुनौ ॥

कौटसाक्षी । पुं । मिथ्यासाक्षिणि ॥

कौटिकः । त्रि । खटीक इतिप्रसि द्धे मांसविक्रयजीविनि । वैतंसिके ॥ कूटेन मृगादिबन्धनयन्त्रेण चरति । चरतीतिठक् ॥

कौटिलिकः । पुं । व्याधे ॥ कर्मारे ॥ कुटिलिकया हरति मृगान् अङ्गा रान्वा । अणुकुटिलिकाशब्दस्यऽण् ॥

कौटिल्यम् । न । कपटे ॥ चाणक्य मूलके ॥ कुटिलतायाम् ॥

कौडविकः । त्रि । कुडवपरिमितव्रीह्या दिवापयोग्ये क्षेत्रे ॥ कुडवस्य वापः । तस्यवापइतिठञ् ॥ पाचविशेषे ॥ कु डवंसम्भवति । सम्भवत्यवहरतिप चतीतिठञ् । कुडवंस्वस्मिन् समा वेशयतीत्यर्थः । टिड्ढाणञिति ङीपि कौ डविकी ब्राह्मणी । कुडवमुपसंहर तिपचति वेत्यर्थः ॥

कौ[illegible]। पुं। [illegible] कु [illegible] मणिकुशीतलस्य [illegible] नि[illegible]म् ॥ यथा। कोयं [illegible]। [illegible] । कोष[illegible] कु कौपेय। [illegible]म् ॥

कौ[illegible]। पुं। [illegible] दूतिविका [illegible]: ॥

कौण्डिन्य:। पुं। मुनिविशेषे। विष्णु गुते। कुण्डिनस्य गोत्रापत्यम्। गर्गा दिभ्यो यञ् ॥ आगस्त्यकौण्डिन्ययो [illegible] कुण्डिनजितिमनु [illegible] ॥ [illegible] कुण्डिना: ॥

कौतुकम्। क्ली। अपूर्वविषयदर्शनोपमि नोत्साहे। कुतूहले। उत्सवे ॥ [illegible] ॥ [illegible] ॥ पर [illegible] ॥ [illegible]। हस्त [illegible] ॥ गीतादौ भोगकाले ॥ कुतू [illegible] कायति। कै। [illegible]। उपपदसमा स:। [illegible] ह्रस्व: [illegible] ॥ यथा। कुतुक [illegible] हस्व: ॥

कौतूहलम्। क्लो। कुतूहले। कौतुके [illegible] ॥ यथा। [illegible] ॥ [illegible]। [illegible]म्। प्रमा[illegible] ॥ कु

[illegible] काले [illegible] ॥

कौ[illegible]:। पुं। [illegible] षि विशेषे ॥ [illegible]म् ॥ [illegible]:॥

कौद्दालीक:। पुं। [illegible] ति विशेषे ॥ [illegible] ॥

कौद्रविकम्। क्ली। [illegible] ॥

कौद्रवीण:। त्रि। [illegible] ॥ कोद्रवा [illegible]म्। [illegible] षेत्रम् ॥

कौन्तिक:। त्रि। प्रासिके। कुन्त [illegible] ॥ कुन्त: [illegible] प्रहरण मितिठक् ॥

कौन्ती। स्त्री। रेणुकायाम्। [illegible] ॥ कुन्तिषु [illegible] षुभवा। [illegible]म्। [illegible] ॥

कौन्तेय:। पुं। [illegible] थेषु ॥ [illegible]ठक् ॥ [illegible] हची ॥

कौपम्। क्ली। कूपोदके ॥ [illegible] ऽल्पविकारि। गम्भीरे [illegible] ति:। [illegible] कौप [illegible] ॥ कौपं [illegible] कु [illegible] ॥

कौपीनम्। क्ली। [illegible] ॥ [illegible] मे [illegible] ॥ [illegible]

[illegible] माचम् । [illegible] [illegible] पुरुष [illegible] । [illegible] [illegible] तदा [illegible] कपि कौपीनम् । [illegible] कौपीने [illegible] [illegible] रिति [illegible] । [illegible] [illegible] [illegible] ॥

कौमारम् । न । [illegible] [illegible] [illegible] ॥ कौमार [illegible] ॥ कुमार [illegible] भावो वा । [illegible] ॥ [illegible] [illegible] मिलाया [illegible] ॥ अतः [illegible] पद्मां [illegible] [illegible] मा [illegible] । इति [illegible] विद्धि कौमारं प्राग्भवाद्दतः ॥ [illegible] [illegible] ॥ [illegible] युवराजे । [illegible] भाषा ॥ [illegible] ॥ [illegible] ॥ [illegible] पतिम् कुमारीं [illegible] । कौ [illegible] [illegible] [illegible] ॥

कौमारभृत्यम् । न । वैद्यविद्या [illegible] षे ॥ [illegible] । कुमारभृत्या [illegible] [illegible] [illegible] त्याना [illegible] [illegible] [illegible] ॥

कौमारी । स्त्री । [illegible] । कार्त्तिकेय [illegible] ॥ [illegible] भार्य्यायाम् ॥ अपूर्व्वपतिः कुमारी पतिमुपपन्ना । कौमारः पूर्वं [illegible] ति [illegible] स्वार्थे [illegible] प्रत्यये नसाधुः ॥

कौमुदः । पुं । कार्त्तिकमासे ॥

कौमुदिका । स्त्री । [illegible] ॥

कौमुदी । स्त्री । ज्योत्स्नायाम् । प्रका [illegible] ॥ आश्वयुज्यां पूर्णिमायाम् ॥ कुमुदानामियम् । [illegible] [illegible] ॥ कार्त्तिकाम् । कार्त्तिकोत्सवे ॥ [illegible] [illegible] [illegible] । [illegible] [illegible] सा कौमुदी स्मृता ॥ कौ मोदन्ते जना यस्यां [illegible] वैः परस्परम् । हृष्टा [illegible] [illegible] पदा तेन सा कौमुदी स्मृता ॥

कौमुदीचारः । पुं । [illegible] [illegible] [illegible] । [illegible] ॥

कौमुदीपतिः । पुं । चन्द्रे ॥ कौमुदाः पतिः ॥

कौमुदीवृक्षः । पुं । दीपवृक्षे । दीपट इति भाषा ॥

कौमोदकी । स्त्री । विष्णोर्गदायाम् ॥ कोः पृथिव्याः मोदकः पालकस्तत् कुमोदको विष्णुः तस्येयम् । [illegible] ङीप् ॥

कौमोदी । स्त्री । कौमोदक्याम् ॥

कौरवः । पुं । कुरुराजसन्ततौ । धृतराष्ट्रादिषु । पाण्डवेषु च ॥ पाण्डवाः कुरुवंशजत्वात् । कुरोरयम् । कच्छादिभ्यश्चेत्यण् ॥

कौरवकः । पुं । कौरवे ॥ कुरुषु भवः कौरवं वा । विभाषाकुरुयुगन्धराभ्यामिति वुञ् ॥

कौरव्यः । पुं । कौरवे ॥ कुरोरपत्ये । कौरव्यः कौरव्यौ कौरव्याः ब्राह्मणाः । कुर्व्वादिभ्यो ण्यः ॥ क्षत्रियेषु । कुरुनादिभ्यो ण्य इति ण्ये कृते तद्राजस्य बहुषु तेनैवास्त्रियामिति लुकि कौरव्यः कौरव्यौ कुरवः इति बोध्यम् ॥

कौर्प्यः । पुं । } वृश्चिकराशौ ॥
कौर्प्याख्यः । पुं । }

कौलः । त्रि । शाक्तविशेषे । सत्कुलोत्पन्ने । कुलीने ॥ दिव्यवीरपशुभावानां मते दिव्यभावरते । कुलाचाररते । ब्रह्मविदि ॥ यथा । दिव्यभावरतः कौलः सर्व्वत्र समदर्शक इति ॥ अपि च । पशौ वेदा ब्रह्ममन्त्रः पशुरेव कलेश्वरः । वीरा ब्रह्ममनुर्वीरः कौला च ब्रह्मणि ब्रह्मविदिति ब्रह्मणो ब्रह्मत्वम् ॥ कुलेभवः । अण् ॥

कौलटिनेयः । पुं । स्त्री । कौलटेये । सतीभिक्षुक्याः सुते । सत्या भिक्षार्थं गेहगेहमटन्त्याः पुत्रे ॥ कुलटाया अपत्यम् । कुलटाया वेतीनङ् । स्त्रीभ्यो ढक् ॥

कौलटेयः । पुं । स्त्री । कौलटिनेये । सतीभिक्षुकीपुत्रे ॥ असतीपुत्रे । बान्धकिनेये । बन्धुले ॥ कुलटायाः अपत्यम् । स्त्रीभ्यो ढक् ॥

कौलटेरः । पुं । असतीसुते । बान्धकिनेये । कौलटेये ॥ कुलटायाः अपत्यम् । क्षुद्राभ्यो वेति ढ्रक् । अस्मिन्मते कौलटीनाऽपि चतुरा ॥

कौलत्थः । त्रि । कुलत्थसम्बन्धिनि रसादौ ॥ कुलत्थस्यायम् । तस्येदमित्यण् ॥ कुलत्थैः संस्कृते ॥ कुलत्थकोपधादण् ॥

कौलत्थीनम् । त्रि । कुलत्थोद्भवक्षेत्रे ॥ कुलत्थानाम्भवनं क्षेत्रम् धान्यानाम्भवने क्षेत्रे खञिति खञ् ॥

कौलवः । पुं । ववादिषु तृतीयकरणे ॥ तत्र जातस्य फलं यथा । मान्यो विनीतो मितवाक्स्वतन्त्रः प्रागल्भ्ययुक्तोऽमनुजो महौजाः । सुसम्मतः स्याद्विदुषां कृतघ्नः प्रचेत् कौलवाख्ये करणं प्रसूताविति ॥

कौलालकम् । त्रि । कुलालेन कृते ॥ कुलालादिभ्यो वुञ् ॥

कौलिकः । पुं । तन्तुवाये ॥ कुलमार्गप्रवर्त्तके पशुभिदे ॥ यथा कौलिक इतिश्रुते ॥ त्रि । कुलमार्गस्थे । ब्रह्मविदि ॥ पाषण्डे ॥ कुलपरम्परायाते ॥ यथा कौलिक धर्मएषः ॥

कौलीनम् । न । गुह्ये ॥ जन्ये । परीवादे । लोकापवादे ॥ अकार्ये । कुकर्मणि ॥ कुलीनत्वे ॥ अहिपशुपक्षिशुनां युधि । प्राणिद्यूते ॥ कुलीनस्य कर्मभावोवा । युवादित्वादण् ॥

कौलीन्यम् । न । कुलीनत्वे ॥

कौलीरा । स्त्री । कर्कटशृङ्ग्याम् ॥

कौलेयः । त्रि । कुलीने ॥ इतिद्विरूपो भरतस्य ॥

कौलेयकः । पुं । कुक्कुरे । शुनि ॥ कुलेभवः । कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेष्विति ढकञ् ॥ त्रि । कुलीने ॥ कुलस्यापत्यम् । अपूर्वपदादन्यतरस्यां यड्ढकञाविति ढकञ् ॥

कौल्माषीणम् । त्रि । कुल्माषोद्भवक्षेत्रे ॥ कुल्माषाणां भवनक्षेत्रम् । धान्यानामिति खञ् ॥

कौल्वः । त्रि । कुलीने ॥ इतिद्विरूपकोषः ॥

कौवलम् । न । कुवले । कोलिफले ॥

कौबेरम् । न । कुष्ठौषधौ ॥ त्रि । कुबेरात्मजे ॥ कुबेरसम्बन्धिनि त[illegible]यैश ॥ कुबेरस्येदमित्यर्थेऽण् ॥

कौबेरी । स्त्री । मातृभेदे ॥ उत्तरदिशि ॥ कुबेरस्येयम् ॥ अणन्तात् ङीप् ॥

कौशम् । न । कान्यकुब्जदेशे ॥

कौशलम् । न । क्रियायां नैपुण्ये । कुशलतायाम् ॥ यथा । कथातिकर्कशः शान्तः कथातिचलितः शुचिः । एकत्र कार्ये व्याख्यातु क्वापि ह्रौ कौशलं कवेः ॥ इत्यमरमतकटीका ॥ कुशलस्य कर्मभावो वा । युवाण् ॥

कौशलिका । स्त्री । प्राभृते । उपायने ॥ कुशलप्रश्ने ॥

कौशली । स्त्री । कुशलप्रश्ने ॥ प्राभृते ॥

कौशलेयः । पुं । श्रीरामे । रघूत्तमे ॥

कौशल्यम् । न । कुशलतायाम् ॥ कुशलस्य कर्मभावो वा । ब्राह्मणादित्वात् ष्यञ् ॥ त्रि । कौशलायांभवे ॥

कौशल्या । स्त्री । राममातरि ॥ कुशलैव । स्वार्थे ष्यञ् ॥

कौशल्यायनिः । पुं । कौसल्यायने ॥

कौशल्येयः । पुं । सीतापतौ । श्रीरामे ॥ कौशल्याया अपत्ये ढक् ॥ मनोमयाद्दाशरे विमानमये कौषे ॥ कौशल्या सर्वतीर्थेभ्यो नसतर्कयां बुद्धिस्थामिव ॥

कौशाम्बी । स्त्री । कुशाम्बनिर्वृत्तायां

नगर्यादौ । वस्त्रभवने ॥ कुशाम्बेन निर्वृत्ता । तेननिर्वृत्तमित्यण् । क्रीप् ॥

कौशिकः । पुं । विश्वामित्रमुनौ ॥ कुशिकस्यापत्यम् ऋष्यण् । गोत्राश्च तेषु मित्रस्याम् ॥ कोशभवो वा ॥ ...कम् ॥ नकुले ॥ व्यालग्राहे ॥ गुग्गुलौ ॥ ... ॥ कोशके ॥ उलूके ॥ मृङ्गराजके ॥ मज्जनि ॥ ... कर्णमूले ॥

कौशिकप्रियः । पुं । रामचन्द्रे ॥

कौशिकफलः । पुं । नारिकेले ॥

कौशिका । स्त्री । नारिकेलफलनिर्मिते मानपात्रे ॥ इति ...॥

कौशिकात्मजः । पुं । अर्जुने । ...॥

कौशिकायुधम् । न । इन्द्रचापे ॥

कौशिकारातिः । पुं । काके ॥

कौशिकी । स्त्री । चण्डिकायाम् ॥ कोशाद्विर्गता । तदुक्तम् । शरीरकोशाद्यत्तस्याः पार्वत्या निःसृताम्बिका । कौशिकीतिसमस्तेषु ततो लोकेषु गीयते इति पूर्वोक्तरात्यादिधुक्तम् ॥ नद्भेदे ॥ नदी विशेषे ॥ नाट्यवृत्तौ ॥

कौशिकेयः । पुं । ... वृक्षे ॥

कौशीतकी । स्त्री । उपनिषद्भेदे ॥ ... लोपामुद्रा

याम् ॥

कौशीरयम् । न । ...

गुरुत्वे ॥

कौशेयम् । न । कृमिकोशोत्थवस्त्रे ॥ रेशमिकवस्त्र इति भाषा ॥ कोशे सम्भूतम् । कोशाद्ढञ् । कोशस्य विकारो वा । विकारे वा ढञ् ॥

कौषिकः । पुं । कौशिकार्थेषु ॥

कौषिकी । स्त्री । उमायाम् । नदी विशेषे ॥

कौसल्या । स्त्री । श्रीरामचन्द्रजननाम् ॥ कोसलस्य राज्ञो अपत्यं स्त्री । वृद्धेत् कोसलाजादाञ्‌ञ्यङ् । इति ञ्यङ् । यङश्चापिति चाप् ॥ ... निर्देशात् कोसलशब्दो दन्त्यसकारमध्यः ॥

कौसल्यानन्दनः । पुं । श्रीरामे ॥ कौसल्याया नन्दनः ॥

कौसल्यानन्दवर्द्धनः । पुं । श्रीरामचन्द्रे ॥ कौसल्यायाः आनन्दं वर्द्धयति तच्छीलः । ...॥ कौसल्यानन्दवर्द्धनो ...॥

कौसल्यायनिः । पुं । श्रीरामे ॥ कोसल्यापत्यम् । कौसल्यकार्मार्याभ्यां चेतिफिञ् । ... निर्दिष्टत्वा... यतः ...

ञियोगेन प्रकृतिरूपं निपात्यते ॥ कौसल्यादयस्त्वाव्ययमध्या अपि-बोध्याः ॥

कौसीद्यम् । न । आलस्ये । तन्द्रायाम् ॥ कुसीदस्य भावे ॥

कौसुमम् । न । कुसुमाञ्जने । पुष्पाञ्जने ॥

कौसुम्भः । पुं । अरण्यकुसुम्भे ॥ न । शाकविशेषे ॥ यथा । कौसुम्भं कोमलं शाकं कासमर्दविमर्दितम् । पाचितं तप्तसुष्टते मांसिमन्नविमिश्रितम् ॥ कौसुम्भं कासजिच्चक्षुष्यं रुच्यमुष्णञ्च पित्तलम् । सुस्वादु मधुरं पाके लघु रुच्यं सरं हितमिति ॥ त्रि । कुसुम्भपुष्परागयुक्ते । कसूंभा कसूंभी इति भाषा ॥ कुसुम्भेन रक्तम् । तेन रक्तं रागादित्यण् ॥ तस्येदमित्यण् वा ॥

कौहृतिकः । त्रि । मायाकारे ॥ कुहृत्याचरति । ठक् ॥

कौस्तुभः । पुं । विष्णोर्मणिप्रभेदे ॥ यथा । आत्मानमस्य जगतो निर्लेपमगुणामलम् । बिभर्ति कौस्तुभमणिस्वरूपं भगवान् हरिरिति विष्णुपुराणम् ॥ कुत्सितं स्तुभ्नाति व्याप्नोतीति कुस्तुभोऽब्धिः । तत्रभवः । अण् ॥ कुं स्तोभते इति कुस्तुभो विष्णुः । ष्टुभस्तम्भे । मू० कः । तस्यायमिति वा ॥

कौस्तुभलक्षकः । पुं । विष्णौ ॥

कौस्तुभवक्षाः । पुं । पृश्निगर्भे । विष्णौ ॥

क्रकचः । पुं । ग्रन्थिलाख्यतरौ ॥ पुं । न । करपत्रे । करवत् करौत आरा इति भाषा ॥ योगविशेषे ॥ षष्ठ्यादितिथयो मन्दाद्विलोमं क्रकचः स्मृतः ॥ क्र० इति कचति । कचशब्दे । पचाद्यच् ॥

क्रकचच्छदः । पुं । केतकीवृक्षे ॥ क्रकचसदृशाश्छदाः यस्य सः ॥

क्रकचपत्रः । पुं । शाकवृक्षे ॥

क्रकचपात् । पुं ।
क्रकचपादः । पुं । } कृकलासे ॥

क्रकचपृष्ठी । स्त्री । कवयी इतिप्रसिद्धे मत्स्ये ॥

क्रकणः । पुं । कयार इतिगौडभाषाप्रसिद्धे पक्षिविशेषे । कृकरे ॥ क्रइति कणति । कण० । अच् ॥

क्रकरः । पुं । करीरवृक्षे ॥ क्रकणे ॥ दीने ॥ क्रकचे ॥ क्रइतिकरोति । अच् ॥ क्रइतिशब्दकरणशीलः । कृञो हेतुताच्छील्येतिटः ॥

क्रतुः । पुं । यज्ञे । श्रौताग्निष्टोमादौ ॥ सोमसाध्ययागे । यूपसहिते यज्ञे ॥ कामः क्रतुः कर्म जन्म त्वेषामेव

क्रमेणभवेत्। तथकामक्रत्वोरभेदमा मङ्गाह। पुंसो या विषयापेक्षा स काम इति भण्यते॥ स एव वर्द्धमान: सन् क्रतुत्वं प्रति पद्यते। रुचेरति शय: काम्ये विषये क्रतुरीर्यते इति॥ सङ्कल्पे॥ ब्रह्मण: कराज्जाते म रीच्याद्यन्तर्गते मुनिविशेषे॥ अध्य वसाये। एवमेवनान्यथेत्य विचल प्रत्यये॥ विश्वदेववि० ॥ करोति क्रियते वा। कृञ:कतु:॥ इन्द्रियेषु॥

क्रतुच्छद:। पुं। वटुभेदे॥

क्रतुदोषनत्। पुं। प्राणायामे॥ क्रतु शब्देनेन्द्रियाणि सङ्कल्पोक्षा तेषांदो षा:। विजितानन्तुयानमिषिद्धाचर णाकृता: तान् नुदति उपशमयती ति क्रतुदोषनुत्। उक्तंच। दह्य न्तेध्मायमा नानां धातूनाञ्च यथा मला:। प्राणायामै क्रया दोषा णाम्यन्तीन्द्रियगोचराइति॥

क्रतुध्रुक्। पुं। असुरे॥ नास्तिके॥

क्रतुद्विट्। पुं। असुरे॥ नास्तिके॥ क्र तुंद्वेष्टि। द्विष अप्रीतौ। सत्सूद्वि षेतिक्किप्॥

क्रतुध्वंसी। पुं। वृषाङ्के। शिवे॥ क्र तुं दक्षयज्ञं ध्वंसयति। ध्वंसु०। सु प्यजातावितिणिनि:॥

क्रतुपशु:। पुं। अश्वे॥ इतिहारावली॥

क्रतुपुरुष:। पुं। विष्णौ॥

क्रतुभुक्। पुं। अमरे। देवे॥ क्रतुं क्रतौ वा भुङ्क्ते। भुजपालनाभ्यव हारयो:। अन्येभ्योपिदृश्यते इति क्किप्॥

क्रतुराज:। पुं। राजसूययज्ञे॥ क्रतू नांराजा। टच्॥

क्रतुविक्रयी पुं। क्रतुविक्रायके। म दीययागस्य फलं तव भवत्वित्यभि भाषधनग्राहीतरि॥

क्रतूत्तम:। पुं। राजसूययज्ञे॥ क्रतुषु उत्तम:॥

क्रथकैशिका:। पुं। भूम्नि। विदर्भदेशेषु॥

क्रथनम्। न। मारणे॥ क्रथहिंसाया म्। भावे ल्युट्॥ मुक्तामुक्ता॥

क्रथनकम्। न। क्रथनार्थे। स्वार्थेक:॥

क्रन्दनम्। न। रोदने। शोकादिना ऽश्रुपतने॥ आह्वाने॥ क्रदिआह्वा नेरोदनेच। भावे ल्युट्॥ योधसं रावे॥ पुं। विडाले॥ इतिशब्दमाला॥

क्रन्दितम्। न। आह्वाने॥ रुदिते॥ युधिपीतत्कृतौ॥ क्रदि०। क्त:॥

क्रम:। पुं। अनुक्रमे। नियतपूर्वापर भावात्मनि॥ शक्तौ॥ विधाने। क ल्पे॥ आक्रमणे॥ चरणे। अङ्घ्रौ॥ वित्ततिविशेषे॥ भिषज्जांमते चिकित् सायाम्॥ क्रमणं क्रमेणवा। क्रमु०

…। घञ्। नोदात्तोपदेशेति न वृद्धिः ॥ क्रामतिगच्छति वा। क्रमेः पञ्चाय च॥ पादविक्षेपे॥

क्रमकः। पुं। क्रमज्ञे॥ क्रममधीते वेद वा। क्रमादिभ्योवुन्॥

क्रमणः। पुं। चरणे॥ न। अतिक्रमे॥

क्रमनिग्रहः। पुं। हठनिग्रहादन्यस्मिन्मनसो निग्रहे॥ क्रमनिग्रहेचाऽध्यात्मविद्याप्राप्त्यादयउपायाः। अध्यात्मविद्याच दृश्यमिथ्यात्वं दृग्वस्तुनः स्वप्रकाशत्वञ्चबोधयति। तथाच सति एतन्मनः स्वगोचरेषु दृश्येषु प्रयोजनाभावंप्रयोजनवति दृग्वस्तुनि अगोचरत्वञ्च बुद्धा निरिन्धनाग्निवत् स्वयमेवोपशाम्यति। तथा चश्रुतेः। यथानिरिन्धनो वह्निः स्वयोनावुपशाम्यति। तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यतीति॥ योनिरात्मा॥

क्रमपूरकः। पुं। वकवृक्षे॥

क्रमशः। अ। क्रमेण क्रमेणेत्यर्थे। ढवढवसे इतिभाषा॥

क्रमागतम्। त्रि। क्रमायाते। पितृपितामहादिक्रमेण प्राप्ते॥ यथा। अस्वतन्त्राः स्त्रियः सर्वाः पुत्रदासपरिग्रहाः। अस्वतन्त्रस्तच गृही यत्र तत्स्यात् क्रमागतमिति नारदः॥

क्रमायातः। त्रि। क्रमागते॥

क्रमुः। पुं। गुवाके॥ क्रामति। क्रम०। वाहुलकादुः॥

क्रमुकः। पुं। भद्रमुस्तके॥ ब्रह्मदारुणि॥ कार्पासिकायाःफले॥ पट्टिकालोध्रे॥ पूगे। गुवाके॥ क्रामति। क्रम०। वाहुलकादुः। कन्॥

क्रमुकफलम्। न। गुवाके॥

क्रमुकी। स्त्री। गुवाकद्रुमे॥

क्रमेलः। पुं। उष्ट्रे॥

क्रमेलकः। पुं। उष्ट्रे। महाङ्गे॥ क्रामति। क्रम०। विच्। एलति दुलगतौ।एलयतिवा। दुलक्षेपे। ण्वुल्। क्रम् चासौ एलकश्च॥

क्रयः। पुं। मूल्येनपरस्माद्द्रव्यग्रहणे॥ द्रव्यदानेनान्यस्वस्वीकारे॥ यथा। निश्चित्य वस्तुतन्मूल्यमुभयोः सम्मतौ स्थिते। परस्पराभ्याकरणं क्रयसिद्धिस्ततोभवेदिति॥ अपिच। क्रयसिद्धिरदृष्टानां गुणश्रवणतोभवेत्। विपर्यये तद्गुणानामन्यथाभवतिक्रयइतिश्रीमहानिर्वाणतन्त्रम्॥

क्रयलेख्यम्। न। भूम्यादिक्रयलिपौ। कयाला कवाला इतिभाषा॥ यथा। गृहं क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम्। पत्रंकारयतेयत्तु क्रयलेख्यं तदुच्यते॥ इतिवृहस्पतिः॥

क्रयविक्रयः । पुं । वाणिज्ये । बयाम इति भाषा ॥

क्रयविक्रयानुशयः । पुं । क्रयविक्रययोः पश्चात्तापे । अष्टादशविवादान्तर्गत विवादविशेषे ॥ यथा । क्रीत्वाविक्रीय वाकिञ्चिद्यस्येहानुशयो भवेत् । सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वेतिमनुः ॥

क्रयविक्रयिकः । पुं । वणिजि ॥ क्रयविक्रयाभ्यां जीवति । वस्नक्रयविक्रया-ट्ठन् ॥

क्रयविक्रयी । त्रि । क्रयविक्रयकर्त्तरि ॥

क्रयशीर्षम् । न । } कपिशीर्षे । प्राकाराग्रे ॥ इतित्रिकाण्डशेषः ॥
क्रयशीर्षकम् । न । }

क्रयारोहः । पुं । हट्टे । हाट इति भाषा ॥

क्रयिकः । त्रि । क्रायके । क्रेतरि ॥ क्रय जीवातौ । वणिजि ॥ क्रयेण जीवति । वस्नक्रयविक्रयाट्ठन् । क्रयविक्रयग्रहणं सङ्घातविगृहीतार्थम् ॥ यद्वा । क्रीणाति । डुक्रीञ् द्रव्यविनिमये । क्रियइकन् ॥

क्रयी । त्रि । क्रयकर्त्तरि । क्रेतरि ॥ क्रयोऽस्यास्ति । इनिः ॥

क्रय्यम् । त्रि । एट्टासादिततवस्तुनि । क्रेतारो ग्राहकाः क्रीणीयुर्गृह्णीयुरिति बुध्या आपणे प्रसारिते द्रव्ये ॥ क्रीयते । डुक्रीञ् ० । अचोयत् । क्रय्यस्तदर्थे इति साधु ॥

क्रव्यम् । न । मांसे ॥

क्रव्यघातनः । पुं । मृगे ॥

क्रव्यात् । पुं । कौणपे । राक्षसे ॥ त्रि । आममांसभोजिनिगृध्रादौ ॥ क्रव्यमाममांस मत्तीतिविग्रहे क्रव्येचेतिविट् ॥

क्रव्यादः । पुं । अग्निपे । राक्षसे ॥ सिंहे ॥ श्येने ॥ क्रव्यादोमृतभक्षके इत्युक्तः शवभक्षकाग्नौ ॥ त्रि । मांसाऽशिनि ॥ मांसमत्तीतिविग्रहे अदः कर्मण्यण् । पृषोदरादित्वादुपपदस्य क्रव्यादेशः ॥ कृत्तं छिन्नं तदेव पुनर्विशेषतःकृत्तं पक्वम् भक्ष्य इतिक्रव्यादः । कृत्तविकृत्तपक्वशब्दस्य पृ० क्रव्यादेशःइतिकाशिका ॥

क्रशितः । त्रि । कृशीकृते ॥ कृशशब्दात् तत्करोतीतिणयन्तात् कर्मणि क्तः । णाविष्ठवद्भावे । रऋतोहलादेर्लघोरित्यृकारस्यरेफादेशः ॥

क्रशिमा । पुं । कार्श्ये ॥ कृशस्य भावः । पृथ्वादित्वादिमनिच् । रऋतोहलादेरितिरेफादेशः ॥

क्रशीयान् । त्रि । अत्यन्तकृशतरे ॥ क्षीणे ॥ तनीयसि ॥ अयम नयोरतिशयेनकृशः । द्विवचनविभज्योतीयसु

नि रक्तत्वमिरेफादेशः ॥

क्रान्तः । पुं । अश्वे । पथे ॥ क्रामति । क्रम० । क्तः ॥ त्रि । आक्रान्ते ॥ निष्क्रान्ते ॥ व्याप्ते ॥ सङ्क्रान्ते ॥

क्रान्तदर्शी । त्रि । कवौ । अतीतानागतार्थप्रत्यक्षदर्शिनि ॥ क्रान्तमस्मदादीन्द्रियविषयतामतिक्रान्तं वस्तु सर्वविषयव्यापि यथा स्यात्तथा द्रष्टुं शीलमस्य ॥

क्रान्ता । स्त्री । वृहत्याम् ॥

क्रान्तिः । स्त्री । आक्रमे ॥ गतौ ॥ खगोलमध्यवर्त्तिसूर्यगमनार्थं तिर्य्यग्गोचरेखायाम् ॥ यथा । अयनाद् दर्कयावत् तथा तिर्य्यक् तथापरा । क्रान्तिसंज्ञा तथा सूर्यः सदा पर्य्येति भावयन्निति ॥

क्रान्तिवलयः । पुं । क्रान्तिमण्डले । विषुवद्वृत्तावलुविंशतिभागैर्दिक्षेपोपरे यद्वृत्तं तस्मिन् ॥

क्रान्तुः । पुं । खगे । पक्षिणि ॥ क्रामति । क्रम० । क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च ॥

क्राश्नन् । त्रि । पादविक्षेपति ।

क्रायकः । पुं । क्रयिके । क्रेतरि । ग्राहके ॥ क्रीणाति । डुक्रीञ् द्रव्यविनिमये । ण्वुल् ॥ क्रयजीविनि ॥

क्रिमिः । पुं । कृमौ । कीटके । लूतायाम् ॥ लाक्षायाम् ॥ कृमिले ॥ खरे ॥ रोगविशेषे ॥ अस्य निदानम् । यथा । अजीर्णभोजी मधुराम्लनित्यो द्रवप्रियः पिष्टगुडोपभोक्ता । व्यायामवर्जी च दिवाशयानो विरुद्धभोजी लभते क्रिमींश्चेति ॥ क्रामति । क्रम० । क्रमितमिशमितस्त्रम्भामतश्चेतीन् ॥

क्रिमिकण्टकम् । न । कृमिकण्टके ॥

क्रिमिघ्नः । पुं । विडङ्गे ॥ क्रिमीन् हन्ति । हन० । अमनुष्यकर्तृकेऽपि चेति टक् । अत्पूर्वस्येति नियमाभावाद्ध्रस्वम् ॥

क्रिमिघ्नी । स्त्री । सोमराज्याम् ॥ टित्त्वात् ङीप् ॥

क्रिमिजम् । न । अगुरुणि ॥

क्रिमिजा । स्त्री । लाक्षायाम् ॥ क्रिमिभ्यो जायते । जनी० । डः ॥

क्रिमिशत्रुः । पुं । पर्णकलामाहार इति गौडप्रसिद्धे रक्तपुष्पकोमन्दारे ॥ क्रिमीणां शत्रुः ॥

क्रिमिशात्रवः । पुं । विट्खदिरे ॥

क्रिमिशैलः । पुं । वल्मीके । भाषा । बाँबी इति बंगई इति च भाषा ॥

क्रियः । पुं । मेषराशौ ॥

क्रियमाणम् । न । कर्मभावदेहनिर्वर्त्यमानक्रिया ॥

क्रिया। स्त्री। उपाये॥ चेष्टायाम्। इन्द्रियव्यापारे॥ साचपाकादिरूपा पाकादिशब्दानांप्रवृत्तौनिमित्तम्। आरम्भे॥ निष्कृतौ॥ पूजायाम्॥ सम्प्रधारणे॥ कर्मणि॥ 'शास्त्रविहितनित्यनैमित्तिकव्यापारात्मकअकर्मकव्यापारात्मिकाक्रिया साचयोगपत्नी। यथा। क्रियातुयोगपत्नीच पूजिता सर्वसंमता। ययाविनाजगत्सर्वंविधिहीनञ्चनारदेति भगवद्वाक्यं देवीभागवते ९ स्कन्धे॥ शिक्षायाम्॥ चिकित्सायाम्॥ करणे॥ धात्वर्थः करोत्यर्थोवा क्रियेतिवैयाकरणाः॥ आख्याते॥ गर्भाधानादिसंस्कारे॥ चतुष्प्रकारव्यवहारपादान्तर्गतव्यवहारपादविशेषः क्रिया। सा द्विधा। मानुषी दैवीच। तत्राद्या साक्ष्यलेख्यानुमानभेदेन त्रिधा। द्वितीया घटाग्न्युदकविषकोषतण्डुलतप्तमाषकफालधर्माधर्मभेदेन नवधा दिव्यपदवाच्या। यथा। द्विप्रकारा-क्रियाप्रोक्तामानुषीदैविकीतथा। साक्ष्यलेख्यानुमानञ्च मानुषीत्रिविधास्मृता॥ घटाद्याधर्मजान्तास्तुदैविकीनवधास्मृतेति बृहस्पतिः॥ शौचे॥ करणम् क्रियते वा। शचेति योगविभागात् भावादौ कृञः शप्र

त्ययः। रिङ्शयग्लिङ्क्षु। अचिश्नुधातुभ्रुवांय्वोरियङुवङावितीयङ्॥

क्रियाकारः। पुं। नवच्छात्रे। नवाभिधायीइतिभाषा॥ क्रियांकरोतीत्यण्॥ क्रियायाः कारो नियमः यत्र स्थो वाव्यवस्थापनंवा॥ त्रि। क्रियाकृति॥

क्रियाद्वेषी। पुं। साक्ष्यलिखितभुक्तियुक्त्यपवक्तरि॥ सत्यव्यवहारविषयेपञ्चधाजनान्तर्गतहीनविशेषः। यथा। अन्यवादी क्रियाद्वेषीनोपस्थायी निरुत्तरः। आहूतप्रपलायी चहीनः पञ्चविधः स्मृतइतिनारदः॥ त्रि। कर्मद्वेष्टरि॥

क्रियापादः। पुं। चतुष्पाद्व्यवहारान्तर्गततृतीयपादे॥ यथा। पूर्वपक्षः स्मृतःपादो द्वितीयश्चोत्तरःस्मृतः। क्रियापादस्तथाचान्यश्चतुर्थो निर्णयः स्मृत इतिबृहस्पतिः। तत्रसाक्ष्यलिखितभुक्तियुक्तिप्रपञ्च रूपः॥

क्रियाफलम्। न। कर्मफले॥ उत्पत्त्यादिच॥ यथा। उत्पत्तिराप्तिर्विकृतिः संस्कृतिश्च चतुर्विधम्। क्रियाफलं प्राहुरार्याः कैवल्ये तन्नसम्भवेदिति॥

क्रियाभ्युपगमः। पुं। परस्परक्रियास्वीकारे॥ द्वयोः पुरुषयोः कस्मिंश्चिद्विषये परस्पराङ्गीकारेणानुमतौ॥

यथा । क्रियाभ्युपगमात् क्षेपवीजा
र्थं यत् प्रदीयते । तस्येह भागिनौ
दृष्टौ वीजी क्षेत्रिक एव चेति मनुः ॥

क्रियायोगः । पुं । देवाराधनतदाश्रया दिरूपसत्कृपायां पृथक्क्रियायाम् ॥ अथनारदं प्रति ब्रह्मोवाच । आत्मयोगस्तु योगस्य यस्तु साधनमात्मना । यस्तु वाह्यार्थसंयोगः क्रियायोगः स उच्यते ॥ प्रधानं कारणं योगोमुक्तेर्मुनिवरोत्तम । क्रियायोगस्तु योगस्य परमं तातसाधनमिति वह्निपुराणम् ॥

क्रियावान् । त्रि । कर्मणिरते । कर्मद्यते ॥ क्रियास्यास्ति । तदस्यास्तीति मतुप् ॥

क्रियावसन्नः । त्रि । साक्ष्यादिनाप्राप्तपराजये ॥ यथा । स्वयमभ्युपपन्नोऽपि स्वचर्यावसितोऽपि सन् । क्रियावसन्नो वादेतु परंसभ्यावधारणमिति ॥

क्रियावादी । त्रि । प्रमाणवादिनि ॥ कार्यवादिनि । पुकारु फर्यादी इति भाषा ॥

क्रियासमभिहारः । पुं । पौनःपुन्ये ॥ भृशार्थे ॥ क्रियायाः क्रियाविशेषाणां समभिहारः समुच्चयः ॥

क्रियासाधनम् । न । ज्ञाने ॥ द्रव्ये ॥ ज्ञानद्रव्याभ्यां सम्यक्स्य कृतः क्रिया

पञ्चरा॥

क्रियेन्द्रियम् । न । कर्मेन्द्रिये ॥ क्रियासाधकमिन्द्रियम् ॥

क्रीडः । पुं । परीहासे ॥ इति शब्दरत्नावली ॥

क्रीडनम् । न । खेलायाम् ॥

क्रीडनकम् । न । क्रीडासाधने । खिलौना इति भाषा ॥ तेनक्वापेताऽखिलचापलेऽर्भके दान्तेऽभृतक्रीडनकेऽनुवर्त्तिनि । इति भागवतम् ॥ पुंलिङ्गोऽपि यथा । दृष्टात्मजविनोद्यान् नृपान् नृपसति भूरियम् । अहोमां विजिगीषन्ति मृत्योः क्रीडनकानरा इति ॥

क्रीडा । स्त्री । खेलायाम् । परीहासे ॥ अवज्ञाने । अनादरे ॥ केलिप्रकारे ॥

क्रीडातालः । पुं । तालविशेषे ॥ एक एवप्लुतो यत्रक्रीडातालःसकथ्यते । अपरं नियमं विनेतिदामोदरोक्तेः ॥

क्रीडायामम् । न । क्रीडारण्ये । पुष्पारण्ये ॥

क्रीडारत्नम् । न । रतौ ॥

क्रीडारथः । पुं । क्रीडार्थरथे ॥ अशौपुष्परथः क्रीडायामं न समराय यत् ॥

क्रीडोपस्करम् । न । क्रीडासाधने ॥

क्रीतः । त्रि । क्रयकर्मणि ॥ कृतक्रये । मूल्यप्रदानेन गृहीते । क्रीता इ

ति भाषा ॥ दीयमानं न गृह्णाति क्रीतम् पण्यन्तु यः क्रयी । अथवाऽस्य भवेद्दोषो विक्रेतुर्योऽप्रयच्छतः इति नारदः ॥

क्रीतकः । पुं । द्वादशपुत्रान्तर्गतपुत्रविशेषे ॥ यथा । क्रीणीयात् यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् । स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वेति ॥ न । क्रये ॥ विनिमये ॥

क्रीतानुशयः । पुं । द्रव्यं क्रीत्वा कृत्वा अनुतापे ॥ यथा । क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते । क्रीतानुशय इत्येतद्विवादपदमुच्यते इति याज्ञवल्क्यः ॥

क्रुङ् । पुं । स्त्री । क्रौञ्चपक्षिणि ॥ क्रुञ्चति गच्छति । क्रुञ्चकौटिल्याल्पीभावयोः । ऋत्विगिति साधुः ॥

क्रुञ्चः । पुं । क्रौञ्चखगे ॥ क्रौञ्चगिरौ ॥

क्रुञ्चा । स्त्री । क्रौञ्चविहङ्गमे ॥ अजादित्वाट्टाप ॥ वीणाभेदे इति कश्चित् ॥

क्रुञ्ची । स्त्री । वीणाभेदे ॥

क्रुद्धः । त्रि । उत्पन्नक्रोधे । क्रोधयुक्ते ॥ क्रुद्धमत्तयोः कुतो विवेकः ॥

क्रुधमत् । त्रि । सञ्जातक्रोधे ॥

क्रुध् । स्त्री । कोपे ॥ क्रुधं कोपे । संपदादित्वात् क्विप् ॥

क्रुधा । स्त्री । कोपे । क्रोधे ॥ क्रुध० । सं० क्विप् । भागुरिमते टाप् ॥

क्रुश्वा । स्त्री । शृगाले ॥ क्रोशति । क्रुश० । शीङ्क्रुशीत्यादिना क्विप् ॥

क्रुष्टम् । न । रोदने ॥ रावे ॥ क्रुश आह्वाने रोदने च । भावे क्तः ॥

क्रूरः । त्रि । कठिने ॥ घोरे ॥ नृशंसे ॥ परद्रोहकारिणि ॥ उष्णे ॥ पुं । भूसाकुमारवृक्षे ॥ रक्तकरवीरे ॥ श्येनपक्षिणि ॥ कङ्कखगे ॥ कृन्तति । कृती छेदने । कृतेश्छ क्रू चेति रक् प्रत्ययो धातोः क्रूरादेशश्च ॥ न । नक्षत्रविशेषेषु ॥ पूर्वात्रयं याम्यमघे उग्रं क्रूरं कुजस्तथेत्युक्तेः ॥

क्रूरकर्मा । पुं । कटुतुम्बीवृक्षे । कटुतुम्बिन्याम् ॥ त्रि । भयानककर्मकर्तरि ॥

क्रूरगन्धः । पुं । गन्धके ॥

क्रूरगन्धा । स्त्री । कन्थार्याम् । तीक्ष्णकण्टकायाम् ॥

क्रूरदृक् । पुं । शनैश्चरे ॥ त्रि । पिशुने ॥

क्रूरधूर्तः । पुं । कृष्णधत्तूरके ॥

क्रूरप्रसादनः । पुं । शशे ॥

क्रूररावी । पुं । द्रोणकाके ॥

क्रूरलोचनः । पुं । शनौ । शनैश्चरे ॥

क्रूरसत्त्वः । पुं । व्याघ्रादौ ॥

क्रूरा । स्त्री । रक्तपुनर्नवायाम् ॥

क्रूराकृति: । पुं । रावणे ॥ त्रि । भया नका ऽऽकारे ॥ क्रूरा आकृतिर्यस्य ॥

क्रेणि: । पुं । क्रयणे ॥

क्रेतव्य: । त्रि । क्रयार्हे । क्रेयवस्तुनि ॥

क्रेता । त्रि । क्रयकर्त्तरि ॥ यथा । के ता तव गुणारामान् विनिमयेति भवति वा । मूल्यं दत्त्वापि नाप्नो ति स्वाकरं सन्निधिस्थित: इति ॥ क्रीणाति । डुक्रीञ् द्रव्यविनिमये । तृन् तृच् वा ॥

क्रेय: । त्रि । क्रेतव्यमात्रके । वह्ने प्रसा रणयोग्ये ॥ क्रीयते । डुक्रीञ् ० । अचोयत् । गुण: ॥ क्रीमने योग्यव स्तु इति भाषा ॥

क्रोड: । पुं । अङ्के ॥ उदग्रामे ॥ शूक रे ॥ वाराहीकन्दे ॥ न । स्त्री । अङ्के । भु जान्तरे ॥ रचति ॥ क्रुड्यते । क्रुड वा स्ये । घञ् ॥ क्रुडनम् । क्रुडघनत्वे । घञ्वा ॥ क्रोडो ऽस्यास्ति । अर्श आदिभ्यो ऽच् वा ॥

क्रोडकन्या । स्त्री । वाराहीकन्दे ॥

क्रोडपत्रक: । पुं । मुस्तके ॥

क्रोडचूडा । स्त्री । महाश्रावणिकावृ क्षे ॥

क्रोडपर्णी । स्त्री । कण्टकारिकायाम् ॥

क्रोडमाद: । पुं । कच्छपे ॥

क्रोडा । स्त्री । अश्वानां मुरसि ॥ भु जान्तरे ॥

क्रोडाङ्घि: । पुं । कच्छपे । कमठे ॥

क्रोडी । स्त्री । वाराहीकन्दे ॥

क्रोडीकरणम् । न । आलिङ्गने ॥

क्रोडीकृत: । त्रि । विषयीकृते ॥

क्रोडीकृति: । स्त्री । आलिङ्गने । संग्र हणे ॥

क्रोडीमुख: । पुं । गण्डके । खड्गे । गैं डा इति भाषा ॥

क्रोडेष्टा । स्त्री । मुस्तायाम् ॥

क्रोथ: । पुं । हनने ॥

क्रोध: । पुं । अमर्षे । कोपे ॥ स्वपरापका रस्फूर्त्तिहेतु अभिज्वलनात्मके ऽ न्त:करणवृत्तिविशेषे । परानिष्टाभि लाषे । अनिष्टविषयद्वेषे । चेतोवि कार विशेषे । नेत्ररौद्रित्वादिहे तौ दोष विशेषे ॥ क्रोधान्धा: किंन कु र्वन्ति ॥ स्वकृत्यं क्रोध एवकथयति । भस्मीकरोमि भुवनं बधिरीकरोमि धीरं सचेतन मचेतनतां नयामि । कृत्यं न पश्यति नचात्महितं शृणो ति धीमा नपीति मपि च प्रतिसन्द धातीति ॥ क्रोधवशेन सर्वकार्य्यं भवति अधैर्य्यं भवति हृदयशून्यता च भवतीतिभाव: । न मतिरूत्पद्यता ति भगवत्तर्प्पणे: ॥ ॥ अत्रैव

यक्रोधविजये समर्थो निर्विवेकिनः ॥ क्रोधकार्यं विभङ्गायेतिशकुनेशास्त्रम् । क्रोधनम् । क्रुधकोपे । भावे घञ् ॥ ३८ वत्सरे ॥ विषमस्थं जगत्सर्वं व्याकुलंसमुदाहृतम् । जनानां जायतेभद्रे क्रोधे क्रोधः परस्परम् ॥

क्रोधजः । पुं । मोहे ॥ क्रोधाद्भवतिसम्मोहइतिस्मृतेः ॥ त्रिधाव्यसनान्तर्गते व्यसनगणे ॥ यथा । पैशुन्यं साहसं द्रोह ईर्ष्या ऽसूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोष्टकइति ॥ क्रोधाज्जायते । जनी॰डः ॥

क्रोधनः । त्रि । कोपिनि । अमर्षणे । क्रोधविशिष्टे ॥ क्रोधशीलः । क्रुध॰ । क्रुधमण्डेतियुच् ॥ ५९ वत्सरे ॥ रोगोमरणदुर्भिक्षंविरोधोबहुसङ्कुलः । क्रोधेतुविषमंसर्वंसमाख्यातंवरप्रिये ॥

क्रोधना । स्त्री । कोपवत्यांस्त्रियाम् । भामिन्याम् ॥ क्रुध्यतितच्छीला । क्रुध॰ । युच् । टाप् ॥

क्रोधमूर्च्छितः । पुं । चोरनामगन्धद्रव्ये ॥ त्रि । अतिकोपने ॥

क्रोधरात्रिः । स्त्री । चैत्रायेनवरात्रे ॥ क्रोधरात्रिर्महेशानी चैत्रीयंनवरात्रकमित्यागमात् ॥

क्रोधी । त्रि । क्रोधसंयुक्ते । क्रोधने ॥ महिषे ॥ क्रोधोस्त्यस्य । इनिः ॥

क्रोशः । पुं । अष्टसहस्रहस्तपरिमाणे । दण्डसहस्रमितये । इतिलीलावती ॥ चतुःसहस्रहस्तपरिमाणे । सहस्रधनुषि । गव्यूतेः कोस इतिभाषा । इतिहेमचन्द्रः ॥ मुहूर्ते ॥ यथा । दशदण्डेतु या पूजा तत् सर्वमक्षयं भवेत् । षष्ठक्रोशे महेशानि तत् सर्वं मस्तोपमम् ॥ सप्तमक्रोशकेदेवि सर्वं चौरोपमं भवेत् । अष्टमक्रोशके देविद्रव्यतुल्यं न संशयः ॥ अतः परं महेशानि विषतुल्यं न संशयइति गुप्तसाधनतन्त्रे ६ पटलः ॥

क्रोशतालः । पुं । ढक्कायाम् ॥

क्रोशध्वनिः । पुं । ढक्कायाम् ॥

क्रोशयुगम् । न । गव्यूतौ । गोरुते । क्रोशद्वये ॥ क्रोशयोर्युगम् ॥

क्रोष्टा । पुं । शृगाले ॥ क्रोशति । क्रुश आह्वाने । सितनिगमीतितुन् । तृज्वत् क्रोष्टुः ॥

क्रोष्टुकपुच्छिका । स्त्री ।
क्रोष्टुकमेखला । स्त्री ।
क्रोष्टुपुच्छी । स्त्री ।
} पृश्निपर्ण्याम् । गोलोमिकायाम् ॥

क्रोष्टुफलः । पुं । इङ्गुदीवृक्षे ॥

क्रोष्टुविन्ना । स्त्री । पृश्निपर्ण्याम् ॥ क्रोष्टुभिर्विन्ना भिन्ना दारितेवदलेनेतिवा ॥

क्रोष्टुः । पुं । श्वेतेचौ ॥

क्रोष्ट्री । स्त्री । शृगालिकायाम् ॥ कृष्णविदार्याम् ॥ लाङ्गल्याम् ॥ शुक्लविदार्याम् ॥ क्रोशति । क्रुश आह्वाने । सितनिगमीति तुन् । स्त्रियाञ्चेति तृज्वत् । ऋन्नेभ्य इति ङीप् ॥

क्रौञ्चः । पुं । कोँचबक इतिगौडभाषाप्रसिद्धे पक्षिणि । क्रुञ्च ॥ ढोँक इतिलोकप्रसिद्धे शरद्विहङ्गे ॥ पर्वतविशेषे ॥ कुररपक्षिणि ॥ अर्हतांध्वजे ॥ दैत्यविशेषे ॥ दधिमण्डोदसमुद्रेणावृते षोडशलक्षयोजनपरिमिते द्वीपविशेषे । इतिश्रीभागवतम् ॥ क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे । स्कन्देन युद्धा सुचिरं चित्रमायी सुमायिना ॥ तमेव तस्य दैत्यस्य ख्यात श्चित्रेण कर्मणा । केतुतामगमत् तस्य नाम्ना क्रौञ्चःसउच्यते इतिमृगेन्द्रसंहिता ॥ क्रुञ्चति । क्रुञ्च० । ऋत्विगादिनाकिन् । प्रज्ञाद्यण् ॥

क्रौञ्चदारणः । पुं । कार्त्तिकेये ॥ दारयति । दृविदारणे । ण्यन्ताल्ल्युः । क्रौञ्चस्य गिरिविशेषस्य दारणः ॥

क्रौञ्चनिसूदनः । पुं । क्रौञ्चमर्द्दने । षडानने । कार्त्तिकेये ॥

क्रौञ्चा । स्त्री । क्रौञ्चखगस्य भार्य्यायाम् ॥ राज्याम् ॥

क्रौञ्चादनम् । न । घेञ्चुली घेँचु इति गौडभाषाप्रसिद्धे घेञ्चुलिकायाम् ॥ चिञ्चोटके । चेँचर्का इतिगौडभाषा ॥ मृणाले ॥ पिप्पल्याम् ॥

क्रौञ्चादनी । स्त्री । पद्मबीजे ॥

क्रौञ्चारण्यम् । न । जनस्थानात् क्रोशत्रयान्तरे दण्डकारण्यपार्श्ववर्त्तिन्यरण्ये ॥

क्रौञ्चारातिः । पुं । कार्त्तिकेये । कुमारे ॥ क्रौञ्चस्य अरातिः ॥ परशुरामे ॥

क्रौर्य्यम् । न । कोपजायांमनोवृत्तौ ॥ क्रूरत्वे ॥

क्रौशशतिकः । पुं । भिक्षौ ॥ क्रोशशतादभिगमनमर्हति । ततोभिगमनमर्हतीति ठञ् ॥ त्रि । शतक्रोशगमनकर्त्तरि ॥ क्रोशशतङ्गच्छति । क्रोशशतयोजनशतयोरिति ठञ् ॥

क्लमः । पुं । [illegible] । श्रमे ॥ योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः । क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः ॥ ग्लानौ ॥ क्लमनम् । क्लमुग्लानौ । घञ् । नोदात्तोपदेशस्येतिनवृद्धिः ॥

क्लमथः । पुं । क्लमे ॥ क्लमनम् । क्लमु० । शमादिभ्योऽथच् ॥

क्लान्तः। त्रि। क्लमि-क्त। म्लाने। श्रान्ते॥

क्लिन्नः। त्रि। आर्द्रे। भीजा इति भाषा॥ क्लिद्यति स्म। क्लिदू आर्द्रीभावे। अकर्मकत्वात् कर्त्तरि क्तः॥

क्लिन्नाक्षः। त्रि। रोगादिना क्लिन्नचक्षु षि। चिल्ले॥ क्लिन्ने अक्षिणी यस्य। बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्॥

क्लिशितः। त्रि। क्लिष्टे। क्लेशान्विते॥ क्लिश्यते स्म। क्लिश उपतापे क्लिशू विबाधने वा। क्तः। क्लिशः क्त्वानिष्ठयोरिति वेट्॥ न। अन्योन्यपराहते वचसि॥

क्लिष्टम्। न। पूर्वापरविरुद्धे वचसि। परस्परपराहते। सङ्कुले॥ त्रि। क्लेशिते। क्लेशयुक्ते॥ क्लिश्यते स्म। क्लिश॰। क्लिशू॰ वा। क्तः। क्लिशः क्त्वानिष्ठयोरिति पक्षे इडभावः॥

क्लिष्टिः। स्त्री। क्लेशे॥ सेवायाम्॥

क्लीतकम्। न। [illegible]॥

क्लीतनकम्। न। मधुयष्ट्याम्॥ क्लीबत्वम्। क्लीबस्य धर्म्मे। भावे त्वः। [illegible] क्लीतम [illegible] ति। [illegible]। गुरादिभ्यो णिच्चेति णिजभावः। [illegible] क्लीतिकः॥

क्लीतकिका। स्त्री। नीलिकायाम्॥ क्लीत

[illegible] कः। [illegible] कल्पितकमितिकम्॥

क्लीतनकम्। न। मधुयष्टिकायाम्॥

क्लीबः। पुं। न। नपुंसके। तृतीया प्रकृतौ॥ तल्लक्षणं यथा। न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति। मेढ्रञ्चोन्मादशुक्राभ्यां हीनः क्लीबः स उच्यते इति॥ त्रि। निरुत्साहे॥ क्लीबते। क्लीबृ अधार्ष्ट्ये। इगुप धेति कः। अयमोष्ठ्योपधः। [illegible] [illegible] पाठस्तु [illegible] [illegible]॥ [illegible] निवृत् साहे॥

क्लृप्तः। त्रि। रचिते। कल्पिते॥ [illegible] ते। निर्म्मिते॥

क्लेदः। पुं। पूतीभावे॥ यथा। [illegible] तस्य पक्वस्य [illegible] [illegible]। [illegible] तस्यैव क्लेदो [illegible] [illegible]॥ क्लेदनम्। क्लिदू आर्द्रीभावे। घञ्॥

क्लेदा। पुं। चन्द्रे॥ [illegible]। क्लिदू॰। [illegible] पूषन् [illegible] दिति [illegible] प्रत्ययः॥

क्लेदनः। पुं। कफे॥ पञ्चप्रकारश्लेष्मान्तर्गतश्लेष्मविशेषे॥ न। आर्द्रीकरणे॥

क्लेदुः। पुं। [illegible] [illegible]। [illegible]

सिवसिच्यसिक्लिदिवन्धिमनिभ्यश्चे
त्युः । क्लिन्दति वा । क्लिदि परिदेव
ने ॥

क्लेशः । पुं । दुःखे ॥ कोपे ॥ व्यवसाये ॥
रोगादौ ॥ अविद्यास्मितारागद्वेषा
भिनिवेशेषु ॥ तत्र विद्याविरोधिनी
अविद्या । अहं ममेत्यहङ्कारो ऽ
स्मिता । इच्छाविशेषो रागः । वै
रभावो द्वेषः । मरणभय मभिनि
वेशः ॥ क्लिश्यन्त्यनेन । क्लेशनं वा ।
क्लिशू विबाधने । घञ् । अकर्त्तरि ॥

क्लेशकः । पुं । क्लेशशीले ॥ क्लिश्यते
तच्छीलः । क्लिश उपतापे क्लिशू०
वा । निन्दहिंसक्लिशखादविनाशप
रिक्षिपपरिरटपरिवादिव्याभाषासू
यो वुञ् इति वुञ् ॥

क्लेशापहः । पुं । पुत्रे ॥ क्लेशमपहन्ति
इति विग्रहे अपे क्लेशतमसोरिति
अपपूर्वाद्धन्तेः क्लेशकर्मोपपदे डः प्र
त्ययः ॥

क्लेशितः । त्रि । क्लेशयुक्ते ॥

क्लैतकिकम् । न । मद्ये ॥

क्लैब्यम् । न । [illegible] -
पौरुषे । निष्पौरुषत्वे ॥ क्लीबस्य भा
वः कर्म वा । ष्यञ् ॥

क्लोम । न । फुप्फुसे । औदर्यजलाधा
रे । तिलके ॥ वाग्भटो द्वयोर्मध्यवच्च:

तन्मध्ये हृदयम् तत्पार्श्वे क्लोम पिपा
सास्थानमिति वैद्याः । अधस्तु दक्षि
णे भागे हृदयात् क्लोम तिष्ठति ।
जलवाहि शिरामूलं तृष्णाच्छादन
कं मतम् ॥ एतत्तु वातरक्तजम् ।
तदुक्तं वृद्धवाग्भटेन । रक्तादनिल
संयुक्तात् कालेयकसमुद्भवः इति ॥
क्लवते । ग्लुङ्गतौ । मनिन् ॥

क्व । अ । कुत्रेत्यर्थे । कहाँ इति भाषा ॥
कस्मिन् । किमोऽदिति प्रत्यये क्वा
तीति किमः कादेशः ॥ अत्र क्वास
म्भावनायां कथं प्रयुज्यते ॥ द्वौ क
शब्दौ महदन्तरं सूचयतः ॥

क्वचन । अ । क्वचिदर्थे ॥

क्वचित् । अ । कस्मिंश्चित्काले ॥ कस्मिं
श्चिद्देशे ॥ कदाचिदर्थे ।

क्वणः । पुं । वीणायाः क्वणिते । निक्वा
णे ॥ ध्वनिमात्रे ॥ कटकादिभूषण
शब्दे ॥ शब्दकरणे ॥ क्वणनम् । क्वण
शब्दे । क्वणो वीणायाञ्चेत्यप् ॥

क्वणनम् । न । वीणायाः क्वणिते । क
णे ॥ क्वणो वीणायाञ्चेत्यपभावे ल्यु
ट् ॥ पुं । कण्डिकासुते । छोटीहांडी
इति भाषा । मञ्जुमङ्गट इति पर्वती
यभाषा इति त्रिकाण्डशेषः ॥

क्वथितः । त्रि । अतिशयपक्वव्यञ्जनद्र
व्यादौ । निष्पक्वे । कषाये । [illegible]

। काढ़ा इति भाषा ॥ क्वथ्यते स्म । क्वथनिष्पाके । क्तः । इट् ॥

क्वथिता । स्त्री । कढ़ी इति प्रसिद्धव्यञ्जने ॥ यथा । स्थाल्यां घृते वा तैले वा हरिद्रां हिङ्गु भर्जयेत् । अवलेहेन संयुक्तं तक्रं तच्चैव निःक्षिपेत् ॥ एषा सिद्धा समरिचा क्वथिता कथिता बुधैः । क्वथिता पाचनी रुच्या लघ्वी वह्निप्रदीपनी ॥ कफानिलविबन्धघ्नी किञ्चित् पित्तप्रकोपनी ॥ अन्ये तक्रमत्स्याः शुष्का वा किञ्चित् क्वथितसंयुताः । रुचका रोचना वृष्या बल्या वातगदापहाः ॥ कोष्ठशुद्धिकराः शुक्ताः किञ्चित् पित्तप्रकोपनाः । अर्द्दिते तद्वनुस्तम्भे विशेषेण हिताः स्मृता इति ॥

क्वाथः । पुं । क्वथे ॥ क्वणो वीणायाञ्चेत्यब्भावे पाक्षिको घञ् ॥

क्वाथः । पुं । अतिदुःखे ॥ व्यसने ॥ द्रव्यस्य निष्पाके ॥ तुर्य्यांशशेषपक्वे ॥ यथा । क्वाथ्ये विचूर्णितं क्षिप्त्वा तत् षोडशगुणम्पचेत् । पादशेषं प्रकर्त्तव्य मेष क्वाथविधिः स्मृतः ॥ क्वाथ्यमानं तोयं त्रिविधम् । पादावशेषम् । अर्द्धावशेषम् । त्रिपादावशेषञ्च । अस्य नाम पारिभाषिकमुष्णोदकम् । तत्र पादावशेषं कफनाशकं लघु अग्निवर्द्धकञ्च । अर्द्धावशेषं पित्तनाशकम् । त्रिपादावशेषं वातनाशकम् । तेषां मध्ये त्रिपादावशेषं जलं हेमन्ते शिशिरे च प्रशस्तम् । वसन्ते पादावशेषम् । शरदि ग्रीष्मे चार्द्धावशेषम् । वर्षायामष्टभागावशेषं जलं प्रशस्तम् ॥ दिनपक्वं जलं रात्रौ गुरु रात्रिपक्वं जलं दिवा गुरु भवतीति विवेकः ॥

क्वाथोद्भवम् । न । कर्प्परीम् । कृत्रिमरसाञ्जने ॥

क्षः । पुं । संवर्त्ते ॥ राक्षसे ॥ नरसिंहे ॥ विद्युति ॥ क्षेत्रे ॥ नाशे ॥ क्षेत्रपाले ॥ एकपञ्चाशन्मातृकावर्णानामन्तिमवर्णे ॥ अस्य ककारषकारसंयोगजन्यत्वेन पृथग्वर्णत्वं केचिन्न मन्यन्ते । तेषां मते तन्त्रोक्तपञ्चाशद्वर्णानुपपत्तिरागमोक्तदीक्षादौ क्षकारस्य मेरुत्वेन कथनानुपपत्तिश्च । तस्मात् क्षकारस्य पृथग्वर्णत्वं मन्तव्यम् । यथोक्तमागमे । अकारादि लकारान्ता वर्णाः पञ्चाशदीरिताः । संयोगात् कषयोरेष क्षकारो मेरुरीरित इति ॥ तथापि मेदिनीहेमचन्द्रादिकोषानुरोधात् कषसंयोगजत्वेन कादिवर्णमध्ये लिखितः ॥

क्षणः । पुं । पर्व्वणि ॥ उत्सवे ॥ यथा । क्षणेऽस्याः कुसुमितेयमिति ॥ व्यापारे ॥ व्यापारविकलत्वे । निर्व्यापारस्थितौ ॥ अवसरे ॥ परतन्त्रतायाम् ॥ मध्ये ॥ अनेकसंख्यामानविशेषे । त्रिंशत्कलापरिमितेकाले । द्वादशपलपरिमिते ॥ उत्सवे ॥ निमेषक्रियावच्छिन्नस्य कालस्य चतुर्थभागे ॥ यथा । आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिभिः । सचेत् तु विफलो याति कानो हानिस्ततोऽधिकेति ॥ क्षणोतिदुःखम् । क्षणु हिंसायाम् । अच् ॥

क्षणक्षेपः । पुं । क्षणविलम्बे ॥

क्षणदः । पुं । गणके ॥ न । जले ॥ क्षणं ददाति । डुदाञ् । आत इति कः ॥

क्षणदा । स्त्री । निशि । रात्रौ ॥ क्षणमुत्सवं निर्व्यापारस्थितिं वा ददाति । कः । टाप् ॥ हरिद्रायाम् ॥

क्षणनम् । न । वधे ॥ क्षणोतेर्भावे ल्युट् । त्यागे । दाने ॥

क्षणनिःश्वासः । पुं । शिशुमारे ॥ क्षणे निःश्वासोऽस्य ॥

क्षणप्रभा । स्त्री । विद्युति ॥ क्षणं प्रभा यस्याः ॥

क्षणभङ्गः । पुं । क्षणनाशे ॥

क्षणभङ्गुरः । त्रि । क्षणेकनाश्ये ॥ दृष्टनष्टे ॥

क्षणिकः । त्रि । अनित्ये ॥ क्षणमात्रस्थायिनि ॥

क्षणिकत्वम् । न । तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वे ॥ यथा । आकाशे शब्दस्य प्रथमक्षणे उत्पत्तिः द्वितीयक्षणे स्थितिः तृतीयक्षणे विनाशः ॥

क्षणिका । स्त्री । तडिति । विद्युति ॥

क्षणिनी । स्त्री । निशि ॥

क्षतम् । न । ईर्म्मे । व्रणे । स्वचरक्तपूयादौ । घाव इतिभाषा ॥ क्षणनम् । क्षणु० । नपुंसके भावे क्तः । अनुदात्तोपदेशस्येत्यादिना नलोपः ॥ खण्डिते ॥ क्षतग्रहे ॥ नष्टे ॥

क्षतकासः । पुं । पञ्चविधकासरोगान्तर्गतकासरोगविशेषे ॥

क्षतघ्नः । पुं । कुक्रौंधा इतिप्रसिद्धे क्षुपविशेषे ॥ क्षतं हन्ति । हन० । हस्तेरमनुष्येत्यादिना टक् ॥

क्षतघ्नी । स्त्री । द्रुमामये । लाक्षायाम् ॥ टित्वात् ङीप् ॥

क्षतजम् । न । रक्ते । रुधिरे ॥ पूये ॥ क्षताज्जातम् । जनी० । पञ्चम्यामिति डः ॥

क्षतजतृष्णा । स्त्री । शस्त्रादिक्षतयुक्तस्य पिपासायाम् ॥

क्षतविध्वंसी । पुं । वृद्धदारकवृक्षे ॥

क्षतव्रणः । पुं । षट्प्रकारव्रणरोगान्तर्गतव्रणरोगविशेषे ॥

क्षतव्रतः । त्रि । ध्वस्तव्रते । अवकीर्णिनि । खण्डितब्रह्मचर्यादिव्रते ॥ क्षतं खण्डितं व्रतमस्य ॥

क्षतहरम् । न । अगुरुणि ॥ त्रि । क्षतघ्ने ॥

क्षतिः । स्त्री । क्षते ॥ अपचये । क्षये । घटती इति भाषा ॥ यथा । जलमुचि सितरश्मिविमुखे का क्षतिरस्य खिलाम्बुपातृणाम् । केवलमघमरसभक्षी चातकपक्षी कमाश्रयतीत्युद्भटः ॥

क्षतोदरः । पुं । उदररोगविशेषे ॥

क्षत्ता । पुं । शूद्रात् क्षत्रियायामुत्पन्ने ॥ शूद्रादायोगवः क्षत्ता चण्डालश्चाधमो नृणाम् । वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः ॥ प्रतीहारे ॥ सारथौ ॥ भुजिष्यातनये । दासीपुत्रे ॥ नियुक्ते ॥ वेधसि ॥ क्ष इति क्षयते स्म । क्षदिः सौत्रः संभृतौ । तृन्तृचौशंसिक्षदादिभ्यः संज्ञायां चानिटौ ॥ क्षत्तार्यशूद्रयोः सुत इत्यमरः ॥

क्षत्त्रः । पुं । क्षत्रिये ॥ न । तगरे ॥ शरीरे ॥ क्षदति । क्षदसंवरणे सौत्रः । गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः ॥ क्षतात् त्रायते वा । सुपीति योगविभागात् कप्रत्ययः । पृषोदरादित्वात् पूर्वपदस्याकारलोपः ॥ यद्वा । क्षणनम् । क्षण हिंसायाम् । सम्पदादित्वात् क्विप् । गमादित्वादनुनासिकलोपः । तुक् । क्षतो नाशात् त्रायते । त्रैङ् पालने । सुपीति योगविभागात्कः ॥ क्षत्रियजातेः कर्मणि ॥

क्षत्रबन्धुः । पुं । क्षत्रियजातिर्दैन्ये ॥ निन्द्यक्षत्रिये । अधिक्षिप्तक्षत्रिये ॥ क्षत्रस्य क्षत्रियजातेर्बन्धुरेवाऽनुष्ठानाभावादिति जातिक्षत्रियोऽधिक्षिप्यते ॥

क्षत्रविद्या । स्त्री । धनुर्वेदे ॥

क्षत्रवृक्षः । पुं । मुचुकुन्दे ॥

क्षत्रियः । पुं । सत्त्वोत्कर्षरजःप्रधानायां जातौ । मूर्द्धाभिषिक्ते । राजन्ये । बाहुजे ॥ क्षदति रक्षति जनान् । क्षदेः ष्ट्रन् । गुधृवीपच्यादिना त्रो वा । क्षतात् त्रायते वा । सुपीति योगविभागात् कप्रत्ययः । पृषोदरादिः ॥ यद्वा क्षदति क्विबन्तोपपदात् त्रायतेः कप्रत्ययः । क्षत्रस्यापत्यम् । क्षत्राद्घः ॥ क्षत्रं [illegible] कर्मणे [illegible]प्रयत्नसंयुतः । [illegible] [illegible] क्षत्रियजाते ॥ पाणि

-या: सूर्य्यचन्द्रवंशजा राजान: । ते च कलेः सहस्रवर्षपर्य्यन्तमासन् । ततो महानन्दिसुतो नन्दः शूद्रायां सुतः शतवर्षपर्य्यन्तं राज्यं चकार । स हन्ते चाणक्यनामा ब्राह्मणो नन्दं तत्पुत्रांश्च हत्वा मुरवंशजं चन्द्रगुप्तं राजानं कृतवान् । कलौ नन्दान्तः क्षत्रियवंशः । इति श्रीभागवते १२ स्कन्धे १ ऽध्यायात् संगृहीतम् ॥

क्षत्रिया । स्त्री । क्षत्रियाण्याम् ॥ मर्व्व क्षत्रियार्य्यां वा स्वार्थे इत्यानुगागमाभावपक्षे ॥ क्षत्रियजातौ ॥ योपधत्वान्न ङीष् ॥

क्षत्रियाणी । स्त्री । क्षत्रियजातीयायाम् ॥ अर्य्यक्षत्रियाभ्यामिति पाक्षिक आनुगागमो ङीषश्च ॥

क्षत्रियी । स्त्री । क्षत्रियये।षायाम् ॥ क्षत्रियस्य स्त्रीत्यर्थे पुंयोगादाख्यायामिति ङीष् ॥

क्षन्तव्यः । त्रि । क्षमणीये ॥

क्षन्ता । त्रि । क्षमायुक्ते । सहिष्णौ ॥ क्षमते । क्षमूष० । तच्छीलः । तृन् ॥

क्षपणः । त्रि । निर्लज्जे ॥ इति त्रिकाण्डशेषः ॥

क्षपणकः । पुं । बुद्धभेदे । दिगम्बरसिद्धान्ते ॥ सन्न्यासिनि ॥ यथा । एकः क्षपणक आकाशस्तो नत्र क्षपणक इव आकाशा । यत्र क्षपणक इव आकाशा तत्र क्षपणक का आकाशा ॥ इत्युद्भटः ॥

क्षपण्युः । पुं । अपराधे ॥

क्षपयिता । त्रि । नाशयितरि ॥ क्षपयति । क्षै० । तृच् ॥

क्षपा । स्त्री । निशि । रात्रौ ॥ क्षपयित चेष्टाम् । क्षैक्षये । अस्मादप्रत्ययात् पचाद्यच् ॥ हरिद्रायाम् ॥

क्षपाकरः । पुं । चन्द्रे । नक्षत्रेशे ॥ क्षपां करोति । कृञोहेतुताच्छील्यानुलोम्येषु इति टः ॥ कर्पूरे ॥

क्षपाचरः । पुं । राक्षसे ॥

क्षपाटः । पुं । राक्षसे ॥ क्षपायामटति । अट० । पचाद्यच् ॥

क्षपितः । त्रि । दूरीकृते ॥ नाशिते ॥ विस्मृते ॥

क्षमम् । न । युक्ते ॥ त्रि । शक्ते ॥ हिते ॥ क्षमावति ॥ पुं । धूसरे ऽतिवृद्धे चटके । धान्यभक्षणे ॥ क्षमते क्षम्यते वा । क्षमूषसहने । पचाद्यच् । घञ्वा । नोदात्तोपदेशस्येति न वृद्धिः ॥

क्षमणीयः । त्रि । क्षन्तव्ये ॥ क्षमेरनीयर् ॥

क्षमता । स्त्री । योग्यतायाम् । सामर्थ्ये ॥ अर्थप्रकाशनसामर्थ्ये ॥ यथा

। वर्हिर्देवसदनं दामीत्यत्र दामीति पदस्य छेदनप्रकाशनसामर्थ्यात् वर्हिरित्यस्य शास्त्रतदर्भप्रकाशनसामर्थ्यात् शास्त्रतदर्भच्छेदने समुदायसमर्थस्येति योगो ऽवगम्यते ॥ इति धर्मदीपिका ॥

क्षमा । स्त्री । भूमौ ॥ तितिक्षायाम् । क्षान्तौ । सत्यपि सामर्थ्ये परिभवहेतुं प्रति क्रोधस्यानुत्पत्तौ आक्रुष्टस्य ताडितस्य वा निर्विकारचित्ततायाम् । हर्षविषादरहितो ऽविकृतचित्ततायाम् ॥ तल्लक्षणं यथा । बाह्ये चाध्यात्मिके चैव दुःखे चोत्पादिते क्वचित् । न कुप्यति न वा हन्ति सा क्षमा परिकीर्त्तितेति ॥ अपि च । आक्रुष्टो ऽभिहतो यस्तु नाक्रोशेन्न हनेदपि । अदुष्टैर्वाङ्मनःकायैः तितिक्षुः स क्षमा स्मृतेति ॥ क्रोधजेतुं क्षमामेव मन्यन्ते खलु साधवः । यथाऽहसा । क्रोधान्धकारविकटभ्रुकुटीतरङ्ग-भीमस्य सान्ध्यकिरणारुणघोरदृष्टेः । निष्कम्पनिर्मलगभीरपयोधिधीरा धीराः परस्य परिवादगिरः क्षमन्ते ॥ क्रमेण वाचां गिरसो मयूखैर्न चित्ततापेन तनोर्विमर्दः । न चापि हिंसादिरनर्थयोगः श्लाघ्या परं क्रोधजये ऽक्षमेकेति ॥ क्रोधजयो पाय

मप्याह । क्रुद्धे स्मेरमुखावधीरणमयाविष्टे प्रसादक्रमो व्याक्रोशे कुशलोक्तिरात्मदुरितच्छेदोत्सवस्ताडने । धिगज्ञो रजितात्मनोऽक्षमवती दैवादुपेता विपत् दुर्वारेति दयारसार्द्रमनसां क्रोधस्य कुत्रोदय इति ॥ स्वधर्मचिन्तामपहाय योऽयं मत्पापमूर्द्धाभिसमुत्सृजन्तः । नचेत् क्षमामप्यवलम्ब्य कुर्य्यां मत्तः कृतघ्नो वद कोऽपरोऽन्यः ॥ इति च ॥ क्षमते । अज नाम क्षमेटाप् ॥ क्षमणम् । षित्त्वादङ् वा ॥ खदिरे ॥

क्षमादंशः । पुं । शिग्रौ ॥

क्षमावान् । त्रि । क्षान्तियुक्ते ॥ यथा । एकः क्षमावतां दोषो द्वितीयो नोपपद्यते । यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ इति गारुडे ११४ अध्यायः ॥

क्षमिता । त्रि । क्षमाशीले ॥ क्षमणशीलः । क्षमूष० । तृन् । स्वरतीति वेट् ॥

क्षमी । त्रि । क्षमितरि । तितिक्षौ । सहिष्णौ ॥ क्षमते तच्छीलः । क्षमूष० । शमित्यष्टाभ्यो घिनुण् । नोदात्तोपदेशस्येति वृद्धिप्रतिषेधः ॥ खेसरे । अश्वतरे । खच्चर इति भाषा ॥

क्षयः । पुं । कासरोगविशेषे । "यक्ष्मणि । क्षेपे ॥ क्षयति देहम् । क्षि क्षये । क्षिनिवासगत्योर्वा । अन्तर्भावितण्यर्थात् क्षियः एरच् । क्रियाक्षयकरत्वात्तु क्षय इत्युच्यते बुधैः ॥ अस्यौषधम् । यथा । श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम् । त्रिसप्ताहं प्रपीतं क्षयरोगं क्षयं नयेत् । रोगभावे ॥ वेश्मनि । निवासे ॥ संवर्त्ते । कल्पान्ते ॥ क्षीयन्ते प्राणिनोऽत्र ॥ अपचये । हानौ ॥ क्षयणम् । क्षयः ॥ नीतिवेदिनां त्रिवर्गान्तर्गते प्रक्रमवर्गे ॥ स तु राज्ञामपवर्गस्थापचयः ॥ यथा । क्षयः स्थानञ्च वृद्धिश्च त्रिवर्गो नीतिवेदिनामित्यमरः ॥ ध्वंसे । शरीरसामर्थ्यस्य धनस्य सेनायाश्च नाशे ॥ पश्चिमोत्तरद्वारगृहे ॥ विरामे ॥ हिंसायाम् ॥ क्षीयर्हिंसायाम् । एरच् ॥ धातुक्षयहेतौ ॥ क्षीयते ऽनेनेति "पुंसि संज्ञायामिति घः" ॥ ६० वत्सरे ॥ मेदिनी क्षयते देवि सर्वभूतं चराचरम् । देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजाः ॥ सौराष्ट्रमालवे देशे दक्षिणे कोङ्कणे तथा । दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ॥ कौमुदीधर्मनन्दोऽस्य यमुनानाम् नर्मदातटे । विन्ध्याद्यां सैन्धवे चापि

विन्ध्ये प्रविशति संशयः ॥ सिंहलं मध्यदेशञ्च काश्मीरं तथैव च । क्षये क्षयन्ति सर्वाणि मान्यथा...

क्षयतरुः । पुं । बेखियापीपर इति प्रसिद्धे नन्दीवृक्षे । स्थालीवृक्षे ॥

क्षयथुः । पुं । कासे ॥

क्षयनाशिनी । स्त्री । जीवन्तीवृक्षे ॥

क्षयपक्षः । पुं । कृष्णपक्षे ॥

क्षयमासः । पुं । रविसङ्क्रान्तिद्वयसहितमासे ॥ यथा । द्विसङ्क्रान्तिमासः क्षयाख्योमासः स च कदाचिदेव भवति । स च कार्त्तिकादित्रये नान्यतः स्यात् तदा वर्षमध्येऽधिमासद्वयं स्यादिति ॥ अपि चाह कालिदासः । सौराद्दा चान्द्रमसो गरीयान् मासो द्विसङ्क्रान्तिरसौ क्षयाख्यः । स यस्तदा स्यात् क्षितिवेदरूपे १४१ रब्दे मिते क्वाचिदिन्दुचन्द्रैरिति ॥

क्षयितः । त्रि । नाशिते ॥

क्षयी । त्रि । नाशिनी ॥ क्षयशीलः । जिष्णुक्षिविश्रीण्वमाव्यथाभ्य मपरिभूप्रसूभ्यश्चेति इनिः ॥ राजयक्ष्मान्विते ॥ क्षयोऽस्यास्ति । अतइनिठनाविति इनिः ॥

क्षय्यः । त्रि । क्षेतुं शक्ये ॥ क्षि० । अचो यत् । क्षय्यजय्यौ शक्यार्थे ॥

क्षरः । पुं । मेघे ॥ विनाशिनि कार्यरा

शे ॥ येयः । कार्यकारणरूपन्तु नश्वरं क्षरमुच्यते। क्षराद्विरुद्धधर्मत्वादक्षरं ब्रह्म भण्यते इति ॥ क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यत इतिच ॥ न । नीरे । जले ॥ क्षरति । क्षर सञ्चलने । पचाद्यच्

क्षरणम् । न । च्युतौ । चूवना इति भाषा ॥

क्षरितः । त्रि । च्युते । चूवा गिरा इतिच भाषा ॥

क्षरी । पुं । वर्षाकाले ॥ त्रि । क्षरणविशिष्टे ॥

क्षवः । पुं । क्षुते । छिक्कायाम् । छींक इति भाषा ॥ राजिकायाम् ॥ राजिकाप्रभेदे ॥ क्षौति । टुक्षु शब्दे । अच्यर्थः । पचाद्यच् ॥ क्षवणम् । ऋदोरप् वा ॥

क्षवकः । पुं । राजिकायाम् ॥ अपामार्गे ॥ भूताङ्कुशे ॥

क्षवकृत् । स्त्री । छिक्कन्याम् ॥ क्षवङ्करोति । कृञः क्विप् ॥

क्षवथुः । पुं । क्षुते ॥ कासे ॥ क्षौत्यनेन । टुक्षु० । ट्वितोऽथुच् ॥

क्षवपत्रा । स्त्री । द्रोणपुष्प्याम् ॥ क्षवः पत्रेषु यस्याः ॥

क्षविका । स्त्री । दन्तीप्रभेदे । पीत[illegible]ायाम् । पुत्रप्रदायाम् । बहुफलायाम् ॥

क्षात्रम् । त्रि । क्षत्रियसम्बन्धिनि ॥

क्षात्रकर्म्म । न । क्षत्रियजातेः कर्म्मणि ॥ यथा । शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रं कर्मस्वभावजमिति ॥ क्षात्रञ्च तत् कर्म्मचेति विग्रहः ॥

क्षान्तः । त्रि । सहिष्णौ । सोढे ॥ केनचित् पीडितोऽपि यः समर्थः सन् तत्पीडापराङ्मुखस्तस्मिन्नित्यर्थः ॥ क्षम्यते स्म । क्षमूष० । क्तः । अनुनासिकस्येति दीर्घः ॥

क्षान्तिः । स्त्री । क्षमायाम् । तितिक्षायाम् । क्रोधप्राप्तौ चित्तसंयमने । सत्यपि सामर्थ्ये अपकारिण्यपकाराचिकीर्षायाम् ॥ यथा । क्षमायाञ्ज संवक्रे क्रमसो भास्करोदयः । क्षान्तिः काले रघौघस्य नामसङ्कीर्त्तनं हरेरिति ॥ क्षमणम् । क्षमू सहने । दिवादिः । अस्याषित्त्वात् क्तिन् । अनुनासिकस्येति दीर्घः ॥ तुल्यमानेऽपि परुषं नोत्तरं प्रतिपद्यते ॥

क्षान्तुः । त्रि । क्षमाशीले । मर्षके ॥ क्षाम्यति । क्षमू० । क्रमिगमिक्षमिभ्यस्तुन् वृद्धिश्च ॥

क्षामः । त्रि । क्षीणे ॥ अबले ॥ क्षै क्षये । गत्यर्था कर्मकेत्यादिना क्तः ।

क्षायोम इति निष्ठातत्त्वम् । आदेच उपदेशेऽशितीत्यात्त्वम् ॥

क्षामवती । स्त्री । } यागविशेषे ॥ क्षामवतीष्टिः । स्त्री । } यथोक्तम्भविष्ये । क्षामवत्यादिना यद्वत् कर्म्मणां पृतनापते । दैवदोषादकरणे जाते दोषकदम्बके ॥ होमेनैकेन दोषाणां सर्व्वेषां क्षयमादिशेत् । एवञ्च एकप्रायश्चित्तेनानेकदोषक्षयाय क्षामवतीष्टिः सर्व्वत्रदृष्टान्तः । इति प्रायश्चित्ततत्त्वम् ॥

क्षामास्यम् । न । अपथ्ये । अहिते । रोग्ये ॥ त्रि । क्षीणवदने ॥ क्षाममास्यं यस्य । क्षाम क्षतदास्यञ्चेति वा ॥

क्षारः । पुं । खार इति प्रसिद्धे रसे ॥ धूर्त्ते ॥ लवणे ॥ काचे ॥ भस्मनि ॥ गुडे ॥ न । टङ्कणे ॥ यवक्षारे ॥ विड्लवणे ॥ सर्ज्जिकाक्षारे ॥ पलाशधवपूतीककरञ्जपाटलादिजाः । क्षाराः स्युः पाचनाः सर्व्वे रक्तपित्तकराः सराः ॥ गुल्मार्शःकृमिपुंस्त्वघ्नाः शर्कराऽश्मरिनाशनाः इति राजवल्लभः ॥ क्षरति । क्षर सञ्चलने । ज्वलिति कसन्तेभ्यो णः । उपधावृद्धिः ॥

क्षारकः । पुं । पक्षिमत्स्यादिपिटके ॥ जालके । नवकलिकावृन्दे ॥ क्षरति । क्षर० । ण्वुल् ॥ पक्ष्यादिदामे ॥

क्षारकर्द्दमः । पुं । नरकविशेषे ॥

क्षारतैलम् । न । पक्वतैलविशेषे ॥ यथा । शुष्कमूलकशुण्ठीनां क्षारो हिङ्गुलनागरम् । शतपुष्पावचाकुष्ठं दारुशिग्रुरसाञ्जनम् ॥ सौवर्च्चलं यवक्षारं सामुद्रं सैन्धवं तथा । भुजग्रन्थिविडं मुस्तं मधुशुक्तं चतुर्गुणम् ॥ मातुलुङ्गरसञ्चैव कदलीरसमेव च । तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ॥ वाधिर्य्यङ्कर्णनादश्च पूयस्रावश्च दारुणः । पूरणादस्य तैलस्य कृमयः कर्णयोःविन्दाः ॥ क्षिप्रं विनाशमायान्ति शशाङ्ककृतशेखर । क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम् ॥ इति गारुडे १९८ अध्यायः ॥

क्षारत्रयम् । न । त्रिविधक्षारे ॥ यथा । सर्ज्जिकञ्च यवक्षारं टङ्कणक्षारमेव च । क्षारत्रयञ्च विख्यातं क्षारत्रितयमेव च ॥

क्षारदला । स्त्री । चिल्ल्याम् । चुक्रवास्तूकशाके ॥ क्षारो दलेष्वस्याः ॥

क्षारदशकम् । न । दशविधक्षारे ॥ यथा । शिग्रुमूलकपलाशचुक्रिकाचित्रकार्द्रकसनिम्बसम्भवैः । इक्षुगोक्षुरिकमोक्षकोद्भवैः क्षारपूर्व्वदशकं प्रकीर्त्तितम् ॥

क्षारद्रुः । पुं । घण्टापाटलिवृक्षे ॥

क्षारद्वयम् । न । सर्जिकायावशूकयोः ॥ क्षारयोर्द्वयम् ॥

क्षारपत्रः । पुं ।
क्षारपत्रकः । पुं । } वास्तूकशाके ॥

क्षारभूमिः । पुं । समुद्रोपान्तदेशे ॥ यथा । जीवनं जीवनं हन्ति प्राणान् हन्ति समीरणः । किमाश्चर्यं क्षारभूमौ प्राणदा यमदूतिका ॥ स्त्री । लवणभूमौ ॥

क्षारमध्यः । पुं । अपामार्गे ॥

क्षारमृत्तिका । स्त्री । ऊषे ॥ क्षाराचासौमृत्तिकाच ॥

क्षारमेलकः । पुं । क्षारसङ्घे ॥

क्षारवृक्ष । पुं । मुष्कके ॥

क्षारश्रेष्ठः । पुं । पलाशे । किंशुके ॥ मुष्ककवृक्षे ॥ न । वज्रक्षारे ॥

क्षारषट्कम् । न । षड्विधक्षारे ॥ यथा । धवापामार्गकुटजपलाशतिलमुष्ककैः । क्षारै रेतैस्तु मिलितैः क्षारषट्कमुदाहृतम् ॥

क्षारसिन्धुः । पुं । लवणसमुद्रे ॥ स तु जम्बुद्वीपस्यदक्षिणे शाकद्वीपस्यपार्श्वेवर्त्तते ॥

क्षाराच्छम् । न । सामुद्रलवणे ॥

क्षाराब्धिः । पुं । क्षारसिन्धौ ॥

क्षाराष्टकम् । न । अष्टप्रकारक्षारे ॥ यथा । पलाशवज्रिशिखरिचिञ्चार्कतिलनालजाः । यवजः सर्जिका चेति क्षाराष्टकमुदाहृतम् ॥ क्षारा एतेऽग्निनातुल्याः शूलगुल्महराभृशमिति ॥ क्षाराणामष्टकम् ॥

क्षारिका । स्त्री । भोगपिपासिकायाम् । क्षुधायाम् ॥

क्षारितः । त्रि । स्राविते ॥ क्षारे ॥ अभिशस्ते । अपवादग्रस्ते । प्राप्तदोषे ॥ क्षार्य्यते स्म । क्षर० । णिजन्तः । क्तः ॥

क्षारोदः । पुं । लवणोदे ॥ क्षारमुदकं यस्मिन् । उत्तरपदस्यचेत्युदकस्योदादेशः ॥

क्षालनम् । न । निर्णेजने । प्रक्षालने ॥

क्षालितम् । त्रि । धौते । निर्णिक्ते । कृत प्रक्षालने ॥

क्षिः । पुं । निवासे ॥ गतौ ॥ क्षये

क्षितः । त्रि । हिंसिते ॥ क्षिधातोः कर्मणि क्तः ॥

क्षितिः । स्त्री । निवासे ॥ मेदिन्याम् ॥ महालयेक्षयं यातिक्षितिस्तेन प्रकीर्त्तिता ॥ क्षये ॥ रोचनाख्यगन्धद्रव्ये ॥ क्षियति । क्षिनिवासगत्योः । क्तिच्क्तौचेतिक्तिच् ॥ क्षयणम् क्षीयतेऽस्यांवा । क्षिक्षये । क्षिनिवासगत्योः । स्त्रियांक्तिन् ॥ कालभेदे । प्रलयकाले ॥

क्षितिकणः । पुं । } धूलौ । रजसि ॥
क्षितकणा । स्त्री । }

क्षितिक्षमः । पुं । खदिरद्रुमे ॥

क्षितिक्षित् । पुं । क्षितीशे ॥ क्षितिङ्क्षियति । क्षि० तुदादिः । क्विपि तुक् । क्षितिपतिष्वेवासौ क्षितिक्षिदितिभट्टमल्लः ॥

क्षितिजः । पुं । उपरसविशेषे । भूनागे ॥ मङ्गलग्रहे ॥ दृक्षे । महीरुहे ॥ क्षितेर्जातः । जनी० । डः ॥ न । खगोले आकाशमध्यावच्छिन्नशान्तरे तिर्य्यग्वृत्ते ॥ त्रि । भूमिजाते ॥

क्षितिजन्तुः । पुं । भूनागे ॥ क्षितेर्जन्तुरिव ॥

क्षितिधरः । पुं । पर्वते ॥ कूर्मवासुकिदिग्गजेषु च ॥

क्षितिनागः । पुं । उपरसविशेषे । भूनागे ॥

क्षितिनाथः । पुं । राजनि ॥

क्षितिपः । पुं । भूपतौ ॥

क्षितिपतिः । पुं । नृपे । भूपे ॥

क्षितिपालः । पुं । भूपाले । राज्ञि ॥

क्षितिपालभाक् । पुं । राजनि ॥

क्षितिपुत्रः । पुं । नरकराजे । नरकासुरे ॥

क्षितिरन्ध्रम् । न । अवटे ॥ क्षितेः रन्ध्रम् ॥

क्षितिरुहः । पुं । वृक्षे ॥ रोहति । रुह० । इगुपधत्वात्कः । क्षितौ रुहः । सप्तमीतिसमासः ॥ क्षितौ रोहति वा । रुहेरिगुपधेतिकः ॥

क्षितिवदरी । स्त्री । भूवदर्य्याम् । भाडवेरी इतिभाषा ॥

क्षितिवर्द्धनः । पुं । शवे ॥ त्रि । भूमिवर्द्धके ॥

क्षितिव्युदासः । पुं । भुंइरा इतिप्रसिद्धे भूमिगृहे ॥

क्षितिसुतः । पुं । भौमे ॥ नरकासुरे ॥

क्षितीशः । पुं । राज्ञि ॥ श्रीरामे ॥ क्षितेर्भूमेरीशः ॥

क्षित्यदितिः । स्त्री । देवक्याम् ॥

क्षित्त्वा । पुं । वायौ ॥ क्षयति क्षियति वा ॥ क्षिक्षये क्षिनिवासगत्योर्वा । शीङ्क्रुशीत्यादिनाक्वनिपतुक् ॥ काले ॥

क्षिपः । पुं । क्षेपणे ॥ क्षेप्तरि ॥ क्षिपेरिगुपधेतिकः ॥

क्षिपकः । त्रि । योधे ॥ क्षिपति । क्षिपप्रेरणे । इगुपधज्ञाप्रीकिरःकः । ततोऽज्ञातादौकः ॥ स्त्री । क्षिपका । क्षिपकादीनाञ्चेतीत्त्वाभावः ॥

क्षिपणम् । न । क्षेपणे । क्षिपायाम् ॥

क्षिपणिः । स्त्री । नौकादण्डे ॥ आयुधे ॥ वडिशे ॥ क्षिप्यते ऽनयेति वा ।

क्षिपेःकर्मण्यनिः । निपुणमिक्षेपणमिति वेदभाष्यम् ॥

क्षिपणी । स्त्री । क्षेपणम् । नौकादण्डे ॥ कृदिकारादिति ङीष् ॥

क्षिपणुः । पुं । वायौ ॥ क्षिपति । क्षिप० । अनुङ्नदेश्चेतिचकारात् क्षिपेरप्यनुङ् ॥

क्षिपण्युः । पुं । वसन्ते । इण्यजुज्वलदन्तः ॥ देहे ॥ त्रि । सुरभौ ॥

क्षिपा । स्त्री । क्षेपणे ॥ क्षेपणम् । क्षिप० । भिदाद्यङ् । टाप् ॥

क्षिप्तः । त्रि । प्रेरिते ॥ निक्षेपकृतवस्तुनि । त्यक्ते । नुत्ते । नुन्ने ॥ विकीर्णे ॥ अवज्ञाते ॥ न । रागद्वेषादिवशाद्विषयेष्वभिनिविष्टे चित्ते । चित्तस्यप्रथमभूमौ ॥ क्षिप्यते स्म । क्षिप० । क्तः ॥ वायुग्रस्ते ॥

क्षिप्तकुक्कुरः । पुं । अलर्के ॥

क्षिप्ता । स्त्री । रात्रौ ॥ इतिहलायुधः ॥

क्षिप्नुः । त्रि । निराकरिष्णौ । निराकरणशीले ॥ क्षेपणशीलः । क्षिप० । त्रसिगृधिधृषिक्षिपेःक्नुः ॥

क्षिप्रम् । न । शीघ्रे ॥ नवद्वयारविंशमात्रासंज्ञायाम् ॥ पुष्याश्विन्यभिजिद्धस्तालघु क्षिप्रं गुरु तथा ॥ क्षिप्यति । क्षिप० । स्फायितञ्चीति रक् ॥ शीघ्रार्थे क्रियाविशेषणत्वाद

द्रव्येवर्त्तमानःक्लीबे । द्रव्येतु त्रिलिङ्गः ॥ शीघ्रगेच ॥

क्षिप्रकारी । त्रि । शीघ्रप्रयोक्तरि ॥

क्षिप्रपाकी । पुं । गन्धमुण्डे । गर्दभाण्डे । गेंडीतिभाषाप्रसिद्धेवृक्षे । गन्धभादालिया इतिगौडभाषा ॥ त्रि । शीघ्रपाकिनि ॥

क्षिया । स्त्री । अवन्तीसखवाहिन्यांसरिति ॥

क्षिया । स्त्री । अपचये । क्षये ॥ क्षिचये । क्षिनिवासगत्योर्वा । भिदाद्यङ् । टाप् ॥

क्षीजनम् । न । कीचकानां नादे ॥

क्षीणः । त्रि । अमांसे । दुर्बले । क्षामे ॥ क्षिक्षये । क्तः । निष्ठायामण्यदर्थे इतिदीर्घः । क्षियोदीर्घादितिनः ॥ धर्मार्थे क्षीणकोशस्य क्षीणत्वं मपिशोभते । सुरैः पीतावशेषस्य कृष्णपक्षे विधोरिवेति कामन्दकः ॥

क्षीणचन्द्रः । पुं । विनष्टन्दभयाष्टम्योर्मध्यस्थेन्दौ ॥ यथा । कृष्णाष्टमीदृश्या दृष्ट्वं यावच्छुक्लाष्टमीदलम् । तावत् कालंशशीक्षीणः पूर्णस्तत्रोपरि स्मृतइति ॥

क्षीणवान् । त्रि । क्षयविशिष्टे ॥

क्षीणाष्टकर्मा । पुं । जिने ॥

क्षीयमाणः । त्रि । अपक्षीयमाने ॥

क्षीरम् । न । जले । वारिणि ॥ दुग्धे । पयसि ॥ शाकाम्लफलपिण्याकमूलकं लवणं तथा विष्टः । करीरदधिमाषैश्च प्रायः क्षीरं विरुध्यते ॥ स्निग्धं शीतं गुरु क्षीरं सर्वकालं न सेवयेत् । दीप्ताग्निं कुरुते मन्दं मन्दाग्निं नाशयेदपि च ॥ क्षीरं न भुञ्जीत कदाप्यसमं तसम्नैतल्लवणेन सार्द्धम् । पिष्टान्नसन्धानकमाषमुद्गकोषातकीकन्दफलादिकैश्च ॥ तथा च । मत्स्यमांसगुडमुद्गमूलकैः कुष्ठमावहति सेवितं पयः । शाकजाम्बवरसादिसेवितं मारयत्यवुध माशु सर्पवत् ॥ क्षिणोति । क्षि निवासगत्योः । कृसिक्षिचिमीनाद्दीर्घश्चेति क्रन्दीर्घश्च ॥ यद्वा । घसते । घस्लृ अदने । घसेः किच्चेतीरन् । गमहनेत्युपधालोपः । खरि चेति चर्त्वम् । शासिवसीति षत्वम् ॥ यद्वा क्षयणम् । क्षीषु हिंसायाम् । सं० क्विप् । क्षियम् ईरयति । ईर गतौ । ण्यन्तः । कर्मण्यण् ॥

क्षीरकः । पुं । क्षीरमोरटलतायाम् ॥

क्षीरकञ्चुकी । स्त्री । क्षीरीशवृक्षे ॥

क्षीरकण्ठः । पुं । } बालके । स्तन
क्षीरकण्ठकः । पुं । } न्धये ॥

क्षीरकन्दः । पुं । क्षीरविदार्याम् ॥

क्षीरकन्दा । स्त्री । क्षीरवल्ल्याम् । कामरूपदेशप्रसिद्धे इति गौड भाषा ॥

क्षीरकाकालिका । स्त्री । क्षीरविदार्याम् । क्षीरशुक्लायाम् ॥ पयस्याकाकोलीम् ॥

क्षीरकाकोली । स्त्री । अष्टवर्गपठितौषधिविशेषे । जीवदल्याम् ॥ यस्मी क्षीरकाकोली सा काकोली । सद्दशीच सा ॥ दुग्धिकाभेदे । शुक्लकाकोल्याम् ॥ पयस्याकाकोलीम् । अपराख्याने ऽश्वगन्धामूलम् ॥

क्षीरकाण्डकः । पुं । स्नुह्याम् ॥ अर्कवृक्षे ॥

क्षीरकाष्ठा । स्त्री । वटीवृक्षे ॥

क्षीरकीटः । पुं । दुग्धजातकीटे । कालिकायाम् ॥

क्षीरखवः । पुं । क्षिरगोखा इति गौड भाषा प्रसिद्धे दुग्धपाषाणे ॥

क्षीरजम् । न । दधनि । मक्खने ॥ क्षि । क्षीरजातद्रव्ये ॥

क्षीरदलः । पुं । अर्कवृक्षे ॥ क्षीरवल्लिद्रव्यान्तरे ॥

क्षीरद्रुमः । पुं । अश्वत्थे । पिप्पले ॥

क्षीरधेनुः । स्त्री । दानार्थं क्षीरनिर्मितायां गवि ॥

क्षीरनाशः । पुं । आखोटवृक्षे ॥ दुग्धक्षये ॥

क्षीरनीरम् । न । आलिङ्गने ॥ जलदुग्धसमाहृतौ ॥

क्षीरपर्णी । स्त्री । अर्कवृक्षे । विकीरणे ॥

क्षीरपायी । त्रि । दुग्धपानकर्त्तरि ॥

क्षीरमोचकः । पुं । शोभाञ्जने ॥

क्षीरमोरटः । पुं । मोरटे । मधुस्रवे । क्षीरमोरटा इति गौड भाषा प्रसिद्धायां लतायाम् ॥

क्षीरवल्ली । स्त्री । क्षीरविदार्य्याम् ॥ क्षीरवतीवल्ली ॥

क्षीरविकृतिः । स्त्री । क्षीरसा इति गौडभाषाप्रसिद्धायां कूर्च्चिकायाम् ॥ दध्ना सह पयःपक्वं यत् तत् स्याद् दधि कूर्च्चिका । तक्रेण पक्वं यत् क्षीरं स भवेत् तक्रकूर्च्चिका ॥ क्षीरस्य विकृतिः ॥

क्षीरविदारिका । स्त्री । क्षीरविदार्य्याम् ॥

क्षीरविदारी । स्त्री । शुक्लभूकुष्माण्डे । महाश्वेतौषधौ ॥ क्षीरवतीविदारी ॥ शुक्लकृष्णभूकुष्माण्डयोः ॥ क्षीरकन्दो द्विधा प्रोक्तो विनालस्तु सनालकः । विनालो रोगहर्त्ता स्याद्वयस्थश्च सनालकः ॥

क्षीरविषाणिका । स्त्री । क्षीरकाकोल्याम् ॥ वृश्चिकाल्याम् ॥

क्षीरवृक्षः । पुं । राजादन्याम् ॥ उदुम्बरे ॥

क्षीरशरः । पुं । आमिक्षायाम् । छाना इति गौडभाषा ॥

क्षीरशाकम् । न । दुग्धविकृतौ ॥ अपक्वमेव यन्नष्टं क्षीरशाकं हितं पयः ॥

क्षीरशीर्षः । पुं । श्रीवासे ॥

क्षीरशुक्ला । स्त्री । क्षीरकाकोल्याम् ॥ क्षीरविदार्य्याम् ॥

क्षीरशुक्लः । पुं । जलकण्टके । शृङ्गाटके । सिंघाडा इतिभाषा ॥ राजादने ॥

क्षीरशुक्ला । स्त्री । शुक्लभूकुष्माण्डे ॥ विदार्य्याम् । क्षीरकाकोलिकायाम् । कृष्णभूकुष्माण्डे ॥ क्षीरसितशुक्ला ॥

क्षीरसः । पुं । क्षीरसारे ॥

क्षीरसन्तानिका । स्त्री । छाना इति नष्टक्षीर इति गौडभाषाप्रसिद्धे दुग्धविकारविशेषे । क्षीरसन्तानिका वृष्या स्निग्धा पित्तानिलापहा ॥

क्षीरसमुद्रः । पुं । क्षीराब्धौ ॥ अयं श्वेतद्वीपे वर्त्तते ॥

क्षीरसागरः । पुं । क्षीरसमुद्रे ॥

क्षीरसागरसुता । स्त्री । लक्ष्म्याम् ॥

क्षीरसारः । पुं । पालजिन्न इति भाषा प्रसिद्धे क्षीरविशेषे । क्षीरसे ॥ यथा । ईषच्छ्लेष्मकरं गौल्यं पित्तघ्नं तर्पणं गुरु । पुष्टिरेषाभिधा तस्य क्षीरसारस्तु क्षीरसः ॥ इति रा० नि० ॥ नवनीते ॥ यथा । क्षीरसारमपनीय शङ्कया स्वीकृतं यदि पलायनं त्व

या । मानसे मम नितान्ततामसे मन्दमन्दम कथं न क्षीयसे क्षीरस्य सारः ॥

क्षीरसिन्धुः । पुं । क्षीरार्णवे ॥

क्षीरस्फटिकः । पुं । क्षीरवर्णस्फटिकविशेषे ॥

क्षीरडिण्डीरः । पुं । दुग्धफेने । शार्करे ॥

क्षीरा । स्त्री । काकोल्याम् ॥

क्षीराब्धिः । पुं । क्षीरसागरे ॥ क्षीरस्य अब्धिः ॥

क्षीराब्धिजः । पुं । चन्द्रे । इन्दौ ॥ शेषे ॥ तार्क्ष्ये ॥ अमृतादिसमूहे ॥ न । सामुद्रलवणे ॥ मौक्तिके ॥

क्षीराब्धिजा । स्त्री । इन्दिरायाम् । लक्ष्म्याम् ॥ क्षीराब्धेर्जाता । जनी० । डः ॥

क्षीराब्धितनया । स्त्री । रमायाम् । लक्ष्म्याम् ॥ क्षीराब्धेः तनया ॥

क्षीरामृतम् । न । मधुरमांसे ॥

क्षीराविका । स्त्री । क्षीराव्याम् ॥

क्षीरावी । स्त्री । दुद्धीतिप्रसिद्धौषधौ । दुग्धिकायाम् ॥ क्षीरमवति । अव रक्षणादौ । कर्मण्यण् । ङीप् ॥

क्षीराह्वः । पुं । सरलद्रुमे ॥

क्षीरिका । स्त्री । राजादने । फलाध्यक्षे । खिरणी इतिभाषा ॥ क्षीरिकायाः फलं वृष्यं बल्यं स्निग्धं हिमगुरु । तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयास्रजित् ॥ अपिच । क्षीरिकायाः फलं पक्वं गुरु विष्टम्भि शीतलम् । कषायं मधुरं साम्लं नातिवातप्रकोपनम् ॥ क्षीरमस्त्यस्याः । अतइनिठनाविति ठन् ॥ परमान्ने । पायसे । खीर इतिभाषा ॥ यथा । शुद्धेऽर्द्धपक्वे दुग्धे तु घृताक्तांस्तण्डुलान् पचेत् । ते सिद्धाः क्षीरिकाख्याता सा सिताज्ययुतोत्तमा ॥ क्षीरिका दुर्जरा बल्या धातुपुष्टिप्रदा गुरुः । विष्टम्भिनी हरेत् पित्तरक्तपित्ताग्निमारुतान् ॥ नालिकेरक्षीरिकातु प्रोच्यते शास्त्रतोमया ॥ नालिकेरं तनूकृत्य छिन्नं पयसि गोः क्षिपेत् । सितागव्याज्यसंयुक्तं तत् पचेत् मृदुनाग्निना ॥ नालिकेरोद्भवा क्षीरी स्निग्धा शीता तिपुष्टिदा । गुर्वी सुमधुरा वृष्या रक्तपित्तानिलापहा ॥ एवं कुष्माण्डमज्जादीं स्तथा वंशाङ्कुरानपि । कदलीनां फलान्मूलान् कर्त्तव्या क्षीरिका बुधैरिति ॥ नारङ्गक्षीरिणीम्पश्य ॥

क्षीरिणी । स्त्री । काञ्चनक्षीरीलतायाम् । तिक्तदुग्धायाम् । पीतदुग्धायाम् । हिमाद्रिजायाम् ॥ क्षीरिणी तिक्ता शीता च रेचना शोफनाशनुत् ।

कृमिदोषकफमेह पित्तज्वरहराप रा ॥ क्षीरकाकोल्याम् ॥ दुग्धिकायाम् ॥ क्षुद्दुग्धिकायां मेषशृङ्ग्यां ॥ गम्भार्याम् ॥ क्षीरमस्त्यस्याम् । इन् । ङीप् ॥

क्षीरी । पुं । क्षुद्राम्लाम् ॥ अर्कवृक्षे ॥ राजादने ॥ दुग्धपाषाणे ॥ वटे ॥ प्लक्षे ॥ सोमवल्ल्याम् ॥ क्षीरोत्थे ॥ क्षीरमस्य अस्मिन् वा । अतइनिठनाविती निः ॥

क्षीरिवृक्षः । पुं । स । क्षीरयुक्तवृक्षपञ्चके ॥ यथा । न्यग्रोधोदुम्बराश्वत्थपारिशप्लक्षपादपाः । पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम् ॥ केचित्तु पारिशस्थाने शिरीषं वेतसं परे । वदन्तीति विशेषः ॥ क्षीरिवृक्षा हिमा वर्ण्या योनिरोगव्रणापहाः । रूक्षाः कषाया मेदोघ्ना विसर्पामयनाशनाः ॥ शोथपित्तकफास्रघ्नाः स्तन्या भग्नास्थियोजकाः । एषां त्वक्गुणाः । त्वक्पञ्चकं हिमं ग्राहि व्रणशोथविसर्पजित् । तेषां पत्रगुणाः । तेषां पत्रं हिमञ्च ग्राहि कफवातास्रनुल्लघु । विष्टम्भाध्मानजित् तिक्तं कषायं लघु लेखनमिति राजनिर्घण्टः ॥

क्षीरी । स्त्री । क्षीरिवृक्षे ॥ शियालगोवा इति गौडभाषाप्रसिद्धे वृक्षे । दुग्धपाषाणे । वज्राके ॥ दुग्धिकायाम् ॥

क्षीरीशः । पुं । क्षीरकञ्चुकी इति गौडप्रसिद्धे क्षवकृदे ॥

क्षीरेयी । स्त्री । पायसे ॥ यथा । क्षीरेय पायसं प्रोक्तं परमान्नञ्च सूरिभिरिति हलायुधः ॥

क्षीरोदः । पुं । दुग्धसमुद्रे । क्षीराब्धौ ॥ क्षीरमुदकं यस्मिन् । उत्तरपदस्य चेत्युदकस्योदादेशः ॥

क्षीरोदतनया । स्त्री । लक्ष्म्याम् । श्रियाम् ॥ क्षीरोदस्य तनया ॥

क्षीरोदतनयापतिः । पुं । विष्णौ ॥

क्षीरोदतनयः । पुं । चन्द्रे ॥

क्षीवः । त्रि । मत्ते ॥ क्षीवते स्म । क्षीवृ मदे । अकर्मकत्वात् कर्तरि क्तः । अनुपसर्गात् फुल्लक्षीवेति साधुः । कोवा ॥

क्षीवा । त्रि । मत्ते ॥ वाहुलकात् कनिन् ॥

क्षुः । पुं । सिंहे ॥

क्षुणः । पुं । अरिष्टवृक्षे ॥

क्षुण्णः । त्रि । अभ्यस्ते ॥ प्रहते । चूर्णीकृते । सम्पिष्टे ॥ क्षुदेः क्तः ॥

क्षुत् । स्त्री । क्षुते । क्षवे । छिक्कायाम् ॥ क्षवणम् । टुक्षु शब्दे । सं० क्विप् । तुक् ॥ बलिनाक्षुतं सकृत् ॥

क्षुतम् । न । नासिकातः सशब्दवायोर्निःसरणे । क्षवे ॥ क्षवणमक्षुतम् ।

नित्यं प्रशस्तं कार्येष्विदुरतश्चासन्ने तु वासे भयं याम्यामग्निभयं सुरद्विषिकाशिर्त्तीभिःसमुद्रावये । वायव्यां धनधान्यसलिलं दिग्वाभ्रमाणो तरे ऐशान्यां मरणं भुवंमिगदितं दिग्भूतचांसलने ॥ ज्येष्ठीकृते क्षुतेऽप्येव मूक्षुःकिंचिन्न कोविदाः ॥ आसने शयने दाने भोजने वस्त्रसङ्ग्रहे । विवादेच विवाहेच क्षुतं सततं शोभनम् ॥ असंस्कृतमुखस्य क्षुत्निषेधो यथा । नासंवृतमुखः कुर्यात् हास्यं जृम्भां तथा क्षुतम् ॥ यत्तु क्षुतं चलनयते क्षुतेमेवं तदेव चि ॥ त्रि । प्राणादिनातोच्चारीकृते ॥ क्षवणम् । टुक्षु शब्दे । भावे क्तः ॥

क्षुतकः । पुं । राजिकायाम् ॥

क्षुताभिजननः । पुं । कृष्णसर्षपे । राई इति भाषा ॥ क्षुतमभिजनयति । नन्द्यादित्वात् ल्युः ॥

क्षुत्करी । स्त्री । सर्पाक्ष्याम् ॥

क्षुत्पिपासे । स्त्री । द्वि० । लोभमायें योः ॥ यथा । क्षुत्पिपासे लोभभार्ये धन्येमान्येचपूजिते । याभ्यांव्याप्तं जगत्सर्वं नित्यंचिन्तातुरं भवेदिति ॥ चिन्तातुरम् क्षुत्पिपासा नाशकाभावात्चिन्तातुरमित्यर्थः ॥

क्षुद्रः । त्रि । अधमे ॥ क्रूरे ॥ कृपणे ॥ अल्पे ॥ दरिद्रे ॥ इत्यमरविश्वौ ॥ क्षुणत्ति । क्षुदिर् सम्पेषणे । स्फायितञ्चीतिरक् ॥

क्षुद्रकण्टकारी । स्त्री । अग्निदमन्याम् ॥

क्षुद्रकण्टकी । स्त्री । इक्षुकाम् ॥

क्षुद्रकण्टारिका । स्त्री । क्षुपविशेषे । अग्निदमन्याम् ॥

क्षुद्रकण्टिका । स्त्री । कण्टकारिकायाम् ॥

क्षुद्रकम्बुः । पुं । शङ्खनखे । शम्बूके ॥

क्षुद्रकारवेल्ली । स्त्री । कारवेल्लविशेषे । कारवेल्ल्याम् । वनकरेला इतिभाषा ॥

क्षुद्रकारविका । स्त्री । क्षुद्रकारवेल्ल्याम् ॥ इतिराजनिर्घण्टः

क्षुद्रकुलिशः । पुं । न । वैक्रान्तमणौ ॥

क्षुद्रकुष्ठम् । न । स्वल्पकुष्ठरोगे ॥ तदेकादशविधं यथा । एकं कुष्ठं स्मृतं पूर्वं गजचर्मततः परम् । ततश्च सिध्मं प्रोक्तं ततश्चापिविचर्चिका ॥ विपादिकाभिधाचैवपामा कच्छूस्ततःपरा । ततोदद्रुश्चविस्फोटः किटिभञ्चततः परम् ॥ ततश्चालसकंप्रोक्तं शतारुश्च ततः परम् । क्षुद्रकुष्ठानि चैतानि कथितानि भिषग्वरैरिति ॥

क्षुद्रखदिरः । पुं । दुष्खदिरे ॥

क्षुद्रगोक्षुरकः । पुं । छोटागोखुरू इति

भाषा प्रसिद्धे निकराटके ॥

क्षुद्रघण्टिका । स्त्री । किङ्किण्याम् । घुं घरू कैंधनी कर्धनी इति च भाषा ॥ घण्टेव । इवेतिकन् । यद्वा । घण्टयति घण्टतिवा । घटिदीप्तौ । ण्वुल् । क्षुद्रा चासौ घण्टिका च ॥

क्षुद्रघोली । स्त्री । चिविल्लिकाक्षुपे ॥

क्षुद्रचञ्चुः । पुं । क्षुपविशेषे । त्वक्सारभेदिन्याम् ॥ स्त्री । पक्षिणां स्वल्पचञ्च्वाम् ॥

क्षुद्रचन्दनम् । न । रक्तचन्दने ॥

क्षुद्रचिर्भिटा । स्त्री । गोपालकर्कट्याम् । कचरी इति भाषा ॥

क्षुद्रचूडः । पुं । शरबलखगे । गृधखगे ॥

क्षुद्रजन्तुः । पुं । स्वल्पजन्तौ ॥ आनकुलात् क्षुद्रजन्तवः । क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः । शतं वा प्रसृतौ येषाञ्च केचिदानकुलादपि ॥ क्षुद्रश्चासौ जन्तुश्च ॥ शतपद्याम् ॥

क्षुद्रजम्बूः । स्त्री । भूमिजम्ब्वाम् । ह्रस्वफलायाम् ॥

क्षुद्रजातीफलम् । न । आमलके ॥

क्षुद्रजीरकम् । न । कणजीरके । सुगन्धे ॥

क्षुद्रजीवा । स्त्री । जीवन्त्याम् ॥

क्षुद्रतुलसी । स्त्री । अर्जके ॥

क्षुद्रदंशी । स्त्री । क्षुद्रदंशिकायाम् । छोटाडांस इति भाषा । मसड् इति पर्वतीय भाषा ॥

क्षुद्रदुःस्पर्शा । स्त्री । अग्निदमन्याम् ॥

क्षुद्रदुरालभा । स्त्री । स्वल्पदुरालभायाम् । मरुस्थायाम् । मरुसम्भवायाम् ॥

क्षुद्रदुस्पर्शा । स्त्री । अग्निदमन्याम् ॥

क्षुद्रधात्री । स्त्री । कर्कटवृक्षे ॥

क्षुद्रधान्यम् । न । कङ्ग्वादिकुधान्ये । तृणधान्ये ॥ क्षुद्रधान्य मनुष्णं स्यात् कषायं लघु लेखनम् । मधुरं कटुकं पाके रूक्षञ्च क्लेदशोषकम् ॥ वातकृद्बद्धविट्कञ्च रक्तपित्तकफापहम् ॥

क्षुद्रनासिकः । त्रि । स्वल्पनासायुक्ते । नःक्षुद्रे ॥

क्षुद्रपद्मा । स्त्री । चाङ्गेर्याम् ॥

क्षुद्रपत्री । स्त्री । वचायाम् ॥ इति राजनिर्घण्टः ॥

क्षुद्रपनसः । पुं । डहौ । लकुचे ॥ क्षुद्रश्चासौ पनसश्च ॥

क्षुद्रपर्णः । पुं । अर्जके ॥ त्रि । स्वल्पपर्णे ॥

क्षुद्रपाषाणभेदा । स्त्री । क्षुपविशेषे । चतुष्पत्र्याम् । कन्दरोद्भवायाम् । शैलोद्भवायाम् ॥

क्षुद्रपिप्पली । स्त्री । वनपिप्पल्याम् ॥

क्षुद्रपोतिका । स्त्री । मूलपोत्याम् ॥

क्षुद्रफलः । पुं । } जीवद्रुमे । जी
क्षुद्रफलकः । पुं । } वनवृक्षे ॥

क्षुद्रफला । स्त्री । इन्द्रवारुण्याम् । गवादन्याम् ॥ गोपालकर्कट्याम् ॥ कण्टकार्य्याम् ॥ अग्निदमन्याम् ॥ भूमिजम्ब्वाम् ॥

क्षुद्रभण्टाकी । स्त्री । वृहत्याम् । कण्टकार्याम् ॥

क्षुद्रमत्स्यः । पुं । छोटीमछ्लीतिलोकप्रसिद्धमत्स्ये । क्षुद्रमत्स्याः स्वादुरसा दोषत्रयविनाशनाः । लघुपाका रुचिकराः सर्वदाते हितामताः ॥ अतिसूक्ष्माः पुंस्त्वहराः रुच्याः कासानिलापहाः ॥

क्षुद्रमुस्ता । स्त्री । कसेरुकन्दे ॥

क्षुद्ररोगः । पुं । द्विचत्वारिंशद्भेदभिन्ने भावप्रकाशोक्ते स्वल्पव्याधौ ॥

क्षुद्रवर्वणा । स्त्री । वरटायाम् ॥

क्षुद्रवल्ली । स्त्री । मूलपोत्याम् ॥

क्षुद्रवारुणी । स्त्री । सुरायाः प्रभेदे ॥

क्षुद्रवार्त्ताकी । स्त्री । वृहत्याम् ॥

क्षुद्रवार्त्ताकिनी । स्त्री । श्वेतकण्टकार्याम् ॥

क्षुद्रशङ्खः । पुं । शङ्खनखे । क्षुद्रश्चासौ शङ्खश्च ॥

क्षुद्रशर्करा । स्त्री । यावनालशर्करायाम् ॥

क्षुद्रशार्दूलः । पुं । चित्रके । व्याघ्रान्तके । चीता इतिभाषा ॥

क्षुद्रशीर्षः । त्रि । अल्पमस्तके ॥ पुं । मयूरशिखावृक्षे ॥ क्षुद्रंशीर्षमस्य ॥

क्षुद्रशुक्तिः । स्त्री । } जलशुक्तिका-
क्षुद्रशुक्तिका । स्त्री । } याम् ॥

क्षुद्रश्यामा । स्त्री । कट्भ्याम् ॥

क्षुद्रश्लेष्मातकः । पुं । भूकर्बुदारके ॥

क्षुद्रसहा । स्त्री । मुद्गपर्ण्याम् । मार्जारगन्धायाम् ॥ इन्द्रवारुण्याम् ॥ सहतिसहतेवा । षह० । अच् । टाप् क्षुद्रस्यसहा ॥

क्षुद्रसुवर्णम् । न । रीतौ । पित्तले ॥

क्षुद्रश्वासः । पुं । अल्पश्वासरोगे ॥

क्षुद्रहिङ्गुलिका । स्त्री । } कण्टकार्या-
क्षुद्रहिङ्गुली । स्त्री । } म् ॥ क्षुद्राचासौहिङ्गुलीच ॥

क्षुद्रा । स्त्री । व्यङ्गायाम् ॥ नट्याम् ॥ कण्टकारिकायाम् ॥ क्षाद्रेत्यल्पाम् लंग्राह्यम् ॥ सरघायाम् ॥ चाङ्गेर्याम् ॥ वेश्यायाम् ॥ हिंस्रायाम् ॥ मक्षिकामात्रे ॥ क्षुणत्ति क्षुद्यतेवा । क्षुदिर् सच्चूर्णने । स्फायितञ्चीतिरक् । टाप् ॥ गवेधुकायाम् ॥ वादरतायाम् ॥

क्षुद्राग्निमन्थः । पुं । वृक्षमूलाग्निमन्थ विशेषे । लघुमन्थे । तनुत्वचायाम् । क्षोटीमब्रियारी इतिभाषा ॥ अग्निमन्थद्वयञ्चैव तुल्यं वीर्य्यरसादिषु । तत्प्रयोगानुसारेण योजयेत् स्वमनीषया ॥

क्षुद्राञ्जनम् । न । सुश्रुतोक्तचक्षूरोगस्यौषधे ॥

क्षुद्राण्डमत्स्यसङ्घातः । पुं । पोनाघाने । पोनामाछ इतिगौडभाषा ॥ क्षुद्राण्डाश्चतेमत्स्याःक्षुद्राण्डमत्स्याः । तेषांसङ्घातः ॥

क्षुद्रापामार्गः । पुं । रक्तापामार्गे ॥

क्षुद्रामलकम् । न । आमलके । काठआमला इतिभाषा ॥

क्षुद्रामलकसंज्ञः । पुं । कर्कटवृक्षे ॥

क्षुद्राम्रः । पुं । कोषाम्रे । सुकोषके ॥

क्षुद्राम्रपनसः । पुं । लकुचे ॥

क्षुद्राम्ला । स्त्री । चाङ्गेर्य्याम् ॥ अम्लापत्त्याम् ॥

क्षुद्राम्लिका । स्त्री । माषाम्लायाम् । चाङ्गेर्य्याम् ॥

क्षुद्रिका । स्त्री । दंशे ॥

क्षुद्रिमा । पुं । क्षुद्रत्वे ॥ क्षुद्रस्य भावः । इमनिच् ॥

क्षुद्रेङ्गुदी । स्त्री । यवासे ॥

क्षुद्रेवारुः । पुं । गोपालकर्कट्याम् ॥

क्षुद्रोदुम्बरिका । स्त्री । काकोदुम्बरिकायाम् ॥

क्षुद्रोपायः । पुं । मायादिषु । मायोपेक्षेन्द्रजालानि क्षुद्रोपायाश्रमेवच ॥

क्षुद्रोपोदकनाम्नी । स्त्री । मूलपोत्याम् ॥

क्षुद्रोपोदकी । स्त्री । स्वल्पपूतिकाशाके । मत्स्यक्ष्याम् ॥ रसवीर्य्यविपाकेषु सदृशी पूर्व्वयास्वयम् । पूर्व्वया उपोदक्या ॥

क्षुद्रोलूकः । पुं । डुण्डुले । शाकुनेये । लक्ष्मूसल्इतिभाषा ॥

क्षुत् । स्त्री । क्षुधायाम् । बुभुक्षायाम् ॥ क्षोधनम् । क्षुधबुभुक्षायाम् । क्विप् ॥

क्षुधा । स्त्री । भोजनेच्छायाम् । बुभुक्षायाम् । अशनायायाम् ॥ बुभुक्षोत्पादकौदर्य्याग्निविकारे ॥ भागुरिमतेन टाप् ॥

क्षुधाकुशलः । पुं । विम्बान्तरवृक्षे ॥

क्षुधातुरः । त्रि । क्षुधापीडिते ॥ यथा । अर्थातुराणां न सुहृन्न बन्धुः कामातुराणां नभयं न लज्जा । चिन्तातुराणां नसुखं न निद्रा क्षुधातुराणांनबलंनतेजइति ॥

क्षुधाभिजननः । पुं । राजिकायाम् ॥ त्रि । क्षुज्जनके ॥ क्षुधामभिजनयति । जनी० । नन्द्यादित्वाल्ल्युः ॥

क्षुधावती । स्त्री । भैषज्यरत्नावल्युक्तक्षु धोत्पादकवटिकायाम् ॥

क्षुधासागररसः । पुं । भैषज्यरत्नावल्यु क्ते औषधविशेषे ॥

क्षुधितः । त्रि । बुभुक्षिते । बुभुक्षि ते । क्षुधायुक्ते ॥ क्षुध्यति स्म । क्षु धेरकर्मकत्वात् कर्त्तरि क्तः । वस तिक्षुधोरितीट् ॥ क्षुत् सञ्जाताऽस्य वा । तारकादित्वादितच् ॥

क्षुधुमः । पुं । म्लेच्छभेदे ॥ क्षुध्यति । क्षुध० । क्षुधिपिशिमिथिभ्यः कित् इति कुमन् ॥

क्षुपः । पुं । ह्रस्वशाखाशिफे । आस्फोट कादिक्षुद्रवृक्षे ॥ श्रीकृष्णात्मजे ॥ इ क्ष्वाकुभूपतनये ॥ द्वारकापश्चिमदि क्स्थपर्वते ॥ क्षौति । टुक्षु शब्दे । बाहुलकात् पः । [illegible] ॥

क्षुपालुः । पुं । पानीयालौ ॥

क्षुपकोषमुष्टिः । पुं । विषमुष्टिक्षुपे ॥

क्षुब्धः । पुं । मन्थे । मन्थानदण्डे ॥ क्षु भ्यति स्म । क्षुभ सञ्चलने । क्तः । क्षु ब्धस्वान्तेत्यादिना साधुः । त्रि । क्षु भिते ॥ तत्र च क्षुब्धो राजा क्षुब्धा [illegible] [illegible] ॥

[illegible] । पुं । [illegible] ॥ [illegible]

[illegible] निषेकमनु [illegible] । देव

तावामिति महाभारतम् ॥

क्षुभितः । त्रि । विलोडिते ॥ आकुलि ते । भीते ॥ क्षुभितः । इट् ॥

क्षुमा । स्त्री । अतस्याम् ॥ नीलिका याम् ॥ क्षंव इति पर्वतीयभाषाप्रसिद्धे लताप्रभेदे ॥ क्षौति । क्षूयते वा । टुक्षु० । बाहुलकात् मक् । अर्त्तिस्तु सुहुसृधृक्षिक्षुभेति मन्वा । संज्ञा पूर्वकत्वान्न गुणः ॥

क्षुरः । पुं । लोमच्छेदनद्रव्ये । नापि ताख्ये । क्षुर इति भाषा ॥ कोकिला क्षे ॥ गोक्षुरे ॥ शफे ॥ मदनपिण्डी तके ॥ शरे ॥ क्षुरति । क्षुर विलेख ने । इगुपधज्ञाप्रीकिरः कः ॥ [illegible] [illegible]न्यादिनारम् । [illegible] [illegible]योगुणाभावश्च ॥ क्षुर इव क्षुरो वा ॥

क्षुरकः । पुं । गोक्षुरे ॥ तिलकवृक्षे ॥ कोकिलाक्षे ॥ क्षुरकः शीतलो वृ ष्यः स्वाद्वम्लः पिच्छिलस्तथा । नि हन्ति वातशोथाम्लतृष्णादृष्ट्यनि लास्रजित् ॥ क्षुरति । क्षुर० । वु न् शिल्पसंज्ञयोः ॥ क्षुर इव कायति इ वे प्रतिकृताविति कन् ॥ भूम्यादिक्षु [illegible]

क्षुरकर्म । न । क्षौरे ॥ देवकार्यादि [illegible] रवेरंशमक्षिमये । क्षुरकर्म न कुर्यात् [illegible] च [illegible]

क्षुरधानम् । न । नापितोपस्कराधाने । गुच्छी इतिपर्वतीयभाषा ॥ क्षुरोधीयतेऽस्मिन् । धाञोल्युट् ॥

क्षुरधारः । पुं । महानरकविशेषे ॥ अस्त्रविशेषे ॥

क्षुरपत्रः । पुं । शरे ॥ त्रि । क्षुरतुल्यपत्रयुक्ते ॥

क्षुरपत्रिका । स्त्री । पालङ्क्यशाके । पालङ् इतिभाषा ॥

क्षुरप्रः । पुं । शरविशेषे ॥ घासच्छेदनास्त्रे । खुरपा इतिभाषा ॥

क्षुरभाण्डम् । न । क्षुराधारे । गुच्छी इतिपर्वतीयभाषा ॥

क्षुरमर्द्दी । पुं । नापिते ॥

क्षुरमुण्डी । पुं । नापिते ॥ मुण्डं करोतीतिमुण्डी । क्षुरेणमुण्डी ॥

क्षुराङ्गः । पुं । गोक्षुरे ॥

क्षुरिका । स्त्री । पालङ्क्यशाके ॥

क्षुरिकापत्रः । पुं । शरे ॥

क्षुरिणी । स्त्री । नमस्कार्याम् । वराहक्रान्तायाम् ॥ नापितभार्यायाम् ॥

क्षुरी । पुं । नापिते ॥ क्षुरोऽस्यास्ति इनिः ॥

क्षुरी । स्त्री । छुरिकायाम् ॥

क्षुल्लः । त्रि । अल्पे ॥ लघौ ॥ क्षोदनम् । क्षुदिर्सम्पेषणे । सं० क्विप् । क्षुदंखाति । आतोनुपेतिकः । तोर्लि ॥ यद्वा । क्षुद्यते । स्फायितञ्चीतिरक् । रलयोरेकत्वम् । कपिलकादित्वाद्वालत्वम् ॥

क्षुल्लकः । पुं । क्षुद्रशङ्खे ॥ नीचे । पामरे ॥ अल्पे ॥ कनिष्ठे ॥ दुःखिते ॥ खले ॥ क्षुल्लशब्दात् स्वार्थेकन् ॥ यद्वा । क्षुणत्ति क्षुद्यते वा । क्षुदिर० क्षुदचोदेया । स्फायीतिरक् । क० लत्वम् ॥ यद्वा । क्षुधालक्यते । लकआस्वादने । पुंसीतिघः ॥

क्षेत्रम् । न । शरीरे । इन्द्रियात्मकः करणसंहिते भोगायतने ॥ यथोक्तम् । इन्द्रियाणि दशैकञ्च पञ्चचेन्द्रियगोचराः । इच्छाद्वेषः सुखं दुःखं सङ्घात श्चेतना धृतिः ॥ एतत् क्षेत्रंसमासेनसविकारमुदाहृतमिति ॥ तस्य स्येवास्मिन्नसकृत्कर्मणः फलस्यनिर्वृत्तेः ॥ केदारे । व्रीह्याद्युत्पत्तिस्थाने ॥ सिद्धस्थाने ॥ कलत्रे । पत्न्याम् ॥ भारतादौ ॥ भगे ॥ अङ्के ॥ मेषादिराशौ ॥ यथा । मेषस्त्वङ्गारकक्षेत्रंवृषः शुक्रस्यकीर्त्तितम् । मिथुनञ्चबुधक्षेत्रं सोमस्य कर्कटस्तथा ॥ सूर्यक्षेत्रंभवेत्सिंहः कन्याक्षेत्रं बुधस्यच । तुलाक्षेत्रंतुशुक्रस्य भौमस्य वृश्चिकस्तथा । धनुः सुरगुरोःक्षेत्रंशनेर्मकरकुम्भकौ ॥ मीनः सुरगु

रेश्चैव ग्रहक्षेत्रं प्रकीर्त्तितम् ॥ लीलावत्यादिप्रसिद्धे गणितव्यवहारे ॥ क्षयति क्षीयते अनेन वा । क्षि क्षये क्षिनिवासगत्योर्वा । ष्ट्रन् ॥

क्षेत्रकरः । पुं । क्षेत्रस्य कर्त्तरि ॥ क्षेत्रं करोति । दिवाविभेत्यादिना टः ॥

क्षेत्रकर्कटी । स्त्री । वालुक्याम् ॥

क्षेत्रचिर्भिटा । स्त्री । चिर्भिटायाम् । पाण्डुफलायाम् ॥

क्षेत्रजः । पुं । द्विपितृके पुत्रविशेषे । स्वपत्न्यामन्यद्वाराजनितपुत्रे ॥ यथाह बोधायनः । मृतस्य प्रसूतो यः क्लीवस्य व्याधितस्य वा । अन्येनानुमतो वा स्यात् स्वक्षेत्रे क्षेत्रजः स्मृत इति । अस्यार्थः । क्लीवादेः स्वे क्षेत्रे तदनुमतोऽन्येन प्रसूतः क्षेत्रजो भवति । मनुरप्याह । यस्तल्पजः प्रमीतस्य क्लीवस्य व्याधितस्य वा । स्वधर्मेण नियुक्तायां स पुत्रः क्षेत्रजः स्मृत इति ॥ त्रि । क्षेत्रजाते ॥

क्षेत्रजा । स्त्री । ताम्बु इति गौड भाषा प्रसिद्धे तृणविशेषे । गोमूत्रिकायाम् । रक्ततृणायाम् ॥ चणिकायाम् ॥ शशाण्डुल्याम् ॥ शिल्पिकायाम् ॥ श्वेतकण्टकार्याम् ॥

क्षेत्रज्ञः । पुं । आत्मनि । पुरुषे । शरीरस्य कर्मसु प्रवर्त्तयितरि । शरीरा

धिदैवते ॥ योऽस्यात्मनः कारयिता तं क्षेत्रज्ञं प्रचक्षते । इति मनुः ॥ क्षेत्राण्याहि शरीराणि, तेषां चैव यथासुखम् । आत्मानं वेत्ति संयोगात् ततः क्षेत्रज्ञ उच्यते इति ब्रह्मपुराणम् ॥ क्षेत्रज्ञो नाम व्यष्टिदेहे दक्षिणे चक्षुषि व्यवस्थितो द्रष्टा दक्षषोः करणानां नियन्ता कार्यकरणस्वामी हिरण्यगर्भविराड्भ्यां समष्टिदेहाभ्यामन्य इति व्याख्यातारः ॥ त्रि । छेके । निपुणे । विदग्धे ॥ कृषके ॥ क्षीयते इति क्षेत्रं शरीरं तज्जानाति । ज्ञा अवबोधने । आतोऽनुपसर्गे कः ॥

क्षेत्रदूतिका । स्त्री । बृहत्याम् ॥

क्षेत्रदूती । स्त्री । श्वेतकण्टकार्याम् ॥

क्षेत्रपतिः । पुं । क्षेत्रपाले ॥ रुद्रादिषु ॥ यथा । रुद्रन्तु क्षेत्रपतिम् प्राहुः केचिद् दक्षिं मघा परे । स्वामिन्न एव वा कश्चित् क्षेत्रस्य पतिरुच्यते इति ॥

क्षेत्रपर्पटी । स्त्री । खेतपापड़ा इति प्रसिद्धे क्षुपविशेषे ॥

क्षेत्रपालः । पुं । देवताविशेषे ॥ भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः । मातृकाक्षरभेदेन सम्भिन्ना नामभेदत इति ॥ प्रयोगसारस्वतम् । नाम यदस्य वर्णानां चैव वर्णा मातृकाक्षरे

। दृश्यते प्रथमं तत्र तत्रायं क्षेत्रपालकः ॥ क्षेत्रपालमसम्पूज्य यः कर्म्म कुरुते क्वचित् । तस्य कर्म्मफलं हन्ति क्षेत्रपालो न संशय इत्यादि ॥ विशेषः प्रयोगसारे द्रष्टव्यः ॥

क्षेत्ररुहा । स्त्री । वालुकीकर्कट्याम् ॥ त्रि । क्षेत्रजाते ॥

क्षेत्रवित् । पुं । जीवात्मनि ॥ क्षेत्रज्ञे ॥

क्षेत्रसम्भवः । पुं । चञ्चुक्षुपे ॥ भिण्डाक्षुपे ॥ त्रि । भूमिजे ॥

क्षेत्रसम्भूतः । पुं । कुन्दरे ॥ त्रि । क्षेत्रोद्भवे ॥

क्षेत्राजीवः । त्रि । कर्षके । किसाण इति प्रसिद्धे ॥ क्षेत्रम् आजीवो जीविकास्य ॥

क्षेत्राधिदेवता । स्त्री । तीर्थाधिपदेवतायाम् ॥ देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताम् । सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं समुदीरयेत् ॥ इति प्रयोगसारः ॥

क्षेत्राधिपः । पुं । मेषाद्यधिपतिग्रहेषु ॥ कुजशुक्रबुधेन्द्वर्कसौम्यशुक्रावनीभुवाम् । जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः ॥ इति ज्योतिषम् ॥

क्षेत्रामलकी । स्त्री । भूम्यामलक्याम् ॥

क्षेत्रिकः । पुं । क्षेत्रस्वामिनि ॥

क्षेत्री । पुं । क्षेत्रविशिष्टे । कृषीवले ॥ इनिः ॥ भर्त्तरि ॥

क्षेत्रियः । पुं । असाध्यरोगे ॥ परदाररते । पारदारिके ॥ अन्यदेहचिकित्स्यार्हे ॥ परक्षेत्रे चिकित्स्यः । शरीरान्तरे चिकित्स्य इत्यर्थः । क्षेत्रियच् परक्षेत्रे चिकित्स्य इति परक्षेत्रशब्दात् घच् परशब्दस्य लोपश्च निपात्यते ॥ अन्यस्य भार्यायामन्येनोत्पादिते । यथा विचित्रवीर्यस्य क्षेत्रे क्षत्रियायां ब्राह्मणोत्पादिता धृतराष्ट्रादयः क्षेत्रियाः ॥ न । क्षेत्रजतृणे ॥

क्षेत्रेक्षुः । पुं । यावनाले । जुन्हरी जुवार इति भाषा ॥

क्षेपः । पुं । निन्दायाम् ॥ विक्षेपे ॥ लेपने ॥ गर्वे ॥ प्रेरणे ॥ लङ्घने ॥ विलम्बे ॥ हेलायाम् ॥ गुच्छे ॥ क्षेपणम् । क्षिपप्रेरणे । घञ् ॥

क्षेपकः । त्रि । क्षेपकर्त्तरि ॥

क्षेपणम् । न । प्रेरणे । क्षिपायाम् ॥ प्रस्तरादीनां दूरप्रक्षेपणार्थं रज्जुनिर्मिते शिक्ययन्त्रे । गोफिया इति भाषा ॥ यापने ॥ यथा । विधवा या वनस्था च नारी भवति कर्कशा । आयुषः क्षेपणार्थन्तु दातव्यं स्त्रीधनं सदेति हारीतः ॥

क्षेपणिः । स्त्री । डाँड इतिख्याते नौ

काष्ठदण्डे ॥ क्षिप्यतेऽनया । क्षिप प्रेरणे । क्षिपेः किच्चेत्यनिः । बाहुलकात् गुणः ॥ आयुधभेदे ॥

क्षेपणी । स्त्री । नौकादण्डे ॥ आयुधभेदे ॥ कृदिकारादक्तिन इति ङीष् ॥

क्षेपणीयः । पुं । भिन्दिपाले । पाषाणप्रक्षेपणास्त्रे ॥ त्रि । क्षेपणार्हे ॥

क्षेपिमा । पुं । क्षिप्रत्वे ॥ क्षिप्रस्य भावः । पृथ्वादित्वादिमनिच् । स्थूलदूरेति साधुः ॥

क्षेपिष्ठः । त्रि । अतिक्षिप्रे ॥ अयमेषामतिशयेन क्षिप्रः । स्थूलदूरेतीष्ठनि साधुः ॥ वायुर्वै क्षेपिष्ठा देवतेति श्रुतिः ॥

क्षेपीयान् । त्रि । क्षिप्रतरे ॥ अयमनयोः क्षिप्रः । द्विवचनविभज्येतीयसुनि स्थूलदूरेति साधुः ॥

क्षेप्ता । त्रि । क्षेपणकर्त्तरि ॥ क्षिपति । क्षिप० । तृच् ॥

क्षेमः । पुं । चण्डायाम् । चोरनामगन्धद्रव्ये ॥ पुं । न । लब्धरक्षणे ॥ कल्याणे । कुशले ॥ मोक्षे ॥ चतुर्थतारायाम् ॥ त्रि । तद्वति ॥ क्षयत्यशुभम् । क्षि० । मन् ॥ क्षिणोति वा । क्षिहिंसायाम् । अर्त्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्निति मन् ॥

क्षेमकः । पुं । चोरनामगन्धद्रव्ये ॥ पाण्डुवंशजे राजपुत्रे ॥ परीक्षिदादयः क्षेमकान्ताः कलेः सप्तदशशतपर्य्यन्तं राजान आसन् । ततोऽस्य वंशस्य विश्रान्तिः । ततः सोमवंशशाखान्तरे मगधवंश्या राजानः कलौ बहुकालं स्थिताः ॥ नागविशेषे ॥ भारतप्रसिद्धे राक्षसे ॥

क्षेमकरः । त्रि । मङ्गलकारके ॥ क्षेमङ्करः ॥

क्षेमकरी । स्त्री । भवान्याम् ॥

क्षेमकारः । त्रि । शुभङ्करे ॥ क्षेमप्रियमद्रेऽण्चेत्यण् ॥

क्षेमङ्करः । त्रि । क्षेमकारे । अरिष्टताता ॥ क्षेमप्रियमद्रेऽण्चेति चकारात् खच् । मुमागमः ॥

क्षेमङ्करी । स्त्री । देवीविशेषे ॥ भगवत्या मूर्त्यन्तरे शङ्खचिल्ल्याम् ॥ यथा । कुङ्कुमावर्ण सर्वाङ्गि शुक्लस्कन्धधवलानने । मत्स्यमांसप्रिये देवि क्षेमङ्करि नमोऽस्तु ते इतिदर्शने नमस्कारमन्त्रः ॥

क्षेमफला । स्त्री उदुम्बरवृक्षे ॥ क्षेमायफलान्यस्याः ॥

क्षेमवान् । त्रि । मङ्गलयुक्ते ॥

क्षेमधूरः । त्रि । निर्भयस्थाने बलप्रकाशके ॥

क्षेमा। स्त्री। उमायाम्। कात्यायन्याम्॥ क्षेमङ्करीम्॥ धनकरीम्॥ क्षयकृदशुभम्। क्षि०। क्षिणोति दुःखम्। क्षि हिंसायाम्। मन्। टाप्॥

क्षेम्यः। त्रि। कुशलयोग्ये॥

क्षेयम्। त्रि। क्षेतुंयोग्ये पापादौ॥ क्षि०। अचोयत्। गुणः॥

क्षैत्रम्। न। क्षेत्रवृन्दे। कैदार्ये॥ क्षेत्राणां समूहः। भिक्षादिभ्योऽण्॥

क्षैरेयम्। त्रि। क्षीरसंस्कृते॥ क्षीरे संस्कृतम्। क्षीराड्ढञ्॥

क्षैरेयी। स्त्री। यवाग्वाम्॥ ङीप्॥ पायसे॥

क्षोडः। पुं। आलाने। गजबन्धन्याम्॥

क्षोणिः। स्त्री। धरित्र्याम्॥ क्षौति। टुक्षु शब्दे। बाहुलकान्निः॥

क्षोणी। स्त्री। भूमौ॥ कृदिकारादिति ङीष्॥

क्षोणीप्राचीरः। पुं। समुद्रे॥

क्षोदः। पुं। रजसि। चूर्णे॥ पेषणे॥ क्षुद्यते। क्षुदिर् सम्पेषणे। घञ्॥

क्षोदक्षमः। त्रि।। विचारसहे॥

क्षोदितम्। न। चूर्णे॥ त्रि। पेषिते॥

क्षोदिमा। पुं। क्षुद्रत्वे॥ क्षुद्रस्य भावः। पृथ्वादित्वादिमनिच्। स्थूलदूरेति साधुः॥

क्षोदिष्ठः। त्रि। अतिक्षुद्रे॥ अयमेषामतिशयेन क्षुद्रः। अतिशायने तमबिष्ठनावितीष्ठनि स्थूलदूरेति साधुः॥

क्षोदीयान्। त्रि। क्षुद्रतरे॥ अयमनयोरतिशयेन क्षुद्रः। द्विवचनविभज्येतीयसुनि स्थूलदूरेति साधुः॥

क्षोद्यः। त्रि। क्षोदनीये। चूर्णितुं-योग्ये॥

क्षोभः। पुं। व्यर्थमितस्ततः सञ्चलने॥ क्षोभणे॥ चित्तचाञ्चल्ये॥

क्षोभकः। पुं। कामाख्यास्थपर्वतविशेषे॥ त्रि। क्षोभजनके॥

क्षोभकृत्। त्रि। विघ्नकारिणि॥

क्षोभणः। पुं। कामबाणविशेषे॥ क्षोभकारके॥ विष्णौ॥ प्रकृतिम् पुरुषञ्चैव प्रविश्य स्वेच्छया हरिः। क्षोभयामास सम्प्राप्ते सर्गकाले व्ययाव्ययौ॥ परिणाम्यपरिणामिनौ उ-पादाननिमित्ते॥ इत्यर्थः॥ क्षोभयति। क्षुभ सञ्चलने। ल्युः॥

क्षोभितः। त्रि। क्षोभयुक्ते। सञ्चालिते॥

क्षोमः। पुं। न। मण्डपोपरिशालायाम्। हट्टे॥ क्षौति। टुक्षु शब्दे। अर्त्तिस्तुस्विति मन्॥

क्षोमकः। पुं। गणहासके। चोरनामगन्धद्रव्ये॥

क्षौद्रम् । न । मधुनि ॥ पानीये ॥ कपिलवर्णे मधुनि ॥ मक्षिकाः कपिलाः सूक्ष्माः क्षुद्राख्यास्तत्कृतम्मधु । मुनिभिः क्षौद्रमित्युक्तं तद्वर्णात् कपिलम् भवेत् ॥ गुणैर्माक्षिकवत् क्षौद्रं विशेषान्मेहनाशनम् ॥ क्षुद्राभिर्मक्षिकाभिः कृतम् । क्षुद्राभ्रमरवटरपादपादणित्यण् ॥ पुं । क्षितिकणे । पांशौ ॥ चम्पकवृक्षे ॥ सजातीयान्मागध्यांजाते सङ्करजातिविशेषे ॥ वागुरादिनाऽस्यजीविका ॥

क्षौद्रजम् । न । सिक्थे । मधूच्छिष्टे ॥ त्रि ॥ मधुजातमात्रे ॥

क्षौद्रधातुः । पुं । माक्षिके ॥

क्षौद्रप्रियः । पुं । जलमधूकवृक्षे ॥ त्रि । मधुप्रिये ॥

क्षौद्रमेहः । पुं । प्रमेहरोगविशेषे ॥ तस्यलक्षणं यथा । कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः । कषायं कषायवर्णम् ॥

क्षौद्रेयम् । न । सिक्थके । सिया मैणमोम इति भाषा ॥

क्षौमः । पुं । न । अट्टे । अट्टा अटारी इति भाषा ॥ दुकूले ॥ न । वल्कलांशुके ॥ शणजेवस्त्रे ॥ अतसीवस्त्रे ॥ पट्टवस्त्रे ॥ त्रि । क्षुमायाविकारे ॥ क्षौमावृतेरथे ॥ क्षुवन्त्यत्र ।

टृक्षु० । कर्त्तिस्तुस्वितिरन् । ततःप्रज्ञाद्यण् ॥ क्षुमायाः विकारः । तस्यविकारइत्यण् ॥ क्षौमेणदुकूलेनपरिवृतोरथः । परिवृतोरथइत्यण् ॥

क्षौमी । स्त्री । अतस्याम् ॥ क्षुमानिर्मितकन्यायाम् ॥

क्षौरम् । न । क्षुरकर्मणि । मुण्डने । वपने ॥ केशश्मश्रुनखादीनां कर्त्तनंसम्यसाधनम् । सम्यसाधनम् पवित्रीकरणम् ॥ व्रतादिसंयमे क्षौरकर्माकरणेदोषो यथा । व्रतानामुपवासानांश्राद्धादीनाञ्चसङ्गमे । नकरोति क्षौरकर्म सोऽशुचिः सर्वकर्मसु ॥ स्वयंमाल्यंस्वयंपुष्पं स्वयं दृष्टञ्चचन्दनम् । नापितस्य गृहे क्षौरं शक्रादपि हरेत् श्रियम् ॥ रवौ दुःखं सुखं चन्द्रे कुजेमृत्यु र्बुधेधनम् । मानं हन्तिगुरोर्वारे शुक्रे शुक्रक्षयोभवेत् ॥ शनौचसर्वेदोषाः स्युः क्षौरमत्रविवर्जयेत् ॥ अत्रवृद्धगर्गः । केशवमानर्त्तपुरं पाटलिपुत्रं पुरीमहिच्छत्राम् । दितिमदितिञ्चस्मरतां क्षौरविधौ भवतिकल्याणमिति ॥ क्षुरेणनिर्वृत्तम् । तेननिर्वृत्तमित्यण् ॥

क्षौरपव्यम् । न । क्षुरवज्जतुल्यतीक्ष्णाइवगृहे ॥

क्षौरिकः । पुं । नापिते ॥ इतिशब्द

क्ष्मा.

माचा...

क्ष्मुतः। त्रि। चिक्किते। माचिते॥ क्ष्म स्नेहने। क्ष्मुतेजने। क्तः॥

क्ष्मा। स्त्री। मेदिन्याम्।भूमौ॥ क्षम ते भारम्। क्षमूष्‌ सहने। क्षमेरु पधालोपश्चेत्यच्। टाप्॥

क्ष्माजः। पुं। भौमे॥

क्ष्मातलम्। न। भूतले॥

क्ष्मापतिः। पुं। राजनि॥ क्ष्मायाःपतिः॥ क्ष्मांपातिवा। पाद्रक्षणे। पा-तेर्डतिः॥

क्ष्माभुक्। पुं। राज्ञि॥ क्ष्मांभुनक्ति पालयति। भुजपालनाभ्यवहारयोः। क्विप्॥

क्ष्माभृत्। पुं। नृपे।भूमे॥ शैले।प र्वते॥ क्ष्मांबिभर्त्ति। डुभृञ् धारण पोषणयोः।क्विप्चेति क्विप्।तुक्॥

क्ष्मामान्‌वः। पुं। वासुदेवे। भगव ति॥ क्ष्मा भूमिः मा लक्ष्मीः। त योर्भवः॥

क्ष्वेडः। पुं। ध्वनौ॥ कर्णामये॥ वि षे॥ पीतघोषारुक्षे॥ न। लोहि तार्कपर्णफले॥ घोषपुष्पे॥ त्रि। दुरादे॥ कुटिले॥ क्ष्वेडते मोच यति। क्ष्विदा मधा पचाद्यच्॥ नि पात्यतेऽच् वा। ञिक्ष्विदा स्नेहनमोचनयोः। पचाद्यच्। दुरासदे

क्ष्वे.

चलिवा। क्ष्वेडनपवने। अच्। घञ् वोरेकत्वम्॥

क्ष्वेडनम्। न। त्यागे। मोचने। छो डना इति भाषा॥

क्ष्वेडमभ्यम्। न। नादके॥

क्ष्वेडा। स्त्री। वंशशलाकायाम्॥ सिंह नादे॥ कोषातक्याम्॥ क्ष्वेडाहाप्॥ क्ष्वेदनं वा। ञिक्ष्विदा स्नेहनमोच नयोः मोचनयोरित्येके। घञ्। वृ॰॥ सिंहनादे कृपभेदस्तु क्षेत्र म्। विनेयैर्भवाचित इति परिभा षयापुंस्त्वं॥

क्ष्वेडितम्। न। सिंहनादे॥

क्ष्वेडिका। स्त्री। क्रीडायाम्॥ क्ष्वेडित वेतृ॰। यणावच्। टाप्। स्वार्थेकम्॥

ख.

खः। पुं। सकारे॥ सूर्ये॥ न। इन्द्रि ये॥ पुरे॥ क्षेत्रे॥ शून्ये॥ बिन्दौ॥ विहायसि॥ संवेदने॥ देवलोके॥ कर्मे॥ शर्मणि॥ सुखे॥ स्वनादत्

मरीचौ ॥ खन्यते खनति वा । खनुअवदारणे । अन्येभ्योपीति डः ॥ खर्वे स्मिन् वा । खर्व गतौ । डः ॥ अभ्रके ॥

खकुन्तलः । पुं । शम्भौ । शिवे ॥

खक्खटः । पुं । कक्खटे । कठिने ॥ खक्खति । खक्ख हसने । शकादिभ्योऽटन् ॥

खगः । पुं । सूर्ये ॥ ग्रहे ॥ देवे ॥ मार्गणे । शरे ॥ पक्षिणि । विहङ्गमे ॥ वायौ ॥ खेगच्छति । गम्लृ गतौ । अन्येभ्योपीति डः ॥

खगगतिक्रिया । स्त्री । पक्षिणां डीनादिगतिचेष्टायाम् ॥ यथा । डीनं प्रडीनमुड्डीनं सण्डीनं परिडीनकम् । विडीनमवडीनञ्च निडीनं डीनडीनकम् ॥ गतागतप्रगतित सम्पाताश्चपक्षिणाम् । गतिप्रभेदाः पक्षिगृहं कुलायो नीडमस्त्रियामिति जटाधरः ॥

खगतिः । स्त्री । आकाशगमने ॥

खगपः । पुं । गरुडे ॥ खगान् पाति । पारक्षणे । आतोनुपेतिकः ॥

खगपतिः । पुं । गरुडे ॥ खगानाम् पतिः ॥

खगमः । पुं । खेचरे ॥

खगवक्त्रः । पुं । लकुचवृक्षे ॥

खगवती । स्त्री । भूमौ । क्षितौ ॥

खगशत्रुः । पुं । पृश्निपर्ण्याम् ॥

खगस्थानम् । न । कोटरे । निष्कुहे ॥ खगानांस्थानम् ॥

खगान्तकः । पुं । श्येनपक्षिणि ॥

खगासनः । पुं । उदयाचले ॥ विष्णौ ॥ खगस्य खगानां वा आसनं यस्मिन् सः ॥ खगो गरुडः आसनं यस्य वा ॥

खगेन्द्रः । पुं । गरुडे । वैनतेये ॥ खगानामिन्द्रः ॥

खगेन्द्रध्वजः । पुं । विष्णौ । हरौ ॥ खगेन्द्रो ध्वजे यस्य । खगेन्द्रो ध्वजश्चिह्नं यस्य वा ॥

खगेश्वरः । पुं । गरुडे । सुपर्णे ॥ खगानामीश्वरः ॥

खगोलः । पुं । आकाशमण्डले ॥ तस्य विवरणं यथा । एतद्ब्रह्माण्डं सच्छिद्रं कटाहद्वयस्य गोलाकारसम्पुटतुल्यम् । यत्र भूर्भुवःस्वर्महोजनतपःसत्यसंज्ञकानि सप्तभुवनानि सन्ति । ब्रह्माण्डमध्ये यः परिधिः स आकाशकक्ष्या । तन्मध्ये परावहपरिवहसुवहसंवहोद्वहाख्यानां पञ्चानां वायूनांस्थानानि अधोधःक्रमेण सन्ति । तदधस्तात् अधोधःस्थितपूर्वाभिमुखगतिनिवृहस्पतिराहुकेतुमङ्गलसूर्यशुक्रबुधचन्द्रग्रहयुक्तं दक्षिणो

न्तरस्थितध्रुवाख्यताराद्वयेन बद्धं नक्षत्रचक्रं सदापश्चिमगतिना प्रवहवायुना भ्रमति । ततोऽधोऽधः क्रमेण सिद्धविद्याधरमेघविद्युदादियुक्तः सप्तोत्तरोत्तरावहवायुर्भ्रमति । एतद्ब्रह्माण्डस्य मध्ये समन्तादीश्वरस्य धारणात्मिकां शक्तिं विभ्राणो भूगोलः शून्ये तिष्ठति । पृथ्व्यन्तर्गता नागसुरसमाश्रया दिव्यौषधिरसोपेता रम्याः पातालरसातलमहातलतलातलसुतलवितलातलसंज्ञका ऊर्द्ध्वोर्द्ध्वक्रमेण सप्तपातालभूमयश्च सन्ति । सुमेरुपर्व्वतोपरि शून्ये एका ध्रुवताराभ्रमति । एवं वडवानलोपरि शून्येऽन्याध्रुवतारा भ्रमतीति ॥

खगगडः । पुं । खागड़ा इति गौडभाषाप्रसिद्धे तृणविशेषे । पोटगले । इत्कामे ॥

खङ्कुरः । पुं । घूर्णकुन्तले ॥

खचमसः । पुं । चन्द्रे ॥ खेचमसइव ॥

खचरः । पुं । वायौ ॥ राक्षसे ॥ सूर्ये ॥ त्रयाणामुदाहरणंयथा । खचरस्य सुतस्य सुतः खचरः खचरस्यपिता न पुनः खचरः । खचरस्यसुतेन हतः खचरःखचरी परिरोदिति हा खचर ॥ मेघे ॥ रूपकभेदे ॥ यथा । खचरो रङ्गताले स्यात् गुरुरादौ लघुस्तथा । शान्तेऽथवा हास्यरसे भवे देषदशाचरइतिसङ्गीतदामोदरः ॥ त्रि । आकाशगामिनि ॥ खेचरति । चर० । चरेष्टः ॥

खचितः । त्रि । करम्बिते । रचिते । संयुक्ते । छुरिते । व्याप्ते ॥

खजः । पुं । दर्व्वीम् । करछी इति भाषा ॥

खजकः । पुं । वैशाखे । मन्थानदण्डे ॥

खजपम् । न । घृते ॥ दध्नि ॥ खज्यते । खजमन्थने । उषिकुटिदलिकचिखजिभ्यः कपन् ॥

खजलम् । न । नीहारे ॥ खस्यजलम् ॥ दिव्योदके । आकाशवारिणि ॥ यथा । वर्षासु चरन्ति घनैः सहोरगा वियति कीटलूताश्च । तद्विषजुष्टमपेयं खजलमगस्त्योदयात् पूर्व्वम् ॥

खजा । स्त्री । मन्थे ॥ प्रहस्ते ॥ दर्व्वीम् ॥

खजाकः । पुं । खगे । पक्षिणि ॥ खजति । खज० । खजेराकः ॥

खजाका । स्त्री । दर्व्वीम् । करछी चमचा इतिभाषा ॥ खजेराकप्रत्ययान्तात् टाप् ॥

खजिका । स्त्री । खाजाख्योपदंशे ॥

खजित् । पुं । बुद्धप्रभेदे ॥ खंजयति । जि० । क्विप् । तुक् ॥

खज्योतिः । पुं । खद्योते ॥

खञ्जः । त्रि । विकलगतौ । खोंड । खोडा लंगडा इतिभाषा ॥ खञ्जति । खजि गतिवैकल्ये । पचाद्यच् । तल्लक्षणं यथा । वायुः कट्याश्रितः सक्थ्नः कण्डरामाक्षिपेद्यदा । खञ्जस्तदा भवेज्जन्तुः पङ्गुः सक्थ्नोर्द्वयोर्वधात् ॥

खञ्जकः । त्रि । खोरे । खञ्जे ॥

खञ्जकारिः । पुं । मुस्तायाम् । खिसारी इतिभाषा ॥

खञ्जखेटः । पुं । खञ्जनाख्यविहङ्गमे ॥

खञ्जखेलः । पुं । खञ्जनपक्षिणि ॥

खञ्जनः । पुं । खञ्जरीटे । ममोला इतिभाषा ॥ अस्य लक्षणाध्यायः । खञ्जननामा योऽयं विहङ्गमस्तस्य दर्शने प्रथमे । प्रोक्तानि यानि मुनिभिः फलानि तानि प्रवक्ष्यामि ॥ तत्र चत्वारः खञ्जना भवन्ति । तेषां नामान्याह । स्थूलोऽभ्युन्नतकण्ठः कृष्णगलो भद्रकारको भद्रः १ । आकण्ठमुखात् कृष्णः सम्पूर्णः २ पूरयत्याशाम् ॥ कृष्णो गलेऽस्य विन्दुः सितकरटान्तः स रिक्तकृद्रिक्तः ३ । पीतो गोपीत ४ इति क्लेशकरः खञ्जनो दृष्टः ॥ अथ कस्मिन् स्थाने दृष्टः कीदृक्फलङ्करोतीत्याह । अथ मधुरसुरभिफलकुसुमतरुषु सलिलाशयेषु पुण्येषु । करितुरगभुजङ्गमूर्द्धसु प्रासादोद्यानहर्म्येषु ॥ गोगोष्ठसत्समागमयज्ञोत्सवपार्थिवद्विजसमीपे । हस्तितुरङ्गमशालाछत्रध्वजचामराद्येषु ॥ हेमसमीपसिताम्बरकमलोत्पलपूजितोपलिप्तेषु । दधिपात्रधान्यकूटेषु च श्रियं खञ्जनः कुरुते ॥ अन्येष्वप्याह । पङ्के स्वाद्वन्नाप्तिर्गोरससम्पन्नगोमयोपगते । शाद्वलगे वस्त्राप्तिः शकटस्थे देशविभ्रंशः ॥ गृहपटलेऽर्थभ्रंशो वध्रे बन्धोऽशुचौ भवति रोगः । पृष्ठे त्वजाविकानां प्रियसङ्गममावहत्याशु ॥ अन्यदप्याह । महिषोष्ट्रगर्दभास्थिश्मशानगृहकोणशर्करादिस्थः । प्राकारभस्मकेशेषु चाशुभो मरणरुग्भयदः ॥ पक्षौ धुन्वन्नशुभः शुभः पिबन् वारि निम्नगासंस्थः । सूर्योदये प्रशस्तो नेष्टफलः खञ्जनोऽस्तमये ॥ नीराजने निवृत्ते यया दिशा खञ्जनो नृपं यान्तम् । पश्येत् तया गतस्य क्षिप्रमरातिर्वशमुपैति ॥ अथ प्रत्ययप्रदर्शनार्थमाह । तस्मिन्निधिर्भवति मैथुनमेति यस्मिन् यस्मिंस्तु छर्दयति तत्र तलेऽस्ति काचः । अङ्गारमप्युपदिशन्ति पुरीषणेऽस्य त-

कौतुकोपनयमाय खने हरिणीम् ॥ अन्यच्छुभाशुभमाह । स्तविकल विभिन्नरोगितः स्वतनुसमानफल प्रदः खगः । वनकुद्दभिनिर्भीयमा नको वियतिच बन्धुसमागमप्रदः॥ अथशुभखञ्जने दृष्टे विधानमाह । न्वृपति रपि शुभं शुभप्रदेशेखग म वलोक्य महीतले विदध्यात् । सुर भिकुसुमधूपयुक्तमर्घं शुभ मभिन न्दित मेव मेति वृद्धिम् ॥ अथाशु भे खञ्जने दृष्टे विधानमाह । अशु भ मपि विलोक्य खञ्जनं द्विजगुरु साधुसुरार्चने रतः । न न्वृपति र शुभं समाप्नुयाद्यदि सप्तदिना निमांसभुक् स्यात् ॥ अथ कालफ लप्रदर्शनार्थ माह । आवर्षात् प्रथ मे दर्शने फलं प्रतिदिनन्तु दिनशे षात् । दिक्स्थानमूर्त्तिलग्नर्क्षशा न्तादीप्तादिभिश्चोह्यम् ॥ इतिवा राह्यांत्रिचत्वारिंशोध्यायः ॥ ४३ विशेषः शाकुने ॥ दिग्विशेषे ऽस्य शस्तफलम । वित्तं ब्रह्मणि कार्य सिद्धिरतुला शक्रे हुताशेभयं याम्या मप्रियभयं सुरक्षिपिकलि र्लाभः स मुद्राश्रये । वायव्यां वरवस्त्रगन्धस- म्मिलं दिव्याङ्गनाचोत्तरे ऐशान्यां मरणं भुवंविगदितंदिग्लक्षणं ख

ञ्जने ॥ अष्टौवतच्चतेष्वेवंवे।ध्यम् ॥ न । गमने ॥ खञ्जति । खजि० । नन्द्यादित्वाल्ल्युः ॥

खञ्जनकः । पुं । खञ्जने ॥

खञ्जनरतम् । न । यतीनां गोपनीये रते ॥ यमिनां यद्रतं गोप्यं तत् ख ञ्जनरतं विदुरित्युक्तेः ॥

खञ्जना । स्त्री । खञ्जरीटसमपक्षिणि । क्षुद्रखञ्जनजातौ । सर्पप्याम् ॥

खञ्जनिका । स्त्री । खञ्जनाकृतौ । स र्षप्याम् । शापुत्रिकायाम् ॥ खञ्जने व । स्वार्थेकः । टाप् । इत्वम् ॥

खञ्जरीटः । पुं । खञ्जने ॥ असिधाराया म् ॥ व्रतचारिणि ॥ खञ्जइवचरति । खञ्जगतौ । वाहुकात् कीटन् ॥

खञ्जा । स्त्री । छन्दः प्रभेदे ॥

खटः । पुं । अन्धकूपे ॥ कफे ॥ प्रहारा न्तरे ॥ टङ्के ॥ तृणे ॥ लाङ्गले ॥ क त्तृणे ॥ खटकाङ्क्षायाम् । अच् ॥

खटकः । पुं । नागवीटे । टाङ्करे ॥

खटकामुखः । पुं । शराकर्षणमुद्रायाम् ॥ हस्तकविशेषे ॥

खटिकः । पुं । कुञ्चितपाणौ ॥

खटिका । स्त्री । शैलखडी इति प्रसिद्धा यांकठिन्याम् । लेखनद्रव्ये ॥ कर्णर न्ध्रे ॥ क्षीरणे ॥

खटिनी । स्त्री । खट्याम् । खटिका

याम् ॥

खटी । स्त्री । कठिन्याम् । धवलमृत्तिकायाम् ॥ खटी दाहास्रजि च्छीता मधुरा विषशोथजित् । लेपादौ तद्गुणाः प्रोक्ता भक्षिताम्मृत्तिकासमा ॥ खटी गौरखटी चैव गुणैस्तुल्ये प्रकीर्त्तिते ॥

खट्टनः । त्रि । खर्वे ॥

खट्टाशः । पुं । गन्धोतौ । वनवासने ॥ खाटास गन्धगोकुला इतिच गौड भाषा ॥

खट्टाशी । स्त्री । पूतिशारिजायाम् ॥

खट्टिः । पुं । शवयाने । अन्तशय्यायाम् ॥

खट्टिकः । पुं । खटीक इतिख्याते मांसविक्रयिणि ॥ मत्स्यधीवीरफेने ॥ शाकुनिके । चिडीमार इतिभाषा ॥

खट्टिका । स्त्री । क्षुद्रखट्वायाम् । निषद्यायाम् ॥ शवयाने ॥

खट्टेरकः । त्रि । खर्वे ॥

खट्वका । स्त्री । खट्विकायाम् ॥ अभाषितपुंस्काच्चेति पक्षेह्रस्वाभावः ॥

खट्वा । स्त्री । पर्य्यङ्के । शयने । मञ्चे ॥ खट्यते निद्रालुभिः । खटकाङ्क्षायाम् । अशूप्रुषीतिकन् । टाप् ॥ अष्टाभिः काष्ठखण्डैस्तु खट्वेति प्रतिपद्यते ॥ विशेषोयुक्तिकल्पतरौ ॥ कोलशिंव्याम् ॥

खट्वाका । स्त्री । खट्विकायाम् ॥ आदाचार्य्योणामितिपक्षे आत्वम् ॥

खट्वाङ्गः । पुं । सूर्य्यवंशीयराजर्षिविशेषे ॥ न । नरपञ्जरे ॥ दण्डारोपितनरशिरस्के ईशायुधविशेषे ॥ पृष्ठवंशे ॥ खट्वापादे ॥

खट्वाङ्गभृत् । पुं । शिवे ॥

खट्वाङ्गी । पुं । शिवे ॥

खट्वारूढः । त्रि । खट्वाश्रिते ॥ अविनीते । प्रमादिनि ॥ जाल्मे । निषिद्धाऽनुष्ठानपरे ॥ वेदं व्रतानिच समाप्य समावृत्तेन हि खट्वारोढव्या ब्रह्मचर्य्यएव भूमिशयनार्थोपि यः खट्वामारोहति स जाल्मः । रूढश्चायम् । तेन खट्वा मारोहतु मावा निषिद्धानुष्ठानपरः सर्वोपिखट्वारूढउच्यते । खट्वाक्षेप इति निष्यर्तत्पुरुषः ॥

खट्विका । स्त्री । शयने । क्षुद्रखट्वायाम् । खटिया खटोला इतिभाषा ॥ खल्पाखट्वा । कन् । ह्रस्वः । अभाषितपुंस्काच्चेतीत्वम् ॥

खडः । पुं । पानान्तरे ॥ भेदे ॥ पुं । न । लघुतृणे । खड इतिभाषा ॥

खडक्किका । स्त्री । } पश्चद्वारे । खिडकी । स्त्री । } डकीइतिभाषा

॥ इति हारावली ॥

खडयूषः । पुं । यूषवि० ॥ यथा । तक्रं

कपित्थैश्चाङ्गेरीमरिचाजाजिचित्र-
कैः । सुपक्वं खण्डयूषोऽयं चक्रदत्तेन
भाषितः ॥

खडिका । स्त्री । } सेलखड़ी इतिभाषा प्रसिद्धायां कठिन्याम् ॥
खडी । स्त्री । }

खड्डः । पुं । मृतशय्यायाम् ॥

खड्गम् । न । लोहे ॥

खड्गः । पुं । खागइतिख्याते गण्डकशृङ्गे ॥ बुद्धभेदे ॥ गण्डके । गैंडा इति प्रसिद्धवनमृगे ॥ चोरकनामगन्धद्रव्ये ॥ खाँडा तरवारिइतिच ख्याते शस्त्रे । असौ । चन्द्रहासे ॥ खण्डति । खडिभेदने । छापूखडिभ्यः किदिति गन् । आगमशास्त्रस्याऽनित्यत्वान्नुम् ॥ अथ खड्गविषयकत्रयोदशविधसञ्चरणं महाभारते । यथा मण्डलाकारतः खड्गभ्रामणं भ्रान्तमुच्यते १ । तदेवबाहुमुद्यम्यकृतमुद्भ्रान्तमीरितम् २ ॥ भ्रामणं स्वस्य परितः खड्गस्याविद्धमुच्यते ३ । परप्रयुक्तशस्त्रस्य वारणार्थमिदं त्रयम् ॥ शत्रो राक्रमणार्थाय गमनन्त्वाप्लुतं मतम् ४ । खड्गस्याग्रेण तद्देहस्पर्शनं प्रसृतं मतम् ५ ॥ वञ्चयित्वा रिपौ शस्त्रपातनं गदितं स्मृतम् ६ । परिवृत्त्य भवेच्छत्रौ वामदक्षिणतो गतिः ७ ॥ पश्चात् पदापसरणं निवृत्त्य सम्प्रचक्षते ८ । अन्योन्यताडनं प्राहुः सम्पातमुभयोरपि ९ ॥ आधिक्यमात्मनो यत् तत् समुदीर्णमुदीरितम् १० । अङ्गप्रत्यङ्गदेशेषु भ्रामणं भारतं स्मृतम् ११ ॥ विचित्रखड्गसञ्चारदर्शनं कौशिकं स्मृतम् १२ । निर्गीय चर्मणि क्षेपो यदसेः सात्वतं हि तत् १३ ॥ इति ॥

खड्गकोषः । पुं । असिपिधाने । खड्गपत्रे ॥

खड्गज्ञानम् । न । खड्गपरीक्षायाम् ॥

खड्गटः । पुं । इक्षुकाशे ॥

खड्गधेनुः । स्त्री । खड्गपुत्रिकायाम् । छुरी इति भाषा ॥ गण्डकस्त्रियाम् ॥

खड्गपत्रः । पुं । असिकोषे । खड्गलतायाम् ॥

खड्गपरीक्षा । स्त्री । खड्गज्ञाने ॥ यथा ।
अङ्गं रूपं तथा जाति र्नेत्रारिष्टे च भूमिका । ध्वनि र्मान मिति प्रोक्तं खड्गज्ञानाष्टकं शुभम् ॥ अभिन्ने दृश्यते यादृक् विभिन्ने घटिते तथा । यदेव दृश्यते चिह्नं तदङ्गं सम्प्रचक्षते १ ॥ नीलकृष्णादिकं खड्गे रूप मित्यभिधीयते २ । तेनैव यत् प्रतीतं स्यात् तज्जाति रिति गद्यते ३ ॥ अङ्गातिरिक्तं यज्जातिस्तन्मात्रात्म्यो [illegible] । तत्रैव

मिति। जानीयात् खड्गे खड्गविशार
दः ४॥ अङ्गातिरिक्तं खड्गादि यच्छु
द्धत्वापलक्षणम् । तदरिष्ट मिति
प्राहुः ५ भूमि रङ्गादिधारणम् ६॥
यः खड्गे जायते शब्दो नख दण्डादि
ना हते । स ध्वनि ७ स्तुलना
मानं ८ ज्ञानमष्टविधन्त्विदम् ॥ प
श्चाशा निपुणैः खड्गे सम्भाव्यन्ते
पिकृत्रिमाः । अन्त्या वकृत्रिमौ ज्ञेयौ
ता वेव सहजा विति ॥ शत मङ्गा
नि चत्वारि रूपाणि जातय स्तथा।
लिङ्ग न्नेत्राणि जानीया दरिष्टानि
तथैव च ॥ भूमिश्च द्विविधा ज्ञेया
ध्वनि रष्ट विधो मतः । मानन्तु
द्विविधं प्रोक्तमित्येषांसङ्ग्रहो मतः॥
इति ॥ विशेषस्तु लौहार्णवलौहप्रदी
पयुक्तिकल्पतरुप्रभृतिग्रन्थेषु द्रष्टव्यः॥

खड्गपिधानम् । न । }
खड्गपिधानकम् । न । } खड्गकोषे । परीवारे । प्रत्याकारे । कोषे ॥

खड्गलक्षणम् । न । खड्गस्वरूपमाने ॥
तत्रादौ खड्गस्यप्रमाणं व्रणानाञ्च शु
भाशुभज्ञानार्थमाह । अङ्गुलशतार्द्धं
मुत्तम ऊनः स्यात् पञ्चविंशतिः ख
ड्गः । अङ्गुलमानाज् ज्ञेयो व्रणोऽशु
भो विषमपर्वस्थः ॥ * ॥ व्रणानामाकृ
तिलक्षणमाह । श्रीवृक्षवर्द्धमानात

पत्रश्रीवृक्षकुण्डलानाम् । स
दृशा शस्ताः प्रशस्ता ध्वजायुधस्वस्ति
कानाञ्च ॥ * ॥ अशुभलक्षणानि ।
कृकलासकाककङ्कक्रव्यादकबन्धवृश्चि
काकृतयः । खड्गेव्रणा न शुभदा वं
शानुगताःप्रभूताश्च ॥ स्फुटितो ह्र
स्वः कुण्ठो वंशच्छिन्नो नदृष्टिमनोनु
गतः । अस्वन इति चानिष्टः प्रोक्तवि
पर्यस्तइष्टफलः ॥ * ॥ खड्गचेष्टित
माह । क्वणितं मरणायोक्तं पराज
याया प्रवर्त्तनं कोशात् । स्वयमुद्गी
र्णे युद्धं ज्वलिते विजयो भवेत् ख
ड्गे ॥ * ॥ अथपरिभाषार्थमाह ।
नाऽकारणं विवृणुयात् न विघट्टयेच्च
पश्येन्न तत्र वदनं नवदेच्चमूल्यम् । दे
शं न चास्य कथयेत् प्रतिमानयेच्च
नैवस्पृशेन्नृपति रप्रयतोऽसियष्टिम्
॥ * ॥ अन्यल्लक्षणमाह । गोजिह्वा
संस्थानो नीलोत्पलवंशपत्रसदृश
श्च । करवीरपत्रशूलाग्रमण्डलाग्राः
प्रशस्ताः स्युः ॥ निष्पन्नो न च्छेद्यो
निकषैः कार्यः प्रमाणयुक्तः सः ।
मूले म्रियते स्वामी जननी तस्याग्र
तश्छिन्ने ॥ * ॥ अथ मुष्टौ दृष्टायां
व्रणज्ञानमाह । यस्मिन् तत्सरुप्रदे
शे व्रणोभवेत्तद्वदेव खड्गस्य । वनि
तानामिव तिलका गुह्यवाच्या मु

खेद्दृष्टा ॥ * ॥ अथव्रणोपायमाह । अथवा स्पृशति यदङ्गं प्रष्टानिखिलंश भृत् तदवधाय । कोशस्थस्यादेश्यो व्रणोपि शास्त्रं विदित्त्वैवम् ॥ शिरसिस्पृष्टे प्रथमेऽङ्गुले द्वितीयेललाट संस्पर्शे । भ्रूमध्येचतृतीये नेत्रस्पर्शे च तुर्थे च ॥ नासोष्ठकपोलहनुश्रवणग्रीवांसके च पञ्चाद्याः । उरसिद्वादश संस्थस्तयोर्दश:कक्षयोर्ज्ञेय: ॥ स्तनहृदयोदरकुक्षौ नाभौतु चतुर्दशादयोज्ञेया: । नाभीमूलेकट्यां गुह्ये एकोनविंशतित: ॥ ऊर्वोर्द्वाविंशेस्या दूर्वोर्मध्येव्रणस्त्रयोविंशे । जानुनिच चतुर्विंशजङ्घायांपञ्चविंशेच ॥ जङ्घामध्येगुल्फेपार्ष्णीपादे तथाङ्गुलिष्वपिच । षड्विंशादिषु यावत् त्रिंशदितिमतेन गर्गस्य ॥ * ॥ अथैतेषांव्रणानांफलान्याह । पुत्रमरणं धनाप्ति र्धनहानि: सम्पदश्च बन्धश्च । एकाद्यङ्गुलसंस्थे व्रणै: फलं निर्दिशेत् क्रमश: ॥ सुतलाभ: कलहो हस्तिलब्धि: पुत्रमरणधनलाभ: । क्रमशो विनाशवनितासिश्चित्तदु:खानि षट्प्रभृति ॥ लब्धिर्हानि: स्त्रीलब्धयो बधवृद्धिमरणपरितोषा: । ज्ञेयाश्चतुर्दशादिषु धनहानि श्चैकविंशे स्यात् ॥ वित्तासिर निर्वाणिर्धनाग

खड्ग

मोऽमृत्युसम्पदोऽस्वत्वम् । ऐश्वर्यं मृत्यु राज्यानिचक्रमात् त्रिंशदिति यावत् ॥ अनिर्वाणिर्मृत्यु: ॥ परतो न विशेष फलं विषमसमस्थाश्च पापशुभफलदा: । केचिदफला: प्रदिष्टास्त्रिंशत्परतोऽग्रमितियावत् ॥ * ॥ अथगन्धलक्षणमाह । करवीरोत्पलगजमदघृतकुङ्कुमकुन्दचम्पकसगन्ध: । शुभदोनिष्टोगोमूत्रपङ्कजमेदस:सदृशगन्ध: ॥ कूर्मवसासृक्क्षारोपमश्चभयदु:खदोभवतिगन्ध: । वैदूर्यकनकविद्युत् प्रभोजयारोग्यवृद्धिकर: ॥ * ॥ अथशस्त्रपानम् । इदमौशनशञ्च शस्त्रपानं रुधिरेणश्रियमिच्छत: प्रदीप्ताम् । हविषा गुणवत्सुताभिलिप्सो: सलिलेनाक्षयमिच्छतश्चवित्तम् ॥ वडवोष्ट्रकरेणुदुग्धपानंयदिपापेन समीहतेर्थसिद्धिम् । झषपित्तमृगाश्ववस्तदुग्धै: करिहस्तच्छिदये सतालगर्भै: ॥ आर्कं पयोहुडविषाणमसीसमेतं पारावताखुशकृताचयुत: प्रलेप: । शस्त्रस्य तैलमथितस्य ततोस्यपानंपश्चाच्छितस्य नशिलासुभवेद्विघात: ॥ क्षारे कदल्या मथितेन युक्ते दिनोषितेपायसमायसंतत् । सम्यक् छितं चाश्मनिनैतिभङ्गं नचान्यलोहेष्वपितस्य

कौण्व्यम् ॥ इतिवाराह्याम् ४८ऽध्याय: ॥

खड्गिक: । पुं । महिषीक्षीरफेने ॥ सौनिके । मांसविक्रयिणि ॥

खड्गी । पुं । गण्डके । तुङ्गमुखे । वज्रचर्म्मणि ॥ खड्ग:शृङ्गमस्त्यस्य । इनि: ॥ मञ्जुघोषे ॥ त्रि । खड्गधरे ॥

खण्ड: । पुं । इक्षोर्विकारविशेषे । ऐक्षवे । चीनी इतिभाषाप्रसिद्धे ॥ प्रयुज्यतेचरसालायाम् । खण्डस्यषोडशपलानिशशिप्रभस्येत्यत्र - ॥ खण्डस्तुमधुरोवृष्यश्चक्षुष्योबृंहणोहिम: । वातपित्तहर:स्निग्धोबल्योवान्तिहर:पर: ॥ मणिदोषे ॥ न । विडलवणे ॥ * ॥ पुं । न । भित्ते । शकले ॥ खण्ड्यते । खडिभेदने । कर्मणि भावेवा घञ् ॥ खन्यते वा । खनु० । अमन्ताड्ड: ॥

खण्डक: । पुं । सितायाम् । चीनी इतिभाषा ॥ त्रि । छेदकारिणि ॥

खण्डकथा । स्त्री । वाक्यप्रभेदे ॥

खण्डकर्ण: । पुं । आलुविशेषे । वज्रकन्दे । सकरकन्द इतिभाषा ॥ कटुपाकी खण्डकर्ण: कफपित्तविनाशन: ॥

खण्डकालु । न । आलुविशेषे ॥

खण्डखर्जूरम् । न । खर्जूर इतिख्याते

पक्वान्ने ॥

खण्डज: । पुं । गुडे ॥ यवासशर्करायाम् ॥

खण्डजोद्भवज: । पुं । तवराजोद्भवखण्डे ॥ इतिराजनिर्घण्ट: ॥

खण्डताल: । पुं । तालविशेषे ॥ यथा । द्रुतमेकं भवेद्यत्र खण्डताल:स उच्यते । अपरं नियतं विनेति दामोदर: ॥

खण्डधारा । स्त्री । कर्त्तर्याम् । कैंची इतिभाषा ॥

खण्डनम् । न । भञ्जने ॥ निराकरणे ॥ छेदने । भेदने ॥

खण्डपरशु: । पुं । शिवे ॥ खण्डयतीति खण्ड: । खण्ड: परशुरस्य ॥ जामदग्न्ये ॥ खण्डयति शत्रून् । खडि० । पचाद्यच् । खण्ड: परशुरस्य ॥

खण्डपर्शु: । पुं । पर्शुरामे । भार्गवे ॥ शङ्करे । शिवे ॥ चूर्णलेपिनि ॥ खण्डामलकभैषज्ये ॥ राहौ । सैंहिकेये ॥ खण्डयतीति खण्ड: । सदाऽसुरवधे खण्ड: पर्शुरस्य ॥ अमरदन्तक्षतिनीतिशब्दरत्नावली ॥

खण्डपाल: । पुं । शूद्रायां क्षत्रियाज्जाते । मयरा इतिगौडभाषा प्रसिद्धे वर्णसङ्करविशेषे । खाण्डिके । मोदके ॥ इतिहारावली ॥

खण्डमोदकः। पुं। यवासशर्करायाम्॥
खण्डलवणम्। न। धूर्त्तं। विडलवणे॥
खण्डविकारः। पुं। मत्स्यण्डिकायाम्॥ खण्डो विकारोऽस्याः॥
खण्डविकृतिः। स्त्री। शर्करायाम्॥ खण्डस्य चीनीतिख्यातस्य विकृतिः॥
खण्डशाखा। स्त्री। मक्षिकाविष्ठायाम्॥
खण्डसरः। पुं। यवासशर्करायाम्॥
खण्डाभ्रम्। न। अभ्रलेशे। फटामेघ इतिभाषा॥ स्त्रीणां दन्तक्षतान्तरे॥
खण्डिः। स्त्री। खण्डने॥
खण्डिकः। पुं। कलाये॥ कन्दन्तरे॥ काचे। काच इतिभाषा॥ खण्डोऽस्यास्ति। अतइनिठनाविति ठन्॥
खण्डिका। स्त्री। ह्रस्वखण्डे॥
खण्डितः। त्रि। भेदिते॥ छिन्ने। छेदिते। लूने॥ यथा। चन्द्रे कलङ्कः सुजनेदरिद्रता विकासलक्ष्मीः कमलेषु चञ्चला। मुखेऽप्रसादः सधनेषु सर्वदा यशोविधातुः कथयन्ति खण्डितमिति॥ ज्ञातक्रमिते॥ खण्डाः सञ्जाता अस्य। ता० इतच्॥
खण्डिता। स्त्री। स्वीयादिनायिकाभेदे। भर्त्तुरन्यासङ्गज्ञानकलुषितायाम्॥ ज्ञाते ऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता इत्युक्तेः। अपिच। गोत्वा ऽन्यत्र निशां प्रातरायाते प्राणवल्लभे। अन्यासम्भोगचिह्नैस्तु खण्डितेर्ष्याकषायितेति॥
खण्डी। पुं। वनमुद्गे॥
खण्डिनी। स्त्री। पृथिव्याम्॥
खण्डिमा। पुं। खण्डतायाम्॥ खण्डस्य भावः। इमनिच्॥
खण्डीरः। पुं। पीतमुद्गे। सोनामूग इति भाषा॥
खतमालः। पुं। पयोधरे। मेघे॥ धूमे॥
खदिका। स्त्री। लाजासु। खोल इतिभाषा॥
खदिरः। पुं। खैरसार इतिप्रसिद्धे गायत्रिणि। बालतनयद्रुमे। दन्तधावने। वक्रकण्टे॥ खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत्। तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान्॥ श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत्॥ इन्द्रे॥ चन्द्रे॥ खदति। खद स्थैर्ये हिंसायाञ्च। अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिरा इतिकिरच्॥
खदिरपत्रिका। स्त्री। अरिखदिरे॥ लज्जालुलतायाम्॥
खदिरपत्री। स्त्री। लज्जालुलतायाम्॥
खदिरसारः। पुं। खादिरे। खैरसार

इतिभाषा॥

खदिरिका। स्त्री। लाजायाम्।

खदिरी। स्त्री। शाकभेदे। लज्जालुकायाम्। नमस्कार्याम्। छायाजोडी इतिभाषा॥ खदति। खदेःकिरच्। ङीप्॥

खदिरोपमम्। न। खदिराभे। श्वेतखदिरे। सोमवल्के। काँटावावला इतिगौडभाषा॥

खद्रूरवासिनी। स्त्री। तारायाम्। वुद्धशक्तिविशेषे॥

खद्योतः। पुं। ज्योतिरिङ्गणे कीटमणौ। प्रभाकीटे॥ खेद्योतते। द्युतदीप्तौ। अच्॥ खंद्योतयति वा अणु॥ सूर्ये॥

खद्योतनः। पुं। अर्के। सूर्ये॥ खस्य द्योतनः॥

खधूपः। पुं। अग्निक्रीडाविशेषे। हवाई इतिभाषा॥ यथा। उर्ध्वा प्रचक्षुर्गणस्य मार्गान् ख्यजान् वचन्मुर्मुमुचुः खधूपान्। इतिभट्टिः॥ वन्धूक इतिप्रसिद्धे बन्धूके॥

खनकः। पुं। उन्दुरौ॥ सन्धिचौरे॥ त्रि। अवदारके। खननकर्त्तरि॥ भूमिविदारके। स्वर्गादुत्खनिता भिन्ने॥ खनति। खनु अवदारणे। शिल्पिसंज्ञ्ञायांवुन्॥ स्त्रियांटापिच नञ्ङी खनकी॥

खननम्। न। विदारणे। खोदना इतिभाषा॥

खनयित्री। स्त्री। अस्त्रप्रभेदे॥

खनिः। स्त्री। आकरे। गङ्गायाम्। धातुरत्नाद्युत्पत्तिस्थाने॥ खन्यते। खनु०। खनिकष्यज्यसीति इः। खनने॥

खनित्रम्। न। अवदारणे। कुद्दाल इतिभाषा॥ खन्यते ऽनेन। खन खनने। अर्त्तिलूधूसूखनि इत्रः॥

खनित्रिमः। त्रि। खननेननिर्वृत्ते॥

खनी। स्त्री। खनिः॥ कृदिकारादिति पाक्षिकोङीष्॥

खपाथ्यः। पुं। ग्रहे॥ खस्यपाथ्यः॥

खपुरः। पुं। क्रमुके। गुवाके। सुपारी इति भाषा॥ भद्रमुस्तके॥ व्यालमवे॥ न। घटे॥ गन्धर्वपुरे। नभःपर्य्याम्। हरिश्चन्द्रपुरे। हरचंद्रावती इति भाषा॥ त्रि। अलसके॥ खम् इन्द्रियम् आकाशं वा पिपर्त्ति। पृ पालनपूरणयोः। मूलविभुजादित्वात् कः। उदोष्ठ्यपूर्वस्य॥

खभ्रान्तिः। पुं। चिल्ले। चील इति प्रसिद्धे खगे। नभो भ्रमे॥ खेआकाशे भ्रान्तिर्भ्रमणं यस्य॥

खमणिः। पुं। सूर्ये॥ खस्यमणिरिव॥

खमीलनम् । न । तन्द्रायाम् ॥

खमूर्त्तिः । स्त्री । वारिपर्ण्याम् । कुम्भिकायाम् ॥

खमूलिका । स्त्री ।
खमूली । स्त्री । } वारिपर्ण्याम् ॥

खरः । पुं । गर्द्दभे । रासभे ॥ खं मुखविलमतिशयितमस्य । रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानमिति रः ॥ घर्मे ॥ राक्षसान्तरे । रावणभ्रातरि दैत्ये ॥ कण्टकिवृक्षविशेषे ॥ कङ्के ॥ काके ॥ कुररपक्षिणि ॥ २५ वत्सरे ॥ उपद्रुतं जगत्सर्वं तस्करैर्मूषिकैः खगैः । पीडिताश्च प्रजाः सर्वा देशभङ्गः खरे प्रिये ॥ पश्चिमद्वारगृहे ॥ रवेःपार्श्वगे ॥ तिग्मे । तीक्ष्णे ॥ त्रि । तद्वति ॥ दुःस्पर्शे ॥ कठिने ॥ यथा । खरविशदमभ्यवहार्यं भक्ष्यमिति ॥ खमिन्द्रियं राति अभिभवति । रा० । कः ॥

खरकाष्ठिका । स्त्री । बलायाम् ॥

खरकुटी । स्त्री । नापितशालायाम् ॥

खरकणः । पुं । तित्तिरिखगे ॥

खरगन्धा । स्त्री । नागबलायाम् ॥

खरगेहम् । न ।
खरगृहः । पुं । } गर्द्दभशालायाम् ॥

खरघातनः । पुं । नागकेशरे ॥

खरच्छदः । पुं । उलखड इति गौडभाषाप्रसिद्धे तृणविशेषे । उलूके ॥ इत्कटे । ओकडा इति गौडभाषा ॥ कुन्दरतृणे ॥ शाखोटे ॥ भूमीसहे ॥

खरणाः । त्रि । खरणसे ॥ खरा तीक्ष्णा नासिकास्य । खुरखराभ्यां वा नस् । पूर्वपदादिति णत्वम् ॥

खरणसः । त्रि । तीक्ष्णनासिके । खरणसि । खरा तीक्ष्णा नासिकास्य । खुरखराभ्यां वा नसिति पक्षे अन्नासिकायाः इत्यच् नसादेशश्च । णत्वम् ॥

खरत्वक् । स्त्री । अलम्बुषायाम् । लक्ष्मालुप्रभेदे ॥

खरदण्डम् । न । पद्मे ॥

खरदला । स्त्री । काष्ठोदुम्बरे ॥

खरदूषणः । पुं । धत्तूरे । धुस्तूरे ॥ खरेणसहदूषणे ॥ दोषबहुले ॥

खरध्वंसी । पुं । रघूत्तमे । श्रीरामचन्द्रे ॥ खरं ध्वंसयति । ध्वंसु० सुपीति णिनिः ॥

खरनादिनी । स्त्री । रेणुकानामगन्धवस्तुनि ॥

खरपत्रः । पुं । शाकाख्यद्रुमे ॥ क्षुद्रपत्रतुलस्याम् । मरुबके ॥ यावनालशरे ॥ खराणि पत्राणि यस्य ॥

खरपत्रकः । पुं । तिलकवृक्षे ॥

खरपत्री । स्त्री । गोजिह्वायाम् । द्राविकायाम् । अधःपुष्प्याम् ॥ काकोदुम्बरिकायाम् ॥

खरपात्रम् । न । लौहपात्रे ॥

खरपादाढ्यः । पुं । कपित्थद्रुमे ॥

खरपुष्पः । पुं । मरुवके ॥

खरपुष्पा । स्त्री । वर्वराशाके । कवर्याम् । वावुइतुलसो इति गौडभाषा ॥ खराणि पुष्पाण्यस्याः ॥

खरपुष्पी । स्त्री । वर्वराम् ॥ पाककर्णे तिङीष् ॥

खरप्रियः । पुं । कपोते । पारावते ॥

खरमञ्जरी । स्त्री । अपामार्गे ॥ खरा मञ्जरिरस्याः गौरादित्वान्ङीष् ॥

खररोमा । पुं । नागभेदे ॥

खरवल्लिका । स्त्री । नागबलायाम् ॥

खरशब्दः । पुं । कुररखगे ॥ खरस्य शब्दे ॥

खरशाकः । पुं । फञ्जिकायाम् । भार्ग्याम् ॥

खरशालम् । न । ⎫ खरगृहे ॥ खरा

खरशाला । स्त्री । ⎭ शाला विभाषासेनेतिपाक्षिकंक्लीवत्वम् ॥ चि । खरशालेजाते ॥ स्थानान्तगोशालेति जातार्थेस्यलुक् ॥

खरस्कन्धः । पुं प्रियालवृक्षे ॥

खरस्कन्धा । स्त्री । खर्जूर्य्याम् ॥

खरस्वरा । स्त्री । वनमल्लिकायाम् ॥

खरा । स्त्री । देवताडवृक्षे ॥ तीक्ष्णत्वात् ॥

खरांशुः । पुं । सूर्ये ॥ खरास्तीक्ष्णा अंशवोऽस्य ॥

खराग्निः । पुं । अर्कार्थमग्निविशेषे ॥

खराब्दाङ्कुरकम् । न । वैदूर्यमणौ ॥

खराश्वा । स्त्री । मयूरशिखायाम् । बड्डजटा इति गौडभाषा । कारव्याम् । केचयमानिकेति केचित् ॥ खरमश्नुते खरैरश्यते वा । अशूव्याप्तौ स्कुलेच अशभोजनेवा । उल्ल्वाद्यश्वेतिवः ॥

खराह्वा । स्त्री । अजमोदायाम् ॥

खरिका । स्त्री । कस्तूरीविशेषे । सा तु चूर्णाकृतिरिति जरानिर्घण्टुः ॥

खरी । स्त्री । गर्दभ्याम् ॥

खरुः । पुं । दर्पे ॥ हरे ॥ हये ॥ दन्ते ॥ श्वेतवर्णे ॥ कामदेवे पीतिम्नीच्चिन ॥ त्रि । श्वेते ॥ निषिद्धकरचौ ॥ निर्वोधे । मूर्खेपीतिदशपादीवृत्तिः ॥ क्रूरे ॥ स्त्री । पतिम्वराकन्यायाम् ॥ खसंयोगोपधात्वेतिनङीष् ॥ खनति । खनु । खञ्जवगुङ्कुपीयुनीलङ्गुलिगु इतिकुः रेफश्चान्तादेशः ॥

खर्जनम् । न । कण्डूयने ॥

खर्ज्जिका । स्त्री । अवदंशे ॥

खर्ज्जुः । पुं । खर्ज्ज्वाम् ॥

खर्ज्जूः । स्त्री । कीटान्तरे । कानखजूरा गोजर इतिचभाषा ॥ खर्ज्जूरीपादपे ॥ कण्डूाम् ॥ खर्ज्जनम् खर्ज्जति वा । खर्ज्जपूजनेच चाद्यथने । कृषिचमितनिधनिसर्ज्जिखर्ज्जिभ्यऊः ॥

खर्ज्जूघ्नः । पुं । चक्रमर्द्दे ॥ धत्तूरे ॥ अर्क्कवृक्षे ॥

खर्ज्जूरः । पुं । वृश्चिककीटे ॥ न । रूप्ये ॥ खर्ज्जूरफले ॥ पुं । स्त्री । तृणद्रुमे ॥ खर्ज्जति । खर्ज्ज० । खर्ज्जपिञ्जादिभ्यऊरोलचाविस्थूरः ॥ खर्ज्जूरस्य फलम् । फलेविहितस्याणोलुप् ॥

खर्ज्जूरी । स्त्री । वनखर्ज्जूरे ॥ जातेरस्त्रीतिङीष् ॥ गौरादित्वात् ॥

खर्ज्जूरीत्रितयम् । न । छोहारा पिण्डखर्ज्जूरी क्षुद्रखर्ज्जूरिका तथा । खर्ज्जूरीत्रितयं प्रोक्तं ग्रन्थेभावेननिर्म्मिते ॥ खर्ज्जूरीत्रितयं शीतं मधुरं रसपाकयोः । स्निग्धं रुचिकरं हृद्यं क्षतक्षयहरं गुरु ॥ तर्पणं रक्तपित्तघ्नं पुष्टिविष्टम्भशुक्रदम् । कोष्ठमारुतकृद्बल्यं वान्तिवातकफापहम् ॥ ज्वराभिघातक्षुत्तृष्णाकासश्वासनिवारणम् । मदमूर्च्छामरुत्पित्तमद्योद्भवगदान्तकृत् ॥ महतीभ्यां गुणैरल्पा स्वल्पाखर्ज्जूरिकास्मृता ॥ खर्ज्जूरीसम्भवंतोयन्तुमदपित्तकरम्भवेत् । वातश्लेष्महरंरुच्यंदीपनंबलशुक्रकृत् ॥

खर्प्परः । पुं । तस्करे ॥ धूर्त्ते ॥ भिक्षाभाण्डे । भिक्षापात्रे ॥ कपाले । भिन्नभाण्डशकले ॥ न । धातुभेदे । खर्परीतुत्थे ॥ अस्यशोधनम् । नरमूत्रे च गोमूत्रे सप्ताहं रसकं पचेत् । दोलायन्त्रेण शुद्धः स्यात् ततःकार्य्येषु योजयेत् ॥ खर्परं कटुकं क्षारं कषायं वामकं लघु । लेखनं भेदनं शीतं चक्षुष्यं कफपित्तहृत् । विषाश्मकुष्ठकण्डूनां नाशनं परमंमतम् ॥

खर्प्परी । स्त्री ।
खर्प्परीतुत्थम् । न । } खर्परीरसके । चक्षुष्ये ॥

खर्ब्बः । पुं । कुब्जकवृक्षे ॥ निधिभेदे ॥ न । दशहस्ते । दशाब्जसंख्यायाम् । १०००००००००० ॥ त्रि । नीचे । वामने ॥ खर्ब्बति । खर्ब्बगतौ । पचाद्यच् ॥

खर्ब्बटः । पुं । न । गिरितटग्रामे ॥ एकतो यत्रतुग्रामो नगरञ्चैकतः स्थितम् । मिश्रन्तु खर्ब्बटं नाम नदीगिरिसमाश्रयम् ॥ चतुश्शतग्राममध्यस्थले ॥

खर्ब्बशाखः । त्रि । ह्रस्वे । वामने ॥ ह्र

स्वप्रासख्रुमे ॥

खर्दा । स्त्री । खर्इप्रमाणायांभुवि ॥

खर्दुरा । स्त्री । तरर्दीदृक्षे ॥

खर्जूजम् । न । दृणाभुले सताफलवि शेषे ॥ खर्जूंजं मूत्रलं वल्यं कोष्ठशुद्धि करं गुरु । स्निग्धं स्वादुतरं शीतं वृष्यं पित्तानिलापहम् ॥ तेषु सप्ता त्मधुरं सक्षार क्षारसाङ्गवेत् । रक्त पित्तकरं तत्सुमूत्रकृच्छ्रकरंपरम् ॥

खर्मम् । न । पैारूषे ॥ कौषलांशुके । क्षौमे ॥

खलः । पुं । सूर्य्ये ॥ तमालवृक्षे ॥ धत्तू रदृक्षे ॥ न । भुवि ॥ स्थाने ॥ कल्के ॥ खलाधाने । सस्यमर्द्दनस्थाने ॥ त्रि । क्रूरे ॥ कर्णेजपे । नीचे । परस्पर भेदके ॥ अधमे ॥ खलति । खलस ञ्चये । पचाद्यच् ॥ खं छिद्रंलातिवा । लादाने । कः ॥

खलता । स्त्री । खलत्वे ॥ अद्रोहिणि तथा शान्ते विद्वेषः खलता स्मृता ॥ भास्कर्मयोलत् ॥ गगनलतिकाया म् ॥ खस्यलता ॥

खलतिः । पुं । खल्वाटे । शिपिविष्टे । ऐन्द्रलुप्तिके । इन्द्रलुप्तरोगवति ॥ खलति । खलसञ्चलने । खलति रिति खलतेः सलोपोऽतच् प्रत्य यान्तस्य दृत्वञ्चनिपात्यते ॥

खलतिकः । पुं । पर्वते ॥

खलपूः । त्रि । बहुकरे । भूसंमार्जय ति । भूमिमार्जनकारिणि । फरास झाडूबरदार इति भाषा ॥ खलंभू स्थानकल्केषु । खलंपुनाति । पूञ् पवने । क्विप् ॥

खलमूर्त्तिः । पुं । पारदे ॥

खलाधानम् । न । खले । शस्यमर्द्दन स्थाने खलान इति भाषा ॥

खलाधारा । स्त्री । तैलपायिकायाम् । तिलचट्टा इति भाषा ॥

खलिः । पुं । तैलकिट्टे । खल इति भाषा ॥

खलिनः । पुं । न । कविकायाम् ॥ ख लिनं कयाय इत्यादितिलक्ष्यम् ॥

खलिनी । स्त्री । तालमूल्याम् ॥ खल वृन्दे । खल्यायाम् । धौनींके अनेक खल्यान इति भाषा ॥ खलानांसमू हः इनित्रकव्यचश्चेतीनिः ॥

खलिवर्द्धनः । पुं । दन्तरोगविशेष ॥ मारुतेनाधिको दन्तो जायते तीव्र वेदनः । खलिवर्द्धन संज्ञोऽसौ जा ते रुक् च प्रशाम्यति ॥

खलिशः । पुं । खलिशामाछ इति गौ भाषा प्रसिद्धे मत्स्ये । कङ्कोटे । खलेशये ॥

खलीकारः । पुं । अपकारे । क्रोड़े ॥

निर्भर्त्सने ॥

खलीनः । पुं । न । कविकायाम् ॥ खे ऽश्वमुखबिले लीनः ॥

खलीनकः । पुं । कविकायाम् । कडियाली इति गौडभाषा ॥ स्वार्थे कन् ॥

खलु । अ । वाक्यभूषायाम् ॥ जिज्ञासायाम् ॥ सान्त्वने ॥ वीप्सायाम् ॥ माने ॥ निषेधे ॥ पदपूरणे ॥ वाक्यपूरणे ॥ अनुनये ॥ निश्चये ॥ खलति । खलसञ्चये । बाहुलकात् उः ॥

खलुक् । पुं । अन्धकारे ॥ जान्तः ॥

खलुरेषः । पुं । मृगभेदे ॥

खलूरिका । स्त्री । शस्त्राभ्यासभूमौ ॥

खलेवाली । स्त्री । मेधिकाष्ठे ॥ वली वर्द्दबन्धनाय निखातामेढिः खलेवालीतिमीमांसकाः ॥

खलेशः । पुं । } खलिशे । खले

खलेशयः । पुं । } शये ॥

खल्या । स्त्री । खलिन्याम् ॥ खलानां समूहः । खलगोरथादितियत् ॥ चि । खलहिते ॥ खलायहितम् । खलयवमाषतिलवृषब्रह्मणश्चेतियत् ॥

खल्लः । पुं । वस्त्रभेदे ॥ गर्त्ते ॥ निम्ने ॥ चर्मणि ॥ चातके ॥ औषधमर्द्दनपात्रे । खरल इति भाषा ॥ द्वतौ । खाल पयखालमसक इतिचभाषा ॥

खल्ली । स्त्री । हस्तपादावमर्द्दनाख्यरोगे ॥ तस्यलक्षणं यथा । खल्लीतुपादजङ्घोरुकरमूलावमोटनी ॥ तस्यौषधं यथा । कुष्ठसैन्धवयोः कल्कश्चुक्रतैलसमन्वितः । सुखोष्णोमर्द्दने योज्यः खल्लीशूलनिवारणः ॥

खल्लीटः । चि । खलतौ । खल्वाटे ॥

खल्वपि । अ । निश्चयार्थे ॥ खलुचअपिचेति विग्रहः ॥

खल्वाटः । पुं । इन्द्रलुप्ते । निष्केशशिरसि ॥

खल्विका । स्त्री । अम्बरीषे । पिष्टकादिभर्जनपात्रे ॥

खवल्लरी । स्त्री । खवल्ल्याम् ॥

खवल्ली । स्त्री । आकाशवल्ल्याम् ॥ खवल्ली ग्राहिणी तिक्ता पिच्छिलाऽक्ष्यामयापहा । तुवराऽग्निकरी हृद्यापित्तश्लेष्मामनाशिनी ॥

खवारि । न । दिव्योदके ॥

खवाष्पः । पुं । रजनीजले । हिमे । ओस इतिभाषा ॥

खशः । पुं । देशविशेषे । हिमालयप्रान्तैकदेशे ॥ खशदेशोद्भवे । आदौ क्षत्रिये पश्चाद्विहितक्रियालोपाद्ब्राह्मणानाञ्च याजनाध्यापनप्रायश्चित्ताद्यदर्शनाभावेन शनैः शनैः शूद्रतामापन्ने इत्युपदवाच्ये ॥

खसा । स्त्री । तालपर्ण्याम् । मुराना मगन्धद्रव्ये ॥ कश्यपपत्न्यां दक्षकन्यायाम् । यक्षरक्षसांमातरि ॥

खशेटः । पुं । खलेशे । खलिशामच्छी इतिभाषा ॥

खश्वासः । पुं । पवने । वायौ ॥

खष्पः । पुं । क्रोधे ॥ बलात् कृतौ ॥ खनति । खनु अवदारणे । खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः इतिपः नि पातनात् खनतेर्नकारस्यषत्वम् ॥

खसः । पुं । पामरोगे । विचर्चिकायाम् ॥ व्रात्यात् क्षत्रियात् सवर्णायामुत्पन्ने सङ्कीर्णजातौ । तस्यनामानियथा । झल्लो मल्लश्च राजन्यात् व्रात्याल्लिच्छिवि रेवच । नटश्चकरणश्चैव खसो द्रविड एवचेति ॥

खसकन्दः । पुं । क्षीरकञ्चुकी वृक्षे ॥

खसतिलः । पुं । खाखसे । खस्खसे ॥

खसमः । पुं । सौगते । बुद्धे ॥

खसम्भवा । स्त्री । आकाशमांस्याम् ॥

खसर्पणः । पुं । बुद्धविशेषे ॥

खसबीजम् । न । खाखसतिले ॥ खसबीजानि बल्यानि वृष्याणि सुगुरूणि च । जनयन्ति कफं तानिशमयन्ति समीरणम् ॥ तैलन्तु खसबीजानां बल्यं वृष्यं गुरु स्मृतम् । वातघ्नं कफकृच्छीतं स्वादुपाकरसन्ततत् ॥

खसा । स्त्री । राक्षसमातरि ॥

खसात्मजः । पुं । राक्षसे ॥ खसायाः आत्मजः ॥

खसूमः । पुं । विप्रचित्तेःपुत्रे ॥

खस्खसः । पुं । वृक्षविशेषे । सूक्ष्मबीजे । पोस्त इतिभाषा ॥

खस्खसरसः । पुं । अहिफेने । अफीम् इतिभाषा ॥

खस्तनी । स्त्री । भूमौ । धरायाम् ॥

खस्फटिकः । पुं । चन्द्रकान्तमणौ ॥ सूर्यकान्तमणौ ॥

खाखसः । पुं । खसतिले । खस्खसे ॥ स्यात्खाखसफलोद्भवं वल्कलं शीतलं लघु । ग्राहि तिक्तं कषायञ्च वातकृत् कफकासहृत् ॥ धातूनां शोषकं रूक्षं मदकृद्वाग्निवर्द्धनम् । मुहुर्मोहकरं रुच्यं सेवनात् पुंस्त्वनाशनम् ॥

खाखसतिलम् । न । खसबीजे ॥

खाङ्गाहः । पुं । श्वेतपिङ्गलाश्वे ॥

खाजिकः । पुं । लाजेषु ॥

खाटिः । स्त्री । असद्गृहे ॥ किणे ॥ शवरथे ॥ खटति । खट काङ्क्षायाम् । वाहुलकादिञ् ॥

खाटिका । स्त्री । } खाटिशब्दार्थे ॥
खाटी । स्त्री । }

खाडवम् । न । चूर्णविशेषे ॥ यथा । कोशाम्रमलकजं चूर्णं गुडक्षौद्रान्वित

रान्वितम् । मातुलुङ्गरसेनाक्तं शोषितं सूर्यरश्मिभिः ॥ एवन्तु बहुशोऽभ्यक्तं शोषितञ्च पुनःपुनः । ईषल्लवणसंयुक्तं चूर्णं खाण्डवमुच्यते ॥ खाण्डवं मुखवैशद्यकारकं रुचिधारणम् । हृद्रोगशमनञ्चेति मुखवैरस्यनाशनम् ॥ भोजनान्ते विशेषेण भोक्तव्यं खाण्डवं सदा ॥

खाण्डवः । पुं । इन्द्रस्यवने ॥

खाण्डवी । स्त्री । पुरीविशेषे ॥

खाण्डिक्यः । पुं । खण्डपाले ॥ खण्डजीविनि ॥ न । खण्डिकानां समूहे ॥ खण्डिकादिभ्यश्चेत्यञ् ॥

खातम् । न । पुष्करिण्याम् ॥ शतेन धनुर्भिः पुष्करिणीति तत्परिमाणम् ॥ यथा । चतुर्विंशाङ्गुलो हस्तो धनुस्तच्चतुरुत्तरः । शतधन्वन्तरञ्चैव तावत् पुष्करिणी शुभा ॥ गर्त्ते ॥ खनु० । क्तः । जनसनखनामित्यात्वम् ॥

खातकः । पुं । अधमर्णे । रिणी इति भाषा ॥ यथा । उत्तमर्णो धनस्वामी अधमर्णस्तु खातक इति कश्चित् ॥ न । खातार्थे ॥ परिखायाम् । खाई इतिभाषा ॥

खातभूः । स्त्री । परिखायाम् । प्रतिकूपे ॥

खानम् । न । खाते ॥ खनिचे ॥ जलाधारे ॥ खन्यते । खनु० । उषिखनिभ्यांकिदितिष्ट्रन् ॥

खादकः । त्रि । भक्षके ॥ यथा । विक्रये गोविनिमये हत्वा गोमांसखादके । व्रतं चान्द्रायणं कुर्य्याद्वधे साक्षाद्वधीभवेदितिगोभिलः ॥ ऋणग्रहीतरि ॥ खादति तच्छीलः तद्धर्मः तत्साधुकारी वा । खाद० । निन्दहिंसेतिवुञ् ॥

खादनः । पुं । दन्ते ॥ न । आहारे । भक्षणे । खाना इतिभाषा ॥

खादितः । त्रि । गिलिते । खाया इति भाषा ॥ खाद्यतेस्म । खाद० । क्तः ॥

खादिरः । पुं । यूपे ॥ त्रि । खदिरविकृतौ ॥ खदिरस्यविकारः । पलाशादिभ्यो वेत्यञ् ॥ खदिरसार इतिप्रसिद्धे । अद्भुतसारे ॥

खादिरसारः । पुं । खदिरवृक्षनिर्यासे । खादिरे । सत्सारे ॥

खादुकः । त्रि । हिंसालुके ॥ इतिहारावली ॥

खाद्यः । त्रि । भक्षणीयद्रव्ये ॥

खानः । पुं । हिन्दुधर्मप्रलोमरिम्लेच्छजाति विशेषे ॥

खानिः । स्त्री । खनौ । धातुरत्नाद्याकरे ॥ खनु० । ण्यन्तादचइः ॥

खानिकम् । न । कुड्यच्छेदे । भीतका

गढा इति भाषा। आला इति च॥

खानोदकः। पुं। नारिकेले। शिरःफले॥

खापगा। स्त्री। गङ्गायाम्॥

खारः। पुं। खारीपरिमाणे॥ इति च-न्द्रचन्द्रः॥

खारिः। स्त्री। खार्य्याम्। द्रोणचतुष्टये॥

खारिकम्। न। मद्यापारे वते॥

खारिम्पचः। त्रि। खारीपरिमितान्नादिपाककर्त्तरि॥ पुं। कटाहे॥ खारिम्पचतीति विग्रहे। परिमाणे पचः इति पचेः कर्त्तरि खश्॥

खारी। स्त्री। धान्यमानभेदे॥ यदाहुः। पलं प्रकुञ्चकं मुष्टिः कुडवस्तच्चतुष्टयम्। चत्वारः कुडवाः प्रस्थश्चतुः प्रस्थमथाढकम्॥ अष्टाढको भवेद्द्रोणो द्विद्रोणः शूर्प उच्यते। सार्द्धशूर्पो भवेत् खारी द्वे खार्य्यौ गोण्युदाहृता॥ तामेव भारं जानीयात् वाहोभारचतुष्टयम्। इति भरतः॥ षोडशद्रोणपरिमाणे। इति लीलावती॥ गोणीचतुष्टये॥ तत्तु षट्सवचस्थिकचतुःसहस्रपलानीति वैद्यकपरिभाषा॥ द्रोणचतुष्टये॥ यथा। चतुराढकोभवेद्द्रोणः खारीद्रोणचतुष्टमितिस्मृतिः॥

खारीकम्। त्रि। खारीवापे। खारीपरिमितव्रीह्यादिवापयोग्ये क्षेत्रे॥ खार्य्याः वापः। खारीपरिमाणमस्य वा। खार्य्याईकन्निष्कार्य्यायईकन्॥

खारीवापः। त्रि। खारीके॥ खार्य्या-वापः॥

खाक्कीरः। पुं। गर्दभजातिशब्दे॥

खार्जूरः। पुं। वेधवि०॥ यथा। व्याघातगण्डव्यतिपातपूर्वशूलान्त्यवज्रेपरिघातिगण्डे। योगे विरुद्धे त्वभिजित्समेते खार्जूरमर्क्षं विषमे शशीचेत्॥ यस्मिन्दिने व्याघातादिविरुद्धयोगे सति अर्क्षं नक्षत्रात् चन्द्रोऽभिजित्समेते विषमे विषमसंख्यकनक्षत्रे चेत् स्यात् तदा खार्जूराख्यो दोषः। यदा तु समः स्यात् तदा न दोषः॥

खार्जूजेयम्। न। रसालप्रभेदे॥ यथा। मधुरदधनिमध्ये शर्करां सन्नियोज्य शुचि विदलितखण्डं प्रक्षिपेत् खार्जुजेयम्। करविलुलितमेणीवासितं नाभिगन्धैर्जिगमिषुजठराग्निं स्थापयत्येव नूनम्॥ रसालं खार्जुजस्येदं विष्टम्भि रुचिकारकम्। हृद्यञ्च कफदं बल्यं पित्तघ्नं मूत्रकृद्दरम्॥

खिखिः। स्त्री। उल्कामुख्याम्। लोमः

डी इतिभाषा ॥

खिङ्खिरः । पुं । उल्कामुख्याम् ॥ खट्वाङ्गे । शिवस्यास्त्रविशेषे ॥ वारिवालके । ह्रीवेरे ॥

खिदिरः । पुं । इन्दौ । कुमुदबान्धवे ॥ खिद्यते । खिद दैन्ये । इषिमदिमुदिखिदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच् ॥

खिद्यमानः । त्रि । खेदयुक्ते । दैन्यग्रस्ते । उपतप्ते ॥

खिद्रः । पुं । रोगे ॥ दरिद्रे ॥ श्रमे ॥ खिद्यतेऽनेन । खिद० । स्फायितञ्चीतिरक् ॥

खिन्नः । त्रि । अलसे ॥ खेदयुक्ते । दैन्यग्रस्ते ॥ खिद० । क्तः ॥

खिरहिट्टी । स्त्री । महासमङ्गायाम् ॥

खिलम् । त्रि । हलादिना ऽकृष्टभूमौ । अप्रहते ॥ पुं । सारसङ्ग्रहे ॥ वेधसि ॥ शून्ये ॥ न्यूने ॥ पूर्वत्रानुक्तं परिशिष्टं वस्तु खिलशब्दवाच्यमिति व्याख्यातारः ॥ श्रीहृक्तशिवसङ्कल्पादौ ॥ खिलो नारायणः प्रोक्त इषवस्तद्गुणाः स्मृताः । इति खिलेषु हरिवंशे इत्यत्र नीलकण्ठटीका ॥ खिलति । खिल उञ्छे । इगुपधेतिकः ॥ खिल्यतेऽस्मिन्वा । हलश्चेतिघञ् । संज्ञापूर्वकत्वान्नगुणः ॥

खिलीकृतः । त्रि । दुर्गमीकृते ॥

खुङ्गाहः । पुं । कृष्णवर्णघोटके ॥

खुज्जाकः । पुं । देवताडवृक्षे ॥ इति रत्नमाला । खुञ्जाक इति क्वचित्पाठः ॥

खुरः । पुं । कोलदले । नखीनामगन्धद्रव्ये ॥ शफे ॥ खट्वादीनां पादुके । पाया इतिभाषा ॥ खुरति । खुर च्छेदने । इगुपधज्ञाप्रीकिरःकः ॥ यद्वा । क्षुरज्जेन्द्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरभेलशुक्रशुक्लगौरवन्नेरामालाः । इतिरन् रलोपो गुणाभावश्च ॥

खुरणाः । त्रि । खुरणसे ॥ खुरइवनासिकास्य । खुरखराभ्यांवानस् । पूर्वपदादितिणत्वम् ॥

खुरणसः । त्रि । खुरणसि । पशुखुरसदृशनासिके । चिपटीनाकवाला इतिभाषा ॥ खुरइव नासिकाऽस्य । खुरखराभ्यांवानसितिपक्षे अच् नासिकायाद्दृश्यच् नसादेशश्च । पूर्वपदात् संज्ञायामगइतिणत्वम् ॥

खुरली । स्त्री । शरशिक्षणे । शराभ्यासे ॥

खुराका । पुं । पशौ ॥

खुरालकः । पुं । लौहमयेवाणे ॥

खुरालिकः । पुं । ग्रामणीभाण्डनारा

चे । नापितकांचुरधान इतिभाषा ॥ उपधाने ॥ खुरालिकोऽपिपाठः ॥

खुरासानः । पुं । देशविशेषे ॥ हिङ्गुपीठं समारभ्य मक्केशान्तं महेश्वरि । खुरासानाभिधो देशो म्लेच्छमार्गपरायणः ॥

खुल्लम् । न । नखीनामगन्धद्रव्ये ॥ त्रि । नीचे ॥ अल्पे ॥ खदनम् । खदहिंसायाम् । संपदादित्वात् क्विप् । पृ० । खुदंलाति । कः ॥

खुल्लकः । पुं । नीचे ॥ स्वल्पे ॥ खुदंलाति । ला० । कुन् ॥

खुल्लमः । पुं । अयने । पथि । मार्गे ॥

खेखीरकः । पुं । सशब्दयष्ट्याम् ॥

खेगमनः । पुं । कालकण्ठविहगे ॥

खेचरः । पुं । विद्याधरे ॥ ग्रहे ॥ शिवे ॥ पारदे ॥ त्रि । आकाशचारिणि ॥ न । कासीसे ॥

खेचरी । स्त्री । मुद्राविशेषे ॥ यथा । चित्तं चरति खे यस्मा ज्जिह्वाचरति खेगता । भ्रुवोरन्तर्गता दृष्टिर्मुद्राभवति खेचरी ॥ नचासमं सिद्धसमं नकुम्भसदृशोऽनिलः । नखेचरी समा मुद्रा सत्यं सत्यञ्च नारदेति ॥

खेटः । पुं । ग्रहे ॥ कफे ॥ यष्ट्याम् ॥ ग्रामभेदे । कर्षकग्रामे ॥ पुं । न० । चर्मणि ॥ त्रि । स्फारे ॥ मृगव्ये ॥

अर्वति । अधमे ॥ खेटति । खिटत्रासे । पचाद्यच् ॥

खेटकः । पुं । कर्षकग्रामे ॥ यष्ट्यभिधाने ऽस्त्रे ॥ न । चर्मणि । फलके ॥ मूलार्थवृद्धौ । वसुनन्दके ॥ स्वार्थे कः ॥

खेटितालः । पुं । खेडितालो ॥

खेटी । पुं । नागरे ॥ त्रि । खेटवति ॥

खेड्डम् । न । तृण विशेषे ॥

खेडितालः । पुं । वैतालिके ॥

खेदः । पुं । अवसादे ॥ शोके ॥ निर्वेदे ॥ खेदयतीति खेदो रोग इतिकैयटः ॥

खेदितः । त्रि । खेदयुक्ते ॥

खेदिनी । स्त्री । लतायाम् ॥ अशनपर्याम् ॥

खेयम् । न । परिखायाम् । दुर्गादिपरितः खाते । खाई इति भाषा ॥ खन्यते । खनु० । ईचखन इतिक्यप् । ईकारश्चान्तादेशः । गुणः ॥ त्रि । खननीये ॥

खेलनम् । न । क्रीडने । विहरणे ॥

खेलनी । स्त्री । शारिफले ॥ शारौ ॥

खेला । स्त्री । कूर्दने । क्रीडायाम् ॥ खेलनम् । खेलृचलने । गुरोश्चेत्यः ॥

खेलिः । स्त्री । गीते ॥ वाणे ॥ सूर्ये ॥ पक्षिणि ॥ जन्तौ ॥

खेसरः । पुं । खच्चर इति प्रसिद्धे अश्वखरजे । मिश्रशब्दे । अश्वगे ॥

खोङ्गाहः । पुं । श्वेतपिङ्गलाश्वे ॥

खोटिः । स्त्री । चतुरायां नार्याम् ॥ इतिशब्दमाला ॥ पालङ्क्याम् ॥

खोटी । स्त्री । पालङ्कीवृक्षे ॥ चतुरायाम् ॥

खोडः । त्रि । खञ्जे । खोडा इतिप्रसिद्धे विकलगतौ ॥ खोडति । खोडृङ्गति प्रतिघाते । पचाद्यच् ॥

खोडकशीर्षकम् । न । प्राकाराग्रे । कपिशीर्षे ॥

खोरः । त्रि ।
खोरकः । त्रि । } खञ्जे ॥

खोलः । त्रि । खञ्जे ॥ दृढे ॥ खोडतेर च । डलयोरभेदः ॥

खोलकः । पुं । पाके ॥ शिरस्त्रे ॥ वल्मीके ॥ पूगकोषे । सुपारीकाछिलका इतिभाषा ॥

खोल्मुकः । पुं । मङ्गलग्रहे ॥

ख्यातः । त्रि । प्रतीते । प्रथिते । ख्यातियुक्ते ॥ आख्यायि । ख्याप्रकथने । चक्षिङःख्याञ्वा । क्तः । नध्याख्येति नत्वाभावः ॥

ख्यातगर्हणः । त्रि । विख्यातनिन्दने । अवगीते ॥ ख्याता गर्हणायस्य ॥

ख्यातगर्हितः । त्रि । ख्यातगर्हणे ॥

ख्यातिः । स्त्री । प्रसिद्धौ । प्रथायाम् ॥ आख्यायाम् । नामनि ॥ ज्ञाने ॥ ख्यातिस्तुर्विधा । असख्यात्यात्मख्यात्यसत्ख्यात्यन्यथाख्यातिभेदात् । ख्यानम् । ख्याप्रकथने । चक्षिङादेशो वा । क्तिन् ॥

ख्यापनम् । न । प्रकाशने ॥

ख्यापितः । त्रि । प्रकाशिते ॥

गः

गः । पुं । गकारे ॥ गणेशे ॥ गन्धर्वे ॥ गुर्वक्षरे ॥ न । गीते ॥ गम्यते । गम्लृगतौ । गमेर्डः ॥

गगनम् । न । अन्तरिक्षे । नभसि । शून्ये ॥ गच्छन्त्यनेनास्मिन्वा । गमेर्गश्चेतियुच् गश्चान्तादेशः ॥

गगनगः । पुं । रव्यादिग्रहे ॥ विद्याधरादौ ॥

गगनध्वजः । पुं । मेघे ॥ दिवाकरे ॥

गगनाङ्गनम् । न । मात्रावृत्तभेदे ॥ यथा । षट्कल मादौ विरचय शेषे रगणविभूषितं मध्ये नियमविहीनं द्वादशके यतिसङ्गतम् । फणिपतिपिङ्गलवर्णितं कविकुलहृदयरञ्जनं पञ्चाधिकविंशतिकलवृत्तमिदं गगना

ङ्गनम् ॥ यथा । गिरिवरतनयाकुचरसपानविमुद्रितलोचने निश्वासितसमीरणदूरदुरितभवमोचने । अतिवत्सविचरदसुरवरतारितसुरवरनायके अनुगतजनतातारिणि मम नतिरस्तु विनायके ॥

गगनाध्वगः । पुं । सूर्ये ॥

गगनेचरः । पुं । ग्रहे ॥ नक्षत्रे ॥

गगनोल्मुकः । पुं । कुजे । मङ्गलग्रहे ॥

गगनोपमः । त्रि । सर्वगते ॥ गगनमुपमा यस्य सः ॥

गङ्गका । स्त्री । गङ्गायाम् ॥ अज्ञातार्थेकः । अभाषितपुंस्काच्चेति पाक्षिक इत्वाभावः ॥

गङ्गा । स्त्री । स्वनाम्नातिप्रसिद्धायां देवनद्याम् । भागीरथ्याम् ॥ विष्णुपादविनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम् । समन्ताद् ब्रह्मणः पुर्यां गङ्गा पतति वै दिवः ॥ सा तत्र पतिता दिक्षु चतुर्द्धा प्रतिपद्यते । सीता चालकनन्दा च वङ्क्षुर्भद्रा च वै क्रमात् ॥ ध्यानमस्या लिख्यते यस्य येन सा हृता भवेत् ॥ सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रां करधृतकलसोद्यत्सोत्पलाभीत्यभीष्टाम् । विधिहरिहररूपां सेन्दुकोटीरजूटां कलितसितदुकूलां जाह्नवीं तां नमामीति । गच्छ-

ति गम्यते ऽर्थिभिर्वा । गम्लृ० । गमनगम्योरितिगन् ॥

गङ्गाका । स्त्री । गङ्गायाम् ॥ अज्ञातार्थेकः । केण इतिह्रस्वः । आटाचार्याणामितिपाक्षिक आदादेशः ॥

गङ्गाक्षेत्रम् । न । गङ्गातीरविशेषे ॥ तीराद् गव्यूतिमात्रन्तु परितः क्षेत्रमुच्यते । अत्रयत्र कृतं कर्म गङ्गायां नात्र संशयः ॥ अत्रस्थास्त्रिदिवं यान्ति ये मृतास्ते ऽपुनर्भवाः ॥

गङ्गागर्भः । पुं । गङ्गायाः गर्भे ॥ स यथा । भाद्रकृष्णचतुर्दश्यां यावदाक्रमते जलम् । तावद् गर्भं विजानीयात् तदूर्द्धं तीरमुच्यते ॥ तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्मस्य विक्रयः ॥

गङ्गाचिल्ली । स्त्री । चिल्लविशेषे । देवट्याम् । विश्वकायाम् ॥

गङ्गाजः । पुं । कार्त्तिकेये । षडानने ॥ भीष्मे ॥ गङ्गाया जातः । जनी० । डः ॥

गङ्गाटेयः । पुं । चिङ्गिडिमाच् इतिगौडभाषाप्रसिद्धे मत्स्ये । गलाि ले ॥

गङ्गातीरम् । न । गङ्गागर्भादूर्द्ध्वप्रदेशे ॥ सार्द्धहस्तशतं यावद्गर्भतस्तीरमुच्यते । तीरे प्रतिग्रहस्त्याज्यस्त्याज्यो धर्मस्य विक्रयः ॥

गङ्गाधरः । पुं । शिवे ॥ अब्धौ ॥ धर-

ति । धृञ्० । अच् । गङ्गाया: धर: ॥ जीर्णातिसारनाशके चूर्णे ॥ यथा श्लोकिम्मराज: । धातक्यामलकी पयोधरशकीकट्वङ्गयष्टीमधुश्रीजम्बाम्रफलास्थिनागरविषाह्रीबेरलोध्रेन्द्रजै: । तुल्यांशं विहितं सतण्डुलजलं गङ्गाधराख्यं महच्चूर्णं तूर्णमपाकरोति सकलं जीर्णातिसारं परमिति ॥

गङ्गापत्री । स्त्री । वृक्षविशेषे । गन्धपत्रिकायाम् ॥

गङ्गापुत्र: । पुं । भीष्मपितामहे ॥ वर्णसङ्करजातिविशेषे । लेटात् तीवरकन्यायांजाते । मुर्दारफरोस इतिपारस्यभाषा ॥ इतिब्रह्मवैवर्त्तपुराणम् ॥

गङ्गासुत: । पुं । कार्त्तिकेये ॥ भीष्मे ॥ गङ्गाया: सुत: ॥ गङ्गापुत्रे ॥

गङ्गास्वरूपम् । न । तज्ज्ञाननिरूपितस्वरूपे ॥

गङ्गिका । स्त्री । गङ्गायाम् ॥ अज्ञातार्थेक: । ह्रस्व: । अभाषितपुंस्काच्चेतिपाक्षिकोतइदादेश: ॥

गच्छ: । पुं । वृक्षे । गाछ इति भाषा ॥ इति चिकाद्यशेष: ॥

गज: । पुं । मानविशेषे ॥ अरत्नीनां शतान्यऽष्टावे कषष्ट्यधिकानिच । गजप्रमाण माख्यातं मुनिभि र्ब्रह्मवादिभि: ॥ मानसामान्ये ॥ साधारणो नराङ्गुल्या चिंशदङ्गुलको गज: ॥ हस्तद्वये पादोनहस्तद्वयेच ॥ हस्तिनि । मतङ्गजे ॥ भद्रो मन्दो मृगश्चैव विज्ञेया स्त्रिविधागज: ॥ वास्तुस्थान विशेषे । प्रस्तारे दैर्घ्यमानन्तु स्वहस्तेन तथानरै: । कृत्वा विभंगजैर्हृत्वा वास्तुस्थाननिरूपणम् ॥ ध्वजो धूमश्च सिंहश्च श्वा वृष: खर एवच । गज: काकपदश्चैव स्थानान्यष्टौच वास्तुन: ॥ ध्वजे विभूति र्मरणञ्चधूमे सिंहेजय: श्वापि कराच्यनर्थम् । वृषेचभोगी चयणं खरेच पुष्टिर्गजे काकपदे विनाश: ॥ औषधपाकार्थं गर्त्तविशेषे । गजपुटे ॥ अष्टसु ॥ चतुर्मात्रिकस्यादिमेऽऽ पर्याये ॥ जगणे । ऽ । मध्यगुरुसंज्ञायाम् ॥ गजति । गजमदे । पचाद्यच् ॥

गजकन्द: । पुं । हस्तिकन्दे । स्थूलकन्दे ॥

गजकर्णी । स्त्री । औषधिविशेषे ॥ गजकर्णीतु तिक्तोष्णा तथा वातकफान् जयेत् । शीतज्वरहरी स्वादु: पाके तस्यास्तुकन्दक: ॥ पाण्डुरोग कृमिप्लीह गुल्मानाहोदरापह: । ग्रहण्यर्शोविकारघ्नो वनसूरण

कन्दवत् ॥

गजकूर्म्माशी । पुं । गरुडे ॥ इति शब्द रत्नावली ॥

गजकृष्णा । स्त्री । कपिवल्ल्याम् । गज पिप्पल्याम् ॥ गजइवकृष्णा । वृहत्त्वात् ॥

गजगतिः । स्त्री । अनुष्टुप्वृत्तभेदे ॥ यथा । नभलगागजगतिः । यथा । रविसुतापरिसरे विहरतो दृशिहरेः । व्रजवधूगजगति र्मुदमलं व्यतनुत ॥

गजचिर्भटा । स्त्री । इन्द्रवारुण्याम् ॥

गजचिर्भिटः । पुं । गोडुम्बायाम् ॥

गजचिर्भिटा । स्त्री । महेन्द्रवारुण्याम् ॥

गजच्छाया । स्त्री । दर्शापराह्णे ॥ हिगुणाच्चात्मन श्छाया दर्शस्था दापराह्णिकी । गजच्छायेति सा प्रोक्ता पितॄणां तृप्तिकारिणी ॥ कुञ्जरच्छायायाम् ॥ योगविशेषे ॥ यदेन्दुःपितृदैवत्ये हंसश्चैवकरेस्थितः । याम्यातिथिर्भवेत् साहिगजच्छायाप्रकीर्त्तितेतिमिताक्षरापरिभाषा ॥ अपिच । कृष्णपक्षे त्रयोदश्यांमघास्विन्दुःकरेरविः । यदा तदा गजच्छायाश्राद्धेपुण्यैरवाप्यत इति कृत्यचिन्तामणिः ॥ अमावास्याश्राद्धकाले ॥ यथा । अमावास्यां गतेसोमे छायायामाग्रमुखीभवेत् । गजच्छायातु सा प्रोक्ता तत्रश्राद्धंप्रकल्पयेदिति ॥ चन्द्रार्कयोर्ग्रहणकाले ॥ यथा । सैंहिकेयो यदाभानुंग्रसते पर्वसन्धिषु । गजच्छायातु सा प्रोक्ता श्राद्धं तत्र प्रकल्पयेदितिवराहः ॥

गजढक्का । स्त्री । महानाते । गजोपरिस्थवृहड्ढक्कायाम् ॥

गजता । स्त्री । गजसमूहे हास्तिके ॥ गजानांसमूहः । गजसहायाभ्यामितितल् ॥

गजतुरगविलसितम् । न । ऋषभगजविलसिताख्यवृत्ते ॥

गजदघ्नः । त्रि । गजपरिमाणे ॥

गजदन्तः । पुं । श्रीगणेशे ॥ गजस्यदन्ताविव दन्तावस्य ॥ गजस्यदन्ते । हाथीदांत इति भाषा ॥ नागदन्ते । द्रव्यस्थापनार्थं भित्तिस्थेदण्डद्वये । खूंटा इति भाषा ॥

गजदन्तफला । स्त्री । डङ्गरीलतायाम् ॥

गजदानम् । न । हस्तिमदे ॥ मतङ्गजस्यत्यागे ॥ गजस्यदानम् ॥

गजपादपः । पुं । नन्दीवृक्षे । स्थालीवृक्षे ॥

गजपिप्पली । स्त्री । इभकणायाम् ।

करिपिप्पल्याम् ॥ चविकायाः फलप्रान्तैः कथिता गजपिप्पली । गजकृष्णा कटुर्वातश्लेष्मनुद्वह्निवर्द्धिनी ॥ उष्णा निहन्त्यतीसारश्वासकण्ठामयक्रमीन् ॥ गजइवपिप्पली । बृहत्त्वात् ॥

गजपुटः । पुं । औषधपाकार्थं हस्तपरिमिते गर्त्ते ॥ यथा । हस्तप्रमाणो गर्त्तायः पुटः सतु गजाह्वयः । इत्थं चारत्निके कुण्डे पुटो वाराह उच्यते ॥

गजपुष्पी । स्त्री । नागपुष्प्यां लतायाम् ॥

गजप्रिया । स्त्री । शल्लकीवृक्षे ॥

गजबन्धः । पुं । आकरेभ्योगजग्रहणे ॥

गजबन्धनी । स्त्री । हस्तिबन्धनशालायाम् । वार्य्याम् । हथीयान इति भाषा ॥ बध्यन्ते ऽस्याम् । बन्धबन्धने । ल्युट् । ङीप् । गजस्य बन्धनी ॥

गजभक्षकः । पुं । अश्वत्थवृक्षे ॥

गजभक्ष्या । स्त्री । शल्लकीद्रुमे । सालैं इति भाषा ॥ गजैर्भक्ष्यते । ण्यत् ॥

गजमाचलः । पुं । स्त्री । सिंहे ॥

गजमात्रः । त्रि । गजदघ्ने ॥

गजवदनः । पुं । लम्बोदरे । हेरम्बे ॥ गजस्यवदनमिव वदनमस्य ॥

गजवल्लभा । स्त्री । गिरिकदल्याम् । बहुबीजायाम् । वनरम्भायाम् ॥ शल्लक्याम् ॥

गजवीथी । स्त्री । उत्तरमार्गे । नक्षत्रविशेषाणां संज्ञायाम् ॥ यथा । रोहिण्यार्द्रामृगशिरो गजवीथ्यभिधीयत इति ॥

गजसाह्वयम् । न । हस्तिनापुरे ॥ गजेनसहित आह्वयो नामयस्य । हस्ती नामराजा तेन निर्मितत्वात् ॥

गजाख्यः । पुं । चक्रमर्द्दवृक्षे ॥

गजाग्रणीः । पुं । ऐरावतगजे ॥ गजानामग्रणीः ॥

गजाजीवः । पुं । आधोरणे । हस्तिपके । इभपालके ॥ गजआजीवोयस्य ॥

गजाण्डम् । न । पिण्डमूले ॥

गजाननः । पुं । गजवदने । विनायके ॥ यथा । वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननमिति ॥ गजआननमस्य । समुदायशब्दा अवयवेऽपिवर्त्तन्तइति गजमुखपरो गजशब्दः ॥ गजाननमिवाननमस्येतिवा । उष्ट्रमुखवत् समासोत्तरपदलोपौ ॥

गजारिः । पुं । तरुविशेषे ॥ सिंहे ॥ इतिहेमचन्द्रः ॥

गजारोहः । पुं । हस्तिपके ॥ गजमारो

इति । इषे: कर्मणदृष्टा ॥

गजाशन: । पुं । पिप्पलवृक्षे ॥ गजेन अश्यते । अश० । कर्मणिल्युट् ॥

गजाशना । स्त्री । भङ्गायाम् ॥ पद्ममूले ॥ शल्लक्याम् ॥

गजास्य: । पुं । गणाधिपे । द्वैमातुरे ॥ गजस्य आस्यमिव आस्य मस्य ॥

गजाह्वम् । न । हस्तिनापुरे ॥

गजाह्वयम् । न । हस्तिनापुरे ॥

गजाह्वा । स्त्री । गजपिप्पल्याम् ॥

गजेष्टा । स्त्री । विदार्याम् ॥

गजोषणा । स्त्री । करिपिप्पल्याम् ॥

गञ्ज: । पुं । रीढायाम् । अवज्ञायाम् ॥ पुं । न । भाण्डागारे ॥ खनौ ॥ गोष्ठागारे ॥

गञ्जनम् । न । नाशे ॥

गञ्जा । स्त्री । मदिरागृहे ॥ खन्याम् ॥ पामरसद्मनि ॥ मद्यभाण्डे ॥ गञ्ज्यस्याम् । गजिशब्दे । गुरोश्चहलइत्यप्रत्यय: ॥

गञ्जिका । स्त्री । मदिरागृहे ॥ गञ्जैव । स्वार्थे क: । प्रत्ययस्थादितीत्वम् ॥

गड: । पुं । गडुइमाच् इतिगौडभाषाप्रसिद्धेमत्स्ये ॥ पुच्छशीर्षेण रहिता: कासमर्दविमर्दिता: । हिङ्गुतैलेच सन्तप्ता गडमत्स्यखण्डका: ॥ गडो वातहरो बल्योऽहृष्य: पथ्यो ऽग्निवर्द्धनः । गुरुः गुक्रदो रुच्यः किञ्चित्कफकरः सरः ॥ अन्तराये ॥ परिखायाम् ॥ व्यवधाने ॥ शाकम्भरीये । साँभर इतिभाषाप्रसिद्धे लवणे ॥ गडाख्यं लघु वातघ्नं मन्त्युष्णं भेदि पित्तलम् । तीक्ष्णं व्यवायि सूक्ष्मञ्च अभिष्यन्दि कटुपाकि च ॥ गडति । गड० । अच् ॥ देशविशेषे ॥

गडक: । पुं । मत्स्यविशेषे । शकुलार्भके । गडुइमाच् इतिगौडभाषा ॥ गडति । गडसेचने । कुन् शिल्पिसंज्ञयोरितिकुन् ॥

गडयन्त: । पुं । मेघे ॥ गडेस्तृभृवृवहीतिझच् । घटादित्वान् मित्त्वं ह्रस्व: । अयामन्तेतिणेरयादेश: ॥

गडदेशजम् । न । साम्बरे । साँभर नून इतिभाषा ॥

गडलवणम् । न । साँभर इति प्रसिद्धे लवणे । साम्बरे । शुभ्रे । पृथ्वीजे ॥

गडाख्य: । पुं । शाकम्भरीयेलवणे ॥

गडि: । पुं । वत्सतरे ॥ अलसेगवादौ । गडिया इति भाषा ॥ यथा । गणानामेव दौरात्म्या दुरि धुर्यो नियुज्यते । असञ्जातकिणस्कन्ध: सुखं स्वपिति गौर्गडिरितिकाव्यप्रकाश: ॥

गडु: । पुं । पृष्ठगुडे । घोटामस्तकयोर्मध्येमांसवृद्धौ ॥ कुब्जे ॥ किञ्चलु

के ॥ विषमग्रन्थौ ॥ अस्त्रप्रभेदे । शल्यास्त्रे ॥ गडति गच्छते वा । गड सेचने । बाहुलकात् उः ॥

गडुरः । त्रि । कुब्जे ॥

गडुलः । त्रि । कुब्जे ॥ गडुरस्यास्ति । सि० लच् । गौ०ङीषि गडुली ॥

गडेरः । पुं । मेघे ॥ गडति । गड० । पतिकठिकुठि गडिगुडीत्येरक् ॥

गडोत्थम् । न । गडलवणे ॥

गडोलः । पुं । गुडे ॥ गुडके ॥ ग्रासे ॥ गडति । गड० । कपिगडिगण्डी त्योलच् ॥

गड्डरिका । स्त्री । मेषयूथैरनुगम्यमानायां मेष्याम् ॥ अज्ञातप्रवाहागममूले धारावाहिनि ॥

गडुः । पुं । } गडुआ० इति प्रसिद्धे जलपात्रविशेषे ॥ इति शब्दरत्नावली ॥
गडुकः । पुं । }
गडूकः । पुं । }

गणः । पुं । प्रमथे । रुद्रानुचरे ॥ सङ्ख्यायाम् ॥ ओघे । समूहे ॥ चण्डायाम् । चोरनामगन्धद्रव्ये ॥ सैन्यप्रभेदे । त्रिषु गुल्मेषु । इभाः २७ रथाः २७ अश्वाः ८१ पदातिकाः १३५ समस्तसङ्ख्यया २७०। एतत्परिमाणविशिष्टायां सेनायाम् ॥ गणेशे ॥ यथा । गाणपत्तु महेशानि गणदीक्षा प्रवर्त्तक इति ॥ गण्यते गणयति वा । गणसङ्ख्याने । घञ् अप् वा । अप्लोपस्य स्थानिवत्त्वान्न वृद्धिः ॥ धातुसमूहे ॥ यथा । भ्वाद्यदादी जुहोत्यादि दिवादिः स्वादिरेव च । तुदादिरुधातनुक्र्यादि चुरादिश्च गणा दशेति ॥ अश्विन्यादिजन्मनक्षत्रानुसारेण देवमानुष राक्षस इति पारिभाषिके ॥ यथा । देमरा मदेमा दे देरा राममदरादरा । देरा राम मदेरा रा म मदेतिगणत्रयम् ॥ अपिच । पूर्वोत्तरात्रयश्चैव भरण्यार्द्रा चरोहिणी । इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः ॥ ज्येष्ठा शतभिषा मूल धनिष्ठा श्लेषकृत्तिकाः । चित्रामघाविशाखाः स्युस्तारा राक्षसदेवताः ॥ अश्विनी रेवतीपुष्यः स्वातीहस्तः पुनर्वसुः । अनुराधा मृगशिरःश्रवणं देवतारका इति ॥ अस्य फलन्तु । स्वकुले चोत्तमा प्रीतिर्मध्यमा देवमानुषे । देवासुरेकनिष्ठा च मृत्युर्मानुषराक्षसे ॥ राक्षसी च यदा कन्या मानुषस्य वरो भवेत् । तदा मृत्युर्न दूरस्थो जिह्वेनस्वम थापि वेति श्रीपतिराह । निजनिजगणमध्ये प्रीतिरत्युत्तमा स्यादमरमनुजयोः सा मध्यमा संप्रदिष्टा । असुरमनुजयोश्चेन्मृत्यु

रेव प्रदिष्टो द्विभुजविबुधयोः स्याद्वै रमेकान्तमेवेति रामः ॥

गणकः । पुं । सांवत्सरे । ज्यौतिषिके । दैवज्ञे ॥ वर्णसङ्करजातिविशेषोऽयम् । देवलाद्वैश्यागर्भजातः । तिथिवारादिज्ञापनञ्च तस्य कर्मोक्तं पराशरपद्धतौ ॥ तल्लक्षणं यथा । ज्योतिःशास्त्रविशेषज्ञः सुन्दराङ्गः सभापटुः । कुलक्रमागतः शुद्धो गणकः स्यान्महीपतेरिति युक्तिकल्पतरुः ॥ अस्पृश्योऽयं धर्मानुष्ठाने । यथा । कलिकाले महेशानि पाषण्डा बहवो जनाः । सङ्गदोषान् महेशानि तत्क्षणाद्ग्लानितां व्रजेत् ॥ तस्मात् प्रयत्नतो देवि संसर्गं वर्जयेत् सुधीः । वरं चण्डालसंस्पर्शं कुर्यात्तु साधकोत्तमः । तथाप्यस्पृश्यगणकं सर्वदा तं परित्यजेदिति महिषमर्द्दिनीतन्त्रम् ॥ त्रि । गणनकर्त्तरि ॥ सङ्ख्याया इति कन् ॥ गणयति वा । गण० । ण्वुल् ॥

गणकर्णिका । स्त्री । इन्द्रवारुण्याम् ॥

गणकारः । पुं । धातुसङ्ग्रहकर्त्तरि भीमसेने ॥

गणकी । स्त्री । गणकयोषायाम् ॥ गणकस्य स्त्री । पुंयोगादिति ङीष् ॥

गणकूटः । पुं । न । गणभेदे ॥

गणचक्रम् । न । गणचक्रकम् । न । धार्म्मिकाणां सम्भूय भोजने ॥ गणानां चक्रं ॥

गणता । स्त्री । गणसमूहे ॥

गणतिथः । त्रि । गणानाम्पूरणे ॥ तस्य पूरणे डट् । तस्य तिथुगागमः ॥

गणदीक्षी । पुं । बहुयाजके ॥

गणदेवता । स्त्री । सङ्घचारिदेवताविशेषे ॥ यथा । आदित्यविश्ववसवस्तुषिता भास्वरानिलाः । महाराजिकसाध्याश्च रुद्राश्च गणदेवताः इति ॥ तत्र आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः । वसवश्चाष्टसङ्ख्याताः षट्त्रिंशत्तुषिता मताः ॥ आभास्वराश्चतुःषष्टिर्वाताः पञ्चाशदूनकाः । महाराजिकनामानो द्वे शते विंशतिस्तथा ॥ साध्या द्वादश विख्याता रुद्राश्चैकादश स्मृताः । गणेषु संहता देवाः पुराणेषु निरूपिता इति विशेषः ॥ समुदायेहि वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते इति न्यायादमीषां शब्दानामेकवचनमपि साधु ॥

गणद्रव्यम् । न । साधारणद्रव्ये ॥

गणनम् । न । सङ्ख्याने । गिणना ठीकदेना इति भाषा ॥ येनैव लिखनङ्कुर्य्यात् तेनैव गणनं स्मृतम् ॥

गणना । स्त्री । गणने । सङ्ख्यायाम् ॥

गणनाथः । पुं । गणेशे ॥ गणानां प्रमथानां नाथः ॥

गणनायकः । पुं । गणेशे ॥

गणनायिका । स्त्री । दुर्गायाम् ॥

गणनीयः । त्रि । सङ्ख्येये । गणेये ॥ गण्यते । गणसङ्ख्याने । अनीयर् ॥

गणपतिः । पुं । श्रीगणेशे ॥ गणानां प्रमथानां पतिः ॥ पुष्टिर्गणपतेःपत्नी ॥

गणपर्व्वतः । पुं । कैलासाचले ॥

गणपीठः । पुं । न । } वक्षसि ॥
गणपीठकम् । न । }

गणभर्त्ता । पुं । प्रमथनाथे ॥

गणमैत्रम् । न । गणकूटे ॥ पश्यास्यविवरंगणशब्दे । अश्विन्यादिजन्मनक्षत्रानुसारेण देवमानुषराक्षसगण इतिपारिभाषिकइत्यत्र ॥

गणयाजकः । पुं । विनायकादिगणयागकृति ॥ गणानांयाजकः ॥

गणरात्रम् । न । रात्रिवृन्दे ॥ गणानां बह्वीनां रात्रीणां समाहारः । गणशब्दस्यसङ्ख्यात्वात् तद्धितार्थेतिद्विगुः । अहःसर्व्वैकदेशेत्यच् । सङ्ख्यापूर्व्वंरात्रंक्लीवमिति लिङ्गानुशासने क्लीवत्वविधानात् रात्राह्नाहाःपुंसीतिपुंस्त्वंन ॥

गणरूपः । पुं । अर्कपादपे ॥ श्वेतार्के ॥ नानात्वात् गणा बहूनि रूपाण्यस्य ॥

गणरूपकः । पुं । राजार्के ॥

गणरूपी । पुं । श्वेतार्के ॥

गणवतीसुतः । पुं । दिवोदासे ॥

गणशः । अ । बहुशः । गणान् इति । बह्वल्पार्थाच्छस्कारकादन्यतरस्यामितिगणाच्छस् ॥

गणहासः । पुं । } चोरकनामगन्धद्रव्ये । चण्डायाम् ॥ गणंहासयति । हसे० । ण्यन्तः । अच् ॥ ण्वुल् कृन्वा ॥
गणहासकः । पुं । }

गणाग्रणीः । पुं । गणेशे ॥ गणानामग्रणीः ॥

गणाचलः । पुं । कैलासपर्व्वते ॥ गणानामचलः ॥

गणाधिपः । पुं । गणेशे ॥ शिवे ॥ गणानामधिपः ॥

गणाधिपतिः । पुं । गणेशे ॥ शिवे ॥ गणानामधिपतिः ॥

गणान्नम् । न । मठशाल्मगणसङ्घान्ने ॥

गणाभ्यन्तरः । पुं । गणार्थोत्सृष्टमठधनाद्युपजीविनि । गणार्थोपसृष्टसम्बन्धिधनाद्युपजीविनि ॥

गणिका । स्त्री । वेश्यायाम् ॥ गणःसमूहोऽस्त्यस्याः भर्त्तृत्वेन । ठन् ॥ यूथिकायाम् ॥ चित्ताकर्षकत्वात् गणिकेव ॥ गणकारिकायाम् ॥ इभ्याम् । हस्तिन्याम् ॥ गणयति । गण० ।

ण्वुल् ॥

गणिकारिका । स्त्री । श्रीपर्णी अग्निमन्थे । वडगणियारी इति गौडभाषा । अरणी इति भाषा ॥ गणनम् । गण ० । इक्कृष्यादिभ्यः । गणां करोति । कर्मण्यण् । स्वार्थे कन् ॥ यद्वा । कृ कृति । कृ ० । ण्वुल् । गणिका चासौ कारिका च ॥ जयपर्णी ॥

गणिकारी । स्त्री । गणियारी इति गौडभाषाप्रसिद्धे पुष्पवृक्षविशेषे । काञ्चनिकायाम् । वसन्तदूत्याम् । अलिमोदायाम् ॥

गणितम् । न । अङ्कशास्त्रे ॥ तद्द्विविधम् । द्विविधगणितमुक्तं व्यक्तमव्यक्तयुक्तमित्युक्तेः । व्यक्तं पाटीगणितम् । अव्यक्तं बीजगणितम् ॥ गणने ॥ त्रि । सङ्ख्याते । कृतगणने ॥ गण्यतेस्म । गण ० । क्तः ॥

गणिपिटका । स्त्री । जिनानां विद्याविभागे । द्वादशाङ्ग्याम् ॥

गणेयः । त्रि । गणनीये । सङ्ख्येये । गाणेये ॥ गणेरयः ॥

गणेरुः । पुं । कर्णिकारवृक्षे ॥ स्त्री । करिण्याम् ॥ वेश्यायाम् ॥

गणेरुका । स्त्री । कुट्टन्याम् ॥

गणेरूः । स्त्री । करिण्याम् ॥ वेश्यायाम् ॥

गणेशः । पुं । विनायके । विघ्नराजे । वक्रतुण्डे ॥ यथा । यो यः कश्चित्तीर्थयात्रान्तु गच्छेत् सुसंयतः सन् पूर्वं गृहे स्वे । कृतोपवासः शुचिरप्रमत्तः सम्पूजयेद्भक्तिनम्रो गणेशमिति ब्रह्मपुराणम् ॥ शिवे ॥ गणानामीशः ॥

गणेशकुसुमम् । न । रक्तकरवीरे ॥

गणेशभूषणम् । न । सिन्दूरे ॥

गणोत्साहः । पुं । खड्गे । गण्डके । गैंडा इति भाषा ॥

गण्डः । पुं । खड्गिनि । तुङ्गमखे । वज्रचर्मणि ॥ वीथ्यङ्गे ॥ पिटके ॥ चिह्ने ॥ वीरे ॥ कपोले । गाल इति भाषा ॥ यथा । गण्डं गण्डे सन्दधत्या आदात् ताम्बूलचर्वितमिति श्रीभागवते कौलचर्या ॥ हयभूषणबुद्बुदे ॥ करिकपोले । कटे । करटे ॥ गण्डति । गडि वदनैकदेशे । अच् ॥ ग्रहप्रभेदे ॥ विष्कम्भादिषु दशमे योगे ॥ तत्र जातस्य फलम् । स्वकार्यकर्त्ता परकार्यहर्त्ता गण्डोद्भवः स्यादतिगण्डवाक्यः । अत्यन्तधूर्त्तः पुरुषः कुरूपः सुहृज्जनानामतितापदाता ॥ दोषजनकेऽश्विन्यादीनां भागविशेषे ॥ यथा । अश्विनीमघमूलानां तिस्रो गण्डाद्यनाडिकाः । अन्त्याः पौष्णोरगेन्द्राणां पञ्चैव जवनाजगः ।

॥ मूलेन्द्रयोर्दिवागण्डो निशायां पितृसर्पयोः । सन्ध्याद्वये तथाग्नेयो रेवतीतुरगर्क्षयोः ॥ तत्रोत्पन्नस्य दोषो यथा । सन्ध्यारात्रिदिवाभागे गण्डयोगोद्भवः शिशुः । आत्मानं मातरं तातं विनिहन्ति यथाक्रमम् ॥ चतुष्कले ऽ ॥ आदिगुरोः संज्ञायाम् ॥ गच्छति । गम्लृ० । अमन्ताड्डः ॥

गण्डकः । पुं । खड्गे । गैंडा इति भाषा । एकचरे ॥ सङ्ख्याप्रभेदे । गण्डा इति भाषा ॥ विद्याप्रभेदे ॥ अवच्छेदे ॥ अन्तराये । विघ्ने ॥ स्वार्थे कः ॥

गण्डकारी । स्त्री । वराहक्रान्तायाम् । समङ्गायाम् । छायाजोडी इति भाषा ॥ गण्डेषु ग्रन्थिषु कारी ॥

गण्डकाली । स्त्री । खदिर्याम् । नमस्कार्याम् । समङ्गायाम् ॥ गण्डेषु ग्रन्थिषु काली ॥

गण्डकी । स्त्री । नदीविशेषे ॥ गण्डक्याश्चैकदेशेच शालग्रामस्थलंस्मृतम् । पाषाणं तद्भवं यत् तत्शालग्राममितिस्मृतम् ॥

गण्डकीपुत्रः । पुं । शालग्रामे ॥

गण्डकीशिला । स्त्री । शालग्रामे ॥

गण्डकुसुमम् । न । उत्कटे । सञ्जातमदे हस्तिनि ॥ इति हारावली ॥

गण्डकूपः । पुं । पर्वतस्योच्चस्थले ॥ उन्नतो गण्डकूपस्तु पर्वतस्याभिधीयते ॥

गण्डगात्रम् । न । आतृप्ये । सीताफल सारीफा इति भाषा । आता इति गौडभाषा ॥ गण्डाः गात्रेयस्य ॥

गण्डदूर्व्वा । स्त्री । गोलोम्याम् । श्वेतदूर्वायाम् । मत्स्याक्ष्याम् । गांडरदुर्वी इति भाषा ॥ गण्डदूर्वा हिमा लोहद्राविणी ग्राहिणी लघुः । तिक्ता कषाया मधुरा वातकृत्कटुपाकिनी ॥ दाहतृष्णा बलासास्रकुष्ठपित्तज्वरापहा ॥

गण्डमाला । स्त्री । रोगविशेषे ॥ तस्य सम्प्राप्तिरूपे यथा । कर्कन्धुकोलामलकप्रमाणैः कक्षांसमन्यागलवङ्क्षणेषु । मेदः कफाभ्यां चिरमन्दपाकैः स्याद्गण्डमाला बहुभिश्चगण्डैरिति ॥

गण्डमालिका । स्त्री । लज्जालुाम् ॥

गण्डमाली । त्रि । गण्डमालाख्यव्याधियुक्ते ॥

गण्डयन्तः । पुं । मेघे ॥ गण्डयति । गडि० । तॄभूवहिवसिभासिसाधिगडिमण्डिजिनन्दिभ्यश्चेतिझच् । सच षित् । गडघटादिस्वान्नित्वम् । ह्रस्वः । झयामन्तेतिणेरयादेशः ॥

गण्डलेखा । स्त्री । गण्डस्थल्याम् ॥

गण्डशैलः । पुं । गिरेश्च्युते स्थूलोपले ॥ भूकम्पादिना शैलात् स्खलिते महति प्रस्तरे ॥ ललाटे ॥ गण्डइवशैलः । शैल-शब्दः शैलावयवे वर्त्तते । विशेषणं विशेष्येण बहुलमितिसमासः ॥ शैलस्य गण्डइवेति वा । राजदन्तादिः ॥

गण्डाङ्गः । पुं । खड्गिनि । गण्डके ॥

गण्डान्तम् । न । तिथिनक्षत्रलग्नानां सन्धौ ॥ नक्षत्रतिथिलग्नानां गण्डान्तं त्रिविधं स्मृतम् । नवपञ्चचतुर्थानां द्व्येकार्द्धघटिकामितम् ॥

गण्डारिः । पुं । कोविदारवृक्षे ॥

गण्डाली । स्त्री । श्वेतदूर्वायाम् । शतवीर्यायाम् ॥ गण्डयति । गडि० । बाहुलकादालच् । गौ० ङीष् ॥ यद्वा गण्डमलति । अल० । कर्मण्यण् । ङीप् ॥

गण्डिः । पुं । वृक्षस्य मूलात् स्कन्धावधि भागे ॥ इति हेमचन्द्रः ॥

गण्डीरः । पुं । गंडरदुबीति प्रसिद्धे शाके । समष्ठिलायाम् ॥ शूरे ॥ गण्डयति । गडि० । गण्ड्यते वा । बा० ईरन् ॥ यद्वा । गण्डान् ग्रन्थीन् ईरयति । ईरप्रेरणे । कर्मण्यण् ॥

गण्डीरी । स्त्री । मञ्जिष्ठायाम् ॥ सेहुण्डे ॥

गण्डुः । पुं । स्त्री । ग्रन्थौ ॥ उपधाने ॥

गण्डूपदः । पुं । किञ्चुलुके । केंचुआ इति भाषा ॥ गण्डवो ग्रन्थयः पदान्यस्य ॥

गण्डूपदी । स्त्री । किञ्चुलुकस्त्रियाम् । क्षुद्र किञ्चुलुकजातौ । शिल्याम् ॥ जातेरस्त्रीति ङीष् ॥

गण्डूषः । पुं । मुखपूर्त्तौ । मुखपूर्णतोये ॥ यथा । अपांद्वादशगण्डूषैर्मुखशुद्धिर्विधीयतेइति ॥ इभशुण्डाग्रे । पुष्करे ॥ प्रसृतोन्मिते । प्रसृत्याप्रमिते ॥ कराङ्गुलौ ॥ गण्ड्यते । गडि० । गण्डेश्चेत्यूषन् ॥

गण्डूषा । स्त्री । गण्डूषशब्दार्थे ॥ उन्नतनाभौ ॥ टाप् ॥

गण्डोलः । पुं । गुडे ॥ ग्रासे ॥ गण्डति । गडि० । कपिगडिगण्डिकटीभ्योलच् ॥

गण्यः । पुं । गणनीये । सङ्ख्येये ॥ गणलब्धरि ॥ गणांलब्धा । धनगणंलब्धेतियत् ॥

गतः । त्रि । विज्ञाते ॥ याते ॥ समासे ॥ पतिते ॥ आप्ते ॥ न । गमने ॥ गम्लृ० । गत्यर्थाकर्मकेतिक्तः । अनुदात्तोपदेशेति मलोपः ॥

गतत्रपः । त्रि । त्यक्तलज्जे ॥ गतात्रपायस्य सः ॥

गतनासिकः । त्रि । नासिकारहिते ।

विशेषे ॥ गता नासिकाऽस्य ॥

गतबुद्धिः । त्रि । ज्ञानशून्ये ॥ गता बुद्धिर्यस्य ॥

गतरसः । त्रि । विरसतां प्राप्ते । तक्रसारे मथितदुग्धादौ ॥ गतो रसोऽस्मात् ॥

गतव्यथः । त्रि । अनुत्पन्नदुःखे ॥ गता व्यथा यस्य यस्माद्वा ॥

गतसङ्गः । त्रि । फलासङ्गशून्ये ॥ गतः सङ्गोऽयस्य सः ॥

गतसन्देहः । त्रि । निरस्तसर्वसंशये ॥ गतः सन्देहोऽयस्य सः ॥

गतसन्नकः । पुं । निर्मदे हस्तिनि ॥

गतस्मयः । त्रि । निरहङ्कारे ॥ गतः स्मयो गर्वोऽयस्य ॥

गतागतम् । न । यातायाते ॥ गतागतं कामकामा लभन्ते ॥ पक्षिणां गतिविशेषे ॥

गतार्तवा । स्त्री । वन्ध्यायाम् ॥ वृद्धायाम् ॥

गतिः । स्त्री । मार्गे ॥ दशायाम् ॥ ज्ञाने ॥ पादयोर्व्यापारे । यात्रायाम् ॥ अभ्युपाये ॥ नाडीव्रणसरण्याम् । वृहद्व्रणे ॥ कर्मफले स्वर्गादौ ॥ मुक्तौ ॥ आश्रये ॥ प्राप्तौ ॥ गम्यते । गम्लृ० । क्तिन् ॥ शरणे ॥

गतिला । स्त्री । नदीविशेषे ॥ परम्परा विशेषे ॥

गत्वरः । त्रि । गमनशीले ॥ गच्छति । तच्छीलादिः । गम्लृ० । गत्वरश्चेति क्वरप् अनुनासिकलोपश्च निपात्यते । ङीपि गत्वरी ॥

गदः । पुं । श्रीकृष्णानुजे ॥ आमये । रोगे ॥ भाषणे ॥ गदति । गद व्यक्तायां वाचि । पचाद्यच् ॥ न । विषे ॥

गदनम् । न । निगादे ॥ गद० । ल्युट् ॥

गदयित्नुः । पुं । कन्दर्पे । अनङ्गे ॥ शरासने । कार्मुके ॥ जल्पाके ॥ गदयति । गद० । स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् । अयामन्तेति णेरयादेशः ॥

गदा । स्त्री । आयुधे । स्वनाम्ना प्रसिद्धे लोहमये शस्त्रे ॥ पाटलावृक्षे ॥ अजन्ताट्टाप् ॥

गदाख्यम् । न । कुष्ठौषधौ । कूठ इति भाषा ॥

गदागदौ । पुं । अश्विनीकुमारयोः । स्वर्वैद्ययोः ॥

गदाग्रजः । पुं । श्रीकृष्णे । श्रीहरौ ॥ निगदेन मन्त्रेणाग्रे जायते । निशब्दलोपं कृत्वा गदाग्रजः ॥ यद्वा । गदो नाम वासुदेवस्यावरः । तस्मादग्रेजातः । सप्तम्यां जनेर्डः ॥

गदाग्रणीः । पुं । क्षयरोगे ॥

गदाधरः । पुं । हरौ ॥ धरतीतिधरः । बुद्धितत्त्वात्मिका कौमोदकी नाम गदा । तस्याः धरः ॥ त्रि । गदाधारिणि ॥

गदाभृत् । न । बिष्णौ ॥

गदाम्बरः । पुं । घने । मेघे ॥

गदारातिः । पुं । औषधे ॥

गदार्त्तः । त्रि । रोगिणि ॥ गदेन रोगेण आर्त्तः ॥

गदावान् । त्रि । गदिनि ॥ पुं । अच्युते ॥

गदाह्वम् । नं । }
गदाह्वयम् । न । } कुष्ठौषधे ॥

गदी । पुं । कौस्तुभवक्षसि । बिष्णौ ॥ गदा अस्ति अस्य । ब्रीह्यादित्वादिनिः ॥ त्रि । गदाविशिष्टे ॥ रोगयुक्ते ॥

गदिनी । स्त्री । गदावत्याम् ॥ नान्तलक्षणो ङीप् ॥ रोगिण्याम् ॥

गद्गदः । पुं । वाचः स्खलिते । कण्ठकम्पने ॥ अव्यक्तवक्तरि ॥ तत्त्वस्यासिपूर्वकं लक्षणम् । यथा । आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः । नरान् करोत्यक्रियचनान् मूकमिन्मिनगद्गदानिति ॥

गद्गदध्वनिः । पुं । हर्षशोकादिना अस्पष्टध्वनौ । मन्मने ॥ गद्गदस्यासौध्वनिश्च ॥ मन्याने ॥ गद्गदोध्वनिर्यत्र ॥

गद्यम् । न । पद्यभिन्नेकविकृते । अपादे पदसन्ताने ॥ अपादः पदसन्तानं गद्यं तत्तु त्रिधामतम् । वृत्तकोत्कलिकाप्रायवृत्तगन्धिप्रभेदतः ॥ गद्यते । गद० । गदमदचर यमश्चानुपसर्गेइति यत् ॥

गद्याणकः । पुं । अष्टचत्वारिंशद्रक्तिकापरिमाणे ॥ वैद्यकमतेषतुः षष्टिगुञ्जापरिमाणे ॥

गन्तव्यः । त्रि । प्राप्ये ॥

गन्तुः । पुं । पथिके ॥ गच्छति । गम्लृ गतौ । सितनीतितन् ॥

गन्ता । त्रि । गामुके । गमनशीले ॥ गच्छति तच्छीलः । गम्लृ० । ताच्छीलिकेषु वासरूपविधिर्नास्ति त्वस्य प्रायिकत्वात्तृन् ॥

गन्त्री । स्त्री । कम्बलिवाह्यके । वृषवहनीयशकटे । गाडीइतिभाषा ॥ गम्यतेऽनया । गम्लृ० । तृन् । ङीप् ॥

गन्त्रीरथः । स्त्री । मठे । शकटे ॥ इतिहारावली ॥

गन्धः । पुं । सम्बन्धे ॥ लेशे ॥ गन्धके ॥ गर्व्वे ॥ शिग्रौ ॥ घृष्टचन्दने ॥ चन्दनकुङ्कुमादिषु गन्धाः । यथोक्तम् । गन्धस्तु सौरभेयेगे गन्धकेमर्वलेशयोः । सएव द्रव्यवचनो बहुत्वेपुंसि

च स्मृतः इति ॥ सपञ्चविधो यथा । चूर्णीकृतो वा घृष्टो वा दाहाकर्षित-एव वा । रसः सम्मर्दजो वापि प्राण्यङ्गोद्भव एव वा । गन्धः पञ्चविधः प्रोक्तो । देवानां प्रीतिदायक इति । तच्च शान्तस्तच्छब्देऽद्रष्टव्यम् ॥ गन्धो मलयजो यस्तु दैवे पैत्रे च सम्मतः ॥ कर्पूरगन्धसाराद्याः क्षोदे घृष्टे च संस्थिताः । चन्द्रभागादयश्चापि रसे पङ्के च सङ्गताः ॥ गन्धसारस्तु सर्वत्र संसर्गादौ प्रयुज्यते । मृगनाभिर्भवेद् घृष्टश्चूर्णोऽप्यन्यस्य योगतः ॥ एवं सर्वस्तु सर्वत्र गन्धो भवति पञ्चधा । इष्टादिभावादन्योन्यं गन्धः प्रीतिकरः परः ॥ गन्धस्य विस्तरो भेदः प्रोक्तः कालीयकादयः । सर्वः पञ्चविधेष्वेव प्रविष्टो भवतीत्यणादिति कालिकापुराणम् ॥ आमोदे ॥ सतु घ्राणग्राह्यः पृथिवीगुणः । यथा । घ्राणग्राह्यो भवेद् गन्धो घ्राणस्यैवोपकारकः । सौरभश्चासौरभश्च सद्वेधा परिकीर्त्तितः ॥ सतु दशविधो यथा । इष्टः १ कस्तूरिकादौ । अनिष्टः २ शवादौ । मधुरः ३ मधुपुष्पादौ । कटुः ४ मरिचादौ । निर्हारी ५ हिङ्ग्वादौ । संहतः ६ चित्रगन्धोऽनेककल्कगतः । स्निग्धः ७ सद्यस्तप्तघृतादौ । रूक्षः ८ सार्षपतैलादौ । विशदः ९ शाल्यन्नादौ । अम्लः १० आम्रातकादौ ॥ माचा माचे ॥ न । कृष्णागुरुणि ॥ त्रि । प्रतिवेशिनि ॥ गन्धयते । गन्ध अर्द्दने । पचाद्यच् ॥

गन्धकः । पुं । शिग्रौ । शोभाञ्जने ॥ गन्धाश्मनि । सौगन्धिके । उपधातुविशेषे ॥ अस्योत्पत्तिर्यथा । श्वेतद्वीपे पुरा देव्याः क्रीडन्त्या रजसा प्लुतम् । दुकूलं तेन वस्त्रेण स्नातायाः क्षीरनीरधौ ॥ प्रसृतं यद्रजस्तस्माद्गन्धकः समजायत ॥ तस्य भेदाः । चतुर्द्धा गन्धकः प्रोक्तो रक्तः पीतः सितोऽसितः । रक्तो हेमक्रियासूक्तः पीतश्चैव रसायने । व्रणादिलेपने श्वेतः कृष्णः श्रेष्ठः स दुर्लभः ॥ श्रेष्ठो हेमक्रियादिषु सर्वप्रशस्ततर इत्यर्थः । अस्य गुणाः । गन्धकः कटुकस्तिक्तो वीर्य्योष्णस्तुवरः सरः । पित्तलः कटुकः पाके कण्डूवीसर्पजन्तुजित् ॥ हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः ॥ अशोधितो गन्धक एष कुष्ठं करोति तापं विषमं शरीरे । सौख्यञ्च रूपञ्च बलं तथौजः शुक्रं निहन्त्येव करोति चास्रम् ॥ शोधितो यस्तु गन्धः स्यात् जरामृत्युरुजापहः । अग्निस

दीपनः श्रेष्ठो वीर्य्यवृद्धिकरोऽस्थि
कृत् ॥ शोधनविधिस्तु । लोहपात्रे
विनिःक्षिप्य घृतमग्नौ प्रतापयेत् ।
तप्ते घृते तत्समानं क्षिपेद्गन्ध
कजःरजः ॥ विद्रुतं गन्धकं दृष्ट्वा त
नुवस्त्रे विनिःक्षिपेत् । यथा वस्त्रा
च्छिन्नःसृत्य दुग्धमध्येऽखिलं क्षिपे-
त् ॥ एवं स गन्धकः शुध्येत् सर्व्वकर्म्मो
चितो भवेत् ॥ गन्धोऽस्यास्ति । अर्श
आद्यच् । स्वार्थे कन् ॥

गन्धकन्दकः । पुं । कशेरुणि ॥

गन्धकचूर्णः । पुं । न । दारु बरुद
इति प्रसिद्धे पदार्थे ॥ गन्धकप्रधान
श्चूर्णः ॥

गन्धकामम् । न । कैरवे ॥

गन्धकारिका । स्त्री । सैरन्ध्र्याम् ॥

गन्धकालिका । स्त्री । } व्यासमात
गन्धकाली । स्त्री । } रि ॥

गन्धकाष्ठम् । न । शम्बरचन्दने ॥ अगु
रुकाष्ठे ॥

गन्धकुटी । स्त्री । मुरानामगन्धद्रव्ये ॥
लोध्रस्थाने ॥ गन्धस्य कुटी इव ॥

गन्धकुसुमा । स्त्री । गणिकार्य्याम् ॥

गन्धकेलिका । स्त्री । कस्तूर्य्याम् ॥

गन्धकोकिला । स्त्री । ओषधिविशेषे ॥
स्निग्धोष्णा कफकृत् तिक्तासुगन्धा ग
न्धकोकिला ॥

गन्धखेडम् । न । गन्धवीरणे । भूतृणे ।
शैरिषे । गन्धखेणा इति गौड
भाषा ॥

गन्धखेडकम् । न । गन्धतृणे । सुगन्ध
भूतृणे ॥

गन्धचेलिका । स्त्री । कस्तूर्य्याम् ॥

गन्धजलम् । न । केतकादिजले ॥

गन्धजातम् । न । तेजपत्रे ॥

गन्धज्ञा । स्त्री । नासिकायाम् ॥

गन्धतूर्य्यम् । न । वाद्यविशेषे । रणतू
र्य्ये । महास्वने ॥

गन्धतृणम् । न । सुगन्धभूतृणे । सुर
से । सुवर्व्वसे ॥

गन्धतैलम् । न । गन्धद्रव्याणाम् गुर्व्वा
दीनां संमिश्रणेन निष्कासिते स्ने
हे । अतर इति भाषा ॥

गन्धत्वक् । न । एलवालुके ॥

गन्धदला । स्त्री । अजमोदायाम् ॥

गन्धधूमजः । पुं । स्वादुनामगन्धद्रव्ये ॥

गन्धधूलिः । स्त्री । कस्तूर्य्याम् ॥

गन्धनम् । न । उत्साहे ॥ प्रकाशने ॥
सूचने ॥ हिंसायाम् ॥ तृणविशेषे
॥ गन्ध० । भावकर्म्मकरणाधिकरणे
षु ल्युट् ॥

गन्धनकुलः । पुं । छुच्छुन्दर्य्याम् ॥

गन्धनाकुली । स्त्री । रास्नायाम् । ना
इ इतिभाषाप्रसिद्धे रास्नाभेदे ॥ का

न्दविशेषे । महासुगन्धायाम् । महाहिगन्धायाम् ॥ गन्धवती नाकुली ॥

गन्धनामा । पुं । रक्ततुलस्याम् ॥ गन्धपाषाणे ॥

गन्धनाम्नी । स्त्री । कक्षासदृशे क्षुद्ररोगे ॥

गन्धनाली । स्त्री । नासिकायाम् ॥

गन्धनिलया । स्त्री । नवमल्लिकायाम् ॥

गन्धनिशा । स्त्री । पलाश इति मालवदेशप्रसिद्धगन्धपत्रायाम् ॥

गन्धपत्रः । पुं । श्वेततुलस्याम् ॥ मरुवे ॥ वर्वरे ॥ नारङ्गे ॥ बिल्वे ॥

गन्धपत्रा । स्त्री । शटीभेदे । एकपत्रिकायाम् । तवक्षीर्याम् ॥

गन्धपत्रिका । स्त्री । गन्धपत्रायाम् । दीर्घपत्रायाम् । शटीविशेषे ॥ अजमोदायाम् ॥

गन्धपत्री । स्त्री । अजमोदायाम् ॥ अम्बष्ठायाम् ॥ अश्वगन्धायाम् ॥

गन्धपलाशिका । स्त्री । हरिद्रायाम् ॥

गन्धपलाशी । स्त्री । शट्याम् । गन्धमूल्याम् ॥ भवेद् गन्धपलाशी तु कषाया ग्राहिणी लघुः । तिक्ता तीक्ष्णा च कटुका ऽनुष्णास्यमलनाशिनी । शोथकासव्रणश्वासशूलहिध्माग्रहापहा ॥

गन्धपाषाणः । पुं । गन्धके ॥ गन्धयुक्तः पाषाणः । शाकपार्थिवादिः ॥

गन्धपिशाचिका । स्त्री । धूपे ॥

गन्धपीता । स्त्री । गन्धपत्रायाम् ॥

गन्धपुष्पः । पुं । अङ्कोठे ॥ वेतसपादपे ॥ अशोकद्रुमे ॥ बहुवारवृक्षे ॥

गन्धपुष्पा । स्त्री । केतक्याम् ॥ गणिकार्याम् ॥ नील्याम् ॥

गन्धफणिज्झकः । पुं । रक्ततुलस्याम् ॥

गन्धफलः । पुं । कपित्थे ॥ बिल्वे ॥ तेजः फलवृक्षे ॥

गन्धफला । स्त्री । प्रियङ्गुवृक्षे ॥ मेथिकायाम् ॥ विदार्याम् ॥ शल्लक्याम् । गजभक्ष्यायाम् ॥ गन्धः फलेऽस्याः ॥

गन्धफली । स्त्री । प्रियङ्गुवृक्षे ॥ गन्धवन्ति फलान्यस्याः । पाककर्णेति क्लीष् ॥ चम्पककलिकायाम् ॥ गन्धःफलंसाध्यमस्याः ॥

गन्धबन्धुः । पुं । आम्रवृक्षे ॥ गन्धोबन्धुरस्य ॥ गन्धद्रव्यविशेषे । चीडायाम् ॥

गन्धभद्रा । स्त्री । गन्धाल्याम् । गन्धभादालिया इति गौडभाषा ॥ गन्धेन भद्रा ॥ गन्धः भद्रो ऽस्या वा ॥

गन्धभाण्डः । पुं । गर्दभाण्डवृक्षे ॥ न । गन्धार्थे भाण्डे ॥

गन्धमांसी । स्त्री । भूतकेश्यामोषधौ ॥

गन्धमाता । स्त्री । भूमौ ॥ गन्धस्य माता ॥

गन्धमादनः । पुं । न । पर्वतविशेषे ।

कुबेरस्य शैले । इलावृतस्य पूर्वे उत्तरतो नीलपर्यन्तं दक्षिणतो निषधपर्यन्तस्थदीर्घे भद्राश्ववर्षस्य सीमापर्वते द्विसहस्रयोजनविस्तीर्णे ॥ मेरोर्याम्यतः पीतवर्णे विष्कम्भशैले । अयञ्च पञ्चाशत् सहस्रोच्छ्रायः । यत्र सहस्रयोजनोन्नतिमान् जम्बूपादपोऽस्ति ॥ गन्धेन मादयति । मधीवर्णे शिवभक्तः । नन्द्यादित्वाल्ल्युः ॥ पुं । गन्धके ॥ भ्रमरे ॥ रामायणप्रसिद्धे वैवस्वतपुत्रे वानरविशेषे ॥

गन्धमादनी । स्त्री । सुरायाम् ॥ वन्दाके ॥ चौडानाम्नि गन्धद्रव्ये ॥

गन्धमादिनी । स्त्री । लाक्षायाम् ॥ सुगन्धिद्रव्यविशेषे । पुरायाम् ॥

गन्धमार्जारः । पुं । खट्टासे ॥ गन्धमार्जारवीर्यन्तु वीर्यकृत् कफवातहृत् । कण्डुकोठहरं नेत्र्यं सुगन्धं स्वेदगन्धनुत् ॥ गन्धेनोपलक्षितो मार्जारः ॥

गन्धमालती । स्त्री । ओषधिविशेषे ॥ गन्धकोकिलया तुल्या विज्ञेया गन्धमालती ॥

गन्धमुखी । स्त्री । छुच्छुन्दर्याम् ॥ गन्धो मुखेऽस्याः ॥

गन्धमुण्डः । पुं । गन्धभादालिया इति गौडभाषाप्रसिद्धे लताविशेषे । मस्तीवृक्षे । गर्द्दभाण्डे ॥

गन्धमूलः । पुं । कुलञ्जनवृक्षे ॥ कर्पूरे ॥

गन्धमूलकः । पुं । शट्याम् ॥

गन्धमूला । स्त्री । शट्याम् ॥ शल्लक्याम् ॥

गन्धमूलिका । स्त्री । माकन्द्याम् ॥ शट्याम् ॥

गन्धमूली । स्त्री । शट्याम् ॥ गन्धमूलमस्याः पाककर्णेति ङीष् ॥

गन्धमूषा । स्त्री ।
गन्धमूषकः । पुं ।
गन्धमूषी । स्त्री ।
छुच्छुन्दर्याम् । चिक्के । वेशनकुले ॥

गन्धमृगः । पुं । खट्टासे ॥ गन्धेनोपलक्षितो मृगः ॥

गन्धमैथुनः । पुं । वृषे ॥

गन्धमोदनः । पुं । गन्धके ॥

गन्धमोहिनी । स्त्री । चम्पककलिकायाम् ॥

गन्धयुक्तिः । स्त्री । कुङ्कुमादिसम्पादने ॥ अस्या विवरणं वाराह्याः पञ्चसप्ततितमेऽध्याये द्रष्टव्यम् ॥

गन्धरसः । पुं । गन्धद्रव्यविशेषे । बोले ॥ फुलसम्ब इति गौडभाषाप्रसिद्धे उपधातुविशेषे ॥ गन्धवान् रसोऽस्य ॥

गन्धरसाङ्गकः । पुं । श्रीवेष्टनामसुगन्धिद्रव्ये ॥

गन्धराजः । पुं । कणगुग्गुलौ ॥ मुद्गरवृक्षे ॥ न । चन्दने ॥ जवादिनामगन्धद्रव्ये ॥ स्वनामख्याते शुक्लवर्णपु

ध्यविशेषे ॥ सवक्रसतायाम् ॥ इति कश्चित् ॥

गन्धराजी । स्त्री । नखीनामगन्धद्रव्ये ॥

गन्धर्व्वः । पुं । पशुप्रभेदे । सतुकस्तूरी मृग इति कश्चित् ॥ पुंस्कोकिले ॥ घोटके । तुरङ्गे ॥ अन्तराभवसत्त्वे ॥ अन्तरा मरणजन्मनोर्मध्ये भवं सत्त्वं यातनाशरीरम् तस्मिन्नित्यर्थः ॥ गुप्तप्राणीतिकेचित् । यथा । गन्धर्व्वाःपतयोममेतिविराटे ॥ गायनधर्म्मिणि ॥ खेचरे ॥ स्वर्गगायके । देवयोनिविशेषे । हाहाहूहूप्रभृतिषु ॥ यथा । हाहा हूहू श्चित्ररथो हंसो विश्वावसु स्तथा । गोमायु स्तुम्बुरु र्नन्दिरेवमाद्यास्तेस्मृताः । इति ॥ गानधर्म्मीगन्धर्व्वोद्विविधः । मर्त्त्यगन्धर्व्वोदेवगन्धर्व्वश्चेति । यथाहुः । अस्मिन् कल्पे मनुष्यः सन्-पुण्यपाकविशेषतः । गन्धर्व्वत्त्वं समापन्नोमर्त्त्यगन्धर्व्वउच्यते ॥ पूर्व्वकल्पेकृतात् पुण्यात् कल्पादावेवचेद्भवेत् । गन्धर्व्वत्त्वं तादृशो ऽत्रदेवगन्धर्व्वउच्यते इति ॥ गन्धं सौरभम् अर्व्वति इतिगन्धर्व्वः । अर्व्वगतौ । कर्म्मण्यण् । श० ॥ गन्धयति गन्धते वा । गन्ध । उ० । अच् घञ् वा । अर्व्वति । अर्व्वगतौ । अच् । गन्धश्चासावर्व्वश्च । शकन्ध्वादित्वा ॥ गन्धोऽर्व्वोऽस्येति वा ॥

गन्धर्व्वतैलम् । न । एरण्डतैले ॥

गन्धर्व्वनगरम् । न । राजनगराकारे नीलपीतादिमेघरचनाविशेषे ॥ तत्स्वदिग्वशेन फलप्रदर्शनार्थमाह । उदगादिपुरोहितनृपबलपतियुवराजदोषदं खपुरम् । सितरक्तपीतकृष्णं विप्रादीना मभवाय ॥ दोषदमशुभप्रदम् ॥ नागरनृपविजयावहमुद ग्विदिकस्थं विवर्णमाशाय । शान्तायां तद्दृष्टं सतोरणं नृपतिविजयाय ॥ विवर्णाःसङ्कराः ॥ सर्व्वदिगुत्थं सततोत्थितञ्च भयदं नरेन्द्रराष्ट्राणाम् । चौराटविकान् हन्याद्धूमानलशक्रचापाभम् ॥ गन्धर्व्वनगर मुत्थितमापाण्डुर मशनिपातवातकरम् । दीप्ते नरेन्द्रमृत्यु र्व्वामे रिभयं जयप्रदं सव्ये । अनेकवर्णाकृति खे प्रकाशते पुरं पताकाध्वजतोरणान्वितम् यदा तदा नागमनुष्यवाजिनांपिबत्यसृग् भूरिरणे वसुन्धरा ॥ गन्धर्व्वाणांनगरमिव ॥ इन्द्रजाले ॥

गन्धर्व्वपुरम् । न । गन्धर्व्वनगरे । शून्याऽधिष्ठाने मायाविनिर्म्मितेपत्तने ॥ गन्धर्व्वाणां पुरमिव ॥

गन्धर्व्वलोकः । पुं । गुह्यकलोकोपरि विद्याधरलोकस्याधोवर्त्तमानेलोके ॥

गन्धर्ववेदः । पुं । सङ्गीतविद्यायाम् । सामवेदस्योपवेदे ॥

गन्धर्वहस्तः । पुं । } एरण्डे ॥
गन्धर्वहस्तकः । पुं । } गन्धर्वस्य मृगभेदस्य हस्तइव पत्रमस्य ॥

गन्धलता । स्त्री । प्रियङ्गौ ॥

गन्धलोलुपा । स्त्री । मक्षिकायाम् ॥ गन्धेलोलुपा ॥

गन्धवणिक् । पुं । गन्धी इतिप्रसिद्धे अम्बष्ठात् राजपुत्र्यां जाते वर्णसङ्करजातिविशेषे । गन्धाजीवे । गान्धिके ॥ अस्यकर्म लिखनं गन्धदानञ्चेति पराशरभाष्यम् ॥

गन्धवती । स्त्री । पृथिव्याम् ॥ पुरीभेदे । वरुणपुर्याम् ॥ योजनगन्धायाम् । व्यासमातरि ॥ सुरायाम् । गन्धोत्तमायाम् ॥ वायो र्नगर्याम् ॥ यथा । वायो र्गन्धवती तुङ्गश्वेतपीतध्वजाकुला । वलवद्भूतसङ्घुष्टा सर्वरत्नविनिर्मितेतिमृगेन्द्रसंहिता ॥ वनमल्लिकायाम् ॥ सुरानामनिगन्धद्रव्ये ॥ गन्धोऽस्त्यस्याम् । रसादिभ्यश्चेतिमतुप् । ङीप् ॥

गन्धवधूः । स्त्री । शट्याम् ॥ चीडाख्यगन्धद्रव्ये ॥

गन्धवल्कलम् । न । त्वचे । दारचीनी इतिभाषा ॥

गन्धवल्लरी । स्त्री । सहदेव्याम् ॥

गन्धवल्ली । स्त्री । डामिपेला इतिगौडभाषाप्रसिद्धे पीतपुष्पे हस्वोत्पले । गोवन्द्याम् । सहदेव्याम् ॥

गन्धवहः । पुं । वायौ ॥ वहति । वहप्रापणे । अच् । गन्धस्य वहः ॥ त्रि । गन्धयुक्ते ॥

गन्धवहलः । पुं । सितार्जके ॥

गन्धवहा । स्त्री । नासिकायाम् ॥ वहति । वह० । पचाद्यच् । टाप् । गन्धस्य वहा ॥

गन्धवहुला । स्त्री । गोरक्षीहक्षे ॥

गन्धवारि । न । गन्धवासितोदके । गन्धजले ॥

गन्धवाहः । पुं । वायौ ॥ कस्तूरीमृगे ॥ गन्धं वहति । वह० । कर्मण्यण् ॥

गन्धवाहा । स्त्री । घ्राणे । नासिकायाम् ॥ गन्धस्य वाहो वहनं यस्यां सा ॥

गन्धविह्वलः । पुं । गोधूमे ॥

गन्धवीजा । स्त्री । मेथिकायाम् ॥

गन्धवृक्षकः । पुं । शालवृक्षे ॥

गन्धव्याकुलम् । न । कक्कोले ॥

गन्धशटी । स्त्री शट्याम् ॥

गन्धशाकम् । न । गौरसुवर्णशाके ॥

गन्धशालिः । पुं । वासमतीतिख्यातकलमोत्तमे । गन्धतण्डुले ॥

गन्धशुण्डिनी । स्त्री । छुच्छुन्दर्याम् ॥

गन्धशेखरः । पुं । कस्तूर्याम् ॥

गन्धसलिलम् । न । गन्धद्रव्याणामग्निसंयोगेन निष्कासितेजले ॥

गन्धसारः । पुं । चन्दनवृक्षे ॥ गन्धवान् सारः स्थिरभागोऽस्य । गन्धएव सारोऽस्य वा ॥ मुद्गरवृक्षे ॥

गन्धसारणः । पुं । वृहन्नख्याम् ॥

गन्धसोमम् । न । कुमुदे । कैरवे ॥

गन्धहस्ती । पुं । मत्तेभे ॥ यस्य मदगन्धेन अन्ये गजाः पलायन्ते स गन्धहस्तीत्युच्यते ॥

गन्धहारिका । स्त्री । परगृहं गत्वा कर्मकारिण्यां शिल्पिन्याम् ॥ गन्धहरणकर्त्र्याम् ॥

गन्धा । स्त्री । शट्याम् ॥ शाल्पपर्ण्याम् ॥ चम्पककलिकायाम् ॥

गन्धाखुः । पुं । छुच्छुन्दर्याम् ॥

गन्धाजीवः । पुं । गन्धवणिजि ॥ गन्ध आजीवोऽस्य ॥

गन्धाढ्यः । पुं । नारङ्गवृक्षे ॥ न । चन्दने ॥ जवादिनामगन्धद्रव्ये ॥ त्रि । गन्धयुक्ते ॥

गन्धाढ्या । स्त्री । गन्धपत्रायाम् ॥ स्वर्णयूथ्याम् ॥ तरुण्याम् ॥ आरामशीतलायाम् ॥ गन्धाल्याम् ॥

गन्धाधिकम् । न । तृणकुङ्कुमे ॥

गन्धाम्ला । स्त्री । वनबीजपूरके ॥

गन्धारः । पुं । रागे ॥ सिन्दूरे ॥ स्वरविशेषे ॥ पुंबहुत्वे नीवृदन्तरे । खन्धार इति भाषा ॥

गन्धाला । स्त्री । जियतीति गौड भाषा प्रसिद्धे वृक्षविशेषे ॥ इति शब्दचन्द्रिका ॥

गन्धालिका । स्त्री । } लताविशेषे । प्रसारण्याम् । भद्रपर्ण्याम् ॥
गन्धाली । स्त्री । }

गन्धालीगर्भः । पुं । सूक्ष्मैलायाम् ॥

गन्धाश्मा । पुं । गन्धके ॥ गन्धयुक्तोऽश्मा । शाकपार्थिवादिः ॥

गन्धाष्टकम् । न । शक्त्यादिदेवताभ्योदीयमाने गन्धानामष्टके ॥ यथा । चन्दनागुरुकर्पूरचोरकुङ्कुमरोचनाः । जटामांसी कपियुता शक्तेर्गन्धाष्टकं विदुः ॥ १ ॥ चन्दनागुरुह्रीवेरकुष्ठकुङ्कुमसेव्यकाः । जटामांसी मुरमिति विष्णोर्गन्धाष्टकं विदुः ॥ २ ॥ चन्दनागुरुकर्पूरतमालजलकुङ्कुमम् । कुशीदं कुष्ठसंयुक्तं शैवं गन्धाष्टकं विदुः ॥ ३ ॥ स्वरूपं चन्दनं चोरं रोचनाऽगुरु मेव च । मदं द्वगदयोर्भूतं कस्तूरी चन्द्रसंयुतम् ॥ गन्धाष्टकं विनिर्द्दिष्टं गणेशस्य महेशितुः ॥ ४ ॥ इति शारदातिलकम् ॥ अपिच । चन्दनागुरुकर्पूररोचना

कुङ्कुमं मदम् । रक्तचन्दनह्रीवेरं गागापत्यमुदाहृतम् ॥ ४ ॥ जलकाश्मीरकुष्ठैस्तु रक्तचन्दनचन्दनैः । उशीरागुरुकर्पूरैः सौरं गन्धाष्टकं विदुः ॥ इति मेरुतन्त्रम् ॥ ५ ॥ भिषजां गन्धाष्टकं यथा । जातीपत्रं लवङ्गञ्च त्वगेला नागकेसरम् । मरिचं मृगनाभिश्च विद् गन्धाष्टकं त्विदमिति ॥

गन्धि । न । तृणकुङ्कुमे ॥ इति राजनिर्घण्टः ॥

गन्धिकः । पुं । गन्धके ॥ गन्धोऽस्यास्ति । अतइनिठनौ इति ठन् ॥

गन्धिनी । स्त्री । गन्धकुट्याम् । मुरायाम् ॥ प्रशस्तो गन्धोऽस्याः । इनिः ॥

गन्धिपर्णः । पुं । सप्तच्छदवृक्षे ॥

गन्धोतुः । पुं । खट्टाशे ॥

गन्धोत्कटा । स्त्री । दमनकवृक्षे ॥

गन्धोत्तमा । स्त्री । मदिरायाम् । मद्ये ॥ गन्धेनोत्तमा । गन्धः उत्तमो यस्या वा । राजदन्तादिः ॥

गन्धोली । स्त्री । वरटायाम् । ततैया वरडे इति च भाषाप्रसिद्धे सपक्षकीटे ॥ शुण्ठ्याम् ॥ भद्रायाम् ॥ गन्धयति । गन्धअर्द्दने । बाहुलकात् ओलच् । गौरादि ङीष् ॥

गभस्तिः । पुं । किरणे ॥ सूर्ये ॥ स्त्री । वह्निप्रियायाम् । स्वाहायाम् ॥ गम्यते । अन्यत्रापीतिडः । गो । ज्ञेयद्रव्यः । तं बभस्ति दीपयति इति गभस्तिः । भस भर्त्सनदीप्त्योः । जु० । क्तिच्क्तौ चेति क्तिच् ॥

गभस्तिनेमिः । पुं । गभस्तिचक्रस्य मध्ये सूर्यात्मना स्थिते हरौ ॥ नेमिपदेन चक्रावयववाचिनाऽवयविचक्रं लक्ष्यते । गभस्त्यात्मिका नेमिश्चक्रमस्य । गभस्तिचक्रमध्यवर्त्तिनः सूर्यात्मनः परमेश्वरस्येति गभस्तिनेमिः ॥

गभस्तिमान् । पुं । सूर्ये ॥ न । तलातलाख्ये पातालभेदे ॥ भारतवर्षीयोपद्वीपविशेषे ॥ गभस्तयो विद्यन्तेऽस्यास्मिन् वा । मतुप् ॥

गभस्तिहस्तः । पुं । सूर्ये ॥ गभस्तयो हस्ता यस्य सः ॥

गभीरः । त्रि । निम्ने । गम्भीरे ॥ अगाधे ॥ गच्छते ॥ गच्छति जलमत्र गच्छति वा । गाङ्गतौ गम्लृ गतौ वा । गम्भीरादयश्चेति गभीरगम्भीराविति वा गमेरीरन् भश्चान्तादेशः ॥

गभीरिका । स्त्री । दण्डढक्कायाम् । वृहड्ढक्कायाम् । दमामा नगारा इति च भाषा ॥

गभोलिकः । पुं । मसूरे ॥

गमः । पुं । द्यूतप्रभेदे । अक्षविव

र्त्ते ॥ अपर्यालोचने ॥ अध्वनि । वर्त्मनि ॥ सद्दकपाठे ॥ याने । जिगीषोर्गमने ॥ गमनम् । गम्लृ गतौ । ग्रहवृद्निश्चिगमश्चेत्यप् ॥

गमकः । पुं । बोधके । ज्ञापके ॥ स्वरविशेषे ॥

गमकारित्वम् । न । रभसे । हर्षे ॥

गमथः । पुं । पथि ॥ त्रि । अध्वगे । पथिके ॥ गच्छति गम्यते वा । गम्लृ० । शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथइत्यथ प्रत्ययः ॥

गमनम् । न । यात्रायाम् । जिगीषोः प्रयाणे । कूंच इति पारसीक भाषा ॥ पादविहरणे । पञ्चविधकर्मान्तर्गतकर्मविशेषे । तस्यभेदा यथा । भ्रमणं रेचनं स्पन्दनो र्द्धज्वलनमेवच । तिर्य्यग्गमनमप्यत्र गमना देवगृह्यते ॥ गम्लृ० । ल्युट् ॥

गमनीयः । त्रि । पदनीये ॥ गन्तुमर्हः । अर्हे कृत्यतृचश्चेति गमेरनीयर् ॥

गमयिता । त्रि । प्रापयितरि ॥

गमितः । त्रि । प्रापिते ।

गमी । त्रि । गमिष्यति ॥ गम्लृ० । गमेरिनिः । सचभविष्यति गम्यादय इति भविष्यत्काले ॥ गमनकर्त्तरि ॥

गम्भारिका । स्त्री । गम्भार्याम् ॥

गम्भारी । स्त्री । सर्वतोभद्रायाम् । काश्मीर्याम् ॥ गम्भार्याः फलंमूलञ्च गम्भारी । अनुदात्तादेश्चेत्यञः फलपाकशुषामितिलुपि युक्तवद्भावः । कंजलं बिभर्त्ति । डुभृञ् धारणपोषणयोः । कर्मण्यण् । पृ० गत्वम् ॥

गम्भीरः । पुं । जम्बीरे ॥ पङ्कजे । पद्मे ॥ ऋङ्मन्त्रे ॥ त्रि । गभीरे । निम्ने ॥ गहने । दुरवगाहे ॥ गाते जलमत्र गच्छति वा । गाङ्० गम्लृ० वा । गम्भीरादयश्चेति गभीर गम्भीरावितिवा गमेरीरन् भश्चान्त्यादेशो नुमागमश्च निपातसिद्धः ॥ स्वरः सत्त्वञ्च नाभिश्च गम्भीरस्त्रिषुशस्यते ॥

गम्भीरवेदी । पुं । दुर्द्धरहस्तिनि । अवमताङ्कुशे । चालके ॥ अस्य लक्षणं यथा । चिरकालेन यो वेत्ति शिक्षां परिचितामपि । गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिरिति ॥ अन्यच्च । त्वग्भेदाच्छोणितस्रावान्मांसस्यमथनादपि । आत्मानं यो न जानाति स स्याद्गम्भीरवेदितेति ॥ गम्भीरं मन्दं वेत्तीति ॥

गम्यः । त्रि । प्राप्ये ॥ गमनयोग्ये ॥ गम्यते । गम्लृ० । पोरदुपधादितियत् ॥

गम्यदिक् । स्त्री । गन्तुमिष्टायां दिशि ॥

गम्यमानः । त्रि । बुध्यमाने ॥ वर्त्तमान

गमनाश्रये ग्रामादौ ॥

गम्या । स्त्री । पत्न्याम् ॥ खेदात् स्त्रीषु
प्रवृत्तिर्भवति । समानस्य खेदविग
मो गम्याया मगम्यायाश्च । तत्र निय
मः क्रियते इयङ्गम्येतिभाष्यम् । खेद
यतीति खेदोरोगः । इन्द्रियनियमा
सामर्थ्यं वा खेदइतिकैयटः ॥ एवञ्चा
गम्यानिषेधस्येतराभ्यनुज्ञाफलकत-
यास्वदारगमने दोषाभावः ॥

गयः । पुं । असुरविशेषे ॥ अमूर्त्तरयः
पुत्रे राजर्षिप्रभेदे ॥ वैवस्वतपुत्रे
रामायणप्रसिद्धे वानरविशेषे ॥

गयपुरी । स्त्री । गयातीर्थे ॥

गया । स्त्री । तीर्थविशेषे । गयराज
र्षिपुर्याम् ॥ गयाशिरआदिपरिमा
णम् । नागा ज्जनार्दना द्ब्रह्मयूपा
च्चोत्तरमानसात् । एतद् गयाशिरः
प्रोक्तं फल्गुतीर्थं तदुच्यते ॥ पिता
महं समासाद्य यावदुत्तरमानस
म् । फल्गुतीर्थं तु विज्ञेयं देवाना
मपि दुर्लभम् ॥ क्रौञ्चपादात् फल्गु
तीर्थं यावत् साक्षाद्गयाशिरः । मुखं
गयासुरस्यैतत् तस्माच्छ्राद्धमथाक्ष
यम् ॥ मुण्डपृष्ठाच्च पूर्वस्मिन् पश्चि
मे दक्षिणोत्तरे । सार्द्धक्रोशद्वयं मा
नं गयायां ब्रह्मणेरितम् ॥ पञ्चक्रोशं
गयाक्षेत्रं क्रोशमेकं गयाशिरः । त

न्मध्येसर्वतीर्थानि त्रैलोक्ये यानि
सन्तिवै ॥ गयायां नहि तत् स्थानं
यत्रतीर्थं न विद्यते । सान्निध्यं सर्व
तीर्थानां गयातीर्थं ततो वरम् ॥
ब्रह्मज्ञानेन किंसाध्यं गोग्रहे मरणं
न किम् । वासेन किङ् कुरुक्षेत्रे य
दिपुत्रो गयां व्रजेत् ॥ श्राद्धकृद् यो
गयाक्षेत्रे पितॄणामनृणोपिसः । शि
रसि श्राद्धकृद् यस्तु कुलानांशतमु
द्धरेत् ॥ गयाशिरसियः पिण्डान् ये
षां नाम्नातु निर्वपेत् । नरकस्थादि
वं यान्ति स्वर्गस्थामोक्षमाप्नुयुः ॥
गत्वा वणिग् गयाशीर्षे प्रेतराजस्य
पिण्डकम् । प्रददौ मनुजैः सार्द्धं
स्वपितृभ्यस्ततो ददौ ॥ प्रेताः प्रेत
त्वनिर्मुक्ता वणिक् च गृहमागतः
। प्रेतराजः सह प्रेतै र्गयाश्राद्धा दि
वंगतः ॥ ॥ गयायां सर्वकालेषु पि
ण्डं दद्या द्विचक्षणः । अधिमासे ज
न्मदिने चास्तेऽपि गुरुशुक्रयोः ॥ न
त्यक्तव्यं गयाश्राद्धं सिंहस्थेऽपिवृह
स्पतौ । तथा दैवप्रमादेन प्रवहत्
सुग्रणेषु च ॥ पूतः कर्म्माधिकारी
च श्राद्धकृद् ब्रह्मलोकभाक् ॥ मीने
मेषेस्थिते सूर्ये कन्यायां कार्मुके
घटे । नारदत्रिषु लोकेषु गया श्रा
द्धं सुदुर्लभम् ॥ ॥ मुण्डनञ्चोपवा

सप्तसप्तैतीर्थेष्वयं विधिः । वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयाम् ॥ दण्डं प्रदर्शयेद् भिक्षु र्गयांगत्वा न पिण्डदः । दण्डं न्यस्य विष्णुपदे पितृभिः सहमुच्यते ॥ गयागजो गयादित्यो गायत्री च गदाधरः । गया गया सुरश्चैव षड्गया मुक्तिदायिकाः ॥ इतिगया माहात्म्यादिकं वायुपुराणे ॥ गयायां सर्वमङ्गलास्थानं वर्त्तते इतिदेवीगीता । गयायाञ्च गयेश्वरीत्यागमः ॥

गयाशीर्षम् । न । पञ्चक्रोशात्मके प्रसिद्धक्षेत्रे ॥

गरः । पुं । उपविषे ॥ विषे ॥ रोगे ॥ न । पञ्चमकरणे ॥ तत्रजातस्यफलम् । विचारदक्षो विजितारिपक्षः शूरो ऽतिधीरो मृदुहास्ययुक्तः । दाता दयालु र्गुणवान् नरः स्याद् गरे परेषामुपकारकर्त्तेति ॥ वत्सनाभाख्यविषे ॥ गरणे ॥ गरण म् । गृ निगरणे । ऋदोरप् ॥ गिरति वा । गृ० । पचाद्यच् ॥

गरघ्नः । पुं । कृष्णार्जके ॥ वर्बरे ॥

गरघ्नी । स्त्री । गरइ इति प्रसिद्ध मत्स्यविशेषे ॥ गरघ्नी मधुरा तिक्ता तुवरा वातपित्तहृत् । कफघ्नी रुचिकृल्लघ्वी दीपनी बलवीर्यकृत् ॥

गरणम् । न । निगारे । भक्षणे ॥ सेचने ॥

गरदम् । न । विषे ॥ त्रि । विषप्रदे । मरणहेतुद्रव्यस्य दातरि ॥ गरं ददाति । डुदाञ्० । आतइति कः ॥

गरभः । पुं । गर्भे ॥ गिरति गृणातिवा । गृ० । वा० अभच् ॥ मृगे ॥

गरलम् । न । तृणपूले । घासका पूला इति भाषा ॥ पन्नगविषे ॥ विषे ॥ माने ॥ गिरति जीवम् । गृ० । अच् । गरं लाति । ला० । कः । भावप्रत्ययं गरशब्दस्य ॥ गिरतेः बाहुलकात् कलच् वा ॥

गरव्रारिः । पुं । मरकतमणौ ॥

गरव्रतः । पुं । मयूरे ॥

गरा । स्त्री । देवदालीलतायाम् ॥ निगरणे ॥

गरागरी । स्त्री । देवताडद्रुमे ॥ मूषिकविषघ्नत्वात् गरम् आगिरति । अच् । ङीप् ॥

गरात्मकम् । न । शिग्रुबीजे ॥

गराधिका । स्त्री । लाक्षायाम् ॥

गरिमा । पुं । गुरुत्वे ॥ गुरोर्भावः । पृथ्वादिभ्य इमनिच् । प्रियस्थिरेत्यादिना गुरोर्गर् आदेशः ॥

गरिष्ठः । त्रि । अतिशयेनगुरौ । गुरुतमे ॥ प्रियस्थिरेति साधुः ॥

गरी । स्त्री । देवताडवृक्षे ॥ गृणाति । गॄ शब्दे । अच् । गौरादिः ॥ यद्वा दैा गरडितिपाठात् ङीप् वा ॥

गरीयान् । त्रि । प्रभूते ॥ गुरुतरे ॥ यथा । उत्पादकब्रह्मदात्रो र्गरीयान् ब्रह्मदः पितेति ॥ अयमनयो रतिशयेन गुरुः । द्विवचनविभज्योपपदे तरबी यसुनाविती यसुन् ॥

गरुडः । पुं । गरुत्मति । तार्क्ष्ये । वैनतेये ॥ गरुद्भिर्डयते । डीङ् विहायसागतैा । अन्येभ्योपीतिडः । पृषोदरादित्वात् तलोपः ॥ गिरउड्डयतिउडत्वा । केचिदिमंनपठन्ति । तदा पूर्ववदेव विग्रहः ॥ पञ्चमाह्निकस्य द्वितीये ऽ । ऽ पर्याये ॥

गरुडध्वजः । पुं । विष्णौ ॥ गरुडोध्वजश्चिह्नमस्य ॥

गरुडपुराणम् । न । गारुडे ॥

गरुडरुतम् । न । अष्टिसंज्ञकषोडशाक्षरवृत्तिप्रभेदे ॥ यथा । गरुडरुतं नजैा भजतमायदास्युरुदा ॥ अमरमयूरमानसमुदे पयोदध्वनिर्गरुडरुतं मुरारि भुजगेन्द्रसन्त्रासने । धरणिभरावतारविधिडिण्डिमाडम्बरः सजयतिकंसरङ्गभुवि सिंहनादोत्तरे रिति ॥

गरुडव्यूहः । पुं । गरुडाकृतिवत् कृतरचने व्यूहप्रभेदे ॥ सूक्ष्ममुखपक्षाङ्गः पृथुतरमध्यो गरुडव्यूहो भवति । अनेन दाक्ष्ये यो भये सति मार्गं व्रजेत् ॥

गरुडाग्रजः । पुं । अरुणे । सूरसूते ॥ गरुडस्य अग्रजः ॥

गरुडाङ्कितम् । न । }
गरुडाश्मा । पुं । } मरकतमणौ ॥
गरुडोत्कीर्णम् । न । }

गरुत् । पुं । पक्षे । पंख इति भाषा प्रसिद्धे ॥ गिरति । गॄ नि गरणे । गृणाति वा । गॄ शब्दे । मृग्रोरुतिः ॥

गरुत्मान् । पुं । पक्षिमात्रे ॥ गरुडे । तार्क्ष्ये ॥ गरुतःपक्षाःसन्त्यस्य । मतुप् । यवादित्वाज्झय इति वत्त्वं न । तसौमत्त्वर्थे इति भत्त्वम् ॥

गरुबोधी । पुं । भारतीखगे । भारद्व इति गौड भाष ॥

गर्गः । पुं । ब्रह्मणःपुत्रे मुनिविशेषे ॥ वृषे ॥ किञ्चुलुके ॥ गृणाति । ग० । मुद्रिग्रोर्गग्गाविति गः ॥ तालविशेषे ॥ यथा । चतुर्द्रुतं विरामान्तं तालोऽयंगर्गसंज्ञित इति ॥

गर्गरः । पुं । बेलगगरी इति प्रसिद्धे मीनविशेषे । गागरा इति गौड भाषा ॥ गर्गरः पितस्नः किञ्चिद्वातजित्कफकोपनः ॥ मस्याकारगुणौ यथा

। यः पीतवर्णोऽपिचपिच्छिलाङ्गः पृष्ठेषु रेखा बहुलः सशल्कः । सगर्गरो वर्व्वरनादकश्यो जडश्च शीतः कफवातकारी इति ॥ तद्रूपपर्य्यायः । पृष्ठेषु रेखा बहुलः सशल्कः । सगर्ग ...

गर्गरी । स्त्री । मन्थनपात्रे । मन्थन्याम् । मथानी इति भाषा ॥ कलश्याम् । गगरी इति भाषा ॥ यथा ॥ मेषादौ सक्तवो देया वारिपूर्णा चगर्गरी इति ॥ गौरादि ङीष् ॥

गर्गाटः । पुं । मत्स्यविशेषे । योगनाविके ॥

गर्ज्जम् । न । हस्तिशब्दे ॥ मेघादिशब्दे ॥

गर्ज्जकः । पुं । गजाड इति गौडभाषाप्रसिद्धे शालमत्स्ये । शालजे ॥

गर्ज्जनम् । न । निनदे । स्वनिते ॥ कोपे ॥ गर्ज शब्दे । ल्युट् ॥

गर्ज्जरम् । न । गाजर इति प्रसिद्धे मूले । स्वादुमूले । नारङ्गे । पीतकन्दे ॥ इति राजनिर्घण्टः ॥

गर्ज्जाफलः । पुं । विकङ्कतवृक्षे ॥ युद्धे ॥

गर्ज्जिः । पुं । मेघशब्दे ॥

गर्ज्जितम् । न । मेघनिर्घोषे ॥ पुं । मत्तकुञ्जरे ॥ गर्ज० । भावे क्तः ॥ गर्जयति । अकर्मकत्वात् कर्त्तरि वा क्तः ॥ गर्जोजातोऽस्यत्रा । ता० इतच् ॥

गर्त्तः । पुं । अवटे । क्षितिरन्ध्रे । गढा इति भाषा ॥ त्रिगर्त्तदेशाधि ॥ कुकुन्दरे । नितम्बस्थकूपे ॥ अष्टधनुःसहस्रेभ्यो न्यूनगतौ जलाशयविशेषे ॥ तदुक्तं परिशिष्टे । धनुः सहस्राण्यष्टौ च गतिर्यासां न विद्यते । न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः इति ॥ गिरति । गॄ० । हसिमृग्रिणितनि ॥

गर्त्ता । स्त्री । अवटे । भूरन्ध्रे ॥ टाप् ॥

गर्त्तिका । स्त्री । तन्तुशालायाम् । तांतघर इति भाषा ॥

गर्द्दभः । पुं । गधा इति प्रसिद्धे जन्तुविशेषे । चक्रीवति । रासभे ॥ यथा । अविश्रामं वहेद्भारं शीतोष्णञ्च न विन्दति । ससन्तोष स्तथा नित्यं त्रीणि शिक्षेत गर्द्दभादिति ॥ गन्धविशेषे ॥ न । श्वेतकुमुदे ॥ विडङ्गे ॥ गर्द्दति । गर्द शब्दे । हृशृशलिकलिगर्द्दिभ्योऽभच् ॥

गर्द्दभगदः । पुं । जालगर्द्दभरोगे ॥

गर्द्दभशाकः । पुं । ब्रह्मयष्ट्याम् । भार्ग्याम् ॥ गर्द्दभभक्ष्यशाकत्वात् गर्द्दभस्यशाकः ॥

गर्द्दभशाका । स्त्री । ब्रह्मयष्ट्याम् ॥

गर्द्दभशाखी । स्त्री । भार्ग्याम् ॥ इति राजनिर्घण्टः ॥

गर्द्दभाण्डः । पुं । निगोंडी पीलण इति प्रसिद्धे वृक्षे । कन्दराले । कपीतने । प्लक्षे ॥ अयं पञ्चकाण्डफलादिभिरश्वत्थाकारः ॥ गर्द्दभं गन्धविशेषम् अमति । अमगत्यादिषु । अ मन्ताड्डः ॥

गर्द्दभाह्वयः । पुं । कुमुदे ॥

गर्द्दभिका । स्त्री । क्षुद्ररोगविशेषे ॥ तस्य रूपं यथा । मण्डलं वृत्तमुत्सन्नं सरक्तं पिडकावृतम् । रुजाकरीं गर्द्दभिकां तां विद्याद्वातपित्तजामिति ॥

गर्द्दभी । स्त्री । क्षुद्रजन्तुविशेषे । गोमयकीटे ॥ गर्द्दभिकारोगे ॥ रासभ्याम् ॥ अपराजितायाम् ॥ श्वेतकण्टकार्य्याम् ॥ कटभ्याम् ॥

गर्द्धः । पुं । अभिलाषातिशये । स्पृहायाम् ॥ गृधु अभिकाङ्क्षायाम् । घञ् ॥

गर्द्धनः । त्रि । लुब्धे ॥ गर्द्धनशीलः । गृधु० । जुचङ्क्रम्येतियुच् ॥

गर्द्धी । त्रि । अभिलाषातिशयवति ॥ गर्द्धोऽस्यास्ति । इनिः ॥

गर्भः । पुं । भ्रूणे । जन्मकारणे ॥ तस्य लक्षणं यथा । गर्भाशयगतं शुक्रमार्त्तवं जीवसमन्वितकम् । प्रकृतिः सविकाराञ्च तत्सर्व्वं गर्भसंज्ञकम् ॥ कालेन वर्द्धितो गर्भो यद्यङ्गोपाङ्गसंयुतः । भवेत् तदा स मुनिभिः शरीरीति निगद्यते इति ॥ अपि च । क्षामता गरिमा कुक्षे र्मूर्च्छा छर्द्दि ररोचकम् । जृम्भा प्रसेकसदने रोमराज्याः प्रकाशनमिति ॥ अर्भके । शिशौ ॥ कुक्षौ ॥ सन्धौ ॥ नाटकसन्धौ ॥ पनसकण्टके ॥ मध्यमे ॥ अपवरके ॥ गङ्गाद्युषितस्थले ॥ भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलम् । तावद्गर्भं विजानीयात् तदूर्द्ध्वं तीरमुच्यते ॥ गिरति गृणाति वा गीर्य्यते वा । गृ निगरणे गृ शब्दे वा । अर्त्तिगृभ्यांभन् ॥ गर्भोऽपवरकेऽन्नेऽग्नौ सुतेपनसकण्टके । कुक्षौ कुक्षिस्थजन्तौ चेति कोशान्तरम् ॥ अत्र प्रावृट्कालपरीक्षार्थं गर्भलक्षणं करोति वराहमिहिरः ॥ तत्रादौ प्रयोजनप्रदर्शनार्थमाह । अन्नं जगतः प्राणाः प्रावृट्कालस्य चान्नमायत्तम् । यस्मादतः परीक्ष्यः प्रावृट्कालः प्रयत्नेन ॥ तल्लक्षणानि मुनिभिर्यानि निबद्धानि तानि दृष्ट्वेदम् । क्रियते गर्गपराशरकश्यपवज्राद्रिरचितानि ॥ दैवविदविहितचित्तो द्युनिशं

यो गर्भलक्षणे भवति । तस्य मुनेरिव वाणी भवति न मिथ्या मुनिरिव ॥ किञ्चातः परं मन्यच्छास्त्रं ज्यायोऽस्ति यद्विदित्वैव । प्रध्वंसिन्यपि काले त्रिकालदर्शी कलौ भवति ॥ अत्र परमतं स्वमतं चाह । केचिद्वदन्ति कार्त्तिकशुक्लान्तमतीत्य गर्भदिवसाः स्युः । न तु तन्मतं बहूनां गर्गादीनां मतं वक्ष्ये ॥ मार्गशिरः सितपक्षप्रतिपत् प्रभृति क्षपाकरेऽषाढाम् । पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम् ॥ अवधृतस्य गर्भस्य प्रसवकालमान माह । यन्नक्षत्र मुपगते गर्भश्चन्द्रे भवेत् स चन्द्रवशात् । पञ्चनवतिशते दिवसे तत्रैव प्रसव मायाति ॥ सितपक्षभवाः कृष्णे शुक्ले कृष्णा द्युसम्भवा रात्रौ । नक्तं प्रभवा श्चाहनि सन्ध्याजाताश्च सन्ध्यायाम् ॥ * ॥ गर्भाणां विशेषलक्षणं कालनिर्देशमाह । मृगशीर्षाद्या गर्भा मन्दफलाः पौषशुक्लजाताश्च । पौषस्य कृष्णपक्षेण विनिर्दिशेच्छ्रावणस्यसितम् ॥ माघसितोत्था गर्भाः श्रावणकृष्णे प्रसूतिमायान्ति । माघस्य कृष्णपक्षेण विनिर्दिशेद्भाद्रपदशुक्लम् ॥ १० ॥ फाल्गुनशुक्लसमुत्था भाद्रपदस्यासि

गर्भः

ते विनिर्देश्याः । तस्यैव कृष्णपक्षोद्भवास्तु ये तेऽश्वयुक् शुक्ले ॥ चैत्रसितपक्षजाताः कृष्णेऽश्वयुजस्य वारिदा गर्भाः । चैत्रासितसम्भूताः कार्त्तिकशुक्लेऽभिवर्षन्ति ॥ * ॥ मेघानांवायोश्च लक्षणम् ॥ पूर्वोद्भूताः पश्चादपरोत्थाः प्राग्भवन्ति जीमूताः । शेषास्वपि दिक्ष्वेवं विपर्ययो भवति वायोश्च ॥ * ॥ गर्भसम्भव० । ह्लादिमृदूदक्शिवशक्रदिग्भवो मारुतो वियद्विमलम् । स्निग्धसितबहुलपरिवेषपरिवृतौ हिममयूखार्कौ ॥ पृथुबहुलस्निग्धघनं घनसूचीक्षुरकलोहिताभ्रयुतम् । काकाण्डमेचकाभं वियद्विशुद्धेन्दुनक्षत्रम् ॥ सुरचापमन्द्रगर्जितविद्युत्प्रतिसूर्यका शुभा सन्ध्या । शशिशिववशक्राशास्थाः शान्तरवाः पक्षिमृगसङ्घाः ॥ विपुलाः प्रदक्षिणचराः स्निग्धमयूखा ग्रहा निरुपसर्गाः । तरवश्च निरुपहताङ्कुरा नरचतुष्पदा हृष्टाः ॥ गर्भाणां पुष्टिकराः सर्वेषा मेव यो न तु विशेषः । स्वर्त्तुस्वभावजनितो गर्भविवृद्ध्यै त मभिधास्ये ॥ तस्य० । पौषे समार्गशीर्षे सन्ध्यारागोऽम्बुदाः सपरिवेषाः । नात्यर्थं मृगशीर्षे पौषे शीतश्च हिमपातः ॥ माघे

प्रशस्तो वायुश्चापाक्ककुप्पश्चिमी र
श्मिप्रभाढ्यो। अतिशीतं सघनश्च
मानो रक्तोदयौ धन्यौ ॥ २० ॥ फा
ल्गुनमासे रूक्षश्चण्डः पवनो ऽभ्र
संप्लवाः स्निग्धाः। परिवेषाश्चासक
लाः कपिलस्ताम्रो रविश्च शुभः ॥
पवनघनवृष्टियुक्ताश्चैत्रे गर्भाः शु
भाः सपरिवेषाः। घनपवनसलिल
विद्युत्स्तनितैश्च हिताय वैशाखे॥
* ॥ गर्भकाले मेघानाञ्च। मु
क्तारजतनिकाशास्तमालनीलोत्प
लाञ्जनाभासः। जलचरसत्त्वाकारा
गर्भेषु घनाः प्रभूतजलाः ॥ तीव्र
रविकरकिरणाभितापिता मन्दमा
रुता जलदाः। रुषिता इव धाराभि
र्विसृजन्त्यम्भः प्रसवकाले ॥ * ॥ ग
र्भोपघातञ्च। गर्भोपघातलिङ्गा
न्युल्काशनिपांशुपातदिग्दाहाः।
क्षितिकम्पखपुरकीलककेतुग्रहयुद्ध
निर्घाताः ॥ वृष्टी रुधिरादिवैकृत
परिघेन्द्रधनूंषि दर्शनं राहोः। इ
त्युत्पातैस्त्रिविधैश्चान्यैश्चोपह
तो गर्भः ॥ स्वर्त्तुस्वभावजनितैः सा
मान्यैर्यैश्च लक्षणैर्वृद्धिः। गर्भाणां
विपरीतैस्तैरेव विपर्ययो भवति
॥ भद्रपदाद्वयविश्वाम्बुदेवपैता
महर्क्षेषु। एतेष्वृतुषु विवृद्धो गर्भो ब

हुतोयदो भवति ॥ * ॥ येषु नक्ष
त्रेषु गर्भः सम्भूतो बहून्यहानि वर्ष
तितान्याह। शतभिषगाश्लेषार्द्रा
स्वातिमघासंयुतः शुभो गर्भः। पुष्णा
ति बहून् दिवसान् हन्त्युत्पातै
र्हत स्त्रिविधैः ॥ त्रिविधोत्पातञ्च।
दिव्यं ग्रहर्क्षजातं भुवि भौमं स्थिर
चरोद्भवं यच्च। दिग्दाहोल्कामारु
तपरिवेषाद्यं वियत्प्रभवम् ॥ * ॥
अनन्तरोक्तायां दिवससंख्यायां निय
मं करोति। मृगमासादिष्वष्टौ ष
ट् षोडश विंशतिश्चतुर्युक्ता। विंश
तिरथ दिवसत्रय मेकतमर्क्षेण प
ञ्चभ्यः ॥ ३० ॥ पञ्चनिमित्तः शत-
योजनं तदर्द्धार्द्ध मेकहान्या ऽतः।
वर्षति पञ्च समस्ता रूपेणैकेन यो
गर्भः ॥ * ॥ प्रत्येकनिमित्तसंयुक्ता
नां गर्भाणां पानीयसङ्ख्यामाह ॥
द्रोणः पञ्चनिमित्ते गर्भे त्रीण्याढका
नि पवनेन। षट् विद्युता नवाभ्रैः स्त
नितेन द्वादश प्रसवः ॥ * ॥ अथैव
विशेषमाह। क्रूरग्रहसंयुक्ते करका
शनिमत्स्यवर्षदा गर्भाः। शशिनि
रवौ वा शुभसंयुते स्थिते भूरिवृष्टि
कराः ॥ * गर्भसम्भवे विशेषञ्च
समाह। गर्भसमये ऽतिवृष्टिर्गर्भा
भावाय निर्निमित्तकृता। द्रोणाष्टां

शेऽप्यधिके दृष्टे गर्भः परिस्रुतो भवति ॥ * ॥ अत्रैव विशेषफलमाह । गर्भः पुष्टः प्रसवे ग्रहोपघातादिभिर्यदि न दृष्टः । आत्मीयगर्भसमये करकामिश्रं ददात्यम्भः ॥ * ॥ अत्र दृष्टान्तमाह । काठिन्यं याति यथा चिरकालधृतं पयः पयस्विन्याः । कालातीतं तद्वत् सलिलं काठिन्यमुपयाति ॥ * ॥ अथ गर्भलक्षणं पुष्टिकरमाह । पवनसलिलविद्युद्गर्जिताभ्रान्वितो यः स भवति बहुतोयः पञ्चरूपोऽभ्युपेतः । विसृजति यदि तोयं गर्भकालेऽतिभूरि प्रसवसमयमित्वा शीकराम्भः करोति ॥ ३७ ॥ इति वाराह्यामेकविंशोऽध्यायः ॥ २१ ॥ अत्र गर्भवायुधारणापि । तत्र तासां लक्षणम् । ज्येष्ठसिताऽष्टम्याद्याश्चत्वारो वायुधारणा दिवसाः । मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च ॥ विशेषमाह । तत्रैव स्वात्याद्ये वृष्टे भचतुष्टये क्रमान्मासाः । श्रावणपूर्वा ज्ञेयाः परिस्रुता धारणास्तास्तु ॥ यदि ताः स्युरेकरूपास्ततः शुभाः सान्तरास्तु न शिवाय । तस्करभयदाः प्रोक्ताः श्लोकाश्चाप्यत्र वासिष्ठाः ॥ तानाह । सविद्युतः सपृषतः सपांशूत्करमारुताः । सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः ॥ यदा तु विद्युतः श्रेष्ठाः शुभाशाप्रत्युपस्थिताः । तदापि सर्वसस्यानां वृद्धिं ब्रूयाद्विचक्षणः ॥ सपांशुवर्षाः साप्श्च शुभा बालक्रिया अपि । पतत्रिणां सुस्वना वा क्रीडापांशुजलादिषु ॥ रविचन्द्रपरीवेषाः स्निग्धा नात्यन्तदूषिताः । वृष्टिस्तथापि विज्ञेया सर्वशस्यार्थसाधिका ॥ मेघाः स्निग्धाः संहताश्च प्रदक्षिणगतिक्रियाः । तदा स्यान्महती वृष्टिः सर्वसस्याभिवृद्धये ॥ इति वाराह्यां गर्भवायुधारणाध्यायो द्वाविंशतितमः ॥ २२ ॥

गर्भकः । पुं । केशमध्येस्थितमाल्ये ॥ गर्भ इव । इवे प्रतिकृताविति कन् ॥ न । रजनीद्वन्द्वे । दोरात इति भाषा ॥

गर्भकरः । पुं । पुत्रजीववृक्षे ॥

गर्भगृहम् । न । गर्भागारे ॥ गर्भ इव गृहम् ॥

गर्भघातिनी । स्त्री । लाङ्गलिक्याम् ॥

गर्भण्डः । पुं । नाभिगुडके । नाभिकी गांठ इति भाषा ॥ गर्भस्य अण्ड इव ॥ शकन्ध्वादिः

गर्भदः । पुं । पुत्रजीववृक्षे ॥

गर्भदात्री । स्त्री । क्षुपविशेषे । अपत्यदायाम् । प्राणिमातरि । तापसद्रुमसन्निभायाम् ॥

गर्भनाशः । पुं । गर्भध्वंसे ॥ तस्य लक्षणं यथा । अपविद्धशिरा या तु शीताङ्गी निरपत्रपा । नीलोद्धतशिरा हन्ति सा गर्भं स च तां तथा ॥ मासमागन्तुभिर्यस्तु रूपतापैः प्रपीडितः । गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च प्रपीडितः ॥ अन्तर्मृतगर्भलक्षणं यथा । गर्भास्पन्दनमार्धानां प्रणाशः श्यावशीतता । भवेदुच्छ्वासपूतित्वं शोथश्चान्तर्मृते शिशाविति ॥

गर्भनुत् । पुं । कलिकार्याम् । विषलाङ्गलिया इति गौडभाषाप्रसिद्धे वृक्षे ॥

गर्भपाकी । स्त्री । षष्टिकाख्यव्रीहौ । सट्ठी धान इति भाषा ॥

गर्भपातः । पुं । पञ्चमषष्ठमासीयस्य कठिनशरीरस्य गर्भस्य पतने ॥

गर्भपातकः । पुं । रक्तशोभाञ्जने ॥

गर्भपातनः । पुं । अरिष्टद्रुमे । फेनिले । रीठा इति भाषा ॥

गर्भपातनी । स्त्री । कलिकार्याम् ॥

गर्भपातिनी । स्त्री । विशल्यावृक्षे ॥

गर्भरूपः । पुं । तरुणे ॥

गर्भवती । स्त्री । अन्तर्वत्न्याम् । आपन्नसत्त्वायाम् । गुर्विण्याम् ॥ * ॥ सद्योगृहीतगर्भायाः लक्षणं । शुक्रशोणितयो र्योने रस्रावो ऽथश्रमोद्भवः । सावसादः पिपासा च ग्लानिः

स्फूर्त्तिर्भगे भवेदिति ॥ * ॥ तस्या उत्तरोत्तरकालीनलक्षणं यथा । स्तनयोर्मुखकार्ष्ण्यं स्यात् रोमराज्युद्गमस्तथा । अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते विशेषतः । छर्दयेत् पथ्यभुक्तापि गन्धादुद्विजते ऽशुभात् । प्रसेकः सदनञ्चैव गर्भिण्या लिङ्गमुच्यते ॥ * ॥ पुत्रगर्भवत्या लक्षणं यथा । पुत्रगर्भयुतायास्तु नार्या मासि द्वितीयके । गर्भो गर्भाशये सम्यक् पिण्डाकारोऽपरं शृणु ॥ दक्षिणाक्षि महत्त्वं स्यात् प्राक्क्षीरं दक्षिणस्तने । दक्षिणोरुः सुपुष्टः स्यात् प्रसन्नमुखवर्णता ॥ पुन्नामधेयद्रव्येषु स्वप्नेष्वपि मनोरथः । आम्रादिफलमाप्नोति स्वप्नेषु कमलादि च ॥ * ॥ कन्यागर्भवतीलक्षणं यथा । कन्यागर्भवती गर्भे पेशी मासि द्वितीयके । पुत्रगर्भस्य लिङ्गानि विपरीतं मवेक्ष्यते ॥ * ॥ नपुंसकगर्भवतीलक्षणं यथा । नपुंसकं यदा गर्भो भवेद्गर्भोऽर्बुदाकृतिः । उन्नते भवतः पार्श्वे पुरस्तादुदरं महदिति भावप्रकाशः ॥

गर्भशय्या । स्त्री । पित्ताशयपक्वाशययोर्मध्यवर्त्तिनि गर्भाशयरूपे गर्भोत्पत्तिस्थाने ॥ तद्रूपं यथा । शङ्खनाभ्याकृतिर्योनिस्त्र्यावर्त्ता सा

च कीर्त्तिता । तस्यास्तृतीये त्वाव
र्त्ते गर्भशय्या प्रतिष्ठिता ॥ यथा रो
हितमत्स्यस्य मुखं भवति रूपतः ।
तत्संस्थानं तथा रूपां गर्भशय्यां वि
दुर्बुधाः ॥ इति भावप्रकाशः ॥

गर्भस्रावः । पुं । चतुर्थमासपर्य्यन्तं शो
णितरूपगर्भस्य स्रवणे ॥ तन्निदा
नलक्षणे यथा । भयाभिघाततीक्ष्णो
ष्णपानाशननिषेवणात् । गर्भे पत
ति रक्तस्य सशूलं दर्शनं भवेत् ॥ आ
चतुर्थात्ततो मासात् प्रस्रवेद्गर्भ
विद्रवः । ततः स्थिरशरीरस्य पातः
पञ्चमषष्ठयोः ॥ गर्भोऽभिघातवि
षमाशनपीडनाद्यैः पक्वं द्रुमादिव
फलं पतति क्षणेन । मूढः करोति
पवनः खलु मूढगर्भं शूलञ्च योनिज
ठरादिषु मूत्रसङ्गम् ॥

गर्भस्रावी । पुं । हिन्तालवृक्षे ॥

गर्भागारम् । न । वासगृहे । गृहमध्य
भागे ॥ गर्भ इव आगारम् ॥ गर्भा
शये ॥

गर्भाधानम् । न । दशसंस्कारान्तर्गत
प्रथमसंस्कारे ॥ तत्रायं क्रमः । ऋतु
स्नानादूर्द्ध्वं निषेकदिवसे सायं सन्ध्या
यामतीतायां पतिः शुचिः सुगन्धिः
शुभवेशो मन्त्रेण सूर्य्यायार्घ्यं दत्त्वा पूर्व्वा
भिमुखोपविष्टायाश्च वध्वा दक्षिणस्क
न्धेनोपस्थं स्पृशन् पञ्चकृत्वस्तं मन्त्रं सं
जपेत् । ततः पुनरप्युपस्थं स्पृशन्
मन्त्रं जपेत् । ततो भार्य्यामुपेयादिति
भवदेवभट्टः ॥ विशेषो मन्त्रानिर्व्वा
णे द्रष्टव्यः ॥

गर्भाशयः । पुं । गर्भवेष्टनचर्म्मणि । जरा
यौ ॥ गर्भशय्यायाम् ॥ गर्भ आशेते
ऽत्र । शीङ्० । पुंसीतिघः ॥

गर्भाष्टमः । पुं । निषेकतोऽष्टमे मासे
। दैवमासे ॥ गर्भग्रहणमासः संवत्
सरो वाऽष्टमो यस्य ॥

गर्भिणी । स्त्री । अन्तर्वत्न्याम् । गुर्व्वि
ण्याम् ॥ गर्भोऽस्त्यस्याम् । अतइनिः
॥ क्षीरादीष्टचे । क्षीराइ इति गौड
भाषा ॥

गर्भिण्यवेक्षणम् । न । कुमारभृत्या
याम् । गर्भिणीपरिचर्य्यायाम् ॥ इ
ति त्रिकाण्डशेषः ॥

गर्भोपघातिनी । स्त्री । गवि । गर्भ
पातकारिण्याम् ॥ गर्भमुपहन्ति ।
सुप्यजातावितिणिनिः ॥

गर्म्मुत् । स्त्री । स्वर्णे ॥ लतायाम् ॥ म
यना इति गौडभाषाप्रसिद्धे तृणधा
न्यविशेषे ॥ गिरति गीर्य्यते वा ।
गॄ० । ग्रोमुट्चेत्युतिः ॥

गर्म्मुटिका । स्त्री । मधुया इति प्रसिद्धे
व्रीहिभेदे । गर्म्मुत ॥

गर्भोटिका । स्त्री । जरडीतृणे ॥

गर्वः । पुं । अभिमाने । अहङ्कारे ॥ अहङ्कार स्तथाध्यात्म्यं सर्वसंसारकारणम् । अभिमानोऽधिभूतञ्च रुद्र स्तत्राधिदैवतम् ॥ ऐश्वर्यरूपतारुण्यकुलविद्याबलै रपि । इष्टलाभादिनान्येषामवज्ञागर्वईरितः ॥ गर्वमाने । । घञ् ॥ यद्वा । गिरति गृणाति वा । गॄ० । कृगृशॄट् भ्योवः ॥

गर्वरः । त्रि । अहङ्कारिणि ॥ गिरति । गॄ० । कृगॄशॄदृभ्यः ष्वरच् ॥ स्त्री । षिद्गौरादिभ्यश्चेति ङीषि गर्वरी ॥ पुं । गन्धर्वे ॥

गर्वाटः । पुं । दौःसाधिके । द्वारपाले ॥

गर्वितः । त्रि । गर्वसंयुक्ते । अहङ्कृते । दृप्ते ॥ गर्वः सञ्जातोऽस्य । तारकादित्वादितच् ॥

गर्हणम् । न । कुत्सायाम् । निन्दायाम् ॥ गर्ह गल्ह कुत्सायाम् । ल्युट् ॥

गर्हा । स्त्री । निन्दायाम् ॥ गर्हणम् । गर्ह० । गुरोश्च हल इति स्त्रियाम् अप्रत्ययः । टाप् ॥

गर्हितः । त्रि । निन्दिते ॥ गर्हा सञ्जाताऽस्य । तारकादित्वादि इतच् ॥

गर्ह्यः । त्रि । अधमे । निन्द्ये । कुपूये ॥ गर्ह्यते । गर्ह० । ऋहलोर्ण्यत् ॥

गर्ह्यवादी । त्रि । कद्वदे ॥ गर्ह्यं वदति । वद० । सुप्यजातौ णिनि स्ताच्छील्ये ॥ इति णिनिः ॥

गलः । पुं । गला इति प्रसिद्धे कण्ठे । ग्रीवाग्रभागे ॥ सर्जरसे । राल इति भाषा ॥ गडक इति गौड प्रसिद्धे मत्स्यविशेषे ॥ वाद्य वि० ॥ गिलति । गॄ० । पचाद्यच् । अचिविभाषेति लः ॥ यद्वा । गीर्यतेऽनेन । पुंसीति घः ॥ गलति वा । गल अदने । अच् ॥

गलकः । पुं । शकुलार्भके । गडके ॥ डलयोरभेदः ॥

गलकम्बलः । पुं । सास्नायाम् । गवां गलस्थिते कम्बलाकारे मांसे ॥ गलस्य कम्बलः । गले कम्बल इव वा ॥

गलगण्डः । पुं । स्वनाम्ना ख्याते रोगविशेषे । गिल्लड इति भाषा ॥ तल्लक्षणं यथा । निबद्धः श्वयथुर्यस्य मुष्कवल्लम्बते गले । महान्वा यदि वा ह्रस्वो गलगण्डं तमादिशेदिति ॥

गलग्रहः । पुं । तिथिविशेषे ॥ यथा । कृष्णपक्षे चतुर्थी च सप्तम्यादिदिनत्रयम् । त्रयोदशी चतुष्कञ्च अष्टावेते गलग्रहा इति नारदः ॥ अपिच । आरम्भानन्तरं यत्र प्रत्यारम्भो न विद्यते । गर्गादिमुनयः सर्वे तमेवाहु

गन्धप्रदमिति राजमार्त्तण्डः ॥ व्यञ्जनविशेषे । मत्स्यघण्टे ॥

गलत् । त्रि । स्रंसमाने ॥ स्रवति ॥

गलन्तिका । स्त्री । कर्कर्याम् । स्वल्पवारिधान्याम् । आल्याम् ॥ गलति । गल० । लटः शतृशानचावितिशतृ । उगितश्चेति ङीप् । शप्श्यनोर्नित्यमिति नुम् । स्वार्थे कन् ॥

गलमेखला । स्त्री । कण्ठाभरणविशेषे । कण्ठसूत्रे । सूत्राल्याम् । सकरी तोडा इतिच भाषा ॥

गलव्रतः । पुं । मयूरे ॥ इति त्रिकाण्डशेषः ॥

गलशुण्डिका । स्त्री । तालूर्द्ध्वसूक्ष्मजिह्वायाम् । घण्टिकायाम् । सुधास्रवायाम् ॥

गलस्तनी । स्त्री । छाग्याम् ॥

गलहस्तः । पुं । अर्द्धचन्द्रे ॥ गलेहस्तः ॥

गला । स्त्री । अलम्बुषायाम् । लज्जालुप्रभेदे ॥

गलाङ्कुरः । पुं । गलरोगविशेषे । रोहिण्याम् ॥ तस्य सम्प्राप्तिपूर्वकं लक्षणं यथा । गलेऽनिलः पित्तकफौ च मूर्च्छितौ प्रदूष्य मांसञ्च तथैव शोणितम् । गलोपसंरोधकरैस्तथाङ्कुरैर्निहन्त्यसून् व्याधिरयञ्च रोहिणीति ॥

गलाविलः । पुं । चिङ्गिडिमाछ इति गौडप्रसिद्धे मत्स्ये । गङ्गाटेये ॥ गलानिकः गलाविलः इतिच क्वचित्पाठः ॥

गलिः । पुं । दुष्टवृषे । शक्तोप्यधुर्व्वहो वृषो गलिरित्युच्यते । गलियाबैल इति भाषा ॥ गुणानामेव दौरात्म्यात् धुरि धुर्यो नियुज्यते । असञ्जातकिणस्कन्धः सुखंस्वपिति गौर्गलिः ॥

गलितः । त्रि । च्युते । पतिते । स्रस्ते । स्वस्थानादितोभ्रष्टे ॥ गल्यतेस्म । गल० । क्तः ॥ गत्यर्थाकर्मकेतिकर्त्तरि वा क्तः ॥ रिक्ते ॥

गलेगण्डः । पुं । पक्षिविशेषे । मर्कटे । अस्थिगिला हाडगिला इतिचभाषा ॥

गलेस्तनी । स्त्री । छाग्याम् ॥

गलोद्देशः । पुं । निगारे ॥ गलस्योद्देशः समीपभागः ॥

गल्या । स्त्री । गलसमूहे ॥ गलानांसमूहः पाशा० यः । गलोद्वल्काशः ॥

गल्लः । पुं । गण्डे । गाल इति भाषा ॥

गल्लकः । पुं । चषके । मद्यपानपात्रे ॥

गल्वर्कः । पुं । चषके ॥ इन्द्रनीलमणौ ॥

गवयः । पुं । रोझ इति भाषाप्रसिद्धे गलकम्बलहीने गोसदृशपशौ । गवालूके । बलभद्रे । महागन्धे ॥ अस्य मांसपाकविधिर्यथा । तैले स-

न्याचिते तते हिङ्गुभिश्चवसंयुते ।
मांसं गवयसम्भूतं सुस्विन्नं भूरिवा-
योति ॥ गवयो मधुरो वृष्यः स्निग्धो
ष्णः कफपित्तलः । विदाही गुरुविष्ट
म्भी विपाके विरसः सदेश्च्यस्य मां
सस्य गुणाः ॥ वैवस्वतपुत्रे वानरविशे
षे । यथा । रामायणे । पुत्रा वैवस्व
तस्यात्र पञ्च कालान्तकोपमाः । गयो
गवाक्षो गवयः शरभो गन्धमादनः
इति ॥ गवते । गुङ् शब्दे । बा० अयः
॥ यद्वा । गवनम् । ऋदोरप् । गवं
गमनं वा याति । या० । मू० कः ॥

गवयी । स्त्री । गवययोषायाम् । वन
धेनौ । भिल्लगव्याम् ॥ योपधप्रतिषे
धे गवयहयमुकयमनुष्यमत्स्यानाम
प्रतिषेधइति जातिलक्षणोङीष् ॥

गवराजः । महोक्षे । वृषे ॥ इति शब्द
चन्द्रिका ॥

गवलः । पुं । वनमहिषे ॥ न । महिष
शृङ्गे ॥ अलति । अलभूषणादौ ।
अच् । गवामलम् ॥ यद्वा । गवनम्
। गुङ्० । ऋदोरप् । गवं लाति । कः ॥

गवाक्षः । पुं । जाली झरोखा इतिच
भाषाप्रसिद्धे वातायने । वधूटगयने ।
जालके ॥ वैवस्वतपुत्रे कपिविशेषे ॥
गवां किरणानामक्षीव । अक्षिशब्दो
ऽत्र श्ववाची । अक्ष्णोऽदर्शनादित्यच्

॥ गावोजलानि किरणानि वा । अ
क्षन्ति व्याप्नुवन्ति एतमनेन वा । अ
क्षू व्याप्तौ । अकर्त्तर्यर्थे घञ् ॥

गवाक्षी । स्त्री । इन्द्रवारुण्याम् ॥ गो
तुम्बायाम् । गोमुक् इति गौडभा
षा ॥ आखोटे । शेउडा इति भाषा
॥ अपराजितायाम् ॥ गां भूमिम
क्ष्णोति । अक्षू० । कर्मण्यण् । ङीप् ॥

गवाक्षी । स्त्री । पाँकालमाछ इति
गौडभाषाप्रसिद्धे मत्स्ये ॥

गवादनम् । न । घासे ॥ गोभिरद्यते ।
अद० । ल्युट् ॥

गवादनी । स्त्री । इन्द्रवारुण्याम् ॥ ग
वादनीद्वयं तिक्तं पाके कटुरसं लघु
। वीर्योष्णं कामलापित्तकफप्लीहोद
रापहम् ॥ श्वासकासापहं कुष्ठगुल्म
ग्रन्थिव्रणप्रणुत् । प्रमेहमूढगर्भामग
ण्डामयविषापहम् ॥ गवांघासादना
श्रये । नादलडावनीइतिच भाषा ॥
नीलापराजितायाम् ॥ गौ० ङीष् ॥

गवालूकः । पुं । गवये । गोसदृशे ऽर
ण्यपशौ ॥

गवाशनः । पुं । गोभक्षके । मोचो इति
भाषा ॥ यथा । माताप्येका पिताप्ये
को मम तस्य च पक्षिणः । अहं मु
निभिरानीतः सचनीतो गवाशनै
रित्युद्भटः ॥

गवाग्रिका । स्त्री । लाक्षायाम् । जतुनि ॥

गविनी । स्त्री । गवां समूहे ॥ खला दिभ्य इनिर्वक्तव्यः ॥

गविष्ठः । त्रि । भूमिस्थे ॥ स्वर्गस्थे ॥

गविष्ठिरः । त्रि । गविस्थिरे ॥ हलद न्तादित्यलुक् । गवियुधिभ्यांस्थिरः इति षत्वम् ॥

गवीश्वरः । पुं । गवांस्वामिनि । गोम ति । गोमिनि ॥ गवामीश्वरः ॥

गवेङ्गितम् । न । शुभाशुभाय गवामाका रे ॥ यथा । गावो दीनाः पार्थिवस्या ऽशिवाय पादैर्भूमिं कुट्टयन्त्यश्च रोगान् । मृत्युं कुर्वन्त्यश्रुपूर्णाय ताक्षाः पत्युर्भीता स्तस्करानारुवन्त्यः ॥ अकारणे क्रोशति चेदनर्थो भयाय रात्रौ वृषभः शिवाय । भृशं निरुद्धा यदि मक्षिकाभि स्तदाशु वृष्टिं सरमात्मजैर्वा ॥ आगच्छन्त्यो वेश्म बम्भारवेण संसेवन्त्यो गोष्ठवृद्ध्यै गवां गाः । आर्द्राङ्ग्यो वा हृष्टरोमण्यः प्रहृष्टा धन्या गावः स्युर्महि ष्योऽपि चैवम् ॥ इति वाराह्यामेकोन नवतिः ॥

गवेडुः । स्त्री । आरण्यगोधूमाख्ये मुन्यन्ने । गड्गड् इति गौडभाषा ॥ गवे गवार्थं हीयते । हीङ् त्यागे । मृगय्वादित्वात् कुः । नैपातिकोऽकार स्य ङः । तत्पुरुषे कृति इत्यलुक् ॥

गवेधुः । स्त्री । गवेडौ ॥ गवेधुः कटुका स्वाद्वी कार्श्यकृत् कफनाशिनी ॥

गवेधुकम् । न । गैरिके ॥ इति राज निर्घण्टः ॥

गवेधुका । स्त्री । तृणधान्यविशेषे । ग ड्गड्हलि हेधान इति च गौडभाषा । गवेडौ ॥ नागबलायाम् ॥ गवि भूमौ एधते । एध० । बाहुलकादुः । संज्ञा यां कन् ॥

गवेरुकम् । न । गैरिके ॥

गवेशका । स्त्री । गोरक्षचाकुलिया इ ति गौडप्रसिद्धे वृक्षविशेषे ॥

गवेषणा । स्त्री । अन्वेषणायाम् । पर्ये षणायाम् । मार्गणे ॥ धर्मार्थान्वेषणे ॥ गवेषमार्गणे । चु० । ण्यन्ताद्युच् ॥

गवेषितम् । त्रि । अन्वेषिते । मार्गिते ॥ गवेष्यते स्म । गवेष० । क्तः ॥

गव्यम् । न । ज्यायाम् ॥ राजद्रव्ये ॥ त्रि । गोदुग्धादौ । गोसम्बन्धिनि सर्व स्मिन् ॥ गव्यं त्रिषु गवां सर्वम् । स र्वम् भवविकारावयवादि गवां गव्य म् ॥ गवि भवम् गौर्देवतास्य वा । गोरजादिप्रसङ्गे यत् ॥ गोहिते ॥ गवे हितम् । उगवादिभ्यो यत् ॥ गोर्निमित्तं संयोग उत्पातो वा । गोद्व्यचोऽसंख्यापरिमाणाश्वादेर्यत्

॥ गोरिदम् । गोपयसोर्यत् । वान्तो यि प्रत्यये ॥

गव्या । स्त्री । गोज्यायाम् । गोवृन्दे ॥ गवांसमूहः । खलगोरथात् इतियः ॥ गव्यूतौ ॥ गोरोचनायाम् ॥

गव्यूतम् । न । क्रोशे ॥ गव्यूतौ ॥

गव्यूतिः । स्त्री । क्रोशयुगे । द्विसहस्र धनुषि । गोरुते ॥ धन्वन्तरसहस्रन्तु क्रोशः क्रोशद्वयं पुनः । गव्यूतं स्त्रीतु गव्यूति र्गोरुतं गोमतञ्च तत् ॥ गोर्यूतौ छन्दस्युपसंख्यानम् । अध्वपरिमाणेचेत्यवादेशः ॥

गहनम् ॥ न । घना इति भाषा प्रसिद्धे कानने । वने ॥ गह्वरे ॥ दुःखे ॥ त्रि । कलिले । दुर्गमे । दुष्प्रवेशे ॥ पुं । परमात्मनि ॥ दुष्प्रवेशत्वात् अवस्थात्रयभावाभावसाक्षित्वात् वा गहनः परमात्मा । अस्यस्वरूपं सामर्थ्यं चेष्टितं वाज्ञातुं नशक्यते ऽतो गहनः ॥ गाह्यते गाहूविलोडने । बहुलमन्यत्रापीति युच् । पृषोदरादित्वात् ह्रस्वः । कृच्छ्रगहनयोरिति निर्देशाद्वा ह्रस्वः ॥

गहना । स्त्री । अलङ्कारे ॥ इति देवीपुराणम् ॥

गह्वरः । पुं । निकुञ्जे ॥ न । गुहायाम् ॥ दम्भे ॥ वने ॥ विषमस्थाने । अनेकाऽर्थसङ्कटे ॥ गाह्यते । गाहू० । छित्वर छत्वरेतिसाधुः ॥

गह्वरी । स्त्री । गुहायाम् ॥

गा । स्त्री । गाथायाम् ॥

गाङ्गः । पुं । भीष्मपितामहे ॥ कार्त्तिकेये । गुहे ॥ गङ्गाया अपत्यम् । शिवादिभ्योऽण् ॥ त्रि । गङ्गासम्भूते ॥ न । गङ्गाजले ॥ धाराजले ॥ यदा स्यादाश्विने मासि सूर्यः स्वाति विशाखयोः । तदा त्वम्बु जलदैर्मुक्तं गाङ्गमुक्तं मनीषिभिः ॥ आकाशगङ्गासम्बन्धि जलमादाय दिग्गजाः । मेघै रन्तरिता वृष्टिं कुर्वन्तीति वचः सताम् ॥ गाङ्गमाश्वयुजे मासि प्रायो वर्षति वारिदः । सर्वथा तज्जलं देयं तथैवचरकेवचः ॥ स्थापिते हेमजे पात्रे राजते मृन्मये ऽपिवा । शाल्यन्नं येन संसिक्तं भवेदक्लेदवर्णवत् । तद्गाङ्गं सर्वदोषघ्नं ज्ञेयं सामुद्रमन्यथा ॥ सामुद्रं चाश्विने मासि गुणैर्गाङ्गवदादिशेत् । यतोऽगस्त्यस्य दिव्यर्षेरुदयात् सकलं जलम् । निर्मलं निर्विषं स्वादु शुक्लं स्यादऽदोषलम् ॥ यत आह । फूत्कारविषवातेन नागानां व्योमचारिणाम् । वर्षासु सविषं तोयं दिव्यमगस्त्याश्विनं विनेति ॥

गाङ्गटः । पुं ।
गाङ्गटकः । पुं । } चिङ्गडिमाछ इति गौडभाषाप्रसिद्धे-
गाङ्गटेयः । पुं । मत्स्ये ॥ इति शब्दरत्नावली ॥

गाङ्गायनिः । पुं । भीष्मे । शान्तनवे ॥ गुहे ॥ गङ्गाया अपत्यम् । तिकादिभ्यः फिञ् ॥

गाङ्गेयः । पुं । भीष्मे ॥ स्कन्दे ॥ इति मेदिनी ॥ भद्रमुस्तायाम् ॥ न । कशेरुणि ॥ मुस्ते ॥ स्वर्णे ॥ यं गर्भं सुषुवे गङ्गा पावकाद्दीप्ततेजसम् । तदुल्बं पर्वते न्यस्तं हिरण्यं समपद्यत ॥ गङ्गाया अपत्यम् । शुभ्रादिभ्यश्चेति ढक् ॥

गाङ्गेरुकी । स्त्री । गोरक्षतण्डुलायाम् । नागबलायाम् ॥ गाङ्गं गं जलमीरयति । ईर गतौ क्षेपणे च । मृगय्वादयश्चेति कुः । स्वार्थे कन् । गौरादि ङीष् ॥

गाङ्गेष्ठी । स्त्री । कटशर्करालतायाम् । नटा इति गौडभाषा इति हारावली ॥

गाजरम् । न । गृञ्जने । नारङ्गवर्णके ॥ गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं लघु । सङ्ग्राहि रक्तपित्तार्शोग्रहणीकफवातजित् ॥

गाञ्जिकायः । पुं । वर्त्तिकापक्षिणि ॥

गाढम् । न । दृढे ॥ तीव्रे ॥ त्रि । तद्वति ॥ अवगाढे । सेविते ॥ तपस्विगाढां तमसां प्रापेति रघुः ॥ गाहते स्म । गाहू विलोडने । क्तः ॥

गाढमुष्टिः । पुं । खड्गे ॥ त्रि । कृपणे ॥ गाढा मुष्टिर्यस्य ॥

गाढावटी । स्त्री । चतुरङ्गक्रीडाख्ये क्रीडाविशेषे ॥ यथा । नैवैका घटिका यस्य विद्यते खेलने यदि । गाढावटीति विख्याता पदं तस्य न कुप्यतीति ॥

गाणपतः । त्रि । गणपतिर्देवताके ॥ गणेशोपासके ॥ गणपतिर्देवताऽस्य । अश्वपत्यादिभ्यश्चेति प्राग्दीव्यतीयोऽण् । गाणपत्यो मन्त्र इति तु प्रामादिकमेव । गणपतिशब्दस्याश्वपत्यादिषु पाठात् ॥ गणपतिसम्बन्धिनि ॥

गाणपत्यम् । न । गणपतित्वे ॥ गणपतेः कर्म भावो वा । गुणवचनब्राह्मणादिभ्यः कर्मणि चेति ष्यञ् । गणपत्यधिपतिशब्दयोर्ब्राह्मणादिषु पाठात् ॥

गाणिक्यम् । न । वेश्यावृन्दे ॥ गणिकानां समूहः । गणिकाया यञिति वक्तव्यमिति यञ् ॥

गाणेयः । त्रि । गणनीये । गणयितुं शक्ये ॥ गणयते । गण सङ्ख्याने । य

चोयत् । संज्ञापूर्वकत्वान्न, गिलोपः । चिन्तिपूजीत्यङ् वि धानाद्वा भावार्थाद्वा ॥ अन्यथा अप्रत्ययादि त्यनन्तरं पठित्वा अकारमेव विदध्यात् ॥

गाण्डिवः । पुं । न । अर्जुनस्य धनुषि ॥ कार्मुकमात्रे ॥ गाण्डि ग्रन्थि रस्यास्ति । गाण्ड्यजगात्संज्ञायामिति वः ॥

गाण्डीवः । पुं । न । गाण्डिवे ॥ गाण्डा ग्रन्थिरस्यास्ति । कृदिकारादिति ङी षन्तात् गाण्ड्यजगादिति वः ॥

गाण्डीवभूषणः । पुं । अर्जुने ॥ धानुष्के । धनुष्मति ॥ गाण्डीवं भूषणमस्य ॥

गाण्डीवी । पुं । अर्जुने । कौन्तेये ॥ चापिनि । धानुष्के ॥ अर्जुनवृक्षे ॥ गाण्डीवोऽस्त्यस्य । इनिः ॥

गातुः । पुं । पुंस्कोकिले ॥ भृङ्गे ॥ गन्धर्वे ॥ त्रि । रोषणे ॥ गायति । गै शब्दे । गातेर्वा । गाङ् गतौ । कमिमनिजनिगाभायाहिभ्यश्चेति तुः ॥ गायने ॥

गाता । पुं । गायके ॥ गायति । गै० ॥ तृच् ॥

गात्रम् । न । गजाग्रजङ्घादौ । गजाग्र भागे ॥ अङ्गे ॥ कलेवरे । इन्द्रियायतने । शिरःपाण्याद्यवयवनां समुदये । गात इति भाषा ॥ गातेऽने

न वा । गाङ् गतौ । ष्ट्रन् ॥ एति वा । बहुलंतणीति इणोगा ॥ यद्वा । गच्छति । गम्लृ० । गमेराचेति त्रन् । आचान्तादेशः ॥

गात्रभङ्गा । स्त्री । शूकशिम्ब्याम् ॥

गात्रशय्यः । पुं । तापसविशेषे ॥ केवलं गात्रैरेव यः शेते सः ॥

गात्रसङ्कोची । पुं । आहकजन्तौ ॥

गात्रसम्प्लवः । पुं । प्लवपक्षिणि ॥

गात्रानुलेपनी । स्त्री । अनुलेपनवर्त्याम् । वर्णके । विलेपने । गात्रानुलेपयोग्ये पिष्टहृष्टसुगन्धिद्रव्ये ॥ गात्रमनुलिप्यतेऽनया । करणेति ल्युट् । ङीप् ॥

गात्रिका । स्त्री । गाती इति लोकप्रसिद्धे ॥

गाथकः । पुं । गायके । गानोपजीविनि ॥ गायति । गै० । गस्थकन् ॥

गाथा । स्त्री । श्लोके ॥ संस्कृतान्यभाषायाम् । प्राकृतभाषायाम् ॥ गेये ॥ वृत्ते । अष्टसङ्ख्यातपद्ये ॥ यथा । पादे द्वादश विषमे मात्रास्त्वष्टादश द्वितीयेऽपि । पञ्चदश चेत् तुरीये कथिता गाथा तथैवार्येति ॥ गीयतेऽसौ । गाङ्० । उषिकुषिगार्त्तिभ्यस्थन् ॥

गाधः । पुं । तलस्पर्शे । स्थाने ॥ स्तुत

रे । गाछन इति पाँज इति च भाषा ॥ क्लिष्टायाम् ॥

गाधिः । पुं । कान्यकुब्जदेशाधिपे चन्द्रवंशीयकुशिकराजस्य पुत्रे विश्वामित्रमुनेः पितरि ॥

गाधिजः । पुं । विश्वामित्रमुनौ ॥ गाधेर्जातः । जनी० । डः ॥

गाधिपुरम् । न । कान्यकुब्जे कनौज इति ख्याते महोदयपुरे ॥

गाधिभूः । पुं । }
गाधिसुतः । पुं । } विश्वामित्रे ॥
गाधेयः । पुं । }

गानम् । न । गीते । गेये ॥ ध्वनौ ॥ गै शब्दे । ल्युट् ॥ मार्गो देशी च गानस्य प्रकारौ द्वावुदीरितौ ॥

गामिनी । स्त्री । वचायाम् ॥

गान्तुः । त्रि । गन्तरि ॥ गच्छति । गम्लृ० । क्रमिगमिक्षमिभ्यस्तुन्वृद्धिश्च ॥

गान्त्रम् । न । शकटे ॥ गम्यतेऽनेन । गम्लृ० । भ्रसुजिगमिनमिहनिविश्यशांवृद्धिश्चेतिष्ट्रन् ॥

गान्दिनी । स्त्री । श्रीगङ्गायाम् । जाह्नव्याम् ॥ अक्रूरयादवमातरि ॥

गान्दिनीसुतः । पुं । भीष्मपितामहे ॥ अक्रूरयादवे ॥

गान्धर्व्वः । पुं । गन्धर्व्वे ॥ विवाहविशेषे यथा । इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च । गान्धर्व्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः इति ॥ गान्धर्व्वः समयान्मिथ इति च । यत्र कन्यावरयोरन्योन्यानुरागात् त्वं मे भार्य्या त्वं मे पतिरिति निश्चयः स इत्यर्थः ॥ अष्टविधदेवसर्गान्तरे ॥ भारतवर्षीयोपद्वीपविशेषे ॥ न । गाने ॥ सामवेदस्योपवेदे । पदावस्थिततामपरिच्छेदप्रयुक्तावधानेन पृथक् षड्जादिस्वरसमुदाये ॥ तदाह दत्तिलः । पदस्थस्वरसङ्घातस्तालेन सुमितस्तथा । प्रयुक्तश्चावधानेन गान्धर्व्वमभिधीयते ॥ इति ॥ गन्धं सौरभम् अर्वति । अर्व गतौ । कर्मण्यण् । शकन्ध्वादिः । ततः प्रज्ञाद्यण् ॥ त्रि । गन्धर्व्वसम्बन्धिनि ॥

गान्धारः । पुं । सिन्दूरे ॥ रागभेदे ॥ तत्स्वरूपं यथा । जटां दधानः कृतभूतिभूषः काषायवासा धृतदेहयष्टिः । सयोगपट्टः कृतनेत्रमुद्रो गान्धाररागः कथितस्तपस्वीति ॥ अयं भैरवरागस्य पुत्रः । प्रत्यूषोऽस्य गानसमयः ॥ कन्धार इति भाषाप्रसिद्धे देशे ॥ गन्धारदेशे भवः । कच्छादिभ्यश्चेत्यण् ॥ गन्धारोऽभिजनोऽस्य वा सिन्ध्वाद्यण् ॥ नृपान्तरे ॥ गान्धारेः अपत्यम् । साल्वेयगान्धारि-

भ्याम्पेत्यम्। तस्य राजन्यप्येवम् ॥ तन्त्रीकण्ठोत्थिते सप्तस्वरान्तर्गते तृतीयस्वरे ॥ अजाविकौच गान्धारं नदतः। तस्योत्पत्त्यादि यथा। वायुः समुद्गतो नाभेः कण्ठशीर्षसमाहतः। नानागन्धवहः पुण्योगान्धारस्तेन हेतुनेति ॥ अपिच। नाभेः समुद्गतो वायुर्गन्धघ्राणे च चालयन्। स शब्दस्तेन निर्याति गान्धारस्तेन कथ्यते ॥ चतस्रः पञ्चमे षड्जे मध्यमे श्रुतयो मताः। ऋषभे धैवते तिस्रो द्वे गान्धारनिषादकेइति ॥ न। गन्धरसे ॥

गान्धारराज। पुं। महाभारतप्रसिद्धे शकुनिनामाख्याते दुर्योधनस्य मातुले ॥

गान्धारी। स्त्री। धृतराष्ट्रस्य पत्न्याम् ॥ जिनानां शासनदेवताविशेषे ॥ यवासे ॥ दुरालभायाम् ॥ नाडीविशेषे ॥ यथा। इडापृष्ठेतु गान्धारी मयूरगलसन्निभा। सव्यपादादिनेत्रान्तागान्धारीपरिकीर्त्तितेति ॥ गाँभा इतिप्रसिद्धे मादक द्रव्यविशेषे ॥ इति विष्णुसिद्धान्तसारावली वैद्यक ग्रन्थः ॥

गान्धारेयः। पुं। दुर्योधननृपे ॥ गान्धार्या अपत्यम्। स्त्र्यीभ्योढक् ॥

गान्धिकः। पुं। लेखके ॥ सुगन्धिद्रव्य

वारिणि। गन्धशालिनि ॥ सत्र चम्बष्ठात् राजपुत्र्यां जातः सङ्करजातिः। अस्यकर्म लिखनं गन्धदानञ्चेति परा शरः ॥ गाँधिपोका इति गौडभाषा प्रसिद्धे कीटविशेषे ॥

गामुकः। त्रि। गमनशीले। गन्तरि ॥ गच्छति तच्छीलः। गम्॰। लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ् इत्युकञ् ॥

गाम्भीर्य्यम्। न। अक्षोभ्यत्वे ॥ गम्भीरेभवम्। गम्भीराञ्ञ्यः ॥ गम्भीरत्वे। अगाधत्वे ॥ पीत्वा·गर्जन्त्यपके दिशि दिशि जलदा स्त्वं शरण्यो गरीयां स्तृष्णामात्रासभाजा ममरविटपिनां जन्मभूमि स्त्वमेव। गाम्भीर्यं किन्तु तादृक् त्वयि सलिलनिधे किन्तु विज्ञापयामः सर्वोपायेन मैनावकस्मिमुनिकूपादृष्टयः कारुण्यशीयाः ॥

गायकः। त्रि। गातरि। गायने ॥ गन्धर्वे ॥ गायति। गै॰। ण्वुल् ॥

गायत्रम्। न। सामविशेषे ॥ त्रि। गायत्री सम्बन्धिनि ॥

गायत्री। पुं। खदिरवृक्षे ॥ वह्निगायत्रिणांतयेति वैद्योक्तेः। ब्री॰ इनः ॥ गायत्रस्तोत्रवत्युद्गातरि ॥

गायत्री। स्त्री। त्रिपदादेश्याम्। वेद

मातरि ॥ गायन्तं त्रायते । त्रैङ्पालने । आतोनुपसर्गे इति कः । गौ० ङीष् ॥ यथा व्यासः । प्रतिग्रहान्न दोषाच्च पातका दुपपातकात् । गायत्री प्रोच्यते तस्माद्गायन्तं त्रायते यत इति ॥ अपि च । न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह । सोऽहमस्मीत्युपासीत विधिना येन केनचित् ॥ इति ॥ अस्याः स्थानं पुष्करे ॥ उपसन्ध्यं च सावित्रीं नोपतिष्ठेत यो द्विजः । काले त्रिकालं सप्ताहात् स पतेन्नात्र संशयः ॥ गायत्रीमन्त्रतोयाद्यं दत्तं येनाञ्जलित्रयम् । काले सान्ध्यविकेन स्यात् तेन दत्तं जगत्त्रयमिति पद्मपुराणम् ॥ दुर्गायां देव्याम् । भवान्याम् ॥ यथा । गायनाद्गमनाद्वापि गायत्री त्रिदशार्चितेति देवी निरुक्ताध्यायः ॥ यद्वा । गानम् गायः । भावे घञ् । युक् । गायेन गानेन त्रायते । त्रैङ्० । सुपीति योगविभागात् कः ॥ खदिरद्रुमे ॥ षडक्षरे छन्दोवि । तस्यास्तृंस्त्रिविधा । यथा । तनुमध्या १ शशिवदना २ सोमराजीति । उदाहरणान्तु तत्तत्स्थाने द्रष्टव्यम् ॥

गायन । त्रि । गायके । गायके ॥ गायति । गै० । ख्युट्चेति शिल्पिनि कर्त्तरि ख्युट् । आतो युक् ॥ जल्पाके ॥

गायनी । स्त्री । गानकर्त्र्याम् । टित्त्वान्ङीप् ॥

गायिका । स्त्री । गायन्याम् ॥ ण्वुलन्तात् गायकात् स्त्रियां टाप् । प्रत्ययस्थादितीत्वम् ॥

गारित्रम् । न । ओदने ॥ गीर्यते । गॄ० । भूशादिगॄभ्योणित्रन् इति णित्रन् प्रत्ययः ॥

गारुडम् । न । स्वेतमन्त्रे ॥ मरकतमणौ ॥ विषशास्त्रे ॥ गरुडपुराणे ॥ अस्य श्लोकसंख्योक्ता देवीभागवते - यथा । एकोनविंशत्साहस्रं गारुडं हरिभाषितमिति ॥ स्वर्णे ॥

गारुडिकः । पुं । विषवैद्ये ॥

गारुडी । स्त्री । पातालगरुडीलतायाम् ॥ विद्याविशेषे ॥

गारुत्मतम् । न । मरकते । हरिन्मणौ । पन्ना इति भाषा ॥ गरुत्मतो जातम् । तस्येदमित्यण् ॥

गारुत्मतपत्रिका । स्त्री । पाचीलतायाम् ॥

गार्गी । स्त्री । बृहदारण्यकोपनिषत्प्रसिद्धायां ब्रह्मवादिन्यां वचक्नुतनयायाम् । वाचक्नव्याम् ॥ गर्गस्यापत्यं स्त्री । गर्गाद्यञ् । यञश्चेति ङीप् ।

इत्यसद्धितस्येति यलोपः ॥

गार्गीयम् । त्रि । गर्गप्रोक्ते ॥

गार्ग्यः । पुं । मुनिविशेषे ॥ गर्गस्य गोत्रापत्यम् । ग० यञ् । बहुत्वे गर्गाः ॥

गार्द्ध्यम् । न । लिप्सायाम् । आकाङ्क्षायाम् । तृष्णाभरे ॥ गृद्ध एव । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ॥

गार्ध्रपत्रः । पुं । गृध्रपत्रयुक्ते बाणे ॥

गार्भः । पुं । गर्भशुद्ध्यर्थं क्रियमाणे कर्मविशेषे ॥ त्रि । गर्भसम्बन्धिनि ॥ तस्येदमित्यण् ॥ गर्भाधानादौ ॥

गार्भिकम् । त्रि । गर्भसम्बन्धिनि ॥

गार्भिणम् । न । गर्भिणीनां समूहे ॥ तस्य समूह इत्यधिकारे भिक्षादिभ्योऽण् इत्यणि भस्याढे इति पुंवद्भावे कृते इनण्यनपत्ये इति प्रकृतिभावः ॥

गार्ष्टेयः । पुं । गृष्टिवत्से ॥ गृष्ट्या अपत्यम् । गृष्ट्यादिभ्यश्चेति ढञ् ॥

गार्हपत्यः । पुं । यज्ञाग्निविशेषे ॥ गृहपति र्यजमानः तेन संयुक्तः । गृहपतिना संयुक्तेभ्यः । ञ्य संज्ञायामित्यनुवृत्ते राहवनीयादीनामिति प्रसङ्गः ॥

गार्हमेधः । पुं । गृहस्थे यागपुत्रादिकारणे द्वितीयाश्रमे ॥ स्वार्थिकोऽण् ॥

गार्हस्थ्यम् । न । गृहस्थत्वे ॥ गृहस्थस्य कर्म भावो वा । ष्यञ् ॥

गालनम् । न । स्रावणे । सुवावना पसावना इति गलावना इति च भाषा ॥

गालवः । पुं । मुनिविशेषे ॥ लोध्रे ॥ तेन्दुके ॥ गालवस्यापत्यम् । अस्य अकेऽप्यण् ॥

गालिः । पुं । शापे ॥ इति त्रिकाण्डशेषः । यथा । ददतु ददतु गालिं गालिमन्तो भवन्तो वयमिह तदभावाद्गालिदानेऽप्यशक्ताः । जगति विदितमेतद्दीयते विद्यमानं नहि शशकविषाणं दीयते च ददान्यैरित्युद्भटः ॥

गालितः । त्रि । कृतगालने । चुवायानि घोडा इति च भाषा ॥ यथा । गालितं दधि सुस्निग्ध मित्यादिः ॥ द्रवीकृते ॥ यथा । गालितस्य सुवर्णस्य षोडशांशेन सीसकम् इति । गला या इति भाषा ॥

गालिनी । स्त्री । मुद्राविशेषे ॥

गालोड्यम् । न । पद्मबीजे । कमलगट्टा इति भाषा ॥

गावल्गणिः । पुं । सञ्जये ॥ गवल्गणस्यापत्यम् । अत इञ् ॥

गावेधुक । त्रि । गवेधुकायामवयवे । तद्विकारे च ॥ बिल्वादण् ॥

गाहनम् । न । प्रवेशने ॥ गाहना इति

ख्याते विलोडने ॥

गीः । स्त्री । भाषायाम् । वाचि । सरस्वत्याम् ॥ गृणात्येताम् । गृ शब्दे । सं० क्विप् । ऋतइद्धातोः ॥

गिरा । स्त्री । भणितौ । वचने ॥

गिरिः । पुं । गोत्रे । पर्वते ॥ मेरुमन्दरकैलासमलया गन्धमादनः । महेन्द्रः श्रीपर्वतश्च हेमकूट स्तथैव च ॥ अष्टावेते तु सम्पूज्यागिरयः पूर्वादिक् क्रमात ॥ गिरियके ॥ नेत्ररुक्प्रभेदे ॥ पारदस्यदोषविशेषे ॥ संन्यासिनां नामविशेषे ॥ यथा । सदोद्वाहु र्यो वीरो मुक्तकेशो दिगम्बरः । सर्वत्र समभावेन भावये द्योमरोत्तमः ॥ इष्टदेवीधिया नारीं स गिरिः परिकीर्त्तितइति ॥ स्त्री । गीर्णौ । गिलनाइति भाषा ॥ बालमूषिकायाम् ॥ त्रि । पूज्ये ॥ गिलनम् । गृ० । इक् कृष्यादिभ्यः ॥ बाहुलकात् किर्वा । ऋतइत् ॥ गिरति वा । कृगृशृकुटीति इः कित् ॥

गिरिकण्टकः । पुं । वज्रे ॥

गिरिकदम्बः । पुं । धाराकदम्बे । नीपे ॥

गिरिकदली । स्त्री । बहुबीजायाम् । वनरम्भायाम् ॥

गिरिकर्णिका । स्त्री । पृथिव्याम् ॥ श्वेतकिणिहीवृक्षे ॥ अपराजितायाम् ॥

गिरिकर्णी । स्त्री । अपराजितायाम् ॥ यवासे ॥ गिरि र्बालमूषिका कर्णा-स्याः तत्कर्णतुल्यपत्रत्वात् । ङीष् ॥

गिरिका । स्त्री । बालमूषिकायाम् ॥ गिरेः संज्ञायांकन् ॥

गिरिकाणः । त्रि । गिरिरोगेणकचक्षुर्हीने ॥

गिरिगुडः । पुं । गेण्डुके ॥

गिरिजः । पुं । मधूकवृक्षविशेषे । गौरशाके ॥ न । अभ्रके ॥ शिलाजतुनि ॥ शैलजे ॥ लोहे ॥ गैरिके ॥ त्रि । गिरिसम्भूते ॥ गिरेर्जातम् । जनी० । पञ्चम्यामितिडः ॥ गिरौ जातं वा । सप्तम्यांजनेर्डः ॥

गिरिजा । स्त्री । गौर्याम् । पार्वत्याम् ॥ मातुलुङ्ग्याम् ॥ श्वेतगुञ्जायाम् ॥ क्षुद्रपाषाणभेदायाम् ॥ त्रायमाणालतायाम् ॥ कारीवृक्षे ॥ मल्लिकायाम् ॥ गिरिकदल्याम् ॥ गिरेर्जाता । जनी० । पञ्चम्यामजाताविति डः ॥

गिरिजामलम् । न । अभ्रके ॥ गिरौजातं गिरिजम् । अमति । अमगतौ । वृषादित्वात् कलः । न मलमस्येतिवा । गिरिजञ्चतदमलञ्च ॥ गिरिजाया मलं वा ॥

गिरिज्वरः । पुं । वज्रे ॥

गिरित्रः । पुं । शिवे ॥

गिरिदुर्गम् । न । पर्वतपृष्ठे ऽतिदुरारोहे सङ्कटैकमार्गोपेते ऽनर्मदीप्रस्रवणाद्युदकयुक्ते बहुसस्योत्पन्नवृक्षान्विते राज्ञां निवासस्थाने ॥ सर्वेषां तु प्रयत्नेन गिरिदुर्गं समाश्रयेत् । एषां हि बाहुगुण्येन गिरिदुर्गं विशिष्यते ॥ एषां धन्वदुर्गादीनाम् । गिरिदुर्गे शत्रुदुरारोहत्वं महत् प्रदेशादल्पप्रयत्नप्रेरितशिलादिना बहुविपक्षसैन्यव्यापादनमित्यादयो बहवो गुणा विद्यन्ते तस्मात् प्रयत्नेन तदाश्रयेत् ॥

गिरिधातुः । पुं । गैरिके ॥

गिरिनदी । स्त्री । शैलापगायाम् ॥ गिरेः प्रसृता नदी । गिरिनद्यादीनां वेतिपाक्षिकेणत्वाभावः । तेन पक्षे गिरिणदीत्यपि बोध्यम् ॥

गिरिनिम्बः । पुं । महारिष्टवृक्षे ॥

गिरिपीलुः । पुं । परुषकवृक्षे । फालसा इति भाषा ॥ इति राजनिर्घण्टः ॥

गिरिपुष्पकम् । न । शैलेये ॥

गिरिप्रिया । स्त्री । चमर्याम् ॥

गिरिभिद् । पुं । पाषाणभेदवृक्षे ॥

गिरिभूः । स्त्री । पार्वत्याम् ॥ क्षुद्रपाषाणभेदे ॥

गिरिमल्लिका । स्त्री । कुरैया इति भाषाप्रसिद्धे कुटजवृक्षे ॥ गिरिमल्ली च । स्वार्थे कन् ॥

गिरिमल्ली । स्त्री । गिरिमल्लिकायाम् ॥

गिरिमृद् । स्त्री । गैरिके ॥

गिरिमृद्भवम् । न । गैरिके ॥

गिरिमेदः । पुं । विट्खदिरे ॥ इरिमेद इत्यपि पाठः ॥

गिरियकः । पुं । कन्दुके । गेन्दुके ॥ इति हेमचन्द्रः ॥

गिरिवासी । पुं । हस्तिकन्दे ॥

गिरिशः । पुं । सदाशिवे । शङ्करे ॥ गिरिराश्रयत्वेनाऽस्यास्तीति विग्रहे लोमादित्वात् शः ॥ गिरौ शेते गिरिं श्यति उपभोगेन तनूं करोति वा । गिरौ डश्छन्दसि । लोके तु छान्दसानां क्वचिद्भाषायामपि प्रयोग इत्याशु शुभगाव दित्याह स्वामी ॥

गिरिशालिनी । स्त्री । अपराजितायाम् ॥

गिरिशृङ्गः । पुं । गणेशे । विनायके ॥ न । अद्रिशिखरे ॥

गिरिसारः । पुं । लौहे ॥ रङ्गे ॥ मलयाचले ॥

गिरिसुतः । पुं । मैनाकपर्वते ॥

गिरिसुता । स्त्री । पार्वत्याम् ॥ यथा । अन्ततो गिरिसुता अभिभूतः प्रि

यतमा । विशतु वो हृदि सदा भगवतः पदयुगमिति ॥

गिरीशः । पुं । स्थाणौ । रुद्रे । शिवे ॥ अद्रिपतौ । हिमाचले ॥ वृहस्पतौ ॥ गिरेः कैलासस्य ईशः ॥

गिलः । पुं । जम्बीरे ॥ गिलति । गॄ० । मू० कः । अचि विभाषेति लत्वम् ॥

गिलग्राहः । पुं । कुम्भीरे । नाका इति भाषा ॥

गिलनम् । न । गिरणे । भक्षणे ॥

गिलिः । स्त्री । गिलने ॥ गरणम् । गॄ० । इक् कृष्यादिभ्यः । अचि विभाषेति लत्वम् ॥

गिलितः । त्रि । भक्षिते ॥ गिलिर्जाताऽस्य । तारकादित्वादितच् ॥

गिष्णः । पुं । सामवेदविदि ॥ गायके ॥

गीतम् । न । गाने ॥ तल्लक्षणं यथा । धातुमातुसमायुक्तं गीतमित्युच्यते बुधैः । तत्र नादात्मको धातुर्मातु रक्षरसञ्चय इति ॥ तद्द्विविधं यथा । गीतञ्च द्विविधं प्रोक्तं यन्त्रगात्रविभागतः । यन्त्रं स्याद्वेणुवीणादि गात्रन्तु मुखजं मतम् ॥ अपिच । निबद्धमनिबद्धञ्च गीतं द्विविधमुच्यते । अनिबद्धं भवेद्गीतं वर्णादिनियमं विना ॥ यदागमकधातुभ्यां रनिबद्धं विना कृतम् । निबद्धञ्च भवेद्गीतं तालमानरसान्वितम् ॥ छन्दोगमकधातुभ्यां वर्णादिनियमैः कृतम् ॥ * ॥ ब्रह्मणः पञ्चमभूद्गीतं सामभ्यः समपद्यत । यजुर्भ्योऽभिनया जाता रसाश्चाऽथर्वणः स्मृताः ॥ ॥ अङ्गे रालम्बयेद्गीतं हस्तेनार्थं प्रदर्शयेत् दृष्टिभ्यां भावयेद्भावं पादाभ्यां तालनिर्णयः ॥ गीतं पीनपयोधरा समदना नारी विचित्रा कथा रम्यं हर्म्यतलं सुधांशुकिरणप्रोद्दीपिता यामिनी । चित्तज्ञाः सुहृदः सुताः सुमनसो भक्ताः पुनः सेवकाः मुडुं गीतफलं कवित्वमतुलं संसारसारा मताः ॥ सङ्गीतकेन रम्येण सुखं यस्य न चेतसि । मनुष्यवृषभो लोके विधिना स च वञ्चितः ॥ संसारदुःखदग्धानामुत्तमाना मनुग्रहात् । प्रभुणा शङ्करेणात्र गीतं वाद्यं प्रकाशितम् ॥ गीतज्ञो यदि गीतेन नाप्नोति परमं पदम् । रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ॥ गीतेन हरिणा रङ्गं प्राप्नुवन्त्यपि पक्षिणः । वना दायान्ति फणिनः शिशवो न रुदन्ति च ॥ कृतिचमत्कृतये किमतः परं फणिवरोऽश्वतरो बत पञ्चमः । अपिस्मृतौ यदवाप मदालसा मधुरगीतवशीकृतशङ्करः ॥

परमानन्दविवर्द्धनमभिमतफलं वशीकरणम्। सकलजनचित्तहरणं विमुक्तिबीजं परं गीतमिति प्रशंसा ॥ त्रि। शब्दिते॥ गै०। क्तः॥

गीतमोदी। पुं। किन्नरे॥ त्रि। गानानुरागिणि॥

गीता। स्त्री। कृष्णार्जुनसंवादात्मकेशास्त्रविशेषे॥ यथा। भारते सर्ववेदाः यौ भारतार्थस्य कृत्स्नशः। गीतायामस्ति तेनेयं सर्वशास्त्रमयी मता ॥ इह मष्टादशाध्यायी क्रमात् षट्कत्रयेण हि। कर्मोपास्तिज्ञानकाण्डत्रितयात्मा निगद्यते इतिनीलकण्ठचतुर्धरः॥ गीतासुगीताकर्त्तव्या किमन्यैः शास्त्रविस्तरैरित्यादिश्रीधरस्वामी॥ एतदन्याः। आश्वमेधिकपर्वोक्ते ब्राह्मणगीतानुगीते। देवीभागवतोक्ता भगवतीगीता। अध्यात्मरामायणोक्तारामगीता। श्रीविष्णुभागवतोक्ता गोपीगीता। शिवगीताद्याश्चबह्व्यो ऽध्यात्मविद्यानिरूपणपराःसन्ति॥

गीतासारः। पुं श्रीकृष्णार्जुनसंवादात्मकेमुक्त्यर्थे ऽष्टाङ्गादियोगग्रन्थे गरुडपुराणोक्ते॥

गीतिः। स्त्री। गाने॥ आर्याछन्दोविशेषे॥ यथा। आर्याप्रथमार्द्धसमंद्वितीयमपि चार्द्धं गीयते यस्याम्। सागीतिः फणिपतिना निर्मलतिना निवेदिता नूनमिति॥

गीतिका। स्त्री। कृतिसंज्ञकविंशत्यक्षरावृत्तिविशेषे॥ यथा। सजजा भरौ सलगा यदा कथिता तदा खलु गीतिका॥ वरपाणिशोभिसुवर्णकङ्कणरत्नरज्जुविभूषिता सुपयोधरापदसङ्गिनूपुररूपकुण्डलमण्डिता। फणिराजपिङ्गलवर्णिता कविसार्थमानसहारिका वरकामिनीव मनोहृता नहि कस्य सा किल गीतिकेति॥

गीरथः। न। जीवे। वृहस्पतौ॥

गीर्णः। त्रि। वर्णिते। स्तुते॥ गिलिते॥ गीर्यतेस्म। गॄ निगरणे शब्दे च। क्तः॥

गीर्णिः। स्त्री। गिरौ। गिलने॥ गिलनम्। गॄ०। क्तिन्। ऋल्वादिभ्यः क्तिन्निष्ठावत्। तेनत्वम्॥

गीर्देवी। स्त्री। सरस्वत्याम्॥

गीर्लता। स्त्री। महाज्योतिष्मत्याम्॥

गीर्वाणः। पुं। देवे। सुरे॥ गीरेव निग्रहाऽनुग्रहसमर्था वाणो ऽस्त्रं यस्य सः॥ दन्त्योष्ठ्यपाठे गिरं वनुते याचते स्तुतिप्रियत्वात्। वनुयाचने। कर्मण्यण्। पूर्वपदादिति णत्वम्॥

गीर्वाणकुसुमम्। न। लवङ्गे॥

गीष्पतिः। पुं। धिषणे। गुरौ। वृह

स्तौ ॥ गिराम्पतिः । अहरादीनामितिरेफाभावपक्षे इदुदुपधस्येति षः । अहरादीनामिति रेफपक्षे गीर्पतिः । रेफाभावपक्षे गीःपतिः गीःपतिः ॥ पण्डिते ॥

गीष्पतीष्टिः । स्त्री । बृहस्पतिसवनाम यागे ॥

गुग्गुलः । पुं । स्वनामप्रसिद्धे वृक्षविशेषस्य निर्यासे । गुग्गुलौ ॥ रक्षोघ्नो ॥

गुग्गुलुः । पुं । कुम्भे । उलूखलके । पुरे ॥ अस्य मुखादयः । महिषाक्षो महानीलः कुमुदः पद्म इत्यपि । हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः पञ्च जातयः ॥ भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इतिस्मृतः । महानीलस्तु विज्ञेयः स्वनामसमलक्षणः ॥ कुमुदः कुमुदाभः स्यात् पद्मो माणिक्यसन्निभः । हिरण्याख्यस्तु हेमाभः पञ्चानां लिङ्गमीरितम् ॥ महिषाक्षमहानीलौ गजेन्द्राणां हितावुभौ । हयानां कुमुदः पद्मः स्वस्थ्यारोग्यकरौ परौ ॥ विशेषेण मनुष्याणां कनकः परिकीर्तितः । कदाचिन्महिषाक्षस्तु मतः कैश्चिन्नृणामपि ॥ गुग्गुलुर्विशदस्तिक्तो वीर्योष्णः पित्तलः सरः । कषायः कटुकः पाके कटू

रूक्षो लघुः परः ॥ भग्नसन्धानकृद्वृष्यः सूक्ष्मः स्वर्यो रसायनः । दीपनः पिच्छिलो बल्यः कफवातव्रणापचि । मेदोमेहाश्मवातांश्च क्लेदकुष्ठाममारुतान् ॥ पिडकाग्रन्थिशोफार्शोगण्डमालाकृमीन् जयेत् ॥ माधुर्याच्छमयेद्वातं कषायत्वाच्च पित्तहा । तिक्तत्वात् कफजित् तेन गुग्गुलुः सर्वदोषहा ॥ स नवो बृंहणो वृष्यः पुराणस्त्वतिलेखनः । स्निग्धः काञ्चनसङ्काशः पक्वजम्बूफलोपमः ॥ नूतनो गुग्गुलुः प्रोक्तः सुगन्धिर्यस्तु पिच्छिलः । शुष्को दुर्गन्धकश्चैव त्यक्तप्रकृतवर्णकः ॥ पुराणः स तु विज्ञेयो गुग्गुलुर्वीर्यवर्जितः ॥ अम्लं तीक्ष्णमजीर्णञ्च व्यवायं श्रममातपम् । मद्यं रोषं त्यजेत् सम्यग् गुणार्थी पुरसेवकः ॥ अस्योत्पत्तिविशेषे जन्मादिकथनं यथा । जातवन्तो पुरपादपा मरुभुवि ग्रीष्मे ऽर्कसन्तापिताः शीतार्त्ताः शिशिरे ऽपि गुग्गुलुरसं मुञ्चन्ति ते पञ्चधा । हेमाभं महिषाक्षतुल्यमपरं सत्पद्मरागोपमं भृङ्गाभं कुमुदद्युतिञ्च विधिना ग्राह्या परीक्षा ततः ॥ वह्नौ ज्वलन्ति तपने विलयं प्रयान्ति क्षिप्यन्ति कोष्णसलिले पयसः समाः

। ग्राह्याः शुभाः परिहरेच्चिरकालजातान् अङ्गारवर्णसमपूयविगन्धवर्णानिति प्रयोगामृतम् ॥ पक्वस्यास्य पूर्णवीर्यत्वं मासत्रयपर्य्यन्तं तिष्ठतीति वैद्यकपरिभाषा ॥ गोजति । गु अस्तेये । क्विप् । गुजो व्याधेः गुडति । गुडरक्षणे । वाहुलकात् क्तः । डलयोरैक्यम् ॥

गुच्छः । पुं । स्तवके । कलिकादिकदम्बे । बहुभिः पुष्पैः फलैर्वा सम्बाधः पल्लवग्रन्थिर्गुच्छः । गुच्छा इति भाषा ॥ स्तम्बे । मूलत एव यत्र लतासमूहो भवति न च प्रकाण्डानि ते गुच्छा मल्लिकादयः । झुण्ड इति भाषा ॥ हारविशेषे । द्वात्रिंशद्यष्टिकेहारे ॥ कलापे । मोरपङ्ख इति भाषा ॥ गुध्यते । गुधपरिवेष्टने । सस्यादिभ्यश्छुरिति श्रीभोजः ॥ गूयते । गुङ्शब्दे । वाहुलकात् छगण ॥ यद्वा । गवनम् । गुङ्० । सं०क्विप् । तुक् । गुतं छ्यति । छोछेदने । आतोनुपेतिकः ॥

गुच्छकः । पुं । स्तवके । पुष्पसङ्घाते ॥ स्तम्बे ॥ द्वात्रिंशद्यष्टिकेहारे ॥ कलापे ॥ रीठाकरञ्जे ॥ न । ग्रन्थिपर्णे ॥ गुच्छात्स्वार्थे कन् ॥

गुच्छकणिशः । पुं । रागीधान्ये । तृणधान्यविशेषोयम् ॥

गुच्छकरञ्जः । पुं । सानन्दे । स्निग्धदले ॥

गुच्छदन्तिका । स्त्री । कदल्याम् ॥

गुच्छपत्रः । पुं । तालवृक्षे ॥

गुच्छपुष्पः । पुं । सप्तच्छदवृक्षे ॥

गुच्छपुष्पकः । पुं । गुच्छकरञ्जे ॥ रीठाकरञ्जे ॥

गुच्छपुष्पी । स्त्री । धातक्याम् ॥ शिमडीवृक्षे ॥

गुच्छफलः । पुं । रीठाकरञ्जे ॥ राजादन्याम् ॥ कतके ॥

गुच्छफला । स्त्री । अग्निदमन्याम् ॥ काकमाच्याम् ॥ निष्पाव्याम् ॥ द्राक्षायाम् ॥ कदल्याम् ॥

गुच्छबभ्रा । स्त्री । गुण्डालातृणे ॥

गुच्छमूलिका । स्त्री । गुण्डासिनीतृणे ॥

गुच्छार्द्धः । पुं । चतुर्विंशतियष्टिके हारे ॥ न । अर्द्धगुच्छे ॥ गुच्छस्य अर्द्धः । ग्रामार्द्धवत् समासः ॥

गुच्छालः । पुं । भूतृणे । गन्धखेड ॥

गुच्छाह्वकन्दः । पुं । गुल्मचरमे । निघण्टिकायाम् । कुच्ची इति गौड भाषा ॥

गुच्छी । स्त्री । गुच्छकरञ्जे ॥

गुञ्जरी । स्त्री । रागिणीविशेषे ॥ अ

स्याद्रूपं यथा । श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्पयाता । श्रुतेः स्वराणां दधती विभागं तन्त्रीमुखाद् दक्षिणगुर्ज्जरीयम् ॥ अस्याः कालनियमो यथा । नाटो गौडो वराडीच गुर्ज्जरी देशि रेव च । पूर्व्वाह्णे गानमेतेषां निषिद्धमिति तद्विदः ॥ मतभेदेन पूर्व्वाह्णे विगीयते ॥

गुञ्जः । पुं । गुच्छे । पुष्पस्तवके ॥

गुञ्जकृत् । पुं । भ्रमरे ॥ गुञ्जं ध्वनिविशेषं करोति । डुकृञ् । क्विप्तुकौ ॥

गुञ्जनम् । न । भ्रमरादीनां गुणगुणध्वनौ । गुञ्जिते ॥

गुञ्जा । स्त्री । लताविशेषे । काकचिञ्च्याम् । रक्तिकायाम् । घुंघची चिरमठी रत्ती इत्यादिभाषाप्रसिद्धायाम् भिल्लभूषणायाम् ॥ श्वेतरक्तप्रभेदेन ज्ञेयं गुञ्जाद्वयं बुधैः । गुञ्जाद्वयन्तु केश्यं स्याद्वातपित्तज्वरापहम् । मुखशोषभ्रमश्वासतृष्णामदविनाशनम् ॥ नेत्रामयहरं वृष्यं बल्यं कण्डूव्रणं हरेत् । कृमीन्द्रलुप्तकुष्ठानि रक्ता च धवलापि च ॥ मानविशेषे ॥ तुल्या यवाभ्यां कथितात्र गुञ्जेति लीलावती ॥ त्रियवपरिमाणे । इति वैद्याः ॥ चतुर्व्रीह्यपरिमाणे ॥ गोधूमद्वयमाने ॥ पटहे ॥ मधुरध्वनौ ॥ मदिरागृहे ॥ चर्व्वीयाम् ॥ गुञ्जति । गुजि अव्यक्तशब्दे । पचाद्यच् ॥

गुञ्जिका । स्त्री । गुञ्जार्थे ॥ स्वार्थे कः ॥

गुञ्जितम् । न । गुञ्जने ॥ न गुञ्जितं तन्नजहार यन्मनः इति भट्टिः ॥

गुटिः । स्त्री ।
गुटिका । स्त्री ।
गुटी । स्त्री ।
} गोले । जपसङ्ख्यानसाधने । वटिकायाम् । गोलो वडी इति च भाषा ॥

गुडः । पुं । गोलके ॥ हस्तिसन्नाहे ॥ ग्रासे ॥ कार्पास्याम् ॥ इक्षोर्विकारे । इक्षुसारे । शिशुप्रिये ॥ इक्षो रसो यः सम्पक्को जायते लोष्टवद्दृढः । स गुडो गौडदेशे तु मत्स्यण्डीव गुडो मतः ॥ गुडो वृष्यो गुरुः स्निग्धो वातघ्नो मूत्रशोधनः । नाऽतिपित्तहरो मेदः कफकृमिबलप्रदः ॥ गुडो जीर्णो लघुः पथ्योऽनभिष्यन्द्यग्निपुष्टिकृत् । पित्तघ्नो मधुरो वृष्यो वातघ्नोऽसृक् प्रसादनः ॥ गुडो नवः कफश्वासकासकृमिकरोऽग्निकृत् ॥ श्लेष्माणमाशु विनिहन्ति सदार्द्रकेण पित्तं निहन्ति च स एव हरीतकीभिः । शुण्ठ्या समं हरति वातमशेषमित्थं दोषत्रयक्षयकरा

य नमो गुडाय ॥ गुडति । गुडवेष्टने । इगुपधेति कः ॥ यद्वा । गवते । गुङ् अव्यक्ते शब्दे । ब्रादिभ्यः किदिति डः ॥ सिता चतुर्गुणा देया वटीषु द्विगुणो गुडः ॥

गुडकः । पुं । गुडद्वारापक्वौषधविशेषे ॥ अस्य पूर्णं तेजः षण्मासपर्य्यन्तं तिष्ठतीति परिभाषा ॥

गुडकरी । स्त्री । रागिणीविशेषे ॥

गुडतृणम् । न । इक्षौ ॥ गुडस्य तृणम् ॥

गुडत्वक् । न । त्वचे । चोचे । दारचीनी इतिभाषाप्रसिद्धे गन्धद्रव्ये ॥

गुडत्वचम् । न । त्वक्पत्रे । गुडत्वचि ॥

गुडदारु । न । इक्षौ । रसाले ॥

गुडधानाः । स्त्री । गुडमिश्रितधानासु । गुडधानी इतिभाषा ॥ गुडेन धानाः गुडधानाः । भक्ष्येण मिश्रीकरणमिति समासः । मिश्रणक्रियाद्वारा सामर्थ्यम् । तां विना मिश्रीकरणस्यायोगात् । बहुवचनान्तोऽयं धानाभृष्टयवे स्त्रियः इति बहुवचननिर्देशात् ॥

गुडधेनुः । स्त्री । दानार्थं गुडादिनिर्मितायां धेनौ ॥

गुडपुष्पः । पुं । मधूकवृक्षे । महुवा इतिभाषा ॥ गुड इव पुष्पमस्य ॥

गुडफलः । पुं । पीलुवृक्षे ॥

गुडभा । स्त्री । यावनालशर्करायाम् ॥

गुडमूलः । पुं । अल्पमारिषशाके ॥

गुडलम् । न । गौडीमदिरायाम् ॥ त्रि । गुडयुक्ते । गुडला गुडली इति च भाषा ॥

गुडबीजः । पुं । मसूरे ॥

गुडशर्करा । स्त्री । पिप्पटायाम् ॥ इति त्रिकाण्डशेषः ॥

गुडशिग्रुः । पुं । रक्तशोभाञ्जने ॥

गुडा । स्त्री । स्नुह्याम् ॥ गुडिकायाम् ॥ उशीर्याम् । लघुकाशे ॥ गुडात् टाप् ॥

गुडाका । स्त्री । निद्रायाम् इति श्रीधरस्वामिनः ॥

गुडाकेशः । पुं । सदाशिवे ॥ गुडा स्नुहीतद्वत् केशा अस्य जटाधारित्वात् ॥ अर्जुने ॥ गुडाकाया ईशः ॥ त्रि । जितनिद्रे ॥ सर्वत्र सावधाने ॥

गुडालकः । पुं । न । केशचक्रे ॥ मुखं मुकुन्दस्य गुडालकावृतम् ॥

गुडाशयः । पुं । आखोटे ॥ त्रि । गुडेच्छौ ॥

गुडिका । स्त्री । इष्टवटिकायाम् ॥ वटिका गुडिका चेति संज्ञाऽन्तरभेदतः । इति वैद्यकपरिभाषा ॥

गुडूची । स्त्री । गुडूच्याम् । अमृतायाम् ॥

गुडूची। स्त्री। गिलोय इतिभाषाप्रसिद्धायां लतायाम्। वत्सादन्याम्। छिन्नरुहायाम्। अमृतायाम्॥ अस्या उत्पत्त्यादिकं यथा। अथ लङ्केश्वरो मानी रावणो राक्षसाधिपः। रामपत्नीं वना च्छीतां जहार मदनातुरः॥ ततस्तं बलवान् रामो रिपुं आयापहारिणम्। हतो वानरसैन्येन जघान रणमूर्द्धनि॥ हते तस्मिन्सुराराती रावणे बलगर्विते। देवराजः सहस्राक्षः परितुष्टोऽतिराघवे॥ तत्र ये वानराः केचिद्राक्षसै र्निहता रणे। तानिन्द्रो जीवयामास संसिच्याऽमृतवृष्टिभिः॥ ततो येषु प्रदेशेषु कपिगात्रात् परिच्युताः। पीयूषविन्दवः पेतुस्तेभ्यो जाता गुडूचिका॥ गुडूची कटुका तिक्ता स्वादुपाका रसायनी। सङ्ग्राहिणी कषायोष्णा लघ्वी बल्याग्निदीपनी॥ दोषत्रयामतृड्दाहमेहकासांश्च पाण्डुताम्। कामलाकुष्ठवातास्रज्वरकृमिवमी र्हरेत्॥ गुडति। गुड रक्षणे। बाहुलकादूचट्। ङीप्॥

गुडूचीकल्कः। पुं। कल्कविशेषे॥ स यथा। अमृतायाः शतं चूर्णं वाससा परिशोधितम्। पृथक् षोडशभागाः

स्युर्गुडमाक्षिकसर्पिषाम्॥ यथाग्नि भक्षयेदेतन्नरो हितमिताशनः। नास्य कश्चिद्भवेद्व्याधि र्न जरापलितं न च॥ न ज्वरा विषमा नैव मेहना निलरक्तकम्। न च नेत्रगता रोगाः परमेतद्रसायनम्॥ मेधाकरं त्रिदोषघ्नं प्रयोगादस्य बुद्धिमान्। जीवेद्वर्षशतं साग्रं यथैवादितिजस्तथेति॥

गुडूचीपत्रम्। न। अमृतापर्णे॥ गडूचीपत्र माग्नेयं सर्वज्वरहरं लघु। कषायं कटु तिक्तञ्च स्वादुपाकं रसायनम्॥ बल्यमुष्णञ्च सङ्ग्राहि हन्याद्दोषत्रयं तृषाम्। दाहप्रमेहवातास्रकामलाकुष्ठपाण्डुताः॥

गुडेरः। पुं। गुडके॥ ग्रासे॥ गुडति गुड०। पतिकठिकुठिगडिगुडिदंशिभ्य एरक्॥

गुडेरकः। पुं। ग्रासे॥

गुडोद्भवा। स्त्री। शर्करायाम्॥

गुणः। पुं॥ मौर्व्याम्। ज्यायाम्। धनुराकर्षणरज्जौ। चिल्ला इति भाषा॥ अप्रधाने। शौर्यादौ रसगन्धादौ च॥ तल्लक्षणं यथा। सत्त्वे निविशतेऽपैति पृथक्जातिषु दृश्यते। आधेयश्च क्रियाजश्च सोऽसत्त्वप्रकृति र्गुणः॥ सत्त्वं द्रव्यम्। सत्त्वएव

निविशतेइतिसावधारणं व्याख्येयम्। एतेनसत्ताव्यावर्त्यते। साहिनकेवलं द्रव्येवर्त्तते किन्तुद्रव्यगुणकर्मसु। ननुद्रव्यएवद्रव्यत्वंवर्त्ततेइतितत्राति व्याप्तिरतआह। अपैतीति। अपगच्छतीत्यर्थः। अर्थात्सत्त्वादेव। यथापीततायां जातायां फलादेर्नीलतापैति नैवंद्रव्यत्वं द्रव्यादपैति। एवमपि गोत्वंगोषुवर्त्तते अश्वादेस्त्वापैति तत्रातिव्याप्तिरतआह। पृथग्जातिषुदृश्यतइति। गोत्वं हिद्रव्यत्वावान्तरनामजातिषु नदृश्यते गुणस्तुदृश्यते। यथा अश्वेदृष्टा नीलतातृणादिष्वपिदृश्यते। एतेन पूर्वार्द्धेन सकलजातेर्व्यवच्छेदः। एवंतर्हिकर्म द्रव्येवर्त्तते ततोऽपैति पृथग्जातिषु दृश्यतेचेतितत्रातिव्याप्तिरतआह। आधेयश्चाक्रियाजश्चेति। उत्पाद्यानुत्पाद्यइत्यर्थः। उत्पाद्योयथा। घटादेःपाकजोरूपादिः। अक्रियाजः अनुत्पाद्यः। सयथा। आकाशादेर्महत्त्वादिः। क्रियातु सर्वाप्युत्पाद्यैव न नित्येति तस्या द्वैविध्याभावान्नगुणत्वाभावः। एवमपि द्रव्यस्यगुणत्वंप्राप्नोति अवयविद्रव्यंहि अवयवद्रव्येषुनिविशते। असमवायिकारणसंयोगनिवृत्तौ विनाशात्ततोपैति भिन्नजातौ

येषु च हस्तपादादिषुदृश्यते। द्विविधंचभवति नित्यानित्यभेदेन। निरवयवस्यात्मपरमाण्वादेर्नित्यत्वात्द्रव्य विद्रव्यस्यतुघटादेर निर्त्यत्वादतआह। असत्त्वप्रकृतिरिति। अद्रव्यस्वभावइत्यर्थः॥ ॥उपैत्यन्यज्जहात्यन्यद्दृष्टो द्रव्यान्तरेष्वपि। वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणः स्मृतः॥ इति पारिभाषिकोगुणो ऽप्रधान एवान्तर्भवति॥ तेजोबलवीर्यैश्वर्यवैराग्यशक्तयश्चपराश्रितत्वा देव गुणाः॥ शुक्लादौ॥ सच शुक्लादिशब्दानां पटादौ प्रवृत्तिनिमित्तंभवति॥ विशेषाधानहेतौ सिद्धे वस्तुधर्मे। शुक्लादयोहि गवादिकं स्वजातीयेभ्यःकृष्णगवादिभ्यो व्यावर्त्तयन्ति॥ अपिच। द्रव्यत्वव्यापकतावच्छेदकसत्तान्यजातिमत्त्वं तदर्थः॥ यथा। रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छा-द्वेषप्रयत्नधर्माधर्मसंस्कारास्तुविंशतिगुणाइति॥ कर्मव्यतिरिक्तत्वेसति जातिमात्राश्रये॥ विवेकवैराग्योपरतितितिक्षासमाधनेषु॥ आकाशादौ। सांसिद्धिकवैनयिकप्राकृतिकभेदभिन्ने॥ द्रव्याश्रिते फलादेर

सत्त्वादौ ॥ सूदे ॥ इन्द्रिये ॥ त्यागे ॥ शौर्यादौ ॥ सत्त्वरजस्तमस्सु ॥ गुणानाम् परमं रूपं न दृष्टिपथमृच्छति । यत्तु दृष्टिपथं प्राप्तं तन्मायेव सुतुच्छकमिति भगवान्वार्षगण्यः । गुणानां सत्त्वादीनाम् परमं रूपम् अधिष्ठानमात्मेत्यर्थः ॥ राज्ञः सन्धिविग्रहादौ ॥ यथा । सन्धिविग्रहयानानि संस्थाप्यासनमेव च । द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनामिति ॥ देशकालज्ञतादिचतुर्दशसु ॥ ते च । देशकालज्ञता दार्ढ्यं सर्वक्लेशसहिष्णुता । सर्वविज्ञानता दाक्ष्यं मूर्जः संवृतमन्त्रता ॥ अविसंवादिता शौर्यं भक्तित्वं कृतज्ञता । शरणागतवात्सल्यममर्षित्वमचापलम् ॥ एते चतुर्दश गुणाः प्रोक्ताः शास्त्रेषु सूरिभिः ॥ गौतमोक्ता गुणा यथा । दया सर्वभूतेषु क्षान्तिः अनसूया शौचम् अनायासः मङ्गलम् अकार्पण्यम् अस्पृहेति ॥ काव्यगुणश्च । यथा । ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः । उत्कर्षहेतवस्तेस्यु रचलस्थितयो गुणा इति ॥ तद्भेदा यथा । श्लेषः प्रसादः समता माधुर्यं सुकुमारता । अर्थव्यक्ति रुदारत्व मोजःकान्तिसमाधयः ॥ इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः । माधुर्यौजःप्रसादाख्या स्त्रय स्ते न पुनर्दश ॥ तस्य दशसङ्ख्याभावे हेतुर्यथा । केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः । अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥ आवृत्तौ ॥ रज्जौ ॥ तन्तौ ॥ भीमसेने ॥ उत्कर्षे । दोषाभ्यस्मिन् विशेषणे ॥ सम्भागे ॥ यथा । सङ्ख्याया गुणस्य निमाने मयट्च ॥ संज्ञा जाति क्रिया शब्दान् हित्वा ऽन्ये गुणवाचिनः । चतुष्टयी शब्दानां प्रवृत्तिरिति व्याकरणग्रन्थनिष्कर्षादेष निर्णयः ॥ गुण्यते । गुण आमन्त्रणे । घञ् ॥ गुणाः कुर्वन्ति दूतत्वं दूरेपि वसतां सताम् । केतकीगन्धमाघाय स्वयं गच्छन्ति षट्पदाः ॥

गुणकः । पुं । पूरकाङ्के ॥ यथा । गुणाप्तमङ्कं गुणकेन हन्यादिति ॥

गुणाकरः । पुं । भीमसेने ॥ त्रि । गुणकारके ॥

गुणगृह्यः । त्रि । गुणपक्षपातिनि ॥ गुणानां गृह्यः । पदास्वैरिवाह्यापक्ष्येषु चेति ग्रहेः क्यप् ॥

गुणज्ञः । त्रि । गुणवेत्तरि ॥ यथा । गुणिनि गुणज्ञो रमते नाऽगुणशीलस्य गुणिनि परितोषः । अलिरेति

वनात् कमलं नहि भेक स्वेकवासेऽपि ॥

गुणत्रयविनिर्म्मितः । पुं । मायाकल्पिते संसारवृक्षे ॥

गुणधर्म्मः । पुं । गुणाश्रितधर्मे ॥ यथा । यो गुणेन प्रवर्त्तेत गुणधर्मः स उच्यते । यथा मूर्द्धाभिषिक्तस्य प्रजानां परिपालनमिति ॥

गुणनिका । स्त्री । नृत्ये ॥ शून्याङ्के ॥ पाठनिश्चये ॥ मालायाम् ॥ आम्रेडिते ॥ गुणआम्रेडने । चु० । गणास्रन्योर्युजितियुच् । कात्पूर्वस्येकारः ॥ शास्त्रादीनामीलने ॥

गुणनी । स्त्री । पाठनिश्चये । शीलने ॥

गुणनीयः । पुं । शास्त्राभ्यासे ॥ इति हारावली ॥

गुणप्रवाहः । पुं । चेतनाचेतनात्मके प्रपञ्चे ॥

गुणप्रवृद्धः । पुं । संसारवृक्षे ॥ तच्छायायाम् ॥ गुणैः सत्त्वरजस्तमोभिर्देहेन्द्रियविषयाकारपरिणतैर्वेद सेचनीयैरिव स्थूलीभूतत्वात् ॥ गु गुणैःप्रवृद्धः ॥

गुणभोक्तृ । न । न्येवब्रह्मणि ॥ सत्त्वरजस्तमसां शब्दादिद्वारा सुखदुःखमोहाकारेण परिणतानामुपलब्धृत्वात् ॥

गुणध्वंसः । पुं । गुणनाशे । पर्य्यन्तिकायाम् ॥

गुणलयनिका । स्त्री । वस्त्रनिर्मितगृहे । कोणिकायाम् ॥ इति हेमचन्द्रः ॥

गुणलयनी । स्त्री । गुणलयनिकायाम् । पटकुट्याम् ॥ इति हलायुधः ॥

गुणवान् । त्रि । गुणविशिष्टे । मद्धीना एते गुणा इत्यभिमानवति ॥ गुणवन्तं नियुञ्जीत गुणहीनन्तु वर्जयेत् । पण्डितस्य गुणाः सर्वे मूर्खे दोषाश्च केवलमिति गारुडे नीतिसारः ॥ गुणोऽस्यास्ति । मतुप् ॥ सम्बन्धिनि ॥

गुणवादः । पुं । प्रमाणान्तरविरोधे सत्यर्थवादे ॥ यथा । आदित्यो यूपः इत्यादिषु यूपे आदित्याभेदस्य प्रत्यक्षबाधितत्वात् आदित्यवदुज्ज्वलरूपो गुणोऽनेन लक्षणया प्रतिपाद्यते । इति ॥

गुणवित् । त्रि । साङ्ख्यज्ञे ॥ सत्त्वरजस्तमांसि त्रयो गुणाः साम्येनावस्थिताः जगतो महदादिलक्षणस्य कारणमिति कल्पयति ॥ गुणज्ञे ॥

गुणवृक्षः । पुं । कूपके । नौकामध्यस्थे रज्जुबन्धनस्तम्भे । गुणधरा मस्तूला इति भाषा ॥ गुणानां रज्जूनां वृक्षः ॥

गुणवृक्षकः । पुं । कूपके ॥ स...

कम् ॥

गुणसङ्गः । पुं । शब्दादिषु सुखदुःखमोहात्मकेष्वभिलाषे ॥ गुणेषु सङ्गः ॥

गुणसङ्ख्यानम् । न । साङ्ख्ये कापिलशास्त्रे ॥ गुणाः सत्त्वरजस्तमांसि सम्यक् कार्यभेदेन ख्यायन्ते प्रतिपाद्यन्ते ऽस्मिन्निति व्युत्पत्तेः ॥

गुणसम्मूढः । त्रि । गुणैः कार्यतया धर्म्मैर्देहादिभिर्विकारैः सम्यङ्मूढे । स्वरूपास्फुरणेन तानेवात्मत्वेन मन्यमाने ॥

गुणसागरः । पुं । ब्रह्मणि । विधातरि ॥ बुद्धविशेषे ॥ त्रि । सकलगुणाधारे ॥ गुणानां सागरः ॥

गुणा । स्त्री । दूर्वायाम् ॥ मांसरोहिण्याम् ॥

गुणाकरः । पुं । बुद्धे ॥ त्रि । गुणान्विते ॥ गुणानामाकरः ॥

गुणातीतः । त्रि । परमेश्वरे ॥ गुणाः शीतोष्णसुखदुःखादयः सत्त्वादयो वा तान् अतीतोऽतिक्रान्तः ॥ स्थितप्रज्ञे ॥

गुणान्वितः । त्रि । विवेकवैराग्योपरतितितिक्षासमाधानयुक्ते ॥ सुखदुःखमोहात्मकगुणैर्युक्ते ॥ गुणयुक्ते ॥

गुणितः । त्रि । आहते । पूरिते ॥ यथा । पञ्चधा गुणिता पञ्चसङ्ख्या पञ्चविंशतिर्भवतीत्यादिः ॥ पिण्डिते ॥ आवर्त्तिते । अभ्यस्ते ॥ गुण्यते स्म । गुण आमन्त्रणे । क्तः ॥

गुणी । पुं । धनुषि । शरावापे । चापे ॥ त्रि । गुणविशिष्टे ॥ गुणोऽस्त्यस्य । इनिः ॥

गुणीभूतः । त्रि । अप्रधानीभूते ॥

गुणीभूतव्यङ्ग्यः । पुं । काव्यविशेषे ॥ यथा । अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ॥

गुणेशः । त्रि । सत्त्वादिगुणानां नियामके । ईश्वरे ॥

गुणेश्वरः । पुं । चित्रकूटाचले ॥ त्रि । गुणाढ्ये ॥ गुणानाम् ईश्वरः ॥

गुणोत्कर्षः । पुं । अतिशये । गुणप्राधान्ये । परभागे ॥

गुणोत्कीर्त्तनम् । न । गुणकथने ॥ विरहकालिकमित्रादिविषयकप्रशंसाप्रतिपादने ॥

गुण्ठितः । त्रि । वेष्टिते ॥ गुण्डिते । रूषिते ॥ गुण्ठ्यते स्म । गुठि वेष्टने । क्तः ॥

गुण्ड्रः । पुं । असिपत्रे । नीलपत्रे । तृणविशेषे ॥ यस्य कन्दः कशेरुः ॥

गुण्डकः । पुं । मलिने ॥ धूलौ ॥ कलोक्तौ ॥ तैलपात्रे ॥

गुण्डकन्दः । पुं । कशेरुणि ॥

गुण्डारोचनिका । स्त्री । काम्पिल्ले । कंबीला इति भाषा ॥

गुण्डाला । स्त्री । क्षुद्रक्षुपविशेषे । जलोद्भतायाम् । गुच्छवधायाम् ॥

गुण्डासिनी । स्त्री । तृणविशेषे । गुच्छमूलिकायाम् । चिपिटायाम् ॥

गुण्डिकः । पुं । स्त्री । गुण्डके । तण्डुलादिचूर्णे ॥ गुण्डिकैः सितपीतैश्च मण्डयन्तो गृहाङ्गनम् ॥

गुण्डिचा । स्त्री । श्रीपुरुषोत्तमदेवस्य रथारोहणानन्तरं वासार्थं मण्डपविशेषे । गुण्डीचावाडी इतिभाषा ॥ सप्ताहं ये प्रपश्यन्ति गुण्डिचामण्डपस्थितम् । मां च रामं सुभद्रां च मम सायुज्य माप्नुयुरित्युत्कलखण्डम् ॥

गुण्ठितः । त्रि । रजसाकीर्णे । रूषिते ॥ गुण्ठ्यते स्म । गुडि वेष्टने । क्तः ॥

गुण्यः । त्रि । गुणवति । प्रशस्तगुणयुक्ते ॥ अन्येभ्योपि दृश्यत इतियप् ॥

गुत्यः । पुं । गवेधुकायाम् ॥

गुत्यकम् । न । ग्रन्थिपर्णे ॥

गुत्सः । पुं । स्तबके ॥ विकासोन्मुखकलिकायाम् ॥ कलिकादिकदम्बे ॥ गुध्यते गुधपरिवेष्टने । उन्दिगुधिकुषिभ्यश्चेतिसः किन् ॥ स्तने ॥ द्वात्रिंशद्यष्टिकेहारे ॥ ग्रन्थिपर्णे ॥

गुत्सकः । पुं । स्तबके । गुच्छा इतिभाषा ॥ ग्रन्थपरिच्छेदे ॥

गुत्सकपुष्पः । पुं । सप्तपर्णे ॥

गुत्सार्द्धः । पुं । गुच्छार्द्धे । चतुर्विंशति यष्टिकाभिर्निर्मितेहारे ॥ गुत्सस्य अर्द्धः ॥

गुदम् । न । अपाने ॥ गुदस्य मानं सर्वस्यसार्द्धं स्याच्चतुरङ्गुलम् । तस्य स्युर्वलय स्तिस्रः शङ्खावर्त्तनिभाः स्मृताः ॥ प्रवाहिनीभवेत् पूर्वा सार्द्धाङ्गुलमितामता उत्सर्जनीच तदधः सा सार्द्धाङ्गुलसम्मिता ॥ तस्या अधः संवरणी स्यादेकाङ्गुलसम्मिता । अर्द्धाङ्गुलप्रमाणन्तु बुधै गुदमुखं मतम् ॥ मलोत्सर्गस्य मार्गोयं पायुर्देहे विनिर्मितः ॥ गोदते । गुदक्रीडायाम् । इगुपधेतिकः ॥ यद्वा । गूयते ऽनेन । गुपुरीषोत्सर्गे । गवते वा । गुङ्शब्दे । अब्दादयइतिमाधु ॥

गुदकीलः । पुं । } अर्शोरोगे ॥
गुदकीलकः । पुं । }

गुदग्रहः । पुं । उदावर्त्तरोगे ॥

गुदभ्रंशः । पुं । रोगविशेषे ॥ तस्यल० यथा । प्रवाहणातिसाराभ्यां निर्गच्छति गुदं बहिः । रूक्षदुर्बलदेहस्य गुदभ्रंशं तमादिशेदिति ॥

गुदयोनिः । पुं । कुम्भीके ॥

गुदाङ्कुरः । पुं । अर्शोरोगे ॥

गुधेरः । पुं । लोधघातके ॥ गोप्तरि । रक्षके ॥ गुध्यति । गुधपरिवेष्टने । मूलोत्यादयश्चेत्येरक् ॥

गुन्दलः । पुं । मर्द्दलशब्दे ॥

गुन्द्रः । पुं । तेजनके । शराभिधतृणे ॥ गोँदपटेरा इतिभाषाप्रसिद्धे तृणविशेषे । पटेरके । शृङ्गवेराभमूले ॥ गुन्द्रः कषायो मधुरः शिशिरः पित्तरक्तजित् । स्तन्यशुक्ररजोमूत्रशोधनो मूत्रकृच्छ्रजित् ॥ गोदते । गुद० । बाहुलकात् रक् । पृषोदरादिः ॥

गुन्द्रमूला । स्त्री । एरकायाम् ॥

गुन्द्रा । स्त्री । प्रियङ्गौ ॥ भद्रमुस्तके ॥ गांजला इति । द्राति । द्रागतौ । आतोनुपेतिकः । पृषोदरादिः । टाप् ॥ एरकायाम् ॥ गवेधुकायाम् ॥ गुन्द्रयति । गुन्द्रि बधे । पचाद्यच् ॥

गुन्द्रालः । पुं । जीवञ्जीवपक्षिणि ॥

गुपिलः । पुं । राज्ञि ॥ गोपायति । गुपूरक्षणे गुपादिभ्यः किदिति इलच् ॥

गुप्तः । त्रि । रक्षिते । कृतरक्षणे । पाते ॥ गूढे । कृतगोपने ॥ संवृते ॥ आहारनिर्हारविहारयोगाः सुसंवृताधर्मविदा तु कार्याः । वाग्गुप्तिकार्याणि तप स्तथैव धनायुषी गुप्ततमे तु कार्य्ये ॥ इतिवशिष्ठ ॥ वैश्यस्य

संज्ञाबोधने ॥ गुप्यते स्म । गुपव्योपनादौ । क्तः ॥

गुप्तगतिः । पुं । अपसर्पे । चरे ॥ गुप्ता गतिर्यस्य ॥

गुप्तचरः । पुं । बलदेवे । हलायुधे ॥ गुप्तचारे ॥ गुप्तश्चासौ चरश्च ॥ त्रि । पूर्वगुप्ते ॥

गुप्तस्नेहः । पुं । अङ्कोठवृक्षे ॥

गुप्ता । स्त्री । कपिकच्छाम् ॥ परकीयान्तर्गतनायिकाप्रभेदे ॥

गुप्तिः । स्त्री । रक्षणे ॥ राज्ञा मात्मगतायां राष्ट्रगतायाञ्च रक्षायाम् ॥ कारागारे ॥ भूगर्त्ते ॥ अवस्करस्थाने । पोखरा इतिभाषा ॥ भूगर्त्ते ॥ यमे ॥ गुप्यते । गोपनञ्च । गुपू० । क्तिन् ॥ गोपने ॥ नगुप्तिरन्यत्र विना ॥

गुप्तिकर्म्म । न । प्राकारपरिखादिनिर्म्माणे ॥

गुफितः । त्रि । गुम्फिते । ग्रथिते ॥

गुम्फः । पुं । गुम्फने । ग्रन्थने ॥ बाहोरलङ्कारे । दोर्भूषणे ॥ श्मश्रुणि ॥

गुम्फनम् । न । ग्रथिते । दृब्धे ॥

गुम्फना । स्त्री । रचनायाम् ॥ यथा । वाक्ये शब्दार्थयोः सम्यग्रचना गुम्फना स्मृता । शब्दार्थक्रमपर्यायपदवाक्यकृता चसेति ॥

गुम्फितः । त्रि । दृब्धे । ग्रथिते ॥ गुम्फ

ग्रन्थे । ण्यन्तः । क्तः ॥

गुरणम् । न । उद्यमे । भाराद्युद्यमने ॥ गुरी उद्यमे । कुटादिः । ल्युट् ॥

गुरुः । पुं । निषेकादिकृति ॥ निषेको गर्भाधानम् आदिना सीमन्तोन्नयनादेर्मन्त्रविद्यादानादेश्च ग्रहणम् । तत्कर्त्ता पित्रादिर्गुरुःस्यात् । यथा । निषेकादीनि कर्म्माणि यः करोति यथाविधि । सम्भावयति चान्नेन स विप्रो गुरुरुच्यते इति मनुः ॥ स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति ॥ पितृमात्राचार्य्यादौ ॥ शास्त्रोपदेष्टरि ॥ साङ्गवेदबोधके ॥ उपदेष्टरि । सम्प्रदायप्रवर्त्तके ॥ शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् । शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् ॥ आश्रमी ध्याननिष्ठश्च मन्त्रतन्त्रविशारदः । निग्रहानुग्रहे शक्तो गुरुरित्यभिधीयते ॥ उद्धर्त्तुञ्चैव संहर्त्तुं समर्थो ब्राह्मणोत्तमः । तपस्वी सत्यवादी च गृहस्थो गुरुरुच्यते ॥ तस्य देशभेदेन विशेषो यथा । मध्यदेशकुरुक्षेत्रलाटकोङ्कणसम्भवाः । अन्तर्वेदी प्रतिष्ठाना आवन्त्याश्च गुरूत्तमाः ॥ गौडाः शाल्वोद्भवाः सौरा मागधाः केरलास्तथा । कोसलाश्च दशार्णाश्च गुरवः सप्तमध्यमाः ॥ कर्णाटनर्म्मदारेवाकच्छतीरोद्भवास्तथा । कालिङ्गाश्च कलम्बाश्च काम्बोजाश्चाधमा मताः ॥ मध्यदेशसमुद्भूतः शान्तः सर्व्वगुणैर्युतः । पुत्रदारैश्च सम्पन्नो गुरुरागमसम्मतः ॥ मध्यदेशसमुद्भूत इति श्रेष्ठत्वदर्शनार्थम् ॥ शाक्ते शाक्तो गुरुः शस्तः शैवे शैवो गुरुर्मतः । वैष्णवे वैष्णवः सौरे सौरो गुरुरुदाहृतः ॥ गाणपे गाणपश्चैव कौलः सर्व्वत्र सद्गुरुः ॥ इति श्रीमहानिर्वाणतन्त्रम् ॥ रोगग्रस्तो यथा वैद्यः पररोगचिकित्सकः । तथा गुरुर्मुमुक्षोर्मे गृहस्थो यं विलम्बनेति श्रीदेवीभागवतम् ॥ विशेषस्तन्त्रसाराद्ज्ञेयः ॥ शिष्येण सद्गुरोर्निन्दादिकं न श्रोतव्यं तत्प्रमाणमाह । गुरोर्यत्र परीवादो निन्दावापि प्रवर्त्तते । कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यत इति ॥ अत्र निन्दापरीवादयोः सदसद्दोषविषयकत्वेन भेदो बोध्यः ॥ द्विमात्रे । दीर्घे ॥ दीर्घस्वरो बिन्दुयुतो विसर्गी संयुक्तपूर्व्वश्च गुरुर्द्विमात्रः । पादान्तगामी तु गुरुर्लघुर्वा वर्णो विकल्पेन गुरुर्नियुक्तः ॥ बृहस्पतौ । सुराचार्य्ये ॥ द्रोणाचार्य्ये ॥ कपिकच्छ्वा

म् ॥ त्रि । गम्भीरार्थे ॥ बलवति ॥ पूज्ये ॥ महति ॥ दुर्ज्जरे ॥ अलघौ ॥ गृणाति उपदिशति धर्मादि । गॄ शब्दे । गिरत्यज्ञानं वा । गॄ निगरणे । कृग्रोरुच्चेति कुः । उश्चान्तादेशः ॥

गुरुक्रमः । पुं । इतिह । पारम्पर्योपदेशे ॥ इति हलायुधः ॥

गुरुगृहम् । न । आचार्यवेश्मनि ॥ धनुर्मीनराश्योः ॥

गुरुघ्नः । पुं । गौरसर्षपे ॥ त्रि । गुरुहन्तरि ॥

गुरुदण्डकः । पुं । तिलमयूरे ॥ इति त्रिकाण्डशेषः ॥

गुरुतरः । त्रि । गरीयसि ॥ सारवत्तरे ॥

गुरुतल्पगः । पुं । विमातृगन्तरि ॥

गुरुता । स्त्री । गुरुत्वे ॥ भावेतल् ॥

गुरुतालः । पुं । तालविशेषे ॥ यथा । एक एव गुरुर्यत्र गुरुतालः स कथ्यते । अपरं नियमं विनेति ॥

गुरुत्वम् । न । महत्त्वे ॥ पतनप्रतियोगिनि गुणे । आद्यपतनासमवायिकारणे । अलघुतायाम् ॥ यथा । अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत् । अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥ तदेवासमवायि स्यात् पतनाख्ये तु कर्मणि ॥ इति भाषापरिच्छेदः ॥ गुरोर्भावः । तस्य भावस्त्वतलाविति त्वः । त्वान्तं क्लीवम् ॥ पिण्डपुष्टौ ॥

गुरुदैवतम् । न । पुष्यनक्षत्रे ॥ त्रि । गुरुतत्परे ॥ गुरुर्दैवतं यस्य ॥

गुरुपत्रम् । न । रङ्गे ॥

गुरुपत्रा । स्त्री । अम्लिकायाम् । तिन्तिडीवृक्षे ॥

गुरुभारिकम् । न । लघुपाके ॥

गुरुमर्द्दलः । पुं । डिण्डिमवाद्ये ॥

गुरुरत्नम् । न । पुष्परागमणौ ॥

गुरुवर्च्चोघ्नः । पुं । निम्बूके । कागदी नींबू इति भाषा ॥

गुरुवर्त्ती । त्रि । गुरुशुश्रूषके ॥

गुरुवासी । पुं । नैष्ठिकब्रह्मचारिणि ॥ अष्टाशीतिसहस्राणां यतीनामूर्द्ध्वरेतसाम् । स्मृतं स्थानन्तु यत्तेषां तदेव गुरुवासिनाम् ॥

गुरुशिंशपा । स्त्री । शिंशपाद्रुमे ॥

गुरुशुश्रूषा । पुं । विद्यादातुःसेवायाम् ॥ यथाह भगवान् । नाहमिज्याप्रजातिभ्यां तपसोपशमेन वा । तुष्येयं सर्वभूतात्मा गुरुशुश्रूषया यथेति ॥

गुरुसारा । पुं । शिंशपायाम् ॥

गुरुस्कन्धः । पुं । श्लेष्मातावृक्षे ॥

गुरुहा । पुं । गुरुघ्ने । नरकीलके ॥

गुरूपदिष्टः । त्रि । शास्त्रीये ॥

गुर्ज्जरः । पुं । देशविशेषे ॥ तद्देशस्थे

पुम्भूमि ॥

गुर्ज्जरी । स्त्री । रागिणीविशेषे ॥ रीतिभेदे ॥ गुर्ज्जरदेशवनितायाम् ॥ वसतिरतिपतिर्गुर्ज्जरीणां कुचेषु ॥

गुर्व्वादित्यः । पुं । योगविशेषे । सूर्य्यजीवयोरेकराशिस्थितौ ॥

गुर्व्विणी । स्त्री । गर्भिण्याम् ॥ गुरुर्दुर्व्वारो लघुर्वा गर्भोऽस्त्यस्याः । व्रीह्यादित्वात् इनिः । संज्ञापूर्व्वकत्वान्नगुणः ॥ यद्वा । गर्व्वति । गर्व्व गतौ । गर्व्वरतउच्चेतीनन् । गौरादित्वान्ङीष् ॥

गुर्व्वी । स्त्री । गुर्व्विण्याम् । गर्भवत्याम् ॥ नहि वन्ध्या विजानाति गुर्व्वीप्रसववेदनाम् ॥ गुरुपत्न्याम् ॥ गुरुत्वयुक्तायाम् ॥

गुलः । पुं । ऐक्षवे । गुडे ॥

गुलञ्चकन्दः । पुं । गुञ्चाम्लकन्दे । निघण्टिकायाम् । कुली इति गौड़भाषा ॥

गुला । स्त्री । सुहीवृक्षे । थूहर् इति भाषा ॥

गुलिका । स्त्री । गुटिकायाम् ॥ गोला इतिभाषाप्रसिद्धे आग्नेयास्त्रप्रक्षेप्यवस्तुनि ॥ गुडयुक्तकुष्माण्डव्यञ्जनविशेषे ॥ एतेन गुडयुक्तेन गोलकुष्माण्डखण्डकान् । रन्धितान् भीरमदिवै दिमान् सुगुलिका विदुः ॥

रोगविशेषे ॥

गुली । स्त्री । गुटिकायाम् ॥ सौंतला इति भाषाप्रसिद्धे रोगे ॥

गुलुच्छः । पुं । गुच्छे । स्तवके ॥ पशुजङ्घायाम् । गुल्छु इति पर्व्वतीयभाषा ॥ गुच्छशब्दार्थेषु । गुत्सो गुच्छो गुलुच्छवदिति द्विरूपकोषात् ॥

गुलुञ्छः । पुं । गुच्छे ॥

गुल्फः । पुं । घुटिकायाम् । पादग्रन्थौ । टकुना इति भाषा ॥ गलति गल्यते वा । गल अदने । कलिगलिभ्यां फगस्योच्चेति फक् प्रत्ययः । अतउत्वञ्च ॥

गुल्मः । पुं । सख्यप्रधानपुरुषाधिष्ठिते रक्षितृपुरुषसमूहे ॥ चिषुसेनामुखेषु ॥ तत्र इभाः ९ रथाः ९ अश्वाः २७ पदातयः ४५ । समुदायेन ९० । एतत्परिमाणविशिष्टा सेना गुल्म इत्यर्थः ॥ सैन्यरक्षणे ॥ छत्रभेदे ॥ रक्षार्थं सैन्यस्थाने ॥ अप्रकाण्डवृक्षे । स्तम्बे । लताप्रतानादौ । तृणसमूहे । एकमूलाः सङ्घातजाताः शरेक्षुप्रभृतयो गुल्माः ॥ प्लीहरोगे ॥ वायुगोला इति प्रसिद्धरोगे ॥ यथा । दुष्टा वातादयोऽत्यर्थं मिथ्याहारविहारतः । कुर्व्वन्ति पञ्चधा गुल्मं कोष्ठान्तर्ग्रन्थिरूपिणम् ॥

तस्य पञ्चविधं स्थानं पार्श्वहृन्नाभिवस्तयः॥ हृन्नाभ्योरन्तरे ग्रन्थिः सञ्चारी यदिवाऽचलः। दृत्तश्चयापचयवान् स गुल्मइतिकीर्त्तितः॥ स व्यस्तैर्जायते दोषैः समस्तैरपिचोच्छ्रितैः। पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरइति॥ गुध्यते ऽस्मात्। भीमादयोपादाने इतिसाधुः॥ यद्वा। गुध्यते गुडतिवा। गुड वेष्टने रक्षणे वा। बाहुलकात् मक्। डलयोरेकत्वञ्च॥

गुल्मकेतुः। पुं। अम्लवेतसे॥

गुल्ममूलम्। न। आर्द्रके॥

गुल्मवल्ली। स्त्री। सोमलतायाम्॥

गुल्मी। त्रि। गुल्मवति। गुल्मविशिष्टे॥

गुल्मिनी। स्त्री। त्रपुषीद्राक्षातामूल्यादिरूपायां प्रतानिन्यां लतायाम्। सशाखलतायाम्। उलपे॥ गुल्मः प्रतानोऽस्त्यस्याः। अतइनिठनाविती निः। ङीप्॥

गुल्मी। स्त्री। आमलक्याम्॥ लवल्याम्॥ एलायाम्॥ वस्त्रवेश्म। पटीकसि॥ वन्याम्॥ गृध्रनखीवृक्षे। गुडकाँ ओाली इतिगौडभाषाप्रसिद्धे॥

गुल्यः। पुं। मधुरे। स्वादौ॥

गुवाकः। पुं। सुपारी इतिप्रसिद्धे वृक्षे। घोराटायाम्। पूगे। क्रमुके॥ गुवन्त्यनेन। गुपुरीषोत्सर्गे। पिनाकादयश्चेति साधुः॥

गुहः। पुं। कार्त्तिकेये। स्कन्दे॥ अश्वे। घोटके॥ शृङ्गवेरपुरवासिनि निषादाधिपतौ श्रीरामसखे॥ गूहति रक्षति सेनाम्। गुहू संवरणे। इगुपधेतिकः॥ विष्णौ॥ गूहते संवृणोति स्वरूपादीनिमाययेतियोगात्॥

गुहषष्ठी। स्त्री। मार्गशीर्षशुक्लषष्ठ्याम्॥

गुहा। स्त्री। सिंहपुच्छीलतायाम्॥ गर्त्ते॥ अकृत्रिमेऽद्रिविवरे। पर्वतान्तरावकाशे। देवखाते। विले। गुफा ड्वार इतिचभाषा॥ कप्रत्ययात्स्त्राप्॥ भिदाद्यङ् वा॥ गूढा अस्यां ज्ञानज्ञेयज्ञातृपदार्थाः इतिव्याख्यानात् विदुषांबुद्धौ॥ हृदये हृदाकाशे॥ अज्ञाने॥

गुहाचरः। त्रि। बुद्धावुपलभ्यमाने॥ गुहायांचरति। चरेष्टः॥

गुहाश्रयः। पुं। मूषिके॥ सिंहादिषु॥ सिंहव्याघ्रवृका ऋक्षतरक्षुद्वीपिनस्तथा। बभ्रुजम्बुकमार्जारा इत्याद्याः स्युर्गुहाश्रयाः॥ गुहाश्रया वातहारा गुरूष्णा मधुराश्च ते। स्निग्धा बल्या हिता नित्यं नेत्रगुह्यविकारि

णाम् ॥ विष्णौ । परमात्मनि ॥ प्रत्यु
त्थानप्रश्रयणाभिवादनं विधीयते सा
धु मिथः सुमध्यमे । प्राज्ञैः परस्मै
पुरुषाय चेतसा गुहाशयायैव न देह
मानिने ॥ गुहायां शेते । शीङ्० ।
अधिकरणे शेतेरित्यच् ॥

गुहाहितः । त्रि । बुद्धिस्थे । गुहायामा
हितः ॥

गुहिलम् । न । धने ॥ वने ॥ गूहति
गूह्यते वा । गुह्० । गुपादिभ्यः किदि
तीलच् ॥

गुहेरः । पुं । गोप्तरि ॥ लौहकारे ॥
गूहति गूह्यते वा । गुह्० । मूलेराद
यश्चेत्येरक् ॥

गुह्यः । पुं । कमठे ॥ दम्भे ॥ परमात्म
नि । विष्णौ ॥ रहस्योपनिषद्वेद्यत्वा
त् गुहायां बुद्धौ हृदयाकाशे वा नि
हितः इति वा गुह्यः । गुहामर्हति
। दण्डादिभ्य इति यत् ॥ न । रहसि ॥
उपस्थे । भगलिङ्गयोः ॥ गुदे ॥ त्रि ।
रहस्ये । गोप्ये । यस्मै कस्मै चिद्वक्त
मनर्हे ॥ निर्जने ॥ गुहानिवासिनि ॥
गूहनम् गुह्यते वा । गुह्० । शंसिदु
हीति क्यप् ॥

गुह्यकः । पुं । देवयोनिविशेषे । कुबे
रनिधिरक्षके मणिभद्रादौ ॥ गूह
ति निधिं रक्षति । गुह्० । ण्वुल् ।
पृषोदरादित्वात् यगागमः ॥ निधिं रक्ष
न्ति ये यक्षास्ते स्युर्गुह्यकाः स्मृताः इति
व्याडिः ॥ यद्वा । गुह्यं कुत्सितं कायति
। कै शब्दे । आत इति कः ॥ गुह्यं गोपनी
यं कं सुखं यस्य इति वा । अनयोः पक्ष
योः शंसिदुहि गुहिभ्यो वेति काशिको
क्तेः क्यप् ॥ गूंभा इति प्रसिद्धे पक्वान्ने ।
तस्य प्रकारः । समितां सर्पिषा भृष्टां
सिताद्राक्षादिसम्भृताम् । एलालवङ्ग
कर्पूरमरीचपरिवासिताम् ॥ क्षिप्
त्वान्यसमितालम्बपुटे वेष्टयेत् पुन
श्चेत् । ततः खण्डे न्यसेत् पक्के गुह्य
कोऽयमुदाहृतः ॥ गुह्यको बृंहणो
हृद्यो हृष्यः पित्तानिलापहः । मधु
रोऽतिगुरुः पाके किञ्चित् सन्धान
कृत्सरः ॥

गुह्यकलोकः । पुं । पिशाचलोकादुप
रि गन्धर्वलोकादधो वर्त्तमाने भुवने ॥

गुह्यकाली । स्त्री । देवीविशेषे ॥ ने
पालस्थे तत्स्थाने ॥

गुह्यकेश्वरः । पुं । मनुष्यधर्मणि । कुबे
रे ॥ गुह्यं कायन्तीति गुह्यकाः । तेषा
मीश्वरः ॥

गुह्यगुरुः । पुं । शिवे ॥

गुह्यदीपकः । पुं । खद्योते ॥

गुह्यनिष्यन्दः । पुं । मूत्रे ॥

गुह्यपुष्पः । पुं । अश्वत्थवृक्षे ॥

गुह्यभाषितम्। नं। मन्त्रे॥ गुप्तवाक्ये॥ गुह्यञ्चतत् भाषितञ्च॥

गुह्यबीजः। पुं। भूतृणे॥

गुह्याष्टकम्। न। मारभूत्यादिषु॥ ते च यथा। मारभूत्याषाढिडिण्डिकाला कुल्यमरपुष्कराः। प्रभासनैमिषौ चेतिगुह्याष्टकमिदंजले॥ इति ब्रह्मेन्द्रसंहिता॥

गूः। स्त्री। मले। विष्ठायाम्॥ गच्छति। गम्लृ॰। क्विप्। ऊङ्गमादीनामिति वार्त्तिकेन मलोपोऽकारस्य ऊङादेशः॥

गूढम्। न। रहसि॥ गुह्ये॥ त्रि। अप्रकटे। गुप्ते। संवृते॥ गहने। दुर्विवेचने॥ गुह्यते स्म। गुहू॰। क्तः। यस्यविभाषेतीडभावः॥

गूढजः। पुं। गूढोत्पन्नपुत्रे॥

गूढनीडः। पुं। खञ्जनखगे॥

गूढपत्रः। पुं। करीरे॥ अङ्कोठे॥

गूढपथः। पुं। अन्तःकरणे॥ गुप्तवर्त्मनि॥

गूढपात्। पुं। सर्पे॥ गूढाः पादा अस्य। पृषोदरादिः॥ यद्वा। गूढं पादयति। पदगतौ। णयन्तात् क्विप्॥

गूढपादः। पुं। सर्पे॥ गूढाः संवृताः पादा अस्य। पादाः सर्प विशेषे द्वे शते द्वे च विंशती इत्यागमः॥

गूढपुरुषः। पुं। प्रणिधौ। राज्ञाञ्चरे॥ गूढश्चासौ पुरुषश्च॥

गूढपुष्पकः। पुं। बकुलपादपे॥

गूढफलः। पुं। बदरे॥

गूढमार्गः। पुं। भूमध्यमार्गे। सुरङ्गायाम्। सुरङ्ग इति भाषा॥ गूढश्चासौमार्गश्च॥

गूढमैथुनः। पुं। काके॥ गूढं मैथुनमस्य॥

गूढवर्चाः। पुं। दर्दुरे॥ गूढं वर्चोऽस्य॥

गूढमल्लिका। स्त्री। अङ्कोठवृक्षे॥

गूढसाक्षी। त्रि। योऽर्थिना गूढतया प्रत्यर्थिवचनं श्रावितः सः॥ तथाच नारदः। अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम्। यः श्राव्यते तदा गूढो गूढसाक्षी स उच्यते। इति॥

गूढाङ्गः। पुं। कच्छपे॥

गूढाङ्घ्रिः। पुं। सर्पे॥

गूढोत्पन्नः। पुं। पुत्रविशेषे॥ यथा। उत्पद्यते गृहे यस्य नच ज्ञायेत कस्य सः। सगृहे गूढउत्पन्नस्तस्य स्याद्यस्यतल्पजः॥

गूथ। पुं। न। मले। शकृति॥ गूयते। गु ङ शब्दे गुपुरीषोत्सर्गेवा। तिथपृष्ठगूथेतिसाधुः॥

गूथमत्कः। पुं। शरभक्षे। क्षुद्रचूडे। गुबे सालिक इति गौडभाषाप्रसि

ढे खगे ॥

गूनः । त्रि । कृतपुरीषोत्सर्गे । हन्ने ॥ गूयते स्म । गु० । क्तः । दुग्वोर्दीर्घश्चेति नत्वम् ॥

गूरणम् । न । उद्यमे ॥

गूवाकः । पुं । क्रमुके । गुवाके ॥ गुवन्त्यनेन । गु० । पिना० साधुः ॥

गूषणा । स्त्री । मेचके । मयूरपिच्छचक्र ॥

गृञ्जनः । पुं । लसुन इति प्रसिद्धे रसोनके ॥ रक्तलशुने ॥ इतिराजनिर्घण्टः ॥ न । विषदिग्धपशोर्मांसे ॥ सालगम इति प्रसिद्धे कन्दे । शिखिमूले । वर्त्तुले । यवनेष्टे ॥ गृञ्जनः पित्तजो ग्राही तीक्ष्णोष्णो रोगनाशनः । गन्धाकृतिरसैस्तुल्यः सूक्ष्मनालः पलाण्डुना ॥ गृञ्ज्यते भक्ष्यत्वेन कथ्यते रोगेषु । गृजि शब्दे । कर्मणि ल्युट् ॥

गृखडीवः । पुं । लोपाके । पृथुशृगाले । बड़ा मोटा सिआल इतिभाषा ॥ इतिहेमचन्द्रः ॥

गृत्सः । पुं । कन्दर्पे ॥ गृध्यति । गृधु अभिकाङ्क्षायाम् । गृधिपण्योर्दकौ चेति सः । धातोर्दन्तादेशः ॥

गृत्समदः । पुं । ऋषिविशेषे ॥

गृधिः । स्त्री । महदभिलाषे ॥

गृधुः । पुं । कामदेवे ॥ गृध्यति । गृधु० । पृभिदिव्यधिगृधिधृषिभ्य-ति कुः ॥

गृध्नुः । त्रि । लुब्धे ॥ गर्द्धनशीलः । गृधु० । त्रसिगृधिधृषिक्षिपेः क्नुः । नेड्वशि कृतीतीट्निषेधः ॥

गृध्नुता । स्त्री । लुब्धत्वे । रागे । सङ्गे ॥

गृध्रः । पुं । दाक्षाय्ये । वज्रतुण्डे । परमांसभक्षणाभिकाङ्क्षिणि खगे । गीध इति भाषा ॥ आसन्नमृत्योर्निचरन्ति गृध्रादयो मूर्ध्नि गृहोर्द्धभागे ॥ त्रि । लुब्धके ॥ गृध्यति । गृधु० । सुसूधागृधिभ्यः क्रन् ॥

गृध्रकूटः । पुं । मगधदेशस्य सीमाशैले ॥

गृध्रनखी । स्त्री । कोलिवृक्षे । बदर्याम् ॥ कालियाकड़ा इति गौड़भाषाप्रसिद्धे कुलिकवृक्षे ॥ हिंस्रायाम् । हींस इति भाषाप्रसिद्धे वृक्षे ॥

गृध्रपत्रा । स्त्री । धूम्रपत्रावृक्षे ॥

गृध्रराजः । पुं । जटायुपक्षिणि ॥

गृध्रसी । स्त्री । ऊरुसन्धौ । वातरोगविशेषे ॥ ल० यथा । स्फिक्पायूरुकटिपृष्ठजानुजङ्घापदं क्रमात् । गृध्रसी स्तम्भरुक्तोदैर्गृह्णाति स्पन्दते मुहुः ॥ वाताद्वातकफात्तन्द्रागौरवारोचकान्विता । इति ॥ गृध्रमपि स्यति । षोऽन्तकर्मणि । आतश्चि कः । गौरा-

दित्वान्ङीष् ॥

गृष्टिः । स्त्री । सकृत्प्रसूतायां गवि ॥ वराहक्रान्तायाम् ॥ बदरायामोषधौ ॥ काश्मर्याम् ॥ गृह्णाति । ग्रह उपादाने । क्तिच् । पृषोदरादिः ॥ सकृत्प्रसूतायाम् ॥ अतएव गृष्ट्याश्च तुष्याश्चेपि गृष्ट्यादिभ्यश्चेत्यत्र पुनर्ग्रहणंकृतम् ॥

गृहम् । न । इष्टकादिरचिते वासस्थाने । गेहे । उदवसिते । वेश्मनि । घर इति भाषा ॥ गृह्णाति धान्यादिकम् । ग्रह० । गेहेकः ॥ यद्वा । गृह्यते । गर्हते । इगुपधेतिकः ॥ कलत्रे । भार्यायाम् । दारपरिग्रहलक्षणे श्रौतस्मार्त्तयोरन्यतराग्निनिषेविते सर्वकर्मसम्पादके त्रिवर्गकारणे ॥ न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते । तया हि सहितः सर्वान् पुरुषार्थान् समश्नुते ॥ नामनि ॥ भवने । राशौ ॥ चतुर्थभवने ॥ गृह्णाति पुरुषं यस्माद्गृहं तेन प्रकीर्त्तितम् ॥ अत्राहव्यासः । न गृहं बन्धनागारं बन्धनेन च कारणम् । मनसा यो विनिर्मुक्तो गृहस्थोऽपि विमुच्यत इति ॥ नहि जडं गृहं पुरुषं बध्नाति नचान्यद्बन्धने कारणमस्ति किन्तु मनस आसक्तिमात्रं कारणं तां विहाय संसारं कुर्वाणो मुच्यत एवेत्यर्थः ॥

गृहाः । पुंभूम्नि । कलत्रे । दारेषु ॥ तात्स्थ्यात् । भवतिहि तात्स्थ्यात्ताच्छब्द्यम् । मञ्चाः क्रोशन्तीत्यादौ मञ्चशब्देन पुरुषाअपिव्यपदिश्यन्ते । एवञ्च गृहशब्दो वेश्मनि मुख्यो दारेषुत्वौपचारिकः । अत्रेदमवधेयम् । गृहशब्दोयमर्द्धर्चादित्वादुभयलिङ्गः । तत्र नपुंसकलिङ्गोऽभिधेयवचनः । पुंल्लिङ्गस्तु बहुवचनान्तएवेति ॥

गृहकच्छपः । पुं । पेषणशिलायाम् ॥

गृहकन्या । स्त्री । घृतकुमार्य्याम् ॥

गृहकपोतः । पुं । प्रासादकुक्कुटे । भिल्लीकण्ठे । पारावते ॥

गृहकर्त्ता । पुं । धूसरेऽतिसूक्ष्मेचटके । धान्यभक्षणे ॥

गृहकारकः । पुं । घरामी राज इतिच प्रसिद्धे वर्णसङ्करजातिविशेषे ॥ यथा । प्रतिमाघटकादेव कन्यायां नापितस्यच । सूत्रकारस्य सम्भूतिः सोपानगृहकारकः इति पराशरपद्धतिः ॥

गृहकारी । पुं । कुम्हारी इतिभाषाप्रसिद्धकीटे ॥

गृहकूलकः । पुं । पिचिण्डाख्यशाके ॥

गृहगोधा । स्त्री । विश्वम्भरायाम् । प-

ल्लिकायाम्। छिपकली बिस्तुइया इति भाषा॥

गृहगोधिका। स्त्री। मुषल्याम्। गृहगोधायाम्॥ अल्पा गोधा। अल्पार्थे कन्। गृहस्य गोधिका॥

गृहगोलिका। स्त्री। पल्ल्याम्॥

गृहजातः। पुं। दास्यामुत्पन्ने दासविशेषे॥

गृहणी। स्त्री। काञ्जिके॥

गृहतटी। स्त्री। वीथ्याम्॥ इतिहारावली॥

गृहद्रुमः। पुं। मेषशृङ्गीवृक्षे॥

गृहधूपः। पुं। गेहधूपे॥

गृहनाशनः। पुं। वनकपोते। चित्रकण्ठे। घुघुती पिण्डुकिया इति च भाषा॥

गृहनीडः। पुं। चटके॥

गृहपङ्क्तिः। स्त्री। रक्षकजनावासपङ्क्तौ। जिसे अबवारिक कहते॥

गृहपतिः। पुं। गृहस्थे॥ सत्त्रिणि। सदान्नदानकर्त्तरि गृहस्थे॥ मन्त्रविशेषे॥ धर्मे॥ गृहस्य पतिः॥ स्त्री। गृहपत्न्याम्॥ विभाषा सपूर्वस्येति पाक्षिको नत्वाभावः॥

गृहपालः। पुं। शुनि॥ गृहं पालयति। पालरक्षणे। कर्मण्यण्॥

गृहपोतकः। पुं। वास्तौ। हवेली घर इति च भाषा॥ इति शब्दरत्नावली॥

गृहप्रवेशः। पुं। गृहाभ्यन्तर्गमने॥

गृहबभ्रुः। पुं। गेहनकुले॥

गृहबलिप्रियः। पुं। बकपक्षिणि॥

गृहबलिभुक्। पुं। चटके॥ काके॥ बके॥

गृहभूमिः। स्त्री। वास्तौ। वेश्मभुवि॥

गृहमणिः। पुं। दीपे॥

गृहमाचिका। स्त्री। चर्मचट्याम्। अजिनपत्रायाम्। चामचिरय्या इति भाषा॥

गृहमृगः। पुं। कुक्कुरे॥

गृहमेधी। पुं। कृतदारपरिग्रहे। गृहस्थे॥ गृहैर्दारैर्मेधते सङ्गच्छते। मेधृ सङ्गमे च। सुप्यजातौ णिनिः॥

गृहमेधिनी। स्त्री। साक्षिक्यां बुद्धौ॥ गृहस्थपत्न्याम्॥

गृहमेधीयम्। न। गृहमेध्ये॥ गृहमेधो देवतास्य। द्यावापृथिवीतिछः॥

गृहमेधीयः। पुं। गृहाश्रमविहितकर्मादौ॥

गृहमेध्यम्। न। गृहमेधीये॥ गृहमेधो देवतास्य। द्यावापृथिवीतियत्॥

गृहयाय्यः। पुं। गृहस्वामिनि॥ गृहयते। गृहग्रहणे। श्रुदक्षिस्पृहिगृहिभ्य आय्यः॥

गृहयालुः । पुं । ग्रहीतरि । ग्रहणशीले ॥ गृह्यते तच्छीलः । गृह० च० । स्पृहिगृहिपतीत्यालुच् । अयामन्तेति णेरयादेशः ॥

गृहवाटिका । स्त्री । गृहान्तिककृतारामे ॥

गृहसंवेशकः । पुं । गृहसन्निवेशोपदेशके । वास्तुविद्योपजीविनि ॥

गृहस्थः । पुं । गृहिणि । गृहपतौ । ज्येष्ठाश्रमिणि । द्वितीयाश्रमिणि ॥ न्यायार्जितधन स्तत्त्व ज्ञाननिष्ठोऽतिथिप्रियः । श्राद्धकृत् सत्यवादी च गृहस्थोऽपि विमुच्यते ॥ गृहशब्दस्य दारवचनत्वात् कृतदारपरिग्रहो गृहस्थः । गृहे तिष्ठति । ष्ठा० । सुपि स्थ इति कः ॥

गृहस्थूणम् । न । गृहस्तम्भे ॥ गृहस्य स्थूणा ॥

गृहाक्षः । पुं । वातायने ॥

गृहागतः । पुं । अतिथौ ॥ त्रि । गेहमायाते ॥

गृहाधिपः । पुं । गृहस्थे ॥

गृहाम्लम् । न । काञ्जिके ॥

गृहायनिकः । पुं । गृहिणि ॥

गृहारामः । पुं । निष्कुटे । गृहोपवने ॥ गृहस्य आरामः ॥

गृहालिका । स्त्री । शकुनश्चायाम् गृहगोधिकायाम् ॥

गृहावग्रहणी । स्त्री । देहल्याम् ॥ गृहमवगृह्यतेऽनया । ग्रह उपादाने । करणे ल्युट् ॥

गृहाशया । स्त्री । ताम्बूल्याम् । नागवल्ल्याम् । पानकी बेल इति भाषा ॥

गृहाश्मा । पुं । पेषणशिलायाम् । सिल इति भाषा ॥

गृहासक्तः । पुं । गृह्यके ॥ त्रि । गृहे आसक्तिविशिष्टे ॥

गृहिणी । स्त्री । भार्यायाम् ॥ इनिर्मत्वर्थीयः । ङीप् । गेहकर्मकुशलायाम् ॥

गृही । पुं । गृहस्थे ॥ गृहाः दाराः सन्त्यस्य । इनिः ॥

गृहीतः । त्रि । स्वीकृते ॥ ज्ञाते ॥ प्राप्ते ॥ धृते ॥ गृहीत इव केशेषु मृत्युना धर्म माचरेत् ॥

गृहीतदिक् । त्रि । पलायिते । तिरोहिते ॥

गृहीतिः । स्त्री । ग्रहणे ॥

गृहीती । स्त्री । गृहीतवति ॥ गृहीतमनेन । इष्टादिभ्यश्चेति कर्त्तरि इनिः ॥

गृहेनर्दी । पुं । गेहेशूरे ॥

गृहेशः । पुं । गृहपतौ ॥

गृहोलिका । स्त्री । पल्ल्याम् ॥

गृह्यः । पुं । गृहासक्तमृगपक्षिणोः ॥ गृह्यते । गृह० । पदास्वैरीतिक्यप् ॥ न । मलवर्त्मनि । गुदे ॥ ग्रन्थप्रभेदे । गृह्यसूत्रे ॥ त्रि । अस्वैरिणि ॥ पक्षे ॥ गृह० । ऋदुपधाच्चाक्लृपिचृतेरितिक्यप् ॥ गृहे भवो वा । यत् ॥

गृह्यकः । पुं । छेके । गृहासक्तपक्षिमृगयोः ॥ त्रि । निघ्ने । आयत्ते ॥ क्यवन्तात् स्वार्थेऽनुकम्पायां वा कन् ॥

गृह्या । स्त्री । शाखापुरे । इतिमेदिनी । टाप् ॥

गेन्दुः । पुं । ⎫ कन्दुके । गेंद इति भा
गेन्दुकः । पुं । ⎬ षा ॥ गे गगने इन्दुरिव
गेन्दूकः । पुं । ⎭ ॥ गे इन्दुरिव प्रतिकृतिर्वा । इवे प्रतिकृताविति कन् ॥ पृषोदरादित्वाद्दीर्घः ॥

गेयम् । न । गीते ॥ यथा । गेयं गीतानामसहस्रम् ॥ त्रि । गातव्ये ॥ गायने ॥ अर्हे कृत्यतृचश्चेति योग्यतायामचो यत् । ईद्यति । गुणः ॥ गायति । गै शब्दे । भव्यगेयेति कर्त्तरि वा यत् । गीयते इति वा ॥

गेष्णः । पुं । पर्वणि ॥

गेष्णुः । पुं । गायने ॥ नटे ॥ गायति । गै० । गादाभ्यामिष्णुच् ॥ सामगानकर्त्तरि ॥

गेहम् । न । उदवसिते । गृहे ॥ गेन गणेशेन ईह्यते काम्यते । ईह० । कर्मणि घञ् ॥ गो गणेशो गन्धर्वो वा ईहः ईप्सितो यस्मिन् वा ॥

गेहधूपः । पुं । अपराजितधूपे ॥ यथा । मयूरपिच्छं निम्बस्य पत्राणि बृहतीफलम् । मरिचं हिङ्गु मांसी च बीजं कर्पाससम्भवम् ॥ छागरोमाऽहिनिर्मोको विष्ठा वैडालिकी तथा । गजदन्तश्च तच्चूर्णं किञ्चिद्घृतविमिश्रितम् ॥ गेहेषु धूपनं दत्तं सर्वान् बालग्रहान् जयेत् । पिशाचान् राक्षसान् हत्वा सर्वज्वरहरं भवेदिति ॥

गेही । पुं । गृहिणि ॥

गेहेनर्द्दी । पुं । कापुरुषे । पिण्डीशूरे ॥

गेहेशूरः । पुं । गेहेनर्द्दिनि ॥ इति हेमचन्द्रः ॥

गैरिकम् । न । रक्तधातौ । गेरु इति भाषा ॥ गैरिकं रक्तधातुश्च गैरेयं गिरिजं तथा । सुवर्णगैरिकं त्वन्यत् ततो रक्ततरं हि तत् ॥ गैरिकद्वितयं स्निग्धं मधुरं तुवरं हिमम् । चक्षुष्यं दाहपित्तास्रकफहिक्काविषापहम् ॥ स्वर्णे ॥ गिरौ भवम् ॥ अध्यात्मादित्वाट्ठञ् ॥

गैरिकाक्षः । पुं । जलमधूकवृक्षे ॥

गैरी । स्त्री । लाङ्गलिकीवृक्षे ॥

गैरेयम् । न । शिलाजतुनि ॥ गिरौ भ

वम् । नद्यादिभ्यश्चेतिढक् ॥

गौः । पुं । बलीवर्द्दे । अनडुहि ॥ स्वर्गे । रश्मौ ॥ कुलिशे । वज्रे ॥ चन्द्रे ॥ सूर्ये ॥ गोमेधयज्ञे ॥ ऋषभनामौषधे ॥ स्त्री । सौरभेय्याम् । अर्जुन्याम् । उस्रायाम् ॥ गोमांसं गुरु सुस्निग्धं पित्तश्लेष्मविवर्द्धनम् । वृंहणं वातहृद्बल्य मपथ्यं पीनसप्रणुत् ॥ चक्षुषि ॥ वाणे ॥ दिशि ॥ मातरि ॥ वाचि ॥ भूमौ ॥ वृषराशौ ॥ नवाङ्के ॥ गच्छति गम्यते वा ऽनेन वा । गम्लृ० । गमेर्डोः ॥

गावः । पुंभूम्नि । उदके । जले ॥

गोकण्टकः । पुं । गोक्षुरके ॥ स्थपुटे । विषमोन्नते ॥ गोखुरैः स्थपुटीकृते इति हेमचन्द्रः ॥ गवां खुरे ॥ विकण्टकवृक्षे ॥ गोर्धेनोः पृथिव्या वा कण्टकः ॥

गोकर्णः । पुं । अश्वतरे ॥ सर्पे ॥ गौः कर्णोयस्य । गोशब्दस्य चक्षुःपरत्वात् गोकर्णःसर्पः ॥ सारङ्गे । मृगविशेषे ॥ गोरिवकर्णावस्य ॥ गणदेवताविशेषे ॥ अङ्गुष्ठानामिकोन्माने । अनामिकायुक्तविस्तृताङ्गुष्ठे ॥ गोः कर्णइव ॥ शैवे सिद्धक्षेत्रविशेषे ॥ यथा । महाबलश्च गोकर्णे शिवभद्राचर्चाण्डकेत्यागमः । गोकर्णे भद्रकर्णीत्यादितिन्देवीगीता ॥

गोकर्णी । स्त्री । मूर्वालतायाम् ॥ गोः कर्णइव । गौः कर्णोयस्या वा । पाककर्णेतिङीष् ॥

गोकिराटिका । स्त्री । विट्सारिकायाम् ॥

गोकिराटी । स्त्री । सारिकाख्यखगे ॥

गोकिलः । पुं । मुसले ॥ हले ॥

गोकीलः । पुं । मुषले ॥ लाङ्गले ॥

गोकुलम् । न । गोसमूहे । गोधने ॥ गोस्थाने ॥ यथा । गोकुले कन्दुशालायां तैलयन्त्रेक्षुयन्त्रयोः । अमीमांस्यानि शौचानि स्त्रीषुबालातुरेषु च ॥ व्रजेप्रासङ्गेमन्त्रावासे ॥ गवां कुलम् ॥

गोकुलिकः । पुं । कैकरे । बधिरे ॥ पङ्कस्थगव्युपेक्षके ॥

गोकृतम् । न । गोमये ॥ त्रि । गोभिरा चरिते ॥

गोक्षुरः । पुं । गोक्षुरके ॥ गोक्षुरः शीतलः स्वादुर्बलकृद्बस्तिशोधनः । मधुरो दीपनो वृष्यः पुष्टिदश्चाश्मरीहरः ॥ प्रमेहश्वासकासार्शः कृच्छ्रहृद्रोगवातनुत् ॥ क्षुरति । क्षुर विलेखने । इगुपधज्ञाप्रीकिरः कः । गोर्गवांक्षुरः ॥

गोक्षुरकः । पुं । गोक्षुर इतिभाषाप्र

सिद्धार्थापलक्षणायाम् । स्वार्थेकपट्के ॥ गौर्गोर्वा खुरः ॥ स्वार्थेकन् ॥

गोखुरः । पुं । गोक्षुरे ॥ न । गवांशफे ॥

गोगोयुगम् । न । गोद्वये ॥ द्वौगावौ । द्विस्वेगोयुगच् ॥

गोगोष्ठम् । न । गवांस्थाने ॥ गोष्ठजादयः स्थानादिषु पशुनामभ्यः ॥

गोग्रन्थिः । पुं । करीषे ॥ गोष्ठे ॥ गोजिह्विकौषधौ ॥

गोघृतम् । न । गव्येघृते ॥ वर्षणे ॥

गोघ्नः । पुं । अतिथौ ॥ त्रि । गोघातके ॥

गोचरः । पुं । इन्द्रियार्थे । रूपशब्दगन्धरसस्पर्शस्वरूपे ॥ प्रयुज्यतेहि । उपादानगोचरं ज्ञानमिति ॥ देशे । गवांअधिस्थाने । वने ॥ तथाचभारविः । उपारताः पश्चिमरात्रिगोचरादिति ॥ जन्मराश्यवधिग्रहचक्रान्तरराशिषु ॥ गावइन्द्रियाणि चरन्त्यस्मिन् । गोचरसञ्चरेतिनिपातितः ॥ त्रि । गोगामिनि ॥

गोचरफलम् । न । जन्मराशेः सकाशात् ग्रहाणां सञ्चारवशेन शुभाशुभफले ॥ गोचरशुद्धिर्यथा । केतूपप्लवभौमभानुतनयः षष्ठत्रिसंस्थाः शुभा श्चन्द्राकीवपि तेच तौच दशमौ चन्द्रः पुनः सप्तमः । जीवः सप्तमवद्विप-

ञ्चमगतो युग्मेषु सोमात्मजः शुक्रः षष्ठदशसप्तवर्ज्जमितरे सर्वेप्युपान्ते शुभा इति ॥

गोचर्म्म । न । गोस्त्वचि ॥ परिमाणविशेषे ॥ सप्तहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्त्तनम् । दशतान्येव गोचर्म्म दत्त्वा स्वर्गे महीयतइति बृहस्पतिः ॥ यत् किञ्चित् कुरुते पापं ज्ञानतोऽज्ञानतोऽपिवा । अपि गोचर्ममात्रेण भूमिदानेन शुद्ध्यतीत्याचारे मिताक्षरा ॥

गोची । स्त्री । हिमालयपत्न्याम् ॥ गावः श्रुतिरूपाः श्रुतिस्मृतीतिहासपुराणादिसम्बन्धिनी महादेवविषयिणी वाचः अञ्चति पूजयति यद्वा गच्छति प्राप्नोति तात्पर्यरूपेण शृणोति । अञ्चु० । क्विप् । ङीप् ॥

गोच्छालः । पुं । भूकदम्बे । कौकशिमा इति गौडभाषा ॥

गोजरः । पुं । वृद्धबलीवर्द्दे ॥

गोजलम् । न । गोमूत्रे ॥

गोजा । स्त्री । गोलोमिकायाम् ॥ पृथिव्यां व्रीहियवादिरूपेणोत्पन्नायाम् ॥ गोषु जायते । जनी० । जनसनेति विट् । विड्वनोरित्यात्वम् ॥

गोजागरिकः । पुं । भक्ष्यकारके ॥ न । मङ्गले ॥

गोजापर्णी । स्त्री । क्षुद्रक्षुपविशेषे । दुग्धफेनीवृक्षे । शणकेतुघ्न्याम् ॥

गोजिह्वा । स्त्री । दार्विकायाम् । गोजियालता दारियाशाक इति च गौडभाषा ॥ गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत् । हृद्याप्रमेहकासास्रव्रणज्वरहरी लघुः ॥ कोमला तुवरा तिक्ता स्वादुपाकरसा- स्मृता ॥ पत्रशाकस्य तु गुणाः । गोजिह्वा कुष्ठमेहास्रकृच्छ्रज्वरहरी लघुः ॥ गोर्जिह्वेव ॥

गोजिह्विका । स्त्री । गोजिह्वालतायाम् ॥ गोजिह्वेव । कन् ॥

गोडिम्ब: । पुं । शृगालजम्ब्वाम् ॥

गोडुम्ब: । पुं । शीर्णवृन्ते । तरमूज इ- ति भाषा ॥

गोडुम्बा । स्त्री । गवादन्याम् । चित्राख्यकर्कव्याम् । गोमुक इति गौडभाषा ॥ गां भुवं तुम्बति । तुबि अर्द्दने । मूलक: । पृषोदरादि: ॥

गोडुम्बिका । स्त्री । गोडुम्बायाम् ॥

गोणी । स्त्री । धान्याधारे गूण इतिभाषाप्रसिद्धे आवपने ॥ गोणशब्दादावपनेऽर्थे जानपदकुण्डगोणेति ङीष् ॥ छिद्रवस्त्रे । शाण्याम् ॥ धान्यमानभेदे ॥ द्विशूर्पा गोण्युदाहृता तामेव भारं जानीयादित्युक्त: ॥ द्रोणीपरिमाणमिति वैद्यकपरिभाषा ॥

गोणीतरी । स्त्री । ह्रस्वगोण्याम् ॥ ह्रस्वा गोणी । काल्गोणीभ्यां ष्टरच् । षित्त्वात् ङीष् ॥

गोण्ड: । पुं । पामरजातौ ॥ वृद्धनाभौ । नाभिगुडके ॥ त्रि । दृढनाभिमति ॥ गो: अण्ड इव ॥

गोतम: । पुं । ब्रह्मण: पुत्रे गौतममुनौ ॥

गोतमान्वय: । पुं । शाक्यमुनौ ॥

गोतीर्थम् । न । गोष्ठे ॥

गोत्र: । पुं । अद्रौ । पर्वते ॥ न । आख्यायाम् । नामनि ॥ सम्भावनीयबोधे ॥ कानने ॥ क्षेत्रे ॥ वर्त्मनि ॥ छत्रे ॥ सजातीयगणे ॥ पूर्वाचार्याणां मतेनाऽपत्ये ॥ कुले । अभिजने । ऋषिशब्दवाच्ये आदिपुरुषे स्वसन्तानसंज्ञाकारिणि ब्राह्मणरूपे ॥ क्षत्रियवैश्ययो रुपदिष्टातिदिष्टगोत्रम् । शूद्रस्यातिदिष्टातिदिष्टगोत्रम् । यथा । न समानगोत्रां भार्यां विन्देतेत्यनेन शूद्रस्यापि सगोत्रा कथं न निषिध्यते इतिचेत् अत्रोपदिष्टातिदिष्टगोत्रस्यैव निषेधो नत्वतिदिष्टातिदिष्टशूद्रगोत्रादेरिति निर्णय: ॥ क्षत्रियवैश्यशूद्राणामतिदिष्टातिदिष्टगोत्रप्रवरम् अतएवैतेषां पुरोहितगोत्रप्रवरमित्यर्थ: । तथाचाग्निपुराणे

वर्णसङ्करोपाख्याने । क्षत्रियवैश्यशूद्राणां गोत्रञ्च प्रवरादिकम् । तथान्यवर्णसङ्कराणां येषां विप्राश्च याजकाः इति ॥ गोत्राणि तु चतुर्विंशतिः । तथाच मनुः । शाण्डिल्यः काश्यपश्चैव वात्स्यः सावर्णिकस्तथा । भरद्वाजो गौतमश्च सौकालीनस्तथापरः ॥ कल्किषश्चाग्निवेश्यश्च कृष्णात्रेयवशिष्ठकौ । विश्वामित्रः कुशिकश्च कौशिकश्चेतथापरः ॥ घृतकौशिकमौद्गल्यौ आलम्यानः पराशरः । सौपायनस्तथाऽत्रिश्च वासुकी रोहितस्तथा । वैयाघ्रपद्यकश्चैव जामदग्न्यस्तथापरः । चतुर्विंशति गोत्राणां कथिताः पूर्वपण्डितैः ॥ अपिच मनुः । जमदग्निर्भरद्वाजो विश्वामित्रात्रिगौतमाः । वशिष्ठकाश्यपागस्त्या मुनयो गोत्रकारिणः ॥ एतेषां यान्यपत्यानि तानिगोत्राणिमन्वते । एतदुपलक्षणमन्येषामपि दर्शनात् । तथाच । सौकालीनकमौद्गल्यौ पराशरबृहस्पती । काश्चनोविष्णुकौशिक्यौ कात्यायनात्रेयकाणवकाः ॥ कृष्णात्रेयः साङ्कृतिश्च कौण्डिन्यो गर्गसंज्ञकः । आङ्गिरसइति ख्यातः चनाह्वकाख्यसंज्ञितः ॥ अथ जैमिनिरुद्दालाख्याः शाण्डिल्यो वात्स्य

एवच । सावर्णालम्यानवैयाघ्रपद्याश्च घृतकौशिकः ॥ शक्तिः कात्यायनश्चैव वासुकी गौतमस्तथा । शुनकः सौपायनश्च मुनयो गोत्रकारिणः ॥ एतेषां यान्यपत्यानि तानि गोत्राणि मन्वते । सर्वे द्विचत्वारिंशद्गोत्राः ॥ इतिधनञ्जयकृतधर्मप्रदीपः ॥ गूयते शब्द्यते स्वसन्तानप्रभवोऽनेन । गुङ् शब्दे । ष्ट्रन् । गुधृवीपचीत्यादिनात्रो वा ॥ गां त्रायते वा । त्रैङ् पालने । आतोऽनुपसर्गे इति कः ॥

गोत्रजः । त्रि । गोत्रोत्पन्ने ॥ स तु जन्मनामस्मृतिपर्यन्तसमानोदकभावात् पश्चाद्भवति ॥

गोत्रभिद् । पुं । इन्द्रे । शक्रे ॥ गोत्रान् गिरीन् भिनत्ति । भिदिर् ० । सत्सूद्विषेति भिदेः क्विप् ॥

गोत्रवृक्षः । पुं । धन्वनवृक्षे ॥

गोत्रसंप्लवः । पुं । पक्षिविशेषे ॥

गोत्रस्खलनम् । न । अन्यस्त्रीनामग्रहणे ॥ यथा । गोत्रस्खलने भ्रान्तिं मानिनि जानीहि केवलां मेऽत्र । व्याख्यानतो विशेषप्रतिपत्तिः पाणिनीयसूत्रेवेति ॥

गोत्रा । स्त्री । कै । पृथिव्याम् ॥ गोत्राः शैलाः सन्त्यस्याम् । अर्श आद्यच् ॥ गाः जलानि त्रायते वा । त्रैङ् ० । कः ।

टाप् ॥ गव्यायाम् । गवांगणे ॥ गवां समूहः । इनित्रकट्यचश्चेति चः ॥

गोदः । पुं । मस्तिष्के ॥ चि । गोप्रदे ॥ गां ददाति । दुदाञ्० । आतइतिकः ॥

गोदन्तम् । न । नटमण्डने । हरिताले ॥ पुं । गोर्दन्ते ॥

गोदा । स्त्री । गोदावर्य्यां नद्याम् ॥

गोदानम् । न । व्रतविशेषे । केशान्ते ॥ गावः केशाः दीयन्ते खण्ड्यंते ऽस्मिन् । दुदाञ्० । कर्मणि ल्युट् ॥

गोदारणम् । न । हले ॥ कुद्दाले ॥ गां भूमिं दारयति । दृविदारणे । ल्युट् ॥ गौ भूमिर्दार्य्यते ऽनेन । करणेल्युड्वा ॥

गोदावरी । स्त्री । नदीविशेषे । गौतमसम्भवायाम् । ब्रह्माद्रिजातायाम् ॥

गोदुग्धम् । न । गोः क्षीरे ॥ अस्यगुणाः । गव्यं दुग्धं विशेषेण मधुरं रसपाकयोः । शीतलं स्तन्यकृत् स्निग्धं वातपित्तास्रनाशनम् ॥ दोषधातुमलस्रोतः किञ्चित् क्लेदकरं गुरु । जरासमस्तरोगाणां शान्तिकृत् सेवितं सदा ॥ * ॥ कृष्णाया गोर्भवं दुग्धं वातहारिगुणाधिकम् । पीताया हरते पित्तं तथा वात हरं भवेत् ॥ श्लेष्मलं गुरु शुक्लाया रक्ताचित्राच वातहृत् । वालवत्सविवत्साना गवां दुग्धं त्रिदोषकृत् ॥ वष्कयिण्या त्रिदोषघ्नं तर्पणं बलकृत् पयः । जाङ्गलानूपशैलेषु चरन्तीनां यथोत्तरम् । पयो गुरुतरं स्नेहो यथाहारं प्रवर्त्तते ॥ खल्पान्नभक्षणाज्जातं क्षीरं गुरु कफप्रदम् । तत्तु बल्यं परं वृष्यं स्वस्थानां गुणदायकम् ॥ पलालतृणकार्पासवीजजं रोगिणे हितम् ॥ * ॥ अपिचाह राजनिर्घण्टः । गवां प्रत्यूषसि क्षीरं गुरुविष्टम्भि दुर्जरम् । तस्मा दभ्युदिते सूर्ये यामं यामार्द्धमेववा ॥ समुत्तार्य्य पयो ग्राह्यं तत् पथ्यं दीपनं लघु । विवत्सावालवत्सानां पयो दोषलमीरितम् ॥ शस्तं वत्सैकवर्णायाश्च वलीकृष्णायो र्यच । रक्तादा माषपर्णादा ऊर्द्धशृङ्गी च या भवेत् ॥ तासां गवां हितं क्षीरं शृतं वा ऽशृतमेव वा । गवां सितानां वातघ्नं कृष्णानां पित्तनाशनम् ॥ श्लेष्मघ्नं रक्तवर्णानां त्रीन् हन्ति कपिलापयः ॥ इति ॥

गोदुग्धदा । स्त्री । चणिकातृणे । सुनीलायाम् ॥

गोधुक् । पुं । गोपे । गोदोग्धरि ॥ गां दोग्धि । दुह प्रपूरणे । सत्सूद्विषेतिक्विप् ॥

गोदुहः । पुं । गोदुहि । गोपे ॥ गां दोग्धि । दुह० । मू० कः ॥

गोदोहनम् । न । गवां दोहनस्थाने ॥ गावो दुह्यन्ते ऽस्मिन् । ल्युट् ॥ कालविशेषे । मुहूर्त्ताऽष्टमभागे ॥ यथा । आचम्य च ततः कुर्य्यात् प्राज्ञो द्वारावलोकनम् । मुहूर्त्तस्याष्टमं भागमुद्वीक्ष्योद्यतिथिर्भवेदिति ॥

गोदोहनी । स्त्री । गोदोहनपात्रे । पात्र्याम् ॥ गौर्दुह्यते यस्याम् । दुहेः करणाधिकरणयोश्चेति ल्युट् । ङीप् ॥

गोद्रवः । पुं । गोमूत्रे ॥

गोधनः । पुं । स्थूलाग्रवाणे । तुक्का इति भाषा ॥ इति हरिवंशः ॥ न । गोसमूहे । गोकुले ॥ गवां धनं समूहः ॥

गोधा । स्त्री । तलायाम् । ज्याघातवारणे । धनुर्गुणाघातवारणाय प्रकोष्ठतत्रावद्धायां चर्म्मपट्याम् ॥ निहाकायाम् । गोधिकायाम् । गोह इति भाषा ॥ अस्या मांसपाकविधिः । गोधा क्षोण्याजलैर्भूयः क्षालितां खण्डशः कृताम् । स्विन्नाम्ब तक्रतोयाभ्यां क्षालितां सूक्ष्मखण्डिताम् ॥ तलये द्वेसवाराद्यैः प्रलेहो वा विधानतः ॥ विपाके मधुरा गोधा वातपित्तप्रणाशिनी । कषाया कटुका प्रोक्ता कफघ्नी बलवर्द्धनी ॥ सा तु स्थलजलभेदाद्द्विधेति व्याख्यातारः ॥ गुध्यते वाह्यर्य्यया । गुधपरिवेष्टने । हलश्चेति घञ् ॥

गोधापदिका । स्त्री । गोधापदीलतायाम् । गोयालिया इति गौड भाषा ॥

गोधापदी । स्त्री । सुवहायाम् । गोधापदिकायाम् ॥ गोधा इव पादो मूलमस्याः । कुम्भपदीषु चेति साधुः ॥

गोधास्कन्धः । पुं । विट्खदिरे ॥

गोधिः । पुं । ललाटे ॥ गोधिकायम् ॥ गुध्यते । गुध० । इन् ॥ गावो नेत्रे धीयेते यस्मिन् । कर्म्मण्यधिकरणे चेति किर्वा ॥

गोधिका । स्त्री । गोधायाम् । निहाकायाम् ॥ गोहीति प्रसिद्धे जलचरे ॥ गुध्यति । गुध० । ण्वुल् ॥

गोधिकापुत्रः । पुं । गोधाशावके । गौःधेये । सर्पाद्गोधायामुत्पन्ने चन्दनगोह इति प्रसिद्धे जन्तुविशेषे ॥ गुध्यति । गुध० । ण्वुल् । गोधिकायाः पुत्रः ॥

गोधिनी । स्त्री । वृहतीभेदे । चविकायाम् ॥

गोधुमः । पुं । गोधूमे ॥ इति शब्दचन्द्रिका ॥

गोधूमः । पुं । नागरङ्गे ॥ ओषधीविशेषे ॥ गीहूं इति प्रसिद्धे व्रीहिविशे

षे । रसाले । सुमने ॥ गोधूमः सुमर्मोऽपिस्यात् त्रिविधः सच कीर्त्तितः । महागोधूम इत्याख्यः पश्चाद्देशात् समागतः ॥ मधूली तु ततः किञ्चिदल्पा सा मध्यदेशजा । निःशूको दीर्घगोधूमः क्वचिन्नन्दीमुखाभिधः ॥ गोधूमो मधुरः शीतो वातपित्तहरो गुरुः । कफशुक्रप्रदो वल्यः स्निग्धः सन्धान कृत् सरः ॥ जीवनो वृंहणो वर्ण्यो रुच्यो वीर्यस्थिरत्वकृत् । कफप्रदो नवीनो नचपुराणः । पुराणयवगोधूमक्षौद्रजाङ्गलशूल्यभुगिति वाग्भटेनवसन्ते गृहीतत्वात् ॥ मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः । शुक्रला वृंहणी पथ्या तद्वन्नन्दीमुखा स्मृता ॥ गुध्यति गुध्यते वा । गुध० । गुधेरूमः ॥

गोधूमसम्भवम् । न । काञ्जिकप्रभेदे । सौवीरे ॥

गोधूमसारः । पुं । सुमनस्य सारांशे । सीरा इति सत्इतिचख्याते ॥ तद्विधिर्यथा । निस्तुषान् गोधूमा नुदूखले कण्डयित्वा सायङ्काले मृत्तिकादिपात्रे जले मग्नङ्कारयित्वा परदिने प्रभातसमये उपरिस्थजलंक्रमेण दूरीकृत्वा ऽधस्थसार मातपे शुष्कं कृत्वा पात्रान्तरे स्थापयेदिति पाक

राजेश्वरः ॥

गोधूमी । स्त्री । गोलोमिकायाम् । गोधूमा इति पार्वरी इतिचगौडभाषा प्रसिद्धे क्षुद्रक्षुप विशेषे ॥

गोधूलिः । पुं । स्त्री । समयविशेषे ॥ यथा । सन्ध्यातपाक्रमितपश्चिमदिग्विभागे व्योम्नि स्फुरद्विरलतारकसन्निवेशे । रुद्धे गवां खुरपुटोत्क्षिते रजोभिर्गोधूलिरेष कथितो भृगुजेन योगः ॥ अपिच । यावत्सिन्दूरवर्णं गगनतलगतं भानुबिम्बं च नास्तं यावन्नो दिक्षु शान्तिं व्रजति खुरपुटैरुत्थितो रेणुसङ्घः । तावन्नैवास्तिदोषः प्रभवतिनच सा क्रूरदृष्टिः प्रेक्षायां यात्रायां वा विवाहे सकलशुभकरी सर्वकार्यस्य सिद्धिः ॥ सा त्रिविधेति दीपिका । यथा । गोधूलिं त्रिविधां वदन्ति मुनयो नारीविवाहादिके हेमन्ते शिशिरे प्रयाति मृदुतां पिण्डीकृते भास्करे । ग्रीष्मेऽर्द्धास्तमिते वसन्तसमये भानौगते दृश्यतां सूर्ये चास्त मुपागते च नियतं वर्षाशरत्कालयोः ॥ हेमन्तशिशिरयो र्मृदुता मात्रपिण्डीकृतरविकालः । ग्रीष्मे ऽर्द्धास्तरविकालः । वर्षाशरदस्तमेव ऽस्तगतरविकाल इत्यर्थः ॥

गोनन्दी । स्त्री । सारसखगस्त्रियाम् ॥

गोनर्द्दः । पुं । सारसखगे ॥ पर्व्वतविशेषे ॥ न । कैवर्त्तीमुस्तके ॥ गांजलं नर्द्दयति । नर्द्द शब्दे । कर्म्मण्यण् ॥

गोनर्द्दीयः । पुं । पतञ्जलिमुनौ । गोनर्द्दे ॥ गोनर्द्दभवः । वृद्धाच्छः ॥

गोनसः । पुं । सर्पविशेषे । तिलित्से । मञ्जलीतोड़े ॥ गोरिव नासिका अस्य । अच् नासिकाया इत्यच् नसादेशश्च ॥ वैक्रान्तमणौ ॥

गोनाथः । पुं । अनडुहि ॥

गोनायः । पुं । गोपाले ॥ गांनयति । णीञ् प्रापणे । कर्म्मण्यण् ॥

गोनासः । पुं । गोनसे ॥ गोरिव नासा यस्य ॥ न । वैक्रान्तमणौ ॥

गोनिष्यन्दः । पुं । गोमूत्रे ॥

गोपः । पुं । गुवाल इति भाषाप्रसिद्धे सङ्करजातिविशेषे । आभीरे । वल्लवे ॥ मणिवन्ध्यां तन्त्रवायात् गोपजाते श्च सम्भवः इति पराशरपद्धतिः ॥ गोष्ठाध्यक्षे ॥ भूपतौ ॥ ग्रामौघाधिकृते ॥ वोले ॥ त्रि । रक्षके । उपकारके ॥ गोपायति । गुपू रक्षणे । आयादय आर्द्धधातुकेवा । अच् ॥ गांपातिवा । पा रक्षणे । आतोनुपेतिकः ॥ गोर्जलात् पातिवा । पा० । सुपीतिकः ॥

गोपकः । पुं । गोपशब्दार्थे ॥ स्वार्थे कः ॥

गोपकन्या । स्त्री । आभीरसुतायाम् ॥ शारिवौषधौ ॥

गोपघोण्टा । स्त्री । हस्तिकोलौ । वदरीछदायाम् ॥ वदरीसदृशाकारो वृक्षः सूक्ष्मफलो भवेत् । अटव्यामेवसा घोण्टा गोपघोण्टेतिचोच्यते ॥ विकङ्कतवृक्षे ॥

गोपतिः । पुं । शिवे । शम्भौ ॥ षण्डे । साँड इति भाषाप्रसिद्धे वृषे ॥ नृपे ॥ भास्करे ॥ त्रिदशाधिपे ॥ ऋषभनामौषधौ ॥ गवांपतिः ॥ श्रीकृष्णे ॥ गवांपालनात् । गौर्मही तस्याः पतिर्वा ॥

गोपदलः । पुं । गुवाके ॥

गोपनम् । न । अपह्नवे ॥ गोपनाश्रीयते सस्थंनगुप्तिरन्तर्तंविना ॥ रक्षायाम् ॥ तेजपात इति भाषाप्रसिद्धे तमालपत्रे ॥

गोपनीयः । त्रि । गोपितव्ये । गोप्ये ॥

गोपभद्रम् । न । शालूके ॥

गोपभद्रा । स्त्री । काश्मर्य्याम् ॥

गोपभद्रिका । स्त्री । गम्भार्य्याम् ॥

गोपवधूः । स्त्री । शारिवायाम् ॥ गोपाङ्गनायाम् ॥ गोपीएववधूः । स्त्रियाः पुंवद्भाष्यादिनापुंवद्भावः ॥

गोपरसः । पुं । वोले । गन्धरसे ॥ गो

पे उत्पले रक्षोघ्ने ॥

गोपवल्ली । स्त्री । मूर्वायाम् ॥ शारिवायाम् ॥ श्यामालतिकायाम् ॥

गोपा । स्त्री । गोपालिकायाम् ॥ श्यामालतायाम् ॥ गोपायति । गुपू० । पचाद्यजन्तात् अजादित्वाट्टाप् इति केचित् ॥ गाः पाति । पा रक्षणे । आतोनुपसर्गे इति कप्राप्ते । वासरूपन्यायेन आतोमनिन् क्वनिब्वनिपश्चेति चेन विचि अदन्तत्वाभावात् टाब्विधेरभावे गोपाः विश्वपावदिति बोध्यम् ॥

गोपानसी । स्त्री । छादनाभ्युद्धारवलि । वडभ्याम् । कुड्येषु छादनार्थं दत्ते वक्रकाष्ठे ॥ छादनाधारे । पटलाधारवंशपञ्जरे ॥ गोपायति । गुपू० । बाहुलकात् असच् प्रत्ययः । अल्लोपयलोपौ ॥ गवां गोभिर्वा पानम् किरणानां ग्रहणम् किरणैर्वा शोषणम् । तत् करोति निवर्त्तयति । णोऽन्तकर्मणि । आतोनुपेतिकः । गौ० ङीष् ॥

गोपायितः । त्रि । रक्षिते ॥ गोपाय्यते स्म । गुपू० । क्तः । आयादय आर्द्धधातुके वा ॥

गोपालः । पुं । नृपे । भूपे ॥ गोपे । गवां पालके ॥ ईशे ॥ श्रीकृष्णे ॥ तद्ध्यानं यथा । अव्याद्व्याकोषनीलाम्बु-जरुचिरचिताम्भोजनेत्रोऽम्बुजस्थो बालो जङ्घाकटीरस्थलकलितरणत्किङ्किणीको मुकुन्दः । दोर्भ्यां हैयङ्गवीनं दधदतिविमलं पायसं विश्ववन्द्यो गोगोपीगोपवीतो रुरुनखविलसत्कण्ठभूषश्चिरं व इति तन्त्रसारः ॥ सर्वस्य जगतः पालनात् । विष्णौ ॥ गां भूमिं वेदं तन्मूलं यज्ञादिकं वा । पालयति । गाः पालयति वा । पा रक्षणे । कर्मण्यण् ॥ जगणे । मध्यगुरौ । ।ऽ। ॥

गोपालकः । पुं । शिवे ॥ श्रीकृष्णे ॥ गवां पालके ॥ गोपाल एव । स्वार्थे कन् ॥

गोपालकर्कटी । स्त्री । ग्वालकाकडी इति प्रसिद्धे कर्कटीभेदे । क्षुद्रेर्वारौ । क्षुद्रचिर्भिटायाम् ॥

गोपालिका । स्त्री । गोपालकस्त्रियाम् ॥ अत्र पुंयोगलक्षणो ङीष्प्राप्तः पालकान्तान्नेति निषिध्यते ॥ कीटविशेषे । महाभीरौ ॥ शारिवायामोषधौ ॥

गोपाली । स्त्री । गोपालकपत्न्याम् ॥ गोरक्ष्याम् ॥ गोप्याम् ॥ गोपाली: करतालीनर्त्तनप्रायी पुमासवन-मानी ॥

गोपाष्टमी । स्त्री । गोष्ठाष्टम्याम् ॥ यथा । शुक्लाष्टमी कार्त्तिके तु स्मृता गोपाष्ट

मी बुधैः ।·तद्दिने वासुदेवोऽभूद्‌गोपः पूर्व्वन्तु वत्सपः ॥ तत्र कुर्य्याद्‌गवां पूजां गोग्रासं गोप्रदक्षिणाम् । गवानुगमनं कार्य्यं सर्व्वान् कामानऽभीप्सता ॥

गोपिका । स्त्री । गोपपत्न्याम् ॥ गोपायति । गुपू० । ण्वुल् ॥ गोप्याम् ॥

गोपित्तम् । न । गोरोचनायाम् ॥

गोपिनी । स्त्री । श्यामालतायाम् ॥

गोपी । स्त्री । गोपस्त्रनार्य्याम् ॥ गोपस्य स्त्रीत्यर्थे पुंयोगादाख्यायामिति ङीष् ॥ सारिवायाम् ॥ रक्षिकायाम् ॥ रक्षिकायाम् । मूलप्रकृतौ ॥ गोपायति । गुपू० । आयाभावे । पचाद्यच् । गौरादिङीष्० ॥

गोपीथः । पुं । न । रक्षणे ॥ न । तीर्थे ॥ जलद्रोण्याम् ॥ गावः पिबन्त्यस्मिन् । पा० । निशीथगोपीथावगथाइतिथक् ॥ गोपीथः सोमपानमिति-वेदभाष्यम् ॥

गोपुच्छः । पुं । हारविशेषे ॥ गोलाङ्गूले ॥ गोलाङ्गूलवानरे ॥

गोपुटा । स्त्री । स्थूलैलायाम् ॥

गोपुटिकम् । न । शिववृषस्यमण्डपे ॥

गोपुरम् । न । पुरद्वारे ॥ द्वारमात्रे ॥ कैवर्त्तीमुस्तके ॥ गां जलं पिपर्त्ति । पृपालनपूरणयोः । मू० कः ॥ गौर्ज्जलं पुरमस्येतिवा ॥ यद्वा । पुरति । पुर अग्रगमने । इगुपधेति कः । गवां पुरम् ॥ गोपायति वा । गुपू० । बाहुलकादुरच् ॥ यद्वा । पोलते । पुल महत्त्वे । इगुपधत्वात् कः । रलयोरभेदः गोभिः पुरम् ॥ गाः पुरति वा । पुर० । मू० कोवा ॥

गोपुरकः । पुं । कुन्दुरुके । वह्निगन्धे ॥

गोपुरीषम् । न । गोमये ॥

गोपेन्द्रः । पुं । विष्णौ ॥ गोपराजे ॥

गोपेशः । पुं । शाक्यमुनौ ॥ गोपराजे ॥ नन्दघोषे ॥

गोप्ता । त्रि । रक्षके ॥ गोपायति । गुपू० । तृच् ॥ श्रीकृष्णे ॥ सच्छिद्रमायया स्वात्मानं संवृणोति ॥

गोप्त्री । स्त्री । गोपिकायाम् ॥ रक्षिकायाम् ॥

गोप्यः । पुं । दासीपुत्रे ॥ त्रि । रक्षणीये ॥ गुह्ये ॥ सङ्गोपनीये ॥ यथा । आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजम् । अपमानं तपो दानं नव गोप्यानि यत्नत इति ॥ गुप्यते । गुपू० । ऋहलोर्ण्यत् ॥

गोप्यकः । पुं । दासे ॥ गोप्यात् स्वार्थे कः ॥ गोप्यं कायति वा । कै० । आतश्चोपसर्गे कः ॥

गोप्याधिः । पुं । बन्धकविशेषे ॥ यथा च नारदः । अधिक्रियत इत्याधिः

स विज्ञेयो द्विलक्षणः । कृतकालो
ऽपनेयश्च यावद्देयोद्यतस्तथा ॥ स
पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्त
थैव च । गोप्योरक्षणीयः ॥

गोवाली । स्त्री । ओषधिविशेषे ॥ पा
ककर्णेतिङीष् ॥

गोभण्डीरः । पुं । जलकुक्कुभखगे ॥

गोमक्षिका । स्त्री । मक्षिकाविशेषे ।
दंशे । डाँस इतिभाषा ॥

गोमान् । त्रि । गवीश्वरे । गोमिनि ॥
बहवोगावोऽस्य । भूम्नि तदस्यास्ती
तिमतुप् ॥

गोमतम् । न । गव्यूतौ ॥

गोमतल्लिका । स्त्री । प्रशस्तायांगवि ॥
प्रशंसावचनैश्चेति नित्यसमासः ॥

गोमती । स्त्री । स्वनामाख्यातायां नद्या
म् । वाशिष्ठ्याम् ॥ वैदिकमन्त्रवि
शेषे ॥ उगितश्चेतिङीप् ॥

गोमन्तः । पुं । विन्ध्यप्रत्यन्तपर्वते ॥

गोमयः । पुं । न । गोविषि ॥ गोःपुरी
षम् । गोश्च पुरीषे इतिमयट् ॥ अ
त्यन्तजीर्णदेहाया वन्ध्यायाश्च विशे
षतः । रोगार्त्तायाः प्रसूताया न गो
र्गोमयमाहरेत् ॥

गोमयच्छत्रम् । न । शिलीन्ध्रके ॥

गोमयच्छत्रिका । स्त्री । उच्छिलीन्ध्रे ।
शिलीन्ध्रे । द्विलीरे ॥

गोमयप्रियम् । न । भूतृणे ॥

गोमयोत्था । स्त्री । गोमयजातकीट
विशेषे । गर्द्दभ्याम् । गोबरीला इति
भाषा ॥

गोमायुः । पुं । शृगाले ॥ गन्धर्वविशेषे
॥ गां विकृतां वाचं मिनोति । डुमि
ञ् ० । कृवापेत्युण् ॥

गोमी । पुं । शृगाले ॥ बुद्धभिक्षुशिष्ये
। श्रामणेरे ॥ त्रि । गोमति ॥ उपा
सके ॥

गोमीनः । पुं । मत्स्यविशेषे ॥

गोमुखः । पुं । मातलिपुत्रे ॥ महादे
वगणान्तरे ॥ नक्रे ॥ वाद्यविशेषे ॥
न । कुटिलागारे ॥ वाद्यभाण्डे ॥ ले
पने ॥ चौरक्रियमाणे सुरङ्गायाः प्र
भेदे ॥ जपमालागोपनाय पट्टवस्त्रा
दिनिर्मिते गोमुखी इति प्रसिद्धे य
न्त्रविशेषे ॥ यथा । चतुर्विंशाङ्गुल
मितं पट्टवस्त्रादिसम्भवम् । निर्मा
या ऽष्टाङ्गुलिमुखं ग्रीवां तत्षडङ्
गुलम् ॥ ईदृशं गोमुखयन्त्रं च सर्व
तन्त्रेषु गोपितम् । तन्मुखे स्थापये
न्मालां ग्रीवामध्यगतः करः ॥ प्रजपे
द्विधिना गुप्तं वर्णमालाधिकं प्रिये । इ
ति मुण्डमालातन्त्रम् ॥ गोमुखादे
ततो मालां गोपयेन्मातृजारवत् ।
इति मयातन्त्रम् ॥

गोमुखी । स्त्री । मन्त्रजपार्थं कर्पटादिनिर्मितगुप्तिकायाम् । गोमुखे । राढदेशस्थनदीविशेषे ॥

गोमूत्रम् । न । गोजले ॥ अस्य गुणाः । गोमूत्रं कटु तीक्ष्णोष्णं क्षारं तिक्तं कषायकम् । लघ्वग्निदीपनं मेध्यं पित्तकृत् कफवातहृत् ॥ शूलगुल्मोदरानाहकण्डूक्षिमुखरोगजित् । किलासगदवातामवस्तिरुक् कुष्ठनाशनम् ॥ कासश्वासापहं शोथकामलापाण्डुरोगहृत् ॥ * ॥ कण्डूकिलासगदशूलमुखाक्षिरोगान् गुल्मातिसारमरुदामयमूत्ररोधान् । कासं सकुष्ठजठरक्रिमिपाण्डुरोगान् गोमूत्रमेकमपि पीतमपाकरोति ॥ सर्वेष्वपि च मूत्रेषु गोमूत्रं गुणतोऽधिकम् । अतो विशेषाकथने मूत्रं गोमूत्रमुच्यते ॥ प्लीहोदरश्वासकासशोथवर्चोग्रहापहम् । शूलगुल्मरुजानाहकामलापाण्डुरोगनुत् ॥ कषायं तिक्ततीक्ष्णञ्च पूरणात् कर्णशूलहृत् ॥

गोमूत्रिका । स्त्री । तृणविशेषे । चेचजायाम् । रक्ततृणायाम् ॥ चित्रकाव्यविशेषे । यथा । गतिरुक्ता वक्रा यत्र मार्गे मूत्रस्य गोरिव । गोमूत्रिकेति तत् प्राहुर्दुष्कराश्चित्रवेदिनः ॥ अपि च । वर्णानामेकरूपत्वं यद्येकान्तरमर्द्धयोः । गोमूत्रिकेति तत् प्राहुर्दुष्करं तद्विदो विदुरिति ॥ षोडशकोष्ठद्वये पङ्क्तिद्वयेऽर्द्धद्वयं क्रमेण विलिख्यैकान्तरविनिमयेन वाचने श्लोकनिष्पत्तिर्भवतीत्युद्धारः ॥

उदाहरणं यथा ॥

प्र	वृ	त्ते	वि	क	स	द्वा	नं	सा	ध	ने	ष्य	त्रि	षा	दि	भिः ।
व	इ	षे	वि	क	स	द्दा	नं	यु	ध	मा	ष्य	त्रि	षा	गि	भिः ॥

इति माघे १९ सर्गे ४६ श्लोकः ॥ अस्याश्चत्वारो भेदाः । पादगोमूत्रिका अर्द्धगोमूत्रिका श्लोकगोमूत्रिका विपरीतगोमूत्रिकेति भेदा इति सरस्वतीकण्ठाभरणम् ॥

गोमेदः । पुं । गोमेदकमणौ ॥ द्वीपविशेषे ॥ यथा । गोमेदे गोपतिर्नाम राजा भूत्वासवोद्यतः । याज्योऽभूद्वह्निकल्पानामौतथ्यानां मनोः कुले ॥ स तेष हरियज्ञाय प्रवृत्तेषु भृगून्गुरून् । अत्रेतं गोतमः कोपादशपत् सोऽगमत् क्षयम् ॥ यज्ञवाटेऽस्य ता गावो दग्धाः कोपाग्निना मुनेः । तन्मेदसा मही‌छन्ना

गोमेदः सततोऽभवदिति ॥

गोमेदकः । पुं । स्वनाम्ना प्रसिद्धे मणि
विशेषे ॥ न । पीतमणौ ॥ राहुर
त्ने । तमोमणौ ॥ अस्यपरीक्षा यथा
। हिमालयेवा सिन्धौवा गोमेदम
णिसम्भवः । स्वच्छकान्ति गुरुः स्नि
ग्धो वर्णाढ्यो दीप्तिमानपि ॥ वद्ध
क्षः पिञ्जरो धन्यो गोमेदइतिकी
र्त्तितः । चतुर्द्धा जातिभेदस्तु गोमे
देपि प्रकाश्यते ॥ ब्राह्मणः शुक्लव
र्णःस्यात् क्षत्रियोरक्तउच्यते । आपी
तोवैश्यजातिस्तु शूद्रस्त्वानीलउच्य
ते ॥ छाया चतुर्विधा श्वेता रक्ता
पीता ऽसिता तथा ॥ गुरुप्रभाढ्यः
सितवर्णरूपः स्निग्धो मृदुर्वातिमहा
पुराणः ॥ स्वच्छस्तु गोमेदमणि र्धृ
तोयं करोति लक्ष्मी धनधान्य वृद्धि
म् । लघु र्विरूपो ऽखिरो ऽन्यमा
नः स्नेहोपलिप्तो मलिनः खरोपि ॥
करोति गोमेदमणि र्विनाशं सम्प
त्तिभोगाबलवीर्य्यराशेः ॥ ये दोषा
हीरके ज्ञेया स्ते गोमेदमणावपि ।
परीक्षा वह्नितः कार्या शाणेवा रत्न
कोविदैः ॥ स्फटिकेनैवकुर्वन्ति गो
मेदप्रतिरूपिणम् । शुद्धस्य गोमेदम
णेस्तु मूल्यं सुवर्णतो द्वैगुणमाहुरे
के । अन्येतथा विद्रुमतुल्यमूल्यं तथा
परेषामरतुल्यं माहुः ॥ चतुर्विंशा
ना मेषांतु धारणं परिसम्मतमिति
॥ काकोले ॥ पत्रके ॥

गोमेदसन्निभः । पुं । दुग्धपाषाणे ॥

गोमेधः । पुं । यज्ञविशेषे ॥ तस्य क-
लौनिषेधो यथा । अश्वालम्भं गवा-
लम्भं सन्न्यासंपलपैतृकम् । देवरा
च्च सुतोत्पत्तिः कलौपञ्चविवर्जयेत् ॥

गोयुगम् । न । गोद्वये ॥ गवोर्युगम् ॥

गोरक्षः । पुं । नागरङ्गे । नारङ्गे ॥ ऋ
षभनामौषधौ ॥ त्रि । गोरक्षके । गो
पे ॥ रक्षतीतिरक्षः । गोःरक्षः ॥

गोरक्षकर्क्कटी । स्त्री । चिर्भिटायाम् ॥

गोरक्षजम्बूः । स्त्री । गोधूमे ॥ गोरक्ष
तण्डुलायाम् ॥ घोण्टाफले ॥

गोरक्षतण्डुला । स्त्री । गोरक्षचाउलि
या इति गौडभाषाप्रसिद्धे क्षुद्रलता
विशेषे । गाङ्गेरुक्याम् । नागबला
याम् ॥

गोरक्षतुम्बी । स्त्री । कुम्भतुम्ब्याम् ॥

गोरक्षदुग्धा । स्त्री । क्षुद्रक्षुपविशेषे ।
ताम्रदुग्धायाम् । बहुपत्रायाम् । अ
मृतसञ्जीवन्याम् ॥

गोरक्षी । स्त्री । क्षुद्रक्षुपविशेषे । ग
न्धबहुलायाम् । पञ्चपर्णिकायाम् ॥
गोरक्षदुग्धायाम् ॥ कुम्भतुम्ब्याम् ॥

गोरक्षम् । न । पांशुपाल्ये ॥ गोरक्षती

ति गोरथः। तस्य भावः। ष्यञ् ॥

गोरङ्कुः। पुं। पक्षिविशेषे ॥ नग्नके ॥ वन्दिनि ॥

गोरटः। पुं। दुष्खदिरे ॥

गोरणम्। न। गुरणे। उद्यमे। भारासुद्यमने॥ गुर उद्यमे। चु०। ल्युट्॥

गोरसः। पुं। दुग्धे ॥ दधि ॥ दण्डाहते। घोले। तक्रे ॥ गोरसस्य दुग्धस्य विकारत्वात् उपचारात् ॥

गोरसजम्। न। तक्रे ॥

गोराटी। स्त्री। }
गोराटिका। स्त्री। } शारिकाविहगे ॥
गोरिका। स्त्री। }

गोलतम्। न। कोषयुग्मे॥ गोःशब्दे ॥

गोरोचनम्। न। हरिताले ॥

गोरोचना। स्त्री। स्वनामख्यातपीतवर्णद्रव्ये। शोभनायाम्। मङ्गलायाम्। मेध्यायाम् ॥ गोरोचना हिमा तिक्ता वश्या मङ्गलकान्तिदा। विषाऽलक्ष्मीग्रहोन्मादगर्भस्रावक्षतास्रहृत् ॥

गोर्दम्। न। मस्तिष्के। मस्तकभवस्नेहे ॥ गुर्यते गुरतेवा। गुरी उद्यमने। अब्दादय इति साधु ॥

गोलः। पुं। सर्ववर्त्तुले ॥ मदनवृक्षे ॥ जारात् विधवासुते ॥ भूगोले ॥ खगोले ॥ यथा। गोलं श्रोतुं यदि तव

मति र्भास्करीयं शृणु त्वमितिशिरोमणिः ॥ एकराशौ षड्ग्रहयोगे ॥ यथा। षड्ग्रहा मेकस्मिन् यदि भवन्ति राशौ निवसन्ति तदा गोलयोगः प्रलयपदमिन्द्रोपि लभते। भवे लोको रङ्कः परिहरति पुत्रञ्च जननी नृपाणां न शः शान्त्यै ज्वलति वसुधा शुष्यति नदीति॥ एकराशौ सप्तग्रहयोगे ॥ यथा। सप्तग्रहा यदैकस्था गोलयोग स्तदा भवेत्। दुर्भिक्षं राष्ट्रपीडाच तस्मिन् काले नृपक्षय इति ॥ न। मण्डले॥ गुडेर्घञ्। डलयोरभेदः ॥

गोलकः। पुं। जारतो विधवासुते ॥ मणिके। अलिञ्जरे। गोल इति भाषा॥ गुडे॥ पिण्डे॥ यथा। तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यम्बुगोलकाः। प्रभावन्तो हि दृश्यन्ते सूर्यरश्मिविदीपिताः॥ इति सूर्यसिद्धान्तः ॥ गन्धरसे। बोले ॥ न। गोलोके॥ गुड्यते। गुड रक्षायाम्। घञ्। स्वार्थे कन्। डलयोरैक्यम् ॥

गोलक्षणम्। न। गवां प्रशस्ताप्रशस्तस्वरूपे ॥ यथा। पराशरः प्राह बृहद्रथाय गोलक्षणं तत् क्रियते ततोऽयम्। मया समासः शुभलक्षणाः स्याः सर्वास्तथा प्यागमतोऽभिधा

स्ये ॥ अशुभलक्षणा गावश्चाह । साश्रुविलरूक्षाक्ष्यो मूषिकनयनाश्च न शुभा गावः । प्रचला श्चिपिटविषाणाः करटाः खरसदृशवर्णाश्च ॥ दशसप्तचतुर्दन्त्यः प्रलम्बमुण्डानना विनतपृष्ठाः । ह्रस्वस्थूलग्रीवा यवमध्या दारित खुराश्च ॥ श्यावातिदीर्घजिह्वाः गुल्फै रतितनुभि रतिबृहद्भिर्वा । अतिककुदाः कृशदेहा नेष्टा हीनाधिकाङ्ग्यश्च ॥ ४ ॥ अथ वृषलक्षणम् । वृषभोऽप्येवंस्थूलातिलम्बवृषणः सिराततक्रोडः । स्थूलसिराचितगण्ड स्त्रिस्थानं मेहतेयश्च ॥ मार्जाराक्षः कपिलः करटो वा न शुभदो द्विजस्यैव । कृष्णोष्ठतालुजिह्वः श्वसनो यूथस्य घातकरः ॥ ६ ॥ स्थूलशकृन्मणिशृङ्गः सितोदरः कृष्णसारवर्णश्च । गृहजातोऽपि त्याज्यो यूथविनाशावहो वृषभः ॥ ७ ॥ श्यामकपुष्पचिताङ्गो भस्मारुणसन्निभो बिडालाक्षः । विप्राणा मपि न शुभंकरोति वृषभः परिगृहीतः ॥ ये चोद्धरन्ति पादान् पङ्कादिव योजिताः कृशग्रीवाः । कातरनयना हीनाश्च पृष्ठतस्ते न भारसहाः ॥ ९ ॥ अशुभलक्षणसहितानाह । मृदुसंहतताम्रोष्ठा तनुस्फिचस्ताम्रतालुजि

ह्वाश्च । ह्रस्वतनूच्चश्रवणाः सुकुक्षयः स्पृष्टजङ्घाश्च ॥ आताम्रसंहतखुरा व्यूढोरस्का बृहत्ककुद्युक्ताः । स्निग्धश्लक्ष्णतनुत्वग्रोमाणस्ताम्रतनुशृङ्गाः ॥ तनुभूस्पृग्वालधयो रक्तान्तविलोचना महोच्छ्वासाः । सिंहस्कन्धा स्तन्वल्पकम्बलाः पूजिताः सुगताः ॥ ११ ॥ वामावर्त्तैर्वामे दक्षिणपार्श्वे च दक्षिणावर्त्तैः । शुभदा भवन्त्यनडुहो जङ्घाभिश्चैणकनिभाभिः ॥ वैदूर्यमल्लिकाबुद्बुदेक्षणाः स्थूलनेत्रवर्त्मानः । पार्ष्णिभि रस्फुटिताभिः शस्ताः सर्वे च भारसहाः ॥ घ्राणोद्देशे सबलि र्मार्जारमुखः सितश्च दक्षिणतः । कमलोत्पललाक्षाभः सुवालधि र्वाजितुल्यजवः ॥ लम्बै र्वृषणै र्मेषोदरैश्च सङ्क्षिप्तवङ्क्षणाक्रोडः । ज्ञेयो भाराध्वसहो जवेऽश्वतुल्य श्च शस्तफलः ॥ १५ ॥ सितवर्णः पिङ्गाक्ष स्ताम्रविषाणेक्षणो महावक्त्रः । हंसो नामशुभफलो यूथस्य विवर्द्धनः प्रोक्तः ॥ १६ ॥ भूस्पृग्वालधि राताम्रविषाणो रक्तदृक् ककुद्मांश्च । कल्माष श्च स्वामिन मचिरात् कुरुते पतिं लक्ष्म्याः ॥ १७ ॥ यो वा सिते श्च चरणौ यथेष्टवर्णश्च सोऽपि शुभफलकृत् । मिश्रफलोऽपि त्याज्यो

यदिमैकान्तप्रशस्तोऽपि ॥ १८ ॥ इतिवाराहीसंहितायां गोलक्षणं नामाष्टपञ्चाशोऽध्यायः ॥ ५८॥

गोला । स्त्री । गोदावर्य्याम् ॥ सख्याम् ॥ कुनट्याम् ॥ दुर्गायाम् ॥ पत्राञ्जने ॥ मण्डले ॥ अलिञ्जरे ॥ वालखेलने । वालक्रीडनकाष्ठे ॥ गां दीप्तिं लाति । ला० । आतइति कः ॥ गुड्यते वा । गुडवेष्टने । घञ् । डलयोरैक्यम् ॥

गोलाङ्गूलः । पुं । असितमुखे कपिविशेषे । कपित्थाख्ये । दधिशोणे ॥ कृष्णवानरे ॥

गोलासः । पुं । शिलीन्ध्रे ॥

गोलिहः । पुं । घण्टापाटलौ ॥

गोलीढः । पुं । लोध्रविशेषे । घण्टापाटलौ ॥ गोभिर्लिह्यतेस्म । लिह० । क्तः ॥

गोलोकः । पुं । न । श्रीकृष्णस्य नित्ये धामनि ॥ श्रीकृष्णस्थाने ॥ यथा । वैकुण्ठस्य दक्षभागेगोलोकं सर्वमोहनम् । तत्रैव राधिका देवी द्विभुजो मुरलीधरः ॥ यद्रूपंगोलकं धाम तद्रूपं नास्ति मामके । स्थाने वा चक्षुषोः किं वा ध्यानयोगे न विद्यते ॥ शुद्धतत्त्वमयं देवि नानादेवेन शोभितम् । मध्यदेशे गोलकाख्यं श्रीविष्णोर्लोभमन्दिरम् ॥ श्रीविष्णोःस्वरूपस्य यत्स्थलं चित्तमोहनम् । तस्यस्थानस्यमाहात्म्यं किंमया कथ्यतेऽधुनेत्यादि माहात्म्यादिकं तन्त्रशास्त्रे ब्रह्मवैवर्त्तपुराणेच द्रष्टव्यम्॥

गोलोमिका । स्त्री । गोधुमा इति पार्वती इतिच गौडभाषाप्रसिद्धे क्षुद्रक्षुपविशेषे । क्रोष्टुकपुच्छिकायाम् । प्रसारिण्याम् ॥

गोलोमी । स्त्री । श्वेतदूर्वायाम् ॥ गोलोमसु जाता । तत्रजातइत्यण् ॥ वचायाम् ॥ भूतकेशे ॥ गोलोमानिव लोमान्यस्य तस्येदमित्यण् । संज्ञापूर्वकत्वान्नवृद्धिः ॥ वेश्यायाम् ॥ गोलोमाः । गौशब्दोगोलोमसदृशेलाक्षणिकः । अनउपधालोपिन इति ङीप् ॥ गोलोमिकायाम् ॥

गोवत्सादी । पुं । वृके ॥

गोवन्दनी । स्त्री । प्रियङ्गौ । फलिन्याम् ॥ गविभूमौवन्द्यते । वदि० । कर्मणिल्युट ॥ पीतदण्डोत्पले ॥

गोवरम् । न । गोमयविशेषे ॥ गोष्ठान्त गोखुरक्षुण्णं शुष्कचूर्णितगोमयम् । गोवरं तत् समाख्यातं वरिष्ठं रससाधने ॥

गोवर्द्धनः । पुं । स्वनाम्ना प्रसिद्धे पर्वतविशेषे । गिरिराजे ॥ अमादि हेरि

शास्त्रोऽयं भूधरो नाम संशयः । शुक्ल प्रतिपद्दिप्रातःकार्त्तिके ऽर्च्यो ऽन्नवैष्णवैः ॥ पूजामन्त्रस्तु । गोवर्द्धनधराधारगोकुलत्राणकारक: । विष्णुबाहुकृतोच्छ्रायो गवां कोटिप्रदो भवेति ॥ त्रि । गोवर्द्धके ॥ गवां वर्द्धनः ॥

गोवर्द्धनधरः । पुं । श्रीकृष्णे । नन्दनन्दने ॥ गोवर्द्धनस्य गिरेः धरो धारकः ॥

गोवर्द्धनधारी । पुं । श्रीकृष्णे । यशोदानन्दने ॥

गोवशा । स्त्री । वन्ध्यायाङ्गवि ॥

गोविन्दः । पुं । वासुदेवे ॥ तद्ध्यानं यथा । फुल्लेन्दीवरकान्तमिन्दुवदनं बर्हावतंसप्रियं श्रीवत्साङ्कमुदारकौस्तुभधरं पीताम्बरं सुन्दरम् । गोपीनां नयनोत्पलार्च्चिततनुं गोगोपसङ्घावृतं गोविन्दं कलवेणुवादनपरं दिव्याङ्गभूषं भजेदिति ॥ गोशब्दवाच्यानि इन्द्रियाणि निच्चयं प्राप्ते ॥ गांवेदलक्षणां वाणीं विन्दति इति व्युत्पत्त्या सर्ववेदोपादानत्वेन सर्वज्ञे ॥ गां भुवं धेनुं स्वर्गं वेदं वा अविदत् विन्दति वा । विद° विद्लृ° । गवादिषु विन्दःसंज्ञायामिति शः । वाराहरूपेणोद्धरणात् कामधेनोरैश्वर्यप्राप्तेः । इन्द्रेणास्वर्गस्य निवेदनात् मत्स्यादिरूपेण वेदोद्धरणाद्वा ॥ गोभिर्वाणीभिर्वेदान्तवाक्यैर्विन्द्यते वा । गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः इति विष्णुतिलकम् ॥ वह्निपुराणे यमानुशासनेतन्नाममाहात्म्यं यथा । येतिष्ठन्तः स्वपन्तश्च गच्छन्तः स्खलिते क्षुते । सङ्कीर्त्तयन्ति गोविन्दं ते वस्त्याज्याःसुदूरतः इति ॥ गवाध्यक्षे ॥ वृहस्पतौ ॥

गोविन्दद्वादशी । स्त्री । फाल्गुनशुक्लद्वादश्याम् ॥

गोविट् । पुं । गोमये ॥ गोर्विट् ॥

गोविष्ठा । स्त्री । गोमये ॥ वनोपले ॥ गोर्विष्ठा ॥

गोवीथी । स्त्री । मध्यममार्गे नक्षत्रविशेषाणां संज्ञाविशेषे ॥ यथा । हस्तश्चित्रा तथा स्वाती गोवीथीति तु शब्दितेति ॥

गोवृन्दम् । न । गोसमूहे ॥

गोशकृत् । न । गोमये ॥

गोशरण्यः । पुं । व्याघ्रादितो दुर्गाद्गोः परित्राणकारके ॥ गोर्गवां वा शरण्यः ॥

गोशालम् । न । गोगृहे ॥ गवांशाला : विभाषासेनेति पाक्षिकं क्लीबत्वम् ॥ त्रि । गोशाले जाते ॥ शालान्तगोशालेतिजातार्थप्रत्ययस्य लुक् ॥

गोशाखा । स्त्री । गोशाले । गोसाखा

इतिभाषा ॥ गवां शाखा ॥

गोशीर्षम् । न । चन्दने ॥ चन्दनविशेषे । हरिचन्दने ॥ गोशीर्षाकारेमलयैकदेशजाते कालताम्रथामिश्रवर्णे उत्पन्नमन्यमिति अतिसुरभिशीतलतया सदैव सर्पैर्वेष्टिते इति व्याख्यातारः ॥ गोः शीर्षमिव गोशीर्षोऽगिरिस्तत्राकर इति स्वामी ॥ गवांमस्तके ॥

गोशीर्षकः । पुं । द्रोणपुष्पीवृक्षे ॥ कपयाद्रिसमुद्भवे गोरोचनासदृशवर्णे चन्दनजातिविशेषे ॥ गोमस्तके ॥

गोशृङ्गः । पुं । बर्बुरवृक्षे ॥ न । गोर्विषाणे ॥

गोश्रुतिः । पुं । वैयाघ्रपद्यर्षिविशेषे ॥

गोष्ठम् । न । गवांस्थाने ॥ गावस्तिष्ठन्त्यत्र । ष्ठा० । घञर्थे इति सुपिस्थ इति वा कः । अम्बाम्बेतिषत्वम् ॥ चिदधिष्ठिताहङ्कारे ॥ गावः श्रोत्रादीनीन्द्रियाणि तिष्ठन्त्यत्रेति पूर्ववत् प्रक्रिया ॥ गोष्ठीश्राद्धे ॥

गोष्ठपतिः । पुं । गवांस्थानाध्यक्षे ॥

गोष्ठश्वः । पुं । परहिंसके । यः स्वगृहाङ्गनेस्थितः परान्द्वेष्टितस्मिन् ॥ गोष्ठेश्वा इति सप्तमीतत्पुरुषे अचतुरेत्यादिना ऽच् । मत्सादिलतितिद्विलोपः ॥ षष्ठीतत्पुरुषे तु गोष्ठश्वा इत्येव ॥

गोष्ठाष्टमी । स्त्री । गोपाष्टम्याम् ॥

गोष्ठी । स्त्री । सभायाम् । परिषदि ॥ संलापे ॥ पोष्यवर्गे ॥ विषं गोष्ठी दरिद्रस्य ॥ गावोऽनेकावाचस्तिष्ठन्त्यस्याम् । घञर्थे कः । अम्बाम्बगोभूमीतिषत्वम् । गौरादित्वान् ङीष ॥

गोष्ठीपतिः । पुं । पोष्यवर्गाभिपालके ॥ सभापतौ ॥

गोष्ठीभेदः । पुं । क्रीडाविशेषे ॥

गोष्पदम् । न । गोखुरश्वभ्रे ॥ त्रि । गवां गतिगोचरे ॥ गोपद प्रमाणे ॥ गोःपदम् । गावः पद्यन्ते यस्मिन्देशे स गोभिः सेवितो गोष्पदः । गोष्पदं सेवितासेवितप्रमाणेष्विति सुट् सत्वषत्वञ्च निपात्यते । असेविते अगोष्पदान्यरण्यानि । प्रमाणे गोष्पदमात्रं क्षेत्रम् ॥

गोसः । पुं । बोले ॥ उषःकाले । विभाते ॥ गां जलं स्यति । षोऽन्तकर्मणि । आत इतिकः ॥

गोसङ्ख्यः । पुं । गोपे ॥ गावः सञ्चष्टे । चक्षिङ् । चक्षिङः ख्याञ् । समिख्य इतिकः ॥

गोसदृक्षः । पुं । गवये ॥

गोसन्दायः । पुं । गोदानकर्त्तरि ॥

गोसम्भवा । स्त्री । श्वेतदूर्वायाम् ॥ त्रि ।

गोर्जाते ॥

गोसर्गः । पुं । प्रभाते ॥

गोसवः । पुं । गोमेधयज्ञे ॥

गोस्तनः । पुं । चतुर्यष्टिकहारे ॥ गोः कुचे ॥

गोस्तनी । स्त्री । कपिलद्राक्षायाम् । द्राक्षायाम् । मनक्कादाख इतिभाषा ॥ गौः स्तनोऽस्याः । गोस्तनसदृशे गोशब्दो गौणः । स्वाङ्गाच्चोपसर्जनादिति ङीष् ॥

गोस्थानम् । न । गोष्ठे ॥ गवांस्थानम् ॥

गोस्थानकम् । न । गोष्ठे ॥ स्वार्थेकः ॥

गोस्वामी । त्रि । गोपतौ ॥

गोहनम् । न । गोमये ॥

गोहरीतकी । स्त्री । विल्वे ॥

गोहालिया । स्त्री । गोवालिया इति ख्याते लताविशेषे ॥

गोहितः । पुं । घोषलतायाम् ॥ विल्वे ॥ श्रीकृष्णे ॥ गवां विहृत्यर्थं गोवर्द्धनगिरिं धृतवान् इतिगोभ्योहितः । चतुर्थीतदर्थेत्यादिना चतुर्थी तत्पुरुषः । गोभूमे भारावतरणेच्छया शरीरग्रहणंकुर्वन् वा हितः ॥ त्रि । गवां हितकारके । गोग्रासाहर्त्तरि ॥

गोहिरम् । न । पादमूले ॥

गौह्यः । पुं । मेनासुते । मैनाके ॥ गोह्याः हिमालयपत्न्याः अपत्यम् । स्त्रीभ्योढगिति ढकिप्राप्ते छन्दसि व्यत्ययो बहुलमिति व्यत्ययेन गर्गादिभ्योयञितियञ् ॥

गौञ्जिकः । पुं । स्वर्णकारे ॥ गुञ्जायाव हर्त्तरि ॥

गौडः । पुं । देशविशेषे ॥ तद्देशसीमा यथा । वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे । गौडदेशः समाख्यातः सर्वविद्याविशारदः ॥ तद्देशस्थे पुंभूम्नि गौडाः ॥ तेच पञ्चोक्ताःस्कन्दपुराणे । सारस्वताः कान्यकुब्जाः गौडमैथिलकौत्कलाः । पञ्चगौडा इति ख्याता विन्ध्यस्योत्तरवासिनः इति ॥

गौडवास्तूकः । पुं । न । वास्तूकप्रभेदे ॥ तदेवतुरहत् पत्रं रक्तं स्याद्गौडवास्तुकम् ॥

गौडिकः । पुं । इक्षुकुट्टके ॥ इक्षौ ॥ गुडेसाधुः । गुडादिभ्यष्ठञ् ॥ न । मद्यविशेषे ॥

गौडी । स्त्री । सुराप्रभेदे । वाल्कल्याम् ॥ रागिणीविशेषे । मेघरागस्य योषिति ॥ काव्यरीतिप्रभेदे ॥ यथा । ओजः प्रसादमाधुर्य गुणत्रितयभेदतः । गौडवैदर्भपाञ्चालरीतयः परिकीर्त्तिता इति ॥

गौणः । त्रि । गुणयोगात्प्रवृत्ते ॥ अमु

ख्ये ॥ यत्नोपपादितेर्थे ॥ गुणादागतः । अण् ॥

गौणधातुः । पुं । उपधातौ ॥

गौणसन्न्यासी । स्त्री । अत्यागिनि । कर्म्मफलत्यागित्वेपि कर्म्मानुष्ठायिनि । अघे ॥

गौणी । स्त्री । वृत्तिविशेषे ॥ अशीतिप्रकारलक्षणान्तर्गतलक्षणाविशेषे ॥ पश्यात्र साहित्यदर्पणम् ॥

गौतमः । पुं । नचिकेतसः पितरि मुनिविशेषे । उद्दालके गोतमो गौतम इति प्रसिद्धे ॥ मुनिविशेषे । शतानन्दे ॥ शाक्यवंशावतीर्णे बुद्धमुनिविशेषे । शाक्यसिंहे । शौद्धोदनौ ॥ कृपे ॥ गोतमस्यायं शिष्यः । तस्येदमित्यण् । तत्रापावतारादौ ॥ गोतमस्यापत्ये । ऋष्यण् । बहुत्वे गोतमाः ॥

गौतमसम्भवा । स्त्री । गोदावर्य्यां नद्याम् ॥

गौतमी । स्त्री । उमायाम् । दुर्गायाम् ॥ गोरोचनायाम् ॥ गोदावर्य्याम् ॥ कृप्याम् ॥ शाक्यसंघगौतमप्रणीतायां विद्यायाम् ॥ षोडशपदार्थप्रतिपादिकायामहल्यापतिगौतमप्रोक्तायामर्थविद्यायाम् ॥ शार्ङ्गरवाद्यञो ङीन् ॥ राक्षसीविशेषे ॥

गौत्तमः । पुं । स्थावरविषस्य प्रभेदे ॥

गौधारः । पुं । गोधिकासुते । अहेर्गोधायां जाते चन्दनगोह इति ख्याते ॥ गोधाया अपत्यम् । आरगुदीचामित्यारक् ॥

गौधूमः । पुं । गोधूमविकारे ॥ गोधूमस्यावयवो विकारो वा । बिल्वाद्यण् ॥

गौधूमीनम् । न । गोधूमक्षेत्रे ॥ गोधूमानां भवनं क्षेत्रम् । धान्यानां भवने क्षेत्रे खञ् ॥

गौधेयः । पुं । गोधिकात्मजे । गौधेरे ॥ गोधाया अपत्यम् । शुभ्रादित्वात् ढक् ॥

गौधेरः । पुं । गौधारे ॥ गोधाया अपत्यम् । गोधाया ढ्रक् ॥

गौरः । पुं । श्वेतसर्षपे ॥ चन्द्रे ॥ धववृक्षे ॥ अरुणवर्णे ॥ गोरा इति ख्याते पीतिवर्णे ॥ श्वेतवर्णे ॥ त्रि । तत्तद्वर्णवति ॥ विशुद्धे ॥ न । पद्मकेशरे ॥ कुङ्कुमे ॥ स्वर्णे ॥ गुरति गच्छते मनोऽत्र वा । गुरी उद्यमने गुङ् गतौ वा । ऋज्रेन्द्रेति साधुः ॥ गूर्यतेऽनेन वा । गुरी० । हलश्चेति घञ् । गौर एव । प्रज्ञाद्यण् ॥

गौरक्ष्यम् । न । पाशुपाल्ये ॥

गौरजीरकः । पुं । अजाज्याम् । श्वेतजीरके ॥

गौरतित्तिरः । पुं । कपिञ्जले ॥

गौरत्वच् । पुं । इङ्गुदीवृक्षे ॥

गौरवम् । न । अभ्युत्थाने ॥ गुरुत्वे । लाघवाभावे ॥ गुरोर्भावः । इगन्ताच्च लघुपूर्वादित्यण् ॥

गौरवितः । त्रि । आर्यमिश्रे ॥ गौरवः सञ्जातोऽस्य । तारकादित्वादितच् ॥

गौरशाकः । पुं । गिरजमधूके । अल्पपत्रे ॥

गौरसर्षपः । पुं । श्वेतसर्षपे । सिद्धार्थे ॥ गौरश्चासौ सर्षपश्च ॥ त्रिभी राजसर्षपैः परिमिते ॥

गौरसुवर्णम् । न । चित्रकूटप्रसिद्धे पत्रशाकप्रभेदे । वारिजे । गन्धशाके ॥

गौरा । स्त्री । गौर्याम् । शिवायाम् ॥ इति द्विरूपः ॥

गौरार्द्रकः । पुं । स्थावरविषविशेषे ॥

गौरास्यः । पुं । कृष्णवानरे ॥

गौरिका । स्त्री । अष्टवर्षीयांकन्यायाम् ॥ गौर्येव । कः ॥

गौरिलः । पुं । सिद्धार्थे ॥ लौहचूर्णे ॥

गौरी । स्त्री । पार्वत्याम् ॥ योगाग्निदग्धदेहा या पुनर्जाता हिमालये । शङ्खेन्दुकुन्दधवला ततो गौरीति सा स्मृता ॥ अजातरजःकन्यायाम् ॥ हरिद्रायाम् ॥ दारुहरिद्रायाम् ॥ गोरोचनायाम् ॥ प्रियङ्गुवृक्षे ॥ वसुधायाम् ॥ नदीविशेषे ॥ वरुणभार्यायाम् ॥ बुद्धशक्तिविशेषे । मायादेव्याम् ॥ मञ्जिष्ठायाम् ॥ श्वेतदूर्वायाम् ॥ मल्लिकायाम् ॥ तुलस्याम् ॥ सुवर्णकदल्याम् ॥ आकाशमांस्याम् ॥ रागिणी विशेषे । मालवरागभार्यायाम् ॥ गौरवर्णान्वितायाम् ॥ गूयते । गुङ् शब्दे । ऋज्रेन्द्रेति रन्तो गौरो निपातितः । गौरो वर्णोऽस्त्यस्याः । गौरादित्वान् ङीष् ॥

गौरीगुरुः । पुं । हिमवति ॥ गौर्याः गुरुः ॥

गौरीजम् । न । अभ्रके ॥

गौरीतक्रम् । न । तक्रविशेषे ॥ यथा । लवणं मरिचं शिग्रुं जीरं नारङ्गजन्मचम् । एतच्चूर्णान्वितं तक्रं धूपयेद् घृतहिङ्गुना ॥ पार्वत्या विहितं तक्रं सर्वदोषनिबर्हणम् । सुरुच्यं पाचनं दिव्यं महेशस्य सदाप्रियमिति ॥

गौरीपुत्रः । पुं । कार्त्तिकेये ॥ गणेशे ॥

गौरीपुष्पः । पुं । प्रियङ्गुवृक्षे ॥

गौरीललितम् । न । हरिताले ॥

गौरीशिखरम् । न । तीर्थविशेषे ॥

गौरीसुतः । त्रि । दशवर्षोढाजाते ॥

गौरुतल्पिकः । पुं । गुरुस्त्रीगामिनि ॥ गुरुतल्पं गच्छति । गच्छतौ परदा

गवादिभ्यः इति ठक् ॥

गौल्मिकः । पुं । मुष्ककवृक्षे ॥

गौल्यम् । न । मधुरे ॥

गौशतिकः । त्रि । गोशतस्वामिनि ॥

गौष्ठीनम् । न । भूतपूर्वगोष्ठे ॥ पूर्वंभूतं गोष्ठम् । गोष्ठात् खञ् भूतपूर्वे इति खञ् ॥ तीर्थविशेषे ॥

ग्रथितः । त्रि । गुम्फिते । दृब्धे । कृतग्रन्थने । गाँथा इति गूँथा इति च भाषा ॥ आक्रान्ते ॥ हते । हिंसिते ॥ ग्रथ्यते स्म । ग्रन्थसन्दर्भे । क्तः

ग्रथितमाल्यः । पुं । वटुपक्षी ॥

ग्रन्थः । पुं । गुम्फे । ग्रन्थनायाम् ॥ धने ॥ शास्त्रे ॥ अक्षरसङ्ख्यायाम् । द्वात्रिंशदक्षरनिर्मितौ । अनुष्टुप्श्लोके ॥ प्रबन्धे । विवक्षितार्थप्रतिपत्त्यनुकूलत्वे सति निबद्ध्यमानवाक्यसमुदाये । सन्दर्भे ॥ ग्रन्थनम् । ग्रन्थ० घञ् ॥

ग्रन्थकः । पुं । द्वात्रिंशदक्षरान्विते अनुष्टुप्छन्दःश्लोके ॥ संज्ञायां कन् ॥

ग्रन्थकर्त्ता । पुं । ग्रन्थकारे ॥

ग्रन्थकुटी । स्त्री । लेखभूमौ । लेख्यस्थाने । दफतरखाना इति आफिस् इति च अपराम्लजभाषा ॥

ग्रन्थनम् । न । गुम्फने । ग्रन्थने । सन्दर्भे ॥

ग्रन्थना । स्त्री । ग्रन्थने ॥

ग्रन्थसन्धिः । पुं । काण्डे ॥ पटले ॥ स्थाने ॥ प्रकरणे ॥ पर्वणि ॥ अध्याये ॥ आह्निके ॥ उल्लासे ॥

ग्रन्थिः । पुं । ग्रन्थिपर्णे ॥ गाँठ इति भाषा प्रसिद्धे वस्त्रादिबन्धे ॥ वंशादिसन्धौ । पर्वणि । पोरी इति भाषा ॥ भद्रमुस्तायाम् ॥ हिताबल्याम् ॥ पिण्डालौ ॥ कौटिल्ये ॥ अन्योन्याध्यासे ॥ मायाख्यपाशे ॥ रुग्भेदे ॥ ॥ तस्य निदानसम्प्राप्ती यथा । वातादयो मांसमसृक्प्रदुष्टाः सन्दूष्य मेदश्च तथा शिराश्च वृत्तोन्नतं विग्रथितन्तु शोथं कुर्वन्त्यतो ग्रन्थिरिति प्रदिष्ट इति ॥ ग्रन्थ्यते । ग्रथि० । सर्वधातुभ्य इन् ॥ खनिकष्यज्यसिवसिवभिसमिध्वनिग्रन्थ्यर्शिवचरिभ्यश्चेति इर्वा । स्वरभेदः ॥

ग्रन्थिकः । पुं । करीरे ॥ दैवज्ञे ॥ सहदेवपाण्डवे ॥ न । पिप्पलीमूले ॥

ग्रन्थिपर्णः ॥ पुं । न । गुग्गुलौ ॥ ग्रन्थिप्रतिकृतिः । इवेप्रतिकृताविति कन् ॥

ग्रन्थिका । स्त्री । पिप्पलीमूले ॥

ग्रन्थितः । त्रि । ग्रथिते । गुम्फिते ॥ ॥ ग्रथ्यते स्म । ग्रथि० । क्तः ॥

ग्रन्थिदला । स्त्री । मालाकन्दे ॥

ग्रन्थिदूर्ब्बा । स्त्री । मालादूर्बायाम् ॥

ग्रन्थिपर्णः । पुं । चोरनामगन्धद्रव्ये ॥ न । बर्हिपुष्पे । कुक्कुरे । कुकुरौंदा इति ख्याते ॥ ग्रन्थिपर्णं तिक्ततीक्ष्णं कटूष्णं दीपनं लघु । कफवातविषश्वाससकण्डूदौर्गन्ध्यनाशनम् ॥ अस्य लेपनगुणः । हन्तताऽलक्ष्मीराक्षसज्वरनाशित्वमिति ॥ ग्रन्थौ पर्णान्यस्य । ग्रन्थय इव पर्णान्यस्येति वा ॥

ग्रन्थिपर्णा । स्त्री । जतुकालतायाम् ॥

ग्रन्थिपर्णी । स्त्री । गण्डदूर्वायाम् ॥

ग्रन्थिपाशः । पुं । ग्रन्थ्यात्मनिमायाख्यपाशे ॥

ग्रन्थिफलः । पुं । शाकुरण्डवृक्षे ॥ मदनवृक्षे ॥ कपित्थवृक्षे ॥

ग्रन्थिभेदः । पुं । गँठकटा इति भाषा प्रसिद्धे तस्करविशेषे । यःपटप्रान्तस्थितं सुवर्णादिकं ग्रन्थिमोक्षणेन चोरयतिस इत्यर्थः ॥

ग्रन्थिमान् । पुं । अस्थिसंहारिणि । हाडजोडा इति भाषा ॥ त्रि । ग्रन्थियुक्ते ॥ ग्रन्थिरस्त्यस्यास्मिन्वा । मतुप् ॥

ग्रन्थिमत्फलः । पुं । लकुचे ॥

ग्रन्थिमूलम् । न । गृञ्जने । शिखिमूले ॥

ग्रन्थिमूला । स्त्री । मालादूर्वायाम् ॥

ग्रन्थिलः । पुं । करीरद्रुमे ॥ विकङ्कततरौ ॥ तण्डुलीयशाके ॥ छिलावल्याम् ॥ पिण्डालौ ॥ चौरकनामगन्धद्रव्ये ॥ न । पिप्पलीमूले ॥ आर्द्रके ॥ त्रि । ग्रन्थियुक्ते ॥ ग्रन्थिरस्यास्ति । सिध्मादित्वाल्लच् ॥ ग्रन्थिं लाति वा । ला० । कः ॥

ग्रन्थिला । स्त्री । भद्रमुस्तायाम् ॥ गण्डदूर्वायाम् ॥ मालादूर्वायाम् ॥

ग्रन्थिवर्णी । पुं । ग्रन्थिपर्णे ॥

ग्रन्थिहरः । पुं । अमात्ये । मन्त्रिणि ॥

ग्रन्थीकम् । न । पिप्पलीमूले ॥

ग्रसनम् । न । ग्रासे ॥ ग्रसुअदने । ल्युट् ॥

ग्रसितः । त्रि । कृतग्रासे । कवलिते ॥

ग्रसिष्णुः । त्रि । ग्रसनशीले ॥ न । प्रलयकाले ॥

ग्रस्तः । त्रि । लुप्तवर्णपदे । असम्पूर्णोच्चारिते । अपूर्णवचसि ॥ लुप्तो वर्णः पदं वा यत्र वाक्ये पदे वा ॥ ग्रस्यते । ग्रसु० । क्तः । यस्यविभाषेति पाक्षिक इडभावः ॥ भक्षिते । भुक्ते ॥

ग्रहः । पुं । अनुग्रहे ॥ निर्बन्धे । आग्रहे । अभिनिवेशे ॥ ग्रहणे ॥ रणोद्यमे ॥ पूतनादिबालग्रहे ॥ सैंहिकेये ॥ उपरागे । राहुकर्तृकचन्द्रादिकर्मकग्रहणरूपक्रियायाम् ॥ सोमादिपात्रे ॥ यथा । सोमामग्र्यां सुराग्रहान् गृह्णाति ॥ सूर्यादिनवसु

॥ ते च यथा । सूर्य्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः । शुक्रः शनैश्चरो राहुः केतुश्चेति नव ग्रहाः ॥ एषामष्टधा गतिर्यथा । वक्राऽतिवक्रा कुटिला मन्दा मन्दतरा समा । शीघ्रा शीघ्रतरा चैवं ग्रहाणां गतिरष्टधा ॥ ग्रहणम् गृह्णातिवा । ग्रह उपादाने । ग्रहवृदृनिश्चिगमश्चेत्यप् । विभाषाग्रहइत्यज्वा ॥ बन्धने ॥ गृह्यते बध्यते चेषणीयेन ग्रहसंज्ञकेन बन्धनेनेतिभाष्यम् ॥

ग्रहकल्लोलः । पुं । राहौ ॥

ग्रहणम् । न । स्वीकारे ॥ हस्तयोर्व्यापारे । आदाने ॥ आदरे ॥ करे । हस्ते ॥ उपलब्धौ ॥ बन्द्याम् ॥ धीगुणे ॥ प्रत्याये ॥ इन्द्रिये ॥ बन्धने ॥ उपरागे । पर्वप्रतिपत्सन्धौ राहुणा सूर्य्यचन्द्रमसोर्ग्रसने ॥ अथ सूर्य्यचन्द्रयोर्ग्रहणकारणम् । यथा । भत्रिपादान्तरे राहोः केतोर्वा संस्थितो रविः । चतुष्पादन्तरे चन्द्रस्तदासम्भाव्यतेग्रहः ॥ यस्मिन्नृक्षे रविस्तस्मा चतुर्दशगतः शशी । पूर्णिमाप्रतिपत्सन्धौ राहुणाग्रस्यते शशी ॥ कृष्णपक्षे तृतीयायां मासर्क्षं यदि जायते । तत सूर्य्योदये सूर्य्यो राहुणा ग्रस्यते रविः ॥ ग्रहणकालिकरविचन्द्रयोर्मेघेनाच्छादनानाच्छादनकारणं यथा । रविर्भौमनवांशेतु निरभ्रं ग्रासमादिशेत् । बुधशौरिनवांशेतु मलिनं धुम्रवर्णकम् ॥ गुरोरंशक मांसाद्य दृश्यते सवलाहकः । शशिशुक्रनवांशेतु प्रावृट्काले महज्जलम् ॥ अन्यत्राव्यक्तभूतौ तौ दृश्येते छादिताम्बरा विति ॥ चन्द्रग्रहश्चन्द्रवारे सूर्य्ये सूर्य्यग्रहस्तथा । चूडामणिरयं योगस्तत्रानन्तफलं स्मृतम् ॥ अन्यस्माद्ग्रहणात् कोटिगुणमत्रफलं लभेत् ॥ इतिविशेषः ॥ गृह्यतेऽनेन । ग्रह० । करणेल्युट् । सामान्येनपुंसकम् ॥

ग्रहणिः । स्त्री । ग्रहणीरोगे ॥ गृह्णाति । ग्रह० । ग्रहेरनिः ॥

ग्रहणी । स्त्री । पुरीषपूर्णायामग्न्यधिष्ठाननाड्याम् ॥ रोगविशेषे । प्रवाहिकायाम् । सङ्ग्रहण्याम् ॥ तस्यनिदानसम्प्राप्ती यथा । अतीसारे निवृत्तेऽपि मन्दाग्ने रहिताशिनः । भूयः सन्दूषितो वह्निर्ग्रहणीमपि दूषयेत् ॥ एकैकशः सर्वशश्च दोषैरत्यर्थमूर्च्छितैः । सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ॥ पक्वंवा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् । ग्रहणीरोगमाहुस्तमायुर्वेदविदोज

ना इति । अतीसारेऽग्रहधातुप्रवृत्तिः ग्रहण्यास्तु बहुशापिमलस्य प्रवृत्तिरिति तयोर्भेदः ॥ गृह्णाति जाठराग्निम् गृह्यते वा । ग्रह० । कृत्यल्युटो बहुलमिति ल्युट् । ङीप् ॥ यद्वा । ग्रहेरनिः । कृदिकारादितिङीष् ॥

ग्रहणीरुक् । स्त्री । ग्रहण्याम् । प्रवाहिकायाम् ॥

ग्रहणीहरम् । न । लवङ्गे ॥ त्रि । ग्रहणीहारिणि ॥

ग्रहदेवता । स्त्री । ग्रहाणांदेवते ॥ यथा । शिवाधिदैवतं सूर्यं वह्निप्रत्यधिदैवतम् । १ । उमाधिदैवतंसोमं जलप्रत्यधिदैवतम् । २ । स्कन्दाधिदैवतंभौमं क्षितिप्रत्यधिदैवतम् ३ ॥ नारायणाधिदैवञ्च विष्णुप्रत्यधिदैवतम् । बुधम् । ४ । ब्रह्माधिदैवं सूर्याख्य मिन्द्रप्रत्यधिदैवतम् । ५ । शक्राधिदैवतं शुक्रं शचीप्रत्यधिदैवतम् ६ ॥ यमाधिदैवतं प्रजापतिप्रत्यधिदैवतम् ७ ॥ कालाधिदैवं सूर्याख्यं सर्पप्रत्यधिदैवतम् । ८ ॥ चित्रगुप्ताधिदैवञ्च ब्रह्मप्रत्यधिदैवतम् ९ ॥ अग्न्यादिषु च । अग्निरापो धरा विष्णुरिन्द्रेन्द्राण्यौ प्रजापतिः । सार्पराशी तथाब्रह्मा ग्रहाणां देवताः स्मृताः । इति वधुमैनकीमत

म । वृद्धमानक्यान्तु शिवादीनामेव ग्रहदेवतात्वमुक्तम् ॥

ग्रहद्रुमः । पुं । शाकवृक्षे ॥

ग्रहनायकः । पुं । सूर्ये ॥ शनैश्चरे ॥

ग्रहनाशः । पुं । छातियान इतिगौडभाषाप्रसिद्धे वृक्षे ॥

ग्रहनाशनः । पुं । ग्रहनाशे ॥

ग्रहनेमिः । पुं । चन्द्रे ॥

ग्रहपतिः । पुं । सूर्ये ॥ ग्रहाणांपतिः ॥ अर्कद्रुमे ॥

ग्रहपुषः । पुं । भानौ । सूर्ये ॥

ग्रहभक्तिः । स्त्री । केषांजनपदानां को ग्रहोऽधिपतिरित्येतत् यत्र निरूप्यते तद्ग्रन्थे ॥ ग्रहाणांभक्तिर्विभागः ॥ विशेषं पश्य वाराह्यां १६ अध्याये ॥

ग्रहभिन्नम् । न । भौमादिग्रहैर्भिन्ने ॥ ग्रहेण ग्रहैर्वाभिन्नम् ॥

ग्रहभिन्नभम् । न । भौमादिग्रहैर्भिन्ने नक्षत्रे ॥ ग्रहभिन्नञ्चतत् भञ्च ॥

ग्रहभीतिजित् । पुं । गन्धद्रव्यविशेषे । चीडायाम् । दारुगन्धायाम् ॥

ग्रहमैत्रम् । न । ग्रहाणांमित्रामित्रादिविचारे ॥ यथा । सूर्यस्य मित्राणि कुजेन्दुजीवाः समो बुधोऽरी शनिभार्गवौ च । चन्द्रस्य मित्रेतु दिवाकरज्ञौ समाः कुजाम्नसितेज्य

भौमाः ॥ कुजस्य मित्राणि रवीन्दुजीवाः समौ तथा मन्दभृगू बुधोरिः । बुधस्यमित्रे सितभास्करौ समाः कुजेज्यमन्दा रिपुरिन्दुरेव ॥ मित्राणि जीवस्यकुजेन्दुसूर्याः शनिःसमः शुक्रबुधौतुशत्रू । शुक्रस्य मित्रेशनिरौहिणेयौ । समौ कुजेज्यौतु रिपूरवीन्दू ॥ शनेस्तुमित्रे भृगुचन्द्रपुत्रौ जीवः समोऽन्येप्यरयस्तुशेषाः ॥

ग्रहयागः । पुं । ग्रहाणांयज्ञे ॥ अस्यप्रयोजनन्तु । शान्तौपुष्टौ महेशानि तथा क्रूरेऽपिकर्मणि । ग्रहयागं प्रकुर्वाणो वाञ्छितार्थं मवाप्नुयादिति महानिर्वाणतन्त्रम् । तस्यशान्तिकस्वेमलमासादावपि कर्त्तव्यत्वम् । पौष्टिकत्वेतु शुद्धकाले ॥ अपिच । गोचरे वा विलग्ने वा ये ग्रहारिष्टसूचकाः । पूजयेत् तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥ श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् । दृष्ट्यायुः पुष्टिकामो वा तथै वाऽभिचरन्नपीति ग्रहयागतत्त्वम् ॥ अस्य प्रयोगो महानिर्वाणे द्रष्टव्यः ॥

ग्रहयुद्धम् । न । ग्रहयोरायोधने ॥ वियति चरतां ग्रहाणा मुपर्य्युपर्य्यात्ममार्गसंस्थानाम् । अतिदूराद्दृग्विषये समतामिव सम्प्रयातानाम् ॥ आसन्नक्रमयोगाद्भेदोल्लेखांऽशुमर्द्दनासव्यैः । युद्धं चतुष्प्रकारं पराशरमुनिभि रुक्तम् ॥ भेदे वृष्टिविनाशो भेदः सुहृदां महाकुलानाञ्च । उल्लेखे शस्त्रभयं मन्त्रिविरोधः प्रियान्नत्वम् ॥ अंशुविरोधे युद्धानि भूभृतां शस्त्ररुक्क्षुदवमर्द्दाः । युद्धे चाप्यपसव्ये भवन्ति युद्धानि भूपानाम् ॥ विशेषोबाराह्यां १७ अध्याये॥

ग्रहयुद्धभम् । न । ग्रहयुद्धर्क्षे । यस्मिन्नृक्षे ग्रहयोर्युद्धंजातं तस्मिन् ॥

ग्रहराजः । पुं । रवौ ॥ चन्द्रे ॥ ग्रहाणां राजा । टच् ॥ गुरौ ॥

ग्रहवर्षफलाध्यायः । पुं । कस्य ग्रहस्य कस्मिन्वर्षे कीदृशानि शुभफलानि भवन्ति तन्निरूपणपरे ग्रन्थसन्धौ ॥ यतोवराहमिहिरेण पूर्व्वमेवप्रतिज्ञातमासीत् । वर्षे यच्चस्यफलंमासेचमुनिप्रणीतमालोक्य । तद्वृत्तैर्वक्ष्येऽहं होरातन्त्रोक्तविधानइति ॥ विशेषं पश्यवाराह्यां १९ अध्याये ॥

ग्रहवह्निः । पुं । ग्रहाणां होमाधिकरणे ॥ तेच नव सङ्ख्यकाः । यथा । कपिलः पिङ्गलो धूम्रः केतुश्च जठराग्निकः । शिखीच हाटकश्चैव महातेजा हुताशनः । हुताशनश्च विज्ञेयो नवैतेग्रहवह्नयइति ॥

ग्रहशृङ्गाटकः । पुं । वाराह्याः २० अध्याये ॥

ग्रहसमागमः । पुं । वाराह्याः १८ अध्याये निरूपितः ॥

ग्रहाधारः । पुं । ध्रुवर्क्षे ॥

ग्रहामयः । पुं । भूतादिनाजाते रोगे । आवेशे ॥

ग्रहाशी । पुं । ग्रहनाशवृक्षे ॥

ग्रहाह्वयः । पुं । भूताङ्कुशद्रुमे ॥

ग्रहीता । त्रि । गृहयालौ । ग्रहणकर्त्तरि ॥ गृह्णाति । ग्रह० । तृन् ॥

ग्रामः । पुं । संवसथे । विप्रादिवर्णप्राये प्राकारपरिखादिरहिते हट्टादिशून्ये बहुजनवासस्थाने ॥ विप्राश्च विप्रभृत्याश्च यत्रचैव वसन्तिहि । स तु ग्राम इति प्रोक्तः शूद्राणां वास एव वा ॥ तथा शूद्रजनप्रायाः सुसमृद्धकृषीवलाः । क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका ॥ शब्दादिपूर्वको ग्रामः समूहार्थे । यथा । शब्दग्रामः भूतग्रामः । इत्यादिः ॥ संपूर्वः संयुगेऽस्मृतः ॥ स्वरविशेषे ॥ सप्त स्वरास्त्रयो ग्रामा मूर्च्छना एकविंशतिः ॥ तेच षड्जग्रामो मध्यमग्रामः पञ्चमग्रामश्चेति त्रयः । ग्रामलक्षणं । यथा कुटुम्बिनः सर्वेऽप्येकी भूताभवन्तिहि । तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते ॥ षड्जग्रामो भवेदादौ मध्यमग्राम एवच । गान्धारग्राम इत्येतत् ग्रामत्रयमुदाहृतम् ॥ तथा । नन्द्यावर्त्तो जीमूतः सुभद्रो ग्रामकास्त्रयः । षड्जमध्यमगान्धारास्त्रयाणांजन्महेतवः ॥ ग्रसते ग्रस्यतेवा । ग्रसुअदने । ग्रसेरात्वेतिमन् आत्वञ्च ॥

ग्रामकूटः । पुं । शूद्रविशेषे । मतान्तरे । महता इतिभाषा ॥

ग्रामगृह्या । स्त्री । ग्रामवहिर्भूतसेनायाम् ॥ पदास्वैरिवाह्यापक्ष्येषु चेति क्यप् ॥

ग्रामजानिष्यावी । स्त्री । मल्लनिष्पावाम् ॥

ग्रामणीः । पुं । नापिते ॥ पत्नौ ॥ त्रि । प्रधाने ॥ ग्रामाधिपतौ ॥ भोगिके ॥ स्त्री । वेश्यायाम् ॥ ग्रामेयायाम् ॥ नीलिकायाम् ॥ ग्रामंनयति । णीञ् ० । सत्सूद्विषद्रुहेत्यादिना क्विप् । अग्रग्रामाभ्यामिति णत्वम् ॥

ग्रामतक्षः । पुं । बहूनां साधारणो काष्ठतक्षा ग्रामाधीने वर्द्धकौ ॥ ग्रामस्यतक्षा । ग्रामकौटाभ्यांतक्ष्ण इति टच् ॥

ग्रामता । स्त्री । ग्रामसमूहे ॥ ग्रामाणांसमूहः । ग्रामजनबन्धुभ्यस्तल् ॥

ग्रामधर्म्मः । पुं । व्यवाये ॥ ग्रामेभवः । युवादित्वादण् । सचासौ धर्मश्च ॥

ग्रामभृतः । पुं । ग्रामप्रेष्ये ॥ विप्रश्चेत् रूपस्वमाचाराच्युतः ॥

ग्राममङ्गुरिका । स्त्री । ग्रामयुद्धे ॥ मृ क्रीभाषे ॥

ग्राममुखः । पुं । हट्टे ॥

ग्राममृगः । पुं । कुक्कुरे ॥

ग्रामयाजकः । पुं । अग्राह्मणविशेषे । ग्रामस्थनानावर्णानां पुरोहिते ॥ ग्रामाः सन्ति ॥ इतिश्रीधरस्वामी ॥

ग्रामयाजी । पुं । बहूनांयाजके ॥

ग्रामशालकः । पुं । भगिनीपतौ ॥

ग्रामाधानम् । न । मृगयायाम् ॥

ग्रामाधीनः । त्रि । ग्रामवशवर्त्तिनि नापितकर्तृकादौ ॥ ग्रामेऽधि । सप्तमीतित्समासः । अषडक्षेतिखः ॥

ग्रामान्तम् । न । उपशल्ये । ग्रामसन्निकटे ॥ ग्रामस्यान्तम् समीपम् ॥

ग्रामिणी । स्त्री । नीलीवृक्षे ॥

ग्रामी । त्रि । ग्रामविशिष्टे । ग्रामम इति भाषा ॥ यथा । अडीचवाल हरीत वाल इत्यादि ॥

ग्रामीणः । पुं । ग्राम्यशूकरे ॥ कुक्कुरे ॥ काके ॥ त्रि । ग्रामोद्भूते ॥ ग्रामे भवः । खञ् ॥

ग्रामीणा । स्त्री । नीलिकौषधौ ॥ पालङ्काशाके ॥ ग्रामेभवा । ग्रामाद्यखञावितिखञ् । टाप् ॥

ग्रामेयकः । पुं । ग्राम्ये ॥ ग्रामेभवः । कत्र्यादित्वात् ढकञ् ॥

ग्रामेया । स्त्री । ग्राम्यनार्याम् ॥

ग्रामेशः । पुं । ग्रामस्याधीशे । ग्रामेश्वरे ॥

ग्राम्यम् । न । स्त्रीकरणे । रतवन्धे ॥ त्रि । प्राकृते । मूढे । ग्रामभवे । ग्रामीणे ॥ द्वन्द्वालिकन्याघटतौलिचापा ग्राम्या निशायां वृषमेषकौच ॥ अश्लीले । भण्डादिवचने ॥ छागादिषु ॥ छागमेषवृषाश्वाद्याः ग्राम्याः प्रोक्ता महर्षिभिः । ग्राम्या वातहराः सर्वे दीपनाः कफपित्तलाः ॥ मधुरा रसपाकाभ्यां वृंहणा बलवर्द्धनाः ॥ ग्रामेभवः । ग्रामाद्यखञा वितिशेषिकोयः ॥

ग्राम्यकन्दः । पुं । स्थलकन्दे । वनओल इति भाषा ॥ ग्राम्यकन्दसुदोषलः ॥

ग्राम्यकर्कटी । स्त्री । कुष्माण्डे ॥

ग्राम्यकुङ्कुमम् । न । कुसुम्भे ॥

ग्राम्यधर्म्मः । पुं । ग्रामधर्मे । मैथुने ॥ ग्रामेभवाः ग्राम्याः हालिकशाकटिकप्रभृतयः । तेषांधर्मः ॥

ग्राम्यपशुः । पुं । ग्रामजातजन्तौ ॥ सच सप्तविधो यथा । गौर्मेषोऽजो

मनुष्यस्य अश्वाश्वतरगर्द्दभाः। इति॥

ग्राम्यमद्गुरिका । स्त्री । शृङ्गीमत्स्ये ॥

ग्राम्यमृगः । पुं । कुक्कुरे ॥

ग्राम्यराशिः । पुं । मिथुनकन्यातुलावृश्चिकधनुष्कुम्भेषु ॥ राशौ मेषवृषयोः ॥

ग्राम्यवल्लभा । स्त्री । पालङ्क्यशाके ॥

ग्राम्यशूकरः । पुं । ग्रामोत्पन्नवराहे । विड्वराहे ॥

ग्राम्या । स्त्री । तुलस्याम् ॥ नखनिष्पाविकायाम् ॥ नील्याम् ॥ वृत्त्यनुप्रासघटकवृत्तिभेदेषु कोमलापर्याये ॥

ग्राम्याश्वः । पुं गर्द्दभे ॥

ग्रावा । पुं । प्रस्तरे ॥ पृथ्वीधरे । पर्व्वते ॥ ग्रतते । ग्रसु अदने । अन्येभ्योपीति डः । आवनति । वनसम्भक्तौ शब्दे वा । विच् । ग्रश्चासावावाच ॥ ग्रसते । अन्ये॰ वनिप् । पृ॰ वा ॥ यद्वा । गिरति गृणाति वा । गृनिगरणे शब्दे वा । अन्येभ्योपीति वनिप् । पृ॰ ॥ यद्वा । गरति । गृसेके । मू॰ कः । अवति । अवरक्षणादौ । बाहुलकात् कनिः। ग्रश्चासावावाच ॥ मेघ ॥ इतिशिम्वः ॥ त्रि । दृढे ॥ इति शब्दरत्नावली ॥

ग्रावस्तुत् । पुं । ऋत्विग्विशेषे ॥ ग्राव भासेति क्विप् ॥

ग्रासः । पुं । कवले । पिण्ड । मुखपूरणाम्नादौ ॥ यथा । कुक्कुटाण्डप्रमाणस्य यावान्वा प्रविशेन्मुखम् । एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनम् ॥ इति प्रायश्चित्तेपराशरः ॥ ग्रस्यते । ग्रसु॰। अकर्त्तरीतिघञ् ॥

ग्राहः । पुं । गाह इति भाषा प्रसिद्धे जलजन्तुविशेषे । अवहारे ॥ ग्रहणे ॥ गृह्णाति । ग्रह॰। विभाषाग्रहइति व्यवस्थितविभाषया जलचरे नित्यमेव णप्रत्ययः । स्वार्थग्रहणादिषु घञ्वा ॥ शिशुके ॥

ग्राहकः । पुं । व्याधानांघातिपक्षिणि । श्येने ॥ सितावरशाके ॥ विषवैद्ये ॥ त्रि । गाहक इति भाषाप्रसिद्धे ग्रहीतरि ॥ धान्यानांग्रहीतरि ॥ गृह्णाति । ग्रहउपादाने । ण्वुल् ॥

ग्राहयिता । त्रि। ग्रहणकारयितरि ॥

ग्राहिणी । स्त्री । क्षुद्रदुरालभायाम् ॥ च्चिरइति इतिगौडभाषाप्रसिद्धे ताम्रमूलावृक्षे ॥

ग्राहितः । त्रि । ग्रहणं प्रापिते । ग्रहणकराया इतिभाषा ॥

ग्राही । पुं । कपित्थे ॥ त्रि । ग्रहणकर्त्तरि । ग्राहके ॥ मलवद्धके । धारके ॥ गृह्णाति । ग्रह॰। ग्रहादिभ्या-श्चिनिः ॥

ग्राहिमत्तः । पुं । कपित्थामने ॥

ग्राह्यः । त्रि । उपादेये । ज्ञातुमु-चिते ॥

ग्रीवा । स्त्री । कन्धरायाम् । शिरोधरायाम् ॥ तच्छिरायाम् ॥ गिरन्त्यनया गीर्य्यतेऽनयावा । ग्रेत्वषड्जिह्वादीवेतिसाधुः ॥

ग्रीवी । पुं । स्त्री । उष्ट्रे ॥ त्रि । प्रशस्तग्रीवायुक्ते ॥ अतिशयिता प्रशस्तावा ग्रीवा अस्यास्य । ग्रीवादिभ्यादिनिः ॥

ग्रीष्मः । पुं । निदाघर्त्तौ । ज्येष्ठाषाढयोः । उष्मागमे ॥ अथज्ञातस्य फलं यथा । ग्रीष्मोद्भवो भोगभवानुरक्तो वक्ता सुशीलो जलकेलिशीलः । विद्याधनैश्वर्य्ययशोमनोज्ञो धन्वी सुवेशः परदारचित्तइति ॥ त्रि । तप्तति ॥ ग्रसतेरसान् । ग्रसु० । ग्रीष्मइत्युणादिसूत्रेणनिपातितः ॥

ग्रीष्मजा । स्त्री । नवल्याम् । लोणा इति गौडप्रसिद्धे फलवृक्षे ॥ ग्रीष्मे जायते । जनी० । डः ॥ नवमाल्याम् ॥

ग्रीष्मपुष्पी । स्त्री । करुणीपुष्पवृक्षे ॥

ग्रीष्मभवा । स्त्री । नवमल्लिकायाम् ॥ ग्रीष्मेभवोऽस्याः ॥

ग्रीष्मसुन्दरः । पुं । } गीमाइति
ग्रीष्मसुन्दरकः । पुं । } गौडप्रसि-
द्धे शाकविशेषे ॥

ग्रीष्महासम् । न । इन्द्रतूले । वृद्धसूत्रके । बुढियाकासूत इति भाषा ॥

ग्रीष्मी । स्त्री । } नवमल्लिकाया
ग्रीष्मोद्भवा । स्त्री । } म् ॥

ग्रैवम् । न । ग्रीवाभरणे ॥ ग्रीवायांभवः । अण् ॥ त्रि । तद्वत्ये ॥

ग्रैवेयम् । न । कण्ठभूषणे ॥ ग्रीवायां भवम् । ग्रीवाभ्योण्चेतिढञ् ॥

ग्रैवेयकम् । न । कण्ठभूषायाम् ॥ ग्रीवायांभवम् । कुलकुक्षिग्रीवाभ्यःश्वास्यलङ्कारेष्वितिढकञ् ॥

ग्रैष्मिकः । पुं । ग्रीष्मसम्बन्धितोग्रन्थो ग्रीष्मः । तमधीतेवेदवा । वसन्तादिभ्यष्ठक् ॥

ग्रैष्मी । स्त्री । नवमल्लिकायाम् ॥ ग्रीष्मजायाम् ॥ ग्रीष्मेजातादिः । सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् । ङीप् ॥

ग्लपितः । त्रि । कर्शिते ॥

ग्लस्तः । त्रि । भक्षिते ॥ ग्लस्यतेस्म । ग्लसुअदने । क्तः ॥

ग्लहः । पुं । पणे । द्यूते लाभस्थाने । द्यूतादौजय्यत्वेनस्थापिते ॥ ग्लह्यते ऽनेन वा । ग्लहआदाने । पुंसीतिघः । हलश्चेतिघञ्वा । संज्ञापूर्वकत्वान्नवृद्धिः ॥ गृह्यते इतिवा ग्लहः । अक्षेषुग्लहइति देवनविषये-पक्षरूपेणग्राह्येवस्तुनि निपातनंवा ॥

ग्लाता। त्रि। ग्लानियुक्ते॥

ग्लामः। त्रि। रोगात्क्षीणकाये। ग्लासौ॥ रोगिणि॥ ग्लायतिस्म। ग्लै हर्षक्षये। गत्यर्थेति क्तः। संयोगादेरितिनत्वम्॥

ग्लानिः। स्त्री। अस्वाच्छन्द्ये। बलहीनतायाम्॥ रोगे॥ हानौ॥ अनुत्साहे॥ ग्लानम्। ग्लै॰। ग्लाज्याहाभ्योनिः॥

ग्लानिच्छेदी। त्रि। खेदहारिणि॥

ग्लावः। पुं। मैथेये। वकाख्यर्षौ। चैकितायने॥

ग्लास्नुः। त्रि। ग्लाने। रोगक्षीणदेहे॥ ग्लानशीलः। ग्लाजिस्थश्चग्स्नुः॥

ग्लेपनम्। न। दैन्ये॥ ग्लेपृ दैन्ये। ल्युट्॥

ग्लौः। पुं। मृगाङ्के। चन्द्रमसि॥ कर्पूरे॥ ग्लायति। ग्लै॰। ग्लानुदिभ्यांडौः॥

घः

घः। पुं। घकारे॥ घण्टायाम्॥ घर्घरशब्दे॥ इतिमेदिनिकरः॥

घटः। पुं। समाधिभेदे। कुम्भके॥ इभशिरः कूटे॥ कुटे। पृथुबुध्नोदराकारे। कम्बुग्रीवादिमदाकारविशेषे। कलसे॥ कुम्भराशौ॥ द्रोणपरिमाणे॥ घटते। घटचेष्टायाम्। पचाद्यच्॥

घटकः। पुं। वनस्पतौ॥ योजके। व्यवहारे॥ तल्लक्षणं यथा। धावको भावकश्चैव योजकश्शोधकस्तथा। दूषकस्तावकश्चैव षडेते घटकाः स्मृताः॥ अन्यच्च। के नो विदन्ति पुरुषाः पुरुषानुपूर्वीमुर्वीतले कुलभृतांपरिवर्त्तनं वा। अत्यन्तसूक्ष्ममपि येकुलतारतम्यंजानन्तितेपि घटकानतु योजकाख्याः॥ इत्यादिमिकैर्गौडदेशोद्भवैः कल्पिता कुलदीपिका॥ ह्रस्वघटे॥ घटयति। ण्यन्तात् घटेर्ण्वुल्॥

घटजन्मा। पुं। अगस्त्यमुनौ॥

घटदासी। स्त्री। कुट्टन्याम्। रततात्याम्॥

घटनम्। न। निर्माणे। घडना इति भाषा॥ घटेर्ल्युट्॥

घटना। स्त्री। हस्तिसङ्घे॥ करिणांघटना घटा॥ मेलने। योजनायाम्॥ यथा। अघटनघटनापटीयसी मायेति॥ घटनम्। घटसङ्घाते। चु॰। ण्यासश्रन्थोयुच्। टाप्॥

घटयोनिः। पुं। अगस्त्यमुनौ॥

घटराजः । पुं । कुम्भे ॥

घटा । स्त्री । घटने ॥ गजसंहतौ । घटनायाम् ॥ गोष्ठ्याम् ॥ समूहे ॥ घटनम् । घट० । घटादयः षित इति षित्त्वादङ् ॥

घटालाबुः । स्त्री । कुम्भतुम्ब्याम् ॥

घटिकः । पुं । चक्रिके । घटिकावादके ॥ घटीकायति । कै० । आतइतिकः । क्ष्यापोरितिह्रस्वः ॥ न । नितम्बे ॥ त्रि । घटेनतरणशीले ॥ घटेनतरति । नौद्व्यचष्ठन् ॥

घटिका । स्त्री । घडी इति भाषाप्रसिद्धे दण्डे । नाडिकायाम् ॥ घटिकाज्ञानोपायो यथा । निमेषो मानुषो योयं मात्रामात्रप्रमाणकः । तैः पञ्चदशभिः काष्ठा त्रिंशत्काष्ठास्तथाकला ॥ नाडिकातु प्रमाणेनकलादशचपञ्चच । उन्मानेनाम्भसःसा तु पलान्यर्द्धत्रयोदश ॥ हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः । मागधेन प्रमाणेन जलप्रस्थस्तुसंस्मृतः ॥ इतिविष्णुपुराणम् ॥ नैमित्तिकलयं प्रपञ्चयिष्यन् निमेषादिक्रमेण प्रथमांशोक्तमेवकल्पप्रमाणमनुस्मारयति निमेषइति सप्तभिः । मात्रैव मात्रं प्रमाणं यस्य । एकमात्रलघ्वक्षरोच्चारणकालसम्मितोहि निमेषः । निमेषकालस्तुल्योहि मात्रालघ्वक्षरश्च यत इतिब्रह्माण्डोक्तेः ॥ नाडिकाज्ञानोपायमाह । उन्मानेनेति सार्द्धेन । अम्भस उन्मानेन उन्मीयतेऽनेनेत्युन्मानं पात्रम् । अर्द्धेनयोगे त्रयोदश सार्द्धद्वादशेत्यर्थः । उन्मानरूपेण घटितानि सार्द्धद्वादशपलानि सानाडिका । सार्द्धद्वादशपलताम्रनिर्मितपात्रेण सानाडिकाज्ञातव्येत्यर्थः । किंप्रमाणंतत्पात्रं कार्यं तदाह । मागधेनप्रमाणेन जलप्रस्थस्तुसंस्मृत इति । सार्द्धद्वादशपलजलेनहि मागधदेशप्रस्थः पूर्यते । तत् प्रमाणंपात्रं कार्यमित्यर्थात् सिद्धम् । ननु तथापि पात्रेणकथं नाडिकाज्ञानं क्रियापरिच्छेद्यत्वात् कालस्येत्याशङ्क्य क्रियासिद्ध्यर्थं प्रस्थादि विशिनष्टि । हेमेति । माषः पञ्चगुञ्जः । हेम्नो माषैश्चतुर्भिश्चतुरङ्गुलेन शलाकारूपेण रचितैः कृतच्छिद्रा । एतदुक्तं भवति । सार्द्धद्वादशपलताम्रमयं मागधप्रस्थसंमित मूर्द्धायतं पात्रं चतुर्माषचतुरङ्गुलहेमशलाकया कृताधश्छिद्रं जलेस्थापितं तेन छिद्रेण यावता कालेन पूर्यते तावान् कालोनाडिकेति । तथाचशुकः । द्वादशार्द्धप

घोत्मानं धनुर्भि स्त्वतरङ्गुलैः । स्व यम्भाषैः कृतच्छिद्रं यावत् प्रस्थजल मुत्तमिति । इतितट्टीकायांश्रीधर स्वामिनः ॥ गुर्वक्षराणां मुदितं च षष्ट्या पलं पलानां घटिका किलै केति कालिदासः ॥ मुहूर्त्ते ॥ अल्पे घटे ॥ घट्येव । स्वार्थे कः ॥

घटितः । त्रि । निर्मिते ॥

घटी । स्त्री । घटिकायाम् । दण्डे । घड़ी इतिभाषा ॥ यथा । अस्मभ्यं यदायुःपलं स्वर्णभारै र्न हा लभ्य द त्तो मृथा याति कालः । इदानीम पि श्रीश्वरे मन्त चेतो विरक्तिस्त्व यं घोषयन्तीघटीवत्सलति ॥ स्वल्पे कुम्भे । घटिका इतिभाषा ॥ घट ते । घट० । अच् । जातित्वान् ङीष् ॥

घटीकारः । पुं । कुलाले ॥ घटींकरो ति । कृञः कर्मण्यण् ॥

घटीयन्त्रम् । न । अरघट्टे । कूपादे र्जलोद्धारणयन्त्रे । उद्घाटने ॥ घटी नामयन्त्रम् ॥ मूत्रघ्नीरोगभेदे ॥ यथा । नसुभिः पार्श्वयोः शूलं तथा जल घटीध्वनिः । तंवदन्ति घटीयन्त्र मसाध्यं मूत्रघ्नीमदमिति ॥

घटोत्कचः । पुं । हिडिम्बायां भीमसे नाज्जाते राक्षसविशेषे ॥

घटोत्कचान्तकः । पुं । कर्णे । राधेये । युधिष्ठिराग्रजे ॥

घटोद्भवः । पुं । अगस्त्यमुनौ ।

घट्टः । पुं । नद्यादौ स्नानार्थं भवत रणस्थाने । घाट इति भाषा ॥ ती- र्थावतारे ॥ शुल्कग्रहस्थाने । जगात इति भाषा ॥ घट्यतेऽत्र । घट्टचल ने । हलश्चेतिघञ् ॥

घट्टगा । स्त्री । नदीविशेषे ॥ यथा । मलापहा भीमरथीच घट्टगा यथा च कृष्णा जलसाम्यता गुणैः । मला पहा घट्टपयस्तथापि पथ्यं लघु स्वा दुतरं सुकान्तिदम् ॥ इति राजनि र्घण्टः ॥

घट्टजीवी । पुं । पाटुनि इतिगौडभाषा प्रसिद्धे वैश्यायां रजका ज्जाते वर्ण सङ्करजातिविशेषे ॥

घट्टनम् । न । अभिघाते ॥

घट्टना । स्त्री । चलनायाम् ॥ वृत्तौ ॥

घट्टितः । त्रि । निर्मिते । घडागमा इति भाषा ॥ चित्रपटार्थं रञ्जनाद्यङ्गेन लिप्ते वस्त्रादौ ॥

घरटः । पुं । व्यञ्जनविशेषे ॥

घरट्टकः । पुं ।
घरट्टकर्णः । पुं । } घेंटकोल इति गौडभाषाप्र- सिद्धे क्षुपविशेषे ॥

घरट्टा । स्त्री । काष्ठनिर्मिते यावचि-

शेषे । यथा । सर्ववाद्यमयी घण्टा वाद्याभावे नियोजयेदिति ॥ अतिबलायाम् । नागबलायाम् ॥ घण्टापाटलौ ॥ अहानि । बाहुलकादुन्तेष्टो घस्त्वश्च । टाप् ॥

घण्टाकर्णः । पुं । शिवस्यातिवल्लभे गणविशेषे ॥

घण्टाताडः । पुं । घडियावली घण्टा पाँडे इतिचभाषाप्रसिद्धे घण्टावादिनि ॥

घण्टानादः । पुं । कुबेरमन्त्रिणि ॥

घण्टापथः । पुं । पुरप्रधानमार्गे । महतिराजमार्गे । संसरणे ॥ यथा । दशधन्वन्तरो राजमार्गो घण्टापथः स्मृतः ॥ घण्टोपलक्षितः पन्थाः । शाकपार्थिवादिः ॥ यद्वा । घण्टानांपन्थाः । घण्टाग्रहणं वादित्राणां तद्वतां हस्त्यादीनां वोपलक्षणम् । ऋक्पूरिच्यः ॥

घण्टापाटलिः । पुं । गोलीढे । मुष्ककद्रुमे ॥ अहानि इति घण्टा । पटनम् । पटगतौ । घञ् । पाटं लाति । ला० । बाहुलकाड्डिः । घण्टाचासौ पाटलिश्च ॥

घाण्टारवा । स्त्री । वृक्षविशेषे । शणपुष्पिकायाम् । वनसण इति झणझणिया इतिच भाषा ॥ घण्टेव आरौ ति । कशब्दे । अच् ॥

घण्टाली । स्त्री । कोशातक्याम् ॥

घण्टावीजम् । न । जयपाले ॥

घण्टाशब्दम् । न । कांस्ये ॥ इतिहेमचन्द्रः ॥

घण्टिकः । पुं । घरियारास्थे यादोविशेषे ॥

घण्टिका । स्त्री । तालूर्द्ध्वस्थक्षुद्रजिह्वायाम् । लम्बिकायाम् ॥

घण्टिनीवीजम् । न । जयपाले ॥

घण्टुः । पुं । गजघण्टायाम् ॥ प्रतापे ॥

घण्टेश्वरः । पुं । मङ्गलपुत्रे वरदातरि देवताविशेषे ॥

घतनः । पुं । मारके ॥ हन्ति । हन० । हन्तेर्युश्चाद्यन्तयोर्घत्वतत्वे ॥

घनः । पुं । मुस्तायाम् ॥ अब्दे । मेघे ॥ ओघे ॥ दार्ढ्ये । काठिन्ये ॥ मूर्त्तिगुणः काठिन्यम् । असर्वगतद्रव्यपरिमाणं मूर्त्तिः । सैवगुणः ॥ विस्तारे ॥ लौहमुद्गरे ॥ हन्यते ऽनेनवा ॥ शरीरे ॥ कफे ॥ अभ्रके ॥ सजातीयाङ्कत्रयस्यपूरणे ॥ समत्रिघातश्च घनः प्रदिष्टइति भास्कराचार्योक्तेः ॥ न । कांस्यतालादिवाद्ये ॥ मध्यमनृत्ये ॥ नृत्यइत्युपलक्षणं गीतवाद्ययोः ॥ त्वचे ॥ लौहे ॥ त्रि । निविडे । सान्द्रे ॥ निरन्तरे । पूर्णे ॥ दृढे ॥ हननम् । हन्य

तेषायुमारा। घन० ॥ मूर्त्ती घन इति कल्लेरप् घनादेशश्च ॥

घनकफः। पुं। वर्षोपले। करकायाम् ॥ घनस्य कफइव ॥

घनकालः। पुं। वर्षाकाले ॥ घनस्य मेघस्य कालः ॥

घनगोलकः। पुं। संश्लिष्टरजतसुवर्णे। सोनारूपामिला इतिभाषा। इति हेमचन्द्रः ॥

घनच्छदः। पुं। शिग्रौ ॥

घनजम्बालः। पुं। चुलुके ॥

घनज्वाला। स्त्री। मेघदीप्तौ। वज्राग्नौ॥

घनतालः। पुं। सारङ्गविहगे ॥

घनतोलः। पुं। चातकपक्षिणि ॥

घनत्वम्। न। सान्द्रतायाम् ॥

घनत्वक्। पुं। लोध्रे ॥

घनद्रुमः। पुं। विकण्टकवृक्षे ॥

घननाभिः। पुं। धूमे ॥

घनपत्रः। पुं। पुनर्नवायाम् ॥

घनपदवी। स्त्री। आकाशे ॥

घनपल्लवः। पुं। शोभाञ्जने ॥

घनपाषण्डः। पुं। मयूरे ॥

घनप्रशः। पुं। प्राज्ञे। विशेष विज्ञान विरहिणि ॥ घनीभूताप्रज्ञायस्य ॥

घनफलः। पुं। विकण्टकवृक्षे ॥

घनमूलः। पुं। मोरटे ॥ न। पूरित सजातीयाङ्कत्रयस्याद्यङ्के ॥

घनरसः। पुं। न। मेघपुष्पे। जले॥ पुं। सान्द्रे ॥ निर्यासे ॥ मोरटे ॥ कर्पूरे ॥ पीलुपर्ण्याम् ॥ सम्यक्सिद्ध रसे ॥

घनवर्त्म। न। आकाशे ॥

घनवल्लिका। स्त्री। विद्युति ॥

घनवल्ली। स्त्री। अमृतस्रवालतायाम्॥

घनवातः। पुं। नरकविशेषे ॥

घनवासः। पुं। कुष्माण्डे ॥

घनवाहनः। पुं। शिवे ॥ मेघवाहने। इन्द्रे ॥ घनो वाहन मस्य ॥

घनवीथिः। स्त्री। अन्तरीक्षे ॥

घनश्यामः। पुं। श्रीरामे ॥ श्रीकृष्णे ॥ त्रि। निबिडकृष्णवर्णे ॥

घनसारः। पुं। कर्पूरे ॥ दक्षिणावर्त्त पारदे ॥ वृक्षविशेषे ॥ जले ॥ वर वारिदे ॥ घनो दृढः सारोऽस्य ॥ घनस्य सारइववा शीतत्वात् ॥

घनसूची। स्त्री। सूच्याकारेमेघे ॥

घनस्कन्धः। पुं। कोशाम्रवृक्षे ॥

घनस्वनः। पुं। तण्डुलीयशाके ॥ मेघध्वनौ ॥

घना। स्त्री। माषपर्ण्याम् ॥ रुद्रजटायाम् ॥ इतिराजनिर्घण्टः ॥

घनाकरः। पुं। वर्षाकाले ॥ घनानामाकर इव ॥

घनघर्मः। पुं। वर्षुकाब्दे ॥ मतघ।

मुककुञ्जरे ॥ चक्रे ॥ वासवे । इन्द्रे ॥ अन्योन्यघट्टने ॥ त्रि । निरन्तरे ॥ घातुके ॥ हन्ति । हन० । हन्तेर्घत्वञ्चेति पचाद्यचि द्वित्वम् आकृत्याभ्यासस्य ॥

घनाघना । स्त्री । काकमाच्याम् ॥

घनात्ययः । पुं । शरत्काले ॥

घनामयः । पुं । खर्जूरागमे ॥

घनामलः । पुं । शाकवीरे ॥ पुनर्नवायाम् ॥

घनाश्रयः । पुं । आकाशे ॥

घनोदधिः । पुं । नरकविशेषे ॥

घनोपलः । पुं । करकायाम् ॥

घरः । पुं । गृहे । गेहे ॥ हन्ति हन्यते गम्यतेऽतिथिभिर्वा । हन० । हन्तेरन्घश्चेतिरन् घादेशो नलोपश्चेति दशपादीवृत्तिकृत् ॥

घरट्टः । पुं । घराट इति पर्वतीयजन प्रसिद्धायां पेषण्याम् । जाँता चक्की इति च देशभाषा ॥

घर्घटः । पुं । चिकटमत्स्ये । घ्याङ्गरा इति गौड भाषाप्रसिद्धे ॥

घर्घरः । पुं । उलूकादिध्वनौ ॥ घाघरा इतिप्रसिद्धे नदविशेषे ॥ घूके ॥ द्वारे ॥ स्वरविशेषे ॥

घर्घरकः । पुं । घर्घरे नदे ॥ यथा । श्रोत घर्घरके जलन्तु रुचिदं सन्ताप-शोषापहं पथ्यं वह्निकरं तथा च बलदं वीर्याग्निवृद्धिप्रदमिति राजनिर्घण्टः ॥

घर्घरा । स्त्री । क्षुद्रघण्टिकायाम् ॥ वीणाप्रभेदे ॥ स्वरविशेषे ॥

घर्घरिका । स्त्री । क्षुद्रघण्टायाम् ॥ वादित्रदण्डे ॥ भृष्टधान्ये ॥ नदीविशेषे ॥ वाद्यप्रभेदे ॥

घर्घरी । स्त्री । क्षुद्रघण्टिकायाम् ॥

घर्घुर्घा । स्त्री । घुघुरे । घुरघुरिया इति गौड प्रसिद्धे कीटे ॥

घर्म्मः । पुं । निदाघे । स्वेदे । श्रमवारिणि । पसीना इति भाषा ॥ आतपे ॥ ग्रीष्मे ॥ उष्मणि ॥ जिघर्त्त्यङ्गमनेन । घृक्षरणदीप्त्योः । घरत्यङ्ग मनेनवा । घृ सेके । घर्मइति घृधातोर्मग्गुणश्चनिपात्यते ॥

घर्म्मवारणम् । न । छत्रे ॥

घर्म्मविचर्चिका । स्त्री । घर्मविचर्च्याम् । घमाची अम्भौरी घमौरी अलाई इत्यादि भाषा ॥ स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा । ततः स्वेदः प्रवर्त्तेत दौर्गन्ध्यं घर्मचर्चिका ॥ राजिकाकृति कण्डोत्था यतो घर्मविचर्चिका ॥

घर्म्मान्तः । पुं । वर्षाकाले ॥

घर्म्मान्तकामुकी । स्त्री । बलाकायाम् ॥

घर्म्मितः । त्रि । सञ्जातघर्म्मः ॥ तारका

दिस्वादित्वात् च ॥

घर्षः । पुं । विमर्द्दे । घसना इतिभाषा ॥

घर्षणम् । न । घर्षे । निघर्षे । घसना इतिभाषा ॥ घृषुसङ्घर्षे । ल्युट् ॥

घर्षणालः । पुं । पेषणाश्मनि । शिलापुचे । लोढा वट्टा रमणा इत्यादि भाषा ॥

घर्षणी । स्त्री । हरिद्रायाम् ॥

घसिः । पुं । आहारे ॥

घस्मरः । पुं । अस्मरे । भक्षके ॥ घसति तच्छीलः । घस्लृ अदने । सृघस्यदः क्मरच् ॥

घस्रः । पुं । अहनि । दिवसे ॥ घसत्यन्धकारम् । घस्लृ० । स्फायितञ्चीति रक् ॥ न । कुङ्कुमे ॥ त्रि । हिंस्रे ॥

घा । स्त्री । काञ्च्याम् ॥ घाते ॥

घाटः । पुं । अवटौ । ग्रीवापश्चाद्भागे । घाटायाम् ॥ घाटेरच् घञ्वा ॥ घाटाऽस्याऽस्ति वा । अर्शआद्यच् ॥

घाटा । स्त्री । घाटे । कृकाटिकायाम् । शिरसः पश्चात् सन्धौ ॥ घाटयति । घाट्यते वा । घटसङ्घाते । चु० । अच् घञ्वा ॥

घाटिका । स्त्री । घाटायाम् ॥ घाटेव ॥

घाण्टिकः । पुं । चाक्रिके । मिलितानां राजस्तावकानां संघेयम् । बहुभिर्मिलित्वास्तुतिपाठके ॥ घण्टया चरति । चरतीतिठक् ॥ अन्यत्तु । राज्ञः प्रबोधसमये घण्टाशिल्पास्तु घाण्टिकाः ॥ धुस्तूरवृक्षे ॥ चि । घण्टावादिनि ॥

घातः । पुं । काण्डे । वाणे ॥ प्रहारे ॥ मारणे ॥ अङ्कपूरणे ॥ यथा । सन्निघातस्त्वघनः प्रदिष्टः ॥ हननम् । हन० । घञ् । हनस्तोचिण्णलोः । होहन्तेरितिकुत्वम् ॥

घातकः । चि । वधकृति । हननकर्त्तरि ॥ वहूनामेककार्य्याणां सर्वेषां शस्त्रधारिणाम् । यद्येको घातकस्तत्र सर्वेते घातकाः स्मृताः ॥ हन्ति । हन० । ण्वुल् । हनस्तोचिण्णलोः । होहन्तेरितिकुत्वम् ॥

घातनम् । न । हनने ॥ वधे ॥ यज्ञार्थंपशुवधे ॥ त्रि । वधकर्त्तरि ॥

घातवारः । पुं । राशिविशेषे विशेषवारे ॥ यथा । नक्रे भौमो गोहरिण्योश्शमन्द श्चन्द्रोद्वन्द्वेऽर्कोऽजभे च श्चकर्के । शुक्रः कोदण्डालिमीनेषु कुम्भयूकेजीवो घातवारानशस्ता इति ॥

घातिः । स्त्री । पक्षिबन्धने ॥

घाती । चि । हननशीले ॥ घातयति हन्ति तच्छीलः । णिनिः ॥

घातिपक्षी । पुं । श्येने ॥

घातुकः । त्रि । क्रूरे ॥ हिंस्रे ॥ हन्ति । हन० । लषपतपदेत्युकञ् ॥

घात्यः । त्रि । हननयोग्ये ॥ यथा । सत्यं भावं न वित्ति व्यपनुदति यतः कर्मनाश्यो घटादिर्मिथ्याभूतञ्च कर्म क्षपयति न तथा वित्तिघात्यं यतस्तत् । इत्थं सिद्धे विभागे श्रुतिशिखरगिरा वित्तिघात्यप्रतीतौ बन्धो मिथ्येतिसिद्धे न तदपहतये कर्मजातं समर्थमिति ॥

घारः । पुं । सेचने ॥ इतिहेमचन्द्रः ॥

घारि । न । छन्दोविशेषे ॥ रं विधाय लं निधाय । घारिनाम वृत्तमेहि ॥ यथा । रामराम रामराम । सारमेतदेव नाम ॥

घारिकः । पुं । घृतपूरे ॥

घासः । पुं । यवसे । स्वनामख्याते तृणे ॥ अद्यते गवादिभिः । अद० । घञ् । घञपोश्चेति अदेर्घस्लृ ॥

घासिः । पुं । अग्नौ ॥ भक्ष्ये ॥ घसति । घस्लृ अदने । जनिघसिभ्यामिण् ॥

घुः । पुं । ध्वनौ ॥ इतिजटाधरः ॥

घुटः । पुं ।
घुटिः । स्त्री । } पादग्रन्थौ । गुल्फे । टकुना इतिभाषा ॥
घुटिकः । पुं ।

घुटिका । स्त्री । गुल्फे । पादग्रन्थौ ॥ घोटतेऽनया । घुटपरिवर्त्तने । कुन् । टाप् । इत्वम् ॥

घुटी । स्त्री । गुल्फे ॥ इतिद्विरूपः ॥

घुणः । पुं । काष्ठकृमौ । काष्ठवेधके ॥ घोणते । घुणभ्रमणे । इगुपधेतिकः ॥

घुणप्रिया । स्त्री । दन्त्याम् । उदुम्बरपर्ण्याम् ॥

घुणवल्लभा । स्त्री । अतिविषायाम् ॥ इतिभावप्रकाशः ॥

घुण्टः । पुं ।
घुण्टकः । पुं । } गुल्फे । पादग्रन्थौ ॥

घुण्डः । पुं । भृङ्गे ॥ घोणते । घुण० । कादिभ्यःकिदितिडः ॥

घुर्घुरः । पुं । यमकीटे । घुर्घुरिया इतिगौडभाषा ॥ शूकरशब्दे ॥

घुर्घुरी । स्त्री । जलजन्तुविशेषे । झि- ल्लिकायाम् ॥

घुलञ्चः । पुं । गवेधुकायाम् ॥

घुलघुलारवः । पुं । पारावतप्रभेदे ॥

घुषितः । त्रि । शब्दिते ॥ शब्देन प्रकटीकृताभिप्राये वाक्ये ॥ घुषिर् विशब्दने । क्तः ॥

घुष्टः । त्रि । शब्दिते ॥ घुष्यतेस्म । घुषिर्० । क्तः ॥

घुष्टान्नम् । न । को भोक्तेत्युद्घुष्य सत्रादौ दीयमानेऽन्ने ॥

घूकः । पुं । कौशिके । उलूके ॥

घूकारि: । पुं । वायसे । काके ॥

घूकावास: । पुं । शाखोटद्रुमे ॥

घूर्ण: । पुं । ग्रीष्मसुन्दरके । गुमा इति प्रसिद्धे ॥

घूर्णनम् । न । चक्रावर्त्ते । भ्रमणे ॥

घूर्णायमान: । त्रि । भ्राम्यमाणे ॥ घूर्णायमानेचर्णेतियथा ॥

घूर्णि: । स्त्री । घूर्णने ॥

घूर्णित: । त्रि । प्रचलायिते । भ्रमिते । य उपविष्टो निद्रया घूर्णते तस्मिन् ॥ घूर्णतेस्म । घूर्णभ्रमणे । गत्यर्थेति क्त: ॥ घूर्णासञ्जातास्यवा । तारकादित्वादितच् ॥ कम्पिते ॥

घूर्ण्यमान: । त्रि । भ्राम्यमाणे ॥ वायुनाघूर्ण्यमानोवृक्ष: ॥

घृणा । स्त्री । ऋतीयायाम् । जुगुप्सायाम् ॥ करुणायाम् । कृपायाम् ॥ घ्रियन्तेऽनया । घृसेचने । बाहुलकान्नक् । टाप् ॥ घृणनम् । घृणुदीप्तौ । भिदाद्यङ् वा ॥

घृणावास: । पुं । कुष्माण्डे ॥ त्रि । घृणायुते ॥

घृणि: । पुं । किरणे । अंशौ ॥ ज्वालायाम् ॥ तरङ्गे ॥ सूर्य्ये ॥ घरति । घृ॰ जिघर्त्तिवा । घृक्षरणदीप्त्यो: । घृणिपृश्नीतिनिप्रत्ययोगुणाभावश्चनिपातित: ॥

घृतम् । त्रि । प्रदीप्ते ॥ न । जले ॥ आज्ये । पक्वनवनीते । सर्पिषि ॥ अस्यगुणा: ॥ घृतं रसायनं स्वादु चक्षुष्यं वह्निदीपनम् । शीतवीर्य्यं विषालक्ष्मीपापपित्तानिलापहम् ॥ अल्पाभिष्यन्दि कान्त्योजस्तेजोलावण्यवृद्धिकृत् । स्वरस्मृतिकरं मेध्यमायुष्यं बलकृद्गुरु ॥ उदावर्त्तज्वरोन्मादशूलानाहव्रणान् हरेत् । स्निग्धं कफकरं रक्ष:क्षयवीसर्परक्तनुत् ॥ * ॥ गव्यं घृतं विशेषेण चक्षुष्यं वृष्यमग्निकृत् । स्वादुपाकरसं शीतं वातपित्तकफापहम् ॥ मेधालावण्यकान्त्योजस्तेजोवृद्धिकरं परम् । अलक्ष्मीपापरक्षोघ्नं वयस:स्थापकं गुरु ॥ बल्यं पवित्रमायुष्यं सुमङ्गल्यं रसायनम् । सुगन्धं रोचनं चारु सर्वाज्येषु गुणाधिकम् ॥ * ॥ माहिषन्तु घृतं स्वादु पित्तरक्तानिलापहम् । शीतलं श्लेष्मलं वृष्यं गुरु स्वादुविपच्यते ॥ * ॥ आज माज्यं करोत्यग्निं चक्षुष्यं बलवर्द्धनम् । कासे श्वासे क्षये चापि हितं पाके भवेत् कटु ॥ * ॥ घृतं दुग्धभवं ग्राहि शीतलं नेत्ररोगहृत् । निहन्ति पित्तदाहास्रमदमूर्च्छाभ्रमानिलान् ॥ * ॥ ह-
विर्हस्तनदुग्धोत्थं तत् स्वादु मङ्गवी

नकम्। स्थैर्य्यकरं वीर्य्यकरं चक्षुष्यं दीपनं बलवर्द्धकं परम्। बलकृद्वृंहणं वृष्यं विशेषाज्ज्वरनाशनम् ॥ * ॥ वर्षाद्दूर्द्धं भवेदाज्यं पुराणं तत् त्रिदोषनुत्। मूर्च्छाकुष्ठविषोन्मादापस्मारतिमिरापहम् ॥ यथायथाऽखिलं सर्पिः पुराणमधिकं भवेत्। तथा तथा गुणैः स्वैः स्वैरधिकं तदुदाहृतम् ॥ * ॥ योजयेन्नवमेवाज्यं भोजने तर्पणे श्रमे। बलक्षये पाण्डुरोगे कामलानेत्ररोगयोः ॥ * ॥ राजयक्ष्मणि बाले च वृद्धे श्लेष्मकृते गदे। रोगे सामे विषूच्याञ्च विबन्धे च मदात्यये ॥ ज्वरे च दहने मन्दे न सर्पिर्बहुमन्यते ॥ * ॥ घृतमब्दात् परं पक्वं हीनवीर्य्यत्वमाप्नुयात्। तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकमिति ॥ * ॥ औषधघटितपक्वघृतस्य पूर्णवीर्य्यत्वं षण्मासपर्य्यन्तं तिष्ठति ॥ म्रियते जिघर्त्ति वा। घृ०। अञ्जिघृसिभ्यः क्तः ॥

घृतकरञ्जः। पुं। करञ्जभेदे। प्रकीर्य्ये। घृतपर्णके। घियाकरञ्ज इति भाषा ॥

घृतकुमारिका। स्त्री। घृतकुमार्य्याम् ॥

घृतकुमारी। स्त्री। कुमार्य्याम्। सहायाम्। तरण्याम् ॥

घृतदीधितिः। पुं। अग्नौ ॥

घृतपर्णकः। पुं। घृतकरञ्जे ॥

घृतपूरः। पुं। घेवर इति प्रसिद्धे पक्वान्नविशेषे। घृतवरे। पिष्टपूरे ॥ यथा। मर्द्दितां समितां क्षीरनालिकेरघृतादिभिः। अवगाह्य घृते पक्त्वा घृतपूरोऽयमुच्यते ॥ घृतपूरो गुरुर्वृष्यः कफकृद्रक्तमांसदः। रक्तपित्तहरो-हृद्यः स्वादुः पित्तहरोऽग्निदः ॥ अपि च। क्षीरेण मर्द्दितं चूर्णं गोधूमानां सुगालितम्। विस्तार्य सर्पिषा पाच्यं कटाहेऽथ सितान्वितम् ॥ घृतपूरोऽयमुद्दिष्टः कर्पूरमरिचान्वितः ॥ नालिकेरजस्तु। समिता मर्द्दिता क्षीरे नालिकेरसितार्द्रकैः। अवगाह्य घृते पाच्या घृतपूरोऽपरः स्मृतः ॥ दुग्धजोऽपि। पाकपिण्डीकृतं क्षीरं शर्कराचूर्णमिश्रितम्। घृतपूरविनिर्माणं कारयेत् स्वल्पसर्पिषि ॥ शालिभवोऽपि। सुशालिपिष्टं दुग्धन्तु क्वाथितं वस्त्रगालितम्। खण्डयुक्तं घृते पक्वं घृतपूरो भवेदयम् ॥ कशेरुजोऽपि। कशेरुचूर्णं निःक्षिप्य पाकपिण्डीकृतं पयः। निर्माणं घृतपूराणां शर्करासहितं भवेत् ॥ आम्ररसभवोऽपि। पक्वाम्रस्य घृते तप्ते रसस्त्वनलपिण्डितः। शुद्धशर्करया

योज्यो घृतपूरो यहच्छया ॥ चीर
मायं स्वल्पपिष्टकं चूर्णं ततः घृ
तम् । योजिते योविशेषो ऽत्र सहा
ख्यास्वर्णसंश्रितः ॥ घृतपूरो गुरुर्वृ-
ष्यो हृद्यः पित्तानिलापहः । सद्यः
प्राणप्रदो बल्यः सुरुच्यो ऽग्निप्रदीपनः
॥ शृङ्गाटकमुखाना मप्येवंस्याद् घृत
पूरकः । विचार्य वस्तुसंयोगं तद्गुणा
नपिचाहरेदिति ॥

घृतपूरः । पुं । } करञ्जवृक्षे ॥
घृतपूर्णकः । पुं । }

घृतमण्डलिका । स्त्री । हंसपदीवृक्षे ॥

घृतमण्डा । स्त्री । मायसुरखी इतिख्या
ते वायसोलीवृक्षे ॥

घृतवरः । पुं । घृतपूरे । घेवर इति-
भाषा ॥

घृता । स्त्री । घृतमण्डायाम् ॥

घृताची । स्त्री । अप्सरोविशेषे ॥

घृतार्चीगर्भसम्भवा । स्त्री । स्थूलैला-
याम् ॥

घृताह्वः । पुं । } सरलद्रवे ॥
घृताह्वयः । पुं । }

घृतेली । स्त्री । पिङ्गकपिशायाम् ॥

घृतोदः । पुं । घृताब्धौ ॥ घृतमुदकंय
स्य । उत्तरपदस्यचेत्युदकस्योदः ॥

घृष्टः । त्रि । घर्षिते । निघृष्टे । घसा इ
ति भाषा । पुं । गन्धविशेषे ॥ यथा
। घृष्टोऽनलयुतो गन्धः सरलस्य मते
यथा । अगुरुप्रभृतिष्वापि मलयाङ्कः
प्रदीयते । घृष्टास्तदृष्टो गन्धोऽयं
द्वितीयः परिकीर्त्तितइति ॥

घृष्टिः । पुं । किरौ । वराहे ॥ स्त्री ।
घर्षणे ॥ स्वद्धीयाम् ॥ विष्णुक्रान्ताया
म् । अपराजितायाम् ॥ वाराह्याम्
। चामर आलु इति गौड भाषा ॥
घर्षति । घृषुसङ्घर्षे । तिच् ॥

घृष्टिका । स्त्री । शिम्बपर्णिकायाम् । पृ
श्निपर्ण्याम् ॥

घृष्विः । पुं । वराहे । शूकरे ॥ घर्षति
। घृषु० । कुविघृष्विच्छविस्थविकि
कीदिविरिति क्विन्नन्तोनिपातसि-
द्धः ॥

घेञ्चुलिका । स्त्री । क्रौञ्चादने । घेंचु
इतिगौडभाषा ॥

घोङ्कः । पुं । खगान्तरे ॥

घोटः । पुं । अश्वे । घोटके ॥ घोटते
। घुटपरिवर्त्तने । पचाद्यच् ॥

घोटकः । पुं । घोडा इतिभाषाप्रसिद्ध प
शुविशेषे । अश्वे । तुरगे । वीतौ ।
तुरङ्गमे ॥ अथाऽश्वलक्षणम् । दी
र्घग्रीवाक्षिकूटस्त्रिकहृदयपृथुस्ताम्र
ताल्वोष्ठजिह्वः सूक्ष्मत्वक्केशवालः
सुशफगतिमुखो ह्रस्वकर्णौष्ठपुच्छः ।
जङ्घाजानूरुवृत्तः समसितदशन सा

घोटके

वर्णत्रयान्वितो वाजी सर्वाङ्गशुद्धो भवति नरपतेः यशुनाशाय नित्यम् ॥ * ॥ अशुभानां रोमावर्त्तानां लक्षणमाह । अश्रुपातहनुगण्डहृद्गलप्रोथशङ्खकटिवस्तिजानुषु । मुष्कनाभिककुदे तथा गुदे सव्यकुक्षिचरणे तथाऽशुभाः ॥ ० ॥ शुभावर्त्तानाह । ये प्रपाणगलकर्णसंस्थिताः पृष्ठमध्यनयनोपरिस्थिताः । ओष्ठसक्थिभुजकुक्षिपार्श्वगा ललाटसंस्थिताः सुशोभनाः ॥ * ॥ ध्रुवावर्त्तानाह । तेषां प्रधान एको ललाटकेशेषु च ध्रुवावर्त्ताः । रन्ध्रोपरन्ध्रमूर्द्धनि वक्षसि चेति स्मृतौ द्वौ द्वौ ॥ ॥ अश्वानां वयोज्ञानमाह । षड्भिर्दन्तैः सिताभैर्भवति हयशिशुस्तैः कषायैर्द्विवर्षः सन्दंशैर्मध्यमान्त्यैः पतितसमुदितैस्त्र्यब्दपञ्चाब्दकाश्वाः । सन्दंशानुक्रमेण त्रिकपरिगुणिताः कालिकापीतशुक्लाःकाचाभक्षौद्रशङ्खावटचलनमतो दन्तपातं च विद्धि ॥ इति वाराह्यां चतुष्ष[illegible]तमोऽध्यायः ॥ ६४ ॥

घोटकारिः । पुं । महिषे ॥

घोटकेङ्गितम् । न । अश्वचेष्टायाम् ॥ [illegible]यथा । उत्सर्गो [illegible] [illegible]न । [illegible] तघञ् ॥ गोपाले ॥ ध्वनौ

घोटके

भवम् । सर्वाङ्गज्वलनप्रवृद्धिरुद्धषाणां रवषे रुदनं कलाश्च धूपनं वा ॥ अन्तः पुरं नाशमुपैति मेढ्रे कोशः स्वयं याप्युदरे प्रदीप्ते । वायौ च पुच्छे च पराजयः स्याद्वक्त्रोत्तमाङ्गज्वलने जयश्च ॥ स्कन्धासनांसज्वलनं जयाय बन्धाय पादज्वलनं प्रदिष्टम् । ललाटवक्षोक्षिभुजेषु धूमः पराभवाय ज्वलनं जयाय । नासापुटप्रोथशिरोऽश्रुपातनेत्रे[illegible] रात्रौ ज्वलनं जयाय । पलाशम[illegible] सितकर्बुराणां नित्यं शुक्लाभस्य [illegible] च चेष्टम् ॥ प्रद्वेषो यवसाम्भसां प्रपतनं स्वेदो निमित्तं विना कम्पो वा वदनाच्च रक्तपतनं धूमस्य वा सम्भवः । अस्वप्नश्च विरोधिनां निशि दिवा निद्रालसं ध्यानता सादोऽधोमुखता विचेष्टितमिदं नेष्टं स्मृतं वाजिनाम् ॥ आरोहणमन्य[illegible]वाजिनां पर्याणादियुतस्य वाजिनः । उपवाह्यतुरङ्गमस्य वा कलुषस्यैव विपत्प्रशोभना ॥ * ॥ हेषितलक्षणमाह । क्रौञ्चवद्रिपुवधाय हेषितं ग्रीवया त्वचलया च सोन्मुखम् । स्निग्धमुच्चमनुनादि हृष्टवद्ग्रासरुद्धवदनैश्च वाजिभिः ॥ पूर्णपात्रदधिविप्रदेवतागन्धपुष्पफलकाञ्चना-

[illegible]

घ्रायतेऽनेन । घ्रा + भ[illegible] करणे ल्युट् ॥ घ्रायतेऽस्या वा । घ्रा०

वे हेषन्तो यदि समीपतो जयः ॥ भक्ष्यपानखलिनाभिनन्दिनः पत्युरौपयिकनन्दिनोऽथवा । सव्यपार्श्वगतदृष्टयोऽथवा वाञ्छितार्थफलदास्तुरङ्गमाः ॥ वामैश्च पादैरभितो ज्वलन्तो मर्त्यप्रवासाय भवन्ति भर्त्तुः । सन्ध्यासु दीप्तामवलोकयन्तो हेषन्ति चेद्बन्धपराजयाय ॥ अतीव हेषन्ति किरन्ति वालान् निद्रारताश्च प्रवदन्ति यात्राम् । रोमत्यजो दीनखरस्वनाश्च पांशून् ग्रसन्तश्च भयाय दृष्टाः ॥ * ॥ समुन्नमद्दक्षिणपार्श्वशायिनः पादं समुत्क्षिप्य च दक्षिणस्थिताः । जयाय शेषेष्वपि वाहनेष्विदं फलं यथासम्भवमादिशेद्बुधः ॥ आरोहति क्षितिपतौ विनयोपपन्नो यात्रानुगोऽन्यतुरगं प्रतिहेषितश्च । वक्त्रेण वा स्पृशति दक्षिणमात्मपार्श्वं योऽश्वः स भर्त्तुरचिरात् प्रचिनोति लक्ष्मीम् ॥ मुहुर्मुहुर्मूत्रशकृत् करोति न ताड्यमानोऽप्यनुलोमयायी । अकार्यभीतोऽश्रुविलोचनश्च शिवं न भर्त्तुस्तुरगोऽभिधत्ते ॥ इति वाराह्यां ९१ अध्यायः ॥

घोटिका । स्त्री । हस्तिलोमयाम् । लोनी इतिभाषा ॥ घोटिकाऽम्लरसा लोणा-

-न्दोषव्रणगुल्मघ्नी श्वासकासप्रमेहनुत् ॥ शोथे लोचनरोगेषु हिता तज्ज्ञैः प्रदाहृता ॥ वृक्षविशेषे । तुरङ्ग्याम् । चतुरङ्गायाम् ॥

घोणा । स्त्री । नासायाम् ॥ प्रोथे । अश्वनासिकायाम् ॥ घोणति अनया वा । घुण भ्रमणे । अच् हलश्चेति घञ्वा ॥

घोणी । पुं । वराहे । स्तब्धरोमणि ॥ घोणा नासाऽस्यास्य । व्री० इनिः ॥

घोण्टा । स्त्री । बदर्याम् । गोपघोण्टायाम् । भडवेरी इति भाषा ॥ पूगवृक्षे ॥ घोणते । घुण० । बाहुलकात् टः ॥ बदरीफलवृक्षयोः ॥

घोत्कारः । पुं । नासिकायाःशब्दे । घुर्राटा इति भाषा ॥

घोनसः । पुं । गोनसे । तिलित्सेसर्पे ॥

घोरः । पुं । त्रिपुरान्तके ॥ आङ्गिरसगोत्रोत्पन्ने ऋषिविशेषे ॥ आकाशादिषु स्थूलेषु दुःखप्रकाशकाः अनवस्थिताः रजःप्रधानतया केचिद्विशेषास्ते च घोरसंज्ञकाः ॥ न । विषे ॥ त्रि । दारुणे । भयानके ॥ हिंसाद्यनेकायासबहुलेक्रूरे ॥ परस्यात्मनश्चपीडाकरे ॥ दुर्गमे ॥ घोरयति । घुरभीमार्थशब्दयोः । णयन्तादच् ॥ यद्वा । हन्यते । हन० ।

स्यच धातोर्घुरादेशः ॥

घोरदर्शनः । पुं । उलूके ॥ त्रि । भयानकरूपे ॥

घोरपुष्पम् । न । कांस्ये ॥

घोरवासनः । पुं ।] शृगाले । भरि-

घोरवासी । पुं ।] माये ॥

घोरवासितम् । न । भयानकशब्दे ॥

घोरा । स्त्री । रात्रौ ॥ देवदालीलतायाम् ॥ भयानकायाम् ॥ सङ्क्रान्तिविशेषे ॥ रवाग्रभे सङ्क्रमे भास्करस्य भवेद्घोरनाम्नी सुखी शूद्रवर्गः ॥ राजस्थां मनसोहत्री ॥

घोलम् । न । मथितेदधनि । दण्डाहते ॥ ससरं निजलं घोलं वातपित्तहरं स्मृतम् ॥ * ॥ मस्तुना रहितं गाल्यं दधिशुभ्रतरे पटे । जीरसैन्धवसम्मिश्रं घोलं घनतरं स्मृतम् ॥ जीरसैन्धवसंयुक्तं घोलं वातप्रनाशनम् । अतीसारेत्र मन्देग्नौ हितं रुच्यं बलप्रदम् ॥

घोलिः । स्त्री ।] पत्रशाकविशेषे

घोलिका । स्त्री । } । कुक्कालुकायाम् ॥

घोली । स्त्री ।]

घोषः । पुं । आभीरपल्ल्याम् ॥ घोषन्तिगावो ऽत्र । घुषिर्विशब्दने । हलश्चेतिघञ् ॥ गोपाले ॥ ध्वनौ ॥ ... ादे ॥ अ...

॥ वाह्यप्रयत्नविशेषे ॥ पुं । कांस्ये ॥

घोषणम् । घुषघुंष्टौ । घञ् ॥

घोषकः । पुं । मृगकोशातक्याम् । श्वेतघोषके ॥ घोषति । घुषिर्०। पं चायच । स्वार्थेकन् ॥

घोषकाकृतिः । पुं । घोषके ॥

घोषणा । स्त्री । उच्चैर्घुष्टे । लोकविज्ञापनायोच्चैः शब्दिते ॥ यथा । मकर्मणा कनीयस्या द्विर्वा नान्तरात्मनः । इति वाह्मिकेवादृस्य बेदान्ते घोषणां कृतेति ॥ घुषिर्० । गयासश्रन्थो युच ॥

घोषयित्नुः । पुं । विप्रे ॥ कोकिले ॥ घोषयति । घुषिर्० । वाहुलकात् इत्नुच ॥ वन्दिनि ॥

घोषवती । स्त्री । वीणायाम् ॥

घोषा । स्त्री । मधुरिकायाम् ॥ शतपुष्पायाम् ॥ कर्कटशृङ्ग्याम् ॥ कोशातक्याम् । तुरयी तोरश्री इति खप्रसिद्धे फलशाके ॥

घ्नन् । त्रि । नुदति ॥

घ्राणम् । न । नासिकायाम् । गन्धग्रहणलिङ्गेन्द्रिये ॥ न्यायमते घ्राणेन्द्रियग्राह्योगन्धत्वादौ ॥ त्रि । घ्राते ॥ घ्रायतेऽनेन । घ्राणन्धोपादाने । करणेल्युट् ॥ घ्रायतेस्मवा । घ्रा० । नद्विदेति वा नत्वम् ॥

घ्रातः

घ्राततर्पणः । पुं । सुगन्धौ ॥

घ्राणदुःखदा । स्त्री । छिक्कन्याम् ॥

घ्रातः । त्रि । घ्राणविषयीकृते पुष्पादौ । घ्रातगन्धे । आघ्राते । घ्राणे ॥ घ्रायते स्म । घ्रा० । क्तः । नुदविदेति पाक्षिकोनत्वाभावः ॥

ङः

घ्रातिः । स्त्री । घ्राणे । नासिकायाम् ॥ घ्राते ॥ घ्राणम् । घ्रा० । क्तिन् ॥

ङः

ङः । पुं । विषये ॥ विषयस्पृहायाम् ॥ भैरवे ॥ ङकारे ॥ * ॥ * ॥

इत्यादिगौडकुलोत्पन्नडौचवालप्रधानोपनामतुलाराममिश्रात्मज श्रीधनपतिमिश्रापरनाम्ना तथा श्रीसद्गुरुब्रह्मावधूतश्रीपरमहंसपरिव्राजकाचार्यश्रीमद्धरिहरानन्दनाथभारतिशिष्येण ब्राह्मावधूतश्रीसुखानन्दनाथपरनामधेयेन विरचिते शब्दार्थचिन्तामणौ कवर्गः समाप्तिङ्गतः ॥ * ॥ * ॥

सर्वार्थसिद्धौ सर्वेषां सुखानन्देन निर्मितः ॥
श्रीघासीराममिश्रैस्तु मुद्रालिप्या प्रकाशितः ॥

वैक्रमे १९२१ शरदि । शालिवाहनीये १७८६ शके मार्गशीर्षासितैकादश्यां सुराचार्यवारे स्तम्भपुरे श्रीघासीरामकनहियालालयोः
स्वकीयसंस्कृतयन्त्रे वर्णयोजकाध्यक्षकायस्थवंशोद्भव
श्रीरामप्रसाददासदृष्ट्या
मुद्राङ्कितः ॥